वा॰टी॰ उप॰
१

श्रीगणेशाय नमः॥ श्रीसीतारामचंद्राभ्यां नमः॥ हनुमते नमः॥ भुवनरचनपालनोपशांतिप्रथितमहाविभवस्वभावपूर्णं॥ निगमहृदयसाक्षि निष्प्रपंचं निजसुखबोधघनं शिवं प्रपद्ये॥ उत्पत्तिप्रकरणे सर्वसृष्टिश्रुतितात्पर्योद्धारेणायमनोधीनैव सर्वप्रपंचरचनेति दर्शितं स्थितिप्रकरणे च सर्वजगत्स्थितिप्रतिपादकश्रुतितात्पर्यप्रदर्शनाय मनःस्थित्यधीनैव सर्वप्रपंचस्थितिरिति दर्शितं इदानीं यथा गार्ग्यमरीचयोऽर्कस्यास्तं गच्छत एतस्मिंस्तेजोमंडले एकीभवंति॥ सुषुप्तिकाले विलीनेयत्प्राणेष्वपिसं विशंति॥ यथा नद्यः स्यंदमानाः समुद्रेऽस्तं गच्छंति नामरूपे विहाय गताः कलाः पंचदश प्रतिष्ठं॥ एवमेवास्य परिद्रष्टुरिमाः षोडशकलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छंतीत्यादीनां सुषुप्तिप्रलयसमाधिसाक्षात्कारविदेहकैवल्येषु प्रपंचोपशमाज्जीवस्य ब्रह्मस्वभावताप्राप्तिप्रतिपादनेन प्रत्यग्ब्रह्मैकरसाखंडवस्तुलक्षकश्रुतीनामपि मनउपशमादेव सर्वप्रपंचो [२]

[सकले]

श्रीवसिष्ठ उवाच॥ अथ स्थितिप्रकरणादनंतरमिदं शृणु॥ उपशमप्रकरणं ज्ञातं निर्वाणकारि यत् ॥१॥
वाल्मीकिरुवाच॥ शरत्तारकिताकाशस्तिमितायां सुसंसदि॥ कथयत्येवमाह्लादि वसिष्ठे पावनं वचः ॥२॥

पशमेन स्वरूपप्रतिष्ठायां तात्पर्यमिति रहस्योद्धारणायोपशमप्रकरणमारभमाणः पूर्वोत्तरप्रकरणयोः संगतिं दर्शयन् विषयप्रयोजने निर्दिश्य शिष्यमवधानयन् प्रतिजानीते अथेति मध्याह्नशंखध्वनिना सभोत्थानमिहोच्यते वसिष्ठस्याह्निकं रात्रौ विश्वामित्रमहस्थितिः अथ स्थितिप्रतिपादकश्रुतितात्पर्यवर्णनानंतरं उपसंहारबोधकश्रुतितात्पर्यवर्णनस्यावसरसंगतेरित्यर्थः॥ ज्ञातं निर्वाणकारीति तथा च पूर्वप्रकरणप्रयोजनमेवास्यापीत्येककार्यकारितासंगतिरपि दर्शिता बोद्धव्या १ शरत्तारकित्यादि कथासंदर्भः समयोचिताचारव १
ते

श्यकत्वद्योतनार्थः शरदि तारकितः संजाततारक आकाश इव स्तिमितायां सर्वेषां सभ्यानां तत्परतानां मध्याह्ने स्वानां स्वनउदभूदिति चतुर्दशभिः श्लोकैः संबंधः २ श्रवणार्थित्वेन मौनस्थाः पार्थिवा यस्यां तत्र संसदंतरे सभामध्ये ३ ४ सान्निधानाद्विलासिनीनां करांभोरुहेषु हंसायमानेषु वामरेषु श्रवणच्युतार्थे समाधिना लीनेष्विवेति निःस्पंदत्वदर्शनेनोत्प्रेक्षा मुक्तघुर्घुरावेषु त्यक्तकंकणकिंकिणीरवेषु वयांस्येव वायसास्तेषु तरो

श्रवणार्थित्वमौनस्थपार्थिवे संसदंतरे॥ निर्वात इव निस्पंदकमले कमलाकरे॥ ३ विलासिनीषु संशांतमदमोहबलासु च शममंतः प्रयांतीषु चिरप्रव्रजितास्विव॥ ४॥ करांभोरुहहंसेषु लीनेषु श्रवणादिव॥ मुक्तघुर्घुरवादेषुता षुतराविव॥ ५॥ नासाग्रपरिविश्रांततर्जन्यंगुलिकोटिषु विचारयत्सु विज्ञानकालं तज्ज्ञेषु राजसु॥ ६ रामे विकाशमायाते प्रभात इव पंकजे। परित्यक्ततमःपीठे सूर्योदय इवांबरे ७॥ आकर्णयति वासिष्ठीं गिरं दशरथे रसात् कलापिनीव जीमूतनिह्रादान्मुक्तवर्षणात् ८ आहृत्य सर्वभोगेभ्यो मनो मर्कटचंचलं श्रवणं प्रति यत्नेन मागोमिंत्रिणि स्थिते॥ ९ वसिष्ठोक्तपरिज्ञातसात्मनींदुकलामले लक्ष्मणे विलसद्बुद्धौ शिक्षाबलविचक्षणे १०

इतिमद्र उपमा ५ तज्ज्ञेषु विचारज्ञेषु ६ तमसः भ्रमावेव घनत्वादुपरितनांबरपीठत्वेनोत्प्रेक्षा यथा आचार्यागमने शिष्य उत्तिष्ठन् पीठं परित्यजति तद्वत्सूर्यस्योदये परित्यक्ततमःपीठमतीत्यर्थः ७ रसात् प्रेमार्द्रभावात् तस्योपमा मुक्तवर्षणादिति मुक्तवर्षणप्रयुक्तादार्द्रीभावादिति यावत् ८ यत्नेन आहृत्य परावर्त्य स्थिते ९ शिक्षाबलविचक्षणत्वादेव विलसन्ती हृदि स्फुरन्ती लक्ष्ये ब्रह्मणि बुद्धिर्यस्य तथाभूते १०

अलंहर्षेणमानंदं आमोतेप्राप्ते ११ सुमित्रेमंत्रिविशेषेदुःखशीलितेमानसेमित्रतांवरस्यतांयातेसतिविकासिहृदयेजाते। अंबुजपक्षेआप्रातर्मा
नसेसरसिमनसिचदुःखेनशीलितेचिंतितेशोभनेमित्रेसूर्येमित्रतांउदयेनप्रीतिकरतांयातेसतितत्कालेविकासिहृदयेजाते १२ प्रोल्लसत्त्विव
जातेक्षितियथायोगंविपरिणामेनसर्वत्रानुषज्यते १३ आशादिशःकल्याभ्ररवइवमांसलःबलवान् १४ मुनिर्वसिष्ठस्य १५ अंतर

शत्रुघ्नेशत्रुदलनेचेतसाहर्षंतांगते। अलमानंदमायातेराकाचंद्रोपमेस्थिते ११ सुमित्रेमित्रतांयातेमानसेदुःखशीलिते। विका
सिहृदयेजातेतत्कालइवपंकजे १२ तत्रस्थेषुतथान्येषुतदामुनिषुराजसु। सुधौतचित्तरत्नेषुप्रोल्लसत्त्विवचेतसा १३
तत्रस्थेषुतथान्येषुतदामुनिषुराजसु सुधौतचित्तरत्नेषु दुंदुभस्तूर्यनादाशाःकल्याभ्ररवमांसलः अथमध्याह्नशंखाना
मब्धिघोषसमस्वनः १४ महतातेनशब्देनतिरोधानेमुनेर्गिरः ययुर्जलदनादेनकोकिलध्वनयोयथा १५ मुनिरंतरयांच
क्रेस्वांवाचमथसंसदि। जितमारोगुणाढ्येनमहतासमुदीर्यते १६ मुहूर्तमात्रंविश्रम्यश्रुत्वामध्याह्ननिस्वनं घनेकोलाहले
शांतेराममुनिरुवाचह १७ रामाद्यतनमेतावदाह्निकंकथितंमया प्रातरन्यद्वक्ष्यामोवक्तव्यमरिमर्दन १८ इदंनियतितः
प्रासंकर्तव्यंततद्विजन्मनां मध्याह्नमुपपन्नंयत्कर्तव्यंनावसीदति १९ मोचक्रेतिरोदधे उपसंजहारेतियावत् जितःअभिभूतः राम॰
मारःजनाह्लादकांशोयस्य तथाविधोगुणः केनमहताअभिज्ञेनाम्मुदीर्यतेप्रकटीक्रियते १६ १७ अद्यानिर्वर्त्यमाह्निकंवक्ष्यामोवयमितिशेषः २
मध्याह्नंमध्याह्नेयदुपपन्नंप्रयुक्तंद्विजन्मनांनियतितःप्रासंकर्तव्यंकर्मनावसीदतीतियत्तदिदंसर्वमापिकर्तव्यमित्यन्वयः १९

---

मुनिनासमंसमदाःसभास्यसर्वजनसहितोदशरथोऽप्युत्तस्थौ॥ २१॥ अलिलोचनाइतिसभायाअपिविशेषणं॥ २२॥ अत्रस्यमध्याह्नकालेअस्ता
चलेसूर्योदयकालःकरिणामुत्थानयोग्यइत्याशयेनसंध्याद्रावितिविंध्याद्रावितिपाठस्यानोपमा॥ २३॥ यतोरक्तपूर्णाअतःसादृश्यादरुणां
म भोदसंध्यासमयस्यस्वनीस्मारिकेतियावत्॥ २४॥ पतद्विहितौविश्रांतैर्भृंगैनां आहितचुंचुमामुकुटनामुद्दामैर्नानामणिविद्योतैः

तमप्युत्तिष्ठसुभगसमस्ताचारसत्क्रियां॥ आचाराश्चत्वारःस्नानदानार्चनादिकं॥ २०॥ इत्युक्त्वामुनिरुत्तस्थौसमं
दशरथःप्रभुः समदास्तेंदुराशिस्थउदयाद्रिताविव॥ २१॥ तयोरुत्तिष्ठतोःसर्वासभोत्थानुप्रकंपता। मंदवातभ्रमत्पुष्पानलिनीवा
लिलोचना॥ २२॥ उत्तस्थौसावतंसोत्थभृंगमंडलमंडिता। करिणेनेवसंध्याद्रावालोलकरपुष्करा॥ २३॥ परस्परांगसंघट्ट
चूर्णितांगदमंडली॥ रक्तपूर्णारुणांभोदसंध्यासमयसूचनी॥ २४॥ पतद्वतंसविश्रांतभृंगोपहितचुंचुमां मुकुटोद्दामविद्योत
शक्रचापीकृतांबरा [illegible] कांतालताहस्तदलचारुचामरमंजरी॥ वनलेखेवविस्तुध्वव
रवारणमंडला॥ २६॥ क्वचत्कटकझांकारक्रीडितान्योन्यतांबरा॥ वातव्याधूतउत्थेवमंदारवनमालिका॥ २७॥

शक्रचापीकृतमंबरसमाकाशंवस्त्रजातंवायया २५ कांताःलक्षणानांलतानांहस्तलक्षणेषुदलेषुपल्लवेषुचारुचामरलक्षणाःमंजर्यो
यस्यांतथाविधावनलेखेवेत्यर्थः २६ क चंतीभिःकटकभामिःरक्रीडमान्यन्योन्यमाकर्षणान्नतानिविस्रस्तान्यंबराणियस्यां॥ २७॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

वा॰टी॰उ॰ ३॥

कर्पूरकणालक्षणैः समस्तस्त्रदेशैः श्वनीहारैर्हिमकणैः उद्धूयमानैः रचिताः अमलाः शुभ्राः वारिदाः यया ॥ अतएव नीहारकणपुष्पादिभिर्व्याप्ताशेष भूमिका शरद्दिक्कटमालेव स्थिता ॥२७॥ कार्याणां दिनकृत्यानामुपसंहारकारिणी ॥ ३०॥ ध्वस्तनीराजसां पर्वतानां च शनैः ॥ ३१॥ ३२ रसे ब्रह्मर

कर्पूरकणानीहाररचितामलवारिदा शरद्दिक्कटमालेव प्रस्तताशेषभूमिका ॥ २८॥ लोलमौलिमणिप्रान्तपाटलाम्बरकोटरा ॥ संध्ये
वाफुल्लकलीलाब्जा कार्यसंहारकारिणी ॥ २९॥ रत्नांशुसलिलाप्रमुखपद्मनिरंतरा ॥ पद्मिनीवालिवलितानूपुरारवसारसा ३०
संततासासमोत्तस्थौ भूपदृष्टतमसा कुला ॥ प्रसन्नसंततिसंभ्रान्ताप्रहिणीर्नवमिवोदिता ॥ ३१॥ प्रणम्याथ नृपं भूपानिर्ययुर्नृपमं
दिरात् ॥ शक्रचापीकृताररत्नैरंबुधेरिव वीचयः ॥ ३२॥ सुमंत्रो मंत्रिणश्चैव वसिष्ठमथ भूमिपं प्रणम्य जग्मुः स्नानाय रसविज्ञानको
विदाः ॥ ३३॥ वामदेवादयश्चान्ये विश्वामित्रादयस्तथा ॥ वसिष्ठं पुरतः कृत्वा तस्थुरावर्जनोन्मुखाः ॥ ३४॥ राजा दशरथस्तत्र पूजयित्वा
मुनिव्रजं ॥ तद्विसृष्टो जगामाथ सत्कार्यार्थमरिंदम ॥ ३५॥ वनं वनाश्रयदा जग्मुर्व्योमव्योमनिवासिनः ॥ नगरं नागराश्चैव प्रातरागम
नायते ॥ ३६॥ महीपतिर्वसिष्ठाभ्यां प्रणयात्प्रार्थितः प्रभुः ॥ वसिष्ठसद्मनि निशां विश्वामित्रोऽनयाहयन् ॥ ३७॥ वसिष्ठः सह विप्रेन्द्रैः पा
र्थिवैर्मुनिभिस्तथा ॥ उपास्यमानो रामाद्यैः सर्वैर्दशरथात्मजैः ॥ ३८॥ रामं॰
मे जले च विहारविज्ञाने कोविदाः ३३॥ आवर्जनमनुज्ञातदुन्मुखास्तल्लीप्साः ॥ ३४॥ ३५॥ वनाश्रयदाः वानप्रस्थाः ॥ ३६॥ ३७॥ ३८॥ ॥३॥

३९॥ तस्मादाश्रमप्रदेशात् ॥ ४०॥ अधश्वरानूनागान्संस्कृतानां प्रशस्तानां गुणानां गोचरानाश्रयानिति यावत् ॥ यथाक्रमं विसृज्य स्वगृहे प्र
विश्येति शेषः ॥ द्विजजनानां वासरोचितां पंचयज्ञक्रियां चकारेत्यर्थः ॥ ४१॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे प्रथमः सर्गः ॥ १॥
जगाम स्वाश्रमं श्रीमान्सर्वलोकनमस्कृतः ॥ अनुयातस्सुरौघेण ब्रह्मलोकमिवाब्जजः ॥ ३९॥ तस्मात्प्रदेशाद्रामादीन्सुन
दशरथात्मजान् ॥ सर्वान्विसर्जयामास पादोपांतेनतान्सौ ॥ ४०॥ नमश्वरान्धरणिचरान्श्वरान्विसृज्य संस्कृतगुणगो
चरांश्च तान् ॥ यथाक्रमं स्वगृहमुदारसत्ववांश्चकार तां द्विजजनवासरक्रियाम् ॥ ४१॥ मोक्षोपाये उपशमप्रकरणे प्रथम
माह्निकवर्णनं सर्गः ॥ १॥ श्रीवाल्मीकिरुवाच ॥ ते समेत्य गृहं गता राजपुत्राः शशित्विषः ॥ चक्रुः सर्वमशेषेण स्वसद्मसु
दिनक्रमं ॥ १॥ वसिष्ठो राघवश्चैव राजानो मुनयो द्विजाः ॥ इति चक्रुस्स्वकार्याणि तथा स्वगृहवीथिषु ॥ २॥ प्रस्फुरत्कम
लकह्लारकुमुदोत्पलहारिषु ॥ जलाशयेषु चक्राह्वहंससारसराजिषु ॥ ३॥ गोभूतिलहिरण्यानि शयनान्यासनानि च दु
र्लभानि विप्रेभ्यो भाजनान्यंशुकानि च ॥ ४॥ हेमरत्नविचित्रेषु स्वेषु चामरसद्मसु ॥ आनर्चुरच्युतेशानहुताशार्कादिकान्सु
रान् ॥ ५॥ पुत्रपौत्रसुहृद्भृत्यबंधुमित्रगणैः सह ॥ तत आस्वादयामासुर्भोजनान्युचितानि वै ॥ ६॥
उदाह्निकक्रियागतो रामस्य श्रुतचिंतनं ॥ बुद्धेः कृतार्थस्यैर्यार्थं प्रार्थना चोपवर्ण्यते ॥ दिनक्रमं आह्निकं ॥ १॥ इति वक्ष्यमाणप्रकारेण चक्रुः

स्वगृहेषु वीथिषु तथा बहिश्च यान्युचितानीत्यर्थः ॥ २॥ ३॥ ४॥ अ
मरसद्मसु देवालयेषु स्वेषु स्वगृहेषु वा ॥ ५॥ ६॥

वा॰री॰ उप॰ ४

दिवसस्तनुः सूक्ष्मोऽभवत् अष्टांगशेषत्वादष्टमभागशेषत्वात् ७ तत्कालोचितचेष्टया पुराणधर्मशास्त्रावलोकनादिरूपया ८ ९ तत
इत्युपात्त[illegible]दुत्तरकाले क्षीरोदः कामिनीषु द्रीरिक्तकांतसंगमसमुत्थशोकहरणानंदस्य चंद्रसंगमप्रयुक्तस्तापोपशमनोऽवश्यायः ३
एतस्मिन्समये चास्मिन्नगरे दिवसोऽभवत् तनुरष्टांगशेषत्वाद्दृष्टो न च मनोहरः ७ सायंतनदिनांते ते तत्कालोचितचेष्टया
अनयन्नंशुभिः सार्धं यो वदस्तं ययौ रविः च संध्यां ववंदिरे सुबुजे पुस्त्रैवाघमर्षणं पेठुः स्तोत्राणि पुण्यानि जगुर्गाथा
मनोहराः ९ ततश्चाभ्युदिता श्यामा कामिनीशोकहारिणी क्षीरोदादिव माहेंद्री चंद्रावश्यायदायिनी १० शनैरास्तीर्ण
पुष्पेषु कीर्णकर्पूरमुष्टिषु दीर्घेंदुबिंबरम्येषु तल्पेषु सुतल्पेषु पुराणप्रवाः ११ अथ रामादृतेऽन्येषां तत्र तद्व्यवहारिणी व्य
तीयाय शनैः श्यामा मुहूर्त इव शोभना १२ तस्थौ रामस्तु तामेव वासिष्ठीं वचनावलीम् चिंतयन्मधुरोदारां करिणीक
लभो यथा १३ किमिदं नाम संसारभ्रमणं किमिमे जनाः भूतानि च विचित्राणि किमायांति प्रयांति किं १४ मनसः
कीदृशं रूपं कथं चैतत्प्रशाम्यति मायेयं सा किमु आस्यात्कथं चैव निवर्तते १५ निवृत्तयानया कः स्याद्गुणो दोषोऽथ
क्रमेणोपमानानि ११ दीर्घाभूतमिंदुबिंबमिव रम्येषु ११ तद्व्यवहारिणी ११ वाभवेत् कथमात्मनि चैवायं ततसंकोच आगतः १६
तत्कालोचितविषयभोगनिद्रादिव्यवहारवती १२ कलभः करिशावः करिणीं मातरं यथा १३ चिंताप्रकारमेव प्रपंचयति किमित्यादिना १४

राम॰ ४

DR BHAU DAJI

५

किं साधनं फलं चोक्तं स्यात् आत्मनि विज्ञाते इति शेषः १७ १८ दुःखोपशांतिः सिद्ध्यतीति शेषः एतानि मनोमायादिरूपाणि १९ मुच्यंत
इति भोगा विषयास्त एव संस्कारात्मना घनीभूय चित्ताकाशावरकत्वात् दुःखसहस्रधारावर्षित्वाच्चाभ्राणि तान्यनुसृत्य मालेव वलयति वेष्टयती
तिमाला वलयांधी इति लक्षणं बलाकां बकीं कथं पृथक्करोमि विवेकेन परावर्तयामीति यावत् पयसो दुग्धस्य धारां भागमिति यावत् २०
ननु किं विमर्शेन त्यज्यंतां भोगास्तत्राह भोगा इति विपदां प्रतीकारे इति शेषः सर्वात्मना भोगत्यागे जीवनासिद्धेस्तदर्थमल्पस्यापि भोगस्योपा
किमुक्तं स्याद्भगवता मुनिना मनसः क्षये किं चेंद्रियजये प्रोक्तं किमुक्तमथ वात्मनि १७ जीवश्चित्तं मनो माया येत्येवमादिभिराततैः
रूपैरात्मैव संसारं तनोतीममसन्मयं १८ एभिरेवं मनोमात्रं तनुबद्धैः क्षयं गतैः दुःखोपशांतिरेतानि मुचिकित्स्यानि नः कथं १९
ज्ञाव भोगाभ्रमालयांधी बलाकामिमां कथं पृथक्करोमि पयसो धारां हंस इवाम्भसः २० भोगास्त्यक्तुं न शक्यंते तत्त्यागेन विनाप्ययं
प्रभवामो न विपदामहो संकटमागतं २१ मनोमात्रमिदं प्राप्यं तच्चैवेदं प्रयोजनं संपन्नं नो गिरिगुरुर्मौर्ख्याद्यक्षः शिशोरिव २२
दानेवामनाहद्वेः संकटमागतमित्यर्थः २१ संकटांतरमप्याह मनोमात्रमिति इदं प्राप्यमवश्यप्राप्यं चमात्मतत्त्वं मन एव मीयतेऽनयेति मात्रप्रमा प्रमीयते
णं यस्य तथाविधं तच्च मनः अस्माकं इदं बाह्यमेव विषयजातमेव प्रयुज्यते येन तत्प्रयोजनं निष्पत्तिहेतुस्तं पुरुषार्थस्तं च यस्य तथावि
धं सत् मौर्ख्यात् गिरितोऽपि गुरु दुरुद्धरं संपन्नं यथा शिशोर्मौर्ख्यात्कल्पितो यक्षः तथा च विषयाधीनसिद्धिकं मनस्तेभ्यो निवर्तयितुमेवाशक्यं
निःस्वरूपतापत्तेस्तदवनिवृत्तौ तु न तत्साक्षात्कारे प्रमाणं तत्त्वं शक्यमिति संकटांतरमित्यर्थः २२

ॱनातहलीव

वा॰टी॰उप॰ ॥२॥ यदितु निर्वासनं सर्वविषयोपशमेपि ब्रह्माकारतामात्रावलंबनेनमनोवस्थापयितुं शक्नोतञ्जदास्यादभिलषितसिद्धिरितिचिंतयन्नाह परमामितिल
ब्धोदयितः॥कांतोयथातथाविधाबाल ब्धब्रह्माकारमतीकंचिदन्यंभोगंनोप्राप्स्यतिनस्मरिष्यतीत्यर्थः॥२३॥नाहंशेप्रामुमुक्षंठतेकरेत्यादिना

परमांशांतिमागत्यगतसंसारसंभ्रमा॥ बालेवलब्धदयिताकंचित्प्राप्स्यतिनोमतिः॥२३॥ कदोपशांतसंरंभंविगताशेषकौ
तुकं॥ अपापमात्मविश्रांतंममस्यात्पावनंमनः॥२४॥ कलाकलापसंपूर्णाच्छशांकादपिशीतले॥ पदेसुरूढंविश्रम्यभ्रमि
ष्यामिकदाजगत्॥२५॥ कल्लनापेलवंरूपमुत्सृज्यालीनमात्मनि॥ कदैष्यतिमनःशांतिमंभसीवतरंगकः॥२६॥ त्रस्तात
रंगाकुलितमाशामकरमालिनं॥ कदासंसारजलधिंतीर्त्वास्यामहमज्वरः॥२७॥ कदोपशममभ्युद्यामुपदवीषुविचक्षणाः॥ मुमु
क्षूणांनिवत्स्यामोनिःशोकंसमदर्शनाः॥२८॥ संतापितसमस्तांगःसर्वधातुभयंकरः॥ संसृतिज्वरआदीर्घः कदानाशमुपैष्य
ति॥२९॥ निर्वातदीपलेखेवकदाचित्तेगतव्यथं॥ शममेष्यतिहेबुद्धेसुप्रकाशघनांतरं॥३०॥

संरंभः क्रोधः कौतुकं कामः पापग्रहणंपुण्यनद्धुपभकार्याणामप्युपलक्षणं॥२४॥ समम्भ्रमिकापर्मंतंसुरूढंयथास्यात्तथाविश्रम्यजीवन्मुक्ति राम॰
सुखंप्राप्येतियावत्॥२५॥ आत्मनिआलीनंतिरोहितंसत्॥२६॥२७॥ मुमुक्षूणांप्राप्यासुपदवीषुपदेषु॥२८॥ अंगानिस्त्रीपुत्रपश्वादीनिहस्तपादादी ॥५॥
निच॥ धातवः॥ स्वर्णरूप्यादयस्त्वगसृङ्मांसादयश्चतेभ्यःक्षीयमाणेभ्योभयंकरः॥२९॥३०॥

विषयाभिमुखाकर्षणादुरीहाभिर्दुश्चेष्टाभिर्दग्धोदेहोयैस्तथाविधानींद्रियाणिविषयहेलयाकदादुःखानिसंतरिष्यंतीत्यर्थः॥ अथवाइंद्रियाणिकर्तॄणि
दुरीहादुष्टविषयाभिलाषस्तत्समुक्तानिदग्धदेहानिभावनाशरीराणिकर्मविषयहेलयादुःखेभ्यःदुःखानिपरिहर्तुंकदातरिष्यंतीतियोजना दुः
खेभ्यः इतिसुखदुःखतक्रियायामितिचौरादिकाद्दुःखधातोर्भावेघञितुमर्थाच्चभाववचनादितिचतुर्थी॥३१॥ पशुपुत्रधनान्नपानादीनामलाभ
भवियोगादिनारुदतिमूढेमयिरोदननिमित्तम्रतः॥ अयंदेहएवसप्रसिद्धआत्माअहंचेतिव्यर्थंस्वस्वदेहवासनाकामकर्मपरंपरोहितभ्रमःसवो

करेंद्रियाणिदुःखेभ्यःसंतरिष्यंतिहेलया॥ दुरीहादग्धदेहानिगरुत्मंतइवार्णवात्॥३१॥ अयंसोहंरुदन्मूढेइतिव्यर्थाहितोभ्र
मः॥ शरदीवासितोमेघःकदानाशमुपैष्यति॥३२॥ मंदारवनलेखासुयामतिस्मात्तरणायते॥ याचेतत्सदमात्मीयंसंप्राप्स्यामःकदा
वयम्॥३३॥ वीतरागजनप्रोक्तानिर्मलाज्ञानदृष्टयः॥ क्वचित्संदंत्वयिमनःकरिष्यंतीतिमेवद॥३४॥ हातातमातःपुत्रेतिगिरा
मासामहंपुनः॥ भाजनंचित्तमाभूवंभोजनंदुःखभोगिनां॥३५॥ हेबुद्धेभगिनिभ्रातुरर्थितांहरयाशुमे॥ आवयोर्दुःखमोक्षायविचा
रयमुनेगिरः॥३६॥

धवैमैल्येशरदिप्रवृत्तायांवार्षिकः असितोमेघइवकदानाशमुपैष्यतीत्यर्थः॥३२॥ उत्कटयामुमुक्षयास्वर्गोपिसस्वप्नतएव
जातीत्याहमंदारेति मतिःसुखानुभावः अहंयाचेवांछामीतियावत् वयमितिअस्मदोद्वयोश्चेतिबहुवचनं ३३ इदानींमनआदीन्विवेके
ग्रहणायप्रार्थयतेवीतरागेत्यादिना हेमनःत्वयिपदंस्थानंकच्चित्करिष्यंति ३४ अहंदुःखलक्षणानांभोगिनामजगराणांभोजनंभक्ष्यंमनआ
सामाक्रंदगिरांपुनर्भाजनंमाभूवमित्यन्वयः॥३५ जीवबुद्ध्योरेकाविद्योदरोद्भूतत्वाद्भगिनीतिसंबोधनं मुनेर्वसिष्ठस्य ॥३६॥

वा॰ टी॰ उप॰
६

सतिसाधिशास्त्रसज्जनप्रसादेनपश्चादुत्पन्नत्वात्सुतेषु त्रिमतेसन्मतेतेनप्रार्थनेनभवोछेदोपलक्षितपूर्णतासंपदे ॥ २७ ॥ एवंप्रार्थनयास्थिरीकृतां
मतिंवैराग्यप्रकरणादिप्रकरणाच्चतुष्टयार्थस्मरणेक्रमान्निर्युक्तेवसिष्ठेतिप्रोक्ताःमत्सुखेनवारिताःस्वयंप्रोक्ताश्चस्थितिप्रकरणांताःगिरः
॥ २८ ॥ विज्ञानगर्भसुलभंसरलंचाविज्ञानगर्भैरधिकारिभिरारव्यानैर्वासुलभंसुबोधमितिवा ॥ २९ ॥ ननुमनसःप्राक्प्रार्थितत्वात्तत्एवप्रकर
णाचतुष्टयार्थावधारणसिद्धेःकिमर्थंतद्व्यतिरेकेणपुनर्मतिःप्रार्थ्यतेतत्राहकृतमतीति ॥ मानसस्यमनसःकृतमतिनिपुणंयथास्यात्तथाशत

संपादपतितःप्रीत्यायाचेमतिसुतेमते ॥ तेनभव्योभवोछेदप्रत्यतयेसुस्थिराभव ॥ २७ ॥ वसिष्ठमुनिनाप्रोक्ताविरक्ताःप्रथमं
गिरः ॥ ततोमुमुक्षोराचारउत्पत्तीनांक्रमस्ततः ॥ २८ ॥ ततःस्थितिप्रकरणंसमंदृष्टांतसुंदरं ॥ विज्ञानगर्भसुलभंयथावत्स्म
रहेमते ॥ २९ ॥ कृतमतिशतशोविचारितंयद्यदितदुपैतिनमानसस्यबुद्धिः ॥ भवतितदफलंशरद्घनाभंसततमतोमति
रेवकार्यसारः ॥ ३० ॥ मोक्षोपायेषूपशमप्रकरणेउपदेशानुवर्णनंद्वितीयःसर्गः ॥ २ ॥

शोयद्वस्तुविचारितंभवतितत्तबुद्धिरध्यवसानमतिर्यदिनोपैतिनांगीकरोतितर्हितत्तथाविचारितमप्यफलंशरद्घनवन्नश्यत्येवनस्थिरीभवती
त्यर्थः अतः श्राव्यःश्रवणेनविचारितेपितत्वेमतिर्मनकृताध्यवसायबुद्धिरेवसततंकार्यैकर्तव्यार्थविषयेसारोमुख्याभवतीतिमननायदृ
ढत्वप्रार्थनंयुक्तमेवेत्यर्थः ॥ ३० ॥ इतिश्रीवासिष्ठतात्पर्यप्रकाशेउपशमप्रकरणेद्वितीयःसर्गः ॥ २ ॥

राम॰
॥ ६ ॥

---

उपःस्नातस्गृहाद्यातरामभ्रातृभिःसह ॥ वसिष्ठस्यसभायानंप्रस्तावश्चात्रकीर्त्यते ॥ तस्यरामस्य ॥ एवंप्रायययाउक्तप्रकारयाततयाविस्तृत
याचिंतया ॥ १ ॥ तमोभिःकडारासुकपिशवर्णासु ॥ २ ॥ ३ ॥ संपाद्यनिर्वृत्यसंध्यावंदनादिकमित्योचित्याद्गम्यते ॥ भ्रातृभिःप्रहितःप्रेषितः
अल्पपरिवारः ॥ परिजनोयस्यभ्रातृभिःसहप्रहितःआगतमोल्पःपरिवारोयस्येतिवा ॥ ४ ॥ समाधिसंस्थमितिपूर्वमेवस्नात्वाप्रातःकृत्यं

॥ श्रीवाल्मीकिरुवाच ॥ तस्यैवंप्राययातत्रततयोदारचिंतया ॥ साव्यतीयायरजनीपद्मस्येवार्ककांक्षिणः ॥ १ ॥ किंचित्तमःकडा
रासुकिंचिदप्यरुणासुच ॥ नभोविरलतारासुदिक्षुसम्मार्जितास्विव ॥ २ ॥ प्रभातत्तूर्यघोषेणसममिंदुसमाननः ॥ उत्त
स्थौराघवःश्रीमान्पद्मःपद्माकरादिव ॥ ३ ॥ प्रातःस्नानविधिंकृत्वासंपाद्यभ्रातृभिःपुनः ॥ प्रहितोल्पपरीवारोवसिष्ठ
सदनंययौ ॥ ४ ॥ समाधिसंस्थमेकांतेमुनिमात्मपरायणं ॥ दूरस्थानतमास्थौरामोविनतकंधरः ॥ ५ ॥ ततःप्रणम्यांगणेतस्थुस्तस्मिं
स्तेविनयान्विताः ॥ यावत्तमसमालनेव्यक्तंदिङ्मुखमंडलम् ॥ ६ ॥ राजानोराजपुत्राश्चऋषयोब्राह्मणास्ततः ॥ आययुस्त
दनंमौनंब्रह्मलोकमिवामराः ॥ ७ ॥ तद्वसिष्ठस्यसदनंबभ्रुर्जनसंकुलं ॥ हस्त्यश्वरथसंबाधंपार्थिवाचारशोभनं ॥ ८ ॥ क्षणा
द्वसिष्ठोभगवान्विररामसमाधितः ॥ आचारेणोपचारेणजग्राहप्रणतंजनं ॥ ९ ॥

निर्वृत्यसमाधिसंस्थमितिगम्यते ॥ ४ ॥ तेरामादयःयावत्तमःसम्यगालूनंछिन्नंभवतितावत्तस्थुः ॥ ६ ॥ मौनंनिःशब्दंयथास्यात्तथा ॥ ७ ॥ पार्थिवो
चिताचारेपिपार्थिवसदनमिवशोभमानमित्यर्थः ॥ ८ ॥ विनयाद्याचारेणप्रियवचनाद्युपचारेण ॥ ९ ॥

नंशोभ९

वा॰टी॰उप॰
॥७॥

अवनतां प्रणम्रजनां ॥ १२ ॥ निर्जगाम अभिजगाम ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ तेषु मुनिन्टपमंत्रिप्रभृतिषु प्रथमम् उपविष्टेषु सत्सु पश्चात् अन्येषु अपि सर्वेषु उपविष्टेषु
सत्सु ॥ सर्वेषु वेत्रासनादीनां सर्गसमाप्तिपर्यंतं सर्वेषां सप्रश्रयं तान् अनुत्तरसर्गस्थे इदं दशरथ एवाक्ये नुवाचेत्यत्र संबंधः ॥ १७ ॥ सभा याः कलकलः कोलाह
ले स्थितिवार्ता सु परस्परं राज्ञि सु खावस्थितिप्रश्नप्रतिवचनवार्तासु वृत्तासु सतीषु ॥ १८ ॥ अंभोजकोटरान् निर्गत्य सभां विशत्विति शेषः ॥ अ

तथानुयातो मुनिभिर्विश्वामित्रान्वितो मुनिः ॥ आरुरोह रथं श्रीमान् सहसा द्रुमिवाब्जजः ॥ १० ॥ अयोगृहं दाशरथं सैन्येन मह
तावृतः ॥ त्रस्लेवशक्रनगरं समस्तसुरमालितः ॥ ११ ॥ विवेश वनतां तत्र रम्यां दाशरथीसभां ॥ हंसयूथानुवलितो राजहंसइवाब्जिनीं ॥ १२ ॥
त्रीणि तत्र पदान्याशु तदा दशरथो न्टपः ॥ निर्जगाम महावीरसिंहासनसमुत्थितः ॥ १३ ॥ विविशुस्तत्र ते सर्वे न्टपादशरथादयः ॥ व
सिष्ठाद्याश्च मुनयो ऋषयो ब्राह्मणास्तथा ॥ १४ ॥ मंत्रिणश्च सुमंत्राद्याः सौम्याद्याश्च विपश्चितः ॥ राजपुत्राश्च रामाद्या मंत्रिपुत्राः
शुभादयः ॥ १५ ॥ अमात्याद्याः प्रकृतयः सुहोत्राद्याश्च नागराः ॥ मालवाद्यास्तथा भृत्याः पौराद्याश्चैव मालिनः ॥ १६ ॥ अथ ते उपविष्टे
षु स्वेषु स्वेष्वासनेषु च ॥ सर्वेष्वेवोपविष्टेषु वसिष्ठोन्मुखदृष्टिषु ॥ १७ ॥ सभाकलकलेशांते मौनसंस्थेषु वंदिषु ॥ वृत्तासु स्थितिवार्तासु मौन्येतस्मि
न्नभ्यंतरे ॥ १८ ॥ च स्फुरत्पवनमालासु विशत्स्वंभोजकोटरात् ॥ परागेषु विलोलेषु मुक्तादामसु चंचलं ॥ १९ ॥ हृदकुसुमदोलाभ्यः प्रसृताभ्यः
समंततः ॥ वाति मांसलमामोदमारोपमधुरानिले ॥ २० ॥ वातायनेषु मृदुषु कुसुमाकीर्णभूमिषु ॥ पर्यंके उपविष्टासु पश्यंतीषु पुरंध्रिषु ॥ २१ ॥ राम॰

तदेवांभोजानां परागेषु मुक्तादामसु चंचलं यथास्यात्तथा विलोलेषु लंपटेषु ॥ १९ ॥ २० ॥ मृदुषु पर्यंकेषु ॥ २१ ॥

---

जालागतैः अर्ककरैः लोलं वलोकनप्रतियातात् लोला निविलोचनानि याभ्यः रत्नप्रभानिकरैः पिंगला सु कोमलासु सुकुमारीषु तासु प्राउक्तासु सितचा
मरधारिणीषु संत्यक्तचापललवं यथास्यात्तथा मौनस्थितासु ॥ २२ ॥ नानारत्नखचितास्वजिरभूमिषु मुक्ताफलानां प्रतिफलानि प्रतिच्छायाः
तत्प्रतिमाः ॥ अर्करश्मिरागः ॥ उदरेयासां तथाविधासु नानापुष्पाकारचित्रासु जातासु अभिनवातपबिंबा एवैमे इति भ्रांतिबुद्ध्या अलिकुले पुष्पकौ
घं विकीर्णपुष्पसमूहं नासादयति अलभमाने अत एव भ्रमस्य स्पर्शान्नभसि भिमे परिवभ्रमति सति ॥ २३ ॥ तस्मिन् सत्संगमे सतां समाजे आर्यलोके वद्धमत

जालागतार्ककरलोलविलोचनासु रत्नप्रभानिकरपिंगलकोमलासु ॥ संत्यक्तचापललवं चपलासु तासु मौनस्थितासु सितचामरधा
रिणीषु ॥ २२ ॥ मुक्ताफलप्रतिफलप्रतिमार्करश्मिरागोदरास्वजिरभूमिषु पुष्पकौघं ॥ नासादयत्यभिनवातपबिंबबुद्ध्या भ्रांते भ्रमत्य
लिकुले नभसीव मेघे ॥ २३ ॥ पुण्यैर्वसिष्ठवदनप्रसृतं श्रुतं यत्तत्संततिप्रसृतविस्मयमार्यलोके ॥ सत्संगमे मृदुपदाक्षरमुग्धवा
क्यमन्योन्यमीक्षितमनन्यगुणाभिरामं ॥ २४ ॥ दिग्भ्यः पुराच्च गगनाच्च वनाच्च सिद्धविद्याधरार्यमुनिविप्रगणो वसिष्ठं ॥ मौनप्रणाम
मभितः प्रविशत्यशब्दं सौपांशु गौरववतां सहजा न वाक्ये ॥ २५ ॥

जने प्राक्तैर्चितैः पुण्यैः यत् वसिष्ठवदनप्रसृतं वचनं श्रुतं तत् स्वसंतत्या हृदि विस्तारेण प्रसृतविस्मयं उद्गताश्चर्यं यथास्यात्तथा अन्योन्यं ईक्षितं अभिम
तं अनन्यगुणाभिरामं मृदुपदाक्षरमुग्धवाक्यं भाषमाणे सतीति शेषः ॥ २४ ॥ वनाच्च समागते इति शेषः विद्याधराणां आर्यमुनीनां अन्येषां च विप्राणां ग
णो वसिष्ठं अभितः मौनप्रणामं मौनेन प्रणाम्य अशब्दं पिहितास्यं यथास्यात्तथा प्रविशति स्म ॥ ततः गौरववतां गरीयसां अवश्यं सभायां उपांशु अति
मंदस्वरं कर्णसन्निधौ तातवाक्ये मति वसिष्ठमभित इत्यभितः परितः समया निकषा हा प्रतियोगे पीति षष्ठ्यर्थे द्वितीया ॥ २५ ॥

उन्निद्राणां कोकनदानां रक्तकमलानां कोमलेभ्यः कोशेभ्यः कृष्टानां कोमलेभ्यः कोशेभ्यः कृष्टानां सांद्रं तर्मग्नानां अलिजालानां मकरंदानां सुवर्णानां परागाणां च रागैः रंजनैः आपिंगलैः ईषत्पिंगलवर्णैर्मरुता स्वामिमर्शाद्धि लोलानां गृहप्रांतघंटानां टांकारगीतैर्विनिपीतानि अभिभूतानि निशांतानां गृहाणां गीतानि येन तथाविधे मरुति वाति सति॥ घंटाजिह्वाग्रेपि अलघ्वाकाररचनाभिर्द्दवातैरपि गृहपटलघंटावलिध्वननं दक्षिणदेशे नेपाले च प्रसिद्धं॥२६॥ चंदनामोदमिश्रे बलकुसुमरजोभिरंक्यत इत्यंकस्तथाविधे अत एव सरसानां कुसुमदाम्नां उद्दामैर्गंधैरंकितानि सुरभितान्यभ्राणि

उन्निद्रकोकनदकोमलकोशकृष्टमग्नालिजालमकरंदसुवर्णरागैः॥ आपिंगलैर्मरुति वाति विलोलघंटाटांकारगीतविनिपीतनिशांतगीते॥२६॥ अगरुतगरुधूमे चंदनामोदमिश्रे मरसकुसुमदामोद्दामगंधांकिताभ्रे॥ मरति मतिविनितानां भोरुहामोदलेशे श्वलकुसुमरजोंके शब्दविज्ञातभृंगमा॥२७॥ मोक्षोपाये उपशमप्रकरणे सभासंस्थानं सर्गः॥३॥ श्रीवाल्मीकिरुवाच॥ मेघगंभीरया वाचा विश्रब्धपदसुंदरां॥ इदं दशरथो वाक्यमुवाच मुनिनायकं॥१॥ भगवन्ह्स्तनेन त्वं वाक्यसंदर्भजन्मना॥ कश्चिन्मुक्तोसि खेदेन तपःकार्श्यातिशायिना॥२॥ ह्स्तनो क्रोय आनंदी विविक्तो वचसां गणः॥ अमृतावर्षणेनेव ते नैवाश्वासिता वयं॥३॥ चंद्रांशव इवोल्लामर्ततमांस्यमृतनिर्मलाः॥ अंतःशीतलयंत्येता मद्दत्ता ममला गिरः॥४॥

येन तथाविधे अगरुतगरु निर्यासधूमे ताम्रलिप्ता तितो हितवर्णता छलैर्वविज्ञातान् तुषाक्षाद्दृश्यभृं गायन्त्विन् कर्मणि तद्यथा स्यात्तथा वितानेव द्दानां मंभोरुहाणां मामोदलेशे मध्ये मदहरति ऊर्ध्वप्रवहति सतीत्यर्थः॥२७॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे तृतीयः सर्गः॥३॥ राज्ञा वसिष्ठवाक्यानां प्रशंसा मुनिवाक्यतः। रामेण विंतितार्थानां मनुवादश्च वर्ण्यते॥ विश्रब्धैर्विश्वासातिशयप्रकाशकैः पदैः सुंदरां॥१॥ ह्स्तनेन पूर्वेद्युर्भवेन। वाक्यसंदर्भोच्चारणजन्मना खेदेन श्रमेण॥२॥ आनंदी श्रोत्र॰॰ नंदशीलः। विविक्तो विशदः॥३॥ तमांसि अज्ञानान्यंधकारांश्च॥४॥



इदानीं चंद्रांशुभ्योप्युत्कर्षमाह अरक्षेति॥ अरवं अनास्वादितरवं कारणशून्यश्चानंदो ब्रह्मसुखं प्रयोजनं न देवमानुषानंदादिर्हि रक्षा यग भोगेन दांत विषयसुखेभ्य उच्चैस्तरं पदं तदा श्रयाः॥ तद्द्विषया अतिमोहापहारिण्य इत्यनर्थनिवृत्तिरूपं प्रयोजनांतरं तासामुक्तम्॥५॥ मुक्तिलक्षणान्योतिद्वर्त्ता॥ यस्मादुदेतियमाश्रितो देति॥ दुरीहितं मानसदोषं। दुर्विहितं शारीरदोषं। सर्वसमस्तं इंद्रियदोषं। शीतांशोश्चंद्रस्यांशवः किरणाः॥ आत्मानेव स्वच्छमा

अरवाह्लाददायिन्य उच्चैस्तरपदाश्रयाः॥ अतिमोहापहारिण्यः सूक्तयो हि महीयसां॥५॥ आत्मरत्नावलोकैकदीपिका सरसात्मिका॥ यस्मान्मुक्तिलतोदेति सर्वेषः सुजनद्रुमः॥६॥ दुरीहितं दुर्विहितं सर्वं सज्जनसूक्तयः॥ प्रमार्जयंति शीतांशोस्तमः कांडमिवांशवः॥७॥ रत्नालोभास्यस्माकं संसारे निगडा मुने॥ तेवोत्क्यातनुतां याताः शरदीवासितांबुदाः॥८॥ च संप्रवृत्ता वयं इष्टमात्मानमपकल्मषं रसां ननानीतदृशो जाल्यंधा इव कांचनं॥९॥ संसारवासनानाम्नी मिहिका हृदयांबरे॥ प्रवृत्ता तनुतां गंतुं त्वदुक्तिशरदेव नः॥१०॥ मुनेमंदारमंजर्यस्तरंगा वामृतांभसः॥ न तथाह्लादयंत्यंतर्यथोदारपियागिरः॥११॥

हत्नलेति॥ तनुतामल्पावशेषणं॥८॥ रसः स्निग्धरसस्त्वद्वचितैः सिद्धांजनैर्नयनानीतदृशः अप्सरसाम्बं जनेनानीतप्रत्यग्दृशश्चा॥९॥ हृदयांबरे स्थितेति शेषः॥ रूपकबलादेवातमर्तेन इवार्थे गम्यमाने पुनरिवशब्दप्रयोग उत्प्रेक्षाद्योतनार्थः॥१०॥ अमृतांभसः अमृतांभोधेः॥११॥

वा॰टी॰ उप॰ ९ यद्यद्दिनं महतां जनानां ब्रह्मविदां सपर्यया पूजया संमान्यपयाति। सा लोकं सप्रकाशं अंधात्तमो हर्तः १२। आबोधय पृच्छ १३। आस्थित उप
विष्टः १४। १५। सर्वासां प्रागुक्तजीवजातीनाम् १६। सर्वं नटवन्मायया जगद्वेषेण स्थितं ब्रह्म। असर्वं निष्प्रपंचं सत्स्थूलमसत्सूक्ष्मं। सत्यासत्य

यद्यद्राघव संयाति महाजनसपर्यया। दिनं तदिह सालोकं शेषास्त्वंधा दिनालयः। १२। रामराजीवपत्राक्ष प्रकृतार्थमिहा
व्ययं। मुनिमाबोधय पुनः प्रसादे समवस्थितं। १३। इत्युक्तो भरतात्तत्र राममभिमुखमास्थितः। उवाचेदमुदारात्मा व
सिष्ठो भगवान्मुनिः। १४। श्रीवसिष्ठ उवाच। राघवस्वकुलैकैंदो यन्मयोक्तं महामते। कच्चित्स्मरसि वाक्यार्थं सर्वापर वि
चारितम्। १५। उत्पत्तीनां विचित्राणां सत्वादिगुणभेदतः। कच्चित्स्मरसि सर्वासां विभागमरिमर्दन। १६। कच्चित्सर्वमसर्वं च सर
त्सच्चसदोदितं। रूपं स्मरसि चेत्स्येव विविक्तं परमात्मनः। १७। यथेदं स्फुरितं विश्वं विश्वेशादेव चेश्वरात्। कच्चित्स्मरसि तत्साधो सा
धुवादैकभाजन। १८। रूपं कच्चिदविद्याया बलाद्दुर्गुरमाततं। अनंतमंतवच्चैव सम्यक्स्मरसि सन्मते। १९। चित्तमेव नरो ना
न्य इति यत्प्रतिपादितं। लक्षणादि विचारेण कच्चित्स्मरसि साधु तत्। २०। वाक्यार्थश्चाखिलः कच्चित्त्वया राम विचारि
तः। ह्यस्तनस्य विचारस्य रात्रावोहृदि निवेशितः। २१।
५ रूपं वा मदुक्तं स्मरसि स्वबुद्ध्या दृश्येभ्यो विविक्तं वेत्स्येव वा १७। विश्वेशात्सर्वशक्तिसंपन्नादीश्वरादुत्पन्न इत्यर्थः एवकारः सांख्याद्यभिमतप्रधानादिकारणवाद
निरासार्थः साधुवादाः प्रशंसाः सदुपदेशाश्च बलात्कालबलात् संख्यया अनंतं देशकालादिना अंतवत् १९। २०। ह्यस्तनस्य विचारस्य श्रवणेन विषयो वाक्यार्थः
विचारितो मननेन परिष्कृतः २१

हेलया अनादरेण हृता संस्थितिः स्वरूपं दिष्टार्थधारणं येन तथाविधस्य पुरुषाधमस्य न फलतीत्यर्थः २२। विविक्तहृदयः विवेकशालिमनाः विशालवक्षाश्च २३।
२४। विज्ञंमितं प्रभाविस्तारः २५। तथैव कृतमिति शेषः ज्ञातं वस्तु स्पष्टमाह अपास्तेति २६। भवता कर्त्रा उक्तिलक्षणेन विवस्वता सूर्येण करणेन उक्तो उपदेशे
नार्थप्रकाशनविषये विवस्वता सूर्यभूतेन भवतेति सामानाधिकरण्यं वा। आह्लादि जोत्स्नाशीताप नयसुखकरं २७। अंतः कृतं हृदि कृतं। अन्वितं क्रमयु

भयोभयः परामृष्टं हृदये सुनियोजितं। प्रयोजनं फलं स्वच्छैर्नहेलाहतसंस्थिते। २२। भाजनं त्वं विविक्तानां वचसां शुद्धिशालि
नां। विविक्तहृदयः कंठमुक्तानामिव राघव। २३। श्रीवाल्मीकिरुवाच। कमलासनपुत्रेण मुनिनासम होत्तमः। एवं वितीर्ण
वसरो रामो वाक्यमुवाच ह। २४। श्रीराम उवाच। भगवन्सर्वधर्मज्ञ तथैवैतद्विजृंभितं। यदहं परमोदारो बुद्धवान्वचनं तव। २५। यदादि
शति तत्सर्वं तथैवावगतं नान्यथा। अपास्तनिद्रेण मया वाक्यार्थो हृदि चिंतितः। २६। भवांधकारक्षतये भवतोक्तिविवस्वता। स्वयः प्रसा
दितमाह्लादिनामृशिमिपरलं प्रभो। २७। तदंतीतमदीनात्मन्सर्वमंतः कृतं मया। रम्यं पुण्यं पवित्रं च रत्नं दं ड मिवान्वितम्। २८।
हितानुबंधि हृद्यं च पुण्यमानंदसाधनं। शिरसा ध्रियते कैर्नो सिद्धैस्त्वदनुशासनं। २९। प्रतिक्षिपंतः संसारमिहिका वरणं वर्षे
प्रसन्नास्त्वत्प्रसादेन वर्षांतद्युवयामराः। ३०।
ते॰ २८ सर्वा निष्ठा हितानामनुबंधित्वान्मधुरतरत्वात्सम्यक्पुरुषार्थसाधनत्वादत्तहृद्यं श्रवणमनननात्प्रतवच्चनं अवश्यं शिरसा प्रणम्यादरेकार्यमित्याशये
नाह हितानुबंधीति। सिद्धैर्देवभेदैर्योगमंत्रादिसिद्धैः स्वतः सिद्धैः सनकादिभिर्वा कैर्न शिरसा ध्रियते २९। स्वस्मिन्नुपदेशस्यानैष्फल्यशंकां वारयन्ना
हप्रतिक्षिपंतः इति निरस्यंत इत्यर्थः वर्षांते शरदि ३०

उपदेशस्य कालत्रयेपि हितकारितामाह आपातेति। आपाते श्रवणकाले मध्ये मनननिदिध्यासनकाले सौभाग्यस्य। अंतर्मुखतासंयुक्तस्य शमादिसंप
त्सुखस्य। अनुत्तमं मोक्षाख्यं फलं यत्र तथाविधं उदर्कं उत्तरकालो यस्य तत्तत्॥१॥ विकसितं च शुभं च। आह्लादितानि आनंदं करसीकृतानि शुभा
शुभानि पुण्यपापानि तत्फलानि च येन। आह्लादिताः शुभा देवाः अशुभाः सर्पादयश्च येन। तद्वत् बालक्षणं कुसुमं कल्पवृक्षपुष्पं॥२॥ इदानीं गुरुं
तीर्थत्वान्महाह्रदत्वेन रूपयन् संबोध्य पुनः शिक्षार्थोपदेशवाक्प्रवाहं प्रार्थयते सकलेति। सकलशास्त्रविचारेषु विशारद हे प्रसृतावारपुण्यजलानां

आपातमधुरारंभं मध्ये सौभाग्यवर्द्धनम्। अनुत्तमफलोदर्कं गुणवत्त्वदनुशासनम्॥१॥ विकासिसितमम्लानमाह्लादितशु
भाशुभं त्वद्वचःकुसुमं निःस्वं श्रीमत्फलदमक्षतः॥२॥ सकलशास्त्रविचारविशारद प्रसृतपुण्यजलैकमहाह्रद
मजमत्शं विततव्रत संप्रति प्रसृततां हतकिल्बिषसंततिः॥३॥ मोक्षोपायेषूपशमप्रकरणे राघवप्रश्नसर्गः॥४॥ श्रीवसि
ष्ठ उवाच। इदमुत्तमसिद्धांतसुंदरं सुंदराकृते। उपशांतिप्रकरणं शृणु श्रावहितो हितम्॥१॥

एकमहाह्रद विततव्रत मां प्रति प्रसृततां उपदेशवाक्प्रसरं मज्जेत्यर्थः। ह्रदपक्षे सकलशास्त्रलक्षणानीविनां हंसादिपक्षिणां चारैः विशारद शोभ
मानानुवितता नि विस्तारितानि व्रतानि मुनिभिर्मज्जनात्तत्क्षणं हतानि किल्बिषाणि येन। एवंविध हे प्रसृतपुण्यजलैकमहाह्रद त्वं संप्रति इदानीं संततिं
वाक्संतानरूपां प्रसृततां प्रवाहं मज्जेत्यर्थः॥ मां प्रतीत्यंते पाठे मह्यं शुद्धये इत्यर्थः॥३॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे चतुर्थः सर्गः॥ राम॰
४ अविवेकप्रवृद्धायां मनोमात्रजगत्स्थितेः। इहोपशमनोपायक्रमः सम्यगुदीर्यते॥ अवहितः सावधानचित्तः॥१॥ ॥१०॥

प्रागुक्तमनर्थप्रसक्तं तेन संगमयति दीर्घेति। राजसतामसैः प्रागुक्तजीवैर्धार्यते। पुरुषो वा अक्षितिः स हीदमन्नं धिया धिया जनयते कर्मभिरित्यादिश्रु
तिभिर्भावनः॥२॥ प्रागुक्तलक्षणैः सत्वस्थजातिभिः राजससात्विकैः शुद्धसात्विकैश्च॥३॥ केनोपायेन स त्यज्यते तमाह येइति। सर्वपरंपरां सर्वपरं परां अनेन सौ
म्य शुंगेनापो मूलमन्विछेत्यादि श्रुतिदर्शितां॥४॥ सत्कार्याणि यज्ञो दानं तपश्चैव पावनानि मनीषिणामिति भगवदुक्तानि॥५॥ स्वयमेवेति। उद्धरेदात्मना

दीर्घसंसारमायेयं राजसतामसैः। धार्यते जंतुभिर्नित्यं सुस्तंभैरिव मंडपः॥२॥ सत्वस्थजातिभिर्धीरैस्त्वादृशैर्गुणबृंहि
तैः। हेलया त्यज्यते नु घा मायेयं त्वगिवोरगैः॥३॥ ये सत्वजातयः प्राज्ञास्तथा राजससात्विकाः। विचारयंति ते साधो ज
गत्सर्वपरंपराम्॥४॥ शास्त्रसज्जनसत्कार्यसंगेनोपहतैनसां। सारावलोकिनी बुद्धिर्जायते दीपकोपमा॥५॥ स्वय
मेव विचारेण विचार्यात्मानमात्मना। यावन्नाधिगतं ज्ञेयं न तावदधिगम्यते॥६॥ प्रज्ञावतां नयवतां धीराणां कुशलि
नां॥ जात्या राजससत्वानां मुख्यस्त्वं रघुनंदन॥७॥ स्वयमालोकय प्राज्ञ संसारं भद्र दृष्टिषु। किं सत्यं किमसत्यं वा
भवसत्वपरायणः॥८॥ आदावंते च सन्नास्ति कीदृशी तस्य सत्यता। आदावंते च यन्नित्यं तत्सत्यं नाम नेतरत्॥९॥

त्मानमिति स्मृत्यादि इति भावः। नाधिगतं न ज्ञातं अधिगम्यते प्राप्यते॥६॥ त्वयि तु तत्त्वात्तियोग्यता स्त्येवेत्याह प्रज्ञावतामिति। नयवतां प्रमाणे
कुशलानां॥७॥ आलोकय विचारेण पश्य॥८॥ अस्तीति सत्तत्सदेव सत्यं असत्ता विरुद्धस्वभावं तद्धि रुद्धं नास्ति स्वभावं कथं संभवेत् स्वभावविपर्या
सायोगादिति भावः। नित्यं नियतसत्वस्वभावम्॥९॥

आसज्यतेसत्यबुद्ध्यारज्यते॥१०॥मनोरथरचितप्रासादवन्मनोमात्रत्वात्कार्यत्वादपिनसत्यता प्रसक्तिर्जगतइत्याशयेनाहतायतइति॥११॥प्रश्नःस्पष्टः ॥१२॥१३॥ प्रथमंशास्त्रसज्जनसंगाभ्यांवैराग्यादिसाधनचतुष्टयंसंपाद्यमित्याह॥ एवमितिपुण्यतांज्ञानोदययोग्यतापारिकांविशुद्धिम्॥१४॥सोजन्यंनिरभिमानिता॥ येगुरवोविज्ञानेनसर्वशास्त्ररहस्यज्ञानेनगुरवोगरीयांसोपिशब्दादुपदेशकौशलेनशिष्यबोधनसमर्थाश्चभवंतितेविधिनाअनुगम्याः॥१५॥उमासहायं

आद्यंतासत्त्वमयेयस्यवास्तन्व्यारज्यतेमनः॥तस्यमुग्धपशोर्जंतोर्विवेकःकेनजन्यते॥१०॥जायतेमनएवेहमनएवविवर्द्धते सम्य ग्दर्शनदृष्ट्यातुमनएवहिमुच्यते॥११॥श्रीरामउवाच॥ ज्ञातमेतन्मयाब्रह्मन्यथास्मिन्भुवनत्रये॥मनएवहिसंसारिजराम रणाभाजनं॥१२॥श्रीरामउवाचैवमस्तस्योत्तरणोपायस्तन्मेब्रूहिसुनिश्चितम्॥हार्द्दंतमस्त्वयाकेनराघवानोविनाश्यते॥१३॥ श्रीवसिष्ठउवाच॥एवंराघवशास्त्रेणवैराग्येणपरेणच॥तथासज्जनसंगेननीयतेपुण्यतांमनः॥१४॥सोजन्योपहितं चेतोयदावैराग्यमागतम्॥तदानुगम्यागुरवोविज्ञानगुरवःप्रिये॥१५॥ततस्तस्योपदिष्टेनकृत्वाध्यानार्चनादिकं क्रमेणपरमाप्नोतितत्पदंपरमपावनम्॥१६॥विचारेणावदातेनपश्यस्यात्मानमात्मना॥इंदुनाशीतलेनांतर्विश्वंस्व मिवतेजसा॥ १७

परमेश्वरंप्रभुंत्रिलोचनंनीलकंठंप्रशांतंध्यात्वामुनिर्गच्छतिभूतयोनिंसमस्तसाक्षिंतमसःपरस्तादित्यादिश्रुतेः प्रथमंगुरू पदिष्टमार्गेणसगुणेश्वरध्यानादिकंकृत्वातदनुग्रहाद्दृश्यमाणविचारादिक्रमेणेत्यर्थः॥१६॥विश्वंहृत्स्थंइंदुनातेजसाएवंस्वमिव॥१७॥



चेतसाबुद्धित्वेनविचारलक्षणेनतदेयावद्विश्रांतिस्थैर्यंनैति॥१८॥आधीन्मानसदुःखानिअधःकरोतिनिरस्यतीतितियाद्वत्सोम्यंनिम्नप्रसन्नं॥१९॥भ स्मनिप्रदग्धंहेमअन्यैर्विवेकुमशक्यमपियथाहेमज्ञानात्मनःसदाहेमपरिशोधनेनाद्विवेकेशलात्मनोहेमकारस्यइदंरूक्मंइदंभस्मेतिस्फुटंपरिज्ञातमि तिनतदलाभमोहस्यावसरस्तथाअयमज्ञदशाप्रसिद्धोमनागात्मापरिच्छिन्नजीवःचिरंविचारेणविविच्यसात्मनिअवगतेसतिअक्षयःकालादिप

तावद्भवमहांभोधौजनस्तृणवदुह्यते॥विचारतटविश्रांतिमेतिमावन्नचेतसा॥१८॥विचारेणपरिज्ञातवस्तुनोस्यजनस्य धीः॥सर्वानधःकरोत्याधीन्सौम्यांभइववालुकाः॥१९॥इदंरूक्ममिदंभस्मपरिज्ञातमितिस्फुटं॥नयथाहेमकारस्य हेमज्ञानात्मनस्तथा॥२०॥अक्षयोयमनागात्मात्मात्म न्यवगतेचिरम्॥भवतीतिनरस्येहमोहस्यावसरःकुतः॥२१॥अ परिज्ञातसारेहिमनोंतर्यदिमुह्यते॥ज्ञातसारेत्वसंदिग्धमसतीकिलसंदना॥२२॥हेजनोद्यपरिज्ञातआत्मावो दुःखसिद्धये॥परिज्ञातस्त्वनंतापसुखायोपशमायच॥२३॥

रिच्छेदशून्यःस्वतएवस्फुटंभवतीतिकुतोमोहस्यावसरइतिपरेणान्वयः॥२०॥२१॥अपरिज्ञातसारेपुरुषेयदिमुह्यतितर्हिमुह्यतांनामेतिशेषः॥असतीअसं भाविनेवकिलेत्यर्थः॥२२॥इदानींमनुक्तोशात्सर्वश्रोतृजनान्प्रत्याहहेजनाइतिपदाद्येवैपरतस्मिन्नुदरमंतरंकुरुतेअथतस्यभयंभवतितत्वंभययंविदु षोमन्वानस्येत्यादिश्रुतेरितिभावः॥परिज्ञातस्त्विति॥एवंलेशंलब्ध्वानंदीभवतिसर्वान्कामानाप्नोतिसमभवत् ज्ञात्वातंमृत्युमत्येतिआनंदंब्रह्मणोवि

व्यक्तीकृत्य पंचकोशविवेकेन दृष्ट्वा ॥२४॥ व्यक्तिकरणमेव स्फुटयति देहेहेनेत्यादिना । अप्यर्थे एवकारः ॥२५॥ आत्मा अत्र देही जीवस्य यथा पद्माधारमहाजलं पद्म
पत्रनिविष्टजलत्वस्योपाधित एव पृथक् वस्तुतस्तद्रूप इत्यर्थः ॥ ननु महाजलस्य पद्मपत्रारोह परिच्छेदो दोवाय्वादिनिमित्तसिद्धं पूर्णात्मनः परिच्छेदेन देहारोह
णे किं निमित्तमिति चेद् सत्कृ दुष्टोपितं पापि श्रमं मन एव अतस्तन्नाशायैव यत्नः कार्य इत्याशयेनानुक्रोशात् क्रोशति ऊर्ध्वबाहुरित्यादिना ॥२६॥ दुर्वासनापंक

मिश्रीभूतमिवानेन देहेनोपहतात्मना ॥ व्यक्तीकृत्य समात्मानं स्वस्थाभवतमाचिरम् ॥२४॥ देहेनास्य न संबंधो मनागेवामलात्मनः । हे
म्नः पंकलवेनेव तत्र तस्यापि मानवाः ॥२५॥ पृथगात्मा पृथग्देही जलपद्मजलवोपमौ ॥ ऊर्ध्वबाहुर्विरौम्येष न च कश्चिच्छृणोति मे ॥२६॥
जडधर्मि मनो यावन्नैक रूपव स्थितं ॥ भोगमार्गवराम्रढं विस्मृतात्मविचारणं ॥२७॥ तावत्संसारतिमिरं सेंदुनापि सवह्निना । अ
र्कद्वादशकेनापि मनागपि न भिद्यते ॥२८॥ संप्रबुद्धे हि मनसि स्वां विवेचयति स्थितिम् । नैशमर्कोदये यद्वत्तमो हार्द पलायते
२९ ॥ नित्यमुत्तमबोधाय योगशय्यागतं मनः ॥ बोधयेद्ववबोधाय भवोद्यत्यंतदुःखदः ॥३०॥ यथा रजोभिर्गगनं यथा
कमलमंबुभिः न लिप्यते हि संश्लिष्टैर्देहैरात्मा तथैव च

गर्त्तैक रूपवन्निश्चलीनं कठोरं भोगप्राप्तौ मार्गवद्वारम्रते रिंद्रियैर्विषयेष्वारूढं मनो या
वत्स्थितं तावत्संसारतिमिरं सेंदुना सवह्निना अपि शब्दान्न क्षत्रमण्यादि सर्वं तेजस्सहितेन अर्कद्वादशकेनापि मनागपि न भिद्यते इति परेणान्वह
न्वयः ॥२७॥ स्वां पारमार्थिकीं स्थितिं विवेचयति अन्तर्हितहि विच्य पश्यति सति ॥२९॥ योगे देहादिताद्रात्म्याध्यासत्यागलक्षणायां शय्यायां गतं सुसमा
धिविश्रांतिं कृत्वेति वा ॥३०॥ कथं बोधयेत्तदाह यथेति ॥३१॥ 

हेमतादात्म्यापत्तिलक्षणां परिणतिं अंतर्वस्तुतो न याति ॥३२॥ अनुभावित्वमनुसारित्वमनुभवितृत्वं च इत्यवबुध्यते मूढ इति शेषः । बिंदुतान घथावट
काणि संपतंती वद्दृश्यंत इति श्रुत्यनुभवसिद्धा बिंदुसहस्राकारतान्लानता मालिन्यं ॥३३॥ यदि नात्मनः सुखदुःखे तर्हि किं देहस्यैनेत्याह सुखदुःखे इ
ति तर्हि कस्य तत्राह एते इति अज्ञानमेवाज्ञानेकं तस्यैव ॥३४॥ आत्ममय मात्मविवर्तं शांतं नित्यप्रशांतं ॥३५॥ विवर्त्ततां दृष्टांतेन दर्शयति इमाइति

कर्दमादि यथा हेम्नाश्लिष्टमेति पृथक्स्थितं । नांतःपरिणतिं याति जडो देहस्तथात्मना ॥३२॥ सुखदुःखानुभावित्वमात्म
नीत्यवबुध्यते । असत्यमेव गगने बिंदुताम्लानतेयथा ॥३३॥ सुखदुःखे न देहस्य सर्वातीतस्य नात्मनः ॥ एते ह्यज्ञा
नकस्यैवतस्मिन्नष्टे न कस्यचित् ॥३४॥ न कस्यचित्सुखं किंचिदुःखं च न च कस्यचित् ॥ सर्वमात्ममयं शांतमनंतं पश्य
राघव ॥३५॥ इमा याः परिदृश्यंते विततास्सृष्टिदृष्टयः पयसीव तरंगास्ते पिच्छं व्योम्नीव चात्मनि ॥३६॥ यथा मणि
र्दीपात्सछायाः स्वयमकारणं तेजोमयीस्तथैवायमात्मा सृष्टीः प्रयच्छति ॥३७॥ आत्मा जगच्च सुमते नैकं न द्वैतम
प्यसत् आभासमात्रमेवेदमित्थं संप्रतिपत्तं मतं ॥३८॥

व्योम्नि पिच्छं अर्द्धनिमीलिताक्षस्याकर्णाभिमुखं शयानस्य भ्रांत्या प्रसिद्धं ॥३६॥ तेजोमयीः आत्मच्छायाः स्वकांतीर्दीप्तिप्रसारयति । अकारणम
क्रियाश्लिष्टइति यावत् प्रयच्छति प्रसारयति ॥३७॥ नैकं नाद्वयं न द्वैतं न नानापि यतो जगद्रूपमसत् न त्वसत्ता सत्ता अभेदो भेदो वा निरूपयितुं शक्यत
इत्यर्थः संप्रत्यज्ञानकाले ॥३८॥

परमार्थतस्तु भ्रांतेरपि पृथग्दुर्निरूपत्वात् ब्रह्मैवेदं सर्वमात्मैवेदं सर्वमितिश्रुत्युक्तदृशा ब्रह्मैव सर्वमित्याह समस्तमिति। ३९। तते देशिकपरिच्छेदरहिते ब्रह्मस्व
नैव वस्तुकृतपरिच्छेदराहित्ये नित्ये कालिकपरिच्छेदशून्ये। ४०। वास्तवैकत्वविरोधादपि न द्वैतकल्पना सतीत्याहैकस्मिन्नेवेति। ४१। इदानीं तादृशात्मपरिचयेनात्
रविश्रांतये सदा तद्भावनोकार्येत्याह भावयन्निति तद्रूपेण क्षीरोदकवत्तद्रूपापन्नेनैव मनसा स्वच्छज्वलमये मायाकौटिल्यमालिन्यरहिते इतियावत्। ४२।
समस्तं खल्विदं ब्रह्म सर्वमात्मैव माततं। अहमन्य इदं चान्यदिति भ्रांतिं त्यजानघ। ३९। तते ब्रह्मघने नित्ये संभवंति न कल्पनाः। विछि
तयः पयोराशौ यथा राम न तन्मयाः। ४०। एकस्मिन्नेव सर्वस्मिन्परमात्मनि वस्तुनि। द्वितीया कल्पना नास्ति व द्वौ हिमकणौ यथा
४१। भावयन्नात्मनात्मानं चिद्रूपेणैव चिन्मयं। स्वच्छज्वलमये स्वात्मा स्वयमात्मनि जृंभते। ४२। न शोकोऽस्ति न मोहोऽस्ति न
जन्मास्ति न जन्मवान्। यदस्तीह तदेवास्ति विज्वरो भव राघव। ४३। निर्द्वंद्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान्॥ अद्वितीयो
विशोकात्मा विज्वरो भव राघव। ४४। समः स्वस्थः स्थिरमतिः शांतशोकमना मुनिः। मौनी वरमणिस्वच्छो विज्वरो भव राघव। ४५।
विविक्तः शांतसंकल्पो धीरधीर्विजिताशयः। यथाप्राप्तानुवर्ती च विज्वरो भव राघव। ४६। वीतरागो निरायासो विमलो वीतकल्मषः।
नादानत्यागपरित्यागी विज्वरो भव राघव। ४७। विश्वातीतपदं प्राप्तः प्राप्तप्राप्तव्यहर्षितः। हर्षार्णववरक्षुब्धो विज्वरो भव राघव॥ ४८॥
तद्भावापन्नस्य जीवन्मुक्तिविश्रांतिं दर्शयति न शोक इत्यादिना। ४३॥ निर्द्वंद्वः शीतोष्णादिशारीरद्वंद्वविक्षेपरहितः नित्यसत्त्वस्थितत्वात् रजस्तमःप्रयुक्तमानसवि 
क्षेपरहितः अत एव द्वयपरिहारोपाययोगक्षेमचिंतोज्झितः॥ ४४। ४५। विविक्तः अविद्यातत्कार्यनिर्मुक्तः विजिताशयः स्वाधीनचित्तः। ४६। ७॥ ८ 

धराधराणां शिरइव स्वप्रोत्तमो मेरुः सइव धीरः। ५०। ५१। औदार्यं अकार्पण्यं पूर्णकामतामितियावत् आह्लादे सर्वतापोपशमसुखं। ५२। उक्तमर्थं संगृह्योपदिशन्नु
पसंहरति विश्वेति स्पष्टोऽर्थः। ५३। यदि तद्दुःअसत्यं नानुधावति तर्हि किं मम राज्यादिना परित्याज्यमेव युक्तमिति रामाशयमालक्ष्याह एकेति। गुरुणापि
उपदिष्टं आज्ञप्तं एकातपत्रं राज्यं समस्तगुणरंजिताः राजानो लोकाः प्रजाश्च येन तथाविधः सन्मम मया दृष्ट्या चिरं सम्यक् सुपालय प्रारब्धत्वादवश्यभो
विकल्पजालनिर्मुक्तो मायाजनविवर्जितः॥ आत्मनात्मनि तृप्तात्मा विज्वरो भव राघव॥ ४९॥ [illegible]
अनंतपारपर्यंतवपुरात्मविदां वरः। धराधरशिरोधीरो विज्वरो भव राघव॥ ५०। यथाप्राप्तानुभवनात्सर्वत्रानभिवांछनात्
त्यागादानपरित्यागाद्विज्वरो भव राघव॥ ५१॥ आत्मन्येवात्मनौदार्यं भज पूर्ण इवार्णवः॥ आत्मन्येवात्मना ह्ला
दं भज पूर्णेन्दुबिंबवत्॥ ५२। विश्वप्रपंचरचनेयमसत्यरूपा नासत्यरूपमनुधावति राम तज्ज्ञः। तज्ज्ञोऽसि शांतकल
नोऽसि निरामयोऽसि नित्योदितोऽसि भव सुंदर शांतशोकः। ५३। एकातपत्रमवनौ गुरुणोपदिष्टं सम्यक् सुपालय चिरं स
मयेह दृष्ट्या। राज्यं समस्तगुणरंजितराजलोकं त्यागेन युक्त इह कर्मसु नापि रागः। ५४। मोक्षोपायेषूपशमप्रक
रणे प्रशमोपदेशः सर्गः॥ ५॥
कृत्येषु कर्मसु तत्फलेषु च त्यागेन युक्तः नापि रागो युक्त इत्यर्थः॥ त्यक्त्वा कर्मफलासंगं नित्यतृ
प्तो निराश्रयः। कर्मण्यभिप्रवृत्तोऽपि नैव किंचित्करोति सः इति भगवद्वचनादिति। ५४ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे पंचमः सर्गः ५

श्री

वा·टी·उप० ॥२४॥ इह कर्मगतीः सर्वभुक्त्वा चरमजन्मनाम्॥ जीवन्मुक्ते गुणावासो सामान्य क्रमईर्यते॥ गुणार्जन क्रमस्य वक्ष्यमाणस्य प्रकृत संबंधं दर्शयितुं प्रसक्त तन्निरासं
गविहिताप्रतिषिद्धकार्यं प्रवृत्त्या जीवन्मुक्तं लक्षयति इममिति॥ विश्वं कृत्स्नं परिस्पंदं श्रुतिस्मृतिसदाचारप्राप्तव्यवहारं अयस्कांत वत्संनिधिमा
त्रेण करोमीति असत्वासनं प्रवर्ततेन तज्ज्ञ इव कर्तृत्वाभिनिवेशेनेत्यर्थः॥१॥ कर्मफलासंगादेवाज्ञानामनर्थप्राप्तिरिति दर्शयति पौरुषीमिति पौरुषीम्

श्रीवसिष्ठ उवाच॥ इमं विश्वपरिस्पंदं करोमीत्यसत्वासनं॥ प्रवर्त्तते यः कार्येषु स मुक्त इति मे मतिः॥१॥ पौरुषीं तनुमाश्रि
त्य केचिदेतत्क्रियारताः॥ स्वर्गान्नरकमायांति स्वर्गं च नरकात्पुनः॥२॥ केचित्स्वकर्मणि रता विरता अपि कर्मतः॥ न
रकान्नरकं यांति दुःखाद्दुःखं भयाद्भयं॥३॥ केचित्स्ववासनाजंतु बद्धाः कर्मफलोदिताः॥ तिर्यक्त्वात्स्थावरत
नुं यांति तिर्यक्तनुं ततः॥४॥

नुं पौरुषीं तनुं देहमाश्रित्य प्राप्यापि केचिन्मूढाः एतस्यां निरासंगकर्मानुष्ठानलक्षणायां क्रियायां अरताः कामात्मानः काम्यकर्मभिः स्वर्गं भुक्त्वा ततः
कृतानुशयावशेषेण नरकमायांति॥२॥ अकर्मणि निषिद्धकर्मणि रताः कर्मणः सत्कर्मणो विरताः। तथा च स्मृतिः॥ विहितस्याननुष्ठानान्निंदितस्य राम·
च सेवनात्॥ अनिग्रहाच्चेंद्रियाणां नरः पतनमृच्छतीति॥३॥ नरकोपभुक्तदुष्कर्मफलक्रमेण तिर्यग्योनिषु उदिताः जाताः॥४॥ ॥२४

DR. BHAU DAJI MEMORIAL

राजसतामसानस्तु हतामसांश्चोक्त्वा शुद्धसात्त्विकजीवानाह केचिदिति विचारितः मनो दृक्‌मनः साक्ष्यात्मा येस्ते निःकेवलं परमं कैवल्यरूपं पदं॥५॥ राजससात्त्विका
न्दर्शयति पुरेति॥ कतिपयानि जन्मानि नरेष्टानि मानुषजन्मानि॥६॥ तस्य शांत्यादिमिह हिमाह जात इत्यादिना सौभाग्यं साधनचतुष्टयं पुष्पश्रीः॥७॥ विद्याब्र
ह्मविद्योपाय सर्वविद्याः वेणुमिवेति वेणुविशेषस्यापि मुक्ताकरत्व प्रसिद्धेः॥ चा॥ ज्ञता परोक्षप्रायं ज्ञानम्॥८॥ तस्योपक्रमोक्त जीवन्मुक्तलक्ष

केचिदात्मविदो धन्या विचारितमनोदृशः॥ विच्छिन्नतृष्णा निगडा यांति निःकेवलं पदं॥५॥ पुरा कतिपयान्येव भुक्त्वा जन्मानि
ज राघव॥ अस्मिन्मनियो मुक्तस्तस्माद्राजससात्त्विकः॥६॥ जातो सौ वृद्धिमभ्येति पार्वणश्चंद्रमा इव॥ कुटजं प्रावृषीवैनं
सौभाग्यमनुगच्छति॥७॥ यस्येदं जन्म पाश्चात्त्यं तमाश्वेव महामते॥ विशंति विद्या विमला मुक्ता वेणुमिवोत्तमम्॥ च॥
आर्यता हृद्यता मैत्री सौम्यता करुणा ज्ञता॥ समाश्रयंति तं नित्यमंतःपुरमिवांगनाः॥९॥ यः कुर्वन्सर्वकार्याणि पुष्टे नष्टे
थ तत्फले॥ समः सन्सर्वकार्येषु न तुष्यति न शोचति॥१०॥ तमांसीव दिवा यांति तत्र द्वंद्वानि संक्षयम्॥ शरदीव घनास्तत्र गु
णा गच्छंति शुद्धतां॥११॥ पेशलाचारमधुरं सर्वे वांछंति तं जनाः॥ वेणुं मधुरनिध्वानं वने वनमृगा इव॥१२॥ नरं पाश्चात्यज
न्मानमेवं प्रायगुणाश्रियः॥ जातमेवानुधावंति वल्लीका इव वारिदम्॥१३॥

गोपक्रममाह य इति। पुष्टे समृद्धे॥१०॥ द्वंद्वानि सुखदुःखादीनि प्राङ्मालिन्या अपि यांति॥ शुद्धा ह्री प्रभृतयो गुणाः॥११॥ वेणुं कीचकं मारुतपूरणे ध्वनेमधुर
निधानम्॥१२॥ जातमेवेति बाल्यात्प्रभृत्येवेति यावत्॥१३॥

एवंगुणसंपन्नोगुरुःसुखाच्छ्रवणाधिकारेणापक्वचित्तानामित्याशयेनाह।।ततइति।।एवंप्राङ्मदुक्तप्रकारेआत्मानात्मतत्वविवेकउपायानुपदिश्यस्वबुध्यापिकार्येमन नेनियोजयतीत्यर्थः।।१४।।एवंगुणसंपन्नस्यैवगुरुःश्रवणादिनासाक्षात्कारेत्वामेविचारेतिएकरूपमात्मानंदैकसं।।१५।।नियोजयतीत्यत्रस्वचित्तंमननं विवरणेतितनोतीति।।१६।।गुणहीनंनिर्गुणंब्रह्मैवयथाभवतितथाप्रबोधयंतीत्यर्थः।।१७।।उक्तमर्थंसंक्षिप्योपसंहरतिप्रथितेतितेउक्तगुणसंपन्नाश्च दर्शयति

ततोसौगुणसंपन्नोगुरुमेवानुगच्छति।।सतमेवंविवेकेवैनियोजयतिपावने।।१४।।विचारवैराग्यवताचेतसागुणशालिना।देवंपश्यस्य थात्मानमेकरूपमनामयम्।।१५।।जनोत्ययंविचारेणवारुणशांतचेतसा।।प्रबोधनायप्रथमंमनोमननमांतरम्।।१६।।येहिपाश्चा त्यजन्मानस्तेहिसुक्षंमनोमलम्।।प्रबोधयंतिप्रथमंगुणहीनंमहागुणाः।।१७।।प्रथितगुणान्सुगुरून्निषेव्ययत्नादमलधि यापविचार्यचित्तरत्नम्।।गतिममलामुपयांतिमानवास्तेपरमवलोक्यचिरंप्रकाशमंतः।।१८।।मोक्षोपायेउपशमप्रकरणेप्रथमउ पदेशःसर्गः।।६।।

रमजन्मनोमानवाःप्रथितगुणान्प्रख्यातजीवन्मुक्तलक्षणगुणान्सुगुरून्यत्नान्निषेव्यतद्दर्शितयुक्तिभिरमलधियाचित्तांतर्गतंरत्नंप्रत्यगात्मानंप्रवि चार्यरत्नपरीक्षावन्मननपरीक्ष्यचित्तांतःप्रकाशंपरंप्रत्यगभिन्नंब्रह्मचिरंअवलोक्यसाक्षादनुभूयतत्साक्षात्कारमात्रेणतद्भावलाभलक्षणांअम लांमायातत्कार्यसर्वमलनिर्मुक्तांपरमपुरुषार्थलक्षणांगतिंउपसमीपेत्वस्यानएवयांतिलभंतेनोपासकवदुक्रम्यलोकांतरंगत्वेत्यर्थः।।१८।।इतिउपशमप्रकरणेषष्ठःसर्गः राम॰ ।।१५।।

---

इहस्वेनविचारेणकिंचिदुत्पन्नचेतसःश्रूयतेज्ञानसंप्राप्तिराकाशफलपातवत्।।उक्तंसामान्यक्रममनूद्यकस्यचिद्भाग्यवतोविनैवयत्नंदैवोपनीतेनस्वविचारमात्रेणैवम हतासर्वगुणसंपत्सहितज्ञानोदयलक्षणंविशेषंदर्शयतिएषइत्यादिना।।१।।अपवर्गक्रमोमोक्षफलोपहितोद्वौउक्तवक्ष्यमाणौ।।२।।एकेनजन्मनानाबहुभिर्वाजन्मभिःसि द्धिर्मोक्षप्रापकःसमुदाहृतःप्रागुक्तइत्यर्थः।।३।।आत्मनास्वेनैवदैवोपनीतजीवजगत्तत्वविचारवताज्ञानसंप्राप्तिर्भवतीत्यर्थः।।४।।द्वितीयक्रमेजनकाख्यायिका

श्रीवसिष्ठउवाच।।एषतावत्क्रमःप्रोक्तःसामान्यःसर्वदेहिनां।।इमंमन्यंविशेषंत्वंशृणुराजीवलोचन।।१।।अस्मिन्संसारसंरंभेजातानां देहधारिणां।।अपवर्गक्रमोरामद्वाविमावुत्तमौक्रमौ।।२।।एकस्तावद्गुरुप्रोक्तादनुष्ठानाच्छनैःशनैः।।जन्मनाजन्मभिर्वापिसिद्धिदः समुदाहृतः।।३।।द्वितीयस्त्वात्मनैवाशुकिंचिद्व्युत्पन्नचेतसा।।भवतिज्ञानसंप्राप्तिराकाशफलपातवत्।।४।।नभःफलनिपाताभं ज्ञानसंप्रतिपत्तये।।तत्रेमंशृणुवृत्तांतंप्राक्तनंकथयामिते।।५।।शृणुसुभगकथांमहानुभावाव्यपगतसर्वशुभाशुभाःगतोवाः स्वपतितफलवत्परंविवेकंचरमभवाविमलंसमभ्यवंति।।६।।मोक्षोपायेउपशमप्रकरणेआकाशफलप्राप्तिवद्ज्ञानसंप्राप्ति क्रमसूचनंसर्गः।।७।।

मुदाहरिष्यन्नस्मिकांरव्यतिनभःफलेति।।५।।हेसुभगचरमभवाश्चरमजन्मानोमहानुभावाःपुरुषाःपरंविवेकंयथास्वपतंतिफलवत्समभ्यवंतितथा वक्ष्यमाणांकथांशृणुइत्यर्थः।।६।।इतिश्रीवासिष्ठतात्पर्यप्रकाशेउपशमप्रकरणेसप्तमःसर्गः।।७।।

वा॰टी॰उप॰ जनकेनवसंतेत्रवनेविहरताश्रुतिता॥ सिद्धगीताः शुभाः श्लोकाः श्रूताइत्युपवर्ण्यते॥ विदेहानां जनपदानां महीपालो राजा॥१॥ अर्थिसार्थानां याचकजनसं
॥१६॥ घानां॥ बंधुलक्षणानां पुष्पाणां माधवो वसंतः॥२॥ भुवि विष्णुर्भवानिव आस्थितः॥३॥ प्रफुल्लाः बाललतिका यत्र अनुकंपायां कन्प्रत्ययमन्नवद्धित्वं भमारो
अतएव कोकिलालापैः लासिनि नृत्यतीव स्थिते मधौ वसंते॥४॥ सुविलासाः ललनाएवांगना लताः॥ अंगनाश्चवाश्चैवायत्र॥५॥ केसरे पुउद्दामाः रजः सौगंध

श्रीवसिष्ठउवाच॥ अस्त्यस्तमितसर्वापदुद्यत्संपदुदारधीः॥ विदेहानां महीपालो जनको नाम वीर्यवान्॥१॥ कल्पवृक्षोर्थिसा
र्थानां मित्राब्जानां दिवाकरः॥ माधवो बंधुपुष्पाणां स्त्रीणां मकरकेतनः॥२॥ द्विजकैरवशीतांशुर्द्विषत्तिमिरभास्करः॥ सौ धौम
जन्यरत्नजलधिर्भुवि विष्णुरिवास्थितः॥३॥ प्रफुल्लबाललतिके मंजरीपुंजपिंजरे॥ मकरंदमदामोदकोकिलालापला
सिनि॥४॥ मधौ कुसुमिताभोगसुविलासलतागनम्॥ लीलयोपवनं कांतं नंदनं वासवो यथा॥५॥ तस्मिन्वरवने हृद्ये केसरोद्द प्र
ममारुते॥ हरस्यानुचरः सानुकुंजेषु विचचार ह॥६॥ अथ शुश्राव कस्मिंश्चित्तमालवनगुल्मके॥ सिद्धानामदृश्यानां स
प्रसंगादुदाहृतं॥७॥ विविक्तवासिनां निःसंशैलकंदरचारिणाम्॥ इमाः कमलपत्राक्ष गीता गीतात्मभावनाः॥८॥

मकरंदकणापहरणसमर्थाः न तु पांशुविकिरणादोमंदसुरभिशीताइतियावत्॥ तथाविधाः मारुता यत्र सानुकुंजेषु क्रीडाशैलप्रस्थप्ररूढेषु लतागृहेषु एव॰
६॥ अप्रदृश्यानामंतर्हितानां स्वप्रसंगात्स्वानुग्रहार्थमितियावत्॥७॥ श्रुतिस्मृतिपुराणेतिहासेषु गीतमात्मानं श्रवणमात्रेण भावयंति॥ यथा स्वयमेव ॥१६॥
साक्षात्कुर्वंति तथा कुर्वंतीति गीतात्मभावनाः गीताः स्मार्तोपनिषदः शुश्राव॥८॥

॥॥

दृष्टुः चक्षुरादिद्वारा विषयसमानदृश्येन स्रक्चंदनवनितादिविषयेण समायोगात्सन्निकर्षात् जाते प्रत्यये विषयाकारबुद्धिवृत्तौ स्वयं प्रथमा
नः य आनंदरूपो निश्चयस्तं तत्स्वभावमेव आत्मतत्त्वपरिशोधनेन उत्थं निरतिशयभरितात्मना विमृष्टं तत्त्वं आत्मानं निस्पंदं निर्विकल्पसमाधि
निरस्तबाह्यांतःकरणस्पंदं यथास्यात्तथा समुपास्महे निरंतरमनुभवामः॥ अयंभावः विषयाकारवृत्तौ स्वयं प्रथमान आनंदो न विषयकोटौ न
उत्प्रसंगात् नापि कर्तृकरणरूपद्रष्टृकोटौ तेषां कारकत्वेन तत्त्वच्छेदपतानुभवविरोधात् तस्मात् साक्षिकोटावेव साक्ष्येव हि अविद्याव
न रणमंगीकृतचिदानंदस्वभावो न्यस्महंकारात्मानं कल्पयित्वा छेद्यतामिवापन्नो विषयाकारवृत्त्या विमृष्टं तं स्वानंदं तत्त्वच्छेद्यतामिव नयन् स्वात्मानं नि न

सिद्धा ऊचुः॥ दृष्टृदृश्यसमायोगात्प्रत्ययानंदनिश्चयः॥ = ॥ = ॥

रतिशयानंदं प्रतिबुध्यते॥ अतस्तमेव स्वतत्त्वविचारोत्थनिरतिशयानंदस्वभावं समाहितेन मनसा वयमुपास्महे एतस्यैवानंदस्यान्यानि भूतानि मा
त्रामुपजीवंतीति श्रुतेः अस्यानंदस्यैवाविद्याविषयाकारवृत्तिपरिच्छेदेन विषयानंदत्वभावनादिति अथवा दृष्टुः पुरुषस्य दृश्यस्य विषयदा
देश्च बाह्याध्यात्मिकवैषम्यप्रविलापनेन समे परिशिष्टसन्मात्रस्वभावे आत्यंतिकाभेदापत्तिलक्षणाद्योगात् केवलनारूढाद्योगादिति
प्रत्येयः ॥ जुत्वस्यानिर्विकल्पसमाधिपरिपाकात् स्वप्रत्ययैः सानुभवैरेव विश्वासनीयः भूमानंदनिश्चयो यत्तं आत्मनस्तत्त्वेन यथार्थरूपेणोत्थं ॰
प्रकटीभूतं तं निस्पंदं समुपास्महे इत्यर्थः॥ अथवा दृष्टुर्बुद्धेर्दृश्यानां विषयाणां च उपचयजात् प्रियाप्रियादिरूपसाम्येन समात् आयो काप॰च
गात्संबंधात् उभयांतरालिकत्वादुभयविलक्षणात्प्रत्ययस्वानंद इति निश्चीयत इत्यानंदनिश्चयस्तं निस्पंदं सच्चित्स्वरूपं पाधिनिर्मुक्तं॥ अत
नं

एवात्मतत्त्वोऽर्थसीयथार्थरूपेणाविर्भूतं चिदानंदैकरसं स्वप्रत्यगात्मानं समुपास्महे इत्यर्थः॥ अथवायः आत्मा अहमिति द्रष्टा इदं ममेति दृश्ये चान्योन्य
तादात्म्यसंसर्गाध्यासलक्षणात् स्वमायायोगात्प्रतीयते अनुभूयते भुनक्ति स्रक्चन्दनादिभिः प्रीतिप्रत्ययः विषयानंद एव पुरुषार्थ इति निश्चयवान् संसरति
स्वास्वीयायामायाभावे दांतं तन्त्र्यारूढाकारवृत्तिस्तया आत्मतत्त्वोऽर्थसीयथा पारमार्थिकरूपेणाविर्भूतं कृत्वा निःसंदेहं निश्चलं समुपास्महे इत्यर्थः॥ अथ
वायः प्रत्ययः स्वप्रकाशः आनंदैकरसः स्वरूपनिश्चयः द्रष्टृदृश्यस्वभावः सन् द्रष्टृदृश्याकारमायासहितो भूत्वा आत्मानस्वरूपप्रच्युतो अभूद
तं आनंदनिश्चयं चरमसाक्षात्कारवृत्त्यारूढा [illegible] तात्मभूतैव मातया द्रष्टृदृश्यमायानिरासेनात्मतत्त्वेनो अभिव्यादिग्राण्वत॥ अथवा द्रष्टृद

॥ यस्तं स्वमात्मतत्त्वोत्थं निःसंदेहं समुपास्महे ॥९॥ = ॥ = ॥ = ॥ = ॥

श्यस्वमाः यः अर्वादिति छेदः॥ यः आत्मा तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादित्यादिश्रुत्यनुभवसिद्धासरमप्रेमास्पदत्वप्रत्ययार
नंदरूपत्वेन निश्चेतुं योग्योऽपि विवेकविचारादिप्रत्ययाभावात् द्रष्टृदृश्यस्वमाः भोक्तृभोग्यप्रभावाः संसारदशाः अगात् तं यस्तं यत्नुप्रयत्नेन्क्तः विवेक
वैराग्यश्रवणमननादिप्रयत्नैः साक्षात्कृतं स्वेनैव अभिमीते परिछिनत्ति हि नस्तिवा सर्वद्रष्टृदृश्यद्वैतजातमिति स्व मं यदात्मतत्त्वं तद्भावेनोत्थि
तं निःसंदेहं पुनः संसारप्रसक्तिशंकाशून्यं सम्यगुपेत्य सर्वसाक्षीप्यावधिप्रत्यगात्मतया प्राप्य आस्महे तिष्ठाम इत्यर्थः॥९॥ उप·
॥१७॥

तमेवात्मानं निष्कृष्य करतलामलकवद्दर्शयंत इवान्ये प्राहुर्द्रष्टृदर्शनेति। द्रष्टृादित्रिपुटीत्यागेनावस्थाद्वयनिरासः तत्वासनया सहेत्यनेन तु तदुभयबीजवासना
संभूतसौषुप्ताज्ञानस्यापि निरासउक्तः दर्शनाद्याक्षणमात्र्यादिवृत्तेः प्रथममेव वृत्तुत्पत्तिसाक्षितयाभासमानमित्यनेन सर्वसिद्धत्रिपुटीसाक्षीसर्वा
नुभवसिद्धो विविच्य दर्शितः तमेवं सबीजत्रिपुटीत्यागात्तुरीयमात्मानं समुपास्महे इत्यर्थः॥१०॥ दर्शनप्रथमाभासे साक्षिणि ये अस्तिनास्तीति विप्रतिपद्यं
ते तान्प्रत्यपि तदुभयपक्षाविरुद्धं साक्षिणं —— दर्शयंतोऽन्ये प्राहुर्द्वयोरिति येतावदस्ति दर्शनप्रथमाभासः परं तु सो
पि जन्य एव न नित्य इत्याहुस्तेषां सर्वसर्वं तदीसानां स्वप्रकाशत्वस्वविषयत्वेवास्वमां न भावपरिक्षीणत्वात् सर्वेतरविज्ञानासंस्पर्शित्वाच्च न तदुत्पत्त्यादिमा

अन्ये ऊचुः॥ द्रष्टृदर्शनदृश्यानि त्यक्त्वा वासनया सह। दर्शनप्रथमाभासमात्मानं समुपास्महे॥१०॥ अन्ये ऊचुः॥
द्वयोर्मध्यगतं नित्यमस्तिनास्तीति पक्षयोः। प्रकाशनं प्रकाश्यानामात्मानं समुपास्महे॥११॥ = ॥ = ॥ = ॥ = ॥ = ॥

स्तिता निर्वहतीति न तत्साक्षी अन्य आवश्यक इति॥ तत्पक्षमध्यगतं तं विरुद्धायेभिनास्तीत्याहुस्तेषां नास्तितायाअपि निःसाक्षिकाया असिद्धेस्त
त्तत्साधकत्वेन तन्मध्यगतमित्यर्थः॥ अथवा जगतः॥ अस्तित्वं आविर्भूतावस्था कार्यं नास्तित्वं तु तिरोभावावस्था कारणं। असद्वा इदम
ग्र आसीत् ततो वै सदजायतेति श्रुतेः तयोरुभयोरयोगपद्यात्पक्षयोः पाक्षिकयोरनुगतसन्मात्ररूपेण मध्यगतमित्यर्थः अथवा अस्तिनास्तीति पक्ष
योः कल्पितविरुद्धकोटयोर्द्वयोरप्यधिष्ठानतया मध्यगतमित्यर्थः। अत एव कल्पितनास्तित्वस्याधिष्ठानासंस्पर्शान्नित्यप्रकाश्यानां भावाभावानां प्रकाशकम्॥११॥

यस्मिन्सर्वमिति यस्मिन्निदमिति छेदः॥ सप्तमी विभक्तिमारभ्य व्युत्क्रमेण सर्वाः विभक्तयः षण्णां कारकाणां संबंधप्रातिपदिकार्थयोश्च प्रदर्शनाय निर्दिष्टाः तथा च ब्रह्मणः सर्वाधारत्वात्सर्वस्वामित्वादेः सर्वोपादाननिमित्तत्वविभावात्सर्वपारार्थ्यसंप्रदानादिभावनिर्वाहकत्वात्सर्वकर्तृकरणादिभावाच्च मायया सर्वजगद्व्यवहारनिर्वाहकं च भवति तत्सर्वाधिष्ठानं परमार्थसत्यं प्रत्यगात्मैवेति बोधनेन मायागुणपर्णत्वेन तदुपास्महे इत्यर्थः॥१२॥ अः शिरः इव प्रथमो यस्य तं अकारादिमित्यर्थः॥ हकारांते यस्य तं हकारांतं अहं पदं अशेषवस्तुप्रकाशकवेदशास्त्रादि शब्दजालं प्रकृतिभूतानामशेषवर्णानामक्षरसमाम्नाये अकारहकारांतरालवृत्तित्वेनाशेषजगदाकारेण प्रपंचे ब्रह्मणि नहन्यते नहीयते इति व्युत्पत्त्या अहं निष्पन्नं तस्मिन्नाशिष्यते आकारेण

अन्येऽप्यूचुः॥ यस्मिन्सर्वं यस्य सर्वं यः सर्वं सर्वमिदं यतः सर्वं यस्मायिदं येन सर्वं यद्धि सर्वं तत्सत्यं समुपास्महे॥१२॥

अन्येऽप्यूचुः॥ अशिरस्कं हकारांतमशेषाकारसंस्थितं॥ अजस्रमुच्चरंतं स्वं तमात्मानमुपास्महे॥१३॥

स्मिन्नित्यशेषाकारे निर्गुणे चसंस्थितं तात्पर्यनिष्ठं पासं अजस्रं क्रियमाणेषु सर्वव्यवहारेषु उच्चरंतं अहंकारोपाधिनिरासेन नतं वर्णितात्मा हं पदार्थं आत्मा वा इदमेक एवाग्र आसीदित्यादिश्रुतिप्रसिद्धं ब्रह्मात्मानं उपास्महे निरंतरं भावयाम इत्यर्थः॥ अथवा अशेषवस्त्वाकारे संस्थितं लंबेरं अहं इति हकारांतं पंचबीजप्रतिपाद्यपंचमहाभूतात्मकं जगत् अशिरस्कं शिरोभूतमलाज्ञानरहितं कार्यमिव अस्त्यैति वामायां तं जगदिति व्युत्पत्त्या सन्तीति निष्पन्नं अकारशिरस्कहकारांतमहंपदं अजस्रमुच्चरंतं पुष्पसिन्ध्योः सदृगिलत्वसेरस्य तेवा च्छन्दस्युत्सर्जनादित्यर्थः॥ अथवा॥ 

अशेषजगदाकारसंस्थितं निःप्रमाणकत्वेन निर्मलत्वाच्छ्रुतिशिरोवाच्यत्वाच्चाशिरस्कं हकारांतं सोऽहं परमार्थात्मानं विदेकरसत्वादजस्रमुच्चरंतं उदस्य चरंतं मुक्त्यभक्ष्यंतेवा संप्रत्यग्रूपमात्मानमुपास्महे इत्यर्थः संग्रहेतु शिरस्कं हकारादिमिति पाठः॥ तस्य च सुरनरतिर्यगाद्यशेषशरीराकारेषु संस्थितं सशिरस्कं हकारादिं हंसइतिमंत्रे अजपागायत्रीरूपेण षट्शताधिकैकविंशतिसहस्रसंख्यया अजस्रं सत्वहंस्वासोच्छ्वासच्छलेनोच्चरंतमित्यर्थः

अन्येऽप्यूचुः॥ संत्यज्य हृद्गुहेशानं देवमन्यं प्रयांति ये॥ ६ ७
तेरत्नमभिवांछंति त्यक्तहस्तस्थकौस्तुभाः॥१४॥

उरःस्वरः सकर्मकादित्यात्मनेपदविषये लटः शत्रादेशश्छांदसः॥ अथवा सर्वरूपेणापहाराभावाच्छिष्यते अकारो यत्र तदशेषाकारं सोऽहमिति पदं तत्र संस्थितं अत एव अशिरस्कं शिरोभूतप्रथमवर्णसवर्णरहितं हकारांतं हकारमात्रावशेषं अहंपदं सोऽहंमंत्रमिति यावत् अजस्रमुच्चरंतमित्यादि सामर्थ्यात् १३ हृद्गुहेशानं अंगुष्ठमात्रः पुरुषोंऽतरात्मा सदा जनानां हृदये सन्निविष्टः अंगुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः ईशानो भूतभव्यस्य स एवाद्य स उ श्वः इत्यादिश्रुतिप्रसिद्धमिति भावः॥१४॥

वा·टी·उप·
१९

अन्येतस्मात्सर्वैराग्यमेवमुख्यसाधनमित्याहुः सर्वाशाइति। एतत्तदयस्य ज्ञानफलं ब्रह्म अवाप्यते लभ्यते। येनतज्ज्ञानेन मलमालावासनाजाल जटिलहृदयग्रंथिः रसोप्यस्य परंदृष्ट्वा निवर्ततेइतिभगवद्वचनादितिभावः॥ १५॥ पदार्थेषुभोग्यविषयेषुभावनां भोगतृष्णां॥ १६॥ अन्येइंद्रिय निग्रहएवमुख्यंसाधनमित्याशयेनाहुः उत्थिता नितिं हरिरिंद्रः॥ तथाचब्रह्मवैवर्ते एकमेकंकालकूटमिंद्रियंनाशकृत्तुनः तद्वशाधितंसाक्षाद्वि षमप्यमृतंयथेति॥ १७॥ अन्येतुउपशमएवमुख्यंसाधनमितरत्सर्वंतदर्थमित्याशयेनोपसंहरंतिउपशमेति। उपशमः बाह्याभ्यंतरेंद्रियव्या

अन्येऊचुः॥ सर्वाशाः किलसंत्यज्य फलमेतदवाप्यते॥ येनाशाविषवल्लीनांमलमालाविलीयते॥ १५॥ अन्येऊचुः बु ध्वाप्यस्यंतवैरस्यंयः पदार्थेषुदुर्मतिः॥ बध्नातिभावनांभूयोनरोनासौमगर्दभः॥ १६॥ अन्येऊचुः॥ उत्थितानुत्थि तानेतान्निंद्रियाहीन्पुनःपुनः॥ हन्याद्विवेकदंडेनवज्रेणेवहरिर्गिरीन्॥ १७॥ अन्येऊचुः॥ उपशमसुखमाहरेत्प
व विंत्रंशर्मेशतः शममेतिसाधुचेतः॥ प्रशमितमनसः स्वकेस्वरूपेभवतिसुखेस्थितिरुत्तमाचिराय॥ १८॥ इतिमोक्षो पायेषूपशमप्रकरणेसिद्धगीतासर्गः॥ ८॥

व पारोपरमस्तेनविक्षेपदुःखोपशमेंदाविर्भूतंआत्मसुखंआहरेत्संपादयेत तद्धिनविषय सुखवद्दोषहेतुः किंतुचित्तप्रसादहेतुत्वात्सवित्तंशमवशतोनिरिंधनाग्निवत्तचेतः प्रशमंउपक्षयंप्रयाति॥ एवंप्रशमितमनसः सुखेनिरतिश यानंदेस्वकेस्वीयेपरमार्थस्वरूपेस्थितिर्भूमिकापरंपरारोहणक्रमेणउत्तमासप्तमभूमिकाप्रतिष्ठालक्षणाचिरायविदेहकैवल्यावधिर्भव तीत्यर्थः॥ १८॥ इतिश्रीवासिष्ठतात्पर्यप्रकाशेउपशमप्रकरणेअष्टमः सर्गः॥ ८॥

म्रि
शम·
१९

DR BHAU DAJI
MEMORIAL

इहश्रुतवतोराज्ञोनिर्वेदाद्गृहमीयुषः विमर्शेनार्थम्तानांमनोनिर्णयईर्यते॥ भीरुभयशीलः फुल्लोपेरर्वस्वदीर्घोणः॥ १॥ संस्वीयंपरिवारं
२ संस्वंआलयंगृहंप्रतिविसृज्यगृहंगृहप्रासादं॥ अचलमुच्चस्थितं॥ ३॥ मोहुयनेआलोलाः खगानांपक्षतयः पक्ष्मलानीवचंचलाः मोहुगर्भ

श्रीवसिष्ठउवाच॥ इतिसिद्धगणोद्गीतागीताः श्रुत्वामहीपतिः॥ विषादमाजगामाशुभीरुरणरवादिव॥ १॥ जगामपरिवारंस्वमाकर्षत्स्वगृहंप्रति॥ स्वतीरवृक्षानुगतः सरिदोघइवार्णवं॥ २॥ परिवारमशेषेणवि सृज्यस्वंसमालयम्॥ एकएवारुरोहाथगृहं मर्कइवाचलम्॥ ३॥ तत्रमोहुयनालोलखगपक्ष तिचंचलाः॥ आलोकयन्लोकगतीर्विललापेदमाकुलः॥ ४॥ हाकष्टमतिकष्टासुलोकलोलद शास्वयं॥ पाषाणोष्विवपाषाणाआलुठामिबलादहम्॥ ५॥

गुराइतियावत् लोकगतीः देहादिदृश्यपदार्थस्थितीः इदंवक्ष्यमाणप्रकारंविललाप॥ ४॥ लोकानांजीवानांलोलासुजन्मजरामर णादिनालोलासुदशासु पाषाणदृष्टांतोमौर्ख्यकठोरताद्योतनार्थः ५

जीवधातोरकर्मकत्वेऽपि कालभावाध्वगंतव्याः कर्मसंज्ञास्त्वकर्मणामिति कात्यायनवचनाज्जीव्यते। इति काले कर्मणि लः॥ तस्मिन्नतादृशेऽ
ऽपि जीवने भावे आशां॥६॥ आजीविताबधिराज्यां एतेन एतावन्मात्रेण संतुष्टः सन्हतधीर्मूर्खइव दुःखं भाविदुःखप्रतीकारचिंतां विं ना

म अपर्यंतस्य कालस्य कोऽंशो जीव्यते मया॥ तस्मिन्भावं निबध्नामि धिङ्मामधं चेतनं॥६॥ किं यन्मात्रमिदं नामराज्यमाजीवितं मम॥ किमेतेन विनादुःखं तिष्ठामि हतधीर्यथा॥७॥

किं तिष्ठामीत्यर्थः॥ अथवा एतेन एतावन्मात्रेण हतधीर्विना एवबुध्युपाधि जीवन्मुक्त इव विना दुःखं निर्दुःखं तिष्ठामि किं इति काक्वा योज्यम्॥७॥



ननु देह एवात्मा तस्य नाशे सदेहे वर्तेन सर्वदुःखनिवृत्तिः किं न स्यात् तत्राह आरावितीति॥ कर्मकर्मवासनाबीजमंतरेण भोगवैविध्यप्रयोजकजन्मासिद्धेर्विधिविधिनिषेधमोक्षशास्त्रप्रामाण्यात् गुरोधाच्चानादिरनंतश्चाहं न देहमात्र इत्यर्थः॥ चित्रलिखितेना निंदुनेवं दुर्बुध्याग्रहीतेन बालइव नात्मनैवात्मतया गृहीतेन देहेनेत्यर्थः॥ धृतिं आश्वासं॥ चा केनजालिना एंद्रजालिकेन परिमोहितोऽस्मि॥९॥ वसतीति वस्तु मत्स्यं॥ रम्यं सुखैकरूपं॥ उदारं अपरिच्छिन्नं अकृत्रिमं अजन्यं च तत्र तादृशं किंचिदपि इह जगति नास्त्येव कस्मिन्निष्ठा विश्रांतिर्यस्यास्तां किंनिष्ठा भवतितिशेषः॥१०॥ ननु दूरदेशतो दृशं वस्तु प्रा

आरावंतेप्यनंतोऽहं मध्ये पेलवजीवितः॥ बालश्चित्रेंदुनेवाहं किं मुधा धृतिमास्थितः॥८॥ प्रपंचरहितेनाहमिंद्रजालेन जालिना॥ हा कष्टमतिमुग्धामिकेनास्मि परिमोहितः॥९॥ यद्वस्तु यच्च वा रम्यं यदुदारमकृत्रिमं॥ किंचिदिह नास्त्येव किंनिष्ठेहमतिर्मम॥१०॥ दूरस्थमप्यदूरस्थं यन्मे मनसि वर्तते॥ इति निश्चित्य बाह्यार्थभावनां संत्यजाम्यहं॥११॥ लोकार्जवं जीवभावः सलिलावर्तभंगुरः॥ दृष्टो यापि हि दुःखाय केयमास्था सुखं प्रति॥१२॥

सिद्धं स्यात् तत्राह दूरस्थमिति॥ दूरस्थत्वेन प्रसिद्धमपि यत्किंचिद्वस्तु अदूरस्थमेव कुतः यद्यस्मान्मे मम मनसि वर्तते तेन हि मनो देहाद् दूरं दूरं व्रजति तथा चति दूरे एव तत्तत्पृथग्गेनुभूयते न तु इह देहस्थ एव हि सर्वे बालवस्तुबोधमनुभवंति। तस्माद्दूरादिकल्पनायं तत्र्भासमानानेवास्तवीत्यनर्थ एवेति तद्भावना त्याज्यैवेति पारयेत्यर्थः॥११॥ लोकानां जनानां भोगार्थधनार्जनादिप्रवृत्तिरूपः आर्जवं जीवभावः॥ सलिलावर्त इव भंगुरः नश्वरः फलः जन्ममरणादि दुःखहेतुश्च बहुशो दृष्टः सुखं विषयसुखं प्रति॥१२॥

उक्तमेव प्रपंचयति प्रत्यब्दमित्यादिना दुःखपिंडानि दुःखनिबिडानि स्वार्थे तु शब्दः ॥१३॥ अत्र संसारे तिष्ठतीत्यत्रस्थं किंचित्कालं दृष्टं सद्यस्तथ नष्टं स्वराज्यादिपदं तुच्छत्वान्नभावितं न चिंतितमेवेहि यतः विशिष्टं सर्वोत्कृष्टत्वेन प्रसिद्धमैंद्रं ब्रह्मजापत्यादिपदमपि प्राग्दृष्टं विचारितं सततं विवे किनां संस्थितिरास्थेति किं विश्रांतिर्यत्रास्ति तादृशं इह नास्त्येवेत्यर्थः ॥१४॥ हतेत्याधिक्षेपोर्थे चित्तविशेषणं महत्तायां राज्यादिवैभवोत्कर्षे

प्रत्यब्दं प्रतिमासं च प्रत्यहं च प्रतिक्षणं ॥ सुखानि दुःखपिंडानि दुःखानि तु पुनः पुनः ॥१३॥ प्राग्दृष्टं विशिष्टं हि दृष्टं नष्टं
च भावितं ॥ अत्रस्थं न तदस्तीह सततं यत्रास्ति संस्थितिः ॥१४॥ अद्य ये महतां मूर्ध्नि ते दिनैर्निपतंत्यधः ॥ हतचित्तमहत्ता
यां कैषा विश्वस्तता तव ॥१५॥ अरज्जुरेव बद्धोहमयं कोस्मि कलंकितः ॥ पतितोस्म्युपरिस्थोपि हा ममात्मन्हता स्थितिः
॥१६॥ कस्मात्कस्मान्मोहोयमागतो धीमतोपि मे ॥ असितः पिंडितालोको भास्कराग्र इवांबुदः ॥१७॥ क इमे ये महाभोगाः क
इमे [illegible] ममबांधवाः ॥ बालोम्रतमयेनेव संकेते
नोहमाकुलः ॥१८॥ स्वयमेव निबध्नामि जरामरणरागिणीं ॥ किमिमामहमेतेषु धृतिमुद्वेगकारिणीं ॥१९॥ यातु तिष्ठतु वा
सम्यङ्ममैतां प्रतिको ग्रहः ॥ बुद्बुदश्रीरिवैषा हि मिथ्येवेत्थमुपस्थिता ॥२०॥

हतचित्तमहंतायामिति पाठे तु हतचित्तं यथास्यात्तथा अहंतायां राज्याभिमाने इति योज्यं १५ आत्मन्निति संबोधनं आत्मनि स्वस्वभावे स्थिति र्हतेति मुह्यन्ने किमसम्यक्तं वा योग्यं १६ असितः श्यामः भास्करस्य अग्रे पुरोदेशे १७ संकेतेन ममतालक्षणसंबंधकल्पनेन १८ एतेषु भो भोगादिषु जरामरणयोः रागिणीं प्रियसखीमिवानर्थ्यां धृतिं आस्थां १९ एतां भोगबांधवादिसंपदं प्रतिकः सहः आग्रहः २०



ते च चक्रवर्तिनां पृथुमरुत्तादीनां प्रसिद्धा महाविभवाः संतु महद्गणाः सर्वमिति सामान्येन नपुंसकं क्वाधृतिरास्था २१ ब्रह्मणः प्राक्तनहिरण्यगर्भस्य जगंति भुवनानि क्व प्रयातानि मम धनादिस्थितिरिति शेषः २२ गिलितानि कालेनेति शेषः गलितानीति वा पाठः साधवः विवेकिनः २३ कोटिग्रहणं मा नैत्योपलक्षणं संसारस्यानादित्वात् धृतिरास्था २४ संसारएव रात्रिस्तमोमयत्वात्तत्र दुःस्वप्ने भ्रतेरेहमये देहप्रचुरे अहंममतोव्यवहारभ्र

ते महाविभवा भोगास्ते संतः स्निग्धबांधवाः सर्वं स्मृतिपथं प्राप्तं वर्तमानेपि काधृतिः २१ क्व धनानि महीपानां ब्रह्मणः क्व जगं
ति वा प्राक्तनानि प्रयातानि केयं विश्वस्तता मम २२ गिलितानींद्रलक्षाणि बुद्बुदानीव वारिणि । मां जीवितनिबद्धास्थं वि
हसिष्यंति साधवः २३ ब्रह्मणां कोटयो याता गताः सर्गपरंपराः प्रयाताः पांसुवद्भूपाः काधृतिर्मम जीविते २४ संसारा
त्रिदुःस्वप्ने शैत्यदेहमये भ्रमे आस्थां चेदनुबध्नामि तन्मे धिगस्तु स्थिति २५ अयं सोहमिति व्यर्थकल्पनासत्त्वरूपिणी अ
हंकारपिशाचेन किमज्ञवदहं स्थितः २६ हतं हतमिदं कस्मात् आयुरागततयानया पश्यन्नपि न पश्यामि सूक्ष्मया काल
लेखया २७

मे अस्थितिं अमर्यादां अविवेकितामिति यावत् २५ अयमिति देहसंनिहिते अपरोक्षताकल्पना स इति तद्विप्रकृष्टे परो क्षताकल्पना अहमिति देहे आत्मताकल्पना सा त्रिविधापि असत्त्वरूपिण्येव अतः अहंकारपिशाचेन मोहित इति शेषः अहमज्ञवत् किं किमर्थं निर्विचारस्तावंतं काले स्थित इत्यर्थः २६ सूक्ष्मया क्षणलवमुहूर्तादिरूपया काललेखया इदमायुः हतं हतं प्रतिक्षणं मुहुर्मुहुः छिन्नं पश्यन्नपि कस्मान्न पश्यामि नैव निःशामीत्यर्थः २७

शां॰टी॰उ॰प॰ ॥२१॥

पादपीठे पादपीठवद्रचितेषु भुवनेषु कृताः प्रतिमा यद्रचिता निर्मिता वा ईशाना ईश्वराः ब्रह्मादयो पि यैः शार्ङ्गिणः विष्ण्वादिदेहाः क्रीडनकंदुका इव मुहुर्मुहुर्यैर्हारिव्यवहारेषु नभस्युक्षिप्ता यैः तथाविधैः महाकल्पलक्षणकालरूपाः अस्थिकपालपाणित्वात्कापालिका रुद्रास्ते ऽपि महाकाले न ग्रस्ता आस्ते हे जीविताशे मयि किं वल्गसि न त्वमसि ॥ २८ ॥ उपयांति आगच्छंति अद्यास्मिन्नपि वयसि यांति गच्छंति वापगच्छंति अविनष्टं नित्यं एकं सत

शान्ता

पादपीठे कृतैः शार्ङ्गिक्रीडनकंदुकाः ॥ कालकापालिकाग्रस्ताः किमास्ते मयि वल्गसि ॥ २८ ॥ अजस्रमुपयांत्येते यांति चाद्यापि वासराः ॥ अविनष्टैकसद्वस्तु दृष्टो नाद्यापि वासरः ॥ २९ ॥ सारसाः सरसीवैते सर्वस्मिन्न जनचेतसि ॥ भोगास्स्वस्फुरं त्वंतर्न नु स्वप्नदृश्ययः ॥ ३० ॥ कष्टात्कष्टतरं प्राप्तो दुःखाद्दुःखतरं गतः ॥ अद्यापि न विरक्तो ऽस्मि हा धिङ्मामधमाशयम् ॥ ३१ ॥ येषु येषु दृढा बद्धा भावना भव्यवस्तुषु ॥ तानि तानि विनष्टानि दृष्टानि किमिहोत्तमम् ॥ ३२ ॥ जन्ममध्ये यच्च पर्यंते यदापाते मनोरमम् ॥ सर्वमेवापवित्रं तद्विनाशो मध्यदूषितम् ॥ ३३ ॥ येषु येषु पदार्थेषु धृतिं बध्नाति मानवः ॥ तेषु तेष्वेव तस्यायं दृष्टो नाशोदयो भृशं ॥ ३४ ॥

निर्दोषमानंदैकरसं वस्तु लब्धं यस्मिंस्तथाविधो वासरः अद्यापि अद्यतनकालावधि न दृष्टः ॥ २९ ॥ स्वप्रत्यगात्मस्फुरतं य स्वरूपं परं तस्य दृश्ययः साक्षात्काराः ३० रागलोभादिदूषितत्वादधम आशयो मनो यस्य तम् ॥ ३१ ॥ भावना प्रीतिः भव्येषु रमणीयेषु वस्तुषु विषयेषु ३२ मध्ये मनोरमं वयः पर्यंते मनोरमो धर्मः आपाते मनोरमा विषयाः ३३ धृतिं आस्थां तस्य मानवस्य अयं प्रसिद्धः नाशोदयो दुःखप्रादुर्भावः ॥ ३४ ॥ राम॰ ॥२२॥

अज्ञस्य उत्तरकाले ऽपि विश्रांतिं प्रत्याशा नास्तीत्याह श्वः श्व इति रागलोभाद्यभिवृद्ध्या पापीयसीं हिंसादिप्रदत्या क्रूरतरां तत्फलकाले खेदकरीं ॥ ३५ ॥ शेषे वयसि कलत्रं तदुपलक्षितं कुटुंबं तदुद्धरणादिचिंतया आर्त्तः चिंतार्थ इति पाठे कलत्रचिंतादिस्वार्थयेनार्त्तः कदा किं स्वोद्धारसाधनं करोति न कदाचिदपीत्यर्थः ॥ ३६ ॥ आगमापायिनो द्वंद्वयोरुत्संगकाले ऽपि विरसं दारिद्र्यरोगवार्द्धकादिदशावैषम्यदूषितं ॥ असारे ऽस्मिन् संसारे सारबुद्ध्याग्रही तं किं वृथा पश्यति ॥ यत्पश्यति तत्किं निमित्तमिति वार्थः ॥ ३७ ॥ ननु यन्न दुःखेन संभिन्नमित्यादिश्रुत्युक्तलक्षणः स्वर्गः सारस्ततः किं न स्यात्तत्राह सा

श्वः श्वः पापीयसीमेष श्वः श्वः क्रूरतरामपि ॥ श्वः श्वः खेदकरीमेति दशामिह जडो जनः ॥ ३५ ॥ अज्ञाने कहतो बाल्ये यौवने मदनाहतः ॥ शेषे कलत्रचिंतार्त्तः किं करोति कदा जडः ॥ ३६ ॥ आगमापायि विरसं दशावैषम्यदूषितम् ॥ असारं सारसंसारं किं तत्पश्यति दुर्मतिः ॥ ३७ ॥ राजसूयाश्वमेधाद्यैरिष्ट्वा यज्ञशतैरपि ॥ महाकल्पांतमप्येशं स्वर्गं प्राप्नोति नाधिकं ॥ ३८ ॥ को ऽसौ स्वर्गो ऽस्ति भूमौ वा पाताले वा प्रदेशकः ॥ न यत्राभिभवं स्येता दुर्भर्मर्त्य इवापरः ॥ ३९ ॥ निजे चेतोबिले व्यालाः शरीरस्थलपद्वजाः ॥ आधयो व्याधयश्चैते निवार्यंते कथं क्वचित् ॥ ४० ॥

राजसूयेति ॥ महाकल्पांतं ब्रह्मादिभोग्यमपि स्वर्गं महाकालदशांशं लेशेनाभोग्यप्रायमल्पमेव प्राप्नोति न त्वधिकमपरिच्छिन्नमित्यसारस्स्वर्ग इत्यर्थः ३८ न ह वै सशरीरस्य प्रियाप्रिययोरपहतिरस्तीति श्रुतेः स्वर्गिणामप्यसुरादिपीडाश्रुतेश्च न दुःखासंभिन्नत्वमपि तस्य संभवतीत्याशयेनाह को ऽसाविति ३९ किं च देहाभिमाने सत्याधिव्याध्योर्दुर्निवारत्वान्न क्वापि शाश्वविश्रांतिरस्तीत्याशयेनाह निजेनेति ४०

भंगुरत्वदुःखग्रस्तत्वाभ्यां सर्वस्यामंगलतामेव प्रपंचयति सत इत्यादिना. सतः वर्त्तमानकालदृश्यस्य असत्ता नाशः ४१ प्राकृताः प्रकृतिः स्वाभाविकम
ज्ञानं तन्मोहिताः नीरंध्राः निविडिजेतियावत् ४२ हासायैव योग्याइतिशेषः ४३ ननु राजत्वात्सर्वनिग्रहसमर्थस्योत्तमपुरुषस्य न वकुतो
नाशत्रासस्तत्राह येषामिति ४४ चिंता अर्जनरक्षणवियोगादिना चिंतैव पर्यवसाने फलं यस्यास्तथाविधैव पदार्थश्रीः अतस्तां किं इह मे इच्छ
सि ४५ याः नानारत्नगजवाजिधनदारादिभेदेन विचित्राः संपदः ताश्चेच्चित्तेन समंता बहुमताः स्युः तत्र हिता अपि महारंभाः बहुप्रयत्नलभ्या

सतोऽसत्ता स्थिता मूर्ध्नि मूर्ध्नि रम्येषु रम्यता । सुखेषु मूर्ध्नि दुःखानि किमेकं संश्रयाम्यहं ॥४१॥ जायंते च म्रियंते च प्राकृताः क्षुद्रजंतवः
धरातरे वनीरंध्रा दुर्लभाः साधुसाधवः ॥४२॥ नीलोत्पलालिनयनाः परमप्रेमभूषणाः ॥ हासायैव विलासिन्यः क्षणभंगितया स्थि
ताः ॥४३॥ येषां निमेषणोन्मेषैर्जगतां प्रलयोदयौ । तादृशाः पुरुषाः संति मादृशां गणनैव का ॥४४॥ संति रम्यतरा हर्म्याः सुस्थिराद
पि सुस्थिराः । चिंतापर्यवसाने यं पदार्थश्रीः किमीहसे ॥४५॥ संपदश्च विचित्रा यास्ताश्चेच्चित्तेन संमताः । तत्रा अपि महारंभा हेत
मन्ये महापदः ॥४६॥ आपदोऽपि विचित्रा यास्ताश्चेन्मनसि संमताः ॥ तत्रा अपि महारंभा मन्ये मनसि संपदः ॥४७॥ मनोमात्रवि
वर्तेऽस्मिन् जगत्यब्धौ दुर्भंगुरे । ममेदमित्यशर्वेयं कुतस्याक्षरमालिका ॥४८॥ दुःखरूप्या अवश्यापायिन्यश्चेति महापद इत्येवम
न्ये इत्यर्थः ४६ सर्वथाः दारिद्र्यबंधुराज्यादिनाशलक्षणाः आपदोऽपि यदि साधुसंगतितीर्थतपःप्रबोधादिप्रापणेन विचित्राः श्रेयस्करीति मनसि
संमताश्चेत् ता अपि विवेकवैराग्यादिमहारंभाः संपदः एव मन्ये इत्यर्थः ४७ तस्मात्सत्ये जगति ममताभिरेव दृढैर विपत्त विवेकात् तत्परिक्षयश्च संपद्दिसा
शयेन जगतो ममतानर्हत्वं दर्शयति मनोमात्रेति अब्धौ प्रतिबिंबितइंदुरिव भंगुरे भंगस्वभावे मिथ्याभूते च अक्षरमालिका परवाच्यात्मिका वर्णपंक्तिः कु



काकतालीययोगेन काकागमनमिव तच्छिरसि तालपतनमिव अविचारमात्रकृतेन स्वसंबंधेन धूर्तेन भोगलंपटेन मनसा ॥४९॥ देशकालवस्तुकृतया इ
यत्तया आच्छिन्नाः सुपरिच्छिन्नाः सुत्रिविधतोपरस्ततास्ताः सा सुदीपाग्निशिखापक्षे स्पष्टम् ॥५०॥ निरंतरः दुःखभोगोऽभ्यासात्तदल्पो विस्मात्सुखभो
गविच्छिन्नाभ्यासो दुःखभोगो यं दुःसहस्वेत्याशयेनाह वरमिति ॥ आसन्ना विच्छिन्नाः सुखदुःखपरिवर्त्ताः ॥ यासु स्थितेस्थितिः भावेक्तः
५० विषयसुखतानां सुखता नास्त्येव किंतु दुःखविशेषरूपतैवेति युक्त्योपपादयति संसारेति वा ५२ कथं हि सुखतानुभवस्तत्रयुक्तिमाह अ

काकतालीययोगेन संपन्नायां जगत्स्थितौ । धूर्तेन कल्पिताव्यर्थं हेयोपादेयभावना ॥४९॥ इयत्ताच्छिन्नतमासु सुखनाम्नी
षु दृष्टिषु ॥ कासेता स्तनु रक्तोऽस्मि पतंगो ग्निशिखास्विव ॥५०॥ वरमेकांतदाहेषु लुठनं रौरवाग्निषु ॥ न त्वासन्नविवर्त्तासु स्थितं
संसारवृत्तिषु ॥५१॥ संसारस्य दुःखानां सीमांत इति कथ्यते ॥ तन्मध्यपतिते देहे सुखमासाद्यते कथं ॥५२॥ अकृत्रिममहादुःखे
संसारे व्यवस्थिताः ॥ संतप्तेन्यानि दुःखानि जानते मधुराण्यलम् ॥५३॥ अहमेष धमोत्कृष्टः काष्ठलोष्ठसमस्थितिः ॥ अद्वे
रेवागतः साम्यं परमामर्थसक्तिभिः ॥५४॥ महसांकुरशाखासु फलपल्लवशालिनः ॥ असंसारवृक्षस्य मनो मूलमहांकुरः ॥५५॥

कृत्रिमेति खड्गाघातानुभवः सुखमिति वत् दुःखान्येव मधुराणि सुखानि जानंत्यत्यंतमित्यर्थः ५३ श्रुतिस्मृत्यादिप्रमाणकुशलो मेधावी विवा
स्पदस्पृहं परमं अत्यंतमेव न सुष्टानि निर्विचारितानि शास्त्रलोकप्रमाणवस्तूनि येस्तैरज्ञैर्मूर्खैः साम्यमित्यर्थः ५४ इदानीं स्वस्य प्रमाणकुश
लतां संसारमूलावधारणेन सफलयति महस्त्विति अंकुराः संकल्पाः शाखा देहभुवनादयः आत्माशा स्वाद्यवयवी विराट् फलानि सुखदुःखे पल्ल
वाः रागलोभास्तैः शालिनः शोभमानस्य ५५

मनसोपि रहस्यं स्वेन ज्ञातमेवेत्याह संकल्पमेवेत्याह संकल्पमेवेति। ५६। मनोमर्कटस्य इति भुवापलेषु अद्यैव अद्य प्रभृति। ५७। पातो अधोगतिः उत्पातऊर्ध्वगतिः॥ अपकर्षोत्कर्षौ वा॥ उपतापो दुःखं। ५८। इति मया यत्पुनः पुनः प्राक् शोचितं तद्गतमेव॥ अहमिदानीं नानुरोदिमि न शोचामीत्यर्थः॥ ५९॥ कुतो नानुशोचसि तत्राह प्रबुद्धोस्मीति॥ आत्मनः स्वपारमार्थिकरूपस्य धनस्य चोरः॥ अपहर्ता नैकेवलं॥ चोरत्वादेव निहन्मि अपितु

संकल्पमेव तन्मन्ये संकल्पोपशमेन तु॥ शोषयामि यथा शोषमेति संसारपादपः॥ ५६॥ आकारमात्ररम्यासु मनोमर्कटवृत्तिषु परिज्ञातासि हा धैर्यनरमेनाशनी ध्रुवं॥ ५७॥ आशापाशशतप्रोताः पातोत्पातोपतापदाः॥ संसारवृत्तयो मुक्ता इदानीं विश्रमाम्यहं॥ ५८॥ हा हतोस्मि विनष्टोस्मि इति स्मीति पुनः पुनः॥ शोचितं गतमेवाहमिदानीं नानुरोदिमि॥ ५९॥ प्रबुद्धोस्मि प्रहृष्टोस्मि दृष्टश्चोरो यमात्मनः॥ मनो नाम निहन्म्येनं मनसास्मि चिरं हतः॥ ६०॥ एतावंत्यमिमं कालं मनोमुक्ताफलं मम॥ अविद्धमासीदधुना विद्धं तु गुणमर्हति ६१॥ मनस्कषारकणिका विवेकार्कातपेन मे॥ चिरप्रवृत्तयेन्नमचिराद्व्ययमेष्यति॥ ६२॥ विविधैः साधुभिः सिद्धैरहं साधुप्रबोधितः॥ आत्मानमनुगच्छामि परमानंदसाधनम्॥ ६३॥ आत्मानं मणिमेकान्ते लब्ध्वैवालोकयन्सुखं॥ तिष्ठाम्यस्तमि

अछिद्रितं ४ वैरित्वात्हरीत्याह मनसेति। ६०। अविद्धमलक्षीकृतं मुक्ताफलपक्षे गुणं शमदमादि मुक्तापक्षे सूत्रं। ६१॥ तान्येहः शरदीवाचले बुदः॥ ६४॥

चिरं अनादिप्रसृततत्त्वं तत्र प्रवृत्तये यार्थं तुषारकणिकापक्षे चिरं प्रवृत्तिः सदागतिर्वा सुलत्वास्वेयं यदा ओप छ्छुष्यंति वा सुमेवापि यंतीति श्रुतेरित्यर्थः॥ ६२। विविधैरुपदेशैः सिद्धविशेषणं वा अनुगतिमात्रेण परमानंदस्य स्वस्यैव साधनं॥ अभेदेप्युपचारात्कर्त्तृता। ६३॥ अतः परं आत्मनिष्ठां करोपि न त्यक्ष्यामीत्याह आत्मनमिति॥ आचले हिमवदादौ। ६४॥ राम॰ २४

प्रति ३

DR. BHAU DAJI MEMORIAL
डाक्तर भाऊ दाजी स्मारक पुस्तकसंग्रह

---



इदानीमुक्तं संक्षिप्योपसंहरन्विवेकपुरुषं नमस्यति, अयमिति। अयं देहोमिति इदं धनराज्यादि मम इति स्फुरितं आततं असत्यरूपं ज्ञानबलाद्पास्य समाध्यभ्यासेन अतिबलिनं मनोरिपुं निःशेषं हत्वा सततमभ्यसिका विश्रांति लक्षणं प्रशमं उपैमि प्राप्नोमि। ६५ इति श्री वासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे नवमः सर्गः ९॥ द्वास्थेन प्रार्थितेप्यत्र माध्याह्निक विधिक्रमे तत्सीविचारे भूयोपि जनकस्योपवर्ण्यते। प्रतीहारो द्वारपालः उपसर्ग

अयमहमिदमाततं ममेतिस्फुरितमपास्य बलादसत्यमंतरा॥ रिपुमतिबलिनं मनो निहत्य प्रशममुपैमि नमोस्तु ते विवेक॥ ६५॥ मोक्षोपायेषूपशमप्रकरणे जनकवितर्कः सर्गः॥ ९॥ श्रीवसिष्ठ उवाच॥ इति चिंतयतस्तस्य पुरस्स्थं प्रविवेश ह प्रतीहारः परोभानोः सदनागरवारुणः॥ १॥ प्रतीहार उवाच॥ देवदोस्तंभविश्रांतसमस्तवसुधाभर॥ संपादयोत्तिष्ठ दिनव्यापारं नृपतोचितम्॥ २॥ एताः कुसुमकर्पूरकुंकुमांबुधराः स्त्रियः स्नानभूमौ स्थिताः मज्जानघ्नो मर्त्यपुता इव॥ ३॥ एताः कमलकल्हारकाननान्यान्तषट्पदाः कृत्वाकमलिनी पाशरचितांशुकमंडपाः ४ एताः कमलिनीतीरभुवश्छत्रैः प्रसारिताः सचामररथे भास्वैः स्नानावसरसेविनो॥ ५॥

स्थपत्रयमनुष्यवद्धुलमितिदीर्घः १ दोः स्तंभयोर्विश्रांतः समस्तवसुधाभरो येन स्य न्यपतयाया उचितं अनुरूपं २ तत्र सामग्रीसिद्धिमाह एता इत्यादिना ३ कमलिनीपाशैः सपद्मविसरज्जुभिः रचिताः परितस्थारुनिर्मिताः कनकचित्रांशुकमंडपाः या एतु तथाविधाः अतएव ताः कर्बुरवर्णाः कमलिन्याः कमलवत्याः सरस्यास्तीरभुव इति पदेणान्वयः ४ तथा स्नानावसरे सेवंते तच्छीलानी चामरै रथैरिभैरश्वैश्च सहितैश्छत्रैश्च प्रसारिताः अनेन हंससारसनकादिसहितत्वमपीमाम्याप्तिस्तीरभुवोर्थाहृम्यते ५

ममाग्रेः सुमनोभिः पुष्पैराम्रस्तेञ्चपर्णैः अन्नैः पक्वैः रोषधिभिर्यवांकुरादिभिश्चपरिप्लुतैः पटलकैः प्रांतभागैः देवेति संबुद्धिः ॥ अर्चनागृहा
देवब्राह्मणातिथिपूजागृहाः देवार्चनगृहा इत्येकपद्यं वा ॥ ६ ॥ तत्र स्नानकाले परितो जप्याः जपितव्या अघमर्षणमंत्रा येन ॥ अतएव दक्षिण

स्त्राः कमलिनीतीरेष्वच्छत्रैः प्रवर्तिताः । स्नानस्थे [illegible] नाः ॥५॥ समग्रसुमनःपर्णैः स्त्रोषधिपरिप्लुतैः
सज्जीकृताः पटलकैर्देवार्चनगृहास्तथा ॥६॥ स्नानः पवित्रहस्तश्च परिजप्याघमर्षणम् ॥ त्वामेव प्रेक्षते देव दक्षिणा होदि
जव्रजः ॥७॥ लसच्चामरहस्ताभिः पोल्यंते परमेश्वर । सज्जीकृतास्ते कांताभिः शीतांभोजजलस्रजः ॥८॥ चाशीः प्रस्तुतिष्ठ म
कार्यं हं तेनियतं कर्म माचर । न कालमतिवर्तंते महांतः स्वेषु कर्मसु ॥९॥ प्रतीहारपता वित्थमुक्तवत्यथ पार्थिवः ॥ तथैव चिंतया
मास चित्रां संसारसंस्थितिं ॥१०॥ कियन्मात्रमिदं नाम राज्यं सुखमिति स्थितं ॥ न प्रयोजनमेतेन मम क्षणभंगिना ॥११॥
सर्वमेव परित्यज्य मिथ्याशंवरडंवरं । एकांत एवतिष्ठामि सं प्रां तं [illegible] इव वारिधिः [illegible] अल
मेभिरस्त्रायैर्मम भोगविजृंभितैः । त्यक्त्वा सर्वाणि कर्माणि सुखं तिष्ठामि केवलम् ॥१३॥ चित्त चातुर्यमेतस्माद्भो
गाभ्यासकुसंभ्रमात्त्यज जन्मजराजाड्यजालजंबालशांतये ॥१४॥

हे नाथ ॥ आलेपनचंदनोदकसेकादिपरिप्लुतलताच्छीना ॥ चा ॥ १० ॥ ११ ॥ शंबरपदेन शांबरी माया लक्ष्यते ॥ मिथ्याशंबरं मृगतृष्णाजलं तत्सदृशं ॥
१२ ॥ १३ ॥ हे चित्त चातुर्यं सुखलवास्वादचतुरतां त्यज ॥ १४ ॥

---

यासु दशासु विषयाभिलाषतत्प्राप्तितदुपभोगतदनुस्मरणादिरूपासु ॥ संभ्रमं सुखलवास्वादभ्रांतिं उत्साहं वा ॥ १५ ॥ भोगाशया प्रवृत्तं सत्
भोगशक्तिकुंठीभावाच्छोकशाठ्यादिभयाच्च निवृत्तं सत् ॥ १६ ॥ ततः कृत्रिमसुखानामनर्थबीजत्वाद्येन हेतुना अकृत्रिमा प्रीतिर्भवति तं हेतुं य
त्नलभ्यस्वेति यावत् ॥ १७ ॥ च चित्तवृत्तिषु चित्तानुवर्तनेषु ॥ १९ ॥ जनजीवितं प्राणिजीवननिदानं येन जातोपि जीवंतीति श्रुतेः ॥ २० ॥ २१ ॥ अवि

दग्धासु सास्तु यास्वेव संभ्रमं चित्त पश्यसि ॥ तास्वेवाभिरवितं परमं दुःखमेष्यसि ॥१५॥ प्रवृत्तं सन्निवृत्तं सद्भूयो भूयश्चिरं चिरं
भोगभ्रमिषु सर्वासु चित्त तत्तिंन्न गच्छसि ॥१६॥ तस्मात्सापालमनया तुच्छया भोगचिंतया ॥ भवत्यकृत्रिमा तृप्तिर्येनाभियत
तं ततः ॥१७॥ इति संचिंत्य जनकस्तूष्णीमेव बभूव ह ॥ शांतचापलचेतस्त्वाच्चित्रिपिकर्मार्पितोपमः ॥१८॥ प्रतीहारोपि नोवा
च गौरवेण भयेन वा ॥ पुनर्वाक्यं महीपानां चित्तवृत्तिषु शिक्षितः ॥१९॥ तूष्णीमथ क्षणं स्थित्वा जनको जनजीवितम् ।
पुनः संचिंतयामास मनसा शमशालिना ॥२०॥ किमुपादेयमस्तीह यत्नात्तत्साधयाम्यहं ॥ कस्मिन्सत्के निबध्नामि
धृतिं नाशविवर्जिते ॥२१॥ किं मे क्रियापरतया किं मे निःक्रियया पि वा ॥ न तदस्ति विनाशेन वर्जितं यत्किलोदितम् ॥२२॥ क्रियया
वाक्रियो वास्तु कायो यमसदुत्थितः ॥ समस्थितस्य शुद्धस्य चितः का नाम मे क्षतिः ॥२३॥ नाभिवांछाम्यसंप्राप्तं संप्राप्तं
न त्यजाम्यहं ॥ स्वस्थ आत्मनि तिष्ठामि यन्ममास्ति तदस्तु मे ॥२४॥

वा कार्यमिति शेषः ॥ यत्किल उदितं जन्मप्राप्तं तत् विनाशे
न वर्जितं नास्ति जन्यभावस्य विनाशनियमादिति भावः ॥ २२ ॥ समस्थितस्य देहचलनाचलनादशायोस्तुल्यरूपस्थितेः चितः चिन्मात्रस्व
भावस्य ॥ २३ ॥ यन्मम प्रारब्धोपनीतमस्ति तदेवास्तु नान्यदित्यर्थः अथवा यन्मम निरतिशयानंदरूपमांतरमस्ति तदेवास्तु न बाह्यं किंचिदित्यर्थः ॥ २४ ॥

अकृतेनानुपेक्षणेन कश्चन अनर्थ इति शेषः॥ अक्रियमाणे उपेक्षया प्राप्तं दुःखं असम्यक् मायामयं मिथ्यैवेति यावत्॥२५॥ युक्ताः शास्त्रविहिताः अयुक्ता लोकप्राप्ताः॥२६॥ सर्वसर्वव्यवहारक्रमप्राप्तां अस्पंदितां गलत् अयं देहः शुष्यतितत्किं साधु आवश्यकं नेत्यर्थः॥२७॥ कार्यौ प्रारब्धकर्मोपनीतौ पुण्यपापानुदयलक्षणे फले समौ॥२८॥ तत्कृतमलत्वात् कर्मजा सितिकृतमप्यकृतं भुक्तमप्यभुक्तमित्यपि यो ज्ञः॥२९॥ पुरुषस्यांतर्यस्य निश्चयः कर्ता भोक्तेति वा असौ पुरुषः सर्वासु देहादिक्रियासु तन्मयतां स्वनिश्चितार्थमयतामुपैतीति वस्तुस्थितिः सांप्रतं तु ममधीरता

न मम इह कृतेनार्थो नाकृतेनेह कश्चन। क्रियया क्रियया वापि यत्प्राप्तं तदसन्मयम्॥२५॥ अकुर्वतः कुर्वतो वा युक्ता युक्ताः क्रियाः सम। नाभिवांछितमस्तीह यदुपादेयतां गतम्॥२६॥ जडदेहक्रमप्राप्तां कायो यं स्पंदतां क्रियाम्। करोत्वस्पंदितां गलत्किमयं साधु शुष्यति॥२७॥ स्थिते मनसि निष्कामे समे विगतरंजने। कायावयवजौ कार्यौ स्पंदास्पंदौ फले समौ॥२८॥ कर्मजासु फलश्रीषु मनसा कर्तृभोक्तृता। तस्मिन्प्रशांतिमायाते कृतमप्यकृतं स्मृतम्॥२९॥ यो निश्चयोंऽतः पुरुषस्य रूढः क्रियासु सोऽतन्मयतामुपैति। अनामयं मे पदमाहताधीरधीरता मंतरलं भजामि॥३०॥ मोक्षोपाये उपशमप्रकरणे निश्चयसर्गः॥१०॥ वसिष्ठ उवाच। इति संचिंत्य जनको यथाप्राप्तां क्रियामसौ। असक्तः कर्तुमुत्तस्थौ दिनेदिन इवार्यमा॥१॥ 

मयं कर्तृभोक्तृतारोगशून्यं आत्मपदं आहता आविष्टा तद्दृढनिश्चया संपन्ना इत्यर्थः॥ अंतः अंतश्चित्ते कृताकृतफलाववदं भावाय पुनर्जन्मादिशांति शंकागिमित्रां इष्टानिष्टप्राप्तिविघातनिमित्तां च अधीरतां अलं अत्यंतमेव त्यजामीत्यर्थः॥३०॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे दशमः सर्गः॥१०॥ कृताह्निकस्य राज्ञो रात्रिनिशांते वर्ण्यते पुनः। विवेकैर्बहुभिश्चित्तैः स्वचित्तस्य प्रबोधनम्॥ असक्तः कर्तृत्वभोक्तृत्वाभिमानलक्षणसंग

---

इदं मे इष्टमिदं मेऽनिष्टमिति कल्पनानिमित्ताः सताः वासनाः सुषुप्तवदिति स्थूलसूक्ष्मदेहाद्यभिमानाभावेन जाग्रत्सुषुप्तयोर्विशेषाभाववारितिभावः॥२॥ आर्यासंगाद्यानां देवब्राह्मणादीनां आवर्जनं पूजादानादिना समाधानं॥ अहः कार्यमाह्निकम्॥३॥ समरसं समाहितं कृत्वा इत्थं वक्ष्यमाणरीत्या॥४॥ शांतं निर्वि

दृष्टा निशाः परित्यज्य चेतसो वासनाः स्वयम्। यथा प्राप्तां च कार्याणि सो जाग्रत्येव सुषुप्तवत्॥२॥ संपाद्य तदहः कार्यमार्यावर्जनपूर्वकम्। अनयच्छर्वरीमेकांतस्थैर्यध्यानलीलया॥३॥ मनः समरसं कृत्वा संशांतविषयभ्रमम्। शर्वर्याः स प्रमाणाद्यामित्थं चित्तमबोधयत्॥४॥ चित्त चंचल संसार आत्मनो न सुखाय ते। शममेहि शमाच्छांतं सुखसारमवाप्यते॥५॥ यथा यथा विकल्पोघान्संकल्पयसि हेलया। तथा तथेति स्फारत्वं संसारस्तव विंतया॥६॥ शांतशाखत्वमायाति सेकेन विटपी यथा। अनंताचित्तमायासि शठो भोगेच्छया तथा॥७॥ चिंताजालविलासोत्थाजन्मसंसारसंपदः। तस्मात्त्यक्ता विचित्रास्ते चित्ता नुपशमं व्रज॥८॥

स्पं सारमतमात्मसुखं॥५॥६॥ अनंताचित्तमसंख्यं यथा शालितां आयासि प्राप्नोषि चित्तं॥७॥ यतो जन्मसंसारसंपद्यो विषयचिंताजालविकल्पोत्थाः
इति पूर्वेणान्वयः॥८॥

हेसुंदरविवेकिन्इमांसंसाररुचिंशमसुखंचतुलयतुलामारोप्यैवबुध्यस्वकःसारइतिपरीक्ष्यस्वतरलामित्यनेननश्वरत्वाद्दुःखजटिलत्वाच्चना
स्त्यत्रसारइतिसूचितं॥९॥यस्मादियमसारातस्मादस्यामास्थांपरित्यज्यएतद्रसाभिवृषयामानंचकिंतुभयमाशित्वात्ममात्रेच्छयाआत्मका

संसाररसरुचिंतरलामिमांतुलयसुंदर॥अस्यांचेत्सारमाप्नोषितदेतामेवसंश्रय॥९॥आस्थांयस्मात्परित्यज्यदृश्यदर्शन
लालसात्।मैतद्ग्रहणमात्रंचस्वेच्छयाविहरेच्छया॥१०॥इदंदृश्यमसत्सद्वाप्युदेतुलमुपैतुवा॥साधोविषमतांगच्छमैतदीये
गुणागुणे॥११॥

इदंदृश्यंदर्शनयोग्यमेतदितिदर्शनलालसात्प्रियंमाग्रहाण॥अप्रियंचदर्शनंनहमितिद्वेषान्मामुंचकिंतुभयमाशित्वात्ममात्रेच्छयाआत्मका
मःसन्इच्छयास्वैरंविहर॥१०॥असत्वागविद्यमानंसुखदुःखसाधनमुदेतुसांप्रतंसतविद्यमानेअस्तंनाशमुपैतुवामाताहानमापायप्रयुक्तह
र्षविषादलक्षणांविषमतांगच्छेत्यर्थः॥११॥ 

ननुसतिसतत्वंबंधेकथंतत्प्रयुक्तवैषम्यवर्जनंसंभवत्वाहमनागपीति॥१२॥हेमनःत्वंअसत्एतत्दृश्यंचनसत्अपार्थेएवकारःअतःद्वयोरपिवंध्या
पुत्रखपुष्पयोरिवासतोःसतोःनिःस्वरूपस्थितिकयोःसंबंधइत्यक्षरावलीउक्तिः॥अहवाआश्चर्येवेत्यर्थः॥१३॥यदिमन्यसेनाहमसत्सत्वआत्मे

मनागपिनसंबंधस्तवदृश्येनवस्तुना॥अविद्यमानरूपेणसंबंधःकोयमीदृ
शः॥१२॥असत्वमेतच्चनसद्द्वयोरेवासतोःसतोः॥संबंधइतिविज्ञेयामहरैवै
वाक्षरावली॥१३॥असदेतत्त्वमसत्त्वंतथापिकिलसुंदर॥संगःसदसतोःकी
दृग्वरत्वंमर्त्यजीवयोः॥१४॥चित्तत्वमथदृश्यंचद्वेएवयदिसन्मयो॥सदास्थिते
तत्समरःकुतोहर्षविषादयोः॥१५॥

वाहंदृश्यमेवासदितितथापिनसंबंधघटनेत्याह॥असदितिमर्त्यजीवयोःसदामृतजीवतोः॥१४॥द्वयोरपिसत्वमेववनास्त्वंकस्यचिदपीतिक
ल्पेपिकदापीष्टयोगाभावान्नहर्षविषादप्रसक्तिरित्याहचित्तेति॥हेचित्तत्वंइतिच्छेदः॥१५॥

महांतमाधिं विषादं मूर्ख कंत्वं त्यक्त्वा तं सत आत्मस्वरूपस्थितो उत्साहं आहर समाध्यभ्यासेन संपादय॥ संक्षुब्धं संक्षोभो विक्षेपस्तद्रूपलक्षणां अंबुधिं
१६॥ कंदुकालातमुत्प्लवेषु जनकौतुकार्थमाग्नेयद्रव्यरचितं कंदुकाकारं अलातयंत्रं॥ तद्विद्युत्तदेव ज्वलन् तु नः पुनरुच्छलति मोहं अलमिति

तस्मान्महाधिं मुंच त्वं मूर्ख कमुद्यमं समाहर॥ संक्षुब्धां बुधिमाविष्टां त्यज त्वं मध्यमां स्थितिं॥१६॥ कंदुकालात
वद्व्यर्थमात्मनैव परिज्वलन्॥ मा मोहमले मा स्म ह्यमंदतां गच्छ मन्मते॥१७॥ न तद्विद्यास्ति समुन्नत मुन्नमं व्रज
सिद्येन परां परिपूर्णतां॥ तदेव लं व्यवलाद्रतिधीरतां जहि हि चंचलतां शरीरे मनः॥१८॥ मोक्षोपाये श्रीउपशमप्र
करणे चित्तानुशासनं सर्गः॥११॥

मोहलक्षणां मलमिति वा॥ इह दृश्यवर्गमध्ये येन लब्धेन त्वं परिपूर्णतां व्रजसि तन्नास्ति शंकिमपि नास्ति कथं तर्हि पूर्णता लाभस्तमुपायमाह तदिति॥ तत्त
स्मादभ्यासं वैराग्यबलादति मत्वा लंब्य तद्दृढतावलंब्य तिष्ठ धीरतां प्राप्य इति वा चंचलतां जहि हि त्वं ॥१८॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे रामं
पीरता एकादशः सर्गः॥११॥ ॥२८॥

वर्ण्यते जनकस्यात्र जीवन्मुक्ततया स्थितिः॥ विचारप्रज्ञयोश्चित्रं माहात्म्यमपि विस्तरेण तु॥ न मुमोह अहं ममताभ्यां सर्वविरुद्ध इत्यर्थः॥१॥ आनंदवृत्ति
पुहर्षस्थाने पु पु प्राप्तिव संस्थानि विक्षेपस्थितिर्यस्य स्थितिरित्यव्यवस्थिति क्रियाविशेषणं॥ वर्तमानेन तत्काले उपस्थिते दृश्ये व्यवस्थितः अ
लं बुध्या स्थितः॥३॥ अनारतविवेकेन सदा विचारवता सनातनं अनादि स्वभाव प्रसंकल्पकं अहंममाभिमानमालिन्यं राजसं रजोगुणेन मा

श्रीवसिष्ठ उवाच॥ एवं विचारयंस्तत्र स्वराज्ये जनको नृपः॥ चकाराखिलकार्याणि न मुमोह च धीरधीः॥१॥ न मनः प्रोज्झला
साध्वक्रिदानं दृष्टेषु॥ केवलं सुषुप्तसंस्थं सदैव व्यवतिष्ठतः॥२॥ ततः प्रभृत्यसौ दृश्यं नाजहार न वा त्यजत् ॥ के
वलं विगताशंकं वर्तमाने व्यवस्थितः॥३॥ अनारतविवेकेन तेन सद्यः सनातनं॥ पुनः कलंकं नैवाप्तमंबरे सोवरा जसं
धास्वविवेकानुसंधानादिति तस्य महीपतेः॥ सम्यक् ज्ञानमनंतामलं भिन्नलतां ययौ॥४॥ अनाम्रष्टविकल्पांशु
श्चिदात्मा विगतामयः॥ उदयाय हृदाकाशे तस्य व्योम्नीव भास्करः॥६॥ सदृशां तलान्याभांश्चि प्रकोशमवस्थि
तान्॥ आत्मभूताननंतात्मा सर्वभूतात्मको विरः॥७॥ प्रहृष्टो न भवासौ कविन्न च स दुःखितः॥ प्रकृते व्यवहारस्तात्स दैव
समसमान सः॥८॥ जीवन्मुक्तो बभूवासौ ततः प्रभृति मानुरः॥ जनको जनक ज्ञानी ज्ञातलोकपरावरः॥९॥ राज्यं कुर्वन्वि
देहानां जनको जननीं विति नैव हर्षविषादाभ्यां सोवशः परितप्यते॥१०॥

ध्वलिमि स्व प्रमर्जिता॥५॥ अनंता भमपरिच्छिन्न ब्रह्माकारं॥४॥ विक्षेपेमेघपटलैश्च अनाम्रष्ट विकल्पाः असंपादितं जनाभेदांशवः प्रकाशा यस्य
विगताः देहभेदनिरोधप्रयुक्ता आमयाः दुःखानि यस्य॥६॥ विपक्षौ चिदात्मनि समवस्थितान् प्रध्वस्तान्॥ अतएव परमार्थदृशा आत्मभूतान्॥७॥ प्रकृतो मर्या
दाः सर्वव्यवहाररूपतादसंगात्मा संस्पर्शनात्मसमानसः॥८॥ जरठज्ञानी ज्ञानदृढ इति यावत्॥९॥ जनानां जीवितमिव प्रियः इति यावत् ॥१०॥

यो॰टी॰उ॰ २०

मानसैर्गुणदोषविचेष्टितैरसंसस्वरूपतिरोधानं तदंगं पुनस्तदाविर्भावं च नैति । बाह्यैश्च राज्योत्थैः ॥ अर्थानर्थैर्न हृष्यति न ग्लायतीति व्युत्क्रमेणान्वयः ॥ ११ ॥ न किं
चिदपि करोति अकर्तात्मस्वरूपत्वादित्यर्थः तदेवाह सतिष्ठतीति ॥ १२ ॥ भावना रागादिवासना ॥ १३ ॥ वासनाक्षयफलमाह भविष्यमिति ॥ वासनावशात्स्वर्गेत्रि
रनुसंधानं तेन प्राक्तना [illegible] निष्प्रकारिपुद्वेषभोगामिप्रियार्थं रागः ततः प्रवृत्तिरिति सर्वानर्थप्रसक्तिः वर्तमानमात्रे दर्शनं तु दुःखस्याप्युपेक्षया नाप्रिय
तानुसंधानमिति सहजानंदानुवृत्त्याह सन्नेवेत्यर्थः ॥ १४ ॥ आख्यानोपक्रमबीजं स्मारयन्नुपसंहरति स्वविचारेति ॥ अशेषेण निरवशेषेण सा संज्ञा

नात्मने तिन चोदेति गुणदोषविचेष्टितैः ॥ अर्थानर्थैः सराज्योत्थैर्न ग्लायति न हृष्यति ॥ ११ ॥ कुर्वन्नपि करोत्येष न किंचिदपि कु
र्वितः । सतिष्ठत्येव सततं सर्वदैवांतरे चितः ॥ १२ ॥ सुषुप्तावस्थितस्यैव जनकस्य महीपतेः ॥ भावनाः सर्वभावेभ्यः सर्वथैवास्तमागताः
॥ १३ ॥ भविष्यन्नानुसंधत्ते नातीतं चिंतयत्यसौ ॥ वर्तमाननिमेषं तु हसन्नेवानुवर्तते ॥ १४ ॥ स्वविचारवशेनैव तेन तामरसेक्षण ॥ प्रा
संप्राप्तमशेषेण राम नेतरयेच्छया ॥ १५ ॥ तावत्तावत्स्वकेनैव चेतसा प्रविचार्यते ॥ यावद्यावद्विचाराणां सीमांतः समवाप्यते ॥ १६ ॥
नतद्गुरोर्न शास्त्रार्थान्न पुण्यात्प्राप्यते पदं ॥ यत्साधुसंगाभ्युदिताद्विचारविशदाद्धृदः ॥ १७ ॥ सुंदर्या निजया बुद्ध्या प्रज्ञयैव वयस्य
या ॥ पदमासाद्यते राम न नाम क्रिययान्यया ॥ १८ ॥ यस्योज्ज्वलति तीक्ष्णाग्रा पूर्वापरविचारिणी ॥ प्रज्ञादीपशिखा जातु जाड्यांध्यं तेन बाध्यते

नमात्रेण विस्मृतकंठचामीकरवदित्यर्थः तेन जनकेन ॥ १५ ॥ तथाच फलपर्यंतं विचारः कार्यो नांतरा निर्वेदादित्याह तावदिति प्रविचारयेदित्यर्थः ॥ १६ ॥ गुर्वा
दीनां साधनानां मूलसाधनत्वाद्विचारप्राधान्यबोधनार्थः ॥ अपशवो वा अन्ये गो अश्वेभ्यः पशवो गो अश्वा इतिवत् ॥ १७ ॥ सुंदर्या सच्छास्त्रविवेकादिपरिष्कृ
तया ऊहापोहकुशला मतिः प्रज्ञा तया वयस्यया सख्या ॥ १८ ॥ जाड्यमज्ञानं तत्कृतमांध्यं तमः ॥ १९ ॥

राम॰ ॥२१॥

Dr. BHAU DAJI MEMORIAL

नाम्यो विपन्नदीभ्यः प्रज्ञया नावा तीर्णैर्जनैरिति प्रसिद्धं ॥ २० ॥ पेलवा मृदुला अनिलो अनिलस्य कला लेशः ॥ तुलपं तृणविशेषं ॥ २१ ॥ असहायः गु
र्वादिसहायशून्योपि शास्त्रश्रवणशून्योपि इदमपि प्रशंसार्थमेवास्त्युक्तिः आचार्याद्धैव विद्या विदिता साधिष्ठं प्रापयेदित्यादिश्रुतिविरोधात् हेरण्य
पेलत्वात् ज्ञानमात्रबाध्यत्वेनातिकोमलत्वात् ॥ २२ ॥ लोकेपि प्रज्ञावतो मंत्र्यादेर्बलांतरं वेद्मः प्राबल्यं प्रसिद्धमित्याह प्रज्ञावानिति ॥ प्रधानं बहु
तरसेनादिबलमुख्योपि सन्न नश्यति अथवा प्रज्ञा चरमसाक्षात्कारवृत्तिस्तद्वानात्मा सर्वेषां कार्यप्रपंचानामनंतं बाधं सर्वेशाम वश्य कर्तव्यपु — रुषार्थानामंतं अपरपिंपु

दुरुत्तराया विपदो दुःखकल्लोलसंकुलाः ॥ तीर्यते प्रज्ञया ताभ्यो नावापद्भ्यो महामते ॥ २० ॥ प्रज्ञाविरहितं मूढमापदल्पापि बाधते
पेलवाचानिलकला सारहीनमिवोलपं ॥ २१ ॥ प्रज्ञावानसहायोपि विशास्त्रोप्यपरिमर्दनः ॥ उत्तरत्येव संसारसागराद्रामपेल
वात् ॥ २२ ॥ प्रज्ञावानसहायोपि कार्यांतमधिगच्छति ॥ दुःप्रज्ञः कार्यमासाद्य प्रधानमपि नश्यति ॥ २३ ॥ शास्त्रसज्जनसंस
र्गैः प्रज्ञां पूर्वं विवर्धयेत् ॥ सेकसंरक्षणारंभैः फलप्राप्तौ लतामिव ॥ २४ ॥ प्रज्ञाबलबृहन्मूलः काले सत्कार्यपादपः ॥ फलं फल
त्यतिस्वादु भासो बिंबमिवैंदवं ॥ २५ ॥

रुषार्थं च अधिगच्छति दुःप्रज्ञो मोहंस्तत्कर्मप्रपंचसंतानलक्षणं कार्यजातमासाद्य तन्मूलत्वात्सपाने सदपि ज्ञानमात्रेण न पश्यतीत्यर्थः ॥ ज्ञानपक्षे मेदेनाप्यो
न्यं २३ प्रज्ञा सा तत्रिकेनोपायेन लभ्या तत्राह शास्त्रेति ॥ २४ ॥ प्रज्ञाबलमेव बृहन्मूलं यस्य तथाविधः सत्कार्यं सत्कर्मसाक्रमभाव्यं तदेवक्षणः पादपः भासः
सूर्यप्रकाशः सयथा शुक्लपक्षे क्रमेण चंद्रमंडलप्रविष्टः शरीरं तमयचंद्रबिंबं फलितं तद्वत् अथवा ऐंदवं बिंबं कर्तृ तद्यथा जगत्तिमिरापहा भासश्चंद्रिकाः फ
लितं तद्वत्सत्कार्यं ज्ञाननिबर्हणक्षमं आत्मज्ञानं फलतीत्यर्थः ॥ २५ ॥

यः यादृशः प्रयत्न उद्योगः स तादृशः तथा च नाधिकः श्रमोऽस्तीत्यर्थः ॥२६॥ सर्वेषां दुःखानां दुर्दशानां सीमांतं परमावधिं ॥२७॥ एवं प्रज्ञाकोशस्यापि सर्वसं-
पद्वधित्वमिति दर्शयति स्वर्गादिति यत्समवाप्यते सुखमिति शेषः ॥ सद्यो कादपि रम्याणि पातालानीति नारदः । जगाद स्वर्गसुंदरीमध्ये पातालेभ्यः समागत
इति पौराणिकवचनात्पातालेपि सुखातिशयः प्रसिद्धः ॥२८॥ आत्यंतिकदुःखक्षयोपि प्रज्ञैकफलमित्याह प्रज्ञयेति दानतपःप्रभृतीनामल्पपाप-

यः प्रयत्नः क्रियते बाह्यार्थोपार्जने जनैः ॥ स प्रयत्नः कर्तव्यः पूर्वं प्रज्ञाविवर्द्धने ॥२६॥ सीमांतं सर्वदुःखानामापदां कोशमुत्तमं
बीजं संसारवृक्षाणां प्रज्ञामांद्यं विनाशयेत् ॥२७॥ स्वर्गाद्यद्यच्च पातालाद्राज्याद्यत्समवाप्यते ॥ तत्समाप्यते सर्वं प्रज्ञाकोशान्महा-
त्मना ॥२८॥ प्रज्ञयोत्तीर्यते भीमात्तस्मात्संसारसागरात् ॥ न दानैर्न च वा तीर्थैस्तपसा न च राघव ॥२९॥ यत्प्राप्ताः संपदं दैवीमपि भूमिचरा
नराः ॥ प्रज्ञापुण्यलतायास्तत्फलं स्वादु समुत्थितं । प्रज्ञया नखरालूनमत्तवारणयूथपाः ॥ जंबूकैर्विजिताः सिंहाः सिंहैर्हरिणि-
का इव ॥३१॥ सामान्यैरपि भूपत्वं प्राप्तं प्रज्ञावशान्नरैः ॥ स्वर्गापवर्गयोग्यत्वं प्राज्ञस्यैवेह दृश्यते ॥३२॥ प्रज्ञया वादिनः सर्वे स्वविकल्प-
विलासिनः ॥ जयंति सुभटप्रख्यान्नरानप्यतिभीरवः ॥३३॥ चिंतामणिरियं प्रज्ञा हृत्कोशस्था विवेकिनः ॥ फलं कल्पलतेवैषा चिंतितं संप्रयच्छति

क्षयफलत्वादिति भावः ॥२९॥ अन्यान्यत्स्वर्गादि दानादिकर्मणां फलं तदपि प्रज्ञाफलमेवेत्याह यदिति ॥ भूमिचरा अपि नराः ॥ दैवीं नभश्चरत्वादिलक्षणां
संपदं प्राप्ता इति यत्तदपीत्यर्थः ॥३०॥ ३१॥ ३२॥ सुभटप्रख्यान् वादशूरानिति यावत् ॥३३॥ ३४॥



शिक्षितः नौकानयनशिक्षावान् कैवर्तः ॥३५॥ धीरेव सम्यग्विवेकवैराग्यादिसन्मार्गे योजिता चेत्पारं नयति असम्यक् रागद्वेषलोभादसन्मार्गे योजिता तु आ-
पदं नयति प्रापयतीत्यर्थः ॥३६॥ आशा तृष्णा तल्लक्षीया गणाः लोभमोहक्रोधचिंतादयस्तेभ्य उत्थिता दोषा द्वेषचिंताविषादादयः संनद्धं वर्मनद्धं
॥३७॥ सम्यक् गुणदोषतत्त्वविवेकेन दृश्यते सम्यक् दर्शनं यस्य तं सम्यग्दर्शनं पुरुषं ॥३८॥ परमपरमात्मा तदेव सूर्यस्तस्यार्कस्य पिधाने तिरोधायकः

भव्यस्तरति संसारं प्रज्ञयापोह्यतेऽधमः ॥ शिक्षितः पारमाप्नोति नावा नाप्नोत्यशिक्षितः ॥३५॥ धीः सम्यग्योजिता पा-
रमसम्यग्योजितापदं ॥ नरं नयति संसारे भ्रमंती नौरिवार्णवे ॥३६॥ विवेकिनमसंमूढं प्राज्ञमाशागणोत्थिताः ॥ दोषा न परिबा-
धंते सन्नद्धमिव सायकाः ॥३७॥ प्रज्ञयेह जगत्सर्वं सम्यगेवांग दृश्यते ॥ सम्यग्दर्शनमायांति नापदो न च संपदः ॥३८॥ पिधा-
नं परमार्कस्य जडात्मा विततोऽसितः ॥ अहंकारांबुदो मत्तः प्रज्ञावातेन बाध्यते ॥३९॥ पदमतुलमुपैतुमिच्छतोच्चैः प्रथममियं म-
तिरेव लालनीया ॥ फलमभिलषता कृषीवलेन प्रथमतरं ननु कृष्यते धरैव ॥४०॥ मोक्षोपाये उपशमप्रकरणे प्रज्ञामाहात्म्यं
नाम सर्गः ॥१२॥ श्रीवसिष्ठ उवाच ॥ एवं जनकवद्राम विचार्यात्मानमात्मना ॥ पदं विदितवेद्यानामविघ्नेनाधिगच्छति ॥१॥

जडश्चासौ मेदश्चांबुदपक्षे जलात्मा विततो विस्तीर्णः असितोऽस्वच्छो नीलश्च ॥३९॥ लालनीया बालवत्क्रमाद्विवेकशिक्षणेन शोधनीया फलं
कृषिफलधान्यसमृद्धिं न चिरेति प्रसिद्धो ॥४०॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे द्वादशः सर्गः ॥१२॥ जनकस्य विचारं दृष्टांतीकृत्य वि-
लग्नात् चित्तस्य प्रशमोपायाः कीर्त्यंत इह युक्तिभिः ॥ अविघ्नेन असंभावनादिप्रतिबंधकनिरासेन ॥१॥ नं॰१

वा॰टी॰उप॰ ॥३१॥ स्वमात्रपुरुषप्रयत्नसंभवात्मतेन च चित्तप्रसादोपचयाद्राजससात्त्विका एव स्वविवेकेनाकाशफलपातवद्ज्ञानभाजः सर्वाध्यधिकारिण इति भावः ॥२॥ ते कथं प्राप्नुवंति
तदाह तावत्तावदिति । सत्त्वोपचयाद्यावदात्मा आत्मनि प्रसीदति तावत्तावद्राजसोऽपि इंद्रियारीन्पुनः पुनर्विजित्येत्यर्थः ॥३॥ अध्यात्माधिकार
त्सर्वेषां देवानामिंद्रियाणामीशे वशिनि देवे परमात्मनि स्वयमालोकिते सति ॥४॥ मोहबीजानां दुर्वासनानां मुष्टयः मुष्टिवदंतर्हृदं संग्राहकाः चित्तक्षेत्रे उप्य
मानाः अविविधानामाध्यात्मिकादिभिन्नानामापदां दुःखानां दृष्टयः दृष्टिवदकस्मात्सर्वतः क्षारकित्र्यः कुदृष्टयः अहंममतादिप्रत्ययलक्षणाः

ये हि पाश्चात्यजन्मानः प्राज्ञा राजससात्त्विकाः ॥ प्राप्नुवंति स्वयं प्राप्यं ते जना जनका इव ॥२॥ तावत्तावद्विजित्यारी
निंद्रियाख्यान्पुनः पुनः ॥ यावदात्मात्मनैवाशु आत्मन्येव प्रसीदति ॥३॥ प्रसन्ने सर्वगे देवे देवेशे परमात्मनि ॥ स्वयमालोकि
ते सर्वाः क्षीयंते दुःखदृष्टयः ॥४॥ मुष्टयो मोहबीजानां दृष्टयो विविधापदाम् ॥ कुदृष्टयः क्षयं यांति दृष्टे तस्मिन्परावरे
॥५॥ सदा जनकवद्राम सर्वारंभवदात्मना ॥ प्रज्ञयात्मानमालक्ष्य लक्ष्मीवानुत्तमो भव ॥६॥ नित्यमंतर्विचारस्य पश्यत
श्चंचलं जगत् ॥ जनकस्येव कालेन स्वयमात्मा प्रसीदति ॥७॥ न दैवं न च कर्माणि न धनानि न बांधवाः ॥ शरणं भवभीतानां
स्वप्रयत्नाद्दते नृणाम् ॥८॥

हृदयग्रंथयः पराः मानुषानंदादिहैरण्यगर्भानंदांताः सुखोत्कर्षाः अवराः न्यूनाः यस्मात्तथा च
श्रुतिः भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे इति ॥५॥ प्रज्ञया विवेकबुद्ध्या आत्मानं स्वं सर्वारंभवत्स राम॰ ॥३१॥
र्वजगदुत्पत्त्याद्यधिष्ठानं ब्रह्मतदात्मना आलक्ष्य साक्षादनुभूय परमपुरुषार्थलक्ष्मीवानुत्तमः सर्वोत्कृष्टो भवेत्यर्थः ॥६॥ इदानीमात्मप्रसादोपाये
विचार एव मुख्य इत्याह नित्यमिति । चंचलं अनित्यं भ्रमणस्वभावं च ॥७॥ विचारस्यापि फलं पुरुषप्रयत्नसाध्यत्वाशयेनाह नेति

---

ननु दैववशात्स्वयमेव कालेन ज्ञानं भविष्यति किमस्मात्प्रयत्नेनेति भ्रमं तन्निंदति ये इति कृतिर्यत्न आदिपदाद्विवेकवैराग्यविचारादयस्ते च दैवे प्रति
कूले किं स्वप्रयत्नसहस्रेणापि सेत्स्यति बहूनां यततामानानां दैवोपहतानां कामक्रोधमन्युभिर्भ्रंशदर्शनादित्यादिकुविकल्पपरायणाः ॥९॥१०॥ एषा जनकस्याधि

ये दैवनिष्ठाः कृत्यादौ कुविकल्पपरायणाः ॥ तेषां मंदमतिस्तात नानुगम्या विनाशनी ॥९॥ विवेकं परमाश्रित्य विलोक्यात्मा
नमात्मना ॥ धिया विरागोद्धुरया संसारजलधिं तरेत् ॥१०॥ एषा साकथिता राम नभःफलनिपातवत् ॥ सुखदा ज्ञानसंप्राप्ति
रज्ञानतरुशातनी ॥११॥ जनकस्येव सहृदः स्वयमेव विलोकिनः ॥ विकाशमेत्ययं देवः प्रातरिवांबुजं ॥१२॥ संसारमननं वि हीदे
त्ते विचारेण विलीयते ॥ गलद्धूलीकृतस्पर्शमातपेन हिमं यथा ॥१३॥ अयमेवाहमित्यस्यां निशायामुदिते क्षये ॥ स्व
यं सर्वगतः स्फारः स्वालोकः संप्रवर्तते ॥१४॥ अयमेवाहमित्यस्मिन्संकोचे विलयं गते ॥ अनंतभुवनव्यापी विस्तार
उपजायते ॥१५॥ जनकेन परित्यक्ता यथाहंकारवासना ॥ तथा त्वमपि सद्बुद्धे विचार्यांतः परित्यज ॥१६॥ अहंकारांबु
दे क्षीणे विद्योम्नि विमले तते ॥ नूनं संप्रौढतामेति स्वालोको भास्करः परः ॥१७॥ एतावदेवातितमो यदहंभावभावनं ॥ तस्मिं
ञ्शममानीते प्रकाश उपजायते ॥१८॥

कोदाहरणमप्रपंचिता ॥११॥ देही देहांतर्हृदि स्थितो देवः परमात्मा ॥१२॥ संसारस्य मननं कल्पनं चिंतनं च वशीकृतस्पर्शमपद्धतशैत्यं ॥१३॥ देहाहंभावत्याग एव पर
मात्मदर्शने मुख्यं साधनमित्याह अयमिति ॥१४॥१५॥ नूनं निश्चयेन अवश्यमिति यावत् । स्वालोकात्मा भास्करः सूर्यः संप्रौढतां शरदीव स्फुटप्रकाशतां
॥१७॥ अतितमः तमसामुख्यं बलमिति यावत् ॥१८॥

अहमहंतानास्तिअस्मच्छब्दार्थस्याप्यहंकारस्यासत्त्वक्तविवक्षणान्नतन्मिधानायोत्तमपुरुषः कृतः॥ अहमर्थस्यतदन्यस्यवनिषेधेशून्यतापत्तिमाशंक्योक्तं नचनास्तीतिउभयसाक्षिणःसत्तादितिभावः॥ उपादेयेषुउपादानाद्धेयेषु विषयेषु॥१९॥ उपादेयेषुरागोहेयेषुद्वेषश्चमानसःउदुषस्यबंधोनान्यइत्याह उपादेयेति॥ २० हेयादेयदशोरागद्वेषात्मकदृष्टोशेषस्तत्साक्षीतेस्थस्तदेकेनिष्ठः सन्नस्वच्छतांविक्षेपकालुष्यशून्यतां

नाहमस्तिनचान्योस्तिनचनास्तीतिभावितं॥ मनःप्रशांतिमायातंनोपादेयेषुमज्जति॥१९॥ उपादेयानुपतनंहेयैकांतविवर्जनं॥ यदेतन्मनसोरामतद्बंधंविद्धिनेतरत्॥२०॥ मारवेदंभजहेयेषुमोपादेयपरोभव॥ हेयादेयदृशौत्यक्त्वाशेषस्थःसच्छतांव्रज॥२१॥ येषामिदमुपादेयमिदंहेयमितिस्थितिः॥ विलीनातेनवांछंतिनस्यजंतीहकिंचन॥२२॥ हेयोपादेयकलनेक्षीणेयावन्नचेतसः॥ नतावत्समताभातिसाभ्रेव्योम्नीवचंद्रिका॥२३॥ अवस्त्विदमिदंवस्तुयस्येतिलुलितंमनः॥ नतस्मिन्नोदेतिसमताशाखोटइवमंजरी॥२४॥ युक्तायुक्तैषणायत्रलाभालाभविलासिनी॥ समतास्वच्छतातत्रकुतोवैराग्यभासिनी॥२५॥

२१॥ इतिस्थितिरेवंरूपाव्यवस्थायेषांसर्वत्राहेयानुपादेयात्ममात्रतादर्शनाद्विलीनातेपुरुषाः॥२२॥
समताअविषमब्रह्मात्मता॥२३॥ अवस्तुअप्रशस्तंवस्तु॥ अतोहेयं॥ वस्तुप्रशस्तंवस्तु अतः उपादेयमितियस्यमनःअंतर्लुलितंलोलतांगतमित्यर्थः॥ शाखोटोवृक्षविशेषः॥ सघपुष्पफलपत्रवोनुपजीव्यच्छायःप्रसिद्धः॥२४॥ युक्तमनुकूलंअतइदंमेभूयादित्येषणालाभविलासिनी अयुक्तंप्रतिकूलमिदंअतोमेकदापिमाभूदित्यरागविलासिनीएषणाइच्छाद्वेषश्चयत्रयस्मिन्पुरुषे॥२५॥ 

तत्रसमतास्वच्छतयोःसंभावनेकोविरोधस्तमाह एकस्मिन्निति नानाऽनानातयाभेदाभेदविकल्पनयायद्वसंगाद्वितीयानंदाअभिन्नास्तर्हिआत्मतादेकत्वेएवअनुकूलास्तयदिभिन्नास्तथाप्यात्मस्पर्शान्नानुकूलानवाप्रतिकूलाइतिननदापितयोरवकाशइतिभावः॥२६॥ तस्मचित्तपादपस्यसौम्यतानिष्कंपता २७॥ इदानींजीवन्मुक्तलक्षणभूतान्यंचदशगुणानाहनिराशतेतिद्वाभ्यां॥ निरीहतामनःप्राप्त्यलाभावः॥ निःक्रियताशरीरकर्तृत्वाभिनिवेशाभावः॥ सौम्यतासदाप्रसन्नता॥ २८ मैत्रीसर्वभूतसुहृत्त्वंमतिर्मननशीलता॥ यदिगुणैस्तिष्ठंतिजहितद्वासनयैवतस्यबंधःस्यादित्याशंक्याह अपवासनमिति

एकस्मिन्नच्युतेस्मिन्निघ्नमानेनिरामये॥ नानाऽनानातयानित्यंकिमयुक्तंक्कयुक्तता॥२६॥ ईप्सितानीप्सिताशंकेमर्कघोचित्तपादपे॥ चंचलेस्फुरतोयस्मिन्कुतस्तस्येहसौम्यता॥२७॥ निराशतानिर्भयतानित्यतासमताज्ञता॥ निरीहतानिःक्रियतासौम्यतानिर्विकल्पता॥२८॥ धृतिर्मैत्रीमतिस्तुष्टिर्मृदुतामृदुभाषिता॥ हेयोपादेयनिर्मुक्तेज्ञेतिष्ठंत्यपवासने॥२९॥ धावमानमधोभागेचित्तंप्रत्याहारेणपतितमधोवारीवसेतुना॥३०॥ बाह्यानर्थानिमांस्त्यक्त्वातिष्ठन्नाछन्नस्वपन्नश्वसन्॥ सर्वथासर्वदासर्वानांतरांश्चविचारय॥३१॥ गृहीतनृत्स्वाशफरीवासनाजालमाविलं॥ संसारवारिप्रसृतंचिंतातंतुभिराततं॥३२॥ वासनाबीजस्याज्ञानस्यनष्टत्वादितिभावः॥ २९ इदानींरामस्यतत्तृणार्जनेउपायमाह धावमानमित्यादिना॥ अधोभागेनिकृष्टेषुप्रत्याहारेणविषयेभ्यःसर्वबाह्येंद्रियाणांपरावर्तनेनअधःपतितंप्रवाहोन्मुखंवारिसेतुनेव॥ ३० बाह्येष्वर्थेष्वात्मताभ्रांत्यप्रसक्तेस्त्यागस्योपाय आंतरेषुतुतत्प्रसक्तेःसर्वदासर्वप्रकारेणातत्त्वलक्षणरीक्षावद्विचारःकार्यइत्याहबाह्यानितिजथाचाहुर्दृष्टं गच्छंस्तिष्ठन्तोवापिजाग्रतःस्वपतोपिवा नविचारपरंचेतोयस्यासौमृतउच्यतेइति॥ ३१ अनयामद्युपदिष्टयाबुद्धिलक्षणयाशलाकयाकर्त्र्यावासनालक्षणंजालंआनायंवृक्षिंधीतिपरेणान्वयः गृहीताःतृष्णाशफर्योयेन मोहदोषेबालेनाविलंमलिनं संसारलक्षणेवारिणिप्रसृतंप्रसारितं चिंतालक्षणैस्तंतुभिराततंनिर्मितम्॥ ३२

वा॰टी॰उप॰ विततेविस्तीर्णेतरेपदेअकाशेअस्मिशिवव हंत्येतिवात्याशलाकयोर्विशेषणं॥३३॥ हेमध्यधीरेणविराम्यासदृढीकृतेनैकाल्मस्थैर्यलक्षणेनचित्तधैर्येणसंपन्न
३३ याअनन्यवोद्धुरयाअनादिकालनिमग्नात्मोद्धारसमर्थयाअपरोक्षसाक्षात्कारधियासंसारवृक्षस्यमूलेमवासनमज्ञानंछिंधीत्यर्थः॥३४॥ ननुएतिविशेपदे
नौकथंमूलच्छेदस्तत्राहमनसैवेति॥यथाअग्निनिविष्टलोहेनपारपावयवकाष्ठात्मनाकुठारेणपादपश्छिद्यतेतद्वद्ग्राननिवेशितवृत्तीद्धब्रह्मचैतन्येनमन प॰२ मनसैव न
श्छिद्यतेत्यर्थः॥३५॥ननुपूर्वसिद्धमनसउक्तोपायेनच्छेदनेपिआविर्मनोवर्त्तमानब्रह्माकारमनोवृत्तेर्वाकथंच्छेदनंतत्राहविस्मृत्येतिविस्मृतिर्वासनोच्छेद

अनयातीक्ष्णयातातछिंधिबुद्धिशलाकया॥वाय्ययेवांबुदंकालेवहंत्याविततेपदे॥३३॥अस्यसंसारवृक्षस्यमूलंदोषांकुरास्पदं
मध्यधीरेणधैर्येणप्रोद्धरोद्धुरयाधिया॥३४॥मनसैवमनश्छित्वाकुठारेणेवपादपं॥पदंपावनमासाद्यसद्यएवस्थिरोभव॥३५॥ मने
म मेवंनश्छित्वाविस्मृत्यावरमेमनः॥वर्तमानमपिछित्वाछिन्नसंसारतांव्रज॥३६॥मोहोविस्मृत्यसंसारंनभूयःपरिरोहति॥चित्तेविस्मृ
त्यसंसारोनभूयःपरिरोहति॥३७॥तिष्ठनाथछन्नपन्नाग्निवसन्नुत्पतन्पतन॥असदेवेदमित्यंतनिश्चित्यास्थांपरित्यज॥३८॥

ॐ

स्तया॥चरमुत्तरकालप्रसक्तंवृत्तिरूपंअसत्यं॥वीसनायाग्नेपिहत्यनुरयात॥वर्तमानंकृतकरेणुन्यायेनस्वेनैवस्वस्यनिराम्साच्छित्वा॥३६॥नन्वेवमपितत्त्वविदो राम
जीवनसिद्धयेतदुपाराभास्तविद्यारव्योमोहोवश्यमभ्युपगंतव्यः सएवपुनःसंसारंप्ररोहयिष्यतीत्याशंक्याहमोहइति॥परिरोहतिप्ररोहतिवासनाक्षय ॥३३॥
लक्षणेविस्मरणसतितस्यबीजशक्त्यभावादितिभावः॥तर्हिसंसारस्तस्मिन्मोहक्षेत्रेस्वयमेवप्ररोहतांतत्राहचित्तमिति॥चित्तसंस्कारोच्छेदलक्षणेचित्तविस्म
रणेसतिनचेत्यस्यप्ररोहःसंभवतिचित्तसंस्कारस्यापिचेत्सारोपबीजत्वादितिभावः॥३७॥चित्तचेत्योर्विस्मरणेतदास्थात्यागएवोपायइत्याहतिष्ठन्निति॥३८॥

आस्थापरित्यागेसमतापिसिद्ध्यतीत्याशयेनाह॥समतामितितथाअप्राप्तमितिच्छेदः॥३९॥यथाशर्वोमहेश्वरःस्थित्याद्यष्टमूर्तिलक्षणानिलिंगानिशुद्धचि
न्मात्रदर्शानबिभर्तिजगदाकारविवर्त्तमानमायाधिष्ठानत्वात्सन्निधिमात्रेणबिभर्तिचतेनसर्वकर्ताचभवति॥एवंत्वमपिराज्यादिकार्याण्यासक्त्यायासन्निधिमात्रेण
कुरुअकर्त्रात्मनिश्चयान्माकुरुचेत्यर्थः॥४०॥किंचनान्योतोस्तिद्रष्टानान्योतोस्तिश्रोतेत्यादिश्रुतेःसर्वशरीरेषुत्वमेववेत्तावेदिताइडभावश्छांदसःसत्ताथो
द्धिघ्नेर्वात्त्वपरमार्थस ॥अर्थः॥अजोजन्मादिविक्रियाशून्यःसर्वस्यात्माप्रत्यक्चिद्रूपः॥प्रागुक्तोमहेश्वरश्चत्वमेवआत्मनःस्वस्वभावादव्य

समतामलमाश्रित्यसंप्राप्तंकार्यमाहरन्॥अचिंतयंस्तथाप्राप्तंविहरेहहिरण्यव॥३९॥यथाशर्वोविलिंगानिनबिभर्त्तिबिभ
र्त्तिच॥त्वमेवमिहकार्याणिकुरुमाकुरुचानघ॥४०॥त्वमेववेत्तात्वमजस्त्वमात्मात्वंमहेश्वरः॥आत्मनोव्यतिरिक्तःसंस्त्वयेत्थ
मिदमाततम्॥४१॥येनात्मादृश्यसद्भावादमितोभावनोज्झिताः॥सनसंगृह्यतेदोषैर्हर्षामर्षविषादजैः॥४२॥रागद्वेषविनिर्मुक्तः
समलोष्टाश्मकांचनः॥युक्तइत्युच्यतेयोगीत्यक्तसंसारवासनः॥४३॥सयत्करोतियद्भुंक्तेयद्दातिनिहंतिवा॥तन्मुक्तधियस्त
स्यसमतासुखदुःखयोः॥४४॥प्राप्तंकर्तव्यमेवेतिस्वकेष्टानिष्टभावनः॥प्रवर्त्ततेयःकार्येषुनसमज्जतिकुत्रचित्॥४५॥चित्सत्तामात्रमे
वेदमितिनिश्चयवन्मनः॥त्यक्तभोगाभिमननंशममेतिमहामते॥४६॥ तिरिक्तः॥अप्रच्युतस्वभावएवसन्नेवंभूतेनत्वयास्वमोहादित्थमिदमा
ततंविस्तारितंनान्येनेत्यर्थः॥४१॥यदिमय्येवेदमाततंतर्हिकथंममात्रहर्षामर्षदोषादयस्तत्राहयेनेति॥येनतत्त्वविदाआत्मदृश्यस्यसद्भावात्परमार्थसन्मात्रताभावनाद
मितोव्याप्तइतिभावनोज्झिताः॥त्यक्ताःसःनदोषैःसंगृह्यतेअतस्त्वमपियुक्तेत्यर्थः॥४२॥४३॥४४॥४५॥इदंजगत्त्वयंचभोगाभिमननंभोगचिंतास्यक्तायेन॥४६

चित्सत्तामात्रमेवेदमितियदुक्तंतदुपपादयति मनः प्रकृत्येवेत्यादिना॥ यतोजडं अतःस्वतःसेद्धुं परंसाधयितुंवाऽसमर्थत्वात्स्वसिद्धयेस्वविषयसिद्धयेवा साक्षिभूतं स्वप्रकाशचिद्रूपंतत्वं पारमार्थिकंवस्तु अनुधावत्यनुसरति यथास्वजीवनायस्वपुत्रादिमरणायचमार्जारः सिंहमनुसरतितद्वदित्यर्थः॥४७॥ दृश्यंस्वविषयंच आश्रयते उप जीवति॥४८॥ अस्त्येवंकिंततस्तत्राह मनइति। एवंचसतिमनः असत्कल्पं शून्यप्रायंमिथ्येतिसिद्धमित्यर्थः॥ कथंजीवतितत्राहभावयन्निति॥ एकमद्वितीयमात्मानं विस्मृत्यविश्वंजगदाकारमेवभावयन्छांदसोलिंगव्यत्ययः कल्पयत्तत्जगदाकारंभूत्वाजीवतीत्यर्थः अतएवचिंतामात्मस्मृतिंएत्यनाप्नुवत्पुनः चि

मनः प्रकृत्यैवजडं चित्तत्वमनुधावति॥ मांसगृद्धेनमार्जारो वनेमृगपतिंयथा॥४७॥ सिंहवीर्यवशाल्लब्धंमांसंभुंक्तेनृगोहरेः॥ चिद्वीर्यवशतःप्राप्तंदृश्यमाश्रयतेमनः॥४८॥ मनएवमसत्कल्पं चित्प्रसादेनजीवति॥ भावयन्विश्वमेवैकं चिंतामेत्यचिदप्युत॥४९॥ जडंयत्किलनिर्हीनं चिताद्दीपिकयोज्झया॥ तन्मनः शवसंकाशमचिद्रुन्निष्ठतेकथं॥ चित्स्वभावपराम्रष्टास्पंदशक्तिरसन्मयी॥ कल्पनाचित्तमित्युक्त्याकथ्यतेशास्त्रदृष्टिभिः॥५१॥ यच्चित्रफणिफूत्कारःसैवेयंकलनोच्यते॥ चिदेवाहमितिज्ञात्वामाचिंतामेवगच्छति॥५२॥ चेत्येनरहितायैषाचित्तद्ब्रह्मसनातनं॥ चेत्येनसहितायैषाचित्सैवेकलनोच्यते॥५३॥

इतिभवतिमनस्तंजहातीत्यर्थः॥५०॥ मनसःप्रकाशशक्तिरिवस्पंदशक्तिरपिचिदधीनैवेत्याह जडमिति॥ चिद्रूपस्यायादीपिकयाओजसाबलेनचविनाउत्तिष्ठतेस्पंदते॥५०॥ अतएवचितिस्पंदकल्पनैवमनइति विद्वत्प्रवादोऽप्यस्तीत्याहचित्स्वभावेति॥५१॥ स्पंदशक्तेरेवविलासश्चित्तंतद्वृत्तयश्चेत्याहयइति॥ फूत्कारग्रहणंविषयस्याप्युपलक्षणं तथाचचित्तादित्रिपुटीदृश्याकारतैवकलनेत्यर्थः॥ चिन्तांशुद्धचिन्मात्रतां॥५२॥ तथाचचितश्चेत्यत्यागएवब्रह्मभावोपायइत्यमन्वेत्याहचेत्येनेति॥५३॥ 

DR. BHAU DAJI MEMORIAL

॥ ॥ ॥॥

सेदरः

कलनैवमनोनाम्नानैनोभवतीत्याहकिंचिदिति॥ तद्रूपैवकिंचिदाम्रष्टरूपं कलनासत्त्वसदैवहृदिदृष्टमुपस्थिता संकल्पविकल्पकल्पनाम्नत्वात्स्थिरंएतत्प्रसिद्धं मनोभवतीत्यर्थः॥५४॥ नित्यानुभवस्वभावस्यस्वरूपविस्मरणेकलनैवस्रतितमापन्नाचित्ततांगच्छतीत्याहचित्तमिति॥ जडाप्रोक्षतापन्नियोग्यजडताप्त्याःसंपन्नेत्याहजडेवेति॥५५॥ अतीतविषयाकारकल्पनेनचित्ततामिवअनागतविषयाकारकल्पनेनसंकल्पविकल्पानुविधानाम्नमनस्तामपिसाप्राप्त्याशमेनाहसंपन्नेति॥ एवमवच्छेदवतीद्विधापरिच्छिन्नासतीप्राक्तनेष्टानिष्टसाधनताजात्यमध्यमवस्वभावीष्टानिष्टसाधनतांसंकल्प्यहेयोपादेयधर्मि

किंचिदाम्रष्टरूपंयद्दृष्टस्तच्चस्थिरंमनः॥ कल्पनासत्त्वदैवैतत्सदितोपस्थिताहृदि॥५४॥ चित्तमित्येवरूढेयंयदैवकलनोदिता॥ तदेवचित्तंविस्मृत्यसाजडेवव्यवस्थिता॥५५॥ संपन्नाकलनानाम्नीसंकल्पानुविधायिनी॥ अवच्छेदवतीवाग्राहेयोपादेयधर्मिणी॥५६॥ सैषाचिदेवजगतामागतेवस्वशक्तितः॥ नसंप्रबोधितायावद्रूपंतावन्नबुध्यते॥५७॥ अतःशास्त्रविचारेणवैराग्येणपरेणच॥ निग्रहेणेंद्रियाणांचबोधयेत्कलनांस्वयं॥५८॥ कलनासर्वजेतव्याविज्ञानेनशमेनच॥ प्रबुद्धाब्रह्मतामेतिभ्रमतीतरथाजगत्॥५९॥ व्यामोहमदिरामत्तांलुठितांविषयावटे॥ आत्मावेदनसंसुप्तांकलनामेवबोधयेत्॥६०॥

णी अग्राह्यमुख्याचिदेवसंपन्नेत्यर्थः ५६ मनःप्रकृत्यैवेत्यादिनोपपादितंचित्सत्तामात्रमेवेदमित्यंशंपिंडीकृत्योपसंहरतिसैवेति स्वशक्तितःस्वीयमायाशक्तिवशात् गुरुशास्त्रसविचारैर्यावन्नसंप्रबोधिताताववद्वास्तवपूर्णानंदाद्वयरूपेनबुध्यतइत्यर्थः ५७ बोधमेज्ज्वडाकारकलनालक्षणाद्वस्थान्तरयस्वप्नाद्व्यावर्तयेदित्यर्थः ५८ विज्ञानेनशास्त्रजन्यज्ञानेनशमेनशमादिसाधनसहितमनननिदिध्यासनाभ्यांइतरथाविज्ञानशमाभ्यामप्रबोधने ५९ व्यामोहोमोहः आत्मनःअवेदनमज्ञानंनिद्रातेनसंसुप्तां ६०

ननु कल्पनायदि सुप्ता कथं जगदवबुध्यते अवबोधे वा तस्याः प्रसिद्धचित्त्वभावात्कोतिशयस्तत्राह अप्रबुद्धेति। यन्मन्यसे जगदवबुध्यत इति तन्न
किंचिदवबुध्यते जगतोऽनवबोधमात्रविलसितत्वात् यतो दृश्यमानापि जगत्स्थितिः सांकल्पिकप्रासादकल्पनेव असन्मयी त्यर्थः। ६१। विषयांश
परित्यागेऽवशिष्टाकलनैवात्मेत्युक्ते इति ज्ञानमेवाद्य मात्मेति मायाहीति तत्साक्षिणी तदंतरीं शुद्धचित्तं विविच्य दर्शयति तयेत्यादिना। एषा चित्र
वृत्तिरूपा कलना अंतरस्थायात या सर्वसाक्षिण्या परमया दृश्याख्या प्रासनी परार्थेषु स्वस्वविषयेषु विराजते प्रकाशनसमर्था भवति न स्वतः

अप्रबुद्धाय यालेषा न किंचिदवबुध्यते। संकल्पकलनेवांतर्दृश्यमाना प्यसन्मयी॥६१॥ तया परमया दृष्ट्या कलनेषां
तरस्थया। मंजरी गंधशक्त्येव पदार्थेषु विराजते॥६२॥ ननु संकल्पिता येषा कलनेति जगत्त्रये। सा हि किंचिद्विजानाति नि
त्यं ज्ञानैकधर्मिणी॥६३॥ चेतनेन जडा रामकलनोपलरूपिणी॥ पद्मिनी वा तथैनां सोपरे गैव प्रबोध्यते॥६४॥ यथा शिला
मयी कन्या चोदितापि न नृत्यति॥ तथेयं कलना देहेन किंचिदवबुध्यते॥६५॥ लिपिकर्म नरैर्युद्धं क्व कृतं घर्घरारवम्। क्व चित्र

त्यर्थः। ६२। यदि सा सर्वसाक्षिणी कुतस्तत्र तदंतःकरणधर्मानेव प्रकाशयति न सर्वं तत्राह \ चेदृक्किरणौ रोषध्यः प्रतिबोधिताः॥६६॥
ननु संकल्पितेति। या एषा ज्ञानैकधर्मिणी नित्यबोधस्वभावा साक्षिचित्सा परिच्छिन्नवृत्तिकलनोपाधिवशात् तनुरल्पा चेति जगत्त्रये पि तैस्तैः प्राणिभिः
संकल्पिता अतः किंचिदल्पमेव तत्तदंतःकरणादि जानाती त्यर्थः। ६३। वृत्तिरूपा तु कलना विवेके उपलरूपिणी पाषाणकल्पा जडैव अत एव चेतनेन सा
क्षिणा प्रबोध्यते। ६४। ये तु नैयायिकप्रभृतयः नित्यसाक्षिणमजानानाः परप्रकाश्यैवा नित्यज्ञानस्या। अर्थप्रकाशतां मन्यंते तान् बुद्धिभिर्दृष्टांतैरुपह 
सति यथेत्यादिना। ६५। अचेतनस्यांतःकरणतद्वृत्त्यादेर्नित्यचित्संनिधानाभावे विषयोन्मुखप्रवृत्तिरेव दुर्लभा दूरे तत्प्रकाशकतेत्याशयेनाह लिपि

---

परिवलितं तथा चित्रं ६७ पुंसा विहितैः शिलादिना निर्मितैः। ६८। ६९। नित्यचिदात्मानभ्युपगमे कलनाध्यासस्यैव न सिद्धिरित्याशयेनाह यथे
ति ७० चितः परिच्छेदसंदर्कल्पनैव मनइत्युक्तं इदानीं सैव चिदविदंशविवेके चिदंशस्यात्ममात्रतां जडांशस्य परिशिष्यते तथाविधा तु संदश
१ सैवा क्तिः प्राणस्वेति तन्निरोधे हृते न मनो नाम पृथक्स्थितिः स्यादस्तीति वक्तुं भूमिकां रचयति। शाठैः स्वबंधकैरज्ञैः अन्नमयांतः प्राणशरीरिणी। प्राणम
यकोशात्मिकां। ७१। सा प्राणशक्तिः संकल्पोद्भुत्थितानिः संकल्पानां योगिनां चिदात्मैव न पृथगस्तीत्याह। येषामिति। नआक्षिप्तः कल्पि

अस्तगालि सगात्रैश्च शवैः क्व परिवलितं। क्व गीतं मधुरध्वानं वनपाषाणखंडकैः॥६७॥ क्व पुंसा विहितैरर्कैः क्षपितं यामिनी तमः। क्व सं
कल्पमयैश्छाया क्रियते व्योमकाननैः॥६८॥ क्व जडै रूपलाकारैर्मिथ्याभ्रमभरोत्थितैः। स्रगात्स्नामयैरेभिर्मनोभिः क्रियते क्रिया
६९ यथा तपेक्षते स्फारे स्रगात्स्ना तरंगिणी। कलना तद्वदेवेयं स्फुरत्यात्मनि सत्त्वलं॥७०॥ यदेतत्स्पंदितं नाम तन्मनो धिगतं श
नैः। मरुतां विद्धि तां शक्तिमंतः प्राणशरीरिणीं॥७१॥ येषां संविदनाक्रांता संकल्पलवनिश्चये। अनाक्षिप्तरसाकारा समेषा पार
मात्मिकी ७२ अयं सोहमिदं तन्म इति याकलनाविला। प्राणात्मतत्त्वयोस्तस्याः संज्ञा जीवेति कथ्यते ७३ धीश्चित्तं जीव इत्येताः सं
कल्पस्यासतो मताः संज्ञाः संकल्पितास्त्वेते न मिथ्यापरमार्थतः ७४
तः रस्यं तद्इति रसाविषयालंराकारो यस्मा ७२ सैव अहं ममेत्यात्मसाक्षिसरसाकारायतात्माविनाभूत्यादिसुपायोपात्सं दात्मकप्राणतत्स्यचिदात्मक
स्यात्मतत्त्वस्य च पृथगिव संजातस्यैविवेको त्यनेरैक्याध्यासेन आविला जडसंवलितचिद्रूपाकलना जीव प्राणधारणा इति धात्वर्थानुगमाज्जीवतीति जी
वेति संज्ञा कथ्यत इत्यर्थः ७३ एवमन्या अपि संज्ञास्तस्याः प्रसिद्धा इत्याह धीरिति ७४

कुतो न परमार्थं तस्तत्राह मन इति ॥ यतः परमार्थेन मनः चित्तं बुद्धिः शरीरमित्येतदुपलक्षितं दृश्यमात्रं दृश्यमात्रं इहात्मनि नास्ति अप्राप्तोऽप्यमनः स्तुमः अका
ममत्रणमस्ताविरआस्वरूलमेवित्याशिक्षतत्तेनविदूरस्तुमवैर्युक्तिमिश्चवापितत्वादितिभावः ॥७५॥ यद्यात्मैवास्ति तर्हि स कुतो न भाति जगद्रूपेण वा को
भातीति तत्राह आत्मैवेति ॥७६॥ कुतो नास्ति वकुत श्चास्त्येवेति निश्चयस्तत्राह अच्छत्वादिति ॥ अच्छत्वात्स्वच्छत्वादिमो यत्नाप्रयोजकस्यौत्पत्तिकत्वाद्यभावा
दस्य रिवाभासतरत्वमस्ताभासः चिद्रूपतया स्वपरप्रकाशनिर्वाहकत्वात्सन् अत एव स्वानुभवैकत्वैवानुभूयते न करणैरित्यर्थः ॥७७॥ स्थौल्याद्यभावात्क
रणांतराणि तत्र न प्रवर्तंतां मनस्तु स्वस्मात्सूक्ष्मतत्त्वार्थनिर्णयनिमित्तत्वेन प्रसिद्धं कुतो न प्रवर्तते तत्राह मन इति सत्यं तत्र मनः प्रवर्तेत यदि तद्दर्शनकाले स्वयं

मनो नो न मतिर्नापि धीरेषा न शरीरकं ॥ अस्तीह परमार्थेन सात्मैवेहास्ति सर्वदा ॥७५॥ आत्मैवेदं जगत्सर्वमात्माकालक्रमस्तथा ॥ सवाका
शादच्छतरो नास्तीवास्त्येवचामलः ॥७६॥ अच्छत्वात्सदाभासः संविद्रूपतयातु सन् ॥ आत्मा सर्वपदातीतः स्वानुभूत्यानुभूयते ॥७७॥
मनस्तत्र परिक्षीणं यत्र संवित्परात्मनः ॥ अंधकारस्य यत्नत्र यत्र लोकः प्रवर्तते ॥७८॥ यत्रात्मसंविदोऽच्छायाः संकल्पोत्थतया मताः ॥
तत्रात्मनो विस्मरणं स्मरणं चित्तजन्मनः ॥७९॥ परस्य पुंसः संकल्पमयत्वं चित्तमुच्यते ॥ अचित्तत्वमसंकल्पान्मोक्षत्वेनाभिजायते ॥८०॥

न नश्येत् ॥ मनसस्तु ज्ञानकार्यत्वात्तद्दर्शनहेतुत्वस्य समकालमेवाविद्यावरणस्यान्ततद्दर्शनशक्तत्वमित्यर्थः ॥७८॥ कर्तर्हि मनसः प्रवृत्तिशक्तिस्तत्राह यत्रे
ति ॥ यत्र यस्यां दशायां अच्छायाः स्वच्छतरायाः आत्मरूपायाः संविदः संकल्पवशाद्बाह्यविषयाकारोत्थतया बाह्यार्थाः प्रकाश्यत्वेनाभिमतास्तत्र
पारमार्थिकस्यात्मनो विस्मरणं चित्तजन्मनो मिथ्यार्थस्य स्मरणं दर्शनमित्यादि प्रसिद्धमित्यर्थः ॥७९॥ सोऽयमप्रतिकूलत्वादपि न मनस आत्मदर्शनशक्ति राम॰ ॥३६॥
रस्तीत्याह परस्येति संकल्पमयत्वाधीनोद्भवं मनः सर्वसंकल्पक्षयोपलक्षिते मोक्षात्मनि कथं प्रवर्तेतेति भावः ॥८०॥

॥

अत एव संकल्पः चित्तजन्मबीजमित्यस्य हेतुद्वारे वेदितमित्याह एतावदिति संकल्पोन्मुखतां यातो गच्छतः आत्मनः यत्संविदश्चित्त्वभावात्तत्त्वाविकल्पनं ईषद
न्यथाभावलक्षणं एतावदेव चेतसो जन्मकिलेत्यन्वयः ॥८१॥ उक्तमेव स्फुटीकृत्याह निर्विकल्पादिति ॥ निर्विकल्पात्प्रच्युतेति शेषः यथा स्त्र्यादिसंकल्प
कलनया पुंस्त्वं पुंव्यंजने बुध्यते प्रजाप्रसवार्थमाविर्भवति तथा मनोऽपि जगत्प्रसवार्थमित्यर्थः ॥ तथा च बादरायणसूत्रं पित्र्यं पुंस्त्वादिवदविहिलो
केऽपि ॥८२॥ यदेतत्संसारितं नामेत्यादिनायत्नसस्तंतस्य प्रयोजनमाह प्राणशक्ताविति यथा दृश्यस्य दर्पणादेः संबंधिनी छायाप्रतिच्छायाजस्मिन्नद्

एतावच्चेतसो जन्मबीजं संसारसंततये ॥ संकल्पोन्मुखतां यातः संविदो वा किलात्मनः ॥८१॥ निर्विकल्पाच्चितः स्नात्संकल्पोक
कलंकिता ॥ कलनेत्युच्यते तेन पुंस्त्ववद्बुध्यते मनः ॥८२॥ प्राणशक्तौ निरुद्धायां मनोराम विलीयते ॥ द्रव्यच्छायानुतद्द्र
व्यं प्राणरूपं हि मानसं ॥८३॥ देशांतरानुभवनं प्राणो वेत्ति हृदिस्थितं ॥ संरवे रनतो यत्नान्मन इत्यभिधीयते ॥८४॥ वैरा
ग्यात्कारणाभ्यासाद्युक्तितो व्यसनक्षयात् ॥ परमार्थावबोधाच्च रोध्यंते प्राणवायवः ॥८५॥

व्यमनु विलीयते तद्वत् ॥ तत्कुतः यतो यथा प्रतिबिंबं दर्पणस्यैव कल्पितं रूपं तथा मानसं मनो वि प्राणस्यैव रूपमित्यर्थः ॥८३॥ प्राणरूपं मानसमि
ति कुतो ज्ञातं तत्राह देशांतरेति ॥ यतः प्राणाज्जीवत्पुरुषः हृदि देशांतरस्यानुभवनं मानसानुभवं हृदिस्थितं वेत्ति हृदि मेतस्य देशस्यानुभवो नास्त्य
नुभवतीति तत्र देशांतरसंबंधस्य संदर्भांतरेणासिद्धेः वेदनांशस्य विशेषं वलनमंतरेण योगात्संदर्भे वेदनो भयशक्तियोगात्प्राणस्य मन इत्यभिधीयते
इत्यर्थः ॥८४॥ इत्थं प्राणनिरोधेन मनो निरोधसिद्धये तन्नोरे रूपं व्युत्पाद्येदानीं निरोधोपायमाह वैराग्यादिति कारणं प्राणायामस्तस्याभ्यासात् योगेयु
क्तिः समाधिस्तस्मात् चित्तस्य बाह्यविषयो यदृगभ्यासो व्यसनं तस्य क्षयात् ॥८५॥

वा॰ टी॰ उप॰ ॥३९॥

इदानीं अन्नमयं हि सोम्य मन आपोमयः प्राण इति श्रुत्या भिन्नोपादानकयोः प्राणमनसोर्भेद इति पक्षेपि मनसः स्वतः स्पंदशक्तेश्चिच्छक्तेश्चाभावात्प्राणादि
दात्माधीने सवृत्ते इति प्राणनिरोधे निरोधोपपत्तिरित्याशयेनाह दृष्ट इति ॥ एवं शब्देन काष्ठवाचिना तत्कार्यं ज्वलनशक्तिर्लक्ष्यते दृषदः शिलाया अपि कदा
चिज्ज्वलनशक्तिर्ज्वलनशक्तिश्च विद्यते संभवेत् न तु मनसां स्पंदविषये या शक्तिरस्तीत्यर्थः ॥ ८६ ॥ कयोस्तर्हि ते शक्तौ ता वाह स्पंद इति ॥ ८७ ॥ किं तर्हि मनस्तदा

दृष्टो हि विद्यते शक्तिः क्वचिज्ज्वलने धूमः ॥ न पुनर्मनसामस्ति शक्तिः स्पंदावबोधने ॥ ८६ ॥ स्पंदः प्राणमरुच्छक्तिश्चलद्रूपैव सा
जडा चिच्छक्तिः स्वात्मनः स्वच्छा सर्वदा सर्वगैव सा ॥ ८७ ॥ चिच्छक्तेः स्पंदशक्तेश्च संबंधः कल्प्यते मनः ॥ मिथ्यैव तत्समुत्पन्नं मि
थ्याज्ञानं तदुच्यते ॥ ८८ ॥ एषा स्वविद्या कथिता मायैषा सा निगद्यते ॥ परमेतत्तदज्ञानं संसारादिविषप्रदं ॥ ८९ ॥ चिच्छक्तेः स्पं
दशक्तेश्च संगमे कल्पकल्पने ॥ न कृतं चेत्सरिक्षीणास्तदिमा भवभीतयः ॥ ९० ॥ वायुतः स्पंदशक्तिर्या सा चिता चेत्यते यदा
स्वचेत्या चित्तदेवांतः संकल्पाद्याति चित्तता ॥ ९१ ॥ चित्तैषा चितो मिथ्याकल्पिता बालयक्षवत् ॥ अखंडमंडलाकार
स्पंदरूपा विदेवयत् ॥ ९२ ॥

ह चिच्छक्तेरिति ॥ ८८ ॥ अविद्या कार्या विद्या माया विक्षेपशक्तिः एतन्मन एवाज्ञानसर्वस्वनिर्वाहकत्वादज्ञानं ॥ ८९ ॥ संकल्पकल्पनं संकल्पकल्प
नहेतुनिमित्तमिति यावत् ॥ अत एव निमित्ताजननेनैमित्तिकापायसिद्धिरित्याह न कृतं चेदिति ॥ ९० ॥ वायोरिति वायुतः पंचम्यंतात्सार्वविभक्तिक
स्तसिः ॥ ९१ ॥ न विद्यंते खंडमंडलाकारस्पंदरूपाणि यस्यां तथाविधा विदेव यद्यस्मात्सा परमार्थ इत्यर्थः ॥ ९२ ॥

राम
॥३९॥

॥॥

त्व

सा उक्ता खंडश्रूर्णता लक्षणा चित्ता चित्स्वभावता तदन्येन केन संबाध्यते खंड्यते किल इति तद्संभावनाद्योतनार्थः ॥ किं तदधीनसिद्धिकेन उतान्येन अन्यस्या
प्रसिद्धेः चिदधीनसिद्धिकस्य चिद्बाधनाशक्तेर्बाधस्यापि सिद्धेश्चित्तत्त्वाधीनत्वाच्चित्खंडनमंतरेण चिदंतराले अचित्सिद्ध्ययोगाच्चेति भावः तद्धि दंते इति पा
ठे तु तां तादृशीं चित्स्वभावतां स्वस्य वेत्तीति तद्धि तु ॥ अंते सकार्या विद्यानाशे सति केन संबाध्यते इति योज्यं ॥ इंद्रस्य देवराजस्य परमेश्वरस्य वा ॥ ९३ ॥
अतः चिचितः स्थिरविरोधायोगाद्विरोधे चित्सत्ताबाधितस्थितिकत्वाच्च कीदृशं मनः यदि जडमपि स्वसत्तायामन्यनिरपेक्षं स्वतः सिद्धमुच्येत तथापि तद

सैषा चित्तातदन्येन केन संबाध्यते किल ॥ अखंडशक्तेरिंद्रस्य केन स्यात्सहसंगरः ॥ ९३ ॥ अतः संबंधिनो भावात्संबंधोत्र न विद्यते
संबंधेन विना कस्य सिद्धं तत्कीदृशं मनः ॥ ९४ ॥ चित्स्पंदयोरेकतायां किं नो मम न उच्यते ॥ कासे नाहयमातंगसंगसंपद्दतं विना
॥ ९५ ॥ तस्मान्नास्त्येव दुष्टात्म चित्तं राम जगत्त्रये ॥ सैषा सम्यक्परिज्ञानात्त्वतसो नायते स्थिति ॥ ९६ ॥ मुधा मैव मनर्थाय मनः
संकल्पयानघ ॥ मनो मिथ्या समुदितं नास्त्यत्र परमार्थतः ॥ ९७ ॥ मा त्वमंतः क्वचित्किंचित्संकल्पय महामते ॥ मनः संकल्पकं रा
म यस्मान्नास्तीह कुत्रचित् ॥ ९८ ॥

तु अचितु सत्संबंधिनश्चितेन स्यान्यस्याभावाच्चित्संबंधेन विना तन्मनः कस्य सिद्धं कीदृशं वा तत्स्यात् अनुभवानारोहे अलीकस्य तत्स्य च विशेषासिद्धेरिति भा
वः ॥ ९४ ॥ इत्थं चित्स्पंदयोर्भेदपक्षे मनसो निरूपितामुक्त्वा एकतापक्षे सुतरां तदभावमाह चित्स्पंदयोरिति चित्स्पंदयोरेकता विद्युल्लापेन तावदशक्त्यावकुं संबन्धा
धकाभावप्रसंगात् परिशेषात् ॥ संदिह्यतापलापेने कत्वोक्ता राजाति शिक्षणं न तु रणयप्रस्तावे सेनाम्बपारूपा सिद्धिवन्मनसः सुतरामसिद्धिरित्यर्थः ॥ ९५ ॥ तस्मा
त्सर्वहृदयेपर्सभवाच्चित्तं मनो नास्त्येव ॥ तत्त्वज्ञानान्नास्तीति निश्चयः एवं मनो नाशे इत्यर्थः ॥ ९६ ॥ ९७ ॥ ९८ ॥

वा॰टी॰उ॰ ॥३५॥

हृत्पदेन हृदयांतस्थप्रत्यगात्मोच्यते तद्ब्रह्मसंपन्नो यः ॥ असम्यग्ज्ञानेन संभृता ॥ मुनेइति रामसंबोधनं मननप्रवणताविधानार्थं ॥ ९९ ॥ मरणांयदि चेतन्यनिर्दं तिर्यदिवानिःस्वरूपतापत्तिस्तद्भयमपि मनस्यस्तीति निरुद्धं तं मौर्ख्यचक्रिकाचक्रवत्सरिवर्तमानं मौर्ख्यं परंपरा ॥ १०० ॥ आत्मस्वरूपं आकृतिरवयवसंस्थानं जातिवासामग्रंशस्त्रास्त्रदेहहस्तपादादियुद्धसामग्री तेन हीनेन दलितमस्तकं तदिति शेषः ॥ १-१ ॥ १-३ ॥ तेनअविद्यमानेन मनसा विद्यमानः शूरः शत्रुंजयः सर्वसा

असम्यग्ज्ञानसंभृता कल्पना मृगतृष्णिका ॥ हन्मरणेन वसं शांता सम्यग्लोकनान्मुने ॥ ९९ ॥ जडतान्निःस्वरूपत्वात्सर्व
देवमृतं मनः ॥ मृतेन मार्यते लोकश्चित्रेयं मौर्ख्यचक्रिका ॥ १०० ॥ यस्य नात्मा न देहो स्ति नाधारो नापि चाकृतिः ॥ तेनेदं भक्षि
तं सर्वं चित्रेयं मौर्ख्यवागुरा ॥ १-१ ॥ सर्वसामग्र्यहीनेन हन्यते मनसापि यः ॥ नीलोत्पलदलाघातैर्मन्ये दलितमस्त
कं ॥ १-२ ॥ जडेनमूकेनांधेन निहतो मनसापि यः ॥ मन्ये सदह्यते मूढः स्वर्णचंद्रमरीचिभिः ॥ १-३ ॥ विद्यमानोपि यः शूरो
लोकस्तेनाभिभूयते ॥ अविद्यमानमेवेदं हन्यते मुग्धतोदिता ॥ १-४ ॥ मिथ्यासंकल्पकलितं मिथ्यावस्थितिमागतं ॥ अन्वि
ष्टमपिनो दृष्टं कातस्य किल शक्तता ॥ १-५ ॥ अहो नु खलु चित्रेयं माया मयविधायिनी चेतसा पातितो लेन लोकोयम
भिभूयते ॥ १-६ ॥

मग्रीसंपन्नोपि लोको मूढजनः अभिभूयते विवेकिभिश्च वैराग्यादिभिर्महाप्रयत्नसंपाद्यैः साधनैर्महता योगध्यानस[राम॰]
माध्यभ्याससाक्षात्कारोपायेन अविद्यमानमेव हन्यत इति इयं सर्वा विकल्पना मुग्धतैव उदिता न पारमार्थिकीत्यर्थः ॥ नआवाद्रुःस्वामिनः सम सरमिति नि [॥३५॥]
रविदमिति समतरमिति चेह सहजसांद्रसुखेकेवकैवल्यविहृगनेमयिके यमहो विफलबहुविधकल्पलतेति ॥ १-४ ॥ शक्तता अभिभावितुमिति शेषः ॥ १-५ ॥
महामायाविलेन प्रसिद्धस्य भयस्यापि विधायिनी निर्मात्री ॥ १-६ ॥

॥ ॥

यदा मौर्ख्यं तदा सत्पुरुषः सर्वेणाप्यापदा अन्विष्टः परिमृग्य आश्रितः नाच विप्रतिपत्तिः द्वियस्माद जानतो मूर्खस्य का आपत् नास्ति सर्वा पि स्वेवेत्यर्थः ॥ न विद्यते
ज्ञानं यस्य सः अज्ञानः स्वरोत्मा तेन मौर्ख्यात् दुष्कर्मादिदूराद् इयं सर्वापत्तिधिभूतामृष्टिः ॥ १-७ ॥ इयं सृष्टिर्मनो देहादि दुर्बुद्धेः निमित्तात्मौर्ख्यस्य वशंगता
मौर्ख्येण पीड्यमानापि स्रतेन प्रसिद्धेन जीवेनाप्य सताअसन्मार्गानुवर्तिनेनैवोत्तरोत्तर दुःखाय उपपाद्यते तथा चांधस्येव जडस्य मनआदेः स्वाभाविकमौ
र्ख्यात्पीडितस्य पुनस्तद्दुःखाभिज्ञेन जीवेनापि पीडनेकष्टात्कष्टतरं अनुचितमित्यर्थः ॥ १-८ ॥ अत्यंतपेलवा अविचारमात्रसिद्धत्वाद्विचारमात्रेण बा
धितुं शक्यतियावत् तत्रतीदृशान्निकारमात्रनिरस्यान्दृष्टांतानाह ॥ वारिस्यादिना ॥ यथा वाः वारि स्वकल्पितेन तरंगप्रवाहेण विघ्नमाणं करणशः परिशी

मौर्ख्यं यदा ऽपदान्विष्टः का हि नापद जानतः ॥ पश्य मौर्ख्यादियं सृष्टिरज्ञानेनैव जन्यते ॥ १-७ ॥ हा कष्टमपि दुर्बुद्धेः सृष्टिर्मौ
र्ख्ये वशंगता असतैव यदैतेन जीवेनाप्युपपाद्यते ॥ १-८ ॥ मन्ये मौर्ख्यमयी सृष्टिरत्यंतपेलवा ॥ वास्तरंगप्रवाहेण करा
शः परिशीर्यते ॥ १-९ ॥ नीलांजनालवालेन यंत्रेणेव विहृ एर्यते ॥ इंद्दोराभोगस्वर्णस्यकरस्पर्शेन मुह्यति ॥ ११० ॥ रिपुभिर्नयनो
न्मुक्तैर्दृष्टस्त्रैर्निबध्यते ॥ संकल्पकृतया शूरसेनया परिभूयते ॥ १११ ॥ [य]

र्यते इति भ्रांतिवदित्यर्थः ॥ जदेववारियत्रावर्तस्तत्र नीलांजनवर्णेन आलवालेन मध्यच्छिद्रवता पेषणयंत्रेणेव विस्रर्यते तदेव वारिस्तरकं पते तत्र आभोगेन
मंडलेन स्वर्णसंदोः करस्पर्शेन मुह्यति उन्मादपरवशतां गच्छतीति च भ्रांतिर्यथा तद्वदित्यर्थः ॥ १-९ ॥ रिपुभिर्दृष्टः दृष्टमात्रः पुरुषः नयनोन्मुक्तैर्नेत्रसृ
ष्टैः स्त्रैर्बध्यत इत्यादि भ्रांतिवदित्यर्थः ॥ अथवा मन्ये इत्यादि असत्ता मृगतृष्णावास्तरंगप्रवाहादिनापीयं सृष्टिर्विनाशयितुं शक्यते किं पुनः शास्त्रीयो
पायेनेति इत्येवं योज्यं ॥ १११ ॥

वा॰टी॰ उप॰ १३

तस्मादतिपेलवत्वात् इयंसर्वलोकमयीसृष्टिःनिहन्यतइतिपरेणसहान्वयः ११२ तस्मान्मनोवशीकरणाशक्तोनाध्यात्मशास्त्राधिकारीत्याहमनएवेति ११३
कुतोनोपदिश्यतेतत्राहअभिजातेति यतस्तस्यैषाप्रज्ञाअभितोजाताअभिजातावाह्यज्ञानाविषयेष्वेवनिरूढातावतैवपरिश्रमेणैवसंस्थितानमनोनिग्रहेयुक्ताअ
स्वरूपानविद्यते आंतरंस्वरूपंयस्यास्तथाविधाप्रत्यक्प्रवणानभवतीत्यर्थः अतएवक्षोदेषुसूक्ष्मार्थविचारेषुनक्षमा ११४ अतएवधैर्यहेत्वभावात्सर्वतो
बिभेतीत्याहबिभेतीति ११५ असतोपिशत्रुजनात्मातारकादिभिरायातस्तेशत्रुजनइत्युद्वेगीताडितासतीपलायतेकिंबहुनास्वेनस्वीयेनैवमनसापिविवशी
कृत्वभीषिताकिमन्येनेत्यर्थः ११६ इदानींसादुष्प्रज्ञाबिभेतुनामतथापिनतदूशेनदुरुषस्यव्यामोहोयुक्तइतिप्राक्प्रस्तुतमेवोपसंहरति सुखेति यतः

तस्मात्क्लिष्टेयंमनसानस्थितैनैवकुत्रचित् कल्पितेनमुधान्येनरूपरोणनिहन्यते ११२ सर्वलोकमयीसृष्टिर्मनएवासदुस्थितं
यःशक्तोनवशीकर्तुंनासौरामोपदिश्यते ११३ अभिजातास्वरूपेषाप्रज्ञाक्षोदेषुनक्षमा नोपदेशगिरोयोग्यापरिश्रमेणैवसंस्थिता
११४ बिभेत्येषापिवीणायास्तंत्रीगुणतनुध्वनेः बंधोरपिमनिहस्यबिभेतिश्वनद्युतेः ११५ असतोपिजनादुद्वेगीताडितापला
यते स्वेनैवमनसाप्यज्ञाक्लिष्टेषाविवशीकृता ११६ सुखलवविवशाद्विषैवतसाहृदयगतेननिजेनचेतसैव विधुरितधिषणानवेत्ति
सत्यंतदपिकथंपरिमोहितोमुधैव ११७ मोक्षोपायेषूपशमप्रकरणेमनोनिवारणंसर्गः १३

साप्रज्ञाविषसंपृक्तमोदकास्वादसुखलवप्रायेणविषयसुखलवेनमरणोन्मुखीविवशाद्विषेवप्रहरताहृदयगतेनस्वेनसैवचेतसासंतापिताविधुरिता
श्च्याधिषणाविवेकबुद्धिर्यस्यास्तथाविधासत्यंतत्सुतरांनवेत्तितथाप्यतेयाषुरुषोमुधैवपरिमोहितःस्वस्थचित्तात्स्वजनात्संतसाद्विवेकबुद्धिम
तःसत्वरहस्यवेदिनःशत्रोःसकाशान्मोहोयुक्तोनतुतद्विपरीतायादुष्प्रज्ञायाःसकाशादितिभावः ११७ इतिश्रीवसिष्ठतात्पर्यप्रकाशेउपशमप्र
करणेत्रयोदशःसर्गः १३ उप॰ ३९

Dr BHAU DAJI

उपेक्ष्यानुपदेश्यैर्होन्त्वानायोनिजदुःखितःमनोनिर्माजनेनोपायस्तदर्हेभ्योत्रवर्ण्यते तत्रादौमनएवासदुःस्थितंयःशक्तोनवशीकर्तुंनासौरामोपदिश्यते
इतिप्राक्प्रस्तुतानुपदेशानधिकारिजनानेवोपेक्षणीयतयावर्णयतिसंसारेत्यादिना संसारसागरस्यअसारकल्लोलस्तैर्विषयसुखाभिलाषैरू
ह्यमानयानिरंतरंप्रवर्त्स्यमानयायस्याजनतयामनोनिग्रहविवेकवैराग्यादिविषये अपेक्षाभावाद्दुःप्राप्यापिप्रश्नप्रार्थनाद्यकारणात्मतेर्स्तक
त्वमेवाश्रितंसाजनतामयाआत्मलाभोपायप्रचुरोत्कृष्टकलाशालिभिर्विचारोक्तिभिः इहजगत्यस्मिन्शास्त्रेणोपदिश्यतेइतिद्वयोरन्वयः

श्रीवसिष्ठउवाच संसारसागरासारकल्लोलैरूह्यमानया मतेर्मौनदस्तकत्वंययाजनतयार्जितं १ आत्मलाभम
योदारकलाभिरिहसामया विचारोक्तिभिरेताभिःशास्त्रेस्मिन्नोपदिश्यते २ नपश्यत्येवयोत्यर्थंतस्यकःख
लुदुर्मतिः विचित्रमंजरीचित्रंसंदर्शयतिकाननं ३ कःकुष्टघर्घरघ्राणंनानामोदविचारणे सर्वमास्योपदेशेन
प्रमाणीकुरुतेमतिः ४ विपर्यस्तेंद्रियंमत्तंमदिराघूर्णितेक्षणं धर्मनिर्णयसाक्षित्वेकःप्रमाणीकरोत्यधीः ५
कःशवंवाश्मशानस्थंसमवायकथाशतं परिपृच्छतिसंदेहेकश्चसर्वंप्रशास्तिच ६ येनाशयबिलस्थोपिसत्कोंधो
पिननिर्जितः मनोव्यालःसदुर्बुद्धिःकथंनामोपदिश्यते ७

१,२ यः अंधइस्येववक्रत्येनित्यन्तपश्यतीत्युक्तिश्लक्ष्णानपियः दूरदृष्टहृष्यादिनानपश्यतितत्सदर्शनमनुचितमितिसूचनार्थं ३ कु
ष्टरोगविशीर्णघर्घरस्वननादिघ्राणंयस्यतंपुरुषंकः अमतिर्निर्बुद्धिर्नानामोदानांविचारणेपरीक्षणेप्रमाणीकुरुतेआमोदतत्वनिर्णेतृत्वेनाश्र
यतीत्यर्थः ४ ५ समवायजनसमूहस्तत्रत्यंकथाशतं ६ आशेतेअस्मिन्निति आशयोहृदयंतद्बिलस्थः ७

तर्हि किं विवेकिनोपि मनोजयोऽशक्यः नेत्याह जितमेवेति निकटात्सन्निधेः आस्तां दूरनिरस्तैव ॥ ८ ॥ अग्रस्तविषेणेति सर्पदंशाद्यभावस्योपलक्षणं ॥ ९ ॥ वस्तुतो यन्न विद्यत इत्येतदुपपादयति ज्ञ इति किं अर्थप्रथार्थं मनः उत स्वदार्थं उत ज्ञानकर्मेन्द्रियप्रयोजनसिद्ध्यै तत्र आद्यमपि प्राणप्रेरितैरिन्द्रियैरुपनीतानामर्थानां साक्षिणैव प्रथासंभवान्न मनसः कृत्यमस्तीति भावः ॥ १० ॥ ननु सर्वशक्तिभिर्निबद्धं मनः किं न स्यादिति चेत्तद्वेनमुक्तिर्विवेके घटते वीणामधुरध्वनिवत्समाजेनापि समुदितव्यवहारसिद्धेरित्याशयेनाह प्राणानामिति ॥ तथा च यथा तैर्थिकसमाजस्तान

जितमेव मनो विद्धि वस्तुतो यन्न विद्यते ॥ निकटात्तस्माद्विरसेव यथा शिला नैव विद्यते ॥ ८ ॥ मनो न विजितं राम येनासदपि दुर्धिया ॥ तेनाग्रस्तविषेणैव म्रियते विषमूर्छया ॥ ९ ॥ ज्ञः पश्यति सदैवात्मा स्पंदने प्राणशक्तयः ॥ इंद्रियाणि स्वधर्मेषु मनो राम किमुच्यते ॥ १० ॥ प्राणानां स्पंदनी शक्तिर्ज्ञानशक्तिः परात्मनः ॥ इंद्रियाणां निजा शक्तिरेकः कोत्र निबध्यते ॥ ११ ॥ सर्वास्ता अंशवस्तस्य सर्वशक्तेः किलात्मनः ॥ पृथक्का वाच्यतां चेयं कुतो नाम मनोस्थिता ॥ १२ ॥

दानगानस्तवनादिव्यवहारेण सर्वशक्तिमदेकः प्रयुक्तस्तद्वदयमपीत्यर्थः ॥ ११ ॥ यदि किञ्चित्त्रयात्संघातस्य संहत्यपरार्थत्वनियमादन्योपि कश्चिदपेक्षित इति तर्हि अस्यापि संघातस्य जगत्संघातांतःपातात्सर्वेषां सर्वाः व्यवहारशक्तयः सर्वनिर्माणतुरीश्वरस्यात्मन एवांशवः इति तादर्थ्यमेवास्यापि सिद्धं न्याचेतनमनोधर्मत्वमिति न प्रतिशरीरभिन्नाचेतनमनः सिद्धिरित्याशयेनाह सर्वा इति वाच्यता मन आदिशब्दवाच्यता ॥ १२ ॥ 

तर्ह्युक्तजीवश्चेतनोस्याधिष्ठाता स्वचनविन्नास्य मनःप्रग्रहेण विना इंद्रियाण्यान्यधिष्ठातुं शक्नोतीति चित्तमपि सिद्धमेवेति चेत्तत्राह किं नामेति जीव इति चित्तमेवेति यत्त्वयोक्तं तदुभयं किं नाम किं आत्मातिरिक्तं चेतनांतरं उतात्मचेतनेनान्यत् नान्योतोस्ति द्रष्टा नान्योतोस्ति श्रोतेति श्रुत्यात्मातिरिक्तचेतनांतरस्य प्रतिषेधात् ॥ द्वितीये त्वाह क्वात्तस्य शक्ततेति ॥ अचेतनस्य चेतनार्थत्वावश्यकतया इंद्रियेभ्यो विशेषाभावात्तदधिष्ठानशक्त्यभावात् ॥ अतस्त्वं तदुभयमसदेव विद्धीत्यर्थः ॥ १३ ॥ सकल्पितेन मनसा निर्दग्धा परमार्थदृष्टिर्येषां ॥ तद्दुःखनिवारणोपायस्यान्वेषणे दर्शकोटिभिरप्यलाभान्मुग्धा व्यामोहमिता

किं नाम जीव इत्युक्तं येनेहाधीकृतं जगत् ॥ चित्तं चैवामरेवत्वं विद्धि कात्स्य शक्तता ॥ १३ ॥ मनोनिर्दग्धदृष्टीनां दृष्ट्वा दुःखपरंपरां ॥ मतिर्मे करुणाक्रांता राम मुग्धैव तप्यते ॥ १४ ॥ कः किलात्र कुतः खेदो यन्मर्त्यः परितप्यते ॥ दुःखायैव हि जायंते करभाः प्राकृतास्तथा ॥ १५ ॥ विनाशायैव जायंते जडा देहेषु बुद्बुदाः ॥ अनारतोदयाः पापा बुद्बुदा जलधेरिव ॥ १६ ॥ कियंतः पश्य पशवः प्रत्यहं प्रतिमंडलं ॥ खनावड्डिर्निहन्यंते कैवात्र परिदेवना ॥ १७ ॥

प्यन्ता ॥ १४ ॥ सनिमित्तकं हि दुःखं निमित्तनिवारणेन वारयितुं शक्यं मर्त्यानां तु निर्निमित्तमेव दुःखमतो दुर्वारमित्याशयेनाह कः किलेति करभा गर्दभाः प्राकृता मूर्खाश्च अतः शोच्या स्वत्वर्थः अथवा नैते शोच्याः ईदृशां मूढया नां नामसंख्यातानां दर्शनेनैव तद्दुःखे वोपेक्षार्हत्वादित्याशयेनोक्तिः ॥ १५ ॥ उक्तार्थविवरणाय नानायोनिभेद दुःखिनो दाहनं पीडिकां रचयति विनाशायैवेति पापाः यतः पापकारिण इत्यर्थः ॥ १६ ॥ अज्ञानां योनिभेदेषु दुःखवैचित्र्याणि वैराग्यवर्द्धाय्योदाहरति कियंत इत्यादिना प्रतिमंडलं प्रतिदेशं खनावङ्ख हिंसास्थानं तद्वद्भिस्तदधिष्ठितैः पुरुषैः ॥ १७ ॥

क्षमा जातेषु स्वल्पद्रवजंतुषु मध्ये अनिलः दंशानां मशकानां च अर्बुदान्यसंख्यातानि हंति ॥१८॥ दिशं प्रति प्रति दिशं वीप्सायां द्विर्वचनस्याव्ययीभावात्
समासमर्थ्याद्धि कल्पितत्वे पदान्यतरस्यावश्यकत्वाद् इत्याभावश्चोरसः ॥१९॥ इदानीं दुर्बलानां प्रबलैः पीडनं परंपरयोपपादयति लिक्षेत्यादिना॥ अणुकण
वत् रक्षां मांसं लिक्षां वस्त्रयूकां मक्षिका क्षुधानुभुक्षया खादति कोशकारः ऊर्णनाभिः कीटविशेषो वा दंशो वनमक्षिका ॥२१॥ दर्दुरो भेकः खगो गरुडादिः

अर्बुदान्यनिलो हंति क्षमाजातेषु चाल्पहा। दंशानां मशकानां च के वात्र परिदेवना ॥१८॥ दिशं प्रति गिरीशेषु लिंघाघ्राणे
वने। निघ्नंति मृगलक्षाणि के वात्र परिदेवना ॥१९॥ जले जलचरव्यूहान्रक्षान्स्थूलो निकृंतति। ग्रामार्थं निर्दयो मत्स्यः
के वात्र परिदेवना ॥२०॥ लिक्षामणुकणाक्षां मांसं क्षुधा खादति मक्षिका। तां कोशकारः क्षुधितो दंशस्तमपि चंचलः ॥२१॥ तं दंशं
दर्दुरो भुंक्ते व्यालस्तमपि दर्दुरं। सर्पमुग्रं खगो हंति बभ्रुश्चैनं निकृंतति ॥२२॥ बभ्रुं हिनस्ति मार्जारो मार्जारं श्वा निकृंतति
रक्षः कौलेयकं हंति रिंछं व्याघ्रो निकृंतति ॥२३॥ सिंहोभिभवति व्याघ्रं शरभः सिंहमत्ति च। शरभो नाशमायाति मत्तमेघ
विलंघने ॥२४॥ मेघा वातैर्विधूयंते वायवो गिरिभिर्जिताः। गिरयो वज्रनिष्पिष्टाः शक्रस्य वशगः पविः ॥२५॥

बभ्रुर्नकुलः श्वेनं सर्पं ॥२२॥ रक्षो भद्रकः रिंछ इति पाठे श्वापदविशेषः ॥२३॥ मत्तस्य गर्जतो मेघस्य विलंघने स्वोपरिभागगमने प्रसक्ते तत्सहनेनोत्पत्य 
शिलातले निपातान्नाशमायातीति प्रसिद्धमित्यर्थः ॥२४॥ वज्रेण निष्पिष्टाः खंडिताः पविर्वज्रोपि शक्रस्य वशगः शक्रेण बलाद्वशीकृत इति यावत्
॥२५॥

क्रियते वशइत्यनुवर्तते। जंतुतां मत्स्यकूर्मवराहादितिर्यग्जंतुत्वतारान्। अनेन च जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति संकल्प्य जीवात्म
नाविष्णोरेव प्रवेशात् जीवभावेन सर्वजंतुशरीरितात्सर्वजंत्वात्मकता पा॥ अत एव विशिनष्टि सुखदुःखेति॥ जरामरणाभ्यां स्वभोग्यमन्नामि
व यावदायुःपालितां ॥२६॥ लिक्षाग्रहणं मशकमत्कुणमक्षिकाकृष्यादाद्युपलक्षणं। उपजीव्यंते भक्ष्यंते ॥२७॥ आधिभौतिकैरात्म
नं आध्यात्मिकैराधिदैविकैश्च दुःखैर्विशीर्णं भ्रतजंगलं प्राणिवृंदं अद्यते भक्ष्यते उत्तरकाले भक्षणाय इदानीं रक्ष्यते। अपि शब्दार्थं

विष्णुना क्रियते शक्रो विष्णुर्गच्छति जंतुतां। सुखदुःखदशामेतां जरामरणपालितां ॥२६॥ जंतवोपि महाकाया
अपि विद्याक्षुधान्विताः। लिक्षाभिरंगलग्नाभिरुपजीव्यंत एव हि ॥२७॥ अजस्रमेवमालूनविशीर्णं भ्रतजंगले
परस्परमलं मोहादद्यते रक्ष्यते पि च ॥२८॥ अनारतं विनश्यंति विविधा भूतजातयः। अनारतं च जायंते लिक्षायूकापि
पीलिकाः ॥२९॥ जलकोशेषु जायंते मत्स्येभमकरादयः। भ्रमावर्तः प्रजायंते कीटा घाटश्चिकादयः ॥३०॥

भक्षयित्वाहं रक्ष्यते च ॥२८॥ अनारतं संततं यूकाः शिरोरुहजाः लिक्षा यूकापिपीलिका इति क्षुद्रजंतवः इत्येकवद्भावाकरणं छांदसं न च सर्वो द्वंद्वो
विभाषैकवद्भवतीति तिष्यपुनर्वस्वोर्नक्षत्रद्वंद्वे बहुवचनस्य द्विवचनं नित्यमित्यत्र बहुवचनग्रहणेन ज्ञापनात् सिद्धमिति युक्तं ज्ञापकस्य सजाती
यापेक्षत्वेन तस्याप्राप्तविभाषात्वादन्यथा प्राणितूर्यांगद्वंद्वेपि विभाषापत्तेरिति ॥२९॥ बाधकपरंपरां समाप्य प्रकृतमनुवर्तते जलकोशे
षु जलाशयेषु। इभा इभाकारा जलजंतुविशेषाः ॥३०॥

आकाशविहगाः स्फुरत्पक्षिविशेषास्ते हि सदा भ्रमंतोंऽतरिक्ष एव प्रसूयंते प्रसूतं चांडमधःपातादागेव भित्त्वा निर्गताः शावकाः सद्यः संजातपक्षा
अंतरिक्ष एवोत्पत्य भ्रमंतीति लोकप्रवादे प्रसिद्धं आदिपदात्तिशावभरतवेतालादयो ग्राह्याः ३१ प्रारण्यंगेषु कृमिपरकादयः ककुभं प्रति
प्रतिदिशं घुणाः काष्ठकृमयः जघनकाः भ्रमरिकाकाराः काष्ठकीटाः आदिपदात्तन्त्रफलपुष्पाद्युद्भवाः कृमिमशकभेदा गृह्यंते ३२ ३३

अंतरिक्षेपि जायंते आकाशविहगादयः ॥ वनवीथिषु जायंते सिंहव्याघ्रमृगादयः ॥ ३१ ॥ प्रारण्यंगेष्वपि जायंते विचित्राः
ककुभं प्रति ॥ स्थावरेष्वपि जायंते घुणा जघनकादयः ॥ ३२ ॥ शिलांतरेषु जायंते कीटभेकघुणादयः ॥ विष्टायामपि जायं
ते नानाकीटगणास्तथा ॥ ३३ ॥ एवमेतेष्वसंख्येषु जन्मसु पचयेषु च ॥ अजस्रं करुणावंतो नंदंतु प्ररुदंतु वा ॥ ३४ ॥ अना
रतमतावस्मिन्ननारतसमुद्भवे ॥ संसारसंभ्रमे युक्तानतुष्टिर्न च दुःखिता ॥ ३५ ॥ पंक्तयस्त्वेवमेवेमा वृक्षपर्णगणैः समाः
उत्पत्योत्पत्य लीयंते भूतानां परिसंभवाः ॥ ३६ ॥ यः प्रवृत्तः कुबुद्धीनां दयावान्दुःखमार्जने ॥ खगतच्छत्रनिर्मृष्टम्
यांशु खिद्यते न सः ॥ ३७ ॥ न तिर्यक्समधर्माणामुपदेश्या नरा भुवि ॥ कथार्थकथनेनार्थः कः स्थाणुनिकटे वने ॥ ३८

उपसंहृत्य प्रस्तुते योजयति एवमिति नंदंतु प्ररुदंतु वेति द्वेषाभावात्परपीडाभिनंदनमिव स्नेहाभावाद्रोदनमप्यनुचितमित्युपेक्षैव युक्ते
तिभावः ३४ उक्तमेव स्पष्टमाह अनारतेति भूतानां पंक्तयः समूहाः एवमेव दृश्यैवेत्यर्थः ३५ ३६ यः दयावान्सन्कुबुद्धीनां दुःखमा
र्जने प्रवृत्तः सः नभः कृत्स्नमाकाशं खगतेन छत्रेण निर्मृष्टं परांशुनिवारितातपं कर्तुं खिद्यते श्राम्यतीत्यर्थः खिद्यते न सः इति पाठे
तु किं न खिद्यते इति काका योज्यं ३७ ३८



स्फारमनसां विषयविस्तारितमनसां विशेषणं विशेषः ३९ उपलाः पाषाणा अपि प्ररुदंति किं पुनः सचेतना इत्यतिशयोक्तिः ४० समंतात्सर्वदेशेषु सर्वदा च दुः
खदाः दशाः दुर्गाः संतीति शेषः अतः कृत्स्नभूमिपांसुसंमार्जनवद्दशानां त्वान्न संप्रतिपद्यत इत्यर्थः ४१ सुविचार्याणि रत्नयोर्भेदात्तु विचाल्यानि सु
खनिरस्यानीत्यर्थः तेन हेतुना अयतन्मार्जने ज्ञातज्ञेय स्त्वं सुखित ४२ प्रासंगिकामधिकारिचिंतां समाप्य प्रस्तुतमेवानुवर्तमान आह मन इति ४३

किं किल स्फारमनसां पशूनां च विशेषणं ॥ क्रंदंते पशवो रत्नामनसा मूढचेतसः ॥ ३९ ॥ स्वचित्तपंकमग्नानां स्वनाशारब्धकर्मणां ॥ मर्त्या
नामापदं दृष्ट्वा प्ररुदंत्युपला अपि ॥ ४० ॥ अनिर्जितात्मचित्तानां समंताद्दुःखदा दशाः ॥ तन्मार्जनं कृतप्रज्ञो नातः संप्रतिपद्यते
४१ विनिर्जितात्मचित्तानां दुःखानि रघुनंदन ॥ सुविचार्याणि तेनात्र ज्ञातज्ञेयः प्रवर्ततां ॥ ४२ ॥ मनो नास्ति महाबाहो मा मुधा परिक
ल्पय ॥ अनेन कल्पितेन त्वं वेतालेनेव हन्यसे ॥ ४३ ॥ यावद्धि स्मृतवानात्मतत्त्वं मूढो भवद्भवान् ॥ तावत्तवमनोव्यालो बभूवाभ्युदि
तस्ततः ॥ ४४ ॥ इदानीं भवता ज्ञातं यथाभूतमरिंदम ॥ संकल्पाहृदं ते चित्तं तदेवाशु परित्यज ॥ ४५ ॥ दृश्यमाश्रयसीदं चेत्तत्सचित्तोसि बं
धवान् ॥ दृश्यं संत्यजसीदं चेत्तदचित्तोसि मोक्षवान् ॥ ४६ ॥ अयं गुणसमाहारो बंधायैव समाश्रितः ॥ संत्यक्तो भवमोक्षाय यद्गमे घति
तथा कुरु ॥ ४७

यस्मान्नास्ति तर्हि प्रतियोग्यप्रसिद्धौ निषेधानवकाशमाशंक्याह यावदिति तथा च प्राक्तनी मूढावस्था मा दाय प्रसिद्धिरु
पपन्नेत्यर्थः ४४ यथाभूतं परमार्थात्मरूपं ४५ बंधमोक्षरहस्यमाह दृश्यमिति ४६ किं तर्हि दृश्यतत्त्वं तदाह अयमिति त्रिगुणात्मकमाया
मय इत्यर्थः ४७

अहमित्यंतरं दृश्यमितिबाह्यं चनास्त्येवेति ध्यायन्॥ अचलः पर्वत इवाचलः स्थिरः हृदयेश्वरः आत्मा॥४८॥ अहमिदमिति द्वित्वमयीं कलनां अलं
सर्वात्मना त्यक्त्वेत्यर्थः॥४९॥ ननु तदुभयकलनात्यागे किमिव शिष्यते यत्र स्थितिरुपदिश्यते तत्राह आत्मन इति द्रष्टृदृश्यदशयोरंतरे अंतराले इत्ये
तावत्युक्ते हि तज्ज्ञानस्याप्यांतरालिकत्वात् ग्रहणं स्यात्तन्मा भूदिति आत्मनो जगतश्चांतरिति॥ तथा च त्रिपुट्यनुस्यूतसन्मात्ररूपे दर्शनाख्ये त्रिपुटीसा
क्षिसमावे स्थितं स्वं आत्मानं भावयन्भव आस्वा सुषुप्त्रिपुटी वन्मनारि त्रिपुटीष्वपि सम एव तत्साक्षी परिच्छेय इत्याशयेनाह स्वाद्येति॥ द्वर्वेद्यो जना॥५१॥

नाहं नेदमिति ध्यायंस्तिष्ठत्वमचलाचलः॥ अनंताकाशसंकाशहृदयो हृदयेश्वरः॥४८॥ आत्मनो जगतश्चास्य त्वमंगकलना
मलं॥ राम द्वित्वमयीं त्यक्त्वाशेषस्थः सुस्थिरो भव॥४९॥ आत्मनो जगतश्चांतर्द्रष्टृदृश्यदशांतरे॥ दर्शनाख्यं स्वमात्मानं सर्वदा
भावयन्भव॥५०॥ स्वाद्यस्वादकसंत्यक्तं स्वाद्यस्वादकमध्यगं॥ स्वादनं केवलं ध्यायन्नित्यमात्ममयो भव॥५१॥ रामानुभवनीयस्य त
थानुभवितुः स्वयं॥ अवलंब्य निरालंबं मध्यं मध्ये स्थिरो भव॥५२॥ भव भावनया हीनं भावाभावदृशोज्झितं॥ भावयन्नेवमात्मा
नमात्मसंस्थः स्वयं भव॥५३॥ आत्मसत्तां त्यजन्नेतां चेत्यं भावयसि स्वयं॥ यदा राम तदा यासि चिन्नतामति दुःखदां॥५४॥

अनुमित्याद्यनुभावांतरेष्वप्येवं बोध्यमित्याशयेनाह रामेति॥ निरालंबं आलंबो विषयस्तत्त्रिपुट्यंशस्तद्व्यतिरिक्तं मध्यं तदांतरं हृद्यस्य मध्ये अवलं
ब्य स्थिरो भवेत्यर्थः॥५२॥ भवस्य भावनासंस्कारवशाद्दर्शनं स्वप्नदशेति यावत्॥ भावदशा जाग्रत् अभावदशा सुषुप्तिः भावाभावदृशोज्झितमिति
पाठे तदुभयदर्शनोज्झितमित्यर्थः॥५३॥ एतां शुद्धचिन्मात्रस्वभावामात्मसत्तां प्रमादात्त्यजन्यदा चेत्यं तद्व्यतिरिक्तं भावयसि तदा चिन्नतां यासीत्यन्वयः॥५४॥



स्वरूपज्ञानयुक्तितः अंशेनेति शेषः॥ चित्ताच्चित्तलक्षणाद्धिलात्संजराद्॥ बलादिति पाठे तु मननादिकृतज्ञानराढ्यद्बलात्॥५५॥ संपश्यसे पश्यसि
परव्यत्ययश्छांदसः॥५६॥ कथं चेत्यपरिपतनं तेन च कथं संकल्पगमनं कथं वा तत्त्यागस्तत्राह आत्मन इति॥ हे अंग यदा चित्तेश्वर्यानुभवजनि
तदृश्यसंस्कारोद्बोधे सति विरेचकिंचित्त्वोत्स्यमिवापन्नं चित्तमिति संविदा आत्मनो व्यतिरिक्तं सत्तं सिद्धं भवति तदेव पुनःपुनर्मननात् दृढीभूतं सं

चित्ततां श्रेंखलामेतां स्वरूपज्ञानयुक्तितः॥ बलाच्चित्तान्महाबाहो स्वात्मसिंह विमोचय॥५५॥ परमात्मदशां त्यक्त्वा
चेत्ये परिपतन्नलं॥ यदा गच्छसि संकल्पं चेत्यं संपश्यसे तदा॥५६॥ आत्मनो व्यतिरिक्तं सच्चित्तमित्यंग संविदा॥ मनः सं
विदा॥ मनः संपद्यते दुःखि क्षीयते त्यक्तयातया॥५७॥ आत्मैवेदं जगत्सर्वमित्यंतः संविदोदये॥ क्व चेत्ता क्व च क्व चित्तं किं
चेत्यं चेतनं च किं॥५८॥ अहमात्मेति जीवोस्मीत्येतावच्चित्तकं विदुः॥ अनेनेत्थमनाद्यंते दुःखराघव तन्यते॥५९॥
अहमात्मा न जीवाख्याः सत्ताः संतीतराः क्वचित्॥ इत्येव चित्तोपशमः परमं सुखमुच्यते॥६०॥

कल्पसमर्थं सत्तन्मनः संपद्यते तदेव दुःखितयास्य व्यतिरिक्तसत्तासंविदा त्यक्तया तु क्षीयते॥५७॥ एतदेव स्पष्टमाह आत्मैवेदमिति संविदेव संविदा भा
गुरिमते नरलं तादाश् तस्मात् उदिते सति चेत्तृ चितिता उपहिता श्चिन्मुपाधि च चेत्यं तद्वृत्तिव्याप्यं चेतनं तद्वृत्तिरिति॥ चतुष्कमपि किं न किंचिदवशिष्य
त इत्यर्थः॥५८॥ इति एवमनुभूयमाने देहेंद्रियादिशालो जीवोस्मि॥५९॥ आत्मा ब्रह्मैव न जीवाख्याः ब्रह्मेतराः सत्ताः परमार्थसत्यः संति ६०

वा॰टी॰उप॰ ॥४५॥

सर्वस्य जगतो ब्रह्मभावे तदंतर्गतचित्तस्यापि ... सत्ता अर्थात्संपन्ना भवत्येवेत्याह आत्मैवेदमिति ॥ ६१ ॥ मनोनाशोपायमुक्तमुपसंहरति एवमिति ॥ ६२ ॥
अथ तत्फलान्याह मनःसर्प इत्यादिना ॥ योगसमाधेः प्रतीचो ब्रह्मैक्यलक्षणमिलनाद्धा यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिलयनेऽभयं प्र
तिष्ठां विंदते अथ सोऽभयं गतो भवति ॥ आनंदं ब्रह्मणो विद्वान्न बिभेति कुतश्चनेत्यादिश्रुतेरिति भावः ॥ ६३ ॥ ६४ ॥ आधिग्रहणं सर्वदुःखोपल

वे आत्मैवेदं जगदिति ज्ञाते राघव निश्चये ॥ असत्ता चेतसो जाता भवत्येव न संशयः ॥ ६१ ॥ एवं सत्यावबोधेन सात्मैवेदमिति
स्थितिः ॥ मनः स्फुगलितं विद्धि सूर्यभासा तमो यथा ॥ ६२ ॥ मनःसर्पः शरीरस्थो यावत्तावन्महद्भयं ॥ तस्मिंस्तु सारिते यो
गाद्भयस्यावसरः कुतः ॥ ६३ ॥ भ्रांतिमात्रोत्थितश्चित्तवेतालोति बलोनघ ॥ सम्यग्ज्ञानेन मंत्रेण प्रसभं विनिपात्यतां
॥ ६४ ॥ देहगेहाद्गते चित्तयक्षे बलवतां वर ॥ निराधिर्विगतोद्वेगस्तिष्ठ नास्ति भयं तव ॥ ६५ ॥ नीराग एव निरुपार्जन एव चास्मि
स्थे तावतैव गलिता तव चित्तसत्ता ॥ निर्दुःखमुत्तमपदं परमं गतोसि तिष्ठोपशांतपरमेश्वर एव मंतः ॥ ६६ ॥ मोक्षोपाये उ
पशमप्रकरणे स्वचित्तनिरूपणं सर्गः ॥ १४ ॥

क्षणं ॥ उद्वेगो दुःखासहिष्णुतया व्याकुलता ॥ ६५ ॥ आत्मलाभेनावाप्तसर्वकामत्वान्नीरागः अत एव निरुपार्जनः बाह्यसुखसाधनोपार्ज
नशून्यः एवं च मुमुक्षापि न परिशिष्टेति न तदर्थमपि प्रवृत्तिप्रसक्तिरित्याशयेनाह उपशांतपरमेश्वर इति ॥ ६६ ॥ इति श्रीवासिष्ठतात्पर्यप्रका राम॰
शे उपशमप्रकरणे स्वचित्तनिरूपणं नाम चतुर्दशः सर्गः ॥ १४ ॥ ॥४४॥

---

आत्मा मनस्त्वमापन्नो बध्यते संसृतौ यथा सा तस्यानर्थबीजानां सविचित्रोपवर्ण्यते ॥ चित्तनाशेन परमपुरुषार्थप्राप्तिरुक्ता इदानीं चित्तानुसरणेन त
स्याविद्यया अनर्थपरंपराप्राप्तिरिति दर्शयितुं प्रक्रमिकां स्वयति सत्तामित्यादिना ॥ आत्मा एतां चित्तसत्तामनुसरन्नपत्यक्तस्वीय ब्रह्मात्मरूपा
भोऽप्यस्मा मलिनां अविद्यापिहितां इंद्रियदृष्ट्यधीनाभिव्यक्तिकां दर्शं ज्ञानं आपतन् चित्तमेवानुरुध्य चित्तकल्पितदेहादिसंघातमात्रोहमिति
संधत्ते चित्तोपनीतनानाविषयकलनाप्रयुक्तं रागद्वेषवासनामलमेव धत्ते इति द्वयोरन्वयः ॥ १ ॥ २ ॥ धत्तां नाम किं तत आह वर्द्धमानेति म

श्रीवसिष्ठ उवाच ॥ एतामनुसरन्नाम चित्तसत्तामपावनीं ॥ संसारबीजकणिकां वीजीवबंधनवागुरां ॥ १ ॥ आत्मा स्वक्तात्मरू
पाभोमलिनामापतद्दृशं ॥ चित्तं समनुसंधत्ते धत्ते च कलनामलं ॥ २ ॥ वर्द्धमानमहामोहदायिनीं भयकारिणीं ॥ जस्त्वा विष
लतारूपामस्मूर्छामेव प्रयच्छति ॥ ३ ॥ यदा यदोदेति तदा महामोहप्रदायिनी ॥ कृष्णा कृष्णानिशेवेयमनंतात्मवि
कारिणी ॥ ४ ॥ कल्पानलशिखादाहसोढुं शक्ता हरादयः ॥ तस्या नलशिखादाहं सोढुं शक्ता न केचन ॥ ५ ॥ तीक्ष्ण ६
कृष्णा सुदीर्घा च वहत्यंगं सदा निजं ॥ शीतलैवासुखोदर्का घोरा तस्मात्कृपाणिका ॥ ६ ॥

रणात्मूर्छां भ्रांतिमहत्वं हे तुत्वाद्विषलतारूपा तस्या अस्मै कलनमलधारिणे आत्मने मूर्च्छामेव प्रयच्छति न सुखलेशमपीत्यर्थः ३ वर्द्धमानमहा
मोहदायिनीत्येतद्विवृणोति यदेति. कृष्णा निशा वार्षिकतमिस्रा सापि हि अनंतात्मन्याकाशे मेघविस्फूर्जितदृष्ट्या घनेकविकारिणी ४ भय
कारिणीत्येतद्विवृणोति कल्पानलेति न केचन धीरा इति शेषः ५ कृपाणिका असिः तीक्ष्णोत्साद्यसिलोपपादनं निजं अंगं सदा वहंतीति कृं
तंतीतियावत अनुरवः उदर्कः फलकालोयस्याः ६



DR BHAU DAJI MEMORIAL

विषलतेत्येतद्दिशयति दुर्जराणि जरयितुमशक्यानि दुर्निवाराणीतियावत् ७ वनशुनीत्यकी ८ क्षणमुद्गमांसंहद्दिं विशेषणान्युभयत्रयो
ज्या निजडाशी तत्ला मलिना च विदलयति मलिना च शिलाकंटकारण्यादि प्रदेशे नीलाखंडयति प्रावृट्तरंगिणी वर्षाकालनदी ९ स्पर्शा
मेवप्रयच्छतीत्येतद्दिहरणीतिदृष्टेरन्यइति १० तस्याक्षये सर्वदुःखहानिः सर्वपुण्योदयश्च सिद्ध्यतीत्याह नास्मितेत्यादिना ११२ ३ अंधा

यान्येतानि दुरंतानि दुर्जराण्युन्नतानि च तस्या वल्याः फलानीह तानि दुःखानि राघव ७ अदृश्यैवातिमांसास्थिरु
धिरादिशरीरकान् मनो बिलविलीनैषा तस्या वनशुनी नृणां ८ क्षणमुद्गमायाति क्षणमायाति शून्यतां जडा
विदलयत्यासु तस्याप्रावृट्तरंगिणी ९ दृष्टैरन्योहतस्सांतो हंतोजायातिनीचतां मुह्यते रौति पतति तस्याप्यपि
हितो जनः १० नस्थिता कोटरे यस्य तस्याकृष्णभुजंगमी तस्य प्राणानिलाः स्वस्थाः पुंसो हृदयरंध्रगाः ११ न्यन
मस्तं गतोयत्र तस्याकृष्णनिशाक्रमः पुण्यानि तत्र वर्द्धंते शुक्लपक्ष इवेंदवः १२ यो न तस्याघृणावल्याश्छनः पु
रुषपादपः पुण्यप्रसूनैः सम्यग्दशां याति विकाशिनीं १३ अनंताकुलकल्लोलाविवर्तावर्तसंकुला प्रवहत्या
शयारण्ये तस्यां धानांनदीनृणां १४ तस्यामेमे जनाः सर्वे तृणवत्पतनिवत् भ्राम्यंति प्रतिशीर्यंते संह्रियंते च सर्वशः १५
नांविवेकदृष्टिहीनानां नृणां अद्यापश्चितं तस्वरूपरो अरण्ये अनंतव्याकुलता लक्षणाकल्लोलवती भ्रांतिलक्षणोरवर्तैश्च संकुलात् स्था
नदी नूनं प्रवहति १४ तृणेनाभ्रमते बध्यते इति तृणयंत्रः पतत्री पक्षी तद्वत् प्रथमं विलस्याजना यन्भ्राम्यंते नजः रक्षणव्ययेक्ष्य विता
शोकैः पक्षलुचनैरिव प्रविशीर्यंते अंते च संह्रियंते मार्यंते १५ 

धर्मज्ञानम्लानिदयाविवेकादीनि सूक्ष्माणि ईषदंकुरितान्यपि कठिनेन निर्दयेनाशयेन कर्कशा वल्लीति तत्कालं निपंति १६ अवटेन
रुकांधकूपे नीलां हरितां शष्पस्य कूपस्य मुखे रूढस्यातृणस्य शाखां अनुपतन्मृगकोहरिणइव १७ उन्मत्ता प्ररूढतामापि जराच
क्षुर्जरयत्यंधयति हृदयस्था रूपिका पिशाची १८ अमंगलम्रजया हरिरूढया कृतनीडया १९ देविकया देवनेश्वरेणप्रयुक्तया देवमो

म्लान्यपि सूक्ष्माणि कठिनाशयकर्कशा तस्या परशुधारेव वल्लीती विनिकृंतति १६ निपातत्यवटे मूढस्तस्या
मनुसरन् जनः नीलामनुपतं छ्रूर्त तृणशाखां यथैणकः १७ नोन्मत्तापि जराचक्षुस्तथा जरयति क्षणात् यथा
जरयति क्षामा तस्या हृदयरूपिका १८ तस्याप्याशयकौशिक्या हृद्यमंगलमूर्तया रूढया भगवानेष विष्णुर्वामनतां
गतः १९ कयाचिद्देव दैविक्या हृदि प्रथितयानया तस्या भ्राम्यते व्योम्नि रज्वेवार्कोन्वहं किल २० सर्वदुःखमया
कारां जगतीजीवनछिदं तस्याः परिहरेत् क्रूरा मृगीमिव हरगः २१ तस्यापावायवोवांति शैलास्तिष्ठंति तत्स्यया
तल्लभैवधाधात्री त्रैलोक्यं तत्स्याधृतं २२ सर्वलोकयात्रेयं प्राता तस्या वरत्रया रज्जुबंधाद्धि मुच्यंते तस्या
बंधान्न केचन २३ तस्माद्राघव तत्स्लोत्पज संकल्पवर्जनात् मनस्तकल्पनेनास्ति निर्णीतामिति युक्तितः २४
ग्यमूर्कन वविपयया वात्स्यया रज्वेव बद्ध इति शेषः २० जगतीपदेन जगतीस्थाः सर्वप्राणिनो लक्ष्यंते २१ सर्वसंसारस्थितिः तस्या वशी देवेत्याशयेना
हतत्स्यैति २२ वरत्रा चर्ममयी रज्जुः २३ संकल्पवर्जनमात्रेण कथं तस्याः त्यागसिद्धिस्तत्राह मनइति अकल्पनं संकल्परहितं मनो नास्ति मनसो
ऽभावे कुतस्तस्याः प्रसक्तिरिति भावः २४

त्वं अयं देहोहमिति दुराशां सर्वा दुराशानिमित्तमभिमानं मा संकल्पय ॥ २५ ॥ २६ ॥ अनहंभावलक्षणया शलाकया कर्तर्या अहंभावमयीमेतां तत्तदुराशां छित्वा हे भ
व्यभवस्यांतो बाधस्तद्रूपौ ब्रह्मणि स्वसम्यग्मिकामेदेवा भव आस्वेत्यर्थः ॥ २७ ॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे पंचत्रिंशः सर्गः ॥ ३५ ॥ वर्ण्यते वास
नात्यागो ध्येयज्ञेयविभागतः ते नाजीवन्मुक्तानां विदेहानां च लक्षणं ॥ जीवता देहे अहंभावस्य त्यक्तुमशक्यत्वाच्छिन्नमरणे गुरोस्तात्सर्वा योगादेतामहंभाव

अयं त्वमहमित्येव प्रथमं तावदाशये । मा दुराशां महाबाहो संकल्पय तमोमयीम् ॥ २५ ॥ एतां दुःखप्रसविनीमनात्मन्यात्मभावनां नैव भावयसि चेद्रामतरां तद्रूपगण्यते ॥ २६ ॥ एतामहंभावमयीमपुण्यां छित्वानहंभावशलाकयैव । स्वभावयुक्तां भयभवांतमस्मिन्भवाभिभूतामखिलं महंतमीति ॥ २७ ॥ मोक्षोपाये उपशमप्रकरणे त्यागवर्णनं नाम सर्गः ॥ ३५ ॥ श्रीराम उवाच । स्वभावगंभीरमेतद्भगवन्वचनं तव । यदहंकारतत्त्यागं मा ग्रहाणेति वक्षि माम् ॥ १ ॥ यद्यहंकारसंत्यागं करोमि तदिदं प्रभो । त्यजामि देहनामानं सन्निवेशमशेषतः ॥ २ ॥ जानुस्तंभेन महता धार्यते सुतरुर्यथा । अहंकारेण देहोयं तथैव किल धार्यते ॥ ३ ॥ अहंकारक्षये देहः किलावश्यं विनश्यति । मूले क्रकचसंलूने सुमहानिव पादपः ॥ ४ ॥ तत्कथं संत्यजाम्येनं जीवामि च कथं मुने । एनमर्थं द्विजश्रेष्ठ वद मे वदतां वर ॥ ५ ॥

यां त्यक्त्वां छित्वेत्याद्युक्ते तात्पर्यमनवधार्य रामः पृच्छति स्वभावेत्यादिना ॥ १ ॥ अशेषत इति प्राणाहंकारयोरेकतापन्नत्वमेवकृत्वा त्यागान्न परिशे 
ष्याहंकारत्यागसंभवात्प्राणानामप्यवशेषणेनेत्यर्थः ॥ २ ॥ जानुस्तंभेन जानुवत्प्रसृतमूलेन बंधविटपेन ॥ ३ ॥ तद्देहव्यतिरेकेण दृढयति अहं 
कारेति ॥ ४ ॥

ज्ञेयो विदुषां समाधिकाले विदेहकैवल्ये च ज्ञानबाधितः अधिष्ठानमात्रपरिशेषात्मा ध्येयः ॥ व्युत्थानकाले वाक्यजन्याखंडाकारवृत्त्या सवासनस्याज्ञा
नस्य बाधेऽपि जीवन्मुक्तिशास्त्रानुरोधात्प्रारब्धफलभोगशेषानुवृत्तिनिर्वाहाय बाधितानुवृत्तेरविद्यालेशपरिशेषस्य विक्षेपांशबाधस्य वाप्युपगमा
दनध्यस्ताहंभावेन देहेन भोगहेतुव्यवहारासिद्धेस्तात्कालिकाहंकाराभासानुवृत्तेर्विद्वदनुभवसिद्धत्वात्तद्दशायां तद्बाधानुसंधानस्य यत्नसाध्यत्वेन ध्यान
प्रायत्वात् ध्येय इत्यध्येयमहमिति द्विविध इत्यर्थः ॥ ६ ॥ तत्र द्वितीयमुपपादयति ॥ अहमिति ॥ विवेकिदृशा त्रिधाऽहंप्रत्ययगोचरो प्रतीयते । एकः देहेन्द्रि
यबुद्धिमनःसापेक्षः संघातात्मा उत्तमित्रकलत्रधनादिममतानिरूपकः अपरः अखंडैकस्वभावोऽवस्थात्रयमरणमूर्छाजन्मांतरसाधारणश्चि

श्रीवसिष्ठ उवाच ॥ सर्वत्र वासनात्यागो राम राजीवलोचन । द्विविधः कथ्यते तज्ज्ञैर्ज्ञेयो ध्येयश्च मानद ॥ ६ ॥ अहमेषां पदार्थानामेते च मम जीवितम् । नाहमेभिर्विना किंचिन्न मयैते विना किल ॥ ७ ॥ इत्यंतनिश्चयं कृत्वा विचार्य मनसा सह । नाहं पदार्थस्य न मे पदार्थ इति भाव्यते ॥ ८ ॥ अंतःशीतलया बुद्ध्या कुर्वत्या लीलया क्रियाः । योन्तर्वासनात्यागो ध्येयो राम स कीर्तितः ॥ ९ ॥

न्मात्रस्वभावो विवेकपरिशिष्टः तत्राद्यस्य स्वरूपं प्रथमं विचार्य निर्धार्यमित्याह अहमिति
एषां देहेन्द्रियादीनां बाह्यान्नपानादीनां चोपभुक्तानां पदार्थानां संघातात्मेत्यर्थः एते देहादयो अन्नादयश्च मम जीवितं स्वरूपसिद्धिनिमित्तं अत
एव एभिर्विना अहं न किंचिद्व्यवहारपदे त्वसिद्धोऽस्मि इति अंतः प्रथमस्याहंपदार्थस्य निश्चयं कृत्वा मनसा सह इत्थंकारणे संघातात्मानमत्यंता
सद्रूपमेव विचार्य द्वितीये परिशिष्टचिद्रूपेनाहं पदार्थस्य न मे एते पदार्था इति निष्ठया बोधेन तथैव भाविते सति यो भावनात्यागः स ध्येय इति मया कीर्ति
त इति प्रमाणमर्थः ॥ ७ ॥ ८ ॥ ९ ॥

वा॰टी॰ ३५॰ प्रथमं वासनाक्षयमुपपादयति सर्वमिति । सर्वं जगत् समतया सम्यग्ब्रह्मतद्भावेन बुद्ध्या साक्षात्कृत्य सर्वमिथ्यात्वक्रमेण यं वासनाक्षयं कृत्वा निर्ममो
५१ निरहंकारश्च निर्विकल्पकसमाधिस्थः प्रारब्धक्षयेन वा अन्यथा वा देहं जहाति असौ ज्ञेयो वासनाक्षय इत्यर्थः । १० । तत्र हि तीयमुदाहरति अहंका
रेति लीलया लोकसंग्रहोचितव्यवहारेणापि तिष्ठति यः ध्येयसंत्यागी ध्येयवासनात्यागवान् । ११ । आद्यमुदाहरति निर्मूलेति । सर्वज्ञानेन समूलक
लनां त्यक्त्वेत्यर्थः । ज्ञेयत्यागमयं ज्ञानबाधितवासनाज्ञानपरिशिष्टचिन्मात्रप्रधानं । १२ । उक्तमेव प्रपंचयति ध्येयमित्यादिना । लीलया व्यवहारेण । १३ ।

सर्वं समतया बुद्ध्या यः कृत्वा वासनाक्षयं ॥ जहाति निर्ममो देहं ज्ञेयोसौ वासनाक्षयः ॥ १० ॥ अहंकारमयीं त्यक्त्वा वासनां लीलयैव
यः । तिष्ठति ध्येयसंत्यागी जीवन्मुक्तः स उच्यते ॥ ११ ॥ निर्मूलं कलनां त्यक्त्वा वासनां यः शमं गतः ॥ ज्ञेयं त्यागमयं विद्धि मुक्तं
तं रघुनंदन ॥ १२ ॥ ध्येयं तं वासनात्यागं कृत्वा तिष्ठति लीलया ॥ जीवन्मुक्ता महात्मानः पुरा जनकादयः ॥ १३ ॥ ज्ञेयं तु वासना
त्यागं कृत्वोपशममागताः ॥ विदेहमुक्तास्तिष्ठंति ब्रह्मण्येव परावरे । १४ । द्वावेतौ राघव त्यागौ समौ मुक्तपदे स्थितौ ॥ द्वावेतौ ब्रह्म
तां यातौ द्वावेव विगतज्वरौ ॥ १५ ॥ युक्तायुक्तमतीत्वास्ते केवलं विमलेन घ ॥ एकः स्थितः स्फुरद्देहः शांतदेहः स्थितोपरः ॥ १६ ॥
एकः सदेहो निर्मुक्तस्तिष्ठत्यपगतज्वरः ॥ त्यक्तदेहो विमुक्तोन्यो वर्तते ज्ञेयवासनः ॥ १७ ॥ आपतत्सु यथाकालं सुखदुःखेष्वनारतं

१४ अपर्थे एवकारः १५ युक्तमतिः समाध्यारूढः अयुक्तमतिर्व्युत्थानव्यवहारवान् न हृष्यति ग्लायति यः स मुक्त इति होच्यते ॥ १८ राम॰
न एतौ युक्तायुक्तमती द्वावपि सुखेन आस्यते विश्रम्यते । अस्मिन्निति त्यागे विमले अविद्यामलनिर्मुक्ते ब्रह्मण्येव केवलं स्थितौ कस्तर्हि विशेषस्तमा ॥ ४७ ॥
ह एक इति एको व्युत्थितः अपरः समाहितः १६ अज्ञेयवासन इति च्छेदः । १६ । व्यवहारतो मुक्तस्य लक्षणान्याह आपतत्स्वित्यादिना । १८ ।

---

ईप्सितानीप्सिते इच्छाद्वेषौ । अज्ञदृशा इष्टानिष्टत्वेन संमतेषु च वस्तुषु सुषुप्तवदनासक्त इति यावत् । १९ । इह देहे तत्संबंधिनि च अहमिति ममेति च कल
सु नेइति योजना २० । २१ । येन पुंसा सुषुप्तवत्प्रशमिताः भाववृत्तयः परार्थे वासच्छायस्मात्तथाविधेन चेतसोपलक्षितेन जाग्रति जागरेपि सदा स्थितं भावेक्तः
पश्चात् उदाहरति स्वाभाविकहर्षेण कलान्वितः शुक्लो विधुश्चंद्र इव प्रसादेन निषेव्यते स इह जगति मुक्तो जीवन्मुक्त इति स्मृत इत्यर्थः । २२ । २३ ।
ईप्सितानीप्सिते न स्तो यस्येष्टानिष्टवस्तुषु ॥ सुषुप्तवच्चरति यः स मुक्त इति कथ्यते ॥ १९ ॥ हेयोपादेयकलने प्रमेये सदहमिहे
ति च । यस्यांतः संपरिक्षीणे स जीवन्मुक्त उच्यते ॥ २० ॥ हर्षामर्षभयक्रोधकामकार्पण्यदृष्टिभिः ॥ न परामृश्यते योंतः
स जीवन्मुक्त उच्यते ॥ २१ ॥ सुषुप्तवत्प्रशमितभाववृत्तिना स्थितं सदा जाग्रति येन चेतसा ॥ कलान्वितो विधुरिव यः स
दा दा मुनिषेव्यते मुक्त इतीह स स्मृतः ॥ २२ ॥ श्रीवाल्मीकिरुवाच ॥ इत्युक्तवत्यथ मुनौ दिवसो जगामास्तं ततः सविधये
स्नातुमितो जगाम । स्नातुं सभा कृतनमस्करणा जगाम श्यामाक्षये विकरैश्च सहाजगाम ॥ २३ ॥ दिवस १९ मोक्षोपाये
मुमुक्षु उपशम प्रकरणे वासनाचिकित्सा नाम सर्गः १६ श्रीवसिष्ठ उवाच ॥ विदेहमुक्तायेरामते गिरामिह गोचरे नैव तिष्ठंति तस्मात्त्वं जीव
न्मुक्तिमिमां शृणु ॥ १ ॥ इति वासिष्ठतात्पर्यप्रकाशे उ॰ षोडशः सर्गः १६ ॥ ननु देहे शेर्निःश्रेयसैर्युक्तो जीवन्मुक्तो न कथ्यते अज्ञश्च बध्यते इ
यस्तर्हि भागोत्र वर्ण्यते तामस्येतिनितेर्विदेहमुक्तलक्षणानि ज्ञानामप्रतिलक्ष्यतस्येकरूपेण लक्षणाद्यभावो वा तां कुंठीभावं वेकैवनिरतिशयमन दी॰
प्रकाशस्वमानंदमात्रपरिशेषत्वात्स्वरूपलक्षणमिति सूचयन् जीवन्मुक्तिलक्षणोदेशेन श्रवणश्रेयोपादेयानिशेषावक्तुं प्रतिजानीते विदेहमुक्ता इति १

वा॰टी॰उप॰
॥४८॥

ननु तर्हि जीवन्मुक्तानां तत्तद्वर्णाश्रमोचितकर्मफलत्वप्राप्ति(?)स्तर्हि अज्ञवदेव तद्भोगाय पुनर्देहबंधोपि स्यात् यदि नास्ति तर्हि प्रवृत्तिरेव न स्यात्
प्रयोजनमनुद्दिश्य न मंदोपि प्रवर्तते इति न्यायादिति दोषं परिहर्तुं ज्ञाज्ञयोः प्रवर्तकस्फुटाशुद्धत्वाभ्यां वैलक्षण्यमुपक्रमते प्राकृतान्येवेत्यादि
ना प्राकृतानि तत्तद्वर्णाश्रमस्वभावप्रापितानि वांछा विषयास्वादनोत्साहः ॥ १ ॥ बद्धः उत्साहदृढीकृतो भावः सारसत्यतावुध्या भोगोत्साहो

मुपपादयितुं २

प्राकृतान्येव कार्याणि यथावर्जितवांछया॥ क्रियंते तस्य येमानि तं जीवन्मुक्तं [illegible]तां विदुः॥२॥ यास्थि
तिस्तस्य या जंतो बाह्यार्थे बहुभावया॥ तं बंधमाहुराचार्याः संसारनिगडो दृढः॥३॥ त्यक्तभुक्तसंकल्पा हृदि बाह्य
विहारिणी॥ वासनाधोरिता सेह जीवन्मुक्तशरीरिणी॥४॥ बाह्यार्थव्यसनोद्भूता सा बद्धेति राघव॥ सर्वार्थव्यस
नोन्मुक्ता सा मुक्तेति कथ्यते॥५॥ एवं यस्यास्तत्त्वस्था या वर्तमाने पि शाश्वती निर्दुःखता निष्कलता सा मुक्तेति
बुधैः स्मृता॥६॥ इदमस्तु ममेत्यंतर्या या राघव भावना॥ तां त्वं स्वस्थं विद्धि कल्पनां च महामते॥७॥ तामेतां सर्व
भावेषु सत्स्वसत्सु च सर्वदा॥ संत्यज्य परमोदारः परमेति महामनाः [illegible]॥

यथा॥३॥ भोग्यवर्गाणामन्तस्तत्त्वनिश्चयेन हृदि उज्झितभोगसंकल्पा बाह्ये लोकसंग्रहमात्रप्रयोजनेन विहारिणी वासनात्यक्ता जीवन्मुक्तानां
शरीरमात्राश्रितेत्यर्थः॥४॥ उक्तलक्षणो एवं तत्स्वे प्रपंचयितुं ध्यानपिंडीकृत्याह बाह्येति व्यसनं लंपटता॥५॥ एवं विषयप्राप्तेः प्राक्काले विष
यनाशोत्तरकालस्याप्युपलक्षणमेतत्॥ निर्दुःखता रागविरहादिप्रयुक्तदुःखशून्यता विषयप्राप्तिकाले निष्कलता निरुच्छूनता॥६॥७॥ परं
जीवन्मुक्तिपदं॥८॥

राम॰
॥४८॥

वध्नंतीति बंधो देहादयस्तद्दाशा मोक्षस्तन्निवृत्तिस्तद्दाशां बंधमिथ्यात्वनिश्चयेन निवृत्तेः नाशास्त्वत्वान्नहि जागरूकस्य प्रनिगडबंधमोक्ष[illegible]माशास्त्य
इति भावः सुखदुःखदशानामपि मिथ्यात्वनिश्चयस्यैवाप्रत्यक्षाशा॥९॥१०॥ आशात्यागे उपायमाह परार्थेति इदं दृश्यपदार्थतत्त्वं पदार्थरूपं ते तव न त्वमपि न
ततस्मात्परमार्थसत्यात्तदन्यादेव किंचित्तु छमित्यर्थः॥१२॥ हे राम अन्यं स्ववक्ष्यमाणं चतुर्विधं निश्चयमेदं स्फुटं शिवेति शेषः त्वमेवाहमस्मीति॥१३॥१४॥

बंधाशामथ मोक्षाशां सुखदुःखदशामपि॥ त्यक्त्वा समरसः शांतस्तिष्ठाक्षुब्धमहाब्धिवत्॥१०॥ अजरामरमात्मानं बुद्ध्वा बुद्धिमतां वर
जरामरणशंकाभिर्मा मनः कलुषं कृथाः॥११॥ परार्थतत्त्वं नेदं ते नायं त्वमसि राघव॥ किंचित्तदन्यदेवेदमन्यस्त्वमसि राघव॥१२॥
अमरस्फुरिते विश्वे सतीवासतीति संस्थिते॥ त्यजितन्नाम तिगजोत्साया: संभवः कुतः॥१३॥ अन्यच्छृणु राम मनसि पुरुषस्य विचा
रिणः॥ जायते निश्चयः साधो स्फाराकारश्चतुर्विधः॥१४॥ आपादमस्तकमहं मातापितृविनिर्मितः॥ इत्येको निश्चयो राम बं
धायासद्विलोकनात्॥१५॥ अतीतः सर्वभावेभ्यो बालाग्रादप्यहं तनुः॥ इति द्वितीयो मोक्षाय निश्चयो जायते सताम्॥१६॥
जगज्जालपदार्थात्मा सर्वमेवाहमक्षयः॥ तृतीयो निश्चयश्चोक्तो मोक्षायैव रघूद्वह॥१७॥ अहं जगद्वा सकलं शून्यं व्योम समं
सदा॥ एवमेष चतुर्थोन्यो निश्चयो मोक्षसिद्धये॥१८॥ निश्चयेषु चतुर्थेषु बंधायप्रथमः स्मृतः॥ त्रयो मोक्षाय कथिताः शुद्धभावनयोत्थिताः

॥१८॥

सर्वेभ्यो देहेंद्रियादिभेदेभ्योऽतीतः अतिरिक्तः तनुः सूक्ष्मः स्थौल्यरहित इति यावत् त्वंपदार्थशोधविषयास्य मोक्षहेतुत्वं॥१५॥ तृतीय इति अस्याप्याध्या
त्मिकपरिच्छिन्नात्मनाभ्रमनिरस्यात् तत्पदार्थेनमैव शोधनसंभवान्मोक्षोपयोगः॥१६॥ अहमित्याध्यात्मिकपरिच्छेदोपाधिः जगदिति अधिदैविकाद्युपाधिः
सदा कलत्रयेपि समः सर्वदृश्यबाधात्मनिश्चयः॥१७॥१८॥

४५॥

वा॰टी॰ ३५०
४९॥

लक्षणभेदनिरूपणेऽस्य विभागस्य का प्रसक्तिस्तत्राह सन्तेषामिति॥ अस्मिन्मते एव लक्षणाया बंधकत्वात्स्वयमेव बंधहेतुरित्यर्थः॥ शुद्धा निर्दोषा लक्षणा येषु ते
शुद्धलक्षणा न तन्निरर्थ्यो निश्चयाः॥१९॥ तत्र तृतीयस्य प्रयोजनमाह सर्वमिति॥२०॥ चतुर्थस्य शून्यवादिमतप्रसिद्धत्वात्तद्व्यावर्तयन्नाह॥२१॥ शून्यमिति परि
शिष्टात्मैव वादिभिः शून्यादिशब्दैः कथ्यते नात्वस्तीत्यर्थः॥२२॥ विद्यापरमार्थस्वरूपं दृष्ट्वा जगद्धा संप्रसंत तया सर्वं चाद्वैतिधिमानं॥२३॥ यथा

एतेषां प्रथमः प्रोक्तः सल्लक्षणया बंधमोक्षया॥ शुद्धलक्षणास्त्रयः स्युस्ता जीवन्मुक्ताविलासिनः॥१९॥ सर्वमात्माहमेवेति निश्चयो वै म
हामतेः॥ तमाद्यं विषादाय नान्यो याति मेमतिः॥२०॥ तिर्यग्गुर्ध्वमधस्ताच्च व्यापको महिमात्मनः॥ सर्वमात्मेति तेनांतर्नि
श्चयेन न बध्यते॥२१॥ शून्यं तत्प्रकृतिर्माया ब्रह्मविज्ञानमित्यपि॥ शिवः पुरुष ईशानो नित्य आत्मेव कथ्यते॥२२॥
सदा सर्वं सदेवेदं नेह द्वितान्यते क्वचित्॥२३॥ शून्यं तत्प्रकृतिर्माया ब्रह्मविज्ञानमित्यपि॥ शिवः पुरुष ईशानो नित्य
आत्मैव कथ्यते २२ सदा सर्वं तदेवेदं नेह द्वितान्यते क्वचित्॥ विद्यते विद्ययाख्यासं जगन्नेतरया धिया॥२३॥ आपाता
लमनंतात्मा पूरितांभोधिरंबुभिः॥ आब्रह्मस्तंबपर्यंतं जगदाश्रयमात्मना॥२४॥ अतः सत्यमनंतं नित्यं नानृतं विद्य
ते क्वचित्॥ वार्येव सकलांभोधिर्न तरंगादयः क्वचित्॥२५॥ पृथक्कटककेयूरनूपुरादिनकांचनात्॥ भिन्नास्तरुतरणा
कारकोटयश्चैव नात्मनः॥२६॥ द्वैताद्वैतसमुद्भेदे ज्जगन्निर्माणलीलया॥ परमात्ममयी शक्तिरद्वैतेव विजृंभते॥२७॥ ग४०

अनंतात्मा अपरिच्छेद्यपरिणामो भोधिरापातालं अंबुभिः पूरितस्तथेत्यर्थः॥२४॥ अस्त्वा सर्वं पूर्णं किं ततस्तत्राह अनृतमिति॥ अनंतं प्रमाणबोधितं ब्रह्मै ॥४९॥
क्यमेव नित्यं सत्यं॥ तद्व्यतिरेकेण अनृतं जगद्रूपं न विद्यत इति सिद्धमित्यर्थः॥२५॥ कांचनात् न पृथक् आत्मनः पृथिव्यात्मनः सकाशान्न भिन्नाः॥२६॥

कं॰२

BHAU DAJI

---

कथं तर्हि न लक्ष्म सुद्वादोऽजगति भेदाभेदप्रत्ययस्तत्राह द्वैताद्वैतोद्भेदे इति॥ अद्वैता परमात्ममयी शक्तिर्ब्रह्मसमैवाज्ञानाजिति द्वैताद्वैतसमुद्भेदे विजृंभत इ
त्यर्थः॥२७॥ अस्त्वेवं किं ततस्तत्राह आत्मीय इति। स्वीये परकीये वा पुत्रमित्रादौ सर्वस्मिन्जगति चरुपचिते नष्टे वा सुखदुःखे अभिज्ञस्त्वं मा गृहाणेत्य
र्थः॥२८॥ कथं तर्हि मया व्यवहर्तव्यमिति चेद्बुद्ध्यैव द्वैताद्वैतालंबनेनैवेति तद्विभज्याह भावाद्वैतमिति। ब्रह्मैवेदं सर्वं परमार्थतः सत्ताद्वैतमयात्मक
एव सन्व्यवहारकाले पि भावनया अद्वैतमेवोपाश्रित तत्स्थाणिकर्मफलदाने ब्रह्मैव वर्णाश्रमधर्मव्यवस्थापनकर्मविषये अद्वैतं सर्वथैवा
नादृत्य व्यवहरन्ने यथोचितं द्वैताद्वैतोभयपरो भवेत्यर्थः॥ अद्वैते कर्मणामेवासिद्धेरैकरूप्येण सर्वत्र कथं चिद्द्वैताचरणे जगद्व्यवस्थाधर्मशास्त्रा
दिबाधप्रसंगात्तत्र द्वैताश्रयणमेवोचितमिति भावना॥२९॥ भावेऽपि द्वैताश्रयणे काक्षे तिस्तत्राह भवेति उपासातैः शुभनिमित्तैः पूर्णा सुदर्

आत्मीये परकीये च सर्वस्मिन्नेव सर्वदा॥ नष्टे वोपचिते कार्ये सुखदुःखे न गृहाण मा॥२८॥ भावाद्वैतमुपाश्रित्य सत्ताद्वैतमयात्मकः॥ कर्माद्वै
तमनादृत्य द्वैताद्वैतमयो भव॥२९॥ भव स्वमिषु भीमा सुभावभावनवासया॥ मा पतौ सा तक्षणा सुदर्शनतःकरी यथा॥३०॥ द्वैतं न संभ
वति चित्तमयं महात्मन्नात्मन्यथैक्यमपि न द्वितयोदितात्मा॥ अद्वैतमेकपरिहितं सततोदितं सत्त्वं च किंचिदपि चाकुरतः स्वरूपं॥३१॥

ग्रहणेन गर्ता लक्ष्यते। तथा च संसारगर्तपातस्त्वतत्त्वत्स्यसीति भावः॥३०॥ सत्ताद्वैतमुक्तं मुपादयति द्वैतमिति द्वैतं परमार्थसत्तया न संभवति यतस्तत् चिन्मयं चित्तक
ल्पितमेव न वस्तुतः स्पर्शितं परैरपेक्षा बुद्धि जन्यत्वाभ्युपगमात्तन्नाशेन नाशाभ्युपगमाच्च एवमात्मन्यैक्यमेकत्वात्मसंख्यागुणोऽपि न संभवति यतस्तदपि
द्वित्वादिव्यावर्तकत्वेनैव कल्पितत्वात् द्वितयादेवोदित आत्मा स्वरूपं यस्य तथाभूतं अतः अद्वैतमेको न परिहितं स्वसिद्धावपरान्यनिरपेक्षत्वात्सततोदि
तं नत्तन्नाद्यं ब्रह्मैक्यानि सातत्त्वं द्वैतं निरासान्न किंचिदपीवं तस्मात्तत्सर्वमभवत् नेह नानास्ति किंचनेत्यादिश्रुतयस्तदनुभविनश्च लक्षणाया
आहुरित्यर्थः॥३१॥

ति

अहंइतियुष्मदा त्मप्रविभक्तरूपं नैवास्ति अस्मदर्थप्रविभक्तरूपाणि युष्मदादि जगंति च न संतिकिंतु सर्वं इदं निर्विकारं विज्ञानमात्रमेव विद्यते तदेव भासततस्तत्साक्षात्कारमात्रतः शांतं इदंतु जगत्सदा नैमततनसच्चेतिविद्धी त्यर्थः ३२ पुनस्तन्निश्चयमेवदृढमाशिषापिसंपादयतिपरमितिद्वाभ्यां जीवशक्तेः प्राणस्यजीवनं प्राणनव्यवहारनिमित्तं प्राणस्यप्राणमित्यादिश्रुतेः ३३ अनुभवानां चाक्षुषादीनां बीजं मूलभूतं स्वात्मभावः स्वस्वरूपावस्थितिस्तेन दशमस्त्वमसीतिवत्‌ छद्मापरोक्षापादनेनोपदेश्यं अतः स्वदनमंतरानंदैकरसं ब्रह्मैवत्वं अहं जगच्चनतेतोन्यदस्तीति

नैवाहमस्ति न च नाम जगंति संति सर्वं च विद्यत इदं ननु निर्विकारं विज्ञानमात्रमवभासततस्व शांतं गगनमज्ज्वगदिदं च सदेति विद्धि ३२
परममृतमनाद्यं भासनं सर्वभासामजरमजमचिंत्यं निष्कलं निर्विकारं विगतकरणजालं जीवनं जीवशक्तेः सकलकलनहीनं कारणं कारणानां ३३ सततमुदितमीशं व्याततेचित्प्रकाशस्थितमनुभवबीजं स्वात्मभावोपदेश्यं स्वदनमनुचिर्तोतत्र स्तस्सर्वं सदैव त्वमहमपि जगच्चेत्यस्तुतेनिश्चयोंतः ३४ मोक्षोपायेउपशमप्रकरणेतृष्णाविच्छेदोपदेशोनामसर्गः ५७
श्रीवसिष्ठ उवाच युक्ताशयानां महतां महतानां कुदृष्टिभिः स्वभावोयं महाबाहो लीलयाचरतामिह १ विहरन्नपि संसारे जीवन्मुक्तमना मुनिः आदिमध्यांतविरसा विहसेज्ज्ञागतीर्गतीः २

अनुसरस्वचित्तउपचितोनिश्चयस्तेंतरस्त्विस्याशीरुपदेशश्च ३४ इतिश्रीवासिष्ठतात्पर्यप्रकाशेउपशमप्रकरणेसप्तपंचाशः सर्गः ५७ यथास्थितयास्थितो विद्वान्संसारेनावसीदति सास्थितिर्विस्तरेणाष्टाध्यायोपदिश्यते युक्ताशयानां समाहितमनसां कामलोभादिकुदृष्टिभिरहतानां अहृवितानां अयं वक्ष्यमाणप्रकारः स्वभावः स्थितिः श्रूयतामितिशेषः १ आदौ जन्मादिदुःखैर्मध्ये आध्यात्मिकादिदुःखैरंते मृत्युनरकादिदुःखैर्वि



सर्वेषु प्रकृतेषु तत्तत्काल प्रसक्तेकार्येषु उचिताचरणेषु तिष्ठतीतितत्स्थः सर्वोसुशत्रुमित्रादिदृष्टिषुमध्यस्थः समःध्येयोध्येयश्चेति द्विविधवर्णितवासनात्यागयोर्मध्येध्येयंवासनात्यागमवलंब्येत्यर्थः ३ सर्वेषामर्थस्याभिमतस्यपरिपोषकः नकस्यचिद्विप्रियकारी प्रबोधलक्षणेउपवनेस्थितिर्यस्य ४ २ समःशांतो चमित्रेचेतिपाठः स्पष्टः अग्न्याणांगुरुप्रभृतीनांसमयोचितप्राप्तसेवापरिपालनादिकर्मकरः ६ मौनस्थो

सर्वप्रकृतकार्यस्थोमध्यस्थः सर्वदृष्टिषु ध्येयंतंवासनात्यागमवलंब्यव्यवस्थितः ३ सर्वं च विगतोद्वेगः सर्वार्थपरिपोषकः विवेकोद्योतदृष्टात्मा प्रबोधोपवनस्थितिः ४ सर्वातीतपदालंबी पूर्णोंदुशिशिराशयः नोद्वेगी न च तुष्टात्मा संसारेनावसीदति ५ सर्वशत्रुषुमध्यस्थोदयादाक्षिण्यसंयुतः प्राप्तकर्मकरोग्र्याणांसंसारेनावसीदति ६ नाभिनंदतिनद्वेष्टिनशोचतिनकांक्षति मौनस्थः प्रकृतारंभीसंसारेनावसीदति ७ पृष्टः सन्प्रकृतं वक्ति न पृष्टः स्थाणुवत्स्थितः ईहितानीहितैर्मुक्तः संसारेनावसीदति ८ सर्वस्याभिमतं वक्ता चोदितः पेशलोक्तिमान् आशयज्ञश्च भूतानां संसारेनावसीदति ९ युक्तायुक्तदशाजालमाशोपहतचेष्टितं जानातिलोकदृष्टांतं करकोटरबिल्ववत् १०

मितभाषीप्रकृतारंभीआवश्यककार्येषुनलसः ७ तरेवाहपृष्टइति ८ अभिमतंप्रियंवक्ताचोदितः आसिसः पेशलोक्तिमान्चतुरंसामाभाने ९ इदंयुक्तमिदमयुक्तमितिवैषम्यदशाजानाति अपक्षपातितमापश्यति अतएवकरकोटरः करतलागर्तस्तत्रतिष्ठितबिल्वफलवत्स्पष्टमित्युक्तं एकतरपक्षपातेतुतत्पक्षदोषाः अपरपक्षगतगुणाश्चरागद्वेषपिहितत्वान्नस्पष्टंभासंतइति १०

अतएवैषम्यदर्शनादेः फलमपिजनानांहसन्निवतातस्थ्येनैवपश्यतीत्याहपरमिति॥११॥उपसंहरतिजितेति॥१२॥मुक्तस्थितिरिवबद्धस्थितिरपितदाशयो
द्घाटनेनवर्ण्यतामितिचेन्नसर्वमनोरथश्रोतीनांतत्समुक्तदुःखेष्टानांतत्फलदुःखंवैचित्र्याणांवानेत्यान्यात्रावर्णयितुंशक्येत्याशयेनाहवयमितिचतुर्भिः
१३॥तेषांसर्वाणांनार्यःस्त्रियःअभिमताःअभिलषिताःयाःभावानांविवेकबुद्धीनांअसंगताभावैःसर्वसंचितसुकृतानांप्रध्वंसाभावैःसंभावितसुकृततपः
संयमादीनांप्रागभावपरिपालनेश्चविभूषिताःआपादमस्तकमलंकृताः॥अतएवनरकाग्नीनांकनकसमानरोचिषोज्वालासवताइत्यर्थः॥१४॥तथासर्वाणा

परंपदमुपारूढोमंगुरांजागतींस्थितिं॥अंतःशीतलयाबुध्याहसन्निवनिरीक्षते॥११॥जितचित्तामहात्मानोयेहिदृष्टपराव
राः॥स्वभावईदृशस्तेषांकथितस्तवराघव॥१२॥वयंतुवर्त्कुंसर्वाणांअजिताज्ञीयचेतसां॥भोगकर्दममग्नानांनविद्मोभिमतंम
तं॥१३॥तेषामभिमतानार्योभावाभावविभूषिताः॥ज्वालानरकवह्नीनांयास्ताःकनकरोचिषः॥१४॥अनर्थागहनाश्चार्थाव्यर्था
नर्थकदर्थनाः।दिशंतोदुःखसंरंभमभितःप्रहिताःपदः॥१५॥फलसंधीनिकर्माणिनानाचारमयानिच॥सुखदुःखावहर्णा
निताानिवर्त्कुंनशक्नुमः॥१६॥

मभिलषिताः॥अर्थाःधनानितेचअनर्थागहनाःअर्जनेपालनेव्ययेनाशेचबह्वायासाधर्मारिशिनिमित्तभूताःव्यर्थाःअनर्थप्रयोजककलहवैरादिं
संकर्मचरणाद्धिदुर्निस्तारःस्यात्॥नेत्याहफलसंधीनीति॥यानिसर्वाणांयज्ञादिकर्माणितान्यपिफलाभिसंधियुक्तान्येवननिरभिसंधीनि॥नाना
विधैःदंभमानमदमात्सर्याद्याचारैश्चप्रचुराणिअतएवपुनर्जन्मादिप्रयुक्तसुखदुःखैरवहर्णानीतिसर्वाणांकिंविरुपिनिस्तारनिमित्तंवर्त्कुंनशक्नुम
इत्यर्थः॥१६॥ राम॰ ॥५१॥

कदर्थनाश्चयेभ्यस्तथाविधाभ्येत्यर्थः॥१५॥ननुते
षांतादृशैरप्यर्थैर्यज्ञादि ३४

अतस्त्वमपिविहृद्धचरित्रेणैवविहरनान्येनेत्याहसर्णामित्यादिना॥१७॥चासर्वेषांअज्ञानामपिकर्माद्याचारेषुअनुवृत्तिमान्नबुद्धिभेदंजनयेदज्ञानांकर्म
संगिनामितिभगवद्वचनादितिभावः॥१९॥सर्वाःसंसारदशाःपरमार्थस्वरूपावस्थितिसमिकामेदरशाश्च॥२०॥आशोन्मुखोनामिवईहितानिचेष्टा
यस्य॥सर्वात्मनानैराश्यप्रकटनेधनमित्रादिसंग्रहायोगाद्राज्यपरिपालनानिर्वाहादितिभावः॥अतएवधनादिनाशेबहिस्तप्तइवतप्तः॥अंतस्तुआ

दर्शादृष्टिमवष्टभ्यध्येयत्यागविलासिनीं॥जीवन्मुक्ततयास्वस्थोलोकेविहरराघव॥१७॥अंतःसंत्यक्तसर्वाशोवीतरागो
विवासनः॥बहिःसर्वसमाचारोलोकेविहरराघव॥१८॥उदारःपेशलाचारःसर्वाचारानुवृत्तिमान्॥अंतःसर्वपरित्यागीलोके
विहरराघव॥१९॥प्रविचार्यदशाःसर्वायदितुच्छंपरंपदं॥तदेवभावेनालंब्यलोकेविहरराघव॥२०॥अंतर्नैराश्यमादायबहिरा
शोन्मुखोहितः॥बहिस्तप्तोंतराशीतोलोकेविहरराघव॥२१॥बहिःकृत्रिमसंरंभोहृदिसंरंभवर्जितः।कर्ताबहिरकर्तांतर्लोके
विहरराघव॥२२॥ज्ञातवानसिसर्वेषांभावानांसम्यगंतरं॥यथेच्छसितथादृष्ट्यालोकेविहरराघव॥२३॥कृत्रिमोल्लासहर्षस्थः
कृत्रिमोद्वेगगर्हणः॥कृत्रिमारंभसंरंभोलोकेविहरराघव॥२४॥त्यक्ताहंकृतिराश्वस्तमतिराकाशशोभनः॥अगृहीतकलंकांको
लोकेविहरराघव॥२५

शीतःसर्वतःशीतलः २१,२२ अंतरंव्यवहारतःपरमार्थश्चसारासारतारतम्यंअतःसद्व्यवहारेअभिसर्गस्तवेत्याह
यथे॰च्छसीति २३ २४ चंद्रस्तुराश्रावहमेवप्रकाशकइत्यहंकृतिःस्पर्शोगिज्ञानोनाश्वस्तमतिःगृहीतकलंककलोच्छनश्चत्वंतुनतथेतिव्यति
रेकः॥२५॥

वा॰टी॰ अ॰५॰ ॥५२॥

प्रकृतिस्तत्तद्गुणोऽप्रमत्स्वभावस्तदुचितकार्यस्य च प्रज्ञाहितकार्यस्योवा ॥२६॥ समः सर्वासु वृत्तिष्विति यदुक्तं तद्बंधमोक्षादिवैषम्यप्रतिषेधेनोपपादयति नबं
धइत्यादि ॥२७॥ जलंमृगतृष्णोदकं ॥२८॥ कुतो न बंधोऽस्तीति तत्र युक्तिमाह अबद्धस्येति ॥ असंगस्येत्यर्थः ॥ विधीयते प्रयत्नेन संपाद्यते ॥२९॥
तर्हि किं तत्त्वज्ञानं व्यर्थं नेत्याह अतत्त्वेति ॥३०॥ ३१ ॥ जः साक्ष्यमिति तत्र स्यात्सुहृद्बंधवविषयाः ॥ असत्त्वभावस्य अविद्यमानस्वरूपस्य सुहृदादेर्भाव
नाचिंतनाकाना मानयुक्तेत्यर्थः ॥३२॥ अपि च इत्थं मदुक्तप्रकारेण वासनात्यागेनाभ्यासेऽन्यः साक्षित्वं परमार्थसत्त्व वान्परिशेषादनुमीयसे प्रथमतः

आशापाशशतोन्मुक्तः समः सर्वासु वृत्तिषु ॥ वह्निः प्रकृतिकार्यस्यो लोके विहरराघव ॥२६॥ न बंधोऽस्ति न मोक्षोऽस्ति देहिनः परमार्थ
तः ॥ मिथ्येयमिंद्रजालश्रीः संसारपरिवर्तिनी ॥२७॥ भ्रांतिमात्रमिदं मोहाज्जगद्राघव दृश्यते ॥ जनितं प्रत्ययस्फारं जलं तीव्रातपे यथा ॥२८॥
अबद्धस्यैकरूपस्य सर्वगस्यात्मनः कथं ॥ बंधः स्यात्तदभावे तु मोक्षः कस्य विधीयते ॥२९॥ अतत्त्वज्ञानजातेयं संसारभ्रांतिरा
तता ॥ तत्त्वज्ञानात्क्षयं याति रज्ज्वामिव भुजंगधीः ॥३०॥ ज्ञातवानसि तत्त्वं त्वमेकया सूक्ष्मया धिया ॥ जातोऽसि निरहंकारो व्योमव
न्नित्यनिर्मलः ॥३१॥ ज्ञोऽसि सित्थं तरखिलाः सुहृद्बंधववासनाः ॥ सत्यजासत्त्वभावस्य का नाम किल भावना ॥३२॥ अपि चेत्थं
तरन्यस्त्वं सत्त्ववाननुमीयसे ॥ इदं प्रथमतः प्राप्तं परमादपि कारणात् ॥३३॥ वासनात्यागात् सर्वतेः परमात्कारणाद्धूतणः सत्त्वसमुत्
प्यो निर्लक्ष्यप्राप्तादपि इदं परिछिन्नात्मसत्यरूपमेव प्राप्तं न परमार्थसत्यरूपमिति वासनात्याग एव तत्प्राप्तिहेतुर्नान्य इत्यर्थः अथवा अपि चेति समुच्चये
तरन्यस्तस्मादसत्त्वभावादन्यः परमार्थसत्त्वभावस्त्वं सत्त्वभावेनैव असत्त्वभावेभ्योऽविद्यातत्कार्येभ्यः सत्त्ववान्बलवाननुमीयसे अतः परमाद्यादविद्या
लक्षणात्कारणादपि इदं प्रथमतः अनादिकालात्प्राप्तं बंधमपि इत्थं वासनावदेव संत्यजेत्यनुषज्यते ॥३३॥ राम॰ ॥५२॥

॥ ॥

भोगैस्तत्साधकैर्बंधुभिर्जन्मद्रावैः स्वकर्तृत्वादिभिस्तत्प्राप्तिनिमित्तैः शुभाशुभैः कर्मभिश्च ॥३४॥ आत्मतत्त्वमेवैकः सारः सत्यः परमानंदोऽस्य तथाविधो दृढ
तिजातावधीर्यस्य भयैर्भयहेतुभिः ॥३५॥ ममतत्तविदः स्वतो दुःखं माभूत् तत्र बंधनामज्ञत्वेन दुःखित्वात् दुःखस्य भागमेमेदुःखंतु दुर्वारमिति चेत्तत्राह अजा
तस्येति मिथ्यात्वाद्बंधोऽजातेसतीत्यर्थः षष्ठीचनादरे इति षष्ठी अभावाबंधोः संबंधि नयाअजातस्यैतवेति योऽस्त्वा ॥३६॥ एवमात्मनः असंगत्वा
द्वितीयत्वदर्शनेशोकासंभवउक्तः इदानीं अस्त्वात्मासंगी तथापि स किं नित्यः उत क्षणिकः उत प्रागभावबद्दृष्टादिवद्धाकालांतरेणनश्वरः सर्वेष्वपि पक्षेषु

भोगबंधुजनद्रावैः कर्मभिश्च शुभाशुभैः ॥ आत्मनो नास्ति संबंधं किमेताननुशोचसि ॥३४॥ आत्मतत्त्वैकसारो हि मिति जातधियो भयैः
न ते राम अस्ति संबंधः किं विभेषि जगद्भ्रमात् ॥३५॥ अजातस्य सतो बंधो बंधु दुःखसुखभ्रमैः ॥ कस्ते राघव संबंधो मदेताननुशोच
सि ॥३६॥ त्वं चेद्भूस्त्वं चैव पुरा तथेदानीं भविष्यसि ॥ अद्यैवेह स्थितोऽसीति ज्ञातवानसि निश्चयं ॥३७॥ तदानंतरगानन्यान्प्राणा
दीन्निकटस्थितान् ॥ बंधनतीतान्सुबहून्कस्मात्त्वं नानुशोचसि ॥३८॥ एवं नन्द्यत्त्वापदेराजो जुम्म्स्वं विषयं भविष्यसि ॥ पश्यति राम
बंधुशोको न युक्त इति मोदासमाश्रित्युराघ्वे कल्पे नावदाह त्वं चेदिति पुरा सर्वं जन्मसु तेष्वापि त्वं सदृशं किंचिन्नु लक्षसि ॥३९॥
तथा भाविजन्मसु भविष्यसि अद्यइदानीं इह जन्मनि च स्थितोऽसि इति एवं स्वभावमात्मानं यदि निश्चयेन दृढं ज्ञातवानसि तदा अनेकानागा न्तानान्निक
टस्थितान्सन्निहितान्देहप्राणादीनिवेत्यध्याहारः अनंत जन्मसु तीतान्सुबहून्कस्मात्नानुशोचसि विनिगमनाविरहात्सर्वशोकाशक्तेश्च न कस्मा
पि शोको युक्त इति भावः ॥३७॥३८॥ द्वितीये पक्षाह एवमिति ॥ इत्थं अन्यः भविष्यति इति क्षणिकमात्मानं यदि जानासि तथापि त्वं दिनं सदृशमात्मानं अवि
नुपश्यसि सोचसि द्वितीयपक्षे शोच्यत्वे रिपुचात्मत्वे न सोकः इत्याभासादित्यर्थः ॥३९॥

द्वितीयेपाद सर्वमिति इदानीमन्यः अग्रेप्यन्यः भविष्यसीति इति क्षणिकमात्मानं यदि जानासि तथापि त्वं किं सद्रूपमालंब्य विमुह्यसि शोचसि द्वितीयस्य शोकोच्य
स्य शोचितुश्चासत्त्वेन शोकावसराभावादित्यर्थः ३९ तृतीयेप्याह पुरेति तथापात्मनाशादेव क्षीणसंसारः ४० यदा आत्मनो जन्मादि संगिले ऽपि शोको न
युक्तस्तदा किं वाच्यमसंगोदासीननित्यकूटस्थस्वप्रकाशपूर्णानंदैकरसत्वे सत्युक्त इतीत्याशयेनोपसंहरति तस्मादिति मुदिताः सहजसंतोषवृत्तिः

पूर्वमन्यस्तथेदानीमन्यस्त्वं च भविष्यसि यदि राम तथापि त्वं सद्रूपं किं विमुह्यसि ३९ पुरा भूत्वाद्य भूत्वा च भूयश्चेन्न
भविष्यसि तथापि क्षीणसंसारः किमर्थमनुशोचसि ४० तस्मात्त्वं दुःखितायुक्ता प्राकृते जागते क्रमे तथैव मुदि
तायुक्तं कार्यानुवर्तनं ४१ मा गच्छ दुःखितां राम सुखितामपि मा व्रज समतामेहि सर्वत्र परमात्मा हि सर्वगः ४२
अनंतः सत्स्वरूपस्त्वं खमिवाततताततः प्रकाशो नित्यशुद्धस्त्वं ज्वालानामिव कोटरं ४३ जागतानां पदार्थानामदृ
श्यमनुस्ततनुः हृत्स्थो सिहारमुक्तानामेकतंतुरिवाततः ४४ संसारस्थितिरेवेयं दृष्ट्वा भ्रमति पुनः अज्ञेनैव न
तु ज्ञेन ज्ञो हि राम सुखी भव ४५ स्वरूपमिदमस्यास्ति संसृतेः सततादिमत् अज्ञानात्स्फारतामेति ज्ञानवान्न हि संमते ४६

४१, २ यथा ज्वालानां कोटरे सर्वतः प्रभाव्याप्ते तमसो नावकाशस्तद्वत्त्वद्व्यापित मोदुःखादेरिति भावः ४३ त्वमेव सर्वांतर इत्याह जगतानामिति न
दृष्टा आत्मनस्तनुः स्वरूपं यस्य तनुः सूक्ष्मः हारस्य मुक्ताफलानां तंतुरिवाततः अनुस्यूतः ४४ पुनर्जन्मशंकां वारयति संसारे तिभ्र
मात्तत्त्वपुनर्भ्रमयते ४५ स्वरूपं स्वभावः सततं आधिमत् दुःखबहुलं ४६



१

स्वरूपं तत्त्वमिति न मंतव्यमित्याह रूपमिति अन्यं स्वंतरेषु तत्त्वा प्रसिद्धेस्त्वापि न तत्त्वमस्तीत्यर्थः ४७ ननु निस्तत्त्वं कथं सदिति दृश्यते तत्राह सर्वेति आभानं जगदाका
रभानं अतिभास्वरं व्यक्तं ४८ जगतो भ्रांतिमात्रताप्रदर्शनाय अनियतस्वभावतां दर्शयति सुबंधुरित्यादि सर्वस्य सर्वोपि सर्वे अरयो मित्राणि उदासीनाश्चेत्य
र्थः ४९ अन्योन्यं संश्रितं परस्परनिमित्तं ५० अध इति प्रत्यक्षं चेदं ज्योतिश्चक्रभागानां भ्रमेश्चेति भावः ५१ एवमुत्कर्षापकर्षा वस्थानियता वेवे

रूपं किमन्यद्भवतु भ्रममात्राद्दृते भ्रमे स भ्रमो नान्यतः स्वप्ने भवत्यन्यो हि कः क्रमः ४७ सर्वशक्तेरियं शक्तिर्भ्रममात्रमयं तथा
राम दृश्यत एवेदमाभानमतिभास्वरं ४८ सुबंधुः कस्यचित्कः स्याद्रिपुर्नो कश्चिदप्यरिः सदा सर्वे च सर्वस्य सर्वे सर्वेश्वरेच्छ
या ४९ आत्मनशीर्णमखिलमिदमन्योन्यमाश्रितं अतारतं याति जगत्तरंगौघ इवांभसा ५० अधऊर्ध्वत्वमायाति
ऊर्ध्वत्वमधस्तथा संसारस्य दलस्यास्य चक्रे नेमिरिवामितः ५१ स्वर्गस्था नरकं यांति नारकाश्च त्रिविष्टपं योनेर्योन्यं
तरं यांति द्वीपाद्द्वीपांतरं जनाः ५२ धीराः कार्पण्यमायांति कृपणा यांति धीरतां परिस्फुरंति भूतानि पातोत्पातशतभ्रमैः
५३ एकरूपस्थिरं चक्रे स्वच्छं संतापवर्जितं नेह संप्राप्यते किंचिद्वह्नौ हिमकणो यथा ५४ अयेनाम महाभाग बहवो बां
धवास्तथा विनष्टा एव दृश्यंते तेते कतिपयैर्दिनैः ५५ परतालीयतान्यत्वसत्यत्वादिभावना नेह सत्या महाबाहो द्वैतं द्वारि दृश्यपथा

स्यादस्वर्गस्थाइति ५२ धीराः अप्रार्थनशीलाः ५३ उपसंहरति एकरूपेति चक्रं पदार्थमंडलं ५४ विनाशस्तु सर्वत्र नियत इत्याह ययेति ५५ अस्त्वनि २६
यतता किं तत्रास्त्वत्राह परेति ५६

वा॰टी॰ उ॰प्र॰
५४

विगलंतु विशीर्यंतां ॥५७॥ इतरदृष्टिभिर्बाधितानुवृत्तदृष्टिभिः ॥ आमूलं अज्ञानवासनाभ्यां सह अंतःछिन्नाभिः ॥५८॥ वासनाभारवान् अज्ञ इव भ्रमभ्रांतो यथा न भवस्येव तथा अस्यां संसारसरणौ विहर ॥५९॥ कदाचिदपि मम व्यवहारोपरमो भविष्यतीति त्वाह यथा भवति । वासनाक्षयकारिणी विचारणा यथोदेति तथा । तथा कार्याणि व्यवहाराः प्रशाम्यंतीति उपरमं तदित्यर्थः ॥६०॥ विगतं अयमेव बंधुरिति परिच्छेदलक्षणं यस्मात्तादृश्येव सर्वत्र समतादर्शिनीत्यर्थः ॥६१॥ उक्तमेवार्थं कारणो

अयं बंधुः परश्चायं ममायं नाहमस्य च । इति मिथ्यादृशो राम विगलंतु तवाधुना ॥५७॥ क्रीडार्थं व्यवहारास्माः एताभिर्हेतदृष्टिभिः । आमूलमेताश्छिन्नाभिर्बहिर्विहर हेलया ॥५८॥ संसारसरणावस्यां तथा विहर सुव्रत । न यथैव भ्रमभ्रांतो वासनाभारवानिव ॥५९॥ यथा यथैषा कार्याणि वासनाक्षयकारिणी । विचारणा तवोदेति संशाम्यंतीति तथा तथा ॥६०॥ अयं बंधुरयं नेति गणना लघुचेतसां । उदारचरितानां तु विगतावरणैव धीः ॥६१॥ न तदस्ति न यत्राहं न तदस्ति न मन्मम । इति निर्णीतवीराणां विगतावरणैव धीः ॥६२॥ नास्तमेति न चोदेति यश्चिदाकाशवन्महान् । सर्वं संपश्यति स्वस्थः खस्थो भ्रमित लं यथा ॥६३॥ सर्वा एव हि ते भ्रातस्तात यो राम बंधवः । आत्यंतासंयुता एतास्तव राम न काश्चन ॥६४॥

पन्यासेन विवृणोतिन तदिति ॥६२॥ स्वस्थः स्वरूपप्रतिष्ठितः विक्षेपदुःखोपशमस्वास्थ्यवान्वा ॥६३॥ सर्वा इति अनादौ संसारे सर्वयोनिषु सस्य बहुशो जन्मानुभवादित्यर्थः । बंधुत्वेनात्यंततमसंयुताः कश्चन काश्चिदपि न पर्यायेण सर्वैः सह संबंधादित्यर्थः ॥ अथवा देहद्वारकपरंपरासंबंधापेक्षया सर्वजीवैः सह साक्षादेकात्म्यसंबंधस्यांतरंगत्वात्तेन संबंधेनात्यंतासंयुता न काश्चनेत्यर्थः ॥६४॥ राम॰ ॥२४॥

BHAU DAJI

रयमबंधु॰

उक्तमेवार्थं संक्षिप्य विवृण्वन्नुपसंहरति विविधेति । विविधैर्नानायोनिविशेषैर्विचित्रैर्जन्मशतैराहिताः संभ्रमा यस्मिंस्तथाविधे जगति अयं बंधुरिति ईक्षणं भेददर्शनं भ्रमदशैव विवल्गाति विजृंभते वस्तुतस्तु जीवभावदृष्ट्या त्रिभुवनस्थजीवजातं निजबंधुब्रह्मभावदृष्ट्या तु स्वयमेव सर्वमित्यबंधुपितरेवेत्यर्थः ॥६५॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे अष्टादशः सर्गः ॥१८॥ इहोक्तसिद्ध्ये पुण्यपावनाख्यानमुच्यते ॥ पुण्योपाख्यानं शोकापह पावनं समबोधयत् वं२

रबंधु
विविधजन्मशताहितसंभ्रमे जगति बंधुरितीक्षणं । भ्रमदशैव विवल्गति वस्तुतस्त्रिभुवनं निजबंधुरबंधु वा ॥६५॥ मोक्षोपाये उपशमप्रकरणे जीवन्मुक्तवर्णनं सर्गः ॥१८॥ श्रीवसिष्ठ उवाच ॥ अत्रैवोदाहरंतीममितिहासं पुरातनं । भ्रात्रोस्त्रिपथगातीरे संवादं मुनिपुत्रयोः ॥१॥ अयं बंधुरयं नेति कथाप्रस्तावतः स्मृतं । इतिहासमिमं पुण्यमाश्चर्यं शृणु राघव ॥२॥ अस्त्यस्य जंबूद्वीपस्य कस्मिंश्चिद्गिरिकुंजके । वनस्पत्प्रमहोत्तं सोमहेंद्रो नाम पर्वतः ॥३॥ कल्पद्रुमवनच्छायाविश्रांतमुनिकिंनरः ॥ शृंगैराततमाकाशं जितवान्यः समुन्नतैः ॥४॥ ब्रह्मलोकांतरप्राप्तशृंगकंदरवारिभिः । सामवेदप्रतिध्वानं धुंधुमैर्गायतीव यः ॥५॥ यः पयोमेदुरैर्मेघैः लसितैः शृंगकोटिषु । लताकुसुमसंप्रोतैः कुंतलैरिव राजते ॥६॥ यस्तटोड्डयनोत्कानां शरभाणां विजृंभितैः । विस्फूर्जितिगुहावक्त्रैः कल्याभागि हसन्निव ॥७॥

अत्र उक्तार्थविषये ॥१-२॥ गिरिकुंजके गिरिजालमध्ये निर्झरशोभमस्य भीपुंजके इतिपाठः स्तुतः ॥३॥ आततं विस्तीर्णमप्याकाशं शृंगैर्जितवान् व्याप्तवान् ॥४॥ ब्रह्मलोके त्वतिशयोक्तिः ॥५॥ पयोमेदुरैर्नीलैरिति यावत् लसितैर्विद्युद्भिर्भ्राजमानैः कुंतलैः केशैः ॥६॥ तटेषु उड्डयने उत्कानां सोत्कंठानां शरभाणां अष्टापदानां विजृंभितैर्विस्फूर्जति गर्जति ॥७॥

कंदरांतरेषु चारिभिः प्रतिध्वनिभिरित्यावर्तकल्लोलानां विलासः सगर्जितत्वं। ८। रत्नमये सानौ प्रस्थदेशे व्योमगंगा मंदाकिनी। ९। रत्नाद्रेर्मेरोस्तटमिव विद्यो
तमाने। १०। अभ्युदितं ज्ञानं परमात्मबोधो यस्य। मूर्तं धृतशरीरं। ११। द्वौ कचाविवेत्यभूतोपमा वाक्पतेर्बृहस्पतेः। १२। १३। ज्ञानवान्तत्त्ववित्। १४। अर्द्ध
प्रबुद्ध इत्यस्य विवरणं मौर्ख्याद्विगतः परे परमात्मवस्तुनि चानासः अंतराले दोलायितः स्थितः। १५। अकलिते प्राणिभिरायुःक्षयहेतुत्वेनालक्षिते

येन निर्झरनिर्ह्रादैः कंदरांतरसारिभिः समुद्रजलकल्लोलविलासो विजितोऽभितः ॥ ८ ॥ तस्यैकदेशे विततरत्नसानौ मनोरमे मुनि
भिः स्नानपानार्थं व्योमगंगावतारिता ॥ ९ ॥ तस्यास्त्रिपथगायास्तु तीरे विकसितद्रुमे रत्नाद्रितटविद्योते कचत्कनकपिंजरे ॥ १० ॥
आसीदभ्युदितज्ञानस्तपोराशिरुदारधीः मुनिर्दीर्घतपा नाम तपो मूर्तमिवापरं ॥ ११ ॥ मुनेर्बभूवतुस्तस्य पुत्रौ द्वाविंदुसुंदरौ पु
ण्यपावननामानौ द्वौ कचाविव वाक्पतेः ॥ १२ ॥ स ताभ्यां सह पुत्राभ्यां भार्यया च सहैकया उवास सरितस्तीरे तस्मिन्सफलपाद
पे ॥ १३ ॥ अथ कालेन तयोस्तस्य पुत्रयोर्ज्ञानवानभूत् पुण्यो नाम च यो ज्येष्ठो गुणज्येष्ठश्च राघव ॥ १४ ॥ पावनोऽर्द्धप्रबुद्धो
भूत्सर्वमर्ध्याम्बुजं यथा मौर्ख्याद्विगतो नासौ परे दोलायितः स्थितः ॥ १५ ॥ ततो बहुत्यकलिते काले कलितकारणे संवत्सरश
ते जीर्णदीर्घदेहलतायुषि ॥ १६ ॥ अस्माद्बहुरुभूताढ्याद्वृत्तांतशतभीषणात् रतिमुत्सृज्य संसाराज्जराजर्जरजीवितः ॥ १७ ॥

संवत्सरशतात्मके। देहलता च आयुश्च देहलतायुषी जीर्णे देहलतायुषी येन तथाविधे काले व्यतिक्रामति मुनिर्देहं जहाविति व्यवहितेन संबंधः। १६। ज
न्मजरामरणस्वर्गपातनरकादिवृत्तांतशतैर्भीषणात्संसाराद्रतिमुत्सृज्य कलनालक्षणायाः पक्षिण्याः नीडं देहं जहाविति परेणान्वयः। १७।



यथा वैवधिको वीवधवाहको गेहवीवधभारं जहातीति तथेत्यर्थः। विवधवीवधशब्दावुभयतो बद्धशिक्ये स्कंधवाह्ये काष्ठविशेषे वर्तेते। १८। प्रशांताः कलनारंभाः
यत्र चेत्यैः रिक्ताः रहिताः याः श्रितः तत्त्वज्ञैर्विचैतन्यानि तेषामास्पदं प्रतिष्ठाभूतं परमं पदं यथा पुष्पगंधः अंबरं आकाशं गच्छतीति तद्वत्। १९। २०
पतिना वितीर्णया उपदिष्टया योगयुक्त्या अम्लानां रोगजरादिम्लानिरहितामपि तनुं तत्याज। २१। अपि त्वसौ भर्तारमेव अनुययौ स्वयमपि त्वसौ भा

कलनापक्षिणी नीडं देहं दीर्घतपा मुनिः जहौ गिरिगुहागेहे भारं वैवधिको यथा ॥ १८ ॥ प्रशांतकलनारंभं चेत्यरिक्तं चिदास्पदं पदं
जगाम नीरागं पुष्पगंध इवांबरं ॥ १९ ॥ अथ भार्या मुनेर्देहं प्राणापानविवर्जितं दृष्ट्वा विलुलितं भूमौ विनालमिव पंकजं ॥ २० ॥
चिरमभ्यस्तया योगयुक्त्या पतिवितीर्णया तत्याज तनुमम्लानां षट्पदी पद्मिनीमिव ॥ २१ ॥ भर्तारमेवानुययौ जनस्यादृष्टतां
गता प्रभा गगनकोशस्थमस्तयातमिवोडुपं ॥ २२ ॥ मातापित्रोस्तु गतयोरौर्ध्वदेहिककर्मणि पुण्यस्तु स्थितोऽव्यग्रः पावनो दुः
खमाययौ ॥ २३ ॥ शोकोपहतचित्तोऽसौ भ्रमन्काननवीथिषु ज्यायांसमनवेक्ष्यैव पावनो विललाप ह ॥ २४ ॥ अथौर्ध्वदेहिकं कृत्वा
मातापित्रोरुदारधीः आययौ विपिने पुण्यः पावनं शोकलालसं ॥ २५ ॥ पुण्य उवाच। किं पुत्र घनतां शोकं नयस्यश्रुध्येककारणं
बाष्पधाराधरं घोरं प्रावृड्काल इवांबुजं ॥ २६ ॥ पिता तव महाप्राज्ञ गतः सार्द्धं स्वभार्यया स्वामेव परमामात्मपदवीं मोक्षनामिकां ॥ २७ ॥

वं प्राप्त इति यावत्। नहि ब्रह्मविदो देशांतरे गतिरस्ति न तस्य प्राणा उत्क्रामंत्यत्रैव समवलीयंत इति श्रुतेः। २२। अव्यग्रः विशोकः। २३। ज्यायांसं ज्येष्ठभ्रातरं अ
नवेक्ष्य तद्धैर्यमानानंव्येति यावत्। २४। २५। पितृसमो ज्येष्ठ इति शास्त्रात् पुत्रेति संबोधनं शोकं दुःखमश्रूणां च। घनतां निबिडतां मेघतां च। अत एव
बाष्पधाराधरं आध्येककारणमिति च श्लेषात् साधारणो विशेषणं अंबुजं अंबुजं संबोधनं अंबुजसदृशनेत्र संबोधनं च। २६। २७।

स्थानं तु स्मृत्यादिकालत्रयेप्याधारभूतं जंतूनां जननधर्मिणां प्राणिनां विजितात्मनां ब्रह्मविदां रूपं स्वरूपं अत एव न पितुः शोच्यते त्याह स्वभाव मिति २८ ईदृशी इयमेव मम माता अयमेव पितेत्येवरूपा यत्तया भावनया २९ निःसंख्याः संख्यातुमशक्याः पुत्रा ययोः ३० निम्नानि गंभीर स्थानानीव ३१ हे पुत्र त्वया अन्येषामपि ३२ विटपग्रहणेन विटपी लक्ष्यते विटपिनोरिवेति वा पाठः ३४ न शोच्यं तत्त्वयेति शेषः ३५ ना गते

तत्स्थानं सर्वजंतूनां तद्रूपं विजितात्मनां स्वभावमभिसंपन्ने किं पितर्यनुशोचसि २८ ईदृशी तु त्वया बद्धा भावने हविमोहजा संसारे यद्दशोच्योपि त्वया तातोनुशोच्यते २९ न सैव भवतो माता नासावेव पिता तव न भावानेषतनय
त्वयोर्निःसंख्यपुत्रयोः ३० मातापितृसहस्राणि समतीतानि ते सुत बहून्यंबुप्रवाहस्य निम्नानीव वने वने
३१ असंख्यपुत्रयोर्नैव भवानेव सुतस्तयोः सरित्तरंगवत्पुत्रगता पुत्रगणान्तरं ३२ अस्मत्पित्रोरतीतानि
५ पुत्रलक्षाण्यनेकशः पत्रकोरकवृंतानि लता विटपयोरिव ३३ मित्रबांधववृंदानि जंतोर्जन्मनि जन्मनि
कृतावृत्तावतीतानि फलानीव महातरोः ३४ शोचनीया यदि स्नेहान्मातापितृसुताः सुत तदतीतान्न शोच्यंते किं
मन्त्रसहस्रशः ३५ प्रपंचोयं महाभाग दृश्यते जागते भ्रमे परमार्थेन ते प्राज्ञ नास्ति मित्रं न बांधवाः ३६

जगत्कल्पनानिमित्ते भ्रमे मोहे सत्येव दृश्यते परमार्थेन परमार्थतस्तु तेन तव तथा चोक्तं वार्तिके अविद्यास्तीत्यविद्यायामेवासित्वा प्रकल्प्यते ब्रह्मदृष्ट्या त्वविद्येयं न कथंचन युज्यत इति ३६ राम॰
५६

॥ ।

परमार्थेन परमार्थदृष्ट्या मरोर्मरुत्वादेव पयोलवा न संतीति तेषु तरां तथा ब्रह्मसाभाव्यादेव नाशो नास्ति तव तत्त्वबोधे सुतरामिति द्योतनाया पिशब्दः ३७ लक्ष्मीः राजादिसंपदः स्वप्नरवता इति शेषः ३८ ३९ स्वसंकल्पलक्षणोयं उपतापः संनिपातभ्रमः दुःख्याः पुरो दृश्यंते ४० अज्ञानलक्षणेनातपेन विस्तीर्णे आच्छ
न्ने मरौ मरुभूमिसदृशे आत्मनि स्वसंकल्पवासनानामकं मरीचिवारि मृगतृष्णोदकं ४१ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे एकोनविंशः सर्गः १९

न नाश इह हि भ्रातः परमार्थेन विद्यते महत्यपि विगत तेमरौ विपयोलवाः ३७ एतायाः प्रेक्षसे लक्ष्मीश्छत्रचामरचंचलाः स्वप्न
सप्त महा बुद्धे दिनानि त्रीणि पंच वा ३८ हस्यात्तु पारमार्थिक्यं पुत्र सत्यं विचारय नैव त्वं न वयं चैव भ्रांतिमंतः परित्यज ३९ अयं
गतो मृतश्चायमिति दुर्दृष्टयः पुरः स्वसंकल्पोपतापोत्था दृश्यंते न तु सत्यतः ४० अज्ञानविस्तीर्णमरौ विलोलं शुभाशुभ
संरमयैस्तरंगैः स्ववासनानाममरीचिवारि परिस्फुरत्येतदनंतरूपं ४१ मोक्षोपायेषु उपशमप्रकरणे पावनबोधनं सर्गः
१९ पुण्य उवाच कः पिता किं च वा मित्रं का माता के च बांधवाः स्वबुद्ध्या वावध्यं ते वात्स्यया जनपासवः १ बंधु मित्रसुतस्ने
हद्वेषमोहदशामयः स्वसंज्ञामात्रकेणैव प्रपंचोयं वितन्यते २ नानायोनिषु जन्मानि पावनस्यात्मनस्तथा इह पुण्येन कीर्त्यंते शो
कमोहापनुत्तये शोकस्य मोहमूलकत्वान्मोहापनयनेनैवास्य शोकोपनेय इति मन्यमानः पुण्य तद्विषयाणां पित्रादीनामनिर्वचनीयत्वान्मिथ्यात्वं प्र
तिज्ञाय ज्ञानापनोद्यतमाह कः पितेति कः किं स्वरूपः तत्त्वतो निर्वक्तुमशक्याः सर्वेपीत्यर्थः स्वबुद्ध्या स्वभ्रांत्यैव अवधार्यंते उत्थाप्यंते अथवा स्ववि
वेकबुद्धिलक्षणया वान्यया स्व जगर्मा सर्वोवध्यंते निरस्यंते १ स्नेहद्वेषमोहदशालक्षणाः आमयो रोगः स्वसंज्ञा स्वकृतः संकेतस्तन्मात्रकेणैव २

वा॰टी॰उप॰ उक्तमुपपादयति बंधुस्ते इति। भावितः दृढभावनया संकेतितः परस्ते शत्रुस्ते। यथा विषकृमिभिर्विषस्य जीवनहेतुत्वेन दृढभावनात्तान्प्रति अमृतदशा अन्येषां तद्विपरीत
॥५७॥ भावनाद्विषदशा तेन भावनिबंधिनी स्थितिरित्यर्थः॥३॥ आस्तां बंधुत्वचिंता तदनुशोचिनस्तव स्वतत्त्वविमर्शमात्रेणाऽतेनिरसितुं शक्या इत्याशये
नाह एकत्वे इति। सर्वदेहेष्वेकत्वे अभिन्नत्वे॥४॥ ननु अहं कथं सर्वदेहेष्वेक इति चेदहं मन्यसे बद्धएव कोऽसौ विनिश्चिनु शोच्यो हरक्तेति रक्तादिजडसंघातो देहो

बंधुस्तेऽभावितो बंधुः परस्ते भावितः परः। विषामृतदशेवेह स्थितिर्भावनिबंधनी॥३॥ एकत्वे विद्यमानस्य सर्वगस्य किलात्मनः। अयं बंधुः परश्चायमिति मोहकलनाकुतः॥४॥ रक्तमांसास्थिसंघातो देहो हे वाऽस्थिपंजरात्। कोऽहं स्यामिति चित्तेन स्वयं पुत्र विचारय॥५॥ दृष्ट्या तु पारमार्थिक्या न कश्चित्त्वं न वास्म्यहम्। मिथ्याज्ञानमिदं पुण्यः पावनश्चेति वल्गति॥६॥ कस्ते पिता कश्च सुहृत्का माता कश्च वा परः। स्वस्यानंतविततस्य किमस्वं किं स्वमुच्यते॥७॥ अस्ति चेत्त्वं तदन्येषु यातेषु बहुजन्मसु। ये बांधवो ये विभवाः किं तान्नपि न शोचसि॥८॥

दन्यश्चेतनस्वभावः कोऽहं स्यामिति विचारयेत्यर्थः॥५॥ त्वं पावनशब्दवाच्यः देहादिर्न कश्चिन्न अहं पुण्यशब्दवाच्यः मिथ्याज्ञानं देहात्मता भ्रमस्तद्वल्गति
प्रथते॥६॥ एवं पित्रादिशरीरमपि विमर्शे भ्रांतिरेवेत्याह क इति। यदि तु देहाद्युपाधिनिष्कृष्टं चिदाकाशमेवाहं त्वं पित्रादयश्चेति मन्यसे तदा मम पिता मम भ्रातेत्यादिभे राम॰
दघटितसत्त्वादिसंबंधो न घटत एवेत्याह स्वस्येति। खस्य चिदाकाशस्य॥७॥ लिंगशरीराण्येवान्येवाहं मद्बांधवाश्चेति चेत्तत्राह अस्ति चेदिति। त्वं मद्धारहितलिंगात्मा ॥२७॥
अस्ति चेत्तर्हि। यातेष्वतीतेषु किं किमर्थं न शोचसि॥८॥

---

जन्मांतरबंधून्प्रपंचयति बभ्रुवुरित्यादिना। मार्गाः मृगयोनिजा जीवाः॥९॥ अंभोजिनीषु पद्मवनीषु नद्यादितटीषु हंसस्य ते तेत्तत्कालप्रसि
द्धाः हंसा बांधवो बभ्रुवुः नदीष्वंभोधियोषितामिति पाठे नदीनां तटीष्वित्यर्थः॥१०॥ अन्यत्रान्येषु जन्मसु अलमस्य ते बांधवो बभ्रुवुः॥११॥

बभ्रुवुस्ते सुपुष्पासु स्थलीषु मृगयोनिषु। बहवो बांधवो मार्गास्तान्कथं नानुशोचसि॥९॥ बभ्रुवुस्ते सपद्मासु तटीष्वंभोजिनीषु ते। हंसस्य बांधवो हंसास्तान्कथं नानुशोचसि॥१०॥ बभ्रुवुस्ते लमन्यत्र विचित्रासु वनराजिषु। बहवो बांधवो वृक्षास्तान्कथं नानुशोचसि॥११॥ बभ्रुवुस्ते महाद्रीषु शिखरेषु महीभृताम्। बहवो बांधवाः सिंहास्तान्कथं नानुशोचसि॥१२॥
श्री बभ्रुवुस्ते स्रवंतीषु सरःस्वंभोजिनीषु च। बहवो बांधवा मत्स्यास्तान्कथं नानुशोचसि॥१३॥ बभ्रुविथ दशार्णेषु कपिलो वनवानरः। राजपुत्रस्तुषारेषु पुंड्रेषु वनवायसः॥१४॥ हैहयेषु च मातंगस्त्रिगर्तेषु च गर्दभः। शाल्वेषु सारमापुत्रः पतत्री सरलद्रुमे॥१५॥ विंध्याद्रौ पिप्पलो भूत्वा घुणो भूत्वा महावटे। मंदरे कुक्कुटो भूत्वा विप्रो जातोऽसि कंदरे॥१६॥

स्रवंतीषु नदीषु॥१३॥ इदानीं भ्रातुर्जन्मभेदान्योगबलेन दृष्टान्विशिष्य स्मारयन्नाह बभ्रुविथेति। दशार्णतुषारपुंड्रादयो देशविशेषाः॥१४॥
सारमा शुनी तस्याः पुत्रः। पतत्री पक्षी अथवा व्याघ्रस्त्वेव॥१५॥ घुणः काष्ठकीटकः। अर्थान्मंदरस्यैव कंदरे दरीप्रदेशे॥१६॥

वा॰टी॰उप॰ ५८

पुष्करेषु प्रसिद्धे । ब्रह्मणः प्रजापतेर्धुरे जातः पशुरिति शेषः पात इति वा पाठः ॥ १७ तालतरोः कं दोमस्त्वं तत्र तः त्रीण्यपि जन्मानि विंध्यवने १८
भूर्जवृक्षस्य तन्वी मृदुला या त्वक् तद्ग्रंथिप्रभवे कोटरे बिले १९ ॥ अर्थात्स्वदेशसीमायाः अंते यः कुग्रामस्तत्र सेयुष्कगोमयोत्करे २० लीनं अ

कोशलेषु द्विजो भूत्वा भूत्वा वंगेषु तित्तिरिः ॥ अश्वो भूत्वा तुषारेषु जातस्त्वं ब्रह्मणो धुरे ॥ १७ ॥ यः कीटस्तालकं दांतर्मशको यत्र दुं
वरे ॥ यः शाबको विंध्यवने सत्वं पुत्र ममानुज ॥ १८ ॥ हिमवत्कंदरे भूर्जे तन्वतुलग्रंथिकोटरे ॥ पिपीलिको यः षण्मासान्सो यं त्वमनु
जो मम ॥ १९ ॥ स्थितः सीमांतकुग्रामगोमये यश्च वृश्चिकः ॥ सार्द्धं संवत्सरं सा यो सो यं त्वमनुजो मम ॥ २० ॥ पुलिंदीस्तनपीठेषु नि
लीनं येन कानने ॥ षट्पदेनेव पद्मेषु सो यं त्वमनुजो मम ॥ २१ ॥ एतास्त्वन्यासु बह्वीषु जनयोनिषु पुत्रक ॥ जातो सि जंबूद्वीपे स्मि
न्पुरा शतसहस्रशः ॥ २२ ॥ इत्थं तवात्मनश्चैव प्राक्तनं वासनाक्रमं ॥ पश्याम्यहं स्मयाबुद्ध्या सम्यग्दर्शनशुद्धया ॥ २३ ॥ ममापि
बहवो बहुधा योनयो मोहमंथराः ॥ समतीताः स्मराम्यद्य ता ज्ञानोदितया दृशा ॥ २४ ॥ त्रिगर्तेषु पृथुको भूत्वा बको भूत्वा सरित्तटे
वनेषु लावको भूत्वा जातो हमिह कानने ॥ २५ ॥ भुक्त्वा पुलिंदतां विंध्ये कृत्वा वंगेषु वृक्षतां ॥ उष्ट्रत्वमपि विंध्याद्रौ जातो हमिति का
नने ॥ २६ ॥ यश्चातको हिमगिरौ यो राजा पौंड्रमंडले ॥ व्याघ्रो मः सह्यकुंजेषु स एवाहं तवाग्रजः ॥ २७ ॥

थ पुलिंदी शिशुजन्म प्राप्येति गम्यते । २१ । २३ । भ्रातृजन्मोक्तिमुपसंहृत्य स्वजन्मभेदान्वक्तुमारभते ममापीति । मोहमंथराः अज्ञानजडाः २४ लावकः राम॰ ५८
क्षुद्रपक्षिविशेषः २५ वृक्षतां कृत्वा वृक्षजन्म भुक्त्वेत्यर्थः । उष्ट्रत्वं उष्ट्रजन्मस्तु अत्र पाठे पिरतु उष्ट्रत्वमुष्ट्रत्वमेव भुक्त्वेह जात इत्यर्थः २६ । २७

---

इहास्मिन्जन्मनि । २८ । तुषारेषु हिमवत्प्रदेशेषु नृपत्वं हिरण्यशीलेन मंडलिकेनेत्यर्थः ॥ अव्युत्पन्नस्य स्वस्य लोकवंचनाय व्युत्पन्नाभ्यां प्रख्यापनं दंभ
स्तत्र स्थितेन मया स्तुतोक्ता ॥ मयेदं कथ्यते तत्वेति पाठे तु स्पष्टं २९ । जन्मनः जन्मभेदरूपाः भ्रांतिविलासाः ३० उपलक्षणमेतद्यौ ज्ञानिर्वस्थि
ते इति । ३१ । तान्प्राक्तनान्बंधून्कान् शोचावः कान्वा बंधून्नतिशयेन शोचावः न कांश्चिदपि शोचावः यत ईदृश्येव जगद्गतिरित्यर्थः ॥ ३२ ॥ ३३ किं प्रमा

यो भूद्घोरदशवर्षाणि यो साहो मासपंचकं ॥ यः सूपानां शतं सिंहः स एवाहं तवाग्रजः ॥ २८ ॥ अंधग्रामपकौरेण तुषारेन्द्रपराजिना ॥ स्त्री
शैलाचार्यपुत्रेणेदं भवत्कथ्यते मया ॥ २९ ॥ सर्वे विविधसंसारविविधाचारचेष्टिताः ॥ विलासा जन्मनो भ्रांतेः स्वयं नैप्राक्तना मया
३० एवं स्थिते जगज्जाता बांधवाः शतशो गताः ॥ पितरो मातरश्चैव भ्रातरः सुहृदस्तथा ॥ ३१ ॥ कांस्तान्वयमनुशोचावो न शोचाव
श्च कानपि ॥ बंधून्निहातिशोचाव ईदृश्येव जगद्गतिः ॥ ३२ ॥ अनंताः पितरो याता यातास्त्वनंताश्च मातरः ॥ इह संसारिणां पुंसां वन
पादपपर्णवत् ॥ ३३ ॥ किं प्रमाणमतः पुत्र दुःखस्याथ सुखस्य च ॥ तस्मात्सर्वं परित्यज्य तिष्ठावः स्वच्छतां गतौ ॥ ३४ ॥ सप्रपंचभाव
नां त्यक्त्वा मनस्याहमिति स्थितां ॥ तां गतिं गच्छ भद्रं ते यां प्रातिगजिकोविदाः ॥ ३५ ॥ इहाजीवं जवीभावं पतनोत्पातनात्मकं ॥ मानु
शोचेति सुधियश्चिरं वल्गाति केवलं ॥ ३६ ॥ भावाभावविनिर्मुक्तं जरामरणवर्जितं ॥ संस्मरात्मानमव्यग्रो मा विमूढमना भव ॥ ३७ ॥

तां अवधिः सर्वशोकं दृश्यमात्रं वा ३४ गतिकोविदाः । आत्मावगतिकुशलाः ३५ पतनमधोगतिरुत्पतनमूर्ध्वगतिस्तदात्मकं आजीवं जवीभावम
विश्रांतभ्रमणं केवलं निरभिमानतया वल्गंति ३६ ॥ ३७ ॥

त्वं आत्मैवासि नान्यः अनात्मभूतदेहादिः कश्चित्त्वमसीत्यर्थः ३८ नतैकवत्नानाभिनयाः अभिनिवेशचेष्टाः तद्दायिनस्तत्कारिणः अज्ञा एव
एवनराः साधुस्वभावः पुरुषार्थसारता बुद्धिस्तत्समन्विता इत्यर्थः ३९ तज्ज्ञास्तत्त्वज्ञास्तु तटस्थद्रष्टवदुदासीनाः प्रेक्षका एव अत एव मासि
धर्मे व्यवस्थिताः ४० निशायाः आगमे आगमने सति आलोककर्मणां प्रकाशनक्रियाणां यथा दीपाः संनिधिमात्रेण कर्तारोपि अस्था
प्रियमाणत्वादकर्तारः एवं तज्ज्ञाः लोकव्यवहारस्थिताविन्त्यर्थः ४१ दृष्टांतरमाह प्रतिबिंबे इति यथा कादिगतदर्पणरत्नाद्याः प्रतिबिंबोपाधयः

न ते दुःखं न ते जन्म न ते माता न ते पिता आत्मैवासि न मद्बुद्धे त्वमन्यः कश्चिदेव हि ३८ अस्यां संसारयात्रायां नानाभिनयदायिनः अ
ज्ञा एव नराः साधुस्वभावसमन्विताः ३९ मध्यस्थदृष्टयः स्वस्था यथाप्राप्तार्थदर्शिनः तज्ज्ञास्तु प्रेक्षका एव मासि धर्मे व्यवस्थिताः
४० कर्तारोपि न कर्तारो यथा दीपा निशागमे आलोककर्मणामेवं तज्ज्ञा लोकस्थिताविह ४१ प्रतिबिंबेन दृश्यंते स्वात्मा
वगतैरपि यथा दर्पणरत्नाद्यास्तथा कार्ये महाधियः ४२ सर्वैषणामयकलंकविवर्जितेन स्वस्थात्मभावकलितेन हृदंबुजम
ध्ये पुत्रात्मनात्मनि महामुनिनामुनैव संत्यज्य संभ्रममलं परितोषमेहि ४३ मोक्षोपायेषूपशमप्रकरणे पावनविज्ञानप्राप्ति
स्यात्मनो बिंबभूतसर्वदेहगतैः सर्वैर्देहैः महाधियस्तात्त्विकास्ते प्रतिबिंबे बिंबधर्मांतरवत्स्वयं निविष्टा न दृश्यंते तद्वत्स्वात्मन्यध्यस्तलोका १ र्नाम सर्गः २०
मैककर्तारोपि महाधियः स्वयमभिनिविष्टा न भवंतीत्यर्थः ४२ हे पुत्र सर्वैरेषणामयकलंकैर्विवर्जितेन अत एव मुनिना मननशीलेन आत्मना स्वेनैव हृदं राम॰
बुजमध्ये स्वस्थात्मस्वभावेन कलितेन साक्षात्कृतेन संसारसंभ्रमं अलं निःशेषं त्यक्त्वा अमुना परिशिष्टेनात्मनैव परितोषमेहीत्यर्थः ४३ इति श्रीवा ५९
सिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे विंशतितमः सर्गः २०

तल्लापाशस्य यो मोक्षो ह्याशया चिन्त्यते तमः निराशस्यात्मशरणस्य स्वतो मुक्तिरितीर्यते प्रबोधं परिनिष्ठितं आत्मनिश्चयं १ यावदिष्टं प्रारब्धस्य मप
र्यंतमिति यावत् २ गतस्नेहो क्षीणतैलः ३ उक्तमाख्यानमुपसंहृत्य प्रकृते योजयति एवमिति धनवंधुना धनवंधुसमस्तहः आः इति विस्मये निपातः
गलतेशोच्यत्वेनोपादीयते ४ आसां सर्वशोकादिमलभृतानां प्रतिविषयमनंतानां परिपालनं विषयसंपादनैरभिवर्द्धनं ५ विपर्ययचिंतनमेवात

श्रीवसिष्ठ उवाच एवं प्रबोधितस्तेन तदा पुण्येन पावनः प्रबोधमाप प्राकाश्यं प्रभात इव भूतलं १ उभावपि ततः सिद्धौ ज्ञान
विज्ञानपारगौ विचेरतुर्वने तस्मिन्यावदिष्टमनिंदितौ २ ततः कदाचित्कालेन निर्वाणपदमागतौ तौ विदेहौ गतस्नेहौ दी
पाविवेशमं गतौ ३ एवं प्राग्भुक्तदेहानामनंतधनबंधुता आः कैः क्रियंते नाम्ना किं वा संत्यज्यते न घ ४ तस्मादासां
[illegible] परिपालनं ५ चिंतनेनैधते चिंता विधनेनेव पावकः नश्यत्यचिं
तनेनैव विनेंधनमिवानलः ६ ध्येयत्यागरथमारूढः करुणोदरमादृशा लोकमालोकयन्दीनमातिष्ठोत्तिष्ठ राघव ७
एषा ब्राह्मी स्थितिः स्वच्छा निःकामा विगतामया एनां प्राप्य महाबाहो विमूढोपि न मुह्यति ८

त्यागिन्यागइत्याशयेनाह चिंतनेनेति एधते वर्द्धते ६ ध्येयत्यागः प्राग्वर्णितध्येयवासनात्यागः करुणा सर्वभूतानुकंपा आतिष्ठ अनुतिष्ठ प्र
कृतव्यवहारमिति शेषः ७ विमूढो व्यवहारेष्ववतुगेन मुह्यति ८

वा॰टी॰उ॰प॰ विवेकलक्षणं सुहृदं मित्रं धियं परमार्थबोधलक्षणां प्रियसखीं ॥ ९ ॥ विनिवारिताः परित्यक्ताः सर्वे अर्था धनानि येन ॥ अपि हस्तिना ॥ अंतः स्नेहविच्छेदादपहस्ति
॥६०॥ ताः हस्तेन कर्कुट्टिमणोऽद्य निरस्ता इव बांधवा येन आ सुदुरूरतिसंकटाइन्नयजितमितिशेषः ॥ १० ॥ उन्नयेन उत्कर्षं नयेत विषयगर्तादुद्धरेद् ॥ ११ ॥ तत्स
र्वदुःखप्रशमनोपलक्षितनिरतिशयानंदलाभलक्षणं फलं ॥ महत्त्वं तुच्छविषयानभिलाषस्तेनोपबृंहिताद् उपचितात् ॥ १२ ॥ पाताः अधोगतयः उत्पतना
न्यूर्ध्वगतयः दोलनानि मर्त्यलोके एव जन्मपरंपरया भ्रमणानि च तैस्तन्निमित्तभूतैर्विषयाभिलाषैर्ये पतंति तेषां मनः सदैव गतज्वरं प्राप्तसंताप मेव न
कदाचिद्विश्राम्यतीत्यर्थः ॥ अथवा सर्वश्लोकान्तेष्वनुवर्तयेन पतंति तेषां मनोगतज्वरं निःसंतापमिति व्याख्येयं ॥ पुनंति मतं ते इति वा पाठे पातंत्यसु

एकं विवेकं सुहृदमेकां प्रौढसखीं धियं ॥ आदाय विहरन्नेवं संकटेषु न मुह्यति ॥ ९ ॥ विनिवारितसर्वार्थोऽदपहस्तितबांधवात्
न स्वधैर्यादृते कश्चिदभ्युद्धरति संकटात् ॥ १० ॥ वैराग्येणाथ शास्त्रेण महत्त्वादिगुणैरपि ॥ यत्नेनापद्विघातार्थं स्वयमे
वोन्नयेन्मनः ॥ ११ ॥ न तत्त्रिभुवनैश्वर्यान्न कोशाद्रत्नधारिणः ॥ फलमासाद्यते चित्तादन्महत्त्वोपबृंहितात् ॥ १२ ॥
न देवेतस्मिन्जगत्कुक्षौ पातोत्पातनदोलनैः ॥ पतंति पुरुषा ये वै मनस्तेषां गतज्वरं ॥ १३ ॥ पूर्णे मनसि संपूर्णं जगत्सर्वं सुधा
द्रवैः ॥ उपानद्गूढपादस्य ननु चर्मास्तृतेव भूः ॥ १४ ॥ सातयंतीति ये विषयरागास्ते पातोत्पातनास्तेभ्यो दोलनैः रूक्षे पणो श्रत्या हारोपायेरा
त्मनि स्थैर्योपादनेन येमनः पुनंति यतंते वा तेषां मनोगतज्वरं शांतत्रिविधतापं भवतीत्यास्थेयं ॥ १३ ॥ ननु संतापहेतुष्वाध्यात्मिकाधिदैविकाधिभौतिके राम॰
षु रोगवर्षाज्वरादिषु सत्सु कथं मनः प्रशांतिमात्रेण सर्वतापनिवृत्तिस्तत्राह ॥ पूर्णे इति त्रिविधाऽपि संतापा मनोदोषमूला एव मनसि विशुद्ध ६०
ब्रह्मामृतरसपूर्णे सति सर्वं जगदानंदपूर्णमेव भातियथा सदुकोपानद्व्याप्तसंवृतचरणस्य कुशकंटकादिसंकुलापि सर्वा भूर्मृदुलतरचर्मास्तृतेव भाति तद्व
दित्यर्थः ॥ १४ ॥

न आशावशानुगमिति छेदः रिक्ततां शुष्कार्णवोदरकल्पतां ॥ सरो मलं भिन्नतडागपंकः सरोजलमिति वा पाठः ॥ १५ ॥ रिक्ततामेतीत्येतद्दृष्टांतेन विवृणोति हृदयमिति
कोटरस्य प्रकटीकरणमात्रांतर्गतलोभदैन्यादिदोषाणां ग्राहभुजंगादीनां च स्फुटं प्रकाशनं ॥ १६ ॥ स्फारे धर्मज्ञानवैराग्यशांतिदांत्यादिपुष्पफलपल्ल
वादिसमृद्धे चित्ततरौ मनोवृक्षे हृदूतं मनोबुद्धिरहंकारश्चित्तमिति चतुर्विधं रक्षयति मंतःकरणकं ॥ १७ ॥ निःस्पृहं प्रशंसतिपद्मेत्यादिना ॥ त्रिजगत्रे

वैराग्यात्पूर्णतामेति मनो नाशावशानुगं ॥ आशया रिक्ततामेति शरदेव सरोमलं ॥ १५ ॥ हृदयं शून्यतामेति प्रकटीकृतकोटरं ॥
अगस्तिपीतार्णववदाशाविवशचेतसां ॥ १६ ॥ यस्य चित्ततरोः स्फारे स्तोत्र पलमर्कटी ॥ न वल्गति महत्तस्य राजते हृद्वनं
ततं ॥ १७ ॥ पद्माक्षकोशं त्रिजगद्गोष्पदं योजनव्रजं ॥ निमेषार्धं महाकल्पः स्पृहारहितचेतसां ॥ १८ ॥ शीततानशी
तांशो न हिमाचलकंदरे ॥ न रंभा चंदनावल्यां निःस्पृहेषु मनस्सु या ॥ १९ ॥ न तथा भाति पूर्णेंदुर्न पूर्णः क्षीरसागरः ॥
न लक्ष्मीवदनं कांतं स्पृहाहीनं यथा मनः ॥ २० ॥ यथा दलेखा शशिनं सुधालेपं मषी यथा ॥ हृदयं स्वयमेवांतर्नरमा
शापिशाचिका ॥ २१ ॥ आशारव्याश्चित्तवृक्षस्य शाखाः स्थगितदिक्तटाः ॥ ता समुच्छिन्ना स्वरूपत्वं याति चित्तमहाद्रुमः ॥ २२ ॥

लोकत्रयमपि पद्मबीजकोशवदल्पमिति यावत् ॥ अपरिच्छिन्नब्रह्मसुखदर्शी ब्रह्मांडांतर्गतसुखलवानामल्पतरत्वात् एवं नित्यसर्वगतब्रह्मदर्शी देशकालपरिच्छि
न्नाधिपत्यादिविभवोऽप्यल्पत्वस्य वेत्ताशये नाहगोष्पदमिति ॥ १८ ॥ शीततानिस्तापाहारः रंभाकदल्यः चंदनतरवश्चंदनावल्यां तद्वनेयथायोग्यं तेतसंश्लेषेवा ॥ १९ ॥ २० ॥
अष्टलेखा मेघराजिः मषी कज्जलं द्रवः दूषयति मलिनयति ॥ २१ ॥ स्थगितेति दिक्तटाः आच्छादितदिगंताः ॥ अरूपत्वं ब्रह्मतां स्याणुतां च ॥ २२ ॥

वा.टी.उप. ६१

निरोधककुवृक्षोछिन्नेनदधःप्ररूढसद्वृक्षइवपश्चाद्धैर्येशतशाखतांप्रायातिवृद्धिंगतेइतियावत् ॥२३॥ अनन्तधैर्याभिवृद्धिःकिंतत्राहअनन्त
मितेति ॥ अनन्तमितधैर्येणअभिवृद्धवैराग्यजितेन्द्रियत्वेदृढसहिष्णुत्वादिधैर्यवतागुरुरूपेण ॥२४॥ प्ररोहंपुनःप्ररोहावकाशंनददासिचेत्तर्हिजन्मा
दिभयंनास्तीत्यर्थः ॥२५॥ ततांपरामपिचित्तेप्रविष्टयाकौशिकपक्षिणीत्युल्कयायदाचिद्गृहेपिंगल्काप्रविष्टाचेन्नस्वदारिद्र्योपप्लवाद्यमंगलानि
भवंतीतिज्योतिःशास्त्रादौप्रसिद्धंसाचदेहांतःस्थितेनिरंतरंप्रविश्यसर्वव्यवहारेषुकुक्ष्यातिष्ठतितदातयाअमंगलानिसर्वाण्येवअलंविस्ता

छिन्नजस्त्रामहाशाखेचित्तस्थाणोस्थितिंगते। एकरूपेणैर्माधैर्येभयातिशतशाखतां ॥ २३ ॥ अनन्तमितधैर्येणतेनवि
वेक्षयंगते। तत्पदंप्राप्यतेरामयत्रनाशोनविद्यते ॥२४॥ एतासांचित्तवृत्तीनामाशानामुत्तमाशय ॥ नददासिप्ररोहंचेत्तद्
येनास्तिराघव ॥२५॥ चित्तंवृत्तिविहीनंतेयदायातिनचित्तता। तदामोक्षमयीमंतःसत्तामाप्नोषितांततो ॥२६॥ चित्तंकौ
शिकपक्षिण्यारस्त्राप्याक्षुब्धयांतरे। अमंगलानिविस्तारमलमायांतिराघव ॥२७॥ चिंतनंवृत्तिरित्युक्तंवर्जनीयवि
तमाशया ॥ चित्तवृत्तिमतोलाशांत्यक्त्वानिश्चिंततांव्रज ॥२८॥ रमायांतीतिकिंवाच्यमितिभावः ॥२७॥ ननुआशात्यागमात्रेण
कथंचित्तोपशमःसंकल्पविचिकित्साध्यस्त्यादिवृत्तिभिरपितत्प्ररोहस्यदुर्वारत्वादित्याशंक्यसर्ववृत्तीनामाशामूलतांप्रदर्शनेनपरिहरति
चिंतनमितिसमाध्यारंभकालेवाप्यकरणानांनिरुद्धत्वान्नचाक्षपादिवृत्तिप्रसक्तिरस्तीतिचिंतनमेवतदाचित्तस्यवृत्तिःपरिशिष्यतइतिप्रागुक्तं
चिंतनेचचित्तंआशयैवप्रवर्ततेआशास्यानामेवविषयाणांचिंतनदर्शनात्संकल्पादिवृत्तीनांचचिंतितार्थविषयतयाचिंतापूर्वकत्वात्चिंतामूलभू
तांआशाख्यांचित्तवृत्तिंत्यक्त्वानिश्चिंततांव्रजेत्यर्थः ॥२८॥

राम. ६१

ज्वालौल्यक्षयेवज्रैरिवहृत्तिक्षयेमनस्तुपशमःसिध्यतीत्याहयोपयेति। तयैवविनागृहेतेराजांतिकनिरोधेनक्षयीअपक्षमक्रमेणनश्यति ॥२९॥
उक्तमर्थंसंगृह्योपसंहरतिप्रशमितेतिहेमहात्मन् ॥ त्वंप्रशमितपुत्रवित्तलोकादिसकलैषणःसन्भवबंधंआशाख्यमपास्यमुक्तचित्तोजीवन्मुक्तो
भवत्यतःकुत्सिताःआशाःमनसिविद्यमानाःआत्मनोनिगडरज्जवोनिगडदृढरज्जुबद्धबंधनहेतवःतासुपरिगलितासुसर्वासुकोनमुक्तःसर्वोपिजंतु
र्मुच्यतएवेत्यर्थः ॥३०॥ इतिश्रीवासिष्ठतात्पर्यप्रकाशेउपशमप्रकरणेएकोविंशःसर्गः ॥२१॥ बल्योरव्यानमुपक्रम्यपातालमिहवर्ण्यतेबले

योपयात्यर्त्तितेहत्याप्ततयैवविनाक्षयी ॥ अतश्चित्तोपशांत्यर्थंतद्वृत्तिंप्रक्षयंनय ॥२९॥ प्रशमितसकलैषणोमहात्मन्भवभवबंध
मपास्यमुक्तचित्तःमनसिनिगडरज्जवःकदाशाःपरिगलितासुवतासुकोनमुक्तः ॥३०॥ मोक्षोपायेउपशमप्रकरणेतस्या
चिकित्सायोगोत्पत्तिःसर्गः ॥२१॥ श्रीवसिष्ठउवाच ॥ अथवारघुवंशाख्यनभःपूर्णनिशाकर। बलिवद्बुद्धिभेदेनज्ञानमा
सादयाफलं ॥१॥ श्रीरामउवाच। भगवन्सर्वधर्मज्ञत्वत्प्रसादान्मयाहरिः। प्राप्तःप्राप्यमखिलंविश्रांतेचामलेपदे ॥२॥ श
रदीवांबरादभ्रमदभ्रंममचेतसः। विमोहजपगतेसर्वंत्वत्प्राख्यंतन्महातमः ॥३॥

स्वराज्यंनिर्वेदात्मेरुशृंगेविचारणा इदानींपदप्राक्षकोशंविजगदितिविवेकोदयेत्रैलोक्यैश्वर्यस्याप्यत्वंपदुक्तंतदुपपादनायबल्याख्यानंवकु
कामोवासिष्ठोभूमिकांरचयति। अथवेतिबुद्धिभेदेनअकस्माद्विचारोदयेन ॥१॥ प्राप्यमखिलंसर्वात्मकंअसहदिप्राप्तंतस्मिन्नेवामलेपदेविश्रां
तंच ॥२॥ अदभ्रमनल्पंत्वत्प्राख्यंततत्प्रसिद्धंमहातमःममचेतसःसकाशादपगतं ॥३॥

अमृताप्ररितइत्यादिविशेषणानिरवस्यनडुराजसाधारणानि ४ अशेषाणां संशयलक्षणानामंभोदानां शरत्समयइवनिवारकइतिगुरुसंबोधनं वदस्ते
वसुर्णांवचसांश्रवणविषयेत्वत्रिअलंबुद्धिंनगच्छामि ५ विज्ञानंस्यसंप्राप्तिप्रकारं अवनतंप्रणामोपनतंशिष्यंप्रतिउपदेशनोइतिशेषः ६ नतादृशंतत
बोधंविचारपूर्वकतत्त्वावधारणं शाश्वतंनित्यात्मलाभफलं शाश्वतंनित्यंततम्रतंआत्मस्वरूपंबोधमितिवा ७ जगतः कोशेब्रह्मांडे दिग्लक्षणेनि
कुंजके अन्त्येकुंजे ८ क्षीरोदार्णवेक्षीरसमुद्रेजाताभिःदानवानामर्णवोदरेपिनिवासप्रसिद्धेः अतएवतत्रोत्पन्नस्यामृतस्यांशुभिरवयवैर्दि

अमृताप्ररितःस्वस्थःशीतलात्मामहाद्युतिः तिष्ठाम्यानंदवानंतःसायंपूर्णइवोडुराट् ४ अशेषसंशयांभोदशरत्समयकिंत्वहं
रश्मिमेषांनगच्छामिवचसांवृत्तत्वत ५ बलेर्विज्ञानसंप्राप्तिंपुनर्मद्बोधहेतवे विभोकथयखिद्यतेसंतोनावनतंप्रति ६ श्रीवसि
ष्ठउवाच शृणुराघवतेवक्ष्येबलेर्वृत्तांतमुत्तमं ज्ञातेनयेनतत्तत्त्वबोधंप्राप्स्यसिशाश्वतं ७ अस्त्यस्मिन्जगतःकोशेकस्मिंश्चि
द्दिक्कुंजके पातालमितिविख्यातोलोकोमेरोरधःस्थितः ८ क्षीरोदार्णवजाताभिर्दिग्धाभिरमृतांशुभिः क्वचिद्दानवकन्या
भिर्भ्राजितिनिर्विवरांतरः ९ जिह्वागणोद्दामरवैर्विलोलरसनायुगैः क्वचिद्भोगिभिरापूर्णंसहस्रशतमस्तकैः १० देहाद्रिवलिता
शेषविश्वोद्धरणघस्मरैः क्वचिद्दनुसुतैर्व्याप्तश्चलद्भिरिवमेरुभिः ११

र्धाभिरुपचिताभिरिवरम्याभिः निर्विवरांतरःपूर्णइतियावत् ९ द्व्यादिद्विसहस्रांतसंख्याकैर्जिह्वागणैरितरापेक्षयाद्विगुणव्याकरणछंदःशास्त्रा
दिव्याख्यानाद्दुद्दामरवैः अतएवविलोलरसनायुगैःभोगिभिःशेषादिभिः १० देहाद्रिभिर्वलितंव्याप्तं अशेषंजगद्येषांतथाविधैर्विश्वोद्धरणस्य
धर्मस्ययुद्धहविषोघस्मरैर्बलाद्भक्षकैःकर्मधारयः ११ 

---

कुंभलक्षणानांकूटानांशिखराणामग्रेषुविश्रांतंवसुधामंडलमस्योदरंमध्यंयेषां उदरग्रहणाद्येजंबूद्वीपप्रांतेष्वेवदिक्कूमध्यंतत्रमंडपस्तंभवद्दिग्गजानां
मभिधारणेनिवेशइतिगम्यते अतएवजंबूद्वीपमुर्वंस्वनड्डिःमगरवुत्रैःप्रतिदिशंदिग्गजाःहस्तेइतिपूर्वरामायणेप्युक्तं दंतलक्षणानांद्रुमाणामद्रि
भिःपर्वतवदाश्रयमृतैः १२ दुर्गंधइतिमृतानांनारकिप्राणिनांआमाःस्वकर्मकृताःप्रतिभास्यत्रअधःसर्वाधःतत्रहिपुराणेषुनरकाःप्रसिद्धाः १३
क्वचित्अधस्तनारकप्रदेशमारभ्यआमृतलंउपरितनास्वरीयमृतलपर्यंतंमप्राप्तप्रोतलोहशलाकवत् प्रोतसप्तपातालमंडलैरत्नानामाकरत्वेते

कुंभकूटाग्रविश्रांतवसुधामंडलोदरैः क्वचिद्दिग्दंतिभिर्दंतद्रुमाद्रिभिरुपाश्रितः १२ महाकटकटाशब्दक्रमस्तमृतपरंपरैः
क्वचिद्दुर्गंधमृताभैरधोनारकमंडलैः १३ आमृतलमभिप्रोतसप्तपातालमंडलैः क्वचिद्रत्नाकरैर्व्याप्तःपार्श्वैर्वि
वरैरिव १४ सुरासुरशिरःसुप्तपादांभोरुहपांसुना क्वचिद्भगवताऽनेनकपिलेनपवित्रितः १५ आसुरीसंमृतानंतहृज्जन
क्रीडनैषिणा क्वचिद्भगवतातेनहाटकेशेनपालितः १६ तस्मिन्नसुरदोस्तंबधार्यमाणमहाभरे बभूवदानवोराजाविरोच

मेर्वादिगिरिपादैर्व्याप्तः क्वचिद्विवरैरिवसंकुचितप्रायैःपातालैःपातालावयवैर्व्याप्तः १४ सुराणामसुराणां नसुतोबलिः १७
चशिरःसुमप्राइवविश्रांताःपादांभोरुहपांसवोयस्यतथाविधेनत्रैलोक्यवंदितेनेतियावत् १५ आसुरीभिअसुरस्त्रीभिःसेनाभिर्वासंमृतैरनंतैर्बहुविधा
पकर्षणैःरंजनानिक्रीडनानिचहृद्युमभिनषितुंशीलंअस्यतथाविधेनहाटकेशेनस्वर्णलिंगात्मनापुराणेषुप्रसिद्धेनशिवेनतस्मिन्पातालेलोकेअसुर
गणैरोस्तंभैर्धार्यमाणोमहानभरः राज्यभासेयत्र १७ 

श्री·टी·उ·प· ॥६३॥

तस्यपराक्रममाह। मार्कंडेनेति॥ आक्रंदरोरोदनंतत्सहितेनवांछितंबलादितिशेषः॥१८॥ कुतस्तस्येदृशंसामर्थ्यंतत्राह। कोशइति त्रैलोक्यलक्षणा
नांरत्नानांकोशइवस्वोदरेरक्षिता। भुवनधर्त्तृणांत्रैलोक्यपालकानांइंद्रमनुशेषादीनांधर्त्ताआधारभूतः यस्यबलेः॥१९॥ सेरावणस्यस्येरावतस्य
कटमित्रयःगंडस्थलानिबहवबनेसप्तानांमदस्यानानामुपलक्षणार्थं। यन्नाम्नाश्रुतेनेतिशेषः केकयामयूरवाण्याअहीनांहन्त्राद्यो हृदय
शिराइवशोषंजग्मुरार्त्तांमध्येविन्नतांचाजग्मुः॥२०॥ कुपिताक्रुतेर्यस्यप्रतापस्यउग्रेदुःसहेरुष्णमिरुक्षस्यशैः समस्तमहाब्धयःशोषोन्मुखाः

मार्कंडेनसमंसर्वैःसुरविद्याधरोरगैः। पादसंवाहनंयस्यसुरराजेनवांछितं॥१८॥ कोशस्त्रैलोक्यरत्नानांपातालपृथ्वीशरीरिणां। धर्त्ताभु
रा॰२ वनधर्त्तृणांयस्यपालयिताहरिः॥१९॥ सेरावणस्यसंशोषंयन्नाम्नाक्कटमित्तयः केकयेवाहिहन्त्राद्यौ जग्मुरार्त्तां॥२०॥ प्रतापाग्रीष्म ग्मुरार्त्तां २
मिर्यस्यकल्पकालइवाब्धयः। ययुःशोषोन्मुखाःसमस्तसप्तांकुपिताकृते॥२१॥ यदश्वाग्यश्वमेधाश्वजयोवलिताब्धयः। अस्ताउ
कोटरस्यास्समराकवचतांययुः॥२२॥ यस्यदृष्टिदृढाघातस्तुन्नाधारकुलाचलाः। विनमंतिदिशःसर्वाः स्तनाः ... फलननताइवस्त्रः॥

संकल्पकालइवार्त्तसंख्यामात्रेणसप्तसंख्यांतांययुर्नेजलादिरससंरव्येयेत्यर्थः॥२१॥ अश्वराग्याः अश्वअश्वमेधास्तदीयश्वमप्रभवाअभ्रपंक्तयःजला राम·
पानायवलिताअब्धयोयाभिःकोटरपरेनतस्याःप्राप्तिनोपदर्शनेकृष्या॥ जगत्पालनहेतुत्वात्स्वरकत्वाच्चकवचतांवर्मतां॥२२॥ दृष्ट्यादृढाघातस्ति ६३॥
र्यक्प्रेक्षणंतेनतुन्नाःभग्नाधारकुलाचलाःयासांतथाविधादिशः। भूमेनमनेदिशामपिःप्रवेशेरर्शनान्नमनोत्प्रेक्षा॥२३॥

लीलयाविजिताः॥ अशेषाणांभुवनाभोगानांलोकसंस्थानांभूषणभूताः इंद्रादयोयेन॥२४॥ आवर्त्तदृतिपुनलावर्त्तसदृशास्वभावेषु॥२५॥ त्रैलोक्येष्वुदारदृतिषुभो
गेषुभुक्तेषुसत्स्वपिविषयभूतेषुचउद्वेगंवैरस्यंअभजत॥२६॥ मेरुशृंगस्यशिखायांअग्रभागेरत्नकृतहर्म्यवातायनेस्थितउपविष्टःसन्॥२७॥ नक्ष्मापरे
रकुंठिताशक्तिर्यस्यतथाविधेनमया॥२८॥ ताहृशेनभुक्तेनकिंवाभवति॥ भूरिभिर्भोगैः अतिशयेनहारिणामनोहारिणा॥२९॥ भोगोपभोगमात्रंकृत्स्नो

लीलाविजितनिःशेषभुवनाभोगभूषणः। दशकोटीःसुवर्षाणिदैत्योराज्यंचकारह॥२४॥ अथागछत्सनत्येषुसुगेष्वावर्त्तदृतिषु। सुराणामु
रमहोघेषुभोत्स्यतस्वपत्स्वपिच॥२५॥ अजस्रमतिभुक्तेषुत्रैलोक्योदारवृत्तिषु। भोगेष्वभजदुद्वेगंबलिर्दानवनायकः॥२६॥ मेरुशृंगशि
खारत्नकृतवातायनस्थितः। स्वकरार्चितयामाससत्ययंसंसारसंस्थितिं॥२७॥ किमेतेनमिरंभक्ष्यस्सशक्तिनैवमयाधुना। साम्राज्यमिहकर्त्त
र्व्यंविहर्त्तव्यंजगत्त्रये॥२८॥ महतामराष्ट्रेणत्रैलोक्याद्भुतकारिणा॥ किंवाभवतिभुक्तेनभूरिभोगातिहारिणा॥२९॥ आपातमात्रमधु
रमावश्यकपरिक्षयं। भोगोपभोगमात्रंमेकिंनामेदंसुखावहं॥३०॥ पुनर्दिनैककलनाशार्वरीसंस्थितिःपुनः। पुनस्तान्येवकर्माणिल
ज्जायैनचतुष्टये॥३१॥ पुनरालिंग्यतेकांतापुनरेस्वभुज्यते। तेयंशिशुजनक्रीडालज्जायैमहतामिह॥३२॥ तमेवभुक्तविरसंव्याप
रौघंपुनःपुनः। दिवसेदिवसेकुर्वन्प्राज्ञःकस्मान्नलज्जते॥३३॥ पुनर्दिनंपुनारात्रिःपुनःकार्यपरंपराः पुनःपुनरहंमन्येप्राज्ञस्येयंविडंबना॥
३४॥

पभोगःपुरुषार्थान्तरव्याप्तत्वयेवामात्रशब्दः॥३०॥ तान्येवस्नानभोजनशयनादीनिनामिनवंकिंचित्कर्मसुखंवास्तीत्यर्थः॥ अतोमहतांपुरोल्लीपच्चलज्जा
यैनतुतुष्टये॥३१॥ उक्तमेवस्फुटमतिपुनरित्यादिना॥३२॥३३॥ प्राज्ञस्यदशाइयंविडंबनापुनःकृतानुकरणमिवोपहासहेतुरित्यर्थः॥३४॥

व्यर्थकृतानुवर्त्तणोदशांतमाह। ऊर्मितामिति। ३५। ३६। येन लब्धेन पुनः कर्म न विद्यते कृतकृत्यतास्यात्तादृशोऽर्थः कः स्यात्। ३७ महदाडंबरं दृष्टार्थ
द्वार्थकर्मजातं ३८ अनंतात्प्रवाहानंता उत्पन्नप्रध्वंससस्वभावत्वाद्धस्त तः परमार्थतो वस्तु शून्यैव इयं शिशुक्रीडा अनर्थप्रसरो दुःखपरंपरामात्रिस्त
दर्थिभिः क्रियते ३९। यस्मिन्प्राप्ते सति इतरत न किंचन कार्यं कर्तव्यमस्ति तादृशं फलं पुरुषार्थं इह न किंचन पश्यामि॥ ४०॥ भोगात्क्षणिकत्सुखं वि

ऊर्मितां पुनरासाद्य पुनरेति निरूर्मितां। यथा जलं तथैवायं तातामे क्रियां जनः। ३५। तन्मर्त्यचेष्टिताकारा पुनः पुनरियं क्रिया। जनं हास
यते प्राज्ञं बाललीलोपमा मुहुः। ३६। कृतया प्यनया नित्यं क्रियया कृतकार्यया। कोऽर्थः स्यात्तादृशो येन पुनः कर्म न विद्यते ३७। किंयं
तमथवा कालमिदमाडंबरं महत्। इहास्माभिरनुष्ठेयं किं तावत्समवाप्यते। ३८। अनंतोयं शिशुक्रीडावत्कृस्न्यैव वस्तुतः। आदृत्या
क्रियते व्यर्थमनर्थप्रसरार्थिभिः ३९। फलमेकं महोदारं नेह पश्यामि किंचन। कार्यमस्तीतरत्प्राप्ते यस्मिन्नात्मन किंचन॥ ४०॥ भोगाद
तेकिमन्यत्स्यात्तद्द्रव्यमविनाशियत्। एवं संचिंतयाम्याशु देध्यौ मलेत्यसौ बलिः। ४१। अथाप्युवाच सुरराडाः संस्मृतमिति क्षणा
त्स्वात्मन्येवमनस्यर्थं सम्यङ्मंगं विमर्शयन्। ४२।

विषयसुखादृते अन्यत् अविनाशि नित्यं ततम व्यं सुखं किं स्यात् एवं संचिंतयामीति मत्वा असौ बलिः आशु दध्यावित्यन्वयः। ४१। ध्यानेन संस्कारोद्बोधा
त्तविमर्शं प्राक्स्वदृष्टपितुरुपदेशकमस्मरत् निदर्शयति। अथेति। अथक्षणात् आत्मनि स्वस्मिन्नेव उवाच आः इति स्मरणद्योतको निपातः। किमुवा
चेत्तदाह संस्मृतं सम्यङ्मया स्मृतं। स्मृतार्थं मनस्येव विमर्शयन्निमर्शन प्रेषणाध्यारोपास्मि चु। ४२।

स्मृतमस्यार्थं क्रमेणाह पुराकिलेत्यादिना। ४३। किं दृष्टस्तदाह यत्रेत्यादिना यथेति तत्प्रकारोपक्रमार्थः सकलदुःखानां सांसारिकसुखानां च परिहारप्रा
स्युपायगोचराः सर्वेव्यवहारभ्रमा यत्र शांताः असौ संसारसीम्नोऽन्तः अवधिः कः उच्यते प्राज्ञैरित्यर्थः। ४४। विरामः पुनरावृत्तिस्तद्रहितं विश्रमणं विश्रां
तिः। ४५। पुमान् किं सुखं प्राप्य प्राप्य सर्वान् समन् अस्मिन्नेव देहे समस्तेभ्यो ब्रह्मलोकांतविषयेभ्यः प्राप्ये सुखेत्यासिराशापरिहर्त्तिंस्तद्धान् स्यादितिशेषः
नोपकरोति फलांतरेण एकविज्ञानेन सर्वविज्ञानं सिद्ध्यतीत्यर्थः। ४६। कुतस्तेतत्तित्ताप्तास्याह अत्यंतेति। कुतो न सुखावहास्तत्राह क्षोभयंतीति। ४७

पुराकिलेह भगवान्पृष्टोऽस्त्स विरोचनः। पितामयात्मतत्त्वज्ञो दृष्टलोकपरावरः। ४३। यथा सकलदुःखानां सुखानां च महामते। यत्र सर्व
भ्रमाः शांताः को सौसीमांत उच्यते। ४४। क्वोपशांतो मनोमोहः क्वातीताः सकलैषणाः। विरामरहितं कुत्र तात विश्रमणं चिरं। ४५। किं प्रा
प्येह समस्तेभ्यः प्राप्येस्मिंस्तृप्तिमान्पुमान्। किं दृष्ट्वा दर्शनं भूयो न तातोपकरोत्यलं ४६ अत्यंतबहवो येते भोगा हि न सुखावहाः। क्षो
भयंति मनो मोहे पातयंति सतामपि। ४७। तन्नानाविहितानंदसुंदरं किंचिरेव मे। तादृक्कथय यत्रस्यात्स्थिरं विश्रांतिमेम्यहं। ४८। इत्याकर्ण्य पुरा
निशाकरकारस्पर्धिलग्गुच्छस्तवल स्तुप्यापरकृताव गुंठनपदस्योक्तं तत्त्वेते नेमे पित्रा स्वर्गहतस्य सागरतरोः संरोपितस्याजिरे स्फाराकाररा


सायनास्वदसमं मोहशांत्यै वचः। ४९। मोक्षोपाये दृष्ट उपशमप्रकरणे विरोचनस्मरणं सर्गः २२ ॥ पुरा पूर्वकाले निशाकरस्य चंद्रस्य करैः किरणैः सह
सौंदर्यामृतरसस्पर्शं ताहिगुणाधिक्यात्स्पर्धालुभ्यो गुच्छेभ्यः पुष्पफलस्तबकेभ्यः स्ववलंतां पुष्पाणां फलानां चाप्तरेण स्म रहेन कृतं अवगुंठनवेष्टनं यस्य तथावि
धं परं मलभ्यानं यस्य तथाविधस्य स्वर्गात् हृतस्य बलादानीतस्य अजिरे स्वांगणे संरोपितस्य सागरतरोः क्षीरसमुद्रोत्पन्नस्य कल्पवृक्षस्य तले उपविष्टेन मेमम
पित्रा विरोचनेन इति प्रागुक्तप्रकारं प्रश्नं आकर्ण्य तस्य कल्पतरोः स्फाराकारैः रसायनत्वस्य गौरामवैर्मरकंदैः समं तु त्यं मधुरमिमधुरं जरामरणदुःखनिवा
रणं चेति यावत्तवचः संमोहशांत्यै मरीचाज्ञानभ्रमनिवारणाय यत् उक्तं तन्मया स्मृतमित्यर्थः। ४९ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे द्वाविंशः सर्गः





BHAU DAJI [library stamp]

वक्तुं चित्तजयं राजमंत्र्युपाख्यानमुच्यते तत्रात्रमंत्रिणोवीर्यमप्रतिहृद्दुहमत्र्जितं चित्तं हति विहीनेनैयदा मातमचित्ततां ॥ तदा मोक्षमयीमंतः सत्तामाप्नोषितां तामिति मोक्षस्य चित्तजयाधीनत्वमुक्तं ॥ चित्तनमेवआत्यंतिकआशात्यागउपायुक्तस्तथात्मदर्शनमंतरेणानसिद्ध्यति विषयाविनिवर्त्तंते निराहारस्य देहिनः रसवर्जं रसोप्यस्य परं दृष्ट्वा निवर्त्तते इति भगवद्वचनात् आत्मदर्शनेचमनोजयमंतरेणानसिद्ध्यतीत्यन्योन्याश्रयतापन्नमिदमशक्यमेवेत्या

विरोचनउवाच ॥ अस्तिपुत्रातिविततोदेशोविपुलकोटरः ॥ त्रैलोक्यानांसहस्राणियत्रमांतिबहून्यपि ॥ १ ॥ यत्रनांभोधयोनापिसागरावानचाद्रयः ॥ नवनानिनतीर्थानिननद्योनसरांसिच ॥ २ ॥ नमहीनापिचाकाशंनद्यौर्नपवनादयः ॥ नचंद्रार्कौनलोकेशानदेवानचदानवाः ॥ ३ ॥ नभूतयक्षरक्षांसिनगुल्मानवनश्रियः ॥ नकाष्ठतृणभूतानिस्थावराणिचराणिच ॥ ४ ॥ नापोनज्वलनोनाशानोर्ध्वंनाधोनविष्टपं ॥ नालोकोनातपोनाहंनहरींद्रहरादयः ॥ ५ ॥ एकएवास्तिसुमहांस्तत्रराजामहाद्युतिः ॥ सर्वकृत्सर्वगःसर्वःसचतूष्णींव्यवस्थितः ॥ ६ ॥ तेनसंकल्पितोमंत्रीसर्वसम्मंत्रणोन्मुखः ॥ अघटंघटयत्याशुघटं विघटयत्यलं ॥ ७ ॥ भोक्तुंनकिंचिच्छक्नोतिनचजानातिकिंचन ॥ राजार्थंकेवलंसर्वंकरोत्यज्ञोपिसन्सदा ॥ ८ ॥

शंकांपरिहर्तुंसाधनद्वयप्रयोगपद्याभ्यासाद्युपायमिदंवक्तुंबल्युपाख्यानांतरालेराजमंत्र्युपाख्यानंविरोचनमुखेनप्रस्तौति अस्तिपुत्रेत्यादिना देशोमोक्षाख्यः ॥ १ ॥ ५ ॥ राजाआत्मा ॥ तूष्णींव्यवस्थितः कूटस्थइतियावत् ॥ ६ ॥ मंत्रीमनः अघटंअत्यंतानुपपन्नमपिआत्मनःसंसारित्वंघटयति ॥ घटंघटमानमपिपूर्णानंदैकरसत्वंविघटयतिनास्तिनभातीत्यपलापयति ॥ ७ ॥ अज्ञोपिजडोपिसन् ॥ ८ ॥ 

एकांते ॥ अद्वितीयस्वभावे ॥ बलिप्रश्नानिगदव्याख्याताना ॥ ९ ॥ १० ॥ ११ ॥ कथमात्मास्माभिस्तदजयेनिमित्तकथनेन ॥ १२ ॥ तत्रादावेतेदृष्टंतदजयेनिमित्तमेव विस्तरेणाह ॥ सतत्रेत्यादिना ॥ मनाक् ईषदपि ॥ १३ ॥ समंत्रीकिंद्वितीयइंद्रउतयमः उतकुबेरः उतकश्चिदमरः ॥ असुरोवामहानुभावोयतोजेतुमशक्यःने

सएवसर्वकार्यैककर्तातस्यमहीपतेः ॥ राजाकेवलमेकांतेस्वस्थएवावतिष्ठते ॥ ९ ॥ बलिरुवाच ॥ आधिव्याधिविनिर्मुक्तःकःसदेशोमहामते ॥ कथंप्राप्यतेचापिकेनचाधिगतःप्रभो ॥ १० ॥ कःसतादृग्विधोमंत्रीराजाचापिमहाबलः ॥ हेलाविलूनजगज्जालैर्येस्माभिरपिनोजितः ॥ ११ ॥ अपूर्वमेतदाख्यानंममामरभयप्रद ॥ कथयापनयास्माकंहृद्व्योम्नःसंशयांबुदं ॥ १२ ॥ विरोचनउवाच ॥ सतत्रमंत्रीबलवान्देवासुरगणैःसुत ॥ समेतैर्लक्षगुणितैरपिनाक्रम्यतेमनाक् ॥ १३ ॥ नासौसहस्रनयनोनयमोनधनेश्वरः ॥ नामरोनासुरोवापियदिपृच्छकजीयते ॥ १४ ॥ तत्रास्तिमुशलप्रासपरिशक्त्यादयःसुत ॥ हेतयःकुंठतांयांतिदृषदीवोत्पलाहतिः ॥ १५ ॥ गम्योसौनास्त्रशस्त्राणांनभटोद्भवकर्मणां ॥ तेनदेवासुरास्तावत्सर्वेदैववशीकृताः ॥ १६ ॥ अविष्णुनापितेनेहहिरण्याक्षादयोसुराः ॥ पातिताःकल्पवातेनमेरुकल्पद्रुमाइव ॥ १७ ॥

स्वाहनासाविति ॥ यदिसहस्रनयनादिःकश्चित्स्यात्तर्हित्वयाजीयतएवेत्यर्थः ॥ १४ ॥ किंममआयुधानिभगवान्संतितत्तुनामनासौनद्वितीयइत्याहतत्रेति ॥ १५ ॥ भटस्तत्स्तरादयस्तेनैवविजिताइत्याहतेनेति ॥ १६ ॥ अस्मत्पूर्वजादयोपितेनैववशीकृत्यविष्णुनाघातिताइत्याशयेनाहअविष्णुनापीति ॥ कल्पवातेनप्रलयवायुना ॥ १७ ॥

श्री

सर्वेषां अवबोधिनः विवेको परे स्मरो पितेनैव मन्मुणापादिनिमित्तापादनेन आत्मवशीकृत्य अवटेषु गर्भश्वभ्रेषु १८ स्मरः कामः पंचमात्रशरोपितत्प्रसादेनेदं त्रैलोक्यमाक्रम्य जित्वा विवल्गाति विलुंभते १९ सुरासुरौघाः सुराः असैरिणो येन परासैरिबाल्यापश्येषुचेति क्वश २०।२१ प्रभुणा आत्मना यदि जीयते ततदा सुजेयो जघ्य २२ काले बहुतरसुकृतपरिपाकाद्विवेकोदयकाले अयत्नतः ज्ञानमात्रतः २३ त्रैलोक्ये यावंतो बलिनस्तेषां मध्ये बलेन जेता

नारायणादयो देवा अपि सर्वाववबोधिनः तेनाक्रम्य यथाकाममवटेषु निवेशिताः १८ तत्प्रसादेन स्मरो पंचमात्रशरः स्मरः त्रैलोक्यमिदमाक्रम्य साम्राडिव विवल्गति १९ सुरासुरौघमल्लोपि गुणहीनो विदुर्मतिः दुराकृतिरपि क्रोधस्तत्प्रसादेन जृंभते २० देवासुरसहस्राणां संगरोपयः पुनः पुनः जरेतत्क्रीडनं तस्य मंत्रिणो मंत्रशालिनः २१ स मंत्री केवलं पुत्र तेनैव प्रभुणा यदि जीयते तत्सुजेयो सावन्ज्वालचलोपमः २२ तस्यैव तत्त्वमोः काले जेतुं तं मंत्रिणां नितं इच्छा संजायते तेन जीयते सावयत्नतः २३ त्रैलोक्यबलिनां मध्ये मुच्छ्रितज गच्छ्रयं जेतुं चेदस्ति ते शक्तिस्तत्पराक्रमवानसि २४ तस्मिन्नभ्युदिते सूर्ये त्रैलोक्यकमलाकराः इमे विकासमायांति विलीयंते स्तमागते २५ तमेकमेकयाबुध्या ध्यामोहपरिहीनया यदि जेतुं समर्थोसि धीरस्तदसि सुव्रत २६ तस्मिन्जिते जिता लोका भविष्यं त्यजिता अपि अजिते त्वजिता एते चिरकालजिता अपि २७॥

रं उच्छ्रितं म्रियमाणं जेतुं बहुर्ध्वंसनशीलं कृतं जगच्छ्रयं येन तन्नहि २४ तस्य सर्वस्य जयशक्तिमात्रं किंतु त्रैलोक्यजननादिशक्तिरप्यस्तीत्याह तस्मिन्निति तस्मिन्सूर्ये इतिव्यस्तरूपकं २५ एकयानिश्चितया एकाग्रया वतन्नहि धीरोसि २६।७

---

अनंताः याः सिद्धयस्तदर्थं अंतो मरन्सुस्तदभावो नंतः म स्नुजयस्त्वत्सिद्ध्यर्थं च कष्टया श्रमसाध्यया पि सर्वत्यागादि चेष्टया २८ पुनस्तत्त्वभावमेवो क्तमन्तूघोपसंहरति सुरेति नागा दिग्गजाः महोरगाः शेषादयः २९॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे त्रयोविंशः सर्गः ॥२३॥

तस्मादनंतसिद्ध्यर्थं शाश्वताय सुखाय च तज्जयेयत्नमातिष्ठ कष्टयापि हि चेष्टया ॥२८॥ सुरदनुजनागयक्षसंघैः सनरमहोरगकिन्नरैः समेतं त्रिजगदपि वशीकृतं समंतादतिबलिना ननु हेलयैव तेन ॥२९॥ मोक्षोपाये उपशमप्रकरणे विरोचनवचनं सर्गः ॥२३॥

बलिरुवाच ॥ केनोपायेन बलवान्स तात परिजीयते कोसावतिमहावीर्यः सर्वं प्रकथयाशु मे ॥१॥ विरोचन उवाच ॥ मंत्रिणस्तस्य

 जनयनित्यजेयस्थितेरपि शृणु वच्मि सुसाध्यं त्वं मेनासौ परिजीयते २ पुत्र प्रयुक्त्या गृहीतोसौ क्षणादायाति वश्यतां युक्तिं विना दहत्येष आशीविषइवोद्धतः ३ बालवल्लालयित्वैनं युक्त्या नियमयंति ये राजानं तं समालोक्य पदमासादयंति ते ४ दृष्टे तस्मिन्महीपाले स मंत्री वशमेति च तस्मिंश्च मंत्रिण्याक्रांते स राजा दृश्यते पुनः ५ यावन्न दृष्टो राजासौ तावन्मंत्री न जीयते मंत्री च यावन्न जितस्तावद्राजा न दृश्यते ६ राजन्यदृष्टे दुर्मंत्री सदुःखाय फलत्यति मंत्रिण्यनिर्जिते राजासौ स्वंतं यात्यदृश्यतां ७ अभ्यासेनोभयं तस्मात्सममेव समारभेत राजसंदर्शनं तस्य मंत्रिणश्च पराजयं ॥ ८॥

इह दुर्मंत्रिणस्तस्य जयोपायः प्रश्नोर्थः राजसंदर्शनोपायं वैराग्यादिसमन्वितः प्रश्नः स्पष्टः १ सुसाधं त्वं सुखजयोपायमिति यावत् १।२।३ लालयित्वा अल्पविषयप्रदानेन मुहुर्विषयदोषख्यापनेन च वंचयित्वा सुक्त्या राजयोगाख्यया ॥ परं राजपदं ४ पुनः शब्दो वाक्यालंकारार्थः ५।६ अतिदुःखाय रागद्वेषादीन्क

इत्थं राजसंदर्शनं मंत्रिपराजयं च॥ ७॥ फलीभूते सफलीभूते॥ ज्ञानफलात्मना परिणते वा॥ १०॥ तत्रके तिष्ठंतिता नाह संशांतेति॥ निवृत्तसर्वानर्था निरतिश
यनित्यानंदपूर्णाश्च ये साधवस्ते तत्र तिष्ठंतीत्यर्थः॥ ११॥ इदानीं दृष्टोक्तिं विवरीतुमाह स्मरसीति॥ १२॥ सर्वाणि मानुषानंदादिहैरण्यगर्भानंदांतपदा
न्यतीत्य गच्छतीति सर्वपरातिगः सर्ववाङ्मनसागोचरश्च॥ प्राज्ञः सर्वप्रज्ञाप्रमविष्णुः॥ १३॥ मनोनिष्ठतया मनसि वासनात्मकसूक्ष्मभावेन स्थितत या स्य

पौरुषेण प्रयत्नेन सम्यासेन शनैः शनैः॥ इत्थं संपाद्य यत्नेन देशमाप्नोषितं शुभं॥ ९॥ त्वमभ्यासे फलीभूते तं देशमधिगच्छसि॥ यदि
दृष्टेंतं तत इयो मनागपि न शोचसि॥ १०॥ संशांतसकलायासाः नित्यप्रमुदिताशयाः॥ साधवस्तत्र तिष्ठंति प्रशांताशेषसंशयाः॥ ११॥
शृणु कः पुत्र देशोसौ सर्वं प्रकटयामि ते॥ देशनाम्ना मयोक्तस्ते मोक्षः सकलदुःखहा॥ १२॥ राजा तु तत्र भगवानात्मा सर्वपरातिगः
तेन मंत्री कृतः प्राज्ञो मनो नाम महामते॥ १३॥ मनोनिष्ठतया विश्वमिदं परिणतिं गतं॥ घटत्वेनेव मृत्पिंडो हेमांबुद तयेव च॥ १४॥
तस्मिन्जिते जितं सर्वं सर्वमासादितं भवेत्॥ दुर्जयं तद्धि जानीयाद्युक्त्यैव परिजीयते॥ १५॥ बलिरुवाच॥ या युक्तिर्भगवंस्तस्य
चित्तस्याक्रमणे स्फुटा॥ तां मे कथय तत्त्वावद्यथा जेष्यामि दारुणं॥ १६॥ विरोचन उवाच॥ विषयान्प्रति भोः पुत्र सर्वानेव हि सर्व
था॥ अनास्था परमा त्वेषा सा युक्तिर्मनसो जये॥ १७॥

र्थः परिणतिः स्थौल्यं॥ घटत्वेन घटभावेन मृत्पिंडः पिंडांतर्गतमृद्भागः॥ १४॥ जेतव्यं सर्वं जितमासादयितव्यं सर्वमासादितं भवेदित्यर्थः॥ १५॥ आ 
क्रमणे आस्कंदने जये इति यावत्॥ १६॥ अनास्था अस्पृहा युक्तिरुपायः॥ १७॥

विरक्तिः

शगित्येव झटित्येव अवरम्यते अवमस्यरम्यते॥ युक्तिमित्युक्त्वैवतात विषयान्विषवत्यजेत्यमित्युक्तोक्तेः॥ १८॥ १९॥ एषा युक्तिः॥ १९॥ विषयेष्वरक्तिः स्फुरतां शी
त्यादिविटपविस्तारस्य क्रमां॥ २०॥ शठात्मना भोगलुब्धमनसा॥ अव्युत्पन्नापुत्रे प्रतिमात्माहरअभ्यासेन स्थिरीकुरु॥ २१॥ विरतिं वैराग्यं॥ २२॥ अगतिर्गमनशू
न्यः॥ २३॥ ध्येयत्यागं प्रागुक्तजीवन्मुक्तिहेतुध्येयवासनात्यागं ध्यातवां घ्नतां॥ २४॥ नो कस्मात्त्वं विषयास्त्यक्तुं शक्याः किं तु क्रमेणैकैकं विषयं त्य
क्त्वा क्रमेणैकैकं तत्त्कदाचित्तेव मानः क्रमात्सर्व वैराग्यपरिपाके त्यजेत्॥ तत्र च पुरुषप्रयत्नदार्ढ्यं पुनर्हर्षामर्षलौल्यप्रसंगवारकमावश्यकमित्याश

एषैव परमा युक्तिरनयैव महामदः॥ स्वमनोमत्तमातंगो द्रागित्येवावरम्यते॥ १८॥ एषात्यंतदुःप्रापा सुप्रापा च महामते॥ अनभ्यस्ता विदुः
प्रापा सम्यस्ता प्राप्यते सुखं॥ १९॥ क्रमारभ्यस्यमानेषा विषयारतिरात्मजा॥ सर्वतः स्फुटतामेति सेकसिक्ता लता यथा॥ २०॥ नासाद्यते ह्य
नभ्यस्ताकांक्षता पि शठात्मना॥ पुत्र शालिरिवाप्युप्तात्स्वादेनांसमाहर॥ २१॥ तावद्भ्रमंति दुःखेषु संसारवटवासिनः॥ विरतिं विषये
ष्वेते यावन्नाप्नोति देहिनः॥ २२॥ अभ्यासेन विना कश्चिन्नाप्नोति विषयारतिं॥ अप्यत्यंतबलो देही देशांतरमिवागतिः॥ २३॥ ध्येयत्यागम
तो जस्रं ध्यायता देहधारिणा॥ भोगेष्वरतिरभ्यासाद्वृद्धिं नेया लता यथा॥ २४॥ पुरुषार्थाद्दृते पुत्र नेह संप्राप्यते शुभं॥ क्रियाफलं परि
प्राप्तुं हर्षामर्षविवर्जितं॥ २५॥ दैवमित्युच्यते लोके नैवं देहवतां क्वचित्॥ अवश्यं भविनव्यात्मा स्वेहया नियतिश्च या॥ २६॥

येनाह पुरुषार्थादिति पुरुषार्थं नः पुरुषप्रयत्नस्तस्माद्धर्षामर्षविवर्जितं क्रियाफलं परिप्राप्तुमनुकूलं शुभं साधनं न संप्राप्यते॥ २५॥ ननु देवादेव
तत्त्वाप्तिः किं प्रयासेनत्याह दैवमिति॥ स्वा स्वीयैव नियति प्रयुक्ता शुभाशुभक्रियाऽसौ व न धर्मानुषदृष्टिमिदं दैवशब्देनोच्यते नतु तरदिव्यशास्त्रीयदृष्टिमद्
रिति परेणान्वयः॥ २६॥

वि
र

वा॰टी॰उप॰ ६८ ननु विनापि प्रयत्नं दैवादेव केषांचिद्धर्षामर्षोपशमोदयस्तेन कथं तत्राह यदिति हर्षामर्षहेतुकर्मक्षये सति यदेव हर्षामर्षविनाशायसंपन्नं तदेव जनैर्दै
वमिति कथ्यत इत्यर्थः २७ अस्त्वेवं तदुक्तमेवदैवं किं तत्तत्राह दैवमिति ननु उक्तं नियतिरूपं दैवं तु वैराग्यदान्तिभ्यासादिपौरुषेणानुपमनीये अल्पका
लेनैव जीयते महत्स्मिति तत्त्वज्ञानविलासेन मरणजन्मप्रभवस्त्यर्थः २८ ननु परिदेवाख्यानियतिः पौरुषाख्यया तया जीयते नहितस्याः फलनि
यमाभावे नियतित्वप्रसंग इति चेदिष्टापत्तिः सर्वेषु मनःसंकल्पजेषु प्रतिबाधके प्रमाणैः फलवत्त्याग्रहीतत्वे फलवत्ता सुखप्रदमिव नियमान्मुप

उच्यते दैवशब्देन सा नरैरेव नेतरैः यद्यस्येह यदा यत्र संपन्नं समतां गतं २७ हर्षामर्षविनाशाय तद्दैवमि
तिकथ्यते दैवं नियतिरूपं च पौरुषेणोपजीयते २८ सम्यग्ज्ञानविलासेन मरणजन्मभ्रमो यथा
यथा संकल्प्यते यद्यत्पौरुषेण मथेव तत् २९ फलवत्ताग्रहीतत्वे फलवत्ता सुखप्रदं कर्ता नो मन एवेह
यत्कल्पयति तत्तथा ३० नियतिं यादृशीमेतत्संकल्पयति सा तथा नियतानियतान्कांश्चिदर्थानानियतापि ३१
न

गमादित्याह यथेति २९ न चैवमनियतित्वप्रसंगः मनसा कर्त्रा ईदृशनियमस्यैव कल्पनान्नियतित्वव्यवहारसिद्धेरित्याशयेनाह कर्तेति कर्ता जीवः नः
अस्माकं मते मन एव ३० नियतिं यादृशीमेतत्संकल्पयति सैव तदुत्पादयति नियतानिति उत्सर्गतः फलनियतानपवादविषयेषु नियतान् राम॰
व्यावहारिका न अर्थान् अनियतान् अत्यन्तफलानियतान्प्रा तिभासिकानपि करोतीति परेणान्वयः ३१ ६८
यतानि

भिपत्वं
तेनहेतुना एतच्चित्तं संसंकल्पितार्थानुसारेण फलनियतेरपि योजकमुपपादकमित्यर्थः अतएवार्थस्य पारमार्थिकत्वे तद्विषयबोधस्य नियतफलत्वमेव न दैववत्क
र्मवद्वा अनियतफलत्वमित्याशयेनाह नियमसामिति अर्थं विना आत्मा जीवः कदाचिन्मोक्षाधिकृतजन्मनि नित्यनिर्मले स्वभावे परमात्मनि स्वार्थनामिकां प्रत्यक्प क
रमार्थमात्रगोचरसाक्षात्कारनामिकां निर्वृतिसमानाकारवृत्तिधारां निर्विकल्पकसमाधिमिति यावत् कुर्वन् अस्मिन्जगत्कोशे व्योम्नि मारुत इव असंगः
स्फुरति स्वस्वभावे प्रकाशत इत्यर्थः ३२ कदाचिद्व्युत्थानकाले नियत्या शास्त्रलक्षणया विहितं स्वस्वाश्रमोचितं कर्म कुर्वन् संज्ञार्थमज्ञजनबोध
नार्थमेते याज्ञिकाः शिष्टाः सदाचारप्रवर्तकाः इत्यादिना लोके रूढः प्रख्यातो नियतिशब्दो यस्य तथाविधः सन्स्फुरति यथा सानुगिरिरिपस्थः स्वधर्म

करोतीति चित्तं तेनैतच्चित्तं नियतियोजकं नियतां नियतिं कुर्वन्कदाचित्स्वार्थनामिकां ३२ स्फुरत्यस्मिन्जगत्कोशे जीवो व्योम्नीव मारुतः
नियत्या विहितं कुर्वन्कदाचिन्नियतिं नरः ३३ संज्ञार्थरूढनियतिशब्दः स्फुरति सानुवत् तस्माद्यावन्न नत्यावन्न दैवं नैयति
नेव ३४ मनस्यस्तं गते साधो यद्वत्यस्तं तथा जीवो हि पुरुषो जातः पौरुषेण स यद्यथा ३५ संकल्पयति लोकेऽस्मिंस्तत्तथा तस्य ना
न्यथा पुरुषार्थादृते पुत्र न किंचिदिह विद्यते ३६ परं पौरुषमाश्रित्य भोगेष्वरति माहरेत् न भोगेष्वरतिर्यावज्ज्ञायते भवनाशनी ३७
चलस्वभावो विपवनवेगाच्चलत्सु वृक्षेषु चल इव स्थिरेषु वास्थिर इव स्फुरति तद्वदित्यर्थः ३३ अतस्त्वयापि यावज्जीवं चरमोक्षपरितद्वयमवलंब्यतामित्या
ह तस्मादिति ३४ तदुत्तरं किं भविष्यति तत्राह मनसीति पुरुषो जातः कर्मज्ञानाधिकारिशरीरं प्राप्तः सन्यद्यथा संकल्पयति तत्तथा भवतीति स्वाय
त्ते संकल्पे पौरुषेण वैराग्यादिसाधनानि संपाद्य पुरुषार्थात्मकब्रह्मात्मभाव एवं संकल्पनीयो न संसारात्मभाव इत्याशयेनाह पुरुषार्थादृते इत्या
दिना ३५ ३६ ३७

यावद्विषयेषु रतिरस्तितावत्तविलोलांदोलनस्थितिः भोगलम्पटो भोगिभरैः सर्पभरैः प्रोताग्रथिता अत एव दुःखदा कदाशा लक्षणभवदशा दोलाप्रेंखलिका वैराग्य श्रवणात्समाध्यासाभ्यासेन विना कदाचन कदापि न निवर्त्तते नापसरितुं शक्नोतीति परेण संबन्धः ॥४२॥ एवं च दीर्घजीवितं निष्फलप्रायत्वेन स्थितिमित्याह ॥४१॥ फलिनी मोक्ष फलवती भोगेष्वरतिं वैराग्यं भवांतर फलं फलति ॥ यथाद्राक्षादिमहालता शरदि शरत्काले तु फलतीति तद्वत् ॥४२॥ श्री लक्ष्मीः अंभोजकोटरे पद्मगर्भे ॥४३॥ प्रज्ञा

न प्राप्नोति तिसावस्था प्राप्ता जयदायिनी ॥ विषयेषु रतिर्यावत्स्थिता संमोहकारिणी ॥३९॥ तावद्भवदशादोलाविलोलांदोलनस्थितिः ॥ अभ्या सेन विना पुत्र न कदाचन दुःखदा ॥४०॥ भोगभोगिभरप्रोता कदाशा विनिवर्त्तते ॥४१॥ बलिरुवाच ॥ भोगेष्वरतिरेवांतः कथं सर्वासुरेश्वर स्थितिमाप्नोति जीवस्य दीर्घजीवितदायिनी ॥४२॥ विरोचन उवाच ॥ आत्मावलोकनलता फलिनी फलति स्फुटम् ॥ जीवस्य भोगेष्वर तिं शरदीव महालता ॥४३॥ आत्मावलोकने नैषा विषयारतिरुत्तमा ॥ हृदये स्थितिमायाति श्रीरिवांभोजकोटरे ॥४४॥ तस्मात्प्र ज्ञानिकाषेण विचारेणातिचारुणा ॥ देवमालोकयेद्भोगाद्वृत्तिं चावहरेत्समं ॥४४॥ चित्तस्य भोगैर्द्वौ भागौ शास्त्रेणैकं प्रपूरयेत् ॥ गुरुशुश्रूषया चैकमव्युत्पन्नस्य सुक्रमे ॥४५॥

मणेर्निकाषेण शाणेनेवानीयेन विचारेण समं तुल्यकालं ॥४४॥ तत्र चित्तपरिपाकभेदानुसारेण भेदान्विवक्षुः प्रथमभूमिका माह ॥ चित्तस्येति ॥ भोगै द्वेह यो न्योपायैश्च ॥ द्वौ दिनस्य कालभागौ शास्त्रेण श्रवणेन ॥ अव्युत्पन्नस्य चित्तस्य सुक्रमे सन्मार्गारंभेऽभ्यासक्रमे इति वा ॥४५॥



तज्जयेतद्वुत्तरभूमिका माह ॥ किंचिदिति ॥ आत्मज्ञानेन लब्धचमत्कारस्येति यावत् ॥ अत एव भोगेषु नास्योदयाद्रागन्यूनतापत्तिः ॥ गुरुशुश्रूषार्थी वर्भोगां तरवृद्धिः चिरं गुरुसन्निधाने सत्संगवस्तरे गुरुशुश्रूषयेवं देहप्रश्रभं संभवादिति भावः ॥४६॥ तज्जयेतदुत्तरभूमिकामाह ॥ व्युत्पत्तीति ॥ रत्नतत्त्ववज्जिरपरी क्षणेन तत्त्वतो वधारणं व्युत्पत्तिस्तामनुयातस्य चेतसः द्वौ भागौ शास्त्रवैराग्याभ्यां समुचितैः पूरयेत् ॥ द्वौ तु ध्यानेर्गुरुपूजनेन चक्रमात्पूरयेत् ॥४७॥ चतु र्थं ॥ भिक्रमे शुद्धचित्तस्याधिकारिताम्नई त्याह साधुतामिति ॥४८॥ निर्मलाकृतिः सम्यक्परिशुद्धं तस्यानरवउत्तमांकुसुमकिंशुकादिरंजनमादे

किंचिद्व्युत्पत्तियुक्तस्य भागं भोगैः प्रपूरयेत् ॥ गुरुशुश्रूषया भागौ भागं शास्त्रार्थचिंतया ॥४६॥ व्युत्पत्तिमनुयातस्य पूरयेच्चे तसोन्वहं द्वौ भागौ शास्त्रवैराग्यैर्द्वौ ध्यानगुरुपूजया ॥४७॥ साधुतामागतो जीवो योग्यो ज्ञानकथाक्रमे ॥ निर्मलाकृतिरा

म दत्तेपर उत्तरं जनः ॥४८॥ शनैः शनैर्लालनीयं युक्तिभिः पावनोक्तिभिः ॥ शास्त्रार्थपरिणामेन पाल्ययेच्चित्तबालकं ॥४९॥ प रिपरिणतं ज्ञाने शिथिलीभूतदुर्ग्रहं ॥ ज्योत्स्नाहीनस्फटिकवच्चेतः शीतं विराजते ॥५०॥

तेनमलिनइत्यर्थः ॥४॥ ईषन्मलिनस्यतर्हि कथं तमाह शनैरिति युक्तिभिः दुःखान्वयाव्यतिरेकप्रदर्शनैः पावनोक्तिभिः श्रुतिस्मृतिगुरूक्तिभिः शास्त्रार्थे चित्तस्यापरिणामश्चिरपरिशीलनेन शर्करामलकवन्मधुरैकस्य परिणतिस्तेन ॥४९॥ शिथिलीभूतः दुर्ग्रहो बालमलिन जडोका रग्रहणं यस्य ज्योत्स्नया अहीनेन अपरधाभूतेन स्फटिकेन तुल्यं चित्याकाशसमरसमितियावत् लीनेतिपाठे सद्ब्रह्मतीतं निस्तापं ॥५०॥

DR BHAU DAJI

कीदृशी परे परिणतिस्तां दर्शयति प्रज्ञयेति ऋज्व्या गलितभेदवैषम्यकौटिल्यया परया अन्तःकरणकर्मभावस्थत्वस्य मिरिंद्रिय
विषयतद्वृत्तीनां ईश्वरस्य तत्स्वामिनो जीवस्य अथ देहस्य भोगायतनस्य च सममं तुल्यं सच्चिदानंदाद्वैतैकरसं अधिष्ठानब्रह्मस्वरूपमेवावलोकयेत्
सममं तुल्यकालमेवाधिष्ठानरूपमवलोकयेदिति वा ५१ विचारफलं तत्सांसत्यागो पात्यंतिकस्तदैवं भवतीत्याशयेनाह प्रज्ञेति ५२ विचारफलं

प्रज्ञया परया ऋज्व्या भोगानामीश्वरस्य च समममेवाथ देहस्य रूपमाश्ववलोकयेत् ५१ प्रज्ञाविचारवशतः सममेव सदा
सुता आत्मावलोकनं तत्सांसत्यागं च समाहरेत् ५२ परदृष्टौ वितत्सत्वं तत्सत्ताभावे च दृक्परा सतिमिथः स्थि
ते दृष्टीतेजो दीपदृशोर्यथा ५३ भोगरोगगतास्वादे दृष्टे देवे परावरे परे ब्रह्मणि विश्रांतिरनंतोदेति शाश्वती ५४ विष
याकलितानंदमनंतोदेतिनिर्वृतिः न करान्वनजीवानामात्मविश्रमणादृते ५५

पुरुषापराधनिवृत्तिर्ज्ञानफलं मलाविद्यानिवृत्तिश्च न रथकृल्सिध्यत इत्याह परदृष्टाविति यथा वह्निस्तेजो दृशा प्रभावस्था दीपदृशा दीपाकारावस्था
च तिमिरतैलोभयनिवर्त्तिके मिथः अन्योन्ययोगपद्येन स्थिते तद्वदित्यर्थः ५३ आस्वाद्यत इत्यास्वादो रसः गतरस इत्यर्थः ५४ भोगास्वा
दलंपटानां तु नात्मानंदप्राप्तिरस्तीत्याह विषयेति विषयैरेवाकलितः सारतया गृहीत आनंदो यस्मिन् कमीलितआ आस्वादयतां जीवानां कदा
च न कदापि न निर्वृतिर्निरतिशयानंदो नास्ति ५५ 

ध्याविष१

आत्मावलोकने नैवाविषयारतिरुन्नमा हृदये स्थितिमायातीति य उक्तं तत्के चिन्न मन्यंति यज्ञादिभिरेवाचित्तशुद्धौ मारतिसंभवादिति तान्प्रत्याह ॥ य
ज्ञे ॥ यज्ञादिभिरदृष्टद्वारा विषयसुखमेव जायते न भोगेषु विरतिर्जायत इति परेणान्वयः ॥ ५६ ॥ एवं भोगवैराग्याभ्यासपुरुषप्रयत्नं विना केनोपु
पायांतरेणा आत्मावलोकनेपि बुद्धिर्न प्रवर्त्तत इत्याह कयाचिदिति ॥ ५७ ॥ यातो आश्रयते विश्रम्यते ॥ भातेस्वात्मतया अभिव्यक्ते परमे कारणे

यज्ञदानतपस्तीर्थसेवाभिर्जायते सुखं ॥ न तपोभिर्न दानेन न तीर्थैरपि जायते ॥ ५६ ॥ भोगेषु विरतिर्जन्तोः स्वभावालोकनादृते ॥ कया
चिदपि नो युक्त्या बुद्धिरात्मावलोकने ॥ ५७ ॥ स्वप्रयत्नादृते पुंसः श्रेयसे संप्रवर्त्तते ॥ भोगसंत्यागसंप्राप्य परपार्थादृते सुत ॥ ५८ ॥ न ब्रह्म
पदविश्रांतिसुखमासाद्यते परं ॥ आब्रह्मस्तंभपर्यंते जगत्यस्मिन्न कुत्रचित् ॥ ५९ ॥ तद्यदाश्रयते भाते परमे कारणे यथा ॥ पौरु
षं यत्नमाश्रित्य दैवं कृत्वा सुदूरतः ॥ ६० ॥ भोगान्विगर्हयेत्प्राज्ञः श्रेयो द्वारदृढार्गलान् ॥ प्रौढायां भोगगर्हायां विचार उपजायते
६१ ॥ दृढायां प्रावृषि श्रीमान् शरत्काल इवामलः ॥ विचारो भोगगर्हातो विचाराद्भोगगर्हणं ॥ ६२ ॥ अन्योन्यमेते पूर्येते समुद्रज
लदाविव ॥ भोगगर्हा विचारश्च स्वात्मालोकश्च शाश्वतः ॥ ६३ ॥ अन्योन्यं साधयंत्यर्थं सुस्निग्धाः सुहृदो यथा ॥ पूर्वं दैवमनादृत्य
पौरुषेण प्रयत्नतः ॥ ६४ ॥

परमात्मनि ६० विचारः सदसद्विवेकः ६१ दृढायां सस्याद्यभिवृद्धिपुष्टायां शरत्त्याः फलसंपदा श्रीमान् ॥ तयोरप्यन्योन्यापेक्षा अभिवृद्धिरितिपु
न ६२ दृढयन्नीयेत्याह विचार इति ६२ यथा समुद्रेण रश्मिद्वारा जलदाः पूर्यंते जलदैश्च वृष्टिद्वारा समुद्रस्तद्वत् इदानीं त्रयाणां युगपद्दृढनीयतामाह
भोगगर्हेति आत्मालोक आत्मदर्शनं ६३ ६४

प्रथमं भोगारतिरेव महता प्रयत्नेनावश्यं साध्येत्याह दैन्ये इति॥ तदर्थमुपायमाह देशेति तत्र दूर्णविहितप्रतिग्रहाद्युपायैः देशबंधुजनसंमत एव परिग्राह्यो नान्य इत्याशयः॥ ६६॥ पौरुषेणेति तत्र दूर्णैः सन्नपुरुषोचितेन प्रतिग्रहादिक्रमेण॥ अभ्याहरेत् आराध्य वशीकुर्यादिति यावत्॥ ६६॥ जरनु विचाराननंतरं ज्ञानं विचारितवाक्यार्थज्ञाने जरन्नुगतिसामान्यन्यायालोचनात्मकः शास्त्रार्थसंग्रहः सर्वश्रुतीनामद्वितीये ब्रह्मणि तात्पर्यनिर्णयो भवतीत्यर्थः॥ ततो

दैन्ये दैन्यान्न संपीड्य भोगेष्वरतिमाहरेत्॥ देशाचाराविरुद्धेन बांधवैकमतेन च॥ ६६॥ पौरुषेण क्रमेणादौ धनानि समुपार्ज्जयेत्॥ धनैरभ्याहरेद्भव्यान्सुजनान्गुणशालिनः॥ ६६॥ प्रवर्त्तते समासंगात्तेषां भोगविगर्हणा॥ ततो विचारस्तदनु ज्ञानं शास्त्रार्थसंग्रहः॥ ६७॥ ततः क्रमेण परमपदप्राप्तिः प्रजायते॥ यदा त्वपरते काले विषयेभ्यो विरम्यसे॥ ६८॥ तदा विचारवशतः परमं पदमेष्यसि॥ सम्यक्प्राप्स्यसि विश्रांतिमात्मन्यत्यंतपावने॥ ६९॥ न पुनः कल्पनापंके दुःखाय न पतिष्यसि स्थिताविनाश्यानि शुद्धनमस्तेऽस्तु सदाशिव॥ ७०॥

मनननिदिध्यासनक्रमेण भूमिकारोहणक्रमेण वा इत्थं संप्राप्तं विषयविरामेण परमपदप्राप्त्युपाय उक्तः॥ विषयाः स्वयं क्रमसमर्थश्चेद्यौवनकाले उपरते सति यदा विषयेभ्यो विरम्यसे तदैव विचारवशतः परमपदमेष्यसि नाधुनेत्यर्थः॥ ६८॥ एवं विषयोपरमावश्यकत्वे सतीदानीमेवोपरमस्ते युक्त इत्याशयेनाह सम्यगिति॥ ६९॥ हे शुद्ध ते तव भोगास्थानस्थितावियया कालांतरप्रतीक्षा स्मार सस्त्वं सदाशिव एव अतस्ते संप्रत्यत एव ब्रह्मभूताय भनमोऽस्त्वित्यनुचितो विपुत्रदर्शनमस्कारो ब्रह्मदृष्ट्या कृतः॥ ७०॥



उक्तमर्थं संक्षिप्योपसंहरति देशेति॥ देशाचाराविरुद्धक्रमेण धनं अर्जयेदिति शेषः॥ तेन धनेन अल्पस्यापि तुच्छतरस्य भोगस्य विगर्हणेन भोगार्थं धनव्ययमकृत्वेति यावत् साधुजनं ब्रह्मविज्जनं मानपूर्वं प्रणिपातसेवान्नाच्छादनादिसन्मानपूर्वकं अर्जयं शास्त्रपूर्वमिति पाठे तु तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमिति शास्त्रोक्तरीत्येत्यर्थः॥ ततः सत्संगमोत्थेन विषयतद्रागद्वेषाद्यवहेलनेन साधनचतुष्टयसंपत्त्या प्रवृत्तेन सम्यग्ध्यात्मशास्त्रविचारस्य विभवेन तव

देशक्रमेण धनमल्पविगर्हणेन तेनांग साधुजनमर्जय मानपूर्वं॥ सत्संगमोत्थविषयाद्यवहेलनेन सम्यग्विचारविभवेन तवात्मलाभः ७१॥ मोक्षोपाये उपशमप्रकरणे चित्तविचिकित्सायोगोपदेशः सर्गः॥ वलिरुवाच॥ एतन्मे कथितं सर्वं पित्राचारुविचारिणा॥ इदानीं संस्मृतं दिष्ट्या संबोधमहं गतः॥ १॥ अथेयं मम संजाता भोगान्प्रत्यरतिः स्फुटा॥ दिष्ट्या शमसुखं स्वच्छं विशाम्यमृतशीतलं॥ २॥ पुनरागरयन्नाशं पुनरभ्याहरन्धनं॥ पुनरावर्जयन्कांतां खिन्नोऽस्मि विभवस्थितौ॥ ३॥ अहो नु खलु रम्येयं शमभूः शीतलांतरा॥ सर्वा स्वशमं यांति सुखदुःखदशाः शमे॥ ४॥

आत्मलाभो विस्मृतकंठचामीकरलाभवद्भविष्यतीत्यर्थः॥ ७१॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे चतुर्विंशः सर्गः॥ २४॥ इहभयो बलेरंतर्विवेकं दृष्ट्वा मोदमवः॥ संदेहशांतये शुक्रविंतेर्गतो नु वर्ण्यते॥ अथ वांतरारव्यानमुपसंहृत्य प्रकृते योजयितुमेतदिति॥ १॥ २॥ पुनरिति त्रिविधितं पुनः पुनरित्यर्थः॥ आवर्जयन्प्रार्थनादिना अनुकूलयन् विभवस्थितौ संपत्परिपालनविषये खिन्नः संतप्तोऽस्मि॥ ३॥ शमे शांतिगुणे॥ सर्वा एव सुखदुःखदशाः शमं नाशं यांति॥ ४॥

शमे स्थितः प्रतिष्ठितोहं शाम्यामीति सर्वतापोपशमोक्तिः। चंद्रबिंबे अर्पित इव परिनिर्वामीति चित्तस्य निरतिशयसुखपारवश्योक्तिः। सुखमासइ इति तद्धेतुसुखात्मना स्थित्युक्तिः। अंतरिति सर्वत्र संबध्यते॥ अयं प्रहृष्यामीति हर्षलिंगपुलकाद्यतिशयोक्तिः॥ ५॥ उत्तांडवशब्दात् सर्वप्रातिपदिकेभ्य आचारे क्विब्वक्तव्य इति क्विपि लटः शत्रादेशः भोगो त्कंठया उत्तांडवतो मनसः रंहोभिः प्रोषितं दग्धं देशभ्रमणशीलं वा क्रूरप्रधानं शरीरं कुरूशरीरं च यस्मिन् अत एवानारतापरिक्षोभं विभवार्जनं दुःखमेव हा इति खेदे॥ ६॥ इदानीं तत्फलस्य राज्यादिभोगस्वरूपमप्यसारतया विविच्य परिशोचति अंगमित्यादिना॥ ७॥ सर्वेषां विभवानां दृष्टांतभूतमहाबि उ

शाम्यामि परिनिर्वामि सुखमासे शमे स्थितः॥ अयमंतः प्रहृष्यामि चंद्रबिंब इवार्पितः॥ ५॥ उत्तांडवन्मनोरंहः प्रोषितोरु शरीरकं॥ अनारतपरिक्षोभं हा दुःखं विभवार्जनं॥ ६॥ अंगमंगेन संपीड्य मांसं मांसेन चक्रिणः॥ पुराहमभवं प्रीतो यत्तन्मोहविजृंभितं॥ ७॥ दष्टांतदष्टयोदृष्टा भुक्तभोक्तव्यमक्षतं आक्रांतमखिलं भूतं जातं किमिव शोभनं॥ ८॥ पुनस्तान्येव तान्येव तत्रेहान्यत्र वापि च॥ इतश्चेतश्च वस्तूनि नापूर्वं नाम किंचन॥ ९॥

भवद्दष्टयः सेन दष्टः अक्षतं परैरव्याहतं भोक्तव्यं राज्यभोगादि भुक्तं॥ अखिलं भूतं प्राणिजातं आक्रांतं स्वसामर्थ्येन नमितमिति यावत्॥ तथापि किमिव शोभनं शाश्वतं सुखं जातं अनादौ संसारे सर्वेषामपि कदाचिदेवं वैभवसंभवात् तस्यापि दृष्टवदत्युत शोदुर्दशा सहस्रस्यापि संभावितत्वाच्च न किंचिच्छोभनमित्यर्थः॥ ८॥ अभिनवचमत्कारांतरादर्शनाच्चर्वितचर्वणप्रायत्वाच्च नैहिकामुष्मिकभोगानां सारतास्तीत्याह पुनरिति तत्र स्वर्गादौ इह भुवि अन्यत्र नागलोकादौ॥ ९॥ राम॰ ॥७२॥

---

ष्पूर्णत्वस्वरूपाद्बोधतः प्राप्तात्स्वर्णइवेत्यस्वर्णतां प्राप्तोति निरासाद एव नापूर्वस्वर्णतां प्राप्तिरस्तीति द्योतनाय॥ अथवा स्वर्णाच्चंद्रान्निमित्तात्स्वर्णः क्षीराब्धिरिवेत्यर्थः॥ १०॥ यदपि भोग्यमक्षदष्टस्यासारत्वेन महीतं तदपि नश्वरत्वाद्दुःखपर्यवसितं तद्दृश्यमप्यसारमेवेत्याशयेनाह पाताल इति॥ ११॥ तुच्छया जगदाधिपत्येच्छया मेरोः सहद्भेवं कुर्वन्नहं भ्रष्टशं बालो भ्रष्टइव भवमित्यर्थः॥ १२॥ जगन्नाम्ना जगदाधिपत्यनाम्ना महता आधिना मानसदुःखेन॥ अत्यक्तेनेति च्छे

सर्वमेव परित्यज्य परिहृत्य धिया स्वयं॥ स्वस्थस्वावतिष्ठेहं स्वर्णस्वर्णइवात्मनि॥ १०॥ पाताले भूतले स्वर्गे स्त्रियो रत्नोपलादयः॥ सारं तदपि तुच्छेन कालेनाशु निगीर्यते॥ ११॥ एतावंतमहं कालं भ्रष्टशंबालो भवं पुरा॥ यः कुर्वन्नुष्ममेरौ स्त्र तुच्छया जगदिच्छया॥ १२॥ मनो निर्माणमात्रेण जगन्नाम्ना महाधिना॥ त्यक्तेनानेन कोर्थः स्यात्कोनुरागो महात्मनः॥ १३॥ कष्टं चिरतरं कालमनर्थोर्थधिया मया॥ अज्ञानमदमत्तेन कालेन स्वेन सेवितः॥ १४॥ नरतरलदृष्टेन किमिवास्मिन्जगत्त्रये॥ मयानकृतमज्ञेन पश्चात्तापामिह हृदये॥ १५॥ एतयात रलंमे स्तु तुच्छयाप्यर्वचिंतया॥ पौरुषं याति साफल्यं वर्त्तमानचिकित्सया॥ १६॥ अद्यापरमिताकारकारणैकतयात्मनि॥ सर्वतः सुखमभ्येति रसायना मिवार्णवे॥ १७॥

दः अर्थः पुरुषार्थः स्यात्॥ अनुरागेहि सतितत्र पुरुषार्थता बुद्धिः स एव नास्तीत्याह का इति॥ १३॥ कालेन स्वभस्यभ्रस्तेन स्वेनैव मया अनर्थः अर्थधिया सेवित इत्यर्थः॥ १४॥ १५॥ अथवा किं ममागतशोकेन सांप्रतिकमोहचिकित्सया पुरुषजन्मनः साफल्योपायं चिंतयामीत्याह एतयेति॥ १६॥ अपरिमिताकारं अपरिच्छिन्नस्वरूपं यत्कारणं ब्रह्मतदेकतया मदभेदस्थित्या आत्मनि सर्वतः पूर्णसुखं अर्णवे क्षीरसमुद्रे रसायने अमृतं मथनेनेव यथा प्रवृत्तं अभ्येत्याविर्भवति तथा अद्य ज्ञानसंपर्केण प्राप्स्यामीति परेणान्वयः॥ १७॥

अयंप्रपंचःकः अहंप्रत्यगवेद्यंजीवतत्वंकिंइत्यात्मा अवलोक्यतेयेनतदात्मालोकनमुपायंनाथंकुलगुरुत्वात्कुलस्येश्वरमुशनसमेवोशनसंपृच्छामिप्रक्ष्यामि
१८ अहंपरमयोगसिद्धत्वात्सर्वकामेश्वरंस्वामिनंतेषुआश्रयात्प्रसादंशुक्रंसंचिंतयामितेनशुक्रेणगिराउपदिष्टेअनंत्तविभवेआत्मनिस्वयमात्मनेवतिष्ठा
मिस्थास्यामिवर्तमानसामीप्येलट् तत्रावस्थानेकेनहेतुनातवाश्वासस्तत्राह अक्षीणमितिप्रबुद्धमहतामुपदेशगिरः अक्षीणमक्षयमर्थंफलंतिन
कदाचिद्धिफलीभवंतीत्यर्थः १९ इतिश्रीवासिष्ठतात्पर्यप्रकाशेउपशमप्रकरणेपंचविंशस्सर्गः २५ स्वस्यायातस्यशुक्रस्यसंक्षेपेणबलिंप्रति तत्व

कोयंतावदहंकिंस्यादात्येत्यात्मावलोकनं। पृच्छाम्योशनसंनाथंत्वमज्ञानशांतये १८ संचिंतयामिपरमेश्वरमाशुशुक्रमुद्यत्प्रसादम
थतेनगिरोपदिष्टे। तिष्ठाम्यनंतविभवेस्वयमात्मनात्मन्यक्षीणमर्थमुपदेशगिरःफलंति। १९ मोक्षोपायेषूपशमप्रकरणेबलिचिं
तासिद्धांतयोगोपदेशःसर्गः। २५ श्रीवसिष्ठउवाच इतिसंचिंत्यबलवान्बलिरामीलितेक्षणः दध्यौकमलपत्राक्षंशुक्रमाकाशमं
दिरं १ सर्वस्थंचिंतयानंतुनिर्विध्यानोथभार्गवः चेतस्थंज्ञातवान्शिष्यंबलिंगुर्वर्थिनंपुरे २। अथसर्वगतानंतचिदात्मा
भार्गवःप्रभुः आनिनायसदेहंस्वंरत्नवातायनंबलेः॥ ३॥

सारोपदेशोथनभोगतिरिहेर्यते।आकाशोब्रह्माकाशस्वमंदिरंविश्रांतिस्थानंयस्यतं। १। अथनिर्ध्यानःअभीक्ष्णध्यानपरोभार्गवःसर्वांतरब्रह्मस्वरूप
त्वात्सर्वस्थंस्वंचिंतयानंस्वचेतःस्थंबलिंशिष्यंगुर्वर्थिनंतत्वजिज्ञासयास्वदर्शनेच्छुंज्ञातवानित्यन्वयः। २। अथसभार्गवःस्वंदेहंबलेःरत्नवातायनं रत्नगवाक्षस्थानंप्रतिअनिनाय स्वयमाजगामेतियावत् ३


परिस्फुटतनुःसंस्पृष्टशरीरःसंबोधितंविकासितं ४।५।६। प्रतिभानवनवोन्मेषशालिनीबुद्धिः यथाप्रातरुदितार्कभाब्जप्रसरणादीन्संध्यावंदनादिकार्यंकर्तुंसन्नि
धानमात्रेणनियोजयतितद्वत्। ७। यतुज्ञानमात्रेणमहासंमोहहारितज्ज्ञादर्शनंतत्वं। ८ किंयतीमात्राउत्कर्षावधिर्यस्यतत् भोगजालंविषयसुखं किंमयंकिंप्र
कृतिकं इतिभोगतत्वप्रश्नः कोहंकस्त्वमिति। भोक्तृतत्वप्रश्नः किंमेतेलोकाइतिभोग्यतत्वप्रश्नः लोक्यंतइतिलोकाइतिव्युत्पत्तेः ९ भोक्त्रादित्रिपुटीभेदस्ये
कस्यांचितिकल्पितत्वात्संक्षेपतस्तदुपदेशेनैवप्रश्नत्रयस्याप्युत्तरंसुवचमित्याशयंद्योतन्नाह बहुनेति। खंआकाशमार्गसारंप्रश्नत्रयसारं १० इहजगतिचित्
गुरुदेहप्रभाजालपरिस्फुटतनुर्बलिः बुबुधेप्रातरर्कांशुसंबोधितमिवांबुजं ४ तंरत्नार्घ्यदानेनमंदारकुसुमोत्करैः पादाभिवंदनेनेरेनपूज
यामासभार्गवं। ५। रत्नार्घ्यपरिस्पृष्टांगंकृतमंदारशेखरं। महासनेविश्रांतमथोवाचगुरुंबलिः ६ बलिरुवाच भगवंस्त्वत्प्रसादोत्थाप्रति
भेयंपुरस्तव। नियोजयतिमांवक्तुंकार्यंकर्तुमिवार्कभाः। ७। भोगंप्रतिविरक्तोस्मिमहासंमोहदायिनः ततत्वंज्ञातुमिच्छामिमहासंमोह
हारियत्। ८ किंयन्मात्रमिदंभोगजालंकिंमयमेववा कोहंकस्त्वंकिमेतेवालोकाइतिवदाशुमे। ९ शुक्रउवाच। बहुनात्रकिमुक्तेनखे
गंतुंयत्नवानहं। सर्वदानवराजेंद्रसारंसंक्षेपतःशृणु। १० चिदिहास्तिहिचिन्मात्रमिदंचिन्मयमेवच। चित्त्वंचिदहमेतेचलोकाश्चिदिति
संग्रहः ११
अस्तिहिशब्दस्तत्सिद्धेरन्यनिरपेक्षत्वमसिद्धिद्योतनायअतइदं चिद्रूपंचिदधीनसिद्धिकं। भोगजातंचिदे व मात्राउत्कर्षावधिर्यस्य
तथाविधंयतोवाचोनिवर्तंतेइतिश्रुत्यापरमावितस्वरूपस्वानंदोत्कर्षावधित्वोक्तेः चित्स्वेवभेदवैचित्र्याध्यासाश्चिन्मयमेवच। एतस्यैवानंदस्यान्यानिमात्रामुपजीवंती
तिश्रुतेः सर्वंतत्वमस्यहंब्रह्मास्मिएषतआत्मेत्यादिः नान्योतोस्तिद्रष्टानान्योतोस्तिश्रोतेत्यादि। श्रुतिशतेभ्यस्त्वमहमादिभोक्तृतत्वमपिचिन्मात्रमेवेत्याहचि
त्वमितिएवंभोग्यजातमपिपरमार्थतश्चिदेवेतितत्वमाहलोकाश्चिदधीनत्वाद्दृश्यैवेदंविश्वमिदंवरिष्ठमित्यादिश्रुतेश्चेत्याशयेनाहएतेचेति ११

भवतीति भव्यः श्रद्धधानो विवेकी ॥१२॥ चितश्चेत्याकारकलनैव बंधः ॥ अचेत्या चेत्याकारनिर्मुक्ता । अखिलात्मा पूर्णात्मा ॥१३॥ विलोकयसि चेदिति शेषः आत्मना अखंडाकारवृत्त्यारूढप्रतीचा ॥१४॥ खंदेवलोकं । वस्तव्यं अवश्यं सन्निधातव्यं भावेन ब्यः ॥१५॥ ननु मुक्तधियः कृतकृत्यस्य तत्र तत्र अगमने का क्षतिस्तत्राह रागजन्निति ॥१६॥ अतइति कथितवता भार्गवेण ग्रहो घेः आकुले अतएव तुष्यरेणुव्याप्ते ऽलिरिवांभोंतराले स्फुटेन जलराशेर्मेघस्य समुद्रस्य च

भव्योसि चेन्नदेतस्मात्सर्वमाप्नोषि निश्चयात् । नो चेत्तदद्धपि प्रोक्तं त्वयि भस्मनि हूयते ॥१२॥ चित्रेत्यकलनाबंधस्तन्मुक्तिर्मुक्तिरुच्यते ॥ चिदचेत्याखिलात्मेति सर्वसिद्धांतसंग्रहः ॥१३॥ एनं निश्चयमादाय विलोकयसि हेलया । स्वयमेवात्मनात्मानमनंतपदमाप्स्यसि ॥१४॥ खंदेवजाम्यहमत्रैव मुनयः सप्तसंगताः ॥ केनापि सुरकार्येण वस्तव्यं तत्र वै मया ॥१५॥ राजन्यावदयं देहस्तावन्मुक्तिधियामपि ॥ यथाप्राप्तक्रियात्यागो रोचते न स्वभावतः ॥१६॥ इति कथितवताथ भार्गवेण स्फुटजलराशिपथा महाजवेन । प्लुतमतिशबलेन भोंतराले तरलतरंगवराकुले ग्रहोघैः ॥१७॥ मोक्षोपायेषूपशमप्रकरणे बल्युपदेशयोगो नाम सर्गः ॥२६॥ श्रीवसिष्ठ उवाच । सुरासुरसभामध्ये स्थिते तस्मिन्नरगुरौ गते । मनसा चिंतयामास बलिर्बुद्धिमतां वरः ॥१॥ सत्यमुक्तं भगवता चिदेवेदं जगत्त्रयम् ॥ चिदहं चिदिमे लोकाश्चिदाशाश्चिदियं क्रिया ॥२॥

पथा उपरिमार्गेण तरलतरं वेगवत् महाजवेन प्लुतं उड्डीनं भावेक्तः ॥१७॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे षड्विंशः सर्गः ॥२६॥ शुक्रोपदिष्टमार्गेण सर्वं विमृशतो बलेः । चित्तस्वार्णे दृढविश्रांत्या चिरं स्थितिरिहोच्यते ॥ सुरासुरसभासु ज्येष्ठे प्रशस्यतमे । ज्यचेति प्रशस्यशब्दस्य ज्यादेशः ॥१॥ यच्चिंतयामास तदाह सत्यमुक्तमित्यादिना ॥२॥



३॥ सत्यतामुपपादयति ॥ अयमादित्य इत्यादिना । चेत्यते संज्ञायते तमो घटदीपादिव्याप्तं तया यदि न प्रकाश्यते इत्यर्थः । भेदः व्यावृत्तिर्विच्छित्तिर्वैधर्म्यं च ॥४॥ मामिलं जलादिव्याप्तं तत्सर्वं किं सप्रमध्येपि सर्वत्र इव शब्दो वाक्यालंकारार्थः । भव्यतां निरूढतां गतं प्राप्तं ॥५॥ शैलेषु पिहमेषु लेइति यदि न चेत्यं तेइत्यर्थाद्गम्यते ॥६॥ जगत्क्रिया वन्मर्त्त्यं दृश्यं नमस्तमस्तौ ॥७॥ मत्ते इति अहं कायइति ॥ पर्वताकारः स्थलइति यावत् ॥ पारं शून्यं अमृतं ॥ भावात्

सबाह्याभ्यंतरं सर्वं चिदेव परमार्थतः ॥ अस्ति चिद्व्यतिरेकेण नेह किंचन कुत्रचित् ॥३॥ अयमादित्य इत्यर्कोन चिता यदि चेत्यते । तदर्कतमसोभेदः कइहैवोपलभ्यते ॥४॥ इयं धरित्रीति धरेणा चिता यदि न चेत्यते ॥ धरेः किंनाम धरित्वं तद्व्योमव्यापतां गतं ॥५॥ इमा दिशो दिशइति चेत्यं तेन चिता यदि ॥ तत्किंनाम दिशां दिक्त्वं शैलानां चापि का द्विता ॥६॥ इदं जगज्जगदिति चिता यदि न चेत्यते । तत्किं जगत्त्वं जगतो नभस्त्वं नभसोथ किं ॥७॥ कायोयं पर्वताकारश्चिता यदि न चेत्यते ॥ तत्किंनाम शरीरत्वं शरीरस्य शरीरिणां ॥८॥ चिदिंद्रियाणि चित्कायश्चिन्मनश्चिन्नरेश्वरः । चिदंतश्चिद्बहिश्चित्त्वं चिदाकाशश्चिदद्रयः ॥९॥ चित्तेनैवं नमहं सर्वं स्पर्शेनैव परा परत्वं करोमि मात्रासंस्पर्शं शरीरेण न किंचन ॥१०॥ किंमनेन शरीरेण काष्ठलोष्टसमेन मे ॥ अशेषजगदेकात्मा चिदहं चेतनात्मकः ॥११॥

द्विलक्षणः सं तः भव स्थितिस्तदुभयसंवलनात्का रा चित्कीर्त्यतां ॥९॥ स्पर्शेनैव णाभोगेच्छा तत्सर्वकं मात्राणां शब्दादिविषयाणां संस्पर्शं भोगं शरीरेणेति अचेतनस्य भोक्तृत्वायोगादिति भावः ॥१०॥ यदि शरीरेण न किंचन तर्हि शरीराभिमानो वृथैवेति त्याज्य एवेत्याह किमनेनेति । तत्त्यागे निरुपाधिचितो भेदकाभावात्सर्वचिदैकात्म्यसिद्धिः परो लाभ इत्याशयेनाह ॥ अशेषेति । चेतनात्मक इति चेतनाचितस्तदात्मकत्वस्य सर्वत्राविशेषादिति हेतुप्रदर्शनार्थं स्म

वा॰टी॰ उ॰
।।७५।।

अंबरे आकाशे भानौ सूर्यादितेजसि मरुत्पंजरे अवशिष्टमरुति त्रयेषु सुरासुरादिस्थावरजंगमदेहेषु च या चित्सा अहमेवैसे वाहमिति वार्थः ।।१२।। एवं सर्वविषैक्ये मे द्रष्टव्यमानो पृथगनवशेषाच्छायाघातात्तद्द्वित्वस्यासंभवाच्छत्रुमित्रादिकल्पनाविहरनिरस्तेत्याह चिदस्तीति ।।१३।। अस्तु वा देहादिद्वैतं तथाप्यसंगत्वर्णविन्मात्ररूपस्य मम न तत्सस्यापि क्षतिरस्तीत्याह बलिनाम्न इति ।।१४।। अस्तु वा तच्चित एव छिन्नं तथापि छेद्यछेदनादिभावाभावानां तद्गोचररागद्वेषादीनां च वि

अहं चिदंबरे भानावहं चिद्रूतपंजरे ।। सुरासुरेषु चिदहं स्थावरेषु चरेषु च ।।१२।। चिदस्तीह द्वितीया हि कल्पनैव न विद्यते ।। द्वित्वस्यासंभवाल्लोके कः शत्रुः कश्च वा सुहृत् ।।१३।। बलिनाम्नः शरीरस्य छिन्ने शिरसि भासुरे ।। चितः किं तद्भवेच्छिन्नं सर्वलोकावपूरणात् ।।१४ चिता
द्वेषो संचेतितो द्वेषो भवति नान्यथा ।। तस्माद्द्वेषादयः सर्वे भावाभावाश्चिदात्मकाः ।।१५।। न चितो व्यतिरेकेण प्रविवार्मापि किंचन ।। आसाद्यते किल स्फारादस्मात्त्रिभुवनोदरात् ।।१६।। न द्वेषोस्ति न रागोस्ति न मनो नास्य वृत्तयः ।। चिन्मात्रस्यातिशुद्धस्य विकल्पकलना कुतः ।।१७।। चिदहं सर्वगो व्यापी नित्यानंदमयात्मकः ।। विकल्पकलनातीतो द्वितीयांशविवर्जितः ।।१८।। चितश्चिदिति यन्नाम निर्नामायाः न नाम तत् ।। शब्दात्मिकैषा चिच्छक्तिः परिस्फुरति सर्वगा ।।१९।। दृश्यदर्शननिर्मुक्तकेवलामलरूपवान् ।। नित्योदितो निराभासो द्रष्टास्मि परमेश्वरः ।।२०।।

दधीनकल्पनत्वेन चिद्व्यतिरेकान्न चित्प्रतिकूलं किंचिदापन्नमित्याशयेनाह चितेति ।।१५।।१६।।१७।। प्रतिकूलाप्रसिद्धौ चितो नित्यानुकूलप्रथमानाम लक्षणा आनंदात्मता स्वत एव परिशिष्यत इत्याशयेन नित्यानंदमयात्मक इत्युक्तिः ।।१८।। जगद्रूपनामकल्पनापि स्वविवर्त एवेत्याह चित इति । सर्वगा सर्वनामरूपकल्पनाधिष्ठानचिच्छक्तिरेव स्वनामशब्दात्मिकेव परिस्फुरतीत्यर्थः ।।१९।। एवं च कोहमिति प्रश्नोत्तरमपि स्वयमेव मया वगतमित्याह दृश्येति ।।२०।। राम॰ ७५

।।२ नावच्चितः स्वनामकल्प +२

---

ईदृशे भारूपैकस्वरूपे अस्मिन्मयि नित्यसात्त्वाभासविवर्जितं नः केजले अलकांतं केशाग्रमिव प्रतिबिंबितचंद्रकलाप्रायः शुक्लपक्षकाले उपचयात् कांताः कालेयस्य चंद्रस्य तत्त्वमायो वा स कल्पनारूपो विकलाकारः परिच्छिन्नजीवभावो यत्र उदितः स आभासमात्रं भ्रांतिरेव न वास्तव इत्यर्थः ।।२१।। अनेन एवं तं जीवभावं स्वसमसाक्षात्कारदृष्टौ द्वैतस्वरूपेणैवाहं नयाम्यभिभवामि जितजीवभावत्वात्मैव परमेश्वर इति तं नमस्यतीति चेत्येत्यादिना ।।२२।। योग्यया युक्त्या प्रसक्त्या भेदान्वययोग्येनाखंडाभेदेन युक्त्या समासाक्षात्कारयोग्यया मनननिदिध्यासनयुक्त्या युक्तायेति वा मद्रूपं प्रत्यग्रूपाय ते ब्रह्म

वि

कल्पनांककलाकारः कालकांतकलामया ।। आभासमात्रमुदितो नित्याभासविवर्जितः ।।२१।। भारूपैकस्वरूपेस्मिन्स्वरूपेण जमाम्यहं ।। चेत्यरंजनरिक्ताय विमुक्ताय महात्मने ।।२२।। प्रत्यक्तत्त्वरूपाय नमोस्तु ते ।। चितये चेत्यमुक्ताय प्रयुक्त्या युक्ताय योग्यया ।।२३।। सर्वावभासदीपाय मह्यमेव नमोस्तु ते ।। चेत्यनिर्मुक्तचिद्रूपं विश्वावपूरकं ।।२४।। संशांतसर्वसंवेद्यं संविन्मात्रमहं महत् ।। आकाशवदनंतोहमण्वणोरणुरा ततः ।।२५।। नास्तादयेति मामेतौ सुखदुःखदशा दृशः ।। संवेदनमसंवेद्यमचेत्यं चेतनं ततं ।।२६।। न शक्तां मां परिच्छेत्तुं भावाभावा जगद्गताः ।। अथ चैते जगद्भावाः परिच्छिंदंतु मामिमं ।।२७।।

स्वरूपाय २
विश्वग २

त्येन मोस्तु ।।२३।।२४।।२५।। वर्तमानविषयैर्वेदनं असंवेद्यं अतीतानागतविषयैश्चेत्यं चेतनं उभयत्र वासुषादिवृत्तीनां स्वस्वादिवृत्तीनां च व्याप्तत्वे असंवेद्यम चेत्यमिति च विशेषणे ।।२६।। परिच्छेत्तुं देशतः कालतो वा इयत्तेव्यवस्थापयितुं शक्ताः भावाभावयोः प्रत्युत माक्षि परिच्छेद्यत्वादिति भावः । यदि प्रयाः नवयमियत्तेव्यवस्थापने परिच्छेदः श्रमः किंतु तत्त्वावधारणं ।। नन्तु कूलाग्रमाणादस्मो जगद्भावैस्तत्तत्तः परिच्छिंदंत्वे वालानमिति तत्राह । अथ चेति प्रकारांतरद्योतनार्थो अथशब्दः ।।२७।।

एवं परिच्छेदनं मम यथाभिमतं संमतमेव। यतस्तेन मत्स्वरूपपरिच्छेदमात्रेण मत्तो न व्यतिरेकिणो मरेकपरिशेषाः॥ अहमेव संपद्यंत इत्यर्थः एवं भूते अपरिच्छेदे वामहस्तगतस्य धनस्य दक्षिणाहस्तेन नयने हरणे परावृत्त्यर्पणे वा हस्तद्वयाभिन्नस्य देहात्मकस्य देवदत्तस्य यथा न धनक्षतिस्तद्वन्न काचित्क्षतिरित्याह यदीति॥२८॥ वस्तुतस्तु तत्त्वबोधात्सर्वमपि जगत्स्वयमेवेति॥ प्रागपि न किंचिदुदितं क्षतं वेत्याशयेनाह॥ सर्वदेति॥२९॥ अहमेकि काचित चिद्भूतस्य चम

यथाभिमतमेवैते मत्तो न व्यतिरेकिणः। यदि स्वभावभूतेन वस्तुना वस्तु नीयते॥२८ ह्रियते दीयते वापि तत्किं कस्य किल क्षतिः॥ सर्वदा सर्वमेवाहं सर्वकृत्सर्वसंगतः॥२९॥ चेत्यमस्त्यहमेवैतन्न किंचिदपि चोदितं॥ किं संकल्पविकल्पाभ्यां चितं चिद्रियमेकिका॥३०॥ संक्षोभमयाम्यहं तावच्छाम्याम्यात्मनि पावने॥ इति संचिंतयन्नेव बलिः परमकोविदः॥३१॥ ॐकारार्द्धमात्रार्थं भावयन्मौनमास्थितः॥ संशांतसर्वसंकल्पः प्रशांतकलनागणः॥३२॥ निःशंकमपि हृत्स्थचेत्यचिंतकचिंतनः॥ वातध्येयथा नहीनो निर्मलः शांतवासनः॥३३॥ अम्लवावातदीपाभो बलिः प्राप्तमहापदः॥ उपशांतमनास्तत्र रत्नवातायने बलिः॥३४॥

मसंकल्पविकल्पाभ्यां किं चितं उपचितमपचितं वा॥३०॥ अज्ञानात्संक्षोभयामि तत्त्वबोधात्तु शाम्यामि इति॥ संचिंतयन्बलिः॥ ॐकारात्स्थूल सूक्ष्मसंक्षोभाभ्यां तद्बीजाज्ञानेन च संवलितं चैतन्यं बोधयदकारादिमात्रात्रयं विहाय परं अर्द्धमात्रार्थं तुरीयं भावयन्स्वात्मतया नुभवंस्तत्र समाहितः स्थितः॥३१॥ ३२॥ हृदि अस्थानि चेत्यानि चिंतकचिंतनानि येन त्रिपुटीमात्रत्यागोपलक्षणमेतत् तत्र हेतुः ध्यात्रिति॥३३॥ ३४॥



उपले समुत्कीर्णः टंकच्छेदनिष्पादितः पुरुष इव बलिः प्रशमितेषणया अत एव परिपूर्णया अत एव विषयमननदोषदशाभिरुज्झितमा एतया निर्मलत्व स्वभाव प्राप्तिलक्षणया सत्त्वया विघ्ननं गतमेघः शरन्नभ इव अराजत ३५ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे सप्तविंशतितमः सर्गः २७ निश्चेष्टं बलिमालोक्य विषमैः दानवैः स्मरतः शुक्रस्तत्स्थितिमाख्याय तेषां शोकमिहाहरत् तस्य बलेर्गृहं आश्रयभूतं सौधं १ अनुचराने वनाम भिरु

अवसद्बहुकालं स समुत्कीर्ण इवोपले प्रशमितैषणयापरिपूर्णया मननदोषदशोज्झितयैतया बलिरराजत निर्मलसत्त्वया विघ्ननमभ्रतयेव शरन्नभः ३५ मोक्षोपायेषु उपशमप्रकरणे बलिविश्रांतिर्नामसर्गः २७ श्रीवसिष्ठ उवाच अथ ते दानवास्तत्र बलेरनुचरास्तदा नद्धे हस्फाटिकं सौधमुच्चैरारुरुहुः क्षणात् १ डिंभाद्या मंत्रिणो धीराः सामंताः कुमुदादयः सुराद्याश्चैव राजानो हृत्ताद्या बलिहारिणः २ हयग्रीवादयः सैन्याश्चक्रजाद्याश्च बांधवाः लड्डुकाद्याश्च सुहृदो वहरकाद्याश्च लालकाः ३ कुबेरयमशक्राद्या उपायनकराः सुराः यक्षविद्याधरानागाः सेवावसरकांक्षिणः ४ रंभातिलोत्तमाद्याश्च वामरिण्यो वरांगनाः सागराः सरितः शैला दिशश्च विदिशस्तथा ५ सेवार्थमाययुस्तस्य तं प्रदेशं तदा बलेः अन्ये च बहवः सिद्धास्त्रैलोक्योदरवासिनः ६ ध्यानमौनसमाधिस्थं चित्रार्पितमिवाचलं नमत्किरीटावलयो ददृशुर्बलिमादृताः ७

दिशेति डिंभाद्याः इन्यादिना २ ३ ४ दिशो विदिशश्च दिग्विदिग्देवतास्तासधिकृता जनाश्च ५ सिद्धाः देवयोनिविशेषाः ६ शिरोनमनान्नमंत्याः किरीटावलयो येषां आदृताः सादराः ७

कृतः अवश्यकर्तव्यः प्रणामो यैः । सुहृदो विषादमंथरतां उदासीनाः विस्मयमंथरतां ॥ तत्त्वविदः स्वानंदमंथरतां अनभिज्ञोपजीविनस्तु भयमंथरतां ययुः अथवा प्राणसंशयाद्विषादमंथरतां सुखप्रसाददर्शनाद्विस्मयमंथरतां रोमांचाद्यानंदलिंगदर्शनादानंदमंथरतां चिरमनुत्थानेत्राणादर्शनाद्भयमंथरतां ययुरित्यर्थः ॥ ८ ॥ ९ ॥ कल्पितं स्मरणसमागते नैव भार्गवेण योगबलाद्बलिसौधदेशे प्राप्तत्वेन कल्पितं ॥ १० ॥ ११ ॥ इवशब्दो विश्रांतेरपि क

तं दृष्ट्वा कृतकर्तव्यप्रणामास्ते महासुराः ॥ विषादविस्मयानंदभयमंथरतां ययुः ॥ ८ ॥ मंत्रिणः प्रविचार्यात्र किं प्राप्तमिति दानवाः ॥ मार्गं विचिंतयामासुर्गुरुं सर्वविदां वरम् ॥ ९ ॥ चिंतनानंतरं दैत्या भार्गवं भास्करं वपुः ॥ ददृशुः कल्पितं प्राप्तं गंधर्वनगरं यथा ॥ १० ॥ पूज्यमानोऽसुरगणैर्निविष्टो गुरुविष्टरे ॥ ददर्श ध्यानमौनस्थं भार्गवो दानवेश्वरं ॥ ११ ॥ विश्रम्य स क्षणमिव प्रेमवानवलोक्य च बलिं विचारयन्दृष्ट्वा परिक्षीणभवभ्रमं ॥ १२ ॥ देहरश्मिशतैर्दंतदीप्तिभिः क्षीरसागरं ॥ क्षिपन्निव सभामाह हसन्वाक्यमिदं गुरुः ॥ १३ ॥ अतिमात्रमिदं दैत्याः स्वविचारणयैव ते ॥ संप्राप्तविमलावासः सिद्धोऽयं भगवान्बलिः ॥ १४ ॥ अयं तदेवमेवेह तिष्ठन्दानवसत्तमाः स्वात्मनि स्थितिमाप्नोतु परं पश्यत्वनामयं ॥ १५ ॥ श्रांतो विश्राममायातः क्षीणचित्तभवभ्रमः ॥ शांतसंसारनीहारो वाचनीयो न दानवाः ॥ १६ ॥

ल्पितद्योतनार्थः ॥ १२ ॥ क्षिपन्प्रसारयन्निव दंताभांतस्यान् दैत्यान् हसन् अनभिज्ञानां व्यापनाय उपहसन् ॥ १३ ॥ हे दैत्याः अयं बलिः स्वविचारणयैव संप्राप्तः विमल आवासः सर्वाधिष्ठानं ॥ प्रलये न तथा विध इति वा तत्तत् अतिमात्रं अतिशयो यस्य सुखविश्रांतेरित्यर्थः ॥ १४ ॥ तत्तस्मात् अयमेवमेव समाहितस्तिष्ठन् निरतिशयानंदस्वात्मनि स्थितिं चिरावस्थानमाप्नोतु ॥ १५ ॥ न वाचनीयः न संभाषणीयः अस्तु तूष्णीमासनेतिभावः ॥ १६ ॥ 

---

अप्रबुद्धिराज्यंधकारनिद्रादिसंभ्रमे शांते सति दिनेन दिवसेन सौरः करोत्करः किरणसमूह इव एतेन बलिना अज्ञानसंकटे शांते सति स्व एवालोकः संप्राप्तः ॥ १७ ॥ बीजकोशाद्बीजपुटात् स्वसंवित्या सर्वछितावस्था प्रच्युत्या अंकुरादिभाव प्रबोधमेतियावत् ॥ १८ ॥ स्वामिकार्याणि राज्यतंत्राणि ॥ १९ ॥ दैत्याग्रहणं देवानामप्युपलक्षणं ॥ अतएव दुर्हृदो हर्षजां सुहृदो मर्षजां सुहृदुपजीविनश्च विषादजां चिंतां जहुः ॥ २० ॥ प्राग्व्यवस्थया पूर्वक्रम सुरेज्ये

स्व एवालोक एतेन संप्राप्तोऽज्ञानसंकटे ॥ शांते तत्र संभ्रमे सौरो दिनेनेव करोत्करः ॥ १७ ॥ स्वयमेव हि कालेन प्रबोधमयमेष्यति ॥ बीजकोशात्स्वसंवित्त्या सुप्रसन्नैरिवांकुरः ॥ १८ ॥ कुरुध्वं स्वामिकार्याणि सर्वे दानवनायकाः ॥ बलिर्वर्षसहस्रेण समाधेर्बोधमेष्यति ॥ १९ ॥ इत्युक्त्वा गुरुणा तत्र हर्षामर्षविषादजां ॥ दैत्याश्चिंतां जहुः शुष्कां मंजरीमिव पादपाः ॥ २० ॥ वैरोचनिसभासंस्थां विधाय प्राग्व्यवस्थया ॥ स्वव्यापारपरास्तस्थुः सर्वे सर्वसुरास्ततः ॥ २१ ॥ नरा महीमहिपतयो रसातलं ग्रहा नभस्त्रिदशगणास्त्रिविष्टपं ॥ दिशो द्वयो दिक्पतयश्च कंदरान्वनेचरा गगनचराश्चराश्च खं ययुः ॥ २२ ॥ मोक्षोपायेषूपशमप्रकरणे बलिसमाधानवर्णनं सर्गः ॥ २८ ॥

तंत्रव्यवहारक्रमेण ॥ २१ ॥ आगंतुका नरनागादयस्तराः किं चक्रुस्तदाह नरा इति ॥ ययुरिति सर्वत्र संबध्यते ॥ अद्रयः कुलाचलादिदेवताः दिक्पर्वतयो दिक्पालाश्च स्वास्वा दिशो ययुः वनेचराः ऋक्षवानरादियूथपतयः किष्किंधादिकंदरान् ययुः ॥ गगनचरा गरुडसंपातिजटायुःप्रभृतयः ॥ २२ ॥
इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणेऽष्टाविंशः सर्गः ॥ २८ ॥

वा॰टी॰उप॰ ७६

जीवन्मुक्तस्वराज्यश्रीः पाताले रोधनं बलेः ॥ रामाय बलिवत्तूर्णस्थितिश्चात्रोपदिश्यते ॥ वर्षसहस्रेणेति समाधेर्वर्षसहस्रेण स्वतः संयोगादपवर्गे तृतीया ॥ १ ॥ ब
लेरिदं बालं नगरं वैरिंचेरायतनम् ॥ गगने स्वर्गे यो घस्सर्यः किरणप्रवाहे उदिते सति कमलाकरः पद्माकर इव विकासश्रीमानित्यर्थः ॥ सर्वौघे सर्गौघे
इति पाठ्यो स्तु सर्वपदार्थं जातं तत्संगं वा ओघयति समर्थयतीति व्युत्पत्त्या सूर्य एव ग्राह्यस्तस्मिन्नुदिते सतीत्यर्थः ॥ ओघ सामर्थ्ये इति धातोरेर्घ
तात्कर्मण्यण् ॥ ३ ॥ समाधिमदने प्रागुक्तसमाधिसुखमग्नस्य दिव्यवर्षसहस्रमविक्षणवद्भूतमिति क्षणं स्थित्वेत्युक्तिः ॥ ४ ॥ करोमि विश्रांतिमि

श्रीवसिष्ठ उवाच ॥ अथ वर्षसहस्रेण दिव्येनासुरसत्तमः ॥ देवदुंदुभिनिर्घोषैर्बुबुधे भगवान्बलिः ॥ १ ॥ बलौ प्रबुद्धे तद्बालं वि
रेजे नगरं तदा ॥ वैरिंचइव सर्वौघ उदिते कमलाकरः ॥ २ ॥ बलिः प्रबुद्ध एवासौ यावन्नायांति दानवाः ॥ तावत्संचिंतयामास
समाधिमदने क्षणं ॥ ३ ॥ अहो नु रम्या पदवी शीतला पारमार्थिकी ॥ अहमस्यां क्षणं स्थित्वा परां विश्रांतिमागतः ॥ ४ ॥ तदेता
मेव पदवीमवलंब्य करोम्यहं ॥ भवतीहोपभुक्ताभिः किं मे बाह्यविभूतिभिः ॥ ५ ॥ ऐंदवेष्वपि बिंबेषु न तथानंददीचयः ॥ तोष
यंति यथांतर्मे संसिद्धिमवभूतयः ॥ ६ ॥ इति भूयोपि विश्रांत्यै कुर्वाणं गलितं मनः ॥ बलिमावारयामासुर्दैत्याः शृंग
मिवांबुदाः ॥ ७ ॥ नानालोकः पुनर्दध्यौ तत्क्षणमाकुलेक्षणः ॥ तेकुलाचलसंकाशैः परिवीतवपुस्त्विदम् ॥ ८ ॥

तिशेषः ॥ बाह्यविभूतिभिरुपभुक्ताभिर्मे किं भवति ॥ न किंचिदीदृशं विश्रांतिसुखमित्यर्थः ॥ ५ ॥ तदेवाह ऐंदवेष्विति ॥ संसिद्धिः समाधिपरिपाकस्तद्
वाभूतयः आनंदाः एकस्मिन्नेवद्रष्टृत्वया अपरिच्छेद्यत्वात् बहुत्वकल्पनया बहुवचनं ॥ ६ ॥ अवारमाभूरागत्यापरिवव्रुः ॥ ७ ॥ पुनः शब्दः पू
र्वसमाधिसंकल्पपरावृत्तिद्योतनार्थः ॥ ८ ॥

राम॰ ७८

---

उपादेयबुद्ध्या हि बाह्यार्थदर्शने मनस्तदभिपातित्वात्तद्राजिनालक्षणं मलं भाति न दर्शनमात्रेणेत्यर्थः ॥ ९ ॥ न तु मोक्षेच्छया समाधानं बलं बत नियमोस्तु तत्रा
ह मोक्षमिति ज्ञानेनात्रैकालिके अविद्यातत्कार्यबाधे सति बंधस्यैवादर्शनादिति भावः ॥ बालानां मूर्खाणां विडंबना चेष्टानुकृतिः ॥ १० ॥ ११ ॥ स्वं प्रत्यग्रूपं
पुरं आत्मतत्त्वं दृश्यस्वभावादेव बहिरध्योदासीन्येनावलोकयतस्तत्र यद्वस्तु प्रति आयाति तत् आयातु स्फुरतु नाम नेनावतामेऽज्ञानामिव देहादि

चितः क्षीणविकल्पस्य किमुपादेयमस्ति मे ॥ मनस्तदभिपातित्वाद्याति तद्रसनामलं ॥ ९ ॥ मोक्षमिच्छाम्यहं कस्माद्बद्धः केनास्मि
वै पुरा ॥ अबुद्धो मोक्षमिच्छामि केयं बालविडंबना ॥ १० ॥ न बंधोस्ति न मोक्षोस्ति मोरक्षं मे क्षयमागतं ॥ किं मे ध्यानविला
सेन किं चाध्यानेन मे भवेत् ॥ ११ ॥ ध्यानाध्यानभ्रमौ त्यक्त्वा तु स्वं स्वमवलोकयन् ॥ यदायाति तदायातु न मे हृद्धिर्न वा क्षयः ॥
१२ ॥ न ध्यानेनापि चाध्यानेन भोगान्नाप्यभोगितां ॥ अभिवांछामि तिष्ठामि सममेव गतज्वरः ॥ १३ ॥ न मे वांछा परे तत्त्वे न मे वांछा जग
त्स्थितौ ॥ न मे ध्यानदशा कार्यं न कार्यं विभवेन मे ॥ १३ ॥ नाहं मृतो न जीवामि न सन्नासन्न सत्समः ॥ नेदं मे नैव चान्यन्मे नमो मह्यम
हं ह हत ॥ १४ ॥ इदमस्तु जगद्राज्यं तिष्ठाम्यत्रानु संस्थितः ॥ नेह चास्तु जगद्राज्यं तिष्ठाम्यात्मनि शीतलः ॥ १५ ॥ किं मे ध्यानदशा
॥ कार्यं किं राज्यविभवश्रिया ॥ यदायाति तदायातु नाहं किंचन मे क्वचित् ॥ १६ ॥

ताराध्याध्यासात् हृद्धिः क्षयश्च युक्तौ हृद्धिक्षयौ त्यागेनानर्थः स्यादित्यर्थः ॥ अर्थः श्लोकः क्वचिदेवास्ति न सर्वत्र ॥ १२ ॥ १३ ॥ देहसंबंधाभावान्न मृतः प्राण
संबंधाभावान्न जीवामि सन्मूर्तः सन्मयस्तद्विकारः ॥ इदं देहभुवनादि अन्यद्देहांतरभुवनांतरादि ॥ १४ ॥ १५ ॥ १६ ॥

वा॰टी॰उ॰ ७९ कर्तव्यं कर्तृत्वास्य यानिर्वर्तनीयं ततः किंचित् अनास्थितचेष्टासाध्यं प्रकृतं कर्म राज्यपरिपालनं किं कुतो न करोमि। १७ १८ दृष्टिपातानां विभा
गेन तत्तदुचितवैचित्र्येण। १९ ध्येयो वासनात्यागः प्राग्वर्णितस्तन्मयात्मना तद्विलासप्रचुरेण। २०। द्विजापाद्यार्घ्यादि उचितदानसंभावनादिसत्का
रः संमाननमिति भेदः। २१। २२। असौ बलिः सकलानां देवासुरादीनां शासने आज्ञापनविषये राज्ये ववृधे राज्यं गतः अभिवृद्धिं प्रापेत्यर्थः। अथक

नकिंचिदपि कर्तव्यं यदिनाम मयाधुना। तत्कस्मान्न करोमीदं किंचित्प्रकृतकर्म वै॥१७॥ इति निर्णीय पूर्णात्मा बलिर्ज्ञानवतां वरः। दे
त्यानालोकयामास पद्मानीव दिवाकरः॥१८॥ दृष्टिपातविभागेन सर्वेषां तु जन्मनां। शिरःप्रणामान्सोऽगृह्णात्पुष्पामोदानिवानि
लः॥१९॥ अभवैरोचनिस्तत्र ध्येयत्यागमयात्मना। मनसा सविकल्पेन राजकार्याणि संव्यधात्॥२०॥ द्विजान्देवान्गुरूंश्चैव पू
जयामास पूजया। संमानयामास सुहृद्बंधुसार्थं तमज्ज्वना॥२१॥ अर्थेनापूरयामासमर्थ्यानर्थिगणांस्तथा। ललना
र्लालयामास विचित्रविभवार्पणैः॥२२॥ इत्यसौ ववृधे तस्मिन्राज्ये सकलशासने। यज्ञं प्रति बभूवाथ मतिरस्य कदाचन
२३। तर्पिताशेषभुवनं देवर्षिगणपूजितं। सहशुक्रादिभिर्मुख्यैः स चकार महामखं॥२४॥ बलिर्भोगभरस्यार्थी नेति निर्णीय
माधवः। बलेरीहितसिद्ध्यर्थं विद्धि हस्तान्मखं ययौ॥२५॥ भोगैककृपणायेदं जगत्त्रयं गलखंडकं। दातुं शोच्याय शक्राय
वयोज्येष्ठाय कार्यवित्॥२६॥ क्रममाणो बलेनात्र वंचयित्वा बलिं हरिः। बबंध पातालतले मर्गेह इव वानरं॥२७॥

दाचन यज्ञं प्रति अस्य मतिरिच्छा बभूव। २३। महामखं अश्वमेधं। २४। २५। भोगे एकस्मिन्नेव आसक्तत्वात् कृपणाय अत एव शोच्याय। कार्यं अवश्यक राम॰ ७९
र्तव्यं शक्रस्य कृतफलप्रदानं वेत्तीति कार्यवित्। भिक्षणचातुर्यवित्। २६। बलेन मायाबलेन क्रममाणस्त्रीन्लोकानिति शेषः॥२७॥

MEMORIAL

अद्य अद्यापि असौ बलिः पाताले पुनरिंद्रत्वहेतुना प्रारब्धेनोपलक्षित इति शेषः। स्थितः ध्याने निर्विकल्पकसमाधौ विषण्णा गलिता धीर्यस्य २८
२९ समा उदयास्तमयरहिता स्थिराः कराः मरीचयो यस्याः चित्रस्य लेखनं चित्रलेखा तत्स्थं बंधिनी सूर्यावलिः सूर्यमंडलं यथा तथेत्यर्थः ३०
जीवतां जीवनास्थावतां भोगलंपटानां विभवानां जन्मादीनां चाविर्भावतिरोभावसहस्राणि चिरं आलोक्य तस्य बलेर्मनः विरतिं वैराग्यं गतम् ३१

अद्यासौ संस्थितो राम पुनरिंद्रत्वहेतुना। जीवन्मुक्तवपुःस्वस्थो नित्यं ध्यानविषण्णधीः॥२८॥ पातालकुहरे तिष्ठन्जीवन्मु
क्तगतिर्बलिः। आपदं संपदं दृष्ट्वा समयेव प्रपश्यति॥२९॥ नास्तमेति न चोदेति तत्त्वज्ञा सुखदुःखयोः। समस्थिरकरा
चित्रलेखा सूर्यावलिर्यथा॥३०॥ आविर्भावतिरोभावसहस्राणीह जीवतां। तन्मनश्चिरमालोक्य भोगेषु विरतिं गतं॥३१॥
दशकोटीश्च वर्षाणामनुशास्य जगत्त्रयं। अंते विरक्ततां प्राप्तमुपशांतं बलेर्मनः॥३२॥ ऊहापोहसहस्राणि भावाभाव
शतानि च। बलिनापरिदृष्टानि क्षमाशतसमेत्यसौ॥३३॥ भोगाभिलाषं संत्यज्य बलिः संपूर्णमानसः। आत्मारामः स्थि
तो नित्यं मध्ये पातालकोटरे॥३४॥ पुनरेतेन बलिना जगदिंद्रतयाखिलं। अनुशास्यमिदं राम बहून्वर्षगणानिह॥३५॥
८ न तस्येंद्रपदप्राप्त्या तुष्टिः समुपजायते। न तस्य स्वपदभ्रंशादुद्वेग उपजायते॥३६॥

३२ सुखदुःखयोरूहापोहयोर्गमागमापाययोः सहस्राणि भावाभावयोः संपद्विपदोः शतानि च सहस्रशतशब्दौ असंख्येयपरौ ३३ स सप्तपातालानां मध्ये स्मात्तलाख्ये पातालकोटरे पावद्विपरस्थिते स्थितः ३४ अनुशास्यं स्वामिभावेन आज्ञाप्यं भविष्यतीत्यर्थः ३५ ३६

उदिताशयः संतुष्टचित्तः संप्राप्तं प्रारब्धोपनीतं आहरन्नुपभुंजानः ॥ ३७ ॥ बलिर्हरिरिन्द्रमुपसंहृत्य तं रामायोपदिशति बलेरित्यादिना ॥ अभ्युदितः जीव
न्मुक्तत्वमभ्युदयवान् ॥ ३८ ॥ चाप्रविवेकेन स्वविचारेण ॥ ३९ ॥ दिव्यानां चत्वारिंशत्कोटीरिति यावत् ॥ ४० ॥ अवश्यं वैरस्यं दुःखपर्यवसानं यस्य ॥ अवैरस्यं निर्दु
ःखं ॥ ४१ ॥ कांततया रम्यतया ॥ तत्र हरस्याः पर्वता रम्या इति प्रसिद्धं दृष्टांतमाह दूरादिति ॥ ४२ ॥ इह ऐहिकभोगेषु अमुत्र पारलौकिकभोगेषु धाव

मनः सर्वेषु भावेषु सर्वदैवोदिताशयः ॥ संप्राप्तमाहरन्स्वस्थ आकाश इव तिष्ठति ॥ ३७ ॥ बलेर्विज्ञानसंप्राप्तिरेषा ते कथिता मया ॥ ए
तां दृष्टिमवष्टभ्य त्वमप्यभ्युदितो भव ॥ ३८ ॥ बलिवत्स्वविवेकेन नित्योऽहमिति निश्चयात् ॥ पदमासादयाद्वैतं पौरुषेणैव राघव ॥ ३९ ॥ दि
व्याश्चैव वर्षाणां कोटीर्भुक्ता जगत्त्रयं ॥ अंते वैरस्यमापन्नो बलिरप्यसुरोत्तमः ॥ ४० ॥ तस्मादवश्यवैरस्यं भोगभागमपि दम सं
त्यज्य सत्यमानंदमवैरस्य परं व्रज ॥ ४१ ॥ इमा दृश्यदृशो राम नानाकारविकारदाः ॥ नेह कांततया ज्ञेया दूरात्स्थैलशिला इव ॥ ४२ ॥
धावमानमिहामुत्र लुठितं लोकवर्त्मसु ॥ संस्थापय निबध्यैतच्चेतो हृदयकोटरे ॥ ४३ ॥ चिदादित्यो भवानेव सर्वत्र जगति स्थितः ॥ कः
परस्तेऽत्र आत्मीयः परिस्खलसि किं मुधा ॥ ४४ ॥ त्वमनंतो महाबाहो त्वमाद्यः पुरुषोत्तमः ॥ त्वं पदार्थशताकारैः परिस्फूर्जसि
चिद्वपुः ॥ ४५ ॥ त्वयि सर्वमिदं प्रोतं जगत्स्थावरजंगमं ॥ बोधे नित्योदिते शुद्धे सूत्रे मणिगणा यथा ॥ ४६ ॥

मानं लोकवर्त्मसु पामरचेष्टासु लुठितं प्रवृत्तं ॥ ४३ ॥ ननु शत्रुमित्रयोः कथं समदृष्टिः स्यात्तत्राह चिदादित्य इति ॥ आदित्य इव सर्वावभासिका चित् चिदादि
त्यः ॥ तथा च त्वमेव शत्रुदेहादावपि प्रकाशक आत्मेति न वैषम्ये हेतुरस्तीति भावः ॥ ४४ ॥ ननु जीवस्य मम कथमीश्वरात्मसमदर्शनं तत्राह त्वमि
ति ॥ जडवैषम्यमप्यानंत्येनैवेनाशंक्यमित्याशयेनाह ॥ त्वं पदार्थशताकारैरिति ॥ ४५ ॥ तत्त्वभावनार्थमाह त्वयीति ॥ ४६ ॥ 

कालकृतवैषम्यमप्यपि परिहर्तुमाह न जायसे इति ॥ ४७ ॥ तस्माद्धे जन्मादिरोगाणां प्राबल्यं तस्याप्यथे च तेषां दौर्बल्यमित्यन्वयव्यतिरेकाभ्यां परीक्ष्ये
त्यर्थः ॥ भोगानां तस्मात् मुत्सृज्य भोक्ता भोगसाक्षिचिन्मात्रमेव भव ॥ ४८ ॥ चात्वरीयचिद्रूपत्वादेव जगत्स्थितिरित्याह त्वयीति ॥ ४९ ॥ शुद्धचित्तः प्रबुद्धचित्तः ॥ ५० ॥
यद्यपि शुद्धचित्तोऽसि तथापि तत्त्वशुद्ध्येक्रमादुपायं शृणु इत्याह एवमिति ॥ यद्यदिष्टं मनःप्रियं तदनिष्टमनर्थसाधनं यच्चानिष्टं अप्रियं मनस्तपःक्ले

न जायसे न म्रियसे त्वमजः पुरुषो विराट् ॥ विच्छुद्धा जन्ममरणभ्रांतयो माभवंतु ते ॥ ४७ ॥ समस्तजन्मरोगाणां प्रविचार्य बलाबलं ॥ त्य
क्त्वामुत्सृज्य भोगानां भोक्तैव भव केवलं ॥ ४८ ॥ त्वयि स्थिते जगन्नाथे चिदादित्ये समरोदिते ॥ इदमाभासते सर्वं संसारस्वप्नमंडनं ॥ ४९ ॥
मा विषादं कृथा व्यर्थं सुखदुःखेष्वणामते ॥ शुद्धचित्तोऽसि सर्वात्मा सर्वत्रास्त्व भासकः ॥ ५० ॥ इदमिष्टमनिष्टं त्वमनिष्टं चेष्टमि
त्यपि ॥ परिकल्प्य तदभ्यासात्तत्तोऽपि परित्यज ॥ ५१ ॥ इष्टानिष्टदृशोस्त्यागे समतोदेति शाश्वती ॥ तया हृदयवर्तिन्या पुनर्जंतु
र्न जायते ॥ ५२ ॥ येषु येषु प्रदेशेषु मनो मज्जति बालवत् ॥ तेभ्यस्तेभ्यः समाहृत्य तद्धितत्त्वे नियोजयेत् ॥ ५३ ॥ एवमभ्यासतोऽभ्या
सं मनो मत्तमतंगजं ॥ निबध्य सर्वभावेन परं श्रेयोऽधिगम्यते ॥ ५४ ॥

शेऽपि यत्संयमप्राणायामादि तत्सर्वमिष्टं आवश्यकं ममेति परिकल्प्य ससमप्रमिक्ता परिपाकपर्यंतं तदभ्यासात् ज्ञाते सति तन्नोकल्पनामपि ततः परित्यजेत्य
र्थः ॥ ५१ ॥ तत्त्यागफलमाह इष्टेति हृदयवर्तिन्या अभ्यासाद्धृदये स्थिरीकृतया ॥ ५२ ॥ तत्त्वे तत्तदधिष्ठानचिन्मात्रे तथा च भगवताप्युक्तं यतो यतो निश्च
रति मनश्चंचलमस्थिरं ततस्ततो नियम्यैतदात्मन्येव वशं नयेदिति ॥ ५३ ॥ सर्वभावेन सर्वप्रयत्नेन सर्वात्मभावे न च निबध्य निरुद्ध्य ॥ ५४ ॥

शरीरमेवमयथार्थं परमार्थ इति ये जानंति तैः भोगसंकल्पैर्ये विक्रीतैरिव तत्परवशैः ॥५५॥ पराधीनप्रज्ञानां स्वयं विचारासमर्थानां मौर्ख्यमेव महानर्थ इत्याह अ
किंचना इति ॥ तस्मात्तत्त्वस्य निर्णीतो निर्णयविषये अकिंचनात् विवेकवैराग्याद्युपायदरिद्रात् परेषां प्रतारकाणां मूर्खाणां चोक्तिषु अंधगोलांगूल
न्यायेनावलंबमानात् ॥५६॥ एवं मौर्ख्यं लक्षणयाविवेकाद्दूरणाय विवेकाभ्रं ॥५७॥ मौर्ख्यनिरासहेतुर्विचारः स च बहुतरजन्मसंचितसुकृतपरिपाककृताद्दाता
नुग्रहादेव भवतीत्याह आत्मनैवेति प्रयत्नेन श्रवणवैराग्यादिपुरुषप्रयत्नेन ॥५८॥ सत्स्वपि वैराग्यविचारश्रवणादौ बहिर्मुखदृष्टेर्ज्ञानानुदयात् प्रत्यग्दृष्टिर

मा शरीरयथार्थज्ञैर्मिथ्यादृष्टिहताशयैः ॥ क्रैतैः संकल्पविक्रीतैर्विमूढैः समतां व्रज ॥५५॥ अकिंचनात्त्वनिर्णीतो लंबमानात्परोक्तिषु ॥ न मौर्ख्यादधिको लोके कश्चिदस्तीह दुःखदः ॥५६॥ तमेतदविवेकाभ्रमुदितं हृदयांबरे ॥ विवेकपवनेनाशु हरं नय महामते ॥५७॥ आत्मनैव प्रयत्नेन यावदात्मावलोकने ॥ न कृतोऽनुग्रहस्तावन्न विचारोदयो भवेत् ॥५८॥ वेदवेदांतशास्त्रार्थतर्कदृष्टिभिरप्ययं नात्मा प्रकटतामेति यावन्न समवेक्षितं ॥५९॥ त्वमात्मन्यात्मना राम प्रसादे समवस्थितः ॥ प्राप्तोऽसि विततं बोधं मदुक्त्येव बुध्यसे ॥६०॥ विकल्पांशविहीनस्य तवैषा हि वसंततः ॥ दृष्टा विततता व्याप्तिर्मदुक्त्या परमात्मनः ॥६१॥

पि आवश्यकीत्याशयेनाह वेदेति ॥ तथा चोक्तं वार्त्तिके अपामार्गलतेवायं विरुद्धफलदो भवेत् ॥ प्रत्यग्दृशां विमोक्षाय निबंधाय पराग्दृशामिति ॥५९॥ न
हि प्रत्यग्दृष्टिरेव केवला ज्ञानायालं किं गुरूपदेशेनेत्याशंक्याह मदुक्त्येवेति ॥ मदुपदेशसत्त्वे एवेत्यर्थः ॥ बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतनं इति न्या
याद्गुरुशास्त्रोक्तिसंवादे सत्येव स्वप्रत्यक्षे विश्वासादसंदिग्धबोधसिद्धिरिति द्योतनायैवकारः ॥६०॥ अमुमेवार्थं स्पष्टमाह विकल्पेति ॥ संदेहादिचित्त
विकल्पैरविषयीकृतस्येत्यर्थः ॥ विततता व्याप्तिस्त्रैधापरिच्छिन्नता ॥६१॥



कौतुकं बाह्यार्थचमत्कारकुतूहलं मात्मतत्त्वजिज्ञासाकुतूहलं च तत्र नीहारोऽवश्यायः ॥६२॥ हे मुने मननशील राम त्वं यदा विगतो बोधस्य बोधैकरसस्यात्म
तत्त्वस्य कलंक आवरणं विशंकितो विक्षेपश्च यस्य तथाविधोऽभविष्यस्तदा ते परं प्राप्तं ज्ञानं तत्साधनं च विचारगुरुशास्त्रोपदेशादि उपगच्छसि मोक्षार्थसीक
रोषि यद्वा विवेकवैराग्यादि पालयसि यत्नेन रक्षसि यद्वालस्यप्रमादादिदोषजातं निहंसि यत्नेन जयसि यद्वा समाधिसुखास्वादं तेऽपि वसि यद्वा अन्तरभ्रमिका
धिरोहणे न विस्मयसे यद्वा संभ्रमिका विश्रांत्या हर्षहर्षावस्थापि कसुखोत्कर्णाद्विवर्द्धसे तद पि तदानात्मकं किंतु ब्रह्मैव यथास्थितं तिष्ठेरित्यर्थः

विलीनसर्वसंकल्पः शांतसंदेहविभ्रमः ॥ क्षीणकौतुकनीहारो जातोऽसि विगतज्वरः ॥६२॥ यदुपगच्छसि पासि निहंसि वा पिबसि विस्मयसे विविवर्द्धसे ॥ तदपि तेन तदास्य यदा मुने विगतबोधकलंकविशंकितः ॥६३॥ मोक्षोपायेषूपशमप्रकरणे बलेर्विज्ञानप्राप्तिः सर्गः ॥२९॥ श्रीवसिष्ठ उवाच ॥ अथेमं परमं राम विज्ञानाभिगमेऽक्रमे ॥ शृणु दैत्येश्वरः सिद्धः प्रह्लादः स्वात्मना यथा ॥१॥

६३ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे एकोनत्रिंशः सर्गः ॥२९॥ हिरण्यकशिपोर्वीर्यं प्रह्लादादिसुतोद्भवः ॥ नृसिंहेन वधः शोकादौर्ध्व
देहिकमुच्यते ॥ इत्थं केवलात्मकृतात् अभ्यासप्रयत्नात्तत्त्वविचारात्तच्छास्त्राचार्योपदेशानुग्रही तुर्ज्ञानोदयक्रमो निरूपितः ॥ इदानीमुपासितेश्व
रानुग्रहजन्याद्विचाराज्ज्ञानोदयप्रकारं वर्णयितुं प्रह्लादोपाख्यानमाविष्कुर्वन् वसिष्ठस्तत्र बलेरामम अवधापयति ॥ अथेति विज्ञानस्याभिगमे
आभिमुख्येन प्राप्तौ निष्प्रत्यूहप्राप्तावितियावत् ॥ तथा च भगवतैवोक्तं जरामरणमोक्षाय मामाश्रित्य यतंति ये ते ब्रह्म तद्विदुः कृत्स्न
मिति ॥१॥

वा·टी·उप· ८२

नारायणस्यपराक्रमइवेत्यर्थे सर्वपदं लक्षणया वर्तते। उष्ट्रमुखः खरमुखइत्यत्रोष्ट्रशब्दस्तन्मुखसदृशार्थेइवेति इवार्थवृत्तिमध्यमपदलोपीवा
बहुव्रीहिः। २। नारायणपराक्रमलोपपादकं विशेषणं। आक्रान्तभुवनाभोग इति। भुवनपदेनत्त्रीण्यपिभुवनानिगृह्यंते। सहिरण्यकशिपुर्हरेरिं
द्राद्यधिष्ठितजगत्त्रिभुवनैश्वर्यं जहार षट्पदस्यराज्ञो गृहमस्तं प्रातर्विकासेन हृतस्तत्रं अंबुजे राजहंस इव। ३। सुरासुरशब्दस्तत्तदधिपतिपरः। न
लिन्या अलिनां भ्रमराणां राज्यं निरस्तहंसो घोरं तीव्रं सुपमानुरोधात्तगदुहेजकेतागम्यते। ४। माधवो वसंतकालः। ५। तेजस्विजिताः ववसालं बा।

नं·म

आसीत्पातालकुहरे विद्रावितसुरासुरः। हिरण्यकशिपुर्नारायणपराक्रमः।२। आक्रान्तभुवनाभोगः स जहार हरेर्जगत्। ष
ट्पदस्येव हृतपत्रं राजहंसस्य वांबुजं।३। चकार जगतां राज्यं समाक्रान्तसुरासुरः। दंती निरस्तहंसो घोनलिन्यामलिनामिव।४।
अथासावसुराधीशः कुर्वंस्त्रिभुवनेशतां। काले व्यसूत पुत्रान्नं कुरानिव माधवः।५। ते वर्द्धिताचिरेणैव तेजस्विजितबालकाः
दशार्कांशुशतानीव व्योमाक्रान्तिविलासिनः।६। प्रह्लादनामबलवान्प्रधानात्माबभूव ह। तेषां मध्ये महाप्राणो मतिमानि ते·
व कौस्तुभः।७। तेनाराज ततपुत्रेण हिरण्यकशिपुर्भृशं। सर्वसौंदर्ययुक्तेन वसंतेनेव वत्सरः।८। अथ पुत्रसहायोसौ
बलकोशसमन्वितः। आजगाम मदं दैत्यस्त्रिगंडगलितं भवेत्।९।

काः दशसंख्याः अर्कस्यांशुशतानीव व्योमाक्रान्तिराकाशव्याप्तिः सुरलोकाक्रमणं च तया विलासिनः।६। तेषां मध्ये प्रह्लादनामा प्रधानात्मा युव रम·
राजो बभूव हे कौस्तुभ।७। ... त्रीणि गंडोपलक्षितमुखानि श्रितानि मदधार्ययस्य तथाविधो यद्वस्तद्वत्। यद्यपि सममदस्थानानि प्रसिद्धानि तथापि प्रा ८२
धान्यात्त्रीण्युपात्तानि। उक्तस्त्रिगंडगलितोयोगजः षष्टिहायनइत्यभियुक्तवचनात् षष्टिहायनेभवेदितिवा।९।

---

विकासिना विजृंभमाणेन आक्रान्तिरास्कन्दनं तत्प्रयुक्तेन तापेन पीडनेन। नवप्रातरुणयानिस्यामिनवयाचकरश्रियाकिरणकांत्याकरग्रहणप्रयुक्तसंपदा च
१०। तेन आक्रान्तितापेन।११। पौनःपुन्येन पुनःपुनर्भावेन कृतां दुष्क्रियां अपराधं।१२। ततस्तदनंतरं माधवः प्रलयपर्यस्तेत्यादिविशेषणविशिष्टं ना
रसिंहं वपुः कृत्वा महासुरं हिरण्यकशिपुं अहन् इति सप्तमेन संबंधः। प्रलये पर्यस्तं जगद्येन घर्घरं ध्वनत् जृंभितं गात्रविनमनं यस्य तत् दिग्दंतिदशनप्र ३
स्येन रवेण वज्रादिभिरिव जृंभितं यत्र।१३। स्थिराण्यचंचलानि विद्युल्लताजालानीव भासुराणि द्विजानां दंतानां मंडलानि यस्य। दिक्कृत्योन्नतत्वात्

तत्तापाक्रान्तितापेन त्रिजगत्तिविकासिना। कल्पांतसूर्यगणवन्नवयैव करश्रिया।१०। अखिद्यंतास्य तेनाथ सर्वे दुःसमुखाः सुराः
दुर्विलासविलोलस्य बालस्येव स्वबंधवः।११। प्रार्थयांचक्रिरे थाजं दैत्येंद्रेभपतेर्वधे। न क्षमं तेमहांतोपि पौनःपुन्येन दुःक्रियां
१२। ततः प्रलयपर्यस्तजगद्घर्घरजृंभितं। दिग्दंतिदशनप्रस्यनखवज्रादिजृंभितं।१३। स्थिरविद्युल्लताजालभासुरद्विजमं
डलं दशदिक्कोटरोड्डीनज्वलज्ज्वलनकुंडलं।१४। समस्तकुलशैलेंद्रपिंडपीठोद्भटोदरं। दोर्द्दुमाधूतनिर्धूतस्फुरद्ब्रह्मांडख
र्परं।१५। वदनोदरनिष्क्रान्तवातोत्सारितपर्वतं। त्रिजगद्दहनोद्युक्तकोपकल्पाग्निगर्वितं।१६। सटाविकटपीनांसस्पंदप्रेरितभास्करं
रोमकूपलसद्दृष्टिपुंजापिंजरपर्वतं।१७

दशसु दिक्कोटरेषु उड्डीनज्वलज्ज्वलनाः कुंडलानि यस्य।१४। समस्तानां कुलशैलेंद्राणां पिंडपीठपिंडाकारसंस्थानमिवोद्भटं भीषणां उदरं यस्य। दोर्द्दुमा
धूतैः परिवर्तनैर्निर्धूतं अत एव स्फुरत् चलत् विदीर्यमाणं ब्रह्मांडखर्परं यस्य।१५। वदनेन उदरान्निष्क्रान्तैः श्वासवातैरुत्सारिताः पर्वता यस्य।१६

कुलाचलैरुन्नतैर्महाकुड्यस्य घटनायां रचनायामिवउद्भटानि उत्कटानि दिक्तटानि यत्र सर्वावयवेभ्यो निष्क्रांतानि प्रदिशप्रासतोमराण्यायुधविशेषा यस्या ॥१८॥ तथाविधं नारसिंहवपुः कृत्वेत्यर्थः ॥ अहन् हतवान् हंतेर्लङि तिपः इतो लोपे हल्ङ्यादिलोपः । लसत्कटकटारावमिति क्रियाविशेषणं तेन विदार्य हन्तीति गम्यते ॥ तुरंगमस्यापि हि द्विपेन विदारणं युद्धेषु प्रसिद्धं ॥१९॥ आसुरं पौरं पुरवासिजनं सर्वर्जंतुं पुरोपकरणं वा ईक्षणवह्निभिर्नेत्राग्नौ नलैः ॥२०

कुलाचलमहाकुड्यघटनोद्भटदिक्तटं ॥ सर्वावयवनिष्क्रांतप्रदिशप्रासतोमरं ॥१८॥ नारसिंहं वपुः कृत्वा माधवो हन्महासुरं ॥ लसत्कट
कटारावं तुरंगममिव द्विपः ॥१९॥ पौरमासुरमुद्धान्तैर्ददाहेक्षणवह्निभिः ॥ ससर्वमस्तं कल्पान्ते जगज्ज्वालमिवानलः ॥२०॥ नृसिंहमारुतो
त्क्षिप्ते नरशंक्षोभमुपागते ॥ विस्फूर्जितघनास्फोटैरेकार्णव इवाकुले ॥२१॥ ददृशुर्दानवा घोरास्ते दिग्ज्वलन्मशका इव ॥ उपायमुररद
श्यत्वं दीपा इव गतत्विषः ॥२२॥ अथ विद्रुतदैत्येन्द्रदग्धान्तःपुरमंडलं ॥ बभूव पातालतलं कल्पक्षुब्धजगत्समं ॥२३॥ अकाल
कल्पान्तविधौ हत्वा दैत्यं शनैर्विभौ ॥ क्वापि याते समाश्वस्तमुरसंभ्रष्टजिते ॥२४॥ ततः शिष्टदनुसुताः प्रह्लादपरिपालिताः ॥ दग्धं
तं देशमाजग्मुः सरः शुष्कमिवाण्डजाः ॥२५॥

विस्फूर्जितसदृशैरास्फोटैर्बाहुध्वनिभिः प्रलयपक्षे घनानां संवर्तमेघानामास्फोटैर्गर्जितैः । एकार्णवे जलप्लवे ॥२१॥ दिक्षु ज्वलंतो मशका इव ॥२२॥
कल्पेन प्रलयकालेन क्षुब्धं संचूर्णितं यज्जगत्तत्समं ॥२३॥ अकाले कल्पान्तविधानसदृशे युद्धे दैत्यं हिरण्यकशिपुं हत्वा समाश्वस्तैः संभ्रमेण दरनिर्भरे
णाप्रजिते विभौ नृसिंहे क्वापि विवाप्यगोचरे स्वपदे याते सति ॥२४॥ अण्डजाः पक्षिणः ॥२५॥ राम·



स्तानां बांधवानां नाशप्रयुक्तां परिदेवानां विलापं ॥२६॥ लुष्टं दग्धं स्वप्राणेभ्यो बंधनीतद्वां धवानां च मंडलं समरे ॥२७॥ गिरी हार्चितया निश्चेष्टाः अनरव चित्रा
र्पितोपमा दुःखिता आहतमोघेषां ते प्रह्लादस्य मोसुरनायकाः दग्धाः दग्धपत्रशाखाद्रुमा इव निरस्तविकारं निश्चेष्टं आसन् । स्थाणुरूपं वायुना चलनाभावः
प्रसिद्धः ॥२८॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे त्रिंशत्तमः सर्गः ॥३०॥ हरिविक्रमचिंतात्रस्तजनस्य क्षेमचिंतनं ॥ प्रह्लादस्य हरेर्भक्त्यान्तद्भावस्तो

तत्र कालोचितां कृत्वा स्वनाशपरिदेवनां ॥ और्ध्वदेहिकसत्कारं चक्रुः प्रेतेषु बंधुषु ॥२६॥ हतबंधुजनं लुष्टबंधुबांधवमंडलं ॥ शनैरा
श्वासयामासुर्मृतशिष्टस्वकं जनं ॥२७॥ चित्रार्पितोपमा दुराहतयोनिरिहादीनाशयाः हिमहतांबुरुहोपमाननाः ॥ शोकोपहतमनसोऽ
सुरनायकास्ते दग्धद्रुमा इव निरस्तविकारमासन् ॥२८॥ मोक्षोपाये ह्युपशमप्रकरणे प्रह्लादपरिविक्रान्तो हिरण्यकशिपुवधः सर्गः
॥३०॥ श्रीवसिष्ठ उवाच ॥ अथ दुःखपरीतात्मा हरिणा हतदानवे ॥ प्रह्लादश्चिंतयामास मौनी पातालकोटरे ॥१॥ को न्वस्माकमुपायः
स्याद्येन हासुरांकुरः ॥ तीक्ष्णाग्रो जायते तं तं भुंक्ते शाखामृगो हरिः ॥२॥ न करोत्यनपाताले दैत्यादोर्दंडशालिनः ॥ स्थिराः बभू
वुरुद्विग्नाः पद्मा इव हिमाचले ॥३॥ उत्पत्योत्पत्य नश्यंति भासुराकारघर्घराः ॥ क्षणप्रस्फुरितारंभास्तरंगा इव वारिधौ ॥४॥

पत्ररूप्यन्ते । हतारातिदानवायस्मिंस्तथाविधे पातालकोटरे ॥१॥ उपैति ... तीक्ष्णाग्रः संपन्नः ... असुरवृक्षाणां अंकुरप्राय
स्तेजस्वी जायते तं तं भुंक्ते हरिपादस्यशाखामृगपदेन ... अंकुरविनाशकत्वोपादानार्थमपि ... र्थं च ॥२॥ उद्विग्नाः अंकुरिताः ... वि
काशिताश्च ॥३॥ न स्वं ... नुपजायते ॥४॥

वा॰टी॰उ॰प॰ ॥८५॥

कष्टमिति खेदे॥ आलोकं तद्दत्यालोका बाह्यराज्यादिसंपदः॥ आभ्यंतराः उत्साहहर्षप्रसादसुखविश्रांत्यादिसंपदश्च तत एव आलोकाः प्रकाशाः तेषां हारिणो
प्रहरणशीलाः अत एव अपूर्वतिमिरभ्रमो येषु तथाविधा रिपवो देवाः प्रौढिं उत्कर्षं॥५॥ तमसा कश्मलांधकारेण प्रपूर्णहृदयाः संकुचंत्यः पत्रस्थानीयाः
संपदो येषां तथाविधाः सुहृद्लक्षणाः निशीथकमलाकराः॥६॥ मलिनैर्दैत्यकलुषैस्तात स्वप्रणामकाले पादपीठोपमर्दकैः सुरैः विषयः देश आक्रांतो

सबाह्याभ्यंतरं कष्टं मम आलोकहारिणः। रिपवः प्रौढिमायाता अपूर्वतिमिरभ्रमाः॥५॥ तमःसंपूर्णहृदयाः संकुचत्पत्रसंपदः। सु
हृदः खेदमायांति निशीथकमलाकराः॥६॥ तात त्वम् अमलिनैर्नूनं पादपीठोपमर्दकैः। सुरैर्विषय आक्रांतो मृगैरिव महावनी॥७॥ निह
ग घ्नमानैस्तु श्रीकादीनां प्रकटिताशयाः। बांधवा न विराजंते पद्माः क्लुष्टदला इव॥८॥ स्फुरंत्य सुरवीराणां गृहेष्वविरतानिलैः। धूम्रराम
स्तनीहाराः पद्मभ्रमरा इव॥९॥ हतद्वारकपाटासु दैत्यानां तास्तु रश्मिभिः। प्रभामरकतस्येव जाता नवयवांकुराः॥१०॥ त्रिलोकी
नामिनलिनीमलेभा दानवा अपि। देवदैन्यमायाताः किमसाध्यमहो विधेः॥११॥ मनाक्कलति पर्णो विदधारि भयभीतयैः
व वधस्थ्यंति विधस्ताम्यो ग्राम गता इव॥१२॥

न्नलं इति वितर्के॥ महावनं सिंहवनं॥७॥ प्रकटिताशयाः ख्यापितहार्द दुःखाः क्लुष्टदलाः शीर्णदग्धपत्राः॥८॥ अविरतैरनिलैरुत्पातवातैः कीर्यमाणाः रा॰म॰
भस्मलक्षणा नीहाराः प्राक्तन धूपधूम भ्रमरा इव स्फुरंति॥९॥ प्राक् मरकतस्य प्रभा इव संप्रतं यवानां नवांकुरजाता॥१०॥ त्रिलोक्याः नामिनलिनी ॥८५॥
मेरुस्तदुपमर्दं मत्तेभसत्ता अपि दानवाः प्राग्देवा इव दैन्यमायाताः किमित्याक्षेपे असाध्यं नास्तीत्यर्थः॥११॥ वध्यः दैत्यसीमेति स्थ्यस्यंति उद्विजंति

रत्नमयाः गुलुच्छकास्तबकाये येषां तथाविधा द्रुमा रिक्तास्ताः॥१३॥ दिव्यान्यंबराणि येषु तथाविधा लताः शाखापत्राणि च येषां रत्नस्तबकै दैत्यरः रत्न
गुल्मतउरस्मु पुनरित्थमेन हर्षं तत आनीता इति गम्यते॥१४॥ वैरीनां वंदीकृतस्त्रीणां॥ संस्कृतं सप्रशंसं हृष्टं॥१५॥ दानानि मदधारास्तल्लक्षणा महान
घः मन्ये इति वितर्के॥१६॥ दानस्य मदस्य महाहस्तस्य युक्ताभिरुतयोः स्मानि॥१७॥ विकासिनां सितमंदाराणां सपरागैर्मकरंदैररुणा रंजिताः अंग

आसुरीकर्णस्वार्थं कुद्दारत्नगुलुच्छकाः। नरसिंहकराल्लनाः स्यागुतामागता द्रुमाः॥१३॥ दिव्यांबरलतापत्रारत्नस्तबकदं तुराः
पुनराक्षेपितास्त्वन्नेरनेकल्पपादपाः॥१४॥ पुराप्सरबंदीनामसुरैः संस्कृतं सुखं। अद्यासुरवंदीनां सुरैराक्षोकितं सुखं॥१५॥ मन्ये
दानमहानघः सुरेभकटभित्तिषु। प्रहृत्ताः सा भविष्यंति शैलसानुष्विवापगाः॥१६॥ अस्माकमिभगंडेषु दानदाहाविस्रुतयः
लसंति मदखंडेषु संसुष्केष्विव पल्वलाः॥१७॥ विकासितसितमंदारमकरंदारुणानिलाः। तेमेरुशिखरास्फाल्या दैत्याद् दुर्लभतां
गताः॥१८॥ सुरगंधर्वसुंदर्यो दानवानां पुरोचिताः। अद्यमेरौ स्थितिं याता मंजर्य इव पादपे॥१९॥ कष्टं तात पुरंध्रीणां मुग्धांबु
रुहनीरसाः विलासाः सुरनारीभिर्भत्स्यंते लास्यलीलया॥२०॥ सर्वं धैरेवमज्ञातश्चामरैरुपवीजितः। सहस्रनयनः स्वर्गेक
ष्टं नैरेव वीज्यते॥२१॥ इयमस्माकमथापरागता दैन्यदामिनी। तस्यैकस्य प्रसादेन दुःपौरुषगते हरेः॥२२॥ तद्दोर्वनघनच्छायाल
ब्धा विश्रांतयः सुराः नेकदानवनतपोते हि मादेरिवरसा नवः॥२३॥

स्पर्शिनः। अनिला येषां। अत एव मेरुशिखरैरस्फाल्याः॥१८॥
१९ ॥ लास्यलीलया नृत्यबुद्धिविडंबनलीलया॥२०॥२१॥ अस्माकं महाप्रभावाणामपि। दुःखापौरुषगतिः पराक्रमस्मरणमपि यस्य॥२२॥ जेव
यमिवसंतप्ते॥२३॥

DR BHAU DAJI MEMORIAL

शौरेहरेः शौर्यं पराक्रमस्तैर्दैवपराक्रमैस्तदेव गिरेस्तरोर्वा शिरःस्थाग्रं अग्रशिखरं तत्संश्रितेन आश्रितश्रियः प्राप्तसंपदो देवाः गिरितरुशिखरसंश्रयाः शाखामृगा मर्कटाः शुनः कुक्कुरा निवास्मान्वलवतोऽपि समुपरुंधंति पाताले नियच्छंति॥२४ मंडनानां अलंकाराणामपि मंडनभूतं मुखपद्मे बाष्पं आस्रं तेन शौरिशौर्येण हेतुना नित्यं स्थितं॥ अब्जिनीनां मुखभूते पद्मे हिममवश्यायबिंदुर्यथा तद्वदित्यर्थः॥२५॥ अर्थादसुरविक्रमैः शीर्णः विदारितः अत एव लुठद्भित्तिः जगद्रक्षणो जरठमंडपो जीर्णालयः नीलमणिस्तंभप्रायैस्तस्य शौरेर्भुजैरेव धार्यते अवष्टभ्यते॥२६॥ कच्छपः कच्छपावतारः सद्

शौरिशौर्याग्रशिखरसंश्रयेणाश्रितश्रियः। अस्मान्समुपरुंधंति शुनः शाखामृगा इव॥२४॥ तेनासुरैर्ध्रीणां नित्यं मंडनमंडने। मुखपद्मे स्थितं बाष्पमब्जिनीनां हिमं यथा॥२५॥ शीर्णभिन्नलुठद्भित्तिर्जगज्जरठमंडपः। अयं नीलमणिस्तंभैस्तद्भुजैरेव धार्यते॥२६॥ सम 
व न्नासुरसैन्यस्य मज्जतो विपदार्णवे। क्षीरोदोदरमग्नस्य मंदरस्येव कच्छपः॥२७॥ एतेतातादयः सर्वे तेनैवासुरसत्तमाः। पातिताः क्षुब्धकल्पांतवातेनेव कुलाचलाः॥२८॥ समस्तसर्वसंहारकर्मक्षममुजानलः। सुरसार्थगुरुः श्रीमान्विषमो मधुसूदनः॥२९॥ दैत्यदोर्दंडपरशोस्तस्य वीर्येण वीर्यवान्। दानवान्बाधते शक्रो बालकानिव मर्कटः॥३०॥ दुर्जयः पुंडरीकाक्षः प्रविमुक्तौघुभोपि सन्। नासौ शस्त्रास्त्रविच्छेदैर्वज्रसारो विदीर्यते॥३१॥ अभ्यस्ता बहवस्तेन मिथः प्रेरितपर्वताः। भीमाः समरसंरंभाः सममस्माभिः तामहैः॥३२॥

वसशौरिः धर्त्ताधारमिता॥२७॥२८॥ विषमः आक्रामितुमशक्य इति यावत्॥२९॥ दैत्यदोर्दंडखंडने परशुभूतस्य यथा महामर्कटवीर्यवान्मर्कटो बालकान्बाधते तद्वत्॥३०॥ शस्त्रास्त्रकृतैर्विच्छेदैः खंडनैः॥ वज्रादपि सारः दृढतरः॥३१॥ प्रेरिताः क्षिप्ताः पर्वता यत्र तथाविधाः समरसंरंभाः युद्धकौशलविशेषाः॥ अस्मत्पितामहैः सह युद्धा अभ्यस्ताः शिक्षिताः इत्युत्प्रेक्षा॥३२॥ 
ह

समयमेष्यतिकाकथा कः प्रसंग इत्यर्थः॥३३॥ आक्रमणे वशीकरणे प्रतिक्रिया तत्कृतपीडाप्रतीकारः॥३४॥ कुतो न विद्यते तत्राह सर्वात्मनेति इह जगति सर्वात्मना सर्ववस्तुस्वभावेन सर्वधिया सर्वबुद्धिभेदेन सर्वसंरंभं रंहसा सर्वक्रियोद्योगेन च शरणार्थिनां सर्वशरणं नान्यथा गतिरस्तीत्यर्थः॥३५॥ नन्वन्ये शरणं किं न स्युस्तत्राह नेति॥३६॥ इति निश्चित्य सर्वभावेन तत्प्रतिपत्तिं संकल्पयति॥ अस्माभिरिति॥ किं देशवस्तुभेदेन प्रपद्यसे नेत्याह॥ सर्वदेशकालवस्तुष्वहं नारायणमयः॥३७॥ निरंतरतत्प्रतिपत्तिधारणानुस्मरणजपसाधनं श्रौतं तन्मंत्रमनुस्मृत्य निरंतरं तज्जपं सं

न्यासुतास्वतिघोरोसु वितताग्रे सुरारिषु। यो न भीत इदानीं स्म समयमेष्यति काकथा॥३३॥ उपायमेकमेवेमं हरेराक्रमणे स्फुटं। मन्ये तद्व्यतिरेकेण विद्यते न प्रतिक्रिया॥३४॥ सर्वात्मना सर्वधिया सर्वसंरंभरंहसा। स एव शरणं देवो गतिर्नास्तीह नान्यथा॥३५॥ न तस्मादधिकः कश्चिदस्ति लोकत्रयांतरे। मलयस्थितिसर्गाणां हरिः कारणतां गतः॥३६॥ अस्माभिरिमे पारास्य नारायणमजं सदा। प्रसन्नोस्मि सर्वत्र नारायणमयोस्म्यहं॥३७॥ नमो नारायणायेति मंत्रः सर्वार्थसाधकः। नापैति मम हृत्कोशादाकाशादिव मारुतः॥३८॥ हरिराशा हरिर्व्योम हरिरुर्वी हरिर्जगत्। अहं हरिरमेयात्मा जातो विष्णुमयोस्म्यहं॥३९॥ अविष्णुः पूजयन्विष्णुं न पूजाफलभाग्भवेत्। विष्णुर्भूत्वा यजेद्विष्णुमयं विष्णुरहं स्थितः॥४०॥ कल्पति नमो नारायणायेति॥ स प्रणवोयं मुचेः श्रुतः देशादावेव जपाहीनं निरंतरमिति निष्क्रमणवोपादानं हृत्कोशादित्युक्तिर्मानसजपमुख्यताद्योतनार्था॥३८॥ सर्वत्र नारायणमयोस्म्यहमित्युक्तं विवरयति हरिरिति आशा दिशः विष्णुमयो भावेन विष्णुप्रायः स्त्रीमयो जाल्म इतिवद्भावनाकृततद्भावलक्षणे प्राचुर्ये मयट्॥३९॥ किमर्थं कल्पयसि अविष्णुरिति ना विष्णुः
ने मेव
इत्यमेहि स्तुनाशिवः इजयेच्छिवमिति विष्णुनेरोपादित्यर्थः॥४०॥

वा॰टी॰उ॰प॰ ॥८६॥

यः हरिः स एव प्रह्लादनामा नान्यो तो ऽस्ति इष्टे त्यादि श्रुतेः ॥ मत्तः प्रतीच्यः अन्यो हरिः पृथक् आत्मांतरं ततो नास्ति ॥४१॥ इदानीं हरेर्वाहनायुधाभरणश
रीरदीप्तिः स्वात्मनः कल्पयति अनंतमित्यादिना ॥ आश्चर्यं स्थितं इति शेषः ॥ कनकमिवांगं यस्य स्वर्णवर्ण इत्यर्थः ॥४२॥ करशाखासु अंगुलिषु एकवि
श्रांताः नित्यविश्रांताः सर्वे हेतयश्चक्रगदानंदकाद्या आयुधलक्षणा विहंगमाः पक्षिणो येषां ॥ नखकांतिलक्षणमंजरीभिः कीर्णाः अतएव महामरक

हरिः प्रह्लादनामा यो मत्तो नान्यो हरिः पृथक् ॥ इति निश्चयवानंतर्व्यापको हं च सर्वतः ॥४१॥ अनंतमिदमाकाशमाश्चर्यं विततादु
तः ॥ कनकांगो ममांगानां मयमासनतां गतः ॥४२॥ करशाखैकविश्रांतसर्वहेतिविहंगमाः ॥ नखांशुमंजरीकीर्णमहामरक
तद्रुमाः ॥४३॥ इमे ते मद्भुजा मंदारदामदिग्धांसमंडलाः ॥ मंदराघृष्टकेयूराश्चत्वारो मम बाहवः ॥४४॥ चलच्छशिकलास्वच्छचामर
धारिणी ॥ इयं मे पार्श्वगा लक्ष्मीः क्षीरोदकुहरोत्थिता ॥४५॥ हेलाविक्षुब्धभुवना त्रैलोक्यतरुमंजरी ॥ इयं मे पार्श्वगा कीर्ति
रचलामलभासिनी ॥४६॥ अनारतजगज्जालनवनिर्माणकारिणी ॥ इयं मे पार्श्वगा माया सेंद्रजालविलासिनी ॥४७॥
इयं सा हेलयाक्रांतत्रैलोक्यतरुपंडिका ॥ जया स्फुरति मे पार्श्वे लताकल्पतरोरिव ॥४८॥

तद्रुमस्तताः ॥४३॥ मद्भुजमंदारदामदिग्धे अंसमंडले मलग्ने शोभे येषां समुद्रमथनकाले मंदरेण घृष्टकेयूराः मम हरेश्चत्वारस्ते बाहव इति द्वयोरन्वयः राम॰
४४॥४५॥ हेलया अयत्नेनैव विक्षुब्धानि विलोभितानि श्रवणस्पृहीकृतानि भुवनानि तत्स्था जनाः यया अतएव त्रैलोक्यलक्षणतरोर्मंजरीव ॥८६॥
विराजमाना हरेः कीर्तिर्मूर्तिमती मे पार्श्वगा वर्तते ॥४६॥ पार्श्वगा पार्श्वांतरे स्थिता ॥४७॥ जया नाम्नी लक्ष्मीसखी ॥४८॥

---

ज[illegible]नाम्नी लक्ष्मीसखी ॥४८॥४९॥ देहादीप्तिः शरीरकांतिः ॥५०॥ क्षीरोदरवच्छुभ्र इति शेषः ॥५१॥ स्वस्य नाडीकुहरं नाभिस्तदुद्भवः ॥ यथा च नाभिपद्ममेव करा
विकरेण धार्यमेकदा विन्ना भावितिगम्यते ॥५२॥ हेमांगदा हेमविनद्धांगदा ॥५३॥ आवरितः पाटलः वर्णाविरिक्ता नियस्मात्तां ॥ अनेनासुररुधिराक्तता गम्यते ॥५४॥
केतुमान् ध्वसमरे खगवान् गरुडरिव सुंदरः अतएव भासितः दैत्यरक्षसां कुठार इव छेत्ता देवान्नंदरक्षकः भगवान् तवद्रू ॥५५॥५६॥ इंद्रकार्मुकमिव सुंदरं नानामणि

इयं सा हेलयाक्रांतत्रैलोक्यतरुपंडिका ॥ जया स्फुरति मे पार्श्वे लताकल्पतरोरिव ॥४८॥ इमौ मे निस्त्वशीतौ सौदेवौ शीतांशुभास्करौ
प्रकटीकृतसंसारौ सुरतमध्ये विलोचने ॥४९॥ अमेयमुसलश्यामा पीनांभोधरसुंदरी ॥ श्यामीकृतककुप्चक्रा देहदीप्तिर्विसर्पिणी ॥५०॥
अयं मम करे शंखः पांचजन्यः स्फुरद्ध्वनिः ॥ मत्तैरावणवंशाभः क्षीरोदैवसंस्थितः ॥५१॥ अयं मे कर्णिकाकोशे निलीनत्र
सत्पदः ॥ पद्मः करतले श्रीमान्स्वनाडीकुहरोद्भवः ॥५२॥ इयं मे रत्नचित्रांगी सुमेरुशिखरोपमा ॥ हेमांगदा गदा गुर्वी दैत्यदान
वमर्दिनी ॥५३॥ अयं मे भास्वराकारस्तुंगांशुः सुदर्शनः ॥ ज्वालाजटिलपर्यंतः परिपाटलरिक्तकः ॥५४॥ इयं मे केतुमद्भूमिसुंदरो ८
ज्वलितो सितः ॥ कुठारो दैत्यरक्षसां नंदपन्नो रक्षकः स्थितः ॥५५॥ इदं मे शरधाराणां पुष्करावर्तकोपमं ॥ शार्ङ्गं धनुरहीहो मपि
इंद्रकार्मुकसुंदरं ॥५६॥ इमान्यहमनंतानि जगंति जठरे चिरं ॥ बिभर्मि जातनष्टानि वर्तमानान्यनेकशः ॥५७॥ इमौ मही मे चरणाविदं
मे गगनं शिरः ॥ इदं वपुर्मे त्रिजगदिमे मे कुक्षयो दिशः ॥५८॥ सोऽसावयमहं विष्णुर्नीलमेघोदरद्युतिः ॥ सुपर्णपर्वतारूढः शंखचक्रगदाधरः ॥५९॥

चिरं ॥५६॥ सर्वमं जातानि विरनष्टानि चिरजातवर्तमानानि भविष्यतां नष्टपुण्यलक्षणमेतत् ॥५७॥ इदानीं हरेर्विराड्रूपमपि स्वस्मिन् संस्थापयति इमाविति ॥ मही मे इमौ
चरणाविमन्वयः कुक्षयः इति ॥ बहुत्वं दिग्बहुत्वादरितिः पाशाणांतिवत् ॥५८॥ ५९॥

वा·टी·उप· ॥७॥

तार्णाः शशयः शुष्कतरुणाशयः ॥६०॥६१॥ विरुद्धात्माद्विषन्सन्ति सुद्धाजगच्छन्ति यआगच्छन्ति स यतः स्वनाशायैवागच्छन्ति नान्यत्रागमनफलमित्यर्थः ॥६२॥
तेजसीरष्टिं तेजोज्वालाप्रसरं संरोद्धुं प्रशमयितुं सोढुं वा ॥६३॥६४॥ अजितो विष्णुस्तदाकृतिः परमेन महिम्ना प्रभावेण परमार्थस्वभावेन च ॥ एवमिति मो महिमे
ति श्रुतेः ॥६५॥ त्रिभुवनैर्भुवनैरुदरे यस्य तथाविधे कामरूर्तिर्यस्य तं घना मेघाः गिरयस्तरुणानि काननानि चेत्येतदादि सर्ववस्तूनां अंतरे अधिष्ठान

एते मत्तः पलायंते समग्रा दुष्टचेतसः ॥ तार्णास्तरलसंचाराः पवनादिव राशयः ॥६०॥ अयं नीलोत्पलश्यामः पीतवासा गदाधरः ॥ लक्ष्मी
वान्गरुडारूढः स्वयमेवाहमच्युतः ॥६१॥ को मामेति विरुद्धात्मा त्रैलोक्ये दहनं स्वयं ॥ स्वनाशाय ततः क्षुब्धं कालाग्निं शलभो यथा ॥६२॥
इमे मे तेजसी दृष्टिं प्रसारयितुमक्षमाः सुरासुराः ॥ न शक्नुवंति संरोद्धुं चक्षुर्मंदाः प्रभाइव ॥६३॥ इमं मामीश्वरं विष्णुं ब्रह्मेंद्राग्निहरादयः ॥ इमं मामी
रे विष्णुं ब्रह्मेंद्राग्निहरादयः ॥ स्तुवंत्यनंतया वाचा बहुवक्त्रा समुत्थया ॥६४॥ अयं विजृंभितैश्वर्यो जातोहमजिताकृतिः ॥
सर्वं हृत्पदातीतो महिम्ना परमेण हि ॥६५॥ त्रिभुवनभुवनोदरैकमूर्तिं प्रसभविभिन्नसमस्तदुष्टसत्वं ॥ घनगिरितरुकाननांतरस्थं
सकलभयापहरं वपुः प्रणोस्मि ॥६६॥ मोक्षोपाये उपशमप्रकरणे प्रह्लादनिर्वाणे नारायणकरणं नाम सर्गः ॥ ३१ ॥ श्रीवसिष्ठ उवाच ॥
प्रह्लाद इति संचिंत्य कृत्वा नारायणीं तनुं ॥ पुनः संचिंतयामास पूजार्थं मधुरद्विषं ॥ १ ॥

भावे स्थितः ॥ अतएव नतः साक्षात्कारमात्रेण सकलभयापहरं वैष्णवं वपुः ॥ विराड्रूपं परब्रह्मात्मकं चाहमेवेति प्रणौमीत्यर्थः ॥६६॥ इति श्रीवासि रामः
ष्ठतात्पर्यप्रकाशे उपशमप्रकरणे एकत्रिंशः सर्गः ॥३१॥ विलोमानमस्तु जात्रबाघपूजा उ सुरैः सहाश्रुत्वा विस्मितदेवानां हरेः पूजाव वर्ण्यते । स्वतनुं भा ॥७॥
वनया नारायणीं नारायणात्मिकां कृत्वा ॥ १ ॥

वाहि
अस्मान्मया परिकल्पितान्निविधाद्वैष्णवाद्वपुषः अन्यापरा मम दृश्यरूपा अवराख्या दिव्यदेवतारूपा बाह्या ज्ञानसत्किंत्वयमेव मद्रूपो विष्णुर्हृदयात्प्राणप्रवाहेण
पुष्पांजलिभावनया बहिर्गतः सन्यावत्पूजाकालं अपरइवस्थितः कल्प्यत इत्यर्थः ॥२॥ स कीदृश इत्याह येनतेयेति द्वाभ्यां स्फुरतक्रियाज्ञानेच्छा
स्वजनानंतरनः ३ — तुष्टाख्यशक्तिचतुष्टयं यस्य ३ कांतेनानंदकेन खड्गेन नंदनः ॥४॥ परिवारैः संकर्षणप्रद्युम्नादिव्यूहैः पार्षदैश्च समन्वितः ॥५॥ महादेवमर्च्यं

वपुषो वैष्णवादस्मान्मामन्यस्तिः परावरः ॥ अयं प्राणप्रवाहेण बहिर्विष्णुः स्थितोपरः ॥२॥ वैनतेयसमारूढः स्फुरच्छक्तिचतुष्
यः ॥ शंखचक्रगदापाणिः श्यामलांगश्चतुर्भुजः ॥३॥ चंद्रार्कनयनः श्रीमान्कांतनंदकनंदनः ॥ पद्मपाणिर्विशालाक्षः शार्ङ्गधन्वा
महाद्युतिः ॥४॥ तदेनं पूजयाम्याशु परिवारसमन्वितं ॥ सपर्यया मनोमय्या सर्वसंभाररम्यया ॥५॥ अतएनं महादेवं पूजयिष्याम्यहं
बा४ पुनः ॥ पूजया च संभोगमहत्या बहुरत्नया ॥६॥ प्रह्लाद इति संचिंत्य संभारभरभारिणा ॥ मनसा पूजयामास माधवं कमलाधवं ॥७॥ र
त्नौघपात्रपटलैश्चंदनादिविलेपनैः ॥ धूपैर्दीपैर्विचित्रैश्च नानाविभवरूपणैः ॥८॥ मंदारमालावलनैर्हेमाब्जपटलोत्करैः
कलहंसलतागुच्छैः लस्तबकमंडलैः ॥९॥ पद्मवैदूर्यहस्ताणां नानाकुसुमदामभिः ॥ किंकिरातैर्बकैः कुंदैश्चंपकैरसितो
त्पलैः ॥१०॥ कह्लारैः कुमुदैः काशैः खर्जूरैश्चूतकिंशुकैः ॥ अशोकैर्मदनैर्बिल्वैः कर्णिकारैः किरातकैः ॥११॥ कदंबै
र्बकुलैर्निंबैः सिंदुवारैः सदथकैः ॥ पारिभद्रैर्गुग्गुलिभिर्बिंदुकैः पुष्पकोत्करैः ॥१२॥ प्रियंगुपाटलैः पाटैः पाटलैर्धातुपाटलैः आम्रै

रेवं स्वकुलदैवतश्रिया भिन्नं बाह्यैः संभोगैः संभारैर्महत्या विस्तृतया ॥६॥ कमला लक्ष्मीस्तस्या धवं पतिं ॥७॥ रत्नौघखचितानां पात्राणां पटलैः
मांतेरभिषेचनैरितिशेषः ॥ नानाविभवैर्मणिरलंकारैः ॥८॥ किंकरातादयो यथायोगं पुष्पजातिभेदा बोध्याः ॥९॥१०॥११॥१२॥

सकुंकुमैः काश्मीरद्रवाक्तैः १४ सेवैर्धूपदीपनैवेद्यतांबुलदर्पणछत्रचामरनीराजनपुष्पांजलिप्रदक्षिणानमस्कारादिभिः सौंदर्ययुक्तैः संमानैरुपचारैः १५ जगति ये मे विभावाः प्रसिद्धास्तैस्तैरुपकरणीकृतैर्भव्यया भक्त्या पतिं जगत्पतिं स्वस्वामिनं वा १६ अथ मानसपूजानंतरं तस्मिन्नंतःपुरे

शालतालतमालानां लताकुसुमपल्लवैः कोमलैः कलिकाजालैः सहकारैः सकुंकुमैः ॥१४ केतकैः शतपत्रैश्च तथैलामंजरीगणैः सर्वसौंदर्यसमानैः स्वयं मानसार्पणैरपि ॥१५ हरिं परमया भक्त्या जगद्विभवभव्यया ॥ मनसा पूजयामास प्रह्लादोंतःपुरे पतिं ॥१६॥ अथ देवगृहे तस्मिन्बाह्यार्थैः परिपूर्णया ॥ पूजया पूजयामास दानवेशो जनार्दनं ॥१७ बहिरेवं क्रमेणैव क्रमेण परमेश्वरं ॥ पुनः पुनः पूजयित्वा तुष्टिमान्दानवो भवेत् ॥१८ ततस्ततः प्रभृत्येव प्रह्लादः परमेश्वरम् ॥ तथैवं प्रत्यहं भक्त्या पूजयामास पूर्णया ॥ १९ ॥ अथ तस्मिन्पुरे दैत्यास्ततः प्रभृति वैष्णवाः ॥ सर्वे एवाभवन्भूप्या राजा ह्याचारकारणं ॥२० जगाम वार्ता गगने देवलोकमथारिहन् ॥ विष्णोर्द्वेषं परित्यज्य भक्ता दैत्याः स्थिरा इति ॥२१ देवा विस्मयमाजग्मुः शक्राद्याः समरुद्गणाः ॥ गृहीता वैष्णवी भक्तिर्दैत्यैः किमिति राघव ॥२२ क्षीरोदे भोगिभोगस्थं विबुधाः विस्मयाकुलाः ॥ जग्मुरंबरमुत्सृज्य हरिमाहवशालिनं ॥२३ तत्रैनं दैत्यवृत्तांतं कथयामासुरच्युते ॥ पद्मयुग्मेन मासीन मपूर्वाश्चर्यविस्मयं ॥२४॥

स्थिते देवगृहे १७ अनेन मानसपूजोक्तेनैव क्रमेण १८ ॥ १९ ॥ राजा हीति ॥ राज्ञि धर्मिणि धर्मिष्ठाः पापे पापाः समे समाः तद्धर्ममनुवर्तंते यथा राजा तथा प्रजा इत्यादित्यर्थः ॥ वार्ता जगाम चासुरमुखादित्यर्थाद्गम्यते ॥ २१ किं कस्माद्धेतोरिति ॥ २२ अंबरं अमरावतीं ॥ २३ ॥ अस्य अस्मै हरये एनं हरिं
दृते
२४



ते विरुद्धाः स्वां द्विषं तदिति यावत् तन्मयतां तन्ममतां २५ हेयाद्दलिता अद्य यस्त्वद्धक्तः देवमनुष्यावामाः २६ प्राकृतः पामरः एषा कथा औत्पातिकी अकालपुष्पमालेव २७ न उपपन्नं युक्तं २८ ननु कश्यपवंश्यत्वाद्युष्मत्सदृशा एव ते इति चेद्गुणैर्वैषम्यान्नेत्याशयेनाह योयः इति तामसस्तामसी राजसो राजसी सात्त्विकस्तु सात्त्विकीं संस्थितिमेति निरुक्तमित्यर्थः २९ वैसादृश्येन अनौचित्येन तथा च हरिणोक्तं शशीरिव समधुसरोगलितया व

विबुधा ऊचुः ॥ किमेतद्भगवन्दैत्या विरुद्धा ये सदैव ते ॥ ते हि तन्मयतां याता मायेयमिति भाव्यते ॥२५ क्व किलात्यंतदुर्वृत्ता दानवा दलिता दयः ॥ क्व पाश्चात्यमहाजन्मलभ्या भक्तिर्जनार्दने ॥२६ प्राकृतो गुणवान्जात इत्येषा भगवन्कथा ॥ अकालपुष्पमालेव सुरायो हृज्जनाद्भवा ॥२७ नोपपन्नं हि यद्यत्र तत्र तन्न विराजते ॥ मध्ये काचकलापस्य महामूल्यो मणिर्यथा ॥२८ यो यो यादृग्गुणो जंतुः सा सा मे वैति संस्थितिं ॥ सदृशेष्वप्यजे पुरवानमध्ये रमते क्वचित् ॥२९ न तथा दुःखयंत्यंगे मज्जंतो वज्रसूचयः ॥ वैसादृश्येन संबद्धा यथैता वस्तुदृष्टयः ॥३० यदत्र क्रमसंप्राप्तमुपपन्नमनिंदितं ॥ तदेव राजते तत्र जले भोजनं तु स्थले ३१ क्वाधमः प्राकृतारंभो हीनकर्मरतिः सदा ॥ वराको दानवास्तु क्व जातिर्भक्तिः क्व वैष्णवी ३२

नाकामिनी सरोविगतवारिजं मुखमनक्षरं स्वाकृतेः प्रभुर्हि नपरायणः सततदुर्गतिः सज्जनोन्वयगणगतः खलो मनसि सप्तशल्यानि मे इति ३० क्रमो योग्यतानया संप्राप्तं ३१ हीनजातिस्तामसयोनिः ३२

वा॰टी॰उप॰ ८९

कमलिनीपुरुषार्थं तमार्गं उपरसुविगता इति कथा यथाप्तो दर्नं सुयेतितथा हे ईशहिते: सुतः संततिरपि माधवे भक्तिमानिति दुराश्रया अधमाश्रयविषया कथापि
नः तथेव न सुखायेत्यर्थः ॥३३॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे द्वात्रिंशः सर्गः ॥३२॥ हरिभक्त्यात्र दैत्यस्य विकारिगुणोदयः ॥ हरिं प्रसन्नं दृष्ट्वा
ऽस्तवश्चैवोपवर्ण्यते ॥ अनुचितदर्शनादिति संरब्धं कुपितं अतएव गर्जितं प्रागुक्तप्रकारेण ... सुरलोकं माधव उवाचेत्यन्वयः ॥१॥ स्तत
एव बलिनो दैत्यास्त्वद्भक्त्या प्युपस्कृता बलवत्ता राम भविष्यंतीति कुतो न विषादस्तत्राह मोक्षार्ह इति यतो मोक्षार्हस्ततो न ... राज्यसुखं ...

कमलिनी परुषोरवरभ्रगता सुखयतीह यथा न दुराश्रया ॥ दितिसुतोपि हि माधवभक्तिमानिति कथा न तथेह सुखाय नः ॥३३॥ मोक्षो
पायेषूपशमप्रकरणे विबुधवाक्यं नाम सर्गः ॥३२॥ श्रीवसिष्ठ उवाच ॥ गर्जंतमतिसंरब्धं सुरलोकमथारिहा ॥ उवाच माधवो वाक्यं
शिखिवृंदमिवांबुदः ॥१॥ श्रीभगवानुवाच ॥ विबुधा मा विषण्णाः स्थ प्रह्लादो भक्तिमानिति ॥ पाश्चात्यं जन्म तस्येदं मोक्षार्होऽसाव
रिंदमाः ॥२॥ अत उत्तरमेतेन गर्भतां दनुजन्मना ॥ न कर्तव्या प्ररोहेन बीजेनेवांकुरक्रिया ॥३॥ गुणवान्निर्गुणो जात इत्यनर्थ
क्रमं विदुः ॥ निर्गुणो गुणवान्जात इत्याहुः सिद्धिदं क्रमं ॥४॥ आत्मीयानि विचित्राणि भुवनान्यमरोपमाः ॥ प्रार्थितानासुखायैषा
प्राह्लादीगुणितेह वः ॥५॥

वीत्यर्थः ॥२॥ एतेन दनुजन्मना अतोऽस्माज्जन्मन उत्तरकालं गर्भतामात्र गर्भे वसतिर्न कर्तव्या ॥३॥ देवैरुक्तं तस्य भगवद्भक्त्यनो वित्यदोषं परिहरति ॥ गुणवा
निति जातश्चेदिति शेषः ॥ अनर्थक्रमं अनर्थपर्यवसितं पुरुषार्थविघातं च क्रमं चंक्रमं विदुः आहुश्च सिद्धं सत ॥४॥ प्राह्लादी प्रह्लादसंबंधिनी मद्भक्त्यादिगु
णिता वः असुखायना ॥५॥

रामः ॥८९॥

DR. BHAU DAJI MEMORIAL

---

वा

ततोऽसन्नतापि ... नीलगुच्छं यथा उन्नतामुर्वी विभुव्यवधानारं तर्हितं ... ॥६॥ रत्नवं मंदरार्णवे पतितं कणजालं मंदरनिर्हृतार्णवासुनरं कमिवाः ॥७॥ अ
स्निग्धत्वं सौहृदं यत्र यस्मिन्नुरुवे विषये वा महांतः ... दर्यो नो हि ग्लानास्तत्र तस्मिन्बालानापि मनो विश्वस्तं भवत्यसिद्धमित्यर्थः ॥८॥ ९ आ
नंदः यथा मासेन संतोषः ॥१०॥ लोकमहीभुजनाकीर्णम्रमिवित्रि ॥११॥ लोकचर्यासु अशास्त्रीयलौकिकवृत्तेषु ॥ दृश्ये दर्शनार्हे समाजोत्सवादि कौतुके ॥१२॥

श्रीवसिष्ठ उवाच ॥ इत्युक्त्वा विबुधांस्तत्र क्षीरोदार्णवशी विभुः ॥ अंतर्धानं ययौ देवस्तरंगो विघटु घटवता ॥६॥ सोपि संपूजितहरिः सुरौघो
प्रजदंबरां ॥ पुनर्मंदरनिर्हृतात्कणजालमिवार्णवात् ॥७॥ प्रह्लादं प्रतिगीर्वाणास्ततः स्निग्धत्वमाययुः ॥ महांतो यत्र नो हि ग्लानास्तत्र वि
श्वासवन्मनः ॥८॥ प्रत्यहं पूजयामास देवदेवं जनार्दनं ॥ मनसा कर्मणा वाचा प्रह्लादो भक्तिमानिति ॥९॥ अथ पूजापरस्यास्य प्रव
वर्धितकालतः ॥ विवेकानंदवैराग्यविभवप्रमुखा गुणाः ॥१०॥ नाभ्यनंदद्रसौ भोगरंगाञ्शुष्कमिव द्रुमं ॥ न चारमत कांतासु मृगो लोक
महीष्विव ॥११॥ न रेमे लोकचर्यासु शास्त्रार्थकथनादृते ॥ न जायते रतिस्तस्य दृश्ये स्थल इवाब्जिनी ॥१२॥ न विशश्राम चेतोस्य भोग
रोगानुरंजने ॥ मुक्ताफलमसंश्लिष्टं मुक्ताफल इवामले ॥१३॥ त्यक्तभोगादिकलनं विश्रांतिमनुपागतं ॥ चेतः केवलमस्यासीद्दोला
यामिव योजितं ॥१४॥ प्राह्लादीं तां स्थितिं विष्णुर्देवः क्षीरोदमंदिरे ॥ विवेद सर्वगतया धिया परमकांतया ॥१५॥

रा

भोगरूपाणां रोगाणां विषयापथ्यसेवनेनानुरंजने धरणे ॥ असंश्लिष्टमग्रथितं अछिद्रितं वा ॥१३॥ कथं तर्हि चेत आसीत्तदाह त्यक्तेति दोलायां योजितमिवनेक
तरभागविश्रांतमंतरालालंबीत्यर्थः ॥१४॥ परमकांतया सुहृदस्वामिकयापि माज्ञानशक्त्या विवेदविदितवान् ॥१५॥

वा॰टी॰उप॰
॥९०॥

आह्लादिताभक्ता ह्लादकर्त्ता। एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः सर्वानंदकर्त्ता वा एजादेव ग्रहं गता प्रह्लादस्य अग्रतः समायया। १६। हि
गुणेनोपकरणेनोच्चारेण इत्यादी स्रया। १७। अनुष्टुप्याहृष्टोपवितवान्। १८। त्रिभुवनस्य भयं भवनं सुरक्षितस्थितिस्तदनुकूलमभिरामं कोशं गृहं सांतस्थितं
त्रिभुवनस्य स्वेनैव पालनात्। सकलस्य बाह्यस्याभ्यंतरस्य कलंकस्य तमसः हरं अपहर्त्तारं परं सूर्यचंद्राग्निवाक्करणप्रकाशेभ्योप्युत्कृष्टं स्वयंज्यो
तिः प्रकाशं न विद्यते ऽन्यच्छरणं येषां ते अशरणास्तेषां शरणं रक्षकं अविनाशिलाभः छरएं शरणाहं ईशं सर्वशक्तिसंपन्नं अतएव रजमाअजं मते

अथ पातालमार्गेण विभुराह्लादितायतः। एजादेवग्रहं नस्य प्रह्लादस्य समायया॥१६॥ विज्ञायाभ्यागतं देवं पूजयाहि गुणेद्धया। देवं
दैः पुंडरीकाक्ष मारात्सर्यपूजयत्। १७। अग्रजाग्रहगतं देवं प्रत्यक्षावस्थितं हरिं। प्रह्लादः परमप्रीतो गिरा तुष्टाव पुष्टया। १८। प्रह्लाद उवाच
त्रिभुवनभवनाभिरामकोशं सकलकलंकहरं परं प्रकाशं। अशरणशरणं शरण्यमीशं हरिमजमच्युतमीश्वरं प्रपद्ये॥१९॥
कुवलयदलनीलसन्निकाशं शरदमलांबरकोटरोपमानं। भ्रमरतिमिरकज्जलांजनाभं सरसिजचक्रगदाधरं प्रपद्ये॥२०॥
विमलमलिकलापकोमलांगं सितदलपंकजकुड्मलाभशंखं। अतिरणितविरंचिचंचरीकं स्वहृदयपद्मरलाश्रयं प्रपद्ये॥२१॥

नाच्युतं तमसाचेश्वरं सर्वदुःखहरत्वादस्त्वांप्रपद्ये इत्यर्थः। १९। कुवलमरलेनोत्पलेन नीलमणिना च सन्निकाशं समानकांतिं। २०। अलिकलापमिव कोमलानि राम॰
सुंदराण्यंगानि यस्य सितदलपंकजस्य पुंडरीकस्य कुड्मलमिव आभातीति सितदलपंकजकुड्मलाभः शंखो यस्य अतएव रणितानि गुंजारवा यस्य ॥९०॥
वि तथाभूतो विरंचिनामा चंचरीको नाभिपद्मरंगो यस्य सानां स्वभक्तानां हृदयपद्मरलान्याश्रय आधारो यस्य तं॥२१॥

---

हरिलक्षणं शरदंबरं शरत्कालाकाशं प्रपद्ये। शरदंबरत्वोपपादनाय विशिनष्टि सितनखेत्यादि। सितेन धवलेन आननलक्षणं पीवरं पूर्णमिंदुबिंबं यस्य हृदयमणिः कौस्तुभं म न
रीचिजलान्येव गंगा मंदाकिनी यस्य। २२। अविरलानि निविडाकृता दृष्टिः सर्वापि असंबाधं लीनानि विशांयस्मिन् सयं संततं अजातं अनुत्पन्नं अतएव अवर्द्धनं वृ
ध्यादिविकारशून्यं तर्हि कथं तस्य देहित्वं तत्राह गुणेति। सत्त्वादिमायागुणप्रयुक्तैर्गुणशतैरनंतकल्याणैर्ज्जरठः अतिचिरंतनः अभिजातः सुंदरो देहो यस्य तथा
विधप्रलयकाले वटतरुदलशायिनं अर्भकं प्रपद्ये इत्यर्थः। २३। नवविकसितनाभिपद्मस्य रेणुभिर्गौरं पीतं। अर्थादुदरदेशे स्फुटेन प्रकाशमानेन कमलाया

सितनखगणतारकाविकीर्णं स्मितधवलाननपीवरेंदुबिंबं। हृदयमणिमरीचिजालगंगं हरिशरदंबरमाततं प्रपद्ये॥२२॥ अविरलकृतसृष्टि
सर्वलीनं संततमजातमवर्द्धनं विशालं। गुणशतजरठाभिजातदेहं तरुदलशायिनमर्भकं प्रपद्ये॥२३॥ नवविकसितपद्मरेणुगौरं स्फुर
कमलावपुषा विभूषितांगं। दिनशमसमयारुणं गराणंकनकनिभांबरसुंदरं प्रपद्ये॥२४॥ दितिसुतनलिनी तुषारपातं सुरनलिनी
न सततोदितार्कबिंबं। कमलजनलिनीजलावरंसरे हृदिनलिनीनिलयं विभुं प्रपद्ये॥२५॥ त्रिभुवननलिनीसितारविंदं तिमिरसमानविमोह न
दीपमग्र्यं। स्फुटतरमजडं चिदात्मतत्त्वं जगदखिलार्तिहरं हरिं प्रपद्ये॥२६॥ लक्ष्म्याः वपुषा विभूषितं अंगं वक्षो वामोरूर्वा यस्य दिनशमसमयः
सायंकाल इव अरुणः रक्तचंदनकाश्मीरसंधं गराणो यस्य। २४। कमलजो ब्रह्मा तस्य नलिन्याः जलेनावरणं अर्थात् इति जलावरसस्तडागस्तद्रूपं हृदि प्रसिद्धा न
लिनी हृत्पद्ममिति यावत्। २५। त्रिभुवननलिन्याः सितेअरविंदे करे यस्य सूर्यस्य तत्प्राप्तं अतएव तिमिरसमानस्य विमोहस्य दीपं अग्र्यं श्रेष्ठं किं भौतिक
प्रकाशो सो नेत्याह स्फुटतरमिति स्फुटतरं नित्यप्रकाशं। अतएव अजडं चिद्रूपमात्मतत्त्वं अतएव साक्षात्कारमात्रेण जगती। जगद्गतजीवानामखिलार्ति
हरं। २६।

इतिउक्तप्रकाराभिर्गुणैर्बहुलाभिः ... स्तुतिवाग्भिरभ्यर्चितः प्रणितःश्रियानिषण्णःआलिंगितःअंसदेशोयस्यतथाविधोहरिःजलदोमयूरमिव असुरेंद्रं प्रह्लादं प्रत्युवाच २७ इतिश्रीवासिष्ठतात्पर्यप्रकाशेउपशमप्रकरणेत्रयस्त्रिंशःसर्गः ३३ हरेर्वरादिहप्राप्यप्रह्लादःसुखिचारिणां निरस्यमानात्मव र्गस्तमपश्यद्विस्तरेहर्ष्यं हेदैत्यकुलहे चूडामणे त्वंवरंगृहाण ५ सर्वेषांलोकानांप्राणिनांआंतरेस्थितउदारतरंसर्वकार्यपूर्णनिवारकमितियावत् १२

श्रीवसिष्ठउवाच इतिगुणाबहुलाभिर्वाग्भिरभ्यर्चितोसौहरिरसुरविनाशःश्रीनिषण्णांसदेशः जलदइवमयूरं प्रीतिमान्प्रीयमा णःकुवलयदलनीलःप्रत्युवाचासुरेंद्रं २७ मोक्षोपायेउपशमप्रकरणेनारायणागमनंनामसर्गः ३३ श्रीभगवानुवाच व रं गुणानिधे दैत्यकुलचूडामहामणे गृहाणाभिमतंस्वयोजन्मदुःखोपशांतये १ प्रह्लादउवाच सर्वसंकल्पफलदसर्व लोकांतरस्थितः यदुदारतमंवेत्सितदेवादिशमेविभो २ श्रीभगवानुवाच सर्वसंभ्रमसंशांत्यैपरमायफलायच ब्रह्म विश्रांतिपर्यंतंविचारोस्तुतवानघ ३ श्रीवसिष्ठउवाच इत्युक्त्वाहरिरंतर्धेविष्णुरंतरधीयत कृतघर्घरनिर्ह्रादस्तरंग

वं स्तोयधेरिव ४ विष्णावंतर्हितेदेवेस्रजयाकुसुमांजलिं पाद्यास्पंदानवप्रत्यक्तामणिरत्नपुरस्कृतं ५

आदिशआज्ञापयेतिविनयोक्त्यामाचनं २ एवंप्रार्थितोविष्णुःस्वविचारोत्पन्नब्रह्मात्मतत्त्वसाक्षात्कारविश्रांतिमंतरेणात्यंतिककार्पण्यनिवृत्तिरि तिमन्यमानस्तदनुरूपंवरंदिशतिसर्वेति सर्वसंभ्रमसंशांतिरात्यंतिकानर्थनिवृत्तिःपरमंफलंनिरतिशयानंदावाप्तिः ३ ४ ५ राम॰ ९१

---

वरासनेउपविश्यपद्मासनस्थःसन्स्तोत्रपाठविधानकालेअंतर्वक्ष्यमाणप्रकारेणचिंतयामास ६ भवःसंसारस्तदरिणातन्निवारकेणतेनहेतुना ७ तत्रसर्वस्यदृश्य स्यात्मार्थत्वादात्मनएवप्राधान्यंनिश्चित्यसएवास्मिनकःस्यादितिविचारयति किमित्यादिना प्रयत्नेनसर्वेषांयोगेनआहरामिविषयानुपभुंजे च तत्रदेहा नबाधंतावन्नात्मेत्याहजगदिति ९ देहोपिनाहमित्याहअसन्निति मरुकःअनभिज्ञत्वादेववक्तुमसमर्थः पवनैःप्राणवायुभिःक्षणंसंचारक्षणेस्फुरितः

पद्मासनेस्थोतिगुरावुपविश्यवरासने स्तोत्रपाठविधावंतश्चिंतयामासचेतसा ६ विचारवानेवभवानभवतीतिभवारिणा देवेनोक्तो स्मितेनांतःकरोम्यात्मविचारणं ७ किमहंनामतावत्स्यांयोस्मिन्भुवनडंबरे वश्चिगच्छामितिष्ठामिप्रयत्नेनाहरामिच ८ चाज गत्तावदिदंनाहंसवृक्षतृणपर्वतं यद्बाह्यमलमत्यंतंतत्स्यांकथमहंकिल ९ असन्नम्रुदितोमरुकःपवनैःस्फुरतिक्षणं का लेनाल्पेनविलयीदेहोनाहमचेतनः १० जडयाकर्णशष्कुल्याकल्प्यमानःक्षणक्षयी शून्याकृतिःशून्यभावःशब्दोना हमचेतनः ११ त्वचाक्षणविनाशिन्याप्राप्यमप्राप्यमप्राप्यमप्यथ चित्प्रसादोपलब्धात्मस्पर्शनंनास्म्यचेतनम् १२

संचलितः १० एवंशब्दादिविषयाअपिनात्मेत्याहजडयेत्यादिना जडयाअचिद्रूपया कल्प्यमानस्तारोमंद्रःपरंवाक्यमित्यादिभेदैःसमर्थ्यमानःक्षयि त्वादेवशून्याकृतिःशून्यादाकाशाद्भवतीतिभावः यद्वाप्याकाशोनम्रत्स्वस्वभावस्तथाप्यात्मसत्तातःपृथक्कारणैःस्वरूपइतिशून्योक्तिः ११ प्राप्यंप्राप्यमपिकरादिव्याप्यंस्पर्शनंउष्णत्वादिगुणनिरूप्यस्वभावःआत्माभवितुमर्हतीतिभावः १२

लोलयासक्तयाअनित्ययालोलयाचलयाचयाजिह्वयाबद्धात्मासंबद्धस्वभावःरसनेंद्रियाधीनसिद्धिकइतियावत्॥स्वल्पःजिह्वाग्रात्कंठपर्यंतःस्पंदःआस्वा
दप्रसरोयस्य॥२३॥दृश्यंदृश्येदर्शनेचक्षुषिचलीनंतदुभयाधीनसिद्धिकमितियावत्॥क्षणविनाशिनोरनित्ययोःकेवलेद्रष्टरिउपभोगजननेनक्षीणमुपक्षी
णं॥२४॥अंधवज्जडयाअप्रकाशया॥नासयाघ्राणेंद्रियेण॥कालेनान्यथान्यथापरिणामादनियताकारः॥२५॥शब्दादिविषयाणामनात्मत्ववचनंवचना
दीनामपिसमानंसत्त्वंत्रिपुटीनांन्यायसाम्यादनात्मत्वोपलक्षणंतेनाहंकारमनोबुद्धिचित्तत्रिपुट्याअप्यनात्मत्वेननिरासेशुद्धचिन्मात्रमेवात्मापरिशिष्ट

बद्धात्माजिह्वयातुच्छोलोलयालोलसक्तया॥स्वल्पस्पंदोऽप्यनिष्ठोरसोनाहमचेतनः॥२३॥दृश्यदर्शनयोर्लीनंक्षयिक्षणविनाशिनोः
केवलेद्रष्टरिक्षीणंरूपंनाहमचेतनं॥२४॥नासयाप्यंधजडयाक्षयिस्यापरिकल्पितः॥पेलवोनियताकारोगंधोनाहमचेतनः॥२५॥
निर्ममोऽमननःशांतोगतपंचेंद्रियभ्रमः॥शुद्धचेतनएवाहंकलाकलनवर्जितः॥२६॥चेत्यवर्जितचिन्मात्रमहमेषोवभासकः॥
सबाह्याभ्यंतरव्यापीनिष्कलोमलोऽन्मयः॥२७॥अनेनचेतनेनेमेसर्वेघटपटादयः॥सूर्यांताअवभास्यंतेदीपेनेवतमस्मृताः॥२८॥
आइदानींस्मृतंसत्यमेतन्नरतिलंमया॥निर्विकल्पचिदाभासएषआत्मास्मिसर्वगः॥२९॥

इत्याशयेनाहनिर्ममइति॥२६॥चेतनपदेनचेतनाबलोजडांशस्यापिग्रहणंमाभूदिति॥तत्परिशोधयाहचेत्येति॥सन्मयःसन्मात्रः॥२७॥इत्थंत्वंपदार्थपरिशुद्धं
विचार्यतत्सुखेनैवतत्पदार्थमविपरिशोध्यावधारयितुमुपक्रमतेअनेनेत्यादिना॥अन्यनिरपेक्षत्वादुत्तमतेजसाचेतनेनदीपेन॥२८॥निर्विकल्पोविपदा
दिविकल्पशून्यश्चिद्रूपक्षणअभासःप्रकाशएवआत्मास्मीतिअनात्मेश्वरनिरासः॥२९॥



अग्निमतांअंगारकणपंक्तयोमध्येस्पर्शः॥२४॥२५॥सर्वपदार्थानांस्फूर्तिरिवसत्ता॥द्योतरधीनैवेत्याहअनेनेति॥सत्तोपपादनेप्रदीपदृष्टांतःस्फूर्तिसत्तयोरभे
दद्योतनार्थः॥२२॥जाग्रतांसचेतसामितियावत्सर्वासांअनुभवएवाभस्तास्यनुभविनोदेहेंद्रियमनोबुद्ध्यादयस्तद्भावानांअनुभविनांअनुभावानांभ
भिःपरिविश्रांतिस्थानं॥यथामुकुरःसर्ववस्तुप्रतिबिंबविश्रांतिस्तद्वत्॥२३॥पदार्थानांस्वभाववैचित्र्याण्यपद्योतरधीनसिद्धिकानीत्याहतस्येति॥घनः
कठिनः॥विद्रुतंद्रवं॥२४॥सातत्येनआकाशाद्वायुर्वायोरग्निरग्नेरापइत्यादिक्रमेणश्रुतिप्रसिद्धादिनाअनुसृतानांसर्वेषांपदार्थानांजगतिउत्पत्ता

अनेनैताःस्फुरंतीहविचित्रेंद्रियवृत्तयः॥तेजसांतःप्रकाशेनयथाग्निकणपंक्तयः॥२०॥अनेनैताःस्फुरंतीहविचित्रेंद्रियपंक्त
यः॥सर्वांगेननिदाघेनयथामरुमरीचिकाः॥२१॥अनेनैतत्पदार्थानांवस्तुत्वंप्रतिपाद्यते॥शुक्लादिगुणवत्त्वंस्वंप्रदीपेनेव
वासस्सां॥२२॥असावेवहिभूतानांसर्वेषामेवजाग्रतां॥सर्वानुभवितासम्भिरात्मामुकुरवत्स्थितः॥२३॥तस्यैकस्याविकल्पस
चिद्रूपस्यप्रसादतः॥उपलोकःशिशिरस्यंदोघनोद्रवेद्रुतंपयः॥२४॥सातत्येनानुसृतानांसर्वेषांचजगत्स्थितौ॥एतत्कार
णमाद्यंतत्कारणंनास्यविद्यते॥२५॥सातत्येनानुसृतानांपदार्थानामनेनतत॥पदार्थत्वमुदेत्युच्चैःप्रतापेनेवतत्स्मृता
२६॥अनाकारात्कारणाद्यःसर्वकारणकारणात्॥एतस्मादिदमुत्पन्नंजगच्छैत्यंहिमादिव॥२७॥

दिव्यवस्थितौएतदाद्यंकारणंतत्तनोतीतितत्स्वरूपेणसर्वकार्यव्यापकं॥२५॥तत्सिद्धंवियदादिपदार्थत्वंप्रतापेनग्रीष्मार्कतापेनभस्मादेस्तत्तत्तेव॥२६॥पर
मार्थतःअनाकारात्कारणात्अद्याकारश्शून्यात्अविद्याकारणभूतात्सर्वेषांअप्सादिकारणानांकारणादेतस्मात्सत्यरूपाद्ब्रह्मणः॥इदंजगदुत्पन्नं॥२७॥

सर्वकारणकारणादित्येतद्विवृणोति ब्रह्मविस्विति।२५। महद्विभाता अनित्यस्वप्रकाशा अ।२६। कारणत्वात्सर्गहेतुत्ववत्स्थितिप्रलयहेतुत्वमप्यस्येवेत्या
हएतस्मिन्निति।गुणभूतानि अप्रधानभूतानि गुणवदष्टव्यक्तिकानि बाविविशंतितथाचयतोवाइमानिजायंत इत्यादिश्रुत्युक्त ब्रह्मलक्षणस्याक्षि भूतानि
न्नेवसमन्वयइत्यर्थः।३०। कारणे सूक्ष्मरूपेण स्थितं इदानीं सदूर्तमानमपि यत्त अनेनेश्वरेण चेतनेनांतरात्मना उत्तरक्षणे अस्तिति कलितं संक

ब्रह्मविष्णुं इंद्ररुद्राणां कारणानां जगत्स्थितौ॥एतत्कारणमाद्यं तत्कारणं नास्य विद्यते॥२८॥ चित्त्वेत्यहंदृष्ट्यादिनामभिर्वर्जिता
त्मने॥स्वयं महद्विभाताय मह्यमस्मै नमो नमः॥२९॥ एतस्मिन्सर्वभूतानि निर्विकल्पचिदात्मनि॥गुणभूतानि भूते शेतिष्ठं ति
विविशंतिच।३०।यत्किलानेन कलितं चेतनेनांतरात्मना॥तत्तद्भवति सर्वत्र नेतरत्सदपि स्थितं।३१।यच्चित्ताकलितं किंचित्त
दाप्नोति निजं पदं॥यच्चिताकलितं नेह तत्स्वरूपं तमागतम्।३२।इमे घटपटाकाराः पदार्थशतपंक्तयः॥जागत्योविपुलादर्शे त्वस्मि
न्व्योमनि बिंबिताः॥३३॥एतद्दृष्टं दृष्टतरे स्वयिक्षयिणि जायते॥पदार्थसत्त्वापि प्रतिबिंबार्कवत्स्थितं।३४।अदृश्यं सर्वभूता 
नां प्राप्यं गलितचेतसां॥एतत्तद्दृश्यते सद्भिः परं व्योमाति निर्मलं॥३५॥

ल्पितं तत्तद्भवति उत्तरक्षणे नेतरदित्यर्थः।३१। कलितं स्वीयसत्तास्फूर्तिप्रदानेनोज्जिवितं।निजं घटोस्तीत्यादिव्यवहारपदं।अंतमसत्त्वलक्षणं नाशमागतं प्रा
प्तं।३२।३३।एवं बुद्ध्यादिभावविकारा अप्येतस्मिन्नेवाध्यस्ता इत्याह एतदिति।यथा प्रतिबिंबार्के क्षयवृद्धीतद्रूपेण स्थिते बिंबे स्वाध्यस्ते अन्यद्वत्तित ये 
वविभाव्येते तद्वदित्यर्थः।।३४।सर्वेषां भूतानामज्ञानां गलितचेतसां दृश्यमिति वक्तव्ये प्राप्यमित्युक्तिर्दर्शनप्राप्तोर्भेदाभावद्योतनायेत्याशयेन व्याचष्टे
एतत्तदिति।३५।

येतु कारणस्यैकदेशे परिणामो जगदिति कल्पयंति तेषां कल्पनाप्यस्मिन्नेव नान्यत्रेत्याशयेनाह इयमिति द्वाभ्यां॥३६।३७॥ अस्मिन्नेव कल्पनेति कुतो ज्ञात
मिति चेदेतदभिन्नस्फूर्तिकत्वाज्जगत इत्याह सर्वेषामिति॥३८।३९॥ परिच्छिन्नसंख्यागणनायंत्री यत्ना आदिपदाद्देशयत्नाकालेयत्नेष्टव्ये॥४०॥
स्वानुभूतिवशात्स्वात्मनि क्रियाविरोधेनानुभूयं तरापघटनात्स्वप्रकाशानुभूत्यात्माय मित्यर्थः।परप्रकाशनेप्यस्य संकोचाभावेन सर्वद्रग्दृष्ट दृश्याः सा

इयमभ्युदयं याति नानादृश्यसुमंजरी॥आचारचंचरीकाढ्या एतस्मात्कारणद्रुमात्॥३६॥अस्मादियमुदेत्युच्चैः संसाररचनाचला
विचित्रतरुगुल्माढ्या शैलादि वनवस्थली॥३७॥सर्वेषामप्यभिन्नोसौ त्रैलोक्योदरवर्तिनां॥ब्रह्मादीनां तृणांतानां चिदात्मा संप्रकाशकः
३८॥एकोसावहमाद्यंतरहितः सर्वगाकृतिः॥चराचराणां भूतानामंतः स्वानुभवस्थितः॥३९॥अस्यतस्यममेमानि स्थावराणि च रा
णि च॥परिसंख्यादिहीनानि शरीराणि बहूनि च॥४०॥एकोसावनुभूत्यात्मा स्वानुभूतिवशात्स्वयं सर्वदृग्दृष्टदृश्यत्वात्सहस्र
करलोचनः॥४१॥एषोसावहमाकाशे सूर्यदेहेन चारुणा॥विहरामीतरेणापि वायुदेहेन वायुना॥४२॥ममैतद्भुवनीलं शंखचक्र
गदाधरं॥सर्वसौभाग्यसीमांतं यस्मिन्जगति वल्गति॥४३॥अहमस्मिन्समुद्भूतपद्मासनगतः सदा॥निर्विकल्पसमाधिस्थः परां निर्वृति
मागतः॥४४॥अहं त्रिनेत्रया कृत्या गौरीवक्त्राब्जषट्पदः॥सर्गांते संहरामीदं हूर्मिंगपरले यथा॥४५॥

क्षितया भास्वायस्पत थाविधत्वात्प्रतिशरीरमात्मभेदासिद्धावयमेव सर्वेषां करलोचनैः सहस्रकरलोचन इत्यर्थः॥४१॥ सर्वात्मभावं स्वस्य प्रत्येकमाह एषोसावि
ति एषः प्रत्यक्षोसावीश्वरभूतोहं सूर्यभूतः सन्सूर्यदेहेन विहरामि॥ एवं वायुना वायुदेहेन॥४२॥ वल्गति व्यवहरति॥४३॥ ४४॥ आकृत्या मूर्त्या॥४५॥

वा॰ टी॰ उप॰ ९४ क्रमप्राप्तमन्वंतरक्रमप्राप्तं ४६ त्वंस्त्री त्वंपुमानसि त्वं कुमार उत वा कुमारी त्वंजीर्णोदंडेन वंचसि त्वंजातो भवसि विश्वतोमुख इति श्रुतिः स्वात्मनि स्वानुभवेन संवा
दयति स्त्रीति ४७ रसतया जीवसारतया जलतया च कूपो जीर्णकूपः ४८ अभिजाते नक्रीडनकनिर्माणकुशलेन ४९ आप्यते कारणभावेन व्याप्यते
कार्यस्य वमता प्रविलयेन मां प्राप्य गच्छति तिरोभवति मूर्यास्ततत्त्वदर्शनेन परित्यक्तमेतज्जगज्जीवन्मुक्तव्यवहारे स्वरूपेण किंचन ५० ५१ इदानीं

अहमिंद्रेण रूपेण त्रिलोकीमखिलामिमां ॥ पालयामि क्रमप्राप्तां मन्वंतरमिव तापसः ४६ स्त्री पुमानहमेवैतत्कुमारोऽहमिलापि जीर्णो
हं देहधारित्वाज्जातोऽहं विश्वतोमुखः ४७ अहं तृणलतागुल्मजाले रसतया स्थितः उत्थापयामि च द्रुमैः कूपांतरलतामिव ४८ सलीला
र्थमिदं चारुजगदाडंबरं ततं मयाभिजातबालेन पंकक्रीडनकं यथा ४९ मयेदमाप्यते सर्वं सर्वं मां प्राप्य गच्छति मत्परित्यक्तमेतच्च स्व
रूपेण न किंचन ५० मयि स्फारे चिदादर्शे प्रतिबिंबं यदागतं तदस्ति नेतरत्तस्मान्मत्तोऽन्यन्नेह विद्यते ५१ कुसुमेष्वहमामोदः पुष्प
पत्रेष्वहं छविः छविष्वहं रूपकलारूपेष्वनुभवोऽप्यहं ५२ यत्किंचिदिदं दृश्यं जगत्स्थावरजंगमं सर्वसंकल्परहितं तद्वि
त्तेऽहं परं ५३

राम॰ ९४ श्वरभ्रत्तस्य स्वस्य विश्रांतिविस्तरमुपभोगेऽनुभवंतमाह कुसुमेष्विति ५२ दृश्यं दर्शनार्हं स्थावरं जंगमं वा विभ्रति मच्छ्रीमदूर्जितं वा तत्सर्वं स्वोत्कर्षनिमित्तं चि
दात्मकत्वे अहमेव किं संकल्पादिदूषितजीवरूपेण नेत्याह सर्वसंकल्परहितमिति अत एव परं ५३

रसमयी आद्या शक्तिः रसतन्मात्रा यथा सागरनदीसरःकूपादिरसौघो जलौघः सन् विस्तृतः सैव जलभूता शक्तिर्दारुषु वृक्षेषु शाखापत्त्रवादिषु द्रवनिमित्ततया कुड्येषु
रणयवांकुरादिषु द्रवनिमित्ततया प्रसृता तथाहं सर्ववस्तुषु तत्तत्कार्योद्द्रवनिमित्ततया प्रसृत इत्यर्थः ५४ स्वसृष्टकार्यांतरानुप्रवेशेन जीवसंविद्वैचित्र्योपि स्वयमे
व हेतुरित्याह परमामिति ॥ ५५ चैत्योपचारश्चैत्यप्रथा तद्रहितं जडमिति भावत्रिकालस्थमतीतं वर्तमानं भविष्यच्चेदं जगत् चितिचिद्रूपे मध्ये एकांशे व्यवस्थि

आद्या रसमयी शक्ती रसौघो विस्तृतो यथा ॥ सा यथा दारुकुड्येषु तथाहं सर्ववस्तुषु ॥ ५४ परमां तामहं सर्वे पदार्थांतर
वर्तिनीं ॥ अनुपेत्य संविद्वैचित्र्यं भजतो मित्स्वयेच्छया ५५ घृतं यथांतः पयसो रसशक्तिर्यथा जले ॥ चिच्छक्तिः सर्वभावे
षु तथांतरहमास्थितः ५६ इदं जगत्त्रिकालस्थं चितिमध्ये च संस्थितं ॥ चैत्योपचाररहितं वस्तुजातमिवावनौ ॥ ५७ ॥
भरिताशेषदिक्कुक्षिस्त्यक्तसंकोचविभ्रमः ॥ सर्वस्थः सर्वकर्ता च विराट् सम्राडहं स्थितः ॥ ५८ ॥ अपर्वमनिबद्धं
दमशस्त्रदलितामरं ॥ अप्रार्थितं मे संप्राप्तं जगद्राज्यमिदं ततं ॥ ५९ ॥ अहो नु विततात्मास्मि न माम्यप्यात्मना
त्मनि कल्पांतपवनाधूतसप्तकार्णवदवार्णवे ॥ ६० ॥

तं यथा तृणकाष्ठलोष्ठादिवस्तुजातमवनौ तद्वत् ५७ विविधोऽभिमेदेन राजत इति विराट् समष्टिभावेन राजत इति सम्राट् अथवा विशेषेण राजांतरेभ्यो राजत
इति विराट् सम्राट् सर्वेषां राज्ञामाज्ञापयिता ५८ इंद्राधिकराज्यप्राप्तेः कथं सम्राट्त्वं तत्राह अपर्वमिति ५९ न मामि कुसूले धान्यमिव समावेशं न प्राप्नोमि
अर्णवे प्राक्तनार्णवपरिमाणे ६०

Dr. BHAU DAJI MEMORIAL
[illegible]

वा॰टी॰उप॰ ९४॥

अंतः स्वयं स्वदिते स्वेनैव निरतिशयानंदात्मना स्वद्यमाने॥ पंगुः कुंठितगतिः सरीसृपः सर्पः स्फुरन्॥ ६१॥ ब्राह्मी मठिका ब्रह्मांडः सुसंकटा संकुचितगर्भा विपुलं विस्तृतं वपुर्मत्स्वरूपं न प्रातिन समाविशति॥ ६२॥ उत्तरोत्तरदशगुणपार्थिवाद्यावरणावृतात् ब्रह्मांडलक्षणाद्धिरिं विभवनासारे परतः चतुर्विंशतिसंख्यानां सांख्यवैष्णवादितंत्रप्रसिद्धानां षट्त्रिंशत्संख्यानां शैवपाशुपताभिमतानां वा तत्त्वानामंतेऽपि परं आहरत् क्रममाणमिति यावत्॥ मेरूपं प्रसरत्येवेति वास्त

नात्मन्यंतमवाप्नोमि स्वस्थेंतः स्वदिते स्वयं॥ क्षीरवारिनिधौ पंगुः सरीसृप इव स्फुरन्॥ ६१॥ स्वस्येयं मठिका ब्राह्मी जगन्नाम्नी सुसंकटा॥ गजो बिल्व इव स्वांगे न माति विपुलं वपुः॥ ६२॥ चिरं विभवनासारे तत्त्वांतेप्याहरत्पदं॥ प्रसरत्येव मे रूपमद्यापि न निवर्तते॥ ६३॥ अयं नामाहमित्यस्यां ततः कुतो निरवलंबना॥ अपर्यंता कृता रेषा किलासीत्स्वल्पता मम॥ ६४॥ भवानयमयं वाहमिति मिथ्यैव विभ्रमः॥ को देहः कोऽप्यदेहो वा कोऽमृतः कश्च जीवति॥ ६५॥ वराकाः पेलवधियो बभूवुर्मे पितामहाः॥ ये साम्राज्यमिदं त्यक्त्वा रेमिरे भवभस्मिषु॥ ६६॥ क्वेयं किल महादृष्टिर्भरितो ब्रह्मसंहिता॥ क्व सरीसृपभीमाशा भीमा राज्यविभूतिभिः॥ ६७॥ अनंतानंदसंभोगा परोपशमशालिनी॥ शुद्धेयं चिन्मयी दृष्टिर्जयत्यखिलदृष्टिषु॥ ६८॥ सर्वभावांतरस्थाय चेत्यमुक्तचिदात्मने॥ प्रत्यक्चेतनरूपाय मह्यमेव नमो नमः॥ ६९॥

वस्येव विस्तारं प्रसारत्वेन कल्पना॥ ६३॥ अयं देहादिरहमिति कल्पना कुत आसीदियं तं कालमित्यर्थः॥ ६४॥ देहस्यैवाप्रसिद्धौ अदेहोऽपि कः वंध्यापुत्रस्येव तद्वंतुरप्यप्रसिद्धेः॥ एवं कोऽमृतः प्राणस्यैवाप्रसिद्धौ कस्तेन वियुक्तः कश्च जीवति प्राणान्धारयति॥ ६५॥ मिथ्यासाम्राज्यासक्तान्मत्पितामहादीनिदानीमनुशोचति वराका इति॥ पेलवधियः क्षुद्रधिय इति यावत्॥ ६६॥ सरीसृपाः सर्पा इव भीमाभिराशाभिर्भीमा॥ ६७॥ ६८॥ ६९॥ राम॰ ९५

यतोऽहं चिरमुक्तमन्त्रमिव जीर्णसंसारसंसृतिर्येन तथाविधः सन् अजो जातः अतो जयामि सर्वतो जेतव्यजयफलं सर्वानर्थनिवृत्तिं प्राप्नोस्मि॥ किंच प्राप्तानि प्राप्तव्यानि सर्वाणि सुखानि येन तथाविधः सन् जीवामि जीवितस्य फलं प्राप्नोस्मि॥ अत एव जयामि सर्वोत्कर्षेण वर्ते चेत्यर्थः॥ ७०॥ ७१॥ वनदुर्गे दारूणि जलदुर्गे वारिणि गिरिदुर्गे च दृषदः भिन्दंतीति भाव्याः विपत्सु शरणं तथाविधे धरातले भूतले स्वामित्वाभिमानेन मोलुलितः लोलतां गतः तं कुदानवलक्षणं कीटकं कीटकेष्वपि दारुकीटकानां दारुभिर्दुर्गमत्वे वारिकीटकानां वारिणा दृषत्सु भिगतवृश्चिकादिकीटकानां दृषद्भिश्च त्राणदर्शनात्स्वतः स्वत्राणशक्तेः स्वल्पत्वादित्यर्थः

जयाम्यहमजो जातो जीर्णसंसारसंसृतिः॥ प्राप्तप्राप्यो महात्मायं जीवामि च जयामि च॥ ७०॥ इदमुत्तमसाम्राज्यं बोधं संत्यज्य शाश्वतं॥ न रमेऽहमरम्यासु राज्यदुःखविभूतिषु॥ ७१॥ दारुवारिदृषन्मात्रे लुलितो यो धरातले॥ धिग्वराकमनात्मज्ञं तं कुदानवकीटकं॥ ७२॥ अविद्धे कालमियद्व्योरविद्यामयमंगकं॥ अज्ञेन संतर्पयता किं नाम गुरुणा कृतम्॥ ७३॥ वर्षाणि कति चित्प्राप्य जगच्छ्री मठिकामिमां॥ किं नाम प्राप्तुवितं हिरण्यकशिपुः किल॥ ७४॥ अनास्वाद्यैरमानंदं जगद्राज्यशतान्यपि॥ सम्यगास्वादयता नेह किं विरस्वादितं भवेत्॥ ७५॥ न किंचिद्येन संप्राप्तं तेनेदं परमामृतं॥ संप्राप्यांतः प्रयत्नेन सर्वं प्राप्तमखंडितम्॥ ७६॥

७२॥ कार्यकारणयोरभेदादविद्यैकात्मकैः द्रव्यैरन्नपानादिविषयैः गुरुणा पित्रा॥ ७३॥ जगच्छ्रीलोकं तत्क्षणं प्राप्युक्तां मठिकां॥ उचितां काश्यपेकुले जन्मनोऽनुरूपं परमपुरुषार्थं॥ ७४॥ अमभात्मैवानंदरद्रसमानेरसं तेरदं जड दुःखरूपमपि देहेंद्रियविषयात्मानेदयति॥ आनंदरूपतयानुभावयतीति वा इदमानंदस्तं॥ ७५॥ एकं संप्राप्येव विनैव विषयं सर्वविषयसुखप्राप्तिमाह॥ न किंचिदिति॥ अखंडितं निरंतरं॥ ७६॥

त्यक्ता मुलताफलभारनतद्राक्षादिवल्ली येन तथाविधः सन्॥७७॥ निंबपयः पिचुमंदपत्ररसं॥७८॥ चरे मिरेत्येऽरतिशेषः॥७९॥ भोगेषु भोग्यजनदेहादिषु॥८०॥ न किं
चिदपि सुखमिति शेषः॥८१॥ सर्वं सुखं तत्साधनं च॥८२॥ तत्कुत इत्यत आह॥ भामिनीत्यादिना॥ यतः भामिन्यादयस्तत्सुखनिमित्ताः विचित्राः शक्तयः परस्या वि

त्यक्त्वा पदमिदं मरखेंद्रमिति मेतिनपंडितः॥ उष्ट्रो हि त्यक्तमुलतः कंटकं याति नेतरः॥७७॥ परं दृष्टिमिमां त्यक्त्वा दग्ध राज्येरमेत कः॥ कस्त्य
क्त्वेक्षुरसं प्राज्ञः कटु निंबपयः पिबेत्॥७८॥ मरखा एव हि ते सर्वे बभ्रुर्मे पितामहाः॥ इमां दृष्टिं परित्यज्य रेमिरे राज्यसंकटे॥७९॥ कु
कुद्मानेदरत्स्यल्पः कुरुधमरुभ्रमयः॥ क्षेमाबोधदृशः शांताः क भोगेष्वात्मबुद्धयः॥८०॥ न किंचिदपि त्रैलोक्ये यद्राज्यमपि वां
छ्यते॥ सर्वमस्त्येव चित्तेतत्कस्मान्नानुभूयते॥८१॥ चेता सर्वस्यया स्वस्थसमया निर्विकारया॥ सर्वया सर्वदा सर्वं सर्वतः सा
धुलभ्यते॥८२॥ भामिनी तैजसी शक्तिरमृता शशिरैंदवी॥ ब्राह्मी महत्ता महती शार्की त्रैलोक्यराजता॥८३॥ परमा पूर्णता शार्वी ज
मलक्ष्मीश्च वैष्णवी॥ मानसी शीघ्रगतिता बलवत्ता च वामवी॥८४॥ आग्नेयी दाहकलना पायसी रसनिर्वृतिः॥ मौनी महातपः सिद्धि
र्विद्या बार्हस्पती तथा॥८५॥ वैमानिकी व्योमगतिः स्थिरता चापि पार्वती॥ गंभीरता च सामुद्री मैरवी चमहोन्नतिः॥८६॥

ताः क्रियंते इत्यष्टमेनान्वयः॥ ब्राह्मी हैरण्यगर्भी महत्ता मान्यता महती सर्वोत्कृष्टा॥८३॥ शार्वः शिवः तत्संबंधिनी परमा पूर्णता निरतिशयज्ञानैश्वर्यानंदश
क्तिसंपूर्णता॥८४॥ पायसी जलसंबंधिनी रसनिर्वृतिराप्यायकता मौनी भृग्वादिमुनिसंबंधिनी विद्या विद्या वाक्पतिता॥८५॥ ॥८६॥ राम॰ ॥ ९६॥

सौगती बुद्धान्तरा(सिद्धा)सिद्धा शमः श्रीः शून्यता लक्षणा सर्वोपप्लवशांतिः॥ अथवा शोभनागतिः सुगतिर्निर्मलसाक्षात्कारस्तत्संबंधिनी शमश्रीः सर्वानर्थनिर्वाप
णशक्तिः॥८७॥ मायामयता माया मधुरता निष्कलंकता निर्लेपता॥८८॥ त्रिकालोदरसंस्थिताः अतीता अनागता वर्तमानाश्च ये सर्वार्थाः॥८९॥ स्वस्थस
मभावात् प्रच्युतया अत एव समया एकरूपया निर्विकारया वासनाविकारशून्यया चिता कलाकलनं तत्तच्छक्तिकार्यानुसंधानं तद्युक्तया॥९०॥

शमः श्रीः सौगती सौम्या मारिरीमदलोचना॥ माधवी पुष्पमयता वार्षिकी घनशब्दिता॥८७॥ याशीच्चमायामयता नाभसी निष्कलंकता
शीतता पि चतोषारीनैदाघी तापतप्तता॥८८॥ एतास्ताश्चान्यास्तथा बह्व्यो देशकालक्रियात्मिकाः॥ नानाकारविकारेस्था स्त्रिकालो
दरसंस्थिताः॥८९॥ विचित्राः शक्तयः स्वस्थसमया निर्विकारया॥ चिता क्रियंते परया कलाकलनयुक्तया॥९०॥ एवं विकल्पहीना
चित्सर्वा पदार्थशतदृष्टिषु॥ समं मेवाभिपतति प्रभा र्भमाकरी यथा॥९१॥ सर्वाशाकोशविभ्रांतां पदार्थपटलीं महीं॥ कालत्रयेहाक
लितां यथानुभवति क्षणात्॥९२॥ तथा समस्तसंसारहृहदृश्यदशाश्रियं॥ कालत्रयात्मामलो चिच्चेतति तत्ता(रा)त्मिका॥९३॥

ननु विचित्राणामर्थानां विचित्रप्रथादर्शनात् कथं चितः समतात आह विकल्पेति॥ सर्वा सर्वदा इति प्रविश्य पि चितन चित्तवृत्तिगतैर्विकल्पैर्वैचित्र्यैर्लिप्यते य
था प्रभाकरी प्रभा न वृत्तिहतैः स्थाणुपुरुषादिविकल्पैस्तद्वदित्यर्थः॥९१॥ त्रिकालभेदप्रयुक्तमपि वैषम्यमस्या नास्तीत्याह सर्वाशेति॥ महीं व
॥ द्वौ अनुभवति सौरी प्रभा यथा तथा चिदपि चेतति प्रथयतीति परेणान्वयः॥९२॥९३॥

देशकालभेदस्यसाम्ये देशकालदेहविषयादिनाभिन्नकालयैव चिता भास्यं तदित्याह तुल्यकालेति तुल्यशब्दोऽभिन्नपरः तथाच परिहृतो अखंडैकवस्तुहृ चि दभिन्नकालपरामृष्टैवसती अतीतादित्रिकालकलनाशत भिन्नेव प्रत्यक्षानुभित्युपमित्यागमानंतमानभेयपुरुषभेदभिन्नाभोगेवस्वभाती त्यर्थः ९४ अतएवकालभेदेदृष्टिभेदेपिचतत्साक्षिण्याश्चितो न भेदइतिदर्शने वेत्याह परामृष्टेति ९४ अतएवमधुरद्वयस्यवायुगपत्स्वादे विषयभेदे गेनक हृदयस्य

तुल्यकालपरामृष्टा त्रिकालकलनाशता॥ अनंतानुभवाभोगापरिहृतैवशुद्धचित्॥९४॥ परामृष्टत्रिकाला याहृष्टानंतदृशस्थितः॥ समतापरपर्यापारणं नैवावशिष्यते॥९५॥ तुल्यकालावबुद्धेनस्वादुनाकटुना पिचित्॥ समेनसमताभेतिमधुनिंबानुभूतिवत्॥९६॥ त्यक्तसंकल्पकलयासूक्ष्मयाचिद्यवस्थया॥ सर्वभा वानुगतयासत्ताऽद्वैतैकरूपया॥९७॥ विचित्रापिपदार्थश्रीरन्योन्यवलितांतरा॥ तुल्यकालानुभवनासाम्येनैवानुभूयते॥९८॥

पिनानुभूतिभेदइति विषयादिभेदेनचिद्भेदप्रयोजकइत्याह तुल्यकालेति॥ समेन तुल्यरसेनस्वादुना मधुरद्वयेन॥ तत्र मधुनिंबाद्येकैकानुभू तिवदितिचिदभेदेदृष्टांतः ९६ घटपटादिविचित्रापदार्थश्रीरपित्यक्तपरस्परव्यावर्तकभेदसंकल्पकलयासूक्ष्मयासत्ताद्वैतैकरूपयाचिद्यवस्थ 
यातुल्यकालमनुभूयमाना साम्येनैवानुभूयतेन भेदवैषम्येनेतिन विषयादिभेदश्चिद्भेदकइतिद्वयोरर्थः॥९७॥९८॥ 

---

भेदसंकल्पकलात्यागेउपायमाह भावेनेति॥ भावेन विवेकेनवावारंभणश्रुत्यानेतिनेत्यादिश्रुत्या आचार्योपदेशसविचारादिनाच दृश्यजातस्याभावमाश्रित्यसचिद्र रूपोभावः दुःखतां शोकमोहादिपरिणामंसद्यस्त्यजति॥ तथापिरागादिसंस्कारदुष्टतयाकालांतरे पुनः शोकाद्युद्भवः स्यात् अतः सर्वदृश्यप्रतिषेधलक्षणेना भावेनभावं परमार्थसद्वैतानंदस्वभावमात्मानं प्रेक्ष्य सचित्तलक्षणोभावोरागादिदुष्टतामपि जहाति रसोप्यस्यपरंदृष्ट्वानिवर्तत इतिभगवद्वचनात् अतोबीजा भावाद्भेदसंकल्पकलात्यागः सिद्ध इत्यर्थः॥९९॥ उक्तमर्थं भंग्यंतरेणोपपादयति॥ कालत्रयमितिवर्तमानं चेत्संदृश्यं तदुपेक्षिणः अतीतं चेत्स्ववासनाबं धनैर्हीनायाश्चेत्साधारं कालत्रयमप्यपश्यंत्याश्चितोनभाव्यपि चेत्यभोगः संभाव्यत इति समतैवपरिशिष्यत इत्यर्थः॥१००॥ उपशांतेवेतिवक्ष्यतस्तत्रो

भावम्
भावेनाभावमाश्रित्यभावस्त्यजतिदुःखतां॥ प्रेक्ष्यभावेनभावस्त्यजतिदुष्टतां॥९९॥ कालत्रयमपश्यंत्याहीनायाश्चेत्यबंधनैः॥ चि तश्चेत्यमुपेक्षिण्याः समतैवावशिष्यते॥१००॥ यातिवाचामगम्यत्वादसत्तामिवशाश्वती॥ नैरात्म्यसिद्धांतदशामुपयातेवतिष्ठति॥१०१॥ भवत्यात्मातथाब्रह्मन किंचिन्नाखिलंचवा॥ परमोपशमेलीनामोक्षनाम्नापरोच्यते॥१०२॥

पयाता यतस्तिष्ठति सतोऽसत्ताभोगादितिभावः॥१०१॥ यस्तिष्ठति स शास्त्रीयव्यवहारे प्रत्यक्चैतन्यात्मा भवति ब्रह्मेत्याह हेब्रह्मन् भवति परमार्थदशानुवा चांप्रवृत्त्यभावान्नकिंचित्॥ यदिचप्रवृत्तिनिमित्तकल्पनयाशब्दप्रवृत्तिरुच्येत तदासंकोचकारणाभावात्सर्वप्रवृत्तिनिमित्तकल्पनादखिलंचयतोवा चोनिवर्तंते अप्राप्यमनसासहा तस्मात्सर्वमभवदितिचश्रुतौ द्वेधापिनिरूपणादितिभावः॥ सर्वदृश्यानां परमोपशमे सतदवधित्वात्स्त्रीनापरासमतामो क्षनाम्नोच्यत इत्यर्थः॥१०२॥

इत्थं मेरुसंकल्पकलनात्यागः सोपायो वर्णितः इदानीं संकल्पकलने चितो मोहप्रसरकत्वमाह संकल्पेइत्यादिना। जगत्सम्यक् पारमार्थिकरूपेण न पश्यति मरलि
नीपटलावरणवती॥१३॥ इदानीं हामयेरिष्टानिष्टसंकल्पनरूपैर्मलैः॥ उड्डयितुं सर्वजनमोच्या मुनेमसार्गं तु च॥१४॥१५॥ इत्थंगतबाधानिर्दुःखाअपरिच्छिन्नात्मप
दवीनदृष्टा॥१६॥ तेनआत्मपरस्वदर्शनेन जेमसितामहाः॥१७॥ हताशयाः दुर्बुद्धयः इमेमस्तितामहाः। यदिआत्मतत्त्वमज्ञास्यन् तदानापतिष्यन् हेतुहेतुमल्लेलिङ्

संकल्पे कलिता त्वेषा मुग्धमासतया जगत्॥ न सम्यक् पश्यतीदं चिद्दृष्टिः पटलिनी यथा॥१३॥ इदानीं हामयेरं तर्यो चिरावलितामलैः
माहिनो डयितुं शक्ता पंशबद्धे व पक्षिणी॥१४॥ संकल्पकलने नैव ये केचन जना इमे॥ पतिता मोहजालेषु विनेत्रा इव पक्षिणः॥१५॥ संक
ल्पजाललुलितै र्विषयावटपातिभिः॥ पदवीगतबाधेयं न दृष्टमत्तिता महैः॥१६॥ दिनैः कतिपयैरेव स्फुरिताधरणीतले॥ वराकास्तेन
तेनष्टा मशकाः कुहरे ष्विव॥१७॥ यद्यज्ञास्यन्निमे तत्त्वं भोगदुःखार्थिनस्तदा॥ भावाभावांधकूपेषु नापतिष्यन् हताशयाः॥१८॥ इध्या
देयसमुत्थेन द्वंद्वमोहेन जंतवः॥ धराविवरमग्नानां कीटानां समतां गताः॥१९॥ ईहितानीहिताकाराः कलनामृगतृष्णिकाः॥ सत्यावबो
धमेघेन यस्य शांताः स जीवति॥२०॥ कुतः किलैषा स्याः शुद्धाया अविच्छिन्नामलाकृतेः॥ चंद्रिकाया रुचः कृष्णाः कलंकाः कलनाश्रिताः॥२१॥

मिते क्रियातिपत्तौ लृङ्॥१८॥ द्वंद्वमोहेन सुखदुःखशीतोष्णाद्यर्जनप्रतीकाराभिनिवेशेन॥१९॥ सत्यावबोधमेघेन द्वंद्वतापोपशांत्याशांताः सः जीवति सार्थ
कजीवनइतियावत्॥२०॥ सत्यावबोधमात्रेण कथं तच्छांतिरिति चेदसत्त्वादेवेत्याह कुत इति कोष्णाः मंदोष्णाकलंकाः श्यामिका॥२१॥



इदानीमखंडवाक्यार्थसाक्षात्कृत्यतद्भावेन स्थितमात्मानमतिदुर्लभमधिगतं प्रणमान्नमस्यति आत्मनेइति। लोकस्यालोको ज्ञानप्रकाशस्तन्निमित्तम्स्तमणे चिरेणेति
यथाचोक्तं स्वाराज्यसिद्धौ। अपिस्मपरमाणुस्मरिसंख्येषु पर्यातेषु चतुर्मुखेषु लब्ध्वात्। अपदुःखनिरंतसौख्यसिंधोर्न चलाम्भोस्मिपरोनिजात्मलाभादिति॥२२॥
प्रोदितः स्वीयपरमार्थरूपेणाभिव्यक्तः॥२३॥ प्रथमेमह्यं तुभ्यमिति पदे परस्परविशेषणेन शोधनार्थे अनंतरवानंताय। द्वितीये तु अखंडैकरसतालक्षण

आत्मनेस्तु नमो मह्यमविच्छिन्नचिदात्मने॥ लोकालोकमणे देव चिरेणाधिगतोस्यहो॥२२॥ प्राप्तश्चास्मि लब्धोसि प्रोदितोसि चि
राय च॥ उद्धृतोसि विकल्पेभ्यो योसि सोसि नमोस्तु ते॥२३॥ मह्यं तुभ्यमनंताय मह्यं तुभ्यं शिवात्मने॥ नमो देवाधिदेवाय परमाय प
रमात्मने॥२४॥ गतघनपरिपूर्णमिंदुबिंबं गतकलनावरणं स्वमेव रूपं॥ स्ववपुषि मुदिते स्वयं स्वसंस्थं स्वयमुदितं स्ववशं स्वयं न
मामि॥२५॥ मोक्षोपाये उपशमप्रकरणे प्रह्लादात्मोपदेशयोगो नाम सर्गः॥३४॥

वाक्यार्थलाभार्थे। अतएव शिवात्मने देवानां ब्रह्मादीनां सर्वेंद्रियप्राणमनसां चाधिदेवाय अधिष्ठाय प्रकाशकाय॥२४॥ गतघनं निरस्तमेघावरणं परिपू
र्णं इंदुबिंबमिवेति शेषः। स्ववपुषि स्वात्मनि मुदिते आनंदैकरसे स्वयमनन्याधारतया तेन पारमार्थिकरूपेण संस्थं विश्रांतं निराधारमिति यावत् स्वयमु
दितं स्वप्रकाशं स्ववशं स्वाधीनस्वानंदे स्वयमनन्यो अहं नमामि सर्वोत्कर्षेणानानुसंदधे इत्यर्थः॥२५॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे चतु
स्त्रिंशः सर्गः॥३४॥

वा·टी·उप· ॥९९॥ श्री

साक्षात्कृतमिहात्मानं निर्वर्ण्यातः प्रणम्य च॥ तद्धलेनेंगितात्वंधानुसंधायनं रति ॐ मिति ब्रह्म ॐ मिती दं सर्वं एतद्वै सत्यकामपरं चापरं च ब्रह्म यदोंकार इत्यादि
श्रुतेः सर्वाध्यारोपवद्ब्रह्मबोधकः सर्वापवादपरिशिष्टतद्बोधकं ॐ मित्येकस्वरुचितः स्वानुरूपः ॐ मित्येकस्वरुचितः स्वानुरूपः अभिधानाकारो यस्य ज
गती जगत्तत्कृतं यत्किंचित्तत्सर्वं अयं अनुभूयमान आत्मैव॥१॥ देहमात्रांतर्गतो यं कथं बाह्यं सूर्यादि सर्वमिदं स्यादिति चेन्न प्रकाशत्वादित्याह मेदइति॥ नायं मे
दोस्थ्याद्यात्मकदेहपरिमितः किंतु जगती तो यतः सूर्याद्यंतरस्थः॥२॥ कथं तत्प्रकाश्यत्वमात्रेण सर्वं तदात्मकं तत्राह उल्लीकरोतीति॥ यतो दहनादेरुष्णादिस्व

प्रह्लाद उवाच॥ ॐ मित्येको विताकारो विकारपरिवर्जितः॥ आत्मैवायमिदं सर्वं यत्किंचिज्जगतीगतं॥१॥ मेदोस्थिमांसमज्जा
स्रगतीतोपि हि चेतनः॥ अंतरस्थो हि सूर्यादीन्प्रकाशयति दीपकः॥२॥ उल्लीकरोति दहनं रसयत्यम्भसां रसं॥ इंद्रियानु
भवान्भुंक्ते भोगानिव महीपतिः॥३॥ तिष्ठन्नपि हि नासीनो गच्छन्नपि न गच्छति॥ शांतोपि व्यवहारस्थः कुर्वन्नपि न लि
प्यते॥४॥

भावना विरधीनो लसता भावनाधीना अतश्चिदात्मैव सत्तया रहनमुल्लीकरोति एवं रसं जलं स्वसत्तया एवाम्रतैलव्यसनाकं रसयति रसतया विभावयति
एवमन्यान पि इंद्रियानुभवान्स्पर्शादिस्वभावानर्थान्स्वसत्तयैव संपाद्य भुंक्ते॥३॥ तिष्ठन्सदा निष्क्रियोपि न आसीनः उपविष्ट इव धावनादिव्यवहा
रादुपरतः॥ वाय्वादिसाध्यात्मना सदा गतित्वात्॥ तथा कालात्मना सदा गच्छन्नपि कुलालचक्रमिव न तिलामात्रमन्यतो गच्छति॥ शांतो नित्यं व्यवहा
रोपि सर्वव्यवहारस्थः॥४॥

उप· ॥९९॥

नचुरर्वेकृतेनात्मसुखदुःखाभ्यां लिप्यते॥ इदानीमिह कृतेनाग्रे अमुत्र लिप्सते तत्कथं कुर्वन्नपि न लिप्यते इत्युच्यते तत्राह सर्वमिति इहास्मिन्लोके
अमुत्र परलोके उभयत्र इहलोकपरलोकसंधिषु ते सत्प्रसन्ना ने च विहितः शास्त्रानिषिद्धशुभकर्मफलभुक् अविहितः शास्त्रनिषिद्धाशुभकर्म
भुग् अपि सन् सर्वास्तु भोगवृत्तिषु समएवदृश्यैर्भोगैर्हर्षशोकविकाररहित इत्यर्थः॥५॥ भोक्तृत्वाविशेषे भोगैः कथं कर्मणां साफल्यं तत्राह उद्भवतीति॥ वस्तु
तः अभय एवात्मा तत्तत्कर्मानुरूपं स्वयमुद्भवति उद्भूतं च ब्रह्मादितृणपर्यंतं भोक्तृभोग्यभावं नर्दधिकरणानि चतुर्दशभुवनानि चेति जगत्स्व

एवं मद्यतथे दानीमिहामुत्रोभयत्र च॥ विहितो विहितो प्येष समः सर्वासु वृत्तिषु॥५॥ उद्भवत्यभयो भावं भुवनानि ततस्ततः॥ ब्रह्मा
दितृणपर्यंतं जगदावर्तयन्स्थितः॥६॥ नित्यस्पंदमयो नित्यमपि देवात्मदागतेः॥ स्थाणोरप्यक्रियो नित्यमाकाशादप्यलेपकः॥७॥
मनांसि क्षोभयत्येष पवनो वा नीव मारुतः॥ वाहयत्यक्षपंक्तिं स्वामश्वालीमिव सारथिः॥८॥ अतिदुर्विधवद्देहगेहे कर्मरतः स
दा सम्राडिवात्मनि स्वस्थः संस्थितो भोगभुग्विभुः॥९॥ एष एव सदा विष्णुः स्मर्त्तव्योध्यात एवतु॥ जरामरणसंमोहादनेनो
तीर्यगम्यते॥१०॥

सन्निधिमात्रेणावर्तयन्स्थितस्तदेवाप्तकर्मफलमित्यर्थः॥६॥ नन्वस्पंदः कथमावर्तयेत्तत्राह नित्येति नित्यात्मसत्ताया एवस्पंदसत्तात्वान्नित्यं
स्पंदमयः॥ नित्यमक्रियः नित्यमलेपकश्च॥७॥ ननु मन इंद्रियाणि वा देहादिप्रवर्तयति नात्मा तत्राह मनांसीति॥ अक्षपंक्तिमिंद्रियपंक्तिं च॥ अ
त्यंतदुर्विधा दुर्दशा यस्य तद्वत्॥ इवशब्दो दुर्विधाया मिथ्यात्वद्योतनार्थः एवं विरुद्धदृशास्त्वपि योज्यम्॥ अनेन अन्विष्टेनेति शेषः॥१०॥

DR BHAU DAJI MEMORIAL

सुलभः ज्ञानमात्रेण लब्धुं शक्यः सुजेयः स्मृतिमात्रेण वशीकर्तुं योग्यः ११ दूरस्थस्य मित्रादेराकृष्ट्याह्वानाद्वा लाभः ईषद्दूरस्थस्य तु ह्वानमात्रा
देस्य तु ताभ्यामनन्तरमुभयापेक्षेति भावः उपहूतः प्रणवोच्चारणेनानुस्मृतः १२ धनानामीश्वरस्य धनिकस्य यथाध्रयो मानः गर्वः पशवहेलनासं

सुलभश्चायमत्यंतं सुजेयश्चाप्तबंधुवत् । शरीरपद्मकुहरे सर्वेषामेव षट्पदः ॥११॥ अनाकृष्टोऽप्यनाहूतः स्वदेहादेव लभ्यते
मनागेवोपहूतोऽपि क्षणाद्भवति सन्मुखः ॥१२॥ नास्य संसेव्यमानस्य सर्वसंपत्तिशालिनः । धनानामीश्वरस्येव स्मयो गर्वो यथा भ
वेत् ॥१३॥ आमोद इव पुष्पेषु तैलं तिलकणेष्विव । रसजातिष्विवास्वादो देवो देहेषु संस्थितः ॥१४॥ अविचारवशादेव हृदय
स्थोऽपि चेतनः । न ज्ञायते चिराद्दृष्टो दृष्टबंधुरिवागतः ॥१५॥ विचारणापरिज्ञाते एतस्मिन्परमेश्वरे । अभ्युदेति परानंदो लब्धे
प्रियजने यथा ॥१६॥ अस्मिन्दृष्टे परे बंधावुद्दामानंददायिनि । आयांति दृष्टयस्तास्ता यासु भंगो विलीयते ॥१७॥ त्रुट्यंते सर्व
तः पाशाः क्षीयंते सर्वशत्रवः । न कृंतंति मनोऽस्याशा गृहाणीवाखुराखवः ॥१८॥ अस्मिन्दृष्टे जगद्दृष्टं श्रुते तस्मिन्सकलं श्रुतं । स्पृष्टे
चास्मिन्जगत्स्पृष्टं स्थिते तस्मिन्संस्थितं जगत् ॥१९॥

भाव्यते तथास्यनेत्यर्थः १३ कथमयं देहेऽस्ति तत्राह आमोद इति । आस्वादो मधुरं १४ चिरं प्राग्दृष्टः संप्रत्यागतो दृष्टो बंधुः पित्रादिरिव । १५ ॥ १६ ॥ भं
गः मरणादिविच्छेदः १७ पाशाः स्नेहादयः शत्रवः कामादयः । आशास्तृष्णाः १८ तदेकविज्ञानेन सर्वविज्ञानमाह तस्मिन्निति स्थिते तस्मिन्निति तत्स 
त्ताधीनसत्ताकं जगदित्यर्थः ॥१९॥

कामं

एष सुप्तेषु जागर्त्ति कामं पुरुषो निर्मिमाण इति श्रुतिमालंब्याह एष इति । अमहात्मनां परिच्छिन्नात्मकेश्वरोपासकानां आर्त्तानां आपदं हरति वितरति वांछित
मिति शेषः ॥२०॥ जगत्स्थितौ एष आत्मा जीव एव भूत्वा विचरति भोगेषु विलसति वस्त्रालंकारसमाजोत्सवादिवस्तुषु स्फुरति शोभते ॥२१॥ असाधारणजीवा
भेदभ्रमदशायामप्यस्य न साधारणैकात्म्यस्फूर्तिक्षतिरित्याह आत्मनेति ॥२२॥ सर्वोत्तरानुसंधानं चेतना वर्तमानदर्शनं कलना तद्रूपी सः बाह्येष्वाभ्यंतरेषु चे

एष जागर्त्ति सुप्तानां भरत्यविवेकिनां । हरत्यापदमार्त्तानां वितरत्यमहात्मनां ॥२०॥ विचरत्येव लोकेषु जीव एव जगत्स्थितौ । विलस
त्येव भोगेषु प्रस्फुरत्येव वस्तुषु ॥२१॥ आत्मनात्मानमेवांतः शांतेनानुभवन्नपि । स्थितः सर्वेषु देहेषु तीक्ष्णांशं मरिचेष्विव ॥२२॥
चेतनाकलनारूपी स बाह्याभ्यंतराश्रितः । जगत्पदार्थसंभारे सत्तासामान्यमास्थितः ॥२३॥ एष शून्यत्वमाकाशे स्पंद एष सदा
गतौ । प्रकाशश्चैव तेजस्सु पयःस्वेष रसः परः ॥२४॥ काठिन्यमवनावेष मौष्ण्यमेव हुताशने । शैत्यमेष निशानाथे सत्ता चैष ज
गद्गणे ॥२५॥ मषीपिंडे यथा कार्ष्ण्यं शैत्यं हिमकरे यथा । यथा पुष्पेषु सौगंध्यं देहे देहपतिस्तथा ॥२६॥ यथा सर्वगता सत्ता कालः स
र्वगतो यथा । प्रभुशक्तिर्महीपस्य सर्वदेशगता यथा ॥२७॥

तनोपाधिषु आश्रितः । जगत्पदार्थानां संभारे तु अधिष्ठानसत्तासामान्यमात्रस्वभावं सर्वानुगतमास्थितः २३ २४ २५ तथा देहपतिरात्मा देहे प्रकाशत
इत्यर्थः २६ प्रकाशतामेवमनइंद्रियादिव्याहृतां सर्वस्याऽसाधारणीं दृष्टांतैर्दर्शयति यथेति द्वाभ्यां २७

यथैते दृष्टांतास्तथा रूपालोकैः स्वक्षणादिव्यापारैर्मनस्कारैर्मानसव्यापारैश्च युक्तं यद्बाह्याभ्यंतरप्रकाशनं तदात्मनः कृत्स्नमिति प्रकाशैकस्वभावः सदित्यर्थः ॥ सर्वमपि दैवं सर्वदेवानां स्वैर्यैर्ध्यंदृशादीनामपि बोधकोऽयं प्रसिद्धो महादेवः अहमेवास्मीति परेणान्वयः ॥२८॥ अणुना सूक्ष्मतमेन रेणुना ॥२९॥ संभ्रमेण भयकंपादिना ॥३०॥ तुंबकः अलाबुः इवार्थे चकारः ॥ जलधारा इवेत्यर्थः ॥ नः अस्माकं तुंबकाकाशकल्पानामिति भावः ॥ दीपांगानि तैलवर्तिपात्राण्यति

नेवाणु

रूपालोकमनस्कारयुक्तं सत्यं तदात्मनः ॥ नित्यः सोऽयं महादेवो देवानामेव बोधकः ॥२८॥ अयमेवास्मि मे नास्ति कलनापि किलेतरा । रेणुनाव्योम्नि पद्मपत्रमिवांभसा ॥२९॥ संभ्रमेणेव पाषाणे संबंधो मयि नेतरैः । सुखदुःखक्रिया देहे मा पतंतु पतंतु वा ॥३०॥ तुंबकोपरि धाराश्च का नः क्षतिरुपस्थिता । दीपांग्यातिगतो रज्वा नालोको बध्यते यथा ॥३१॥ तथा नायमहं बद्धः सर्वभावगणातिगः ॥ संबंधः कोस्त्कनः [illegible] कामैर्भावाभावैरथेंद्रियैः ॥३२॥ केन संबध्यते व्योम केन संबाध्यते मनः । शरीरे शतधा याते खंडनाकाशरीरिणः ॥३३॥ कुंभे भग्ने क्षते क्षीणे कुंभाकाशस्य का क्षतिः । पिशाचक इवादृश्यो मनो नामोदितं मुधा ॥३४॥ नष्टे तस्मिन्क्षते बोधात्का नः क्षतिरुपस्थिता । सुखदुःखमयी यस्य वासनातन्मनो मम ॥३५॥ अभवत्सर्वमद्यैक संपन्नातनु निर्वृतिः ॥ अन्यो भुंक्तेन्य आदत्ते पान्यस्यानर्थसंकटः ॥३६॥

क्रम्यनिर्गतो दीपालोको यथा रज्वा न बाध्यते ॥३१॥३२॥ संबाध्यते अभिहन्यते ॥ अमूर्तादिति भावः ॥३३॥ कपालशो भग्ने छिद्रीभावेन क्षते मृदवयवे नक्षीणे ॥३४॥ बोधान्मनोऽतिरिक्तात्मदर्शनात् ॥ यस्य सुखदुःखमयी वासना तत्तादृशं मनः ॥ सर्वमज्ञातदशायामभवत नेदानीमस्तीत्यर्थः ॥३५॥ अनुपरिच्छिन्ना निर्वृतिः सुखविश्रांतिः ॥३६॥ 

एषां भोक्त्रादीनामैक्याध्यासलक्षणो मौर्ख्यैकस्थैंद्रजालिकस्य चक्रिका चक्रवत्परिवर्तनचातुरीत्यर्थः ॥ भोक्त्रादिभेदं दर्शयति भुंक्ते इति ॥३७॥ प्रकृत्यादिर्दुष्टः दोषारोपितः आत्मविमर्शनं किंचिन्मौर्ख्यमस्ति तेन क्षतिरित्यर्थः ॥३८॥३९॥४०॥ एता वासनाः ॥४१॥ अज्ञानरिपुणा अवपोथितं हिंसितमिति छेदः ॥ वैक्ल

तं अवबोधितं विज्ञापितं अविवेकसर्व

अन्यः पश्यत्यहो मौर्ख्यैकस्थेयं खलु चक्रिका । भुंक्ते प्रकृतिरादत्ते मनो देहस्य संकटः ॥३७॥ दुष्टात्मा मौर्ख्यमस्तीह न किंचित्केवलेक्षतिः ॥ न मे भोगस्थितौ वांछा न च भोगविवर्जने ॥३८॥ यदा याति तदा यातु यत्प्रयाति प्रयातु तत् ॥ सुखेषु मम नापेक्षा नोपेक्षा दुःखवृत्तिषु ॥३९॥ सुखदुःखेन्युपायांतु यांतु वाप्यहमेषु कः । वासना विविधा देहे लसंतोदयमेत्य वा ॥४०॥ प्रयांतु नाहमेतासु न चैता मम काश्चन । एतावंतमहं कालमज्ञानरिपुणा हतः ॥४१॥ हत्वाविवेकसर्वस्वमेकांतमवबोधितं । विवेकेन प्रसादेन स्वयमुत्थेन चारुणा ॥४२॥ इदानीं संपरिज्ञाय मयैष परिमोषितः । अहंकारपिशाचोयं शरीरतरुकोटरात् ॥४३॥ परावबोधमंत्रेण मयेदानीमपाकृतः । निरहंकारयक्षोयं मच्छरीरमहाद्रुमः ॥४४॥ पुण्यतामसमायातः प्रफुल्ल इव राजते । प्रशांतमोहदारिद्र्यो दुराशादोषसंक्षये ॥४५॥ विवेकधनसंभ्रान्तस्थितोस्मि परमेश्वरः । ज्ञातं ज्ञातव्यमखिलं दृष्टं द्रष्टव्यदृश्यं ॥४६॥ तत्प्राप्तमधुना मेनना प्राप्तमवशिष्यते । दिष्ट्याद्दूरोज्झितानर्थामपेतविषयोरगां ॥४७॥ संशांतमोहनीहारां शांताशामृगतृष्णिकां । रजोरहितसर्वांगशीतलोपशमद्रुमम् ॥४८॥

वेन प्रसादेनानुग्रहेण मे अविवेकसर्वस्वं हत्वा एकांतं निभृतं केवलस्वभावं ब्रह्म अवबोधितं ॥४२॥ परिमोषितः अपहारितः ॥४३॥ इदानीं मच्छरीरमहाद्रुमः निर्गतः अहंकारयक्षो यस्मात्तथाविधः सन्पुण्यतामायातः ॥४४॥४५॥ विवेकधनसंभारसंप्राप्त्यातिशेषः ॥४६॥४७॥४८॥

विस्तोस्तस्याप्रणत्या विज्ञस्याप्रार्थनया च वरमुखेन लब्धः ॥४९॥ ५०॥ विभोः प्रसादाद्धुतं आत्मा संस्मृतिमागत इति सर्वेणान्वयः ॥ इंद्रियेत्यादेरहं समवमोषित इति चतुर्थेनान्वयः ॥ इंद्रियाण्येवोरगगर्ताः सर्पबिलानि यस्मिन् एवमुत्तरत्रापि बहुव्रीहयः ॥५१॥ वासनावनजालके स्थितिसर्वसंभ्रम्यंतानां विशेष्यं ॥५२॥ दुः खान्येव दावाग्निदाहा यत्र दुःखदावाग्नयइव हारिणः परधनप्राणापहारिणस्त्रीरायत्र पातोत्पातनस्य हेतवो विपुलं पद्दशालक्षैः मज्जनप्रायै रघोगतिभिरु

प्राप्तोऽस्मि विततां भूमिमुन्नतां पारमार्थिकीम् ॥ स्फुरत्या प्रणत्या विज्ञस्या शमेन नियमेन च ॥४९॥ लब्धोऽयं भगवानात्मा दृष्टश्चाधिगतः स्फुटं ॥ अहंकारपराजीतश्चिरात्संस्मृतिमागतः ॥५०॥ स भावाद्भगवानात्मा विभोर्ब्रह्म सनातनः ॥ इंद्रियोरगगर्तेषु मरणश्वभ्र भूमिषु ॥५१॥ जराक्षाकरं जकुंजेषु कामकोलाहलेषु च ॥ वासनावनजालेषु जन्मकूपांतरेषु च ॥५२॥ दुःखदावाग्निदाहेषु दुःखदावाग्निहारिषु ॥ पातोत्पातदशालक्षैर्मज्जनोन्मज्जनभ्रमैः ॥५३॥ आविर्भावतिरोभावैराशापाशविचेष्टनैः ॥ अहं चिरमहंकार द्विषा सम्यग्विमोषितः ॥५४॥ निशायामल्पवीर्यात्मा पिशाचेनेव जंगले ॥ स्वयमेव त्वथेदानीं क्रियाशक्त्या स्वयैव हि ॥५५॥ शौरि णाव्यपदेशेन विवेकश्रीर्विबोधिता ॥ प्रबुद्धे भवतीशाने तमहंकारराक्षसं ॥५६॥ नश्यामि न प्रदीपे ज्वलिते तिमिरं यथा ॥ त १

२ स्याहंकारपक्षस्य मनोविद्वेषवासिनः ॥५७॥ दीपस्येव प्रशांतस्य न वेद्मि गतिमीश्वर ॥ दृष्टस्त्वं सत्पीशाने पलायनपरायण ॥५८॥

न्मज्जनप्रायैः सहगतिभिः ॥५३॥ अहं चिरं अहंकारलक्षणेन द्विषा सम्यग्विमोषितः आत्मप्रमोषेण पीडितः ॥५४॥ शौरिणाव्यपदेशेन प्रसन्नविष्णुव्याजेन स्वयं स्वेनैव विवेकः श्रीः प्रबोधिता उद्दीपिता ॥ तथा विवेकक्रियाईशाने ईश्वरे स्वात्मनि प्रबुद्धे भवति प्रबुद्धे सति ॥५५॥५६॥५७॥५८॥



---

अस्ततः अज्ञानात्स्वागम्युत्थिते संप्रति गते सति ५९ निर्गतः गोनसः अजगरो यस्मात्तथाविधो द्रुमः वृक्षवान् आरामइव वृक्षश्चाद्वृक्षवा चकान्मत्तभैघु दुम्यां मइति प्रत्यलयः ॥६०॥ तस्करेणात्मापमोषकेणाहंकारेण ६१ शांतदावः निर्वाणदवाग्निः अचलः पर्वत इव ॥६२॥ को आधयो मानसव्यथाः

संपन्नोऽमरहंकार चौरः सूर्योदये यथा ॥ अस्तमभ्युत्थिते तस्मिन्नहंकारे पिशाचवत् ॥५९॥ गते तिष्ठाम्यहं स्वस्थो निर्गोनस इव द्रुमः ॥ शाम्यामि परिनिर्वामि जगत्यस्मिन्प्रबोधवान् ॥६०॥ तस्करेणोज्झितो स्वामी चिरोदयः ॥ शैलमभ्यागतोऽस्म्यंतः शांता शाम्यगत्सलिक ॥६१॥ प्रावृडंबुभरस्यातः शांतदावइवाचलः ॥ समार्जितेहमित्यस्मिन्पदे स्वार्थविचारतः ॥६२॥ को मोहः कानि दुःखानि काः कदाशाः क आधयः ॥ नरकस्वर्गमोक्षादि भ्रमाः सत्यमहंकृतौ ॥ मितावेव प्रवर्तंते चित्ते हानन प्र २ तिभिरितोऽस्मि+

स्तो ॥६३॥ अहंकारकलापिते चित्ते ज्ञानचमत्कृतिः ॥ न राजते भ्रुकेऽम्लाने यथा कुंकुमरंजना ॥६४॥ निरहंकारजल १ दे त्यक्तासारविवर्जिते ॥ भाति चित्तशरद्व्योम्नि स्वच्छता कांतिशालिनी ॥६५॥ निरहंकारपंकाय सुप्रसन्नांतरात्मने ॥ महा मानंदसरसे तुभ्यमात्मन्नमो नमः ॥६६॥ शांतेंद्रियोग्रग्राहाय क्षीणचित्तोर्मये बृहन्महे ॥ आनंदांबुधये तुभ्यं महत्त्वमात्मन्नमो नमः ॥६७॥ गताहंकारमेघाय शांताशादावबृहद्ये ॥ महत्त्वमानंदशैलाय विश्रांतात्मन्नमो नमः ॥६८॥

परलोकदुःखादिचिंतयाकुतो नाधावस्तस्माहं नरकेति ॥६३॥ ननु सत्स्वेवाहंकारैर्ति ॥ अहंकारकलालक्षणे पित्ते पिचजे न्मादे सति ॥६४॥ इदानीं शरद्व्योमादिना भावेनात्मानं रूपयन्नमस्यति निरहंकारेत्यादिना कांतिशालिनी स्वच्छता ज्ञाननैर्मल्यं ॥६५॥ मद्यं मत्यगात्मन्सतायत तुभ्यं प्रसक्तेरेवमग्रेपि ६६ ६७ ६८

मोहादिप्रशमचमत्कृतिः किं नस्यात्त तत्राहअहंकारे

विश्रांताय अचलाय ॥ ६८ ॥ सततप्रसृतत्वप्रसरणाया मानसाय देवसरसे ॥ ६९ ॥ संविदाभासो बुद्धितद्वृत्तिप्रतिबिंबचैतन्ये एव पक्षौ यस्य ॥ ७० ॥ कलाभिः प्रतस्माज्जायते प्राणो मनः सर्वेंद्रियाणि चेति श्रुत्युक्ताभिः सप्तदशभिः षोडशकलः सोमः पुरुष इति श्रुतिदर्शिताभिर्वा चंद्रपक्षे तु प्रसिद्धाभिः निष्कलाय निरवयवाय चंद्रपक्षे कलाव्यतिरिक्तदेवतात्मने ॥ ७१ ॥ चित्सूर्ये प्रसिद्धसूर्यात्सदोदितायेत्यादिविशेषणैर्विशेषो दर्शितः ॥ शांताय अतापकाय ॥ अ

प्रक्षुब्धानंदपद्याय शांतचिंतामयोर्मये ॥ मत्स्यसन्मानसायात्मन् तुभ्यमंतर्नमो नमः ॥ ६९ ॥ संविदाभासपक्षाय पद्मकोटरशायिने ॥ सर्वमानसहंसाय स्वात्मने ते नमो नमः ॥ ७० ॥ कलाकलितरूपाय निष्कलायामृतात्मने ॥ सदोदिताय पूर्णात्मन् शशिने ते नमो नमः ॥ ७१ ॥ सदोदिताय शांताय महाहृद्ध्वांतहारिणे ॥ सर्वगायाप्यदृश्याय चित्सूर्याय नमो नमः ॥ ७२ ॥ अस्नेहस्नेहदीपाय वृत्तिनिष्क्रांतवर्तिने ॥ स्वभावाधारधीराय चिद्दीपाय नमो नमः ॥ ७३ ॥ मदनानलसंतप्तं शांतेन मनसा मनः ॥ मग्नमंतर्मयातसमयसेवबलादयं ॥ ७४ ॥ इंद्रियैरिंद्रियं छित्वा छित्वा च मनसा मनः ॥ अहंकृतिमहं कृत्वा छित्वा शेषो जयाम्यहं ॥ ७५ ॥

दृश्याय दृश्यविलक्षणाय ॥ ७२ ॥ अस्नेहो निस्तैलः स्नेहं परमप्रेमाणं दीपयतीति स्नेहदीपः अथवा पुत्रमित्रधनादिषु स्नेहाः यतयस्तेषां स्नेहेन दीप्यते ॥ सर्ववस्तुस्वभावानां आधाराय धीराय धीप्रकाशाय ॥ ७३ ॥ इदानीं स्वपौरुषं स्वफलमित्याभिर्नरति मदनेत्यादिना ॥ यथा अयमाकार्त्स्न्यायमसंदृशो नतन्मयो भज्यते तथा शांतेन शमादियुक्तेन मनसा मदनानलसंतप्तं मनो मया मग्नमित्यर्थः ॥ ७४ ॥ प्रत्यक्प्रवणैरिंद्रियैश्चक्षुरादिना पराक्प्रवणं तदेव छित्वा एवं मनोहंकारयोरपि बोध्यं ॥ शेषोऽवशिष्टश्चिन्मात्रोहं ॥ ७५ ॥



भावेन श्रद्धया अभावमश्रद्धां ॥ ऊहापोहवती बुद्धिः प्रज्ञा तया अविचारसंदेहादिलक्षणामप्रज्ञां अज्ञः ज्ञातृत्वाभिमानशून्योऽज्ञः ज्ञप्तिमात्रस्वभाव एव स्थितो स्थितादृशाय ते मह्यं नमः ॥ ७६ ॥ भावेन ग्रस्ताहंभावेन देहाद्यहंभावे गलिते ॥ ७७ ॥ निर्भावं भावनाहेतुबुद्धिशून्यं अनीहितं इच्छाहेतुचित्तशून्यं ॥ स्पंदः प्राणनक्रिया तन्मात्रेण शुद्ध आत्मा यस्य तथाविधो जीवन्मुक्तात्मा तिष्ठति जीवति तथा च श्रुतिः तस्मादेकमेव व्रतं चरेत्प्राण्याच्चैवापान्याच्चेति ॥ ७८ ॥ हेलयैव अनु

भावेनाभावमाछिद्य हित्वा तत्साम्य तत्त्वया ॥ निष्पिष्य प्रज्ञयाप्रज्ञां ज्ञोऽज्ञः संस्थोस्थिते नमः ॥ ७६ ॥ मनसा मनसि छिन्ने निरहंकारतां गते ॥ भावेन गलिते भावे स्वच्छस्तिष्ठामि केवलः ॥ ७७ ॥ निर्भावं निरहंकारं निर्मनस्कमनीहितं ॥ केवलं स्पंदशुद्धात्मन्येतत्तिष्ठति मे वपुः ॥ ७८ ॥ हेलानुकंपितानंतविश्वेशादतिशायिनी ॥ परमोपशमोपेता जातेयं मम निर्वृतिः ॥ ७९ ॥ प्रशांतमोहवेतालो गताहंकारराक्षसः ॥ न कदाशारूपिकोन्मुक्तो जातोऽस्मि विगतज्वरः ॥ ८० ॥ तस्माद्गुणगणं छित्वा मच्छरीरकपंजरात् ॥ न जाने क्व गतोड्डीय दुरहंकृतिपक्षिणी ॥ ८१ ॥ उद्धूलिते घनाज्ञानकुलाये कायपादपात् ॥ न जाने गत उड्डीय क्वाहंभावविहंगमः ॥ ८२ ॥ दुराशादीर्घदौरात्म्यधूसराः भोगभस्मनो ॥ भयभोगिहितादिष्याम्स्वयस्यो वासनाः क्षताः ॥ ८३ ॥

कंपिता भोगैश्वर्यदानेनानुगृहीताः अनंताः स्वभक्ता येन तथाविधाद्विश्वेशाद्धरविष्ण्वादेरप्यतिशायिनी उत्कृष्टा निर्वृतिर्निरतिशयानंदविश्रांतिः ॥ ७९ ॥ रूपिका पिशाची तयोन्मुक्तः अत एव विगतज्वरः ॥ ८० ॥ ८१ ॥ उद्धूलिते ज्ञानाभ्यासपवनेन धूलीकृत्योड्डापिते ॥ ८२ ॥ दुराशाभिः दीर्घैर्दौरात्म्यैः दुष्टदेहाद्यात्मत्वाभिमानैश्च धूसराः मलिनाः भयलक्षणानां भोगिनां सर्पाणां हिताः भयस्यः दुर्वासनाः भोगान् भस्मयतीति भोगभस्मा समाधिस्तेन क्षताः उच्छिन्नाः ॥ ८३ ॥

इदानीं निद्राक्षये स्वप्नदुर्दशामिव प्राक्तनीं अहंकारदशां स्मृत्वा विस्मयते एतावंतमिति चित्रं आश्चर्यं ॥८४॥ अद्य अहं अयं अनुभूयमाननिरतिशयानंदस्वभावो जातः प्रादुर्भूतः यतः यतोऽहं महती अपरिच्छिन्नब्रह्माकारा मतिः साक्षात्कारवृत्तिर्यस्य तथाविधः सन् अहंकारमहाभ्रेण अलं निःशेषं उज्झितो निर्मुक्त इत्यर्थः ॥८५॥ महामतिरित्येतद्विशदयति दृष्ट इति वाक्यप्रमाणेन दृष्टः मननेनाधिगतः समाधौ मनसा ॥ अश्लिष्टः आलब्धः समाध्यनुभू

एतावंतमहं कालं कोऽभूवं चित्रमीदृशं ॥ येनाहमेष मिथ्यैव दृढाहंकारतां गतः ॥८४॥ अद्याहमस्मि जातोऽयमहमद्य महामतिः ॥ अहंकारमहाभ्रेण यत्कृत्स्नेनाहमुज्झितः ॥८५॥ दृष्टोऽयमात्मा भगवांस्तथैवाधिगतो मया ॥ अलब्धश्चानुभूतांगं स्वानुभूतौ नियोजितः ॥८६॥ गतास्पदं गतमननं गतैषणं तिरस्कृतं निपुणमहंकृतिभ्रमैः ॥ निरीहितं व्यपगतरागरंजनं विकौतुकप्रशममिदं गतं मनः ॥८७॥

तश्चांगं स्वदेहमिव मया स्वानुभूतौ नियोजितः ॥ तथा चाहुः देहात्मज्ञानवज्ज्ञानं देहात्मज्ञानबाधकं ॥ आत्मन्येव भवेद्यस्य स नेच्छन्नपि मुच्यत इति ॥८६॥ स्वां प्रतं निर्दोषविक्षेपं स्वमनः प्रशमं गतमित्याह गतास्पदमिति ॥ गतास्पदं निर्विषयं विषयाणां मननाद्वित्तैषणा प्रसिद्धे तिरस्कृतो छित्यागतमननं गतैषणं च निपुणं नियतं तिरस्कृतं निराकृतं उज्झितमिति यावत् ॥ अत एव निरीहितं ॥ निश्चेष्टं कौतुकभोगोत्कंठा तद्रहितं ॥ अत एव निरंकुशनानिवक्प्रशमं गतमित्यर्थः ॥८७॥



DR. BHAU DAJI MEMORIAL

मनः प्रशमादेव सर्वापन्निवृत्तिं निरतिशयानंदात्मावाप्तिं च वदन्नुपसंहरति ॥ दुरुत्तरा इति ॥ प्रभवनानि ॥ नानायोनिजन्मपरंपराः दीर्घदोषाः कामलोभमोहादयस्तत्प्रदाः ॥ समाश्चिरकाले एकरूपदुःखाः विषमाः प्रतिक्षणविचित्रदुःखाः महापदः क्षयं गताः चिरद्भुयः महेश्वरः पूर्णानंदात्मा समधिगतः प्राप्तः ॥ तत्कुतः यतः अंतरे प्रत्यगात्मन्यचित्त्वं अज्ञानजाड्यं ज्ञानेनापगतं बाधितमित्यर्थः ॥८८॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे पंचत्रिंशः सर्गः ॥३५॥ आत्मानं दुर्लभं प्राप्य प्रह्लादः प्रणमन्नमुं ॥ स्तौति नंदति कांते वकांते नरमते रहः ॥ सर्वेभ्यो मानुषानंदादिहैरण्यगर्भां

दुरुत्तराः समविषमा महापदः सुदुःसहाः प्रभवनदीर्घदोषदाः ॥ गताः क्षयं समधिगतो महेश्वरश्चिरद्भुयोऽपगतमचित्त्वमंतरे ॥८८॥ मोक्षोपाये उपशमप्रकरणे ब्रह्मतात्मलाभचिंता नाम सर्गः ॥३५॥ प्रह्लाद उवाच ॥ आत्मा सर्वपदातीतश्चिरात्स्मृत्यिमागतः ॥ दिष्ट्या लब्धोऽसि भगवन्नमस्तेऽस्तु महात्मने ॥१॥ अभिवंद्याथ चालोक्य चिरमालिंगिमं मया ॥ कोऽन्यः स्यात्त्वदृते बंधुर्भगवन्भुवनत्रये ॥२॥ हंसि पासि ददासि त्वं स्तौषि यासि विवल्गसि ॥ अयं प्राप्तोऽसि दृष्टोऽसि किं करोषि क्व गच्छसि ॥३॥ ग

तेभ्यः पदेभ्यः सुखोत्कर्षस्थानेभ्योऽप्यतीतः निरतिशयानंदरूपः आत्मा प्रत्यक् महात्मने अपरिच्छिन्नस्वभावाय ॥१॥ चिरं आलिंग्य सेक्षीरोदकवत्समरसस्त्या समाधावनुभूय से बंधुः परममित्रमन्यः ॥२॥ यावन्न प्राप्तो न दृष्टश्च तावत्त्वं भूत्वा अभक्तान् हंसि भक्तान्पासि उपासनफलं अभिराराधितो ददासि स्तावकादिरूपेण स्तौषि गंतृरूपेण यासि सर्वरूपेण च विवल्गसि व्यवहरसि ॥ मया तु अयं नित्यापरोक्षस्वभावः प्राप्तो दृष्टश्च अतः परं मा प्रति किं करोषि क्व वा गच्छसि न त्वयेदानीं मन्यतो गंतुं किं विल्कर्तुं वा शक्यमित्यर्थः ॥३॥

वा॰टी॰उ॰प॰ ॥१०५॥

विश्वेभ्यो जनेभ्यो हित विश्वजनीना ॥४॥ अंतरं अंतर्द्योयकमज्ञानं अम्ब इति शेषः ॥ अद्य तन्नाशाद् दूरमत्यंतभेदलक्षणमतिसामीप्यं संपन्नं ॥५॥ संसारलक्षणं अ-
णस्य पर्णस्य वृंताय ॥६॥ विबुधनाथाय इंद्ररूपाय ॥७॥ वाच्यवाचकदृष्ट्या व्यवहारदृष्ट्या आरोप्य व्यवहारो द्वयोर्हि भिदा च ॥८॥ अनंतया कल्पनयेति शेषः नित्य
पात्रप्रवाहाद्या ॥९॥ आदौ सृज्यपदार्थानां दृष्ट्रे ततः स्रष्ट्रे सृष्ट्वा च अनंतरूपैर्विकाशिने अत एव सर्वभावाय अधिष्ठानतया सर्वगात्मने ॥१०॥ एतावंतं कालं म
द्रूपेण त्वमेवमच्छंदानुवर्तना छन्नांतरे इदानीं त्वमेवं त्वं विश्रांतये लब्धः इत्याह ॥ प्रति जन्मेति मया मद्भावापन्नेन जीवेन अम्ब तेन त्वया स्वकामादिदोषानु

समस्ताश्रिताशेषविश्वविश्वजनीन भो ॥ सर्वत्र त्वमसि नित्यमधुनाहं पलायसे ॥४॥ आवयोरंतरं अम्ब रिजन्मव्यवहितांतरं ॥ अद्य दूरम
घ संपन्नं दिष्ट्या दिष्टोसि बांधव ॥५॥ नमस्ते कृतकल्याय कर्त्रे भर्त्रे नमोस्तु ते ॥ नमः संसारवृंताय नित्याय विमलात्मने ॥६॥ नमश्च
क्राब्जहस्ताय नमश्चंद्रार्द्धधारिणे ॥ नमो विबुधनाथाय नमस्ते पद्मजन्मने ॥७॥ वाच्यवाचकदृष्ट्यैव भेदो यो यमिहावयोः ॥ अमस्या
कल्पनैवेषा वीचिवीच्यंभसोरिव ॥८॥ त्वमेवानंतयानंतवस्तुवैचित्र्यरूपया ॥ भावाभावविलासिन्या नियत्यैव विजृंभते ॥९॥ नमो
दृष्ट्रे नमः स्रष्ट्रे नमोनंतविकाशिने ॥ नमः सर्वस्वभावाय नमस्ते सर्वगात्मने ॥१०॥ प्रतिजन्म चिरं बद्धो दीर्घदुःखवतामया ॥ त्वया मयोप
८ श्री दिष्टेन दग्धेनापहतो जनः ॥११॥ आलोकितालोकदृशो दृष्टांतदृष्टयः ॥ न प्राप्तस्त्वयानेन किंचिदासादितं भवेत् ॥१२॥

मारेणोपदिष्टेन सन्मार्गेण आत्मवृत्ता दग्धेन अतः स्वापहतो जातिरोहितेश्वरभावेन त्वया लोकदृशः ऊर्ध्वाधोमध्ये लोकसंचारभ्रमास्तेषु विवेकानुकूल
दृष्टांतदृष्टयश्च आलोकिताः ॥ ततस्माद् इहलोकदर्शनात् त्वं त्वया न प्राप्तः ॥ अनेन लोकत्रयदर्शनेन च किंचित्स्वल्पमपि पुरुषार्थरूपमासादितं राम ॥१०५॥
न भवेत् ना अम्ब इति द्वयोरर्थः ॥११॥ १२॥

कुतो नाम्ब तत्राहं सर्वं चेति ॥ नाभिवांछति पुरुषार्थेच्छापूर्णो भवति तत्राहं शंबलस्त्वदंते त्वां विना इह जगति अन्यः न्यास्ती त्यर्थः ॥१३॥ नमुल्लसि भोहंसितीर्णो
सीति यावत् ॥१४॥ कथमहं दृष्ट इति चेत् आरूणादि सर्वं इति प्रभारूपेण प्रतिबोधविदितं गतमिति शिक्षतिदर्शितो पाये नेत्याह यइति ॥ चक्षुर्द्वारांतःकरण
स्य घटादिदेशनिर्गमने तत्स्वच्छिन्नचैतन्यात्मा अक्षिकनीनिकारश्मिजालत्वेप्रोतवपुः स्थित इत्यर्थः ॥ एवमग्रे पूर्वं ॥१५॥ त्वक्स्पर्शनो स्पारिकं च स्प
शनस्पार्शनं इत्याव्या भुवन् ॥ यथा तिलेंतर्गतं तैलं तिलसंयुक्तपुष्पगंधमंतःकरोति गृह्णाति तद्वत्स्पर्शं शीतादि ॥ अंतःकरोति व्याप्य प्रकाशयति

सर्वं मृत्काष्ठपाषाणवारिमात्रमिदं जगत् ॥ नेहास्ति त्वदृते देव यत्रासौ नाभिवांछति ॥१३॥ देवो यमद्य लब्धोसि दृष्टोस्यधिगतोसि च ॥ संप्रा
प्तोसि गृहीतोसि नमस्ते स्तान्नमुल्लसि ॥१४॥ योक्ष्णोः कनीनिकारश्मिजालप्रोतवपुः स्थितः ॥ देव दर्शनरूपेण कथं सोत्र न दृश्यते ॥१५॥
यस्त्वक्स्पर्शस्पर्शनं सर्वगं धत्ते तैलं तिले यथा ॥ स्पर्शमंतःकरोत्येष स कथं नानुभूयते ॥१६॥ यः शब्दश्रवणादंतः शब्दशक्तिपरामृशन् ॥ रा
मं च जनयत्यंगे स हृत्स्थः कथं भवेत् ॥१७॥ जिह्वापल्लवलग्नानि स्वादितस्याग्रतोपि वा ॥ स्वदते यः स्ववस्तूनि स्वदते स न कस्य च ॥१८॥
पुष्पगंधानुपादाय घ्राणं हस्तेन देहकं ॥ य आलोकयति प्रीत्या कस्यासौ न करे स्थितः ॥१९॥ वेदवेदांतसिद्धांततर्कपौराणगीतिभिः
योगीतः स कथं त्वात्माविज्ञातो याति विस्मृतिं ॥२०॥ सेवे देहदेहभोगालीसुभगापीयमद्य मे ॥ अंतर्न स्वदते स्वच्छे त्वयि दृष्टे परावरे ॥२१

॥१६॥ शब्दशक्तिं गानकाव्यादिगुणचमत्कारं ॥ परामृशन् ॥१७॥ वस्तूनि मधुराम्लादीनि अग्रतः पुरस्तादेव स्वादितस्य स्वास्वादिकभ्रमविषयस्य स्वदंते स्व
दते स्वात्मना स्फुरति ॥१८॥ घ्राणहस्तेन हस्तवदुपपादानकरणेन घ्राणेन कं देहकं तस्य जः पुष्पाणां गंधानुपादाय मालालंकृतं स्वदेहकं आलोकयति
प्रत्यक्षकरे स्थित इव स्फुटं प्रत्यक्ष इत्यर्थः ॥१९॥ २०॥ ॥२१॥

येन सूर्यस्तपति तेजसेद्धः इत्यादिश्रुतिदृशा व्याहरत्वयेति॥ २२॥ द्युचरा नक्षत्रादयः। धीरा निश्चला। अंबरं अवकाशदं॥ २३॥ दिष्ट्या भाग्येन अहं त्वं त्वमहमिति व्यतिहारेण भेदो दृढीकृतः॥ २४॥ इदानीमखंडार्थे प्रमाणतया संपन्नावहं त्वंशब्दौ नमस्यति अहमिति॥ त्वस्य स्यमहात्मनः बोधने पर्यायाभ्यां तत्कारणोपाधिविशिष्टस्ववाच्यार्थस्य ममकार्योपाधिविशिष्टस्ववाच्यार्थस्य वा शाखावदेशभूताभ्यां उपाधिभ्यां भेदकल्पनात्संयुक्ताभ्यां स

त्वया विमलदीपेन भानुः प्रकटतां गतः। त्वया शीततुषारेण चंद्रः शिशिरतां गतः॥ २२॥ त्वयैते गुरवः शैलास्त्वयैते द्युचरा धृताः। त्वयेयं धरा धीरा त्वयैवांबरमंबरं॥ २३॥ दिष्ट्या मत्तामसि प्राप्तो दिष्ट्या त्वत्तामहं गतः। अहं त्वं त्वमहं देव दिष्ट्या भेदोऽस्ति नावयोः॥ २४॥ अहं त्वमपि शब्दाभ्यां पर्यायाभ्यां महात्मने। त्वत्वाममत्वाशाखाभ्यां संयुक्ताभ्यां नमो नमः॥ २५॥ नमो मह्यमनंताय निरहंकाररूपिणे। नमो मह्यमरूपाय नमः समसमात्मने॥ २६॥ मय्यात्मनि ममेऽस्म्यस्मिन्साक्षिण्येते निराकृतौ। दिक्कालाद्यनवच्छिन्ने स्वात्मन्येवेह तिष्ठसि॥ २७॥ मनः प्रक्षोभमायाति स्फुरंतींद्रियवृत्तयः। शक्तिरुत्क्रमति स्फारा प्राणापानप्रवाहिनी॥ २८॥ वहंति देहयंत्राणि कृष्टान्याशावरत्रया। चर्ममांसास्थिदिग्धानि मनःसारथिमंति च॥ २९॥

मानाधिकरण्येनान्विताभ्यां अहं त्वमिति शब्दाभ्यां नमो नम इत्यादरादभ्यासः। द्वौ वा शब्दौ शाखाद्वयसंबंधयोर्मिथ्यात्वद्योतनार्थौ॥ २५॥ इदानीमखंडार्थं प्रत्यक्प्राधान्येन प्रणम्य तस्यैव ब्रह्मतां दर्शयति। नम इत्यादिना॥ २६॥ हे ब्रह्मन् त्वं मय्यात्मनि प्रत्यक्स्वभावएव तिष्ठसि न कदाचित्पराग्भाव इत्यर्थः॥ २७॥ तत्कुतो ज्ञातं तत्राह मन इति॥ केनेषितं पतति प्रेषितं मन इत्यादिश्रुतिदर्शितेन मनःप्रभृतीनां अयस्कांतवत्प्रवर्तकत्वेन ज्ञातमित्यर्थः॥ २८॥ २९॥ राम॰ १०६

---

तर्हि त्वं किं प्राणनादिशक्तिरुत देहकृतास्पदोऽहंकारादिर्वा नेत्याह अयमिति। अयमहं संविद्रूपुरेव न तु काचिच्छक्तिर्नापि देहकृतास्पदः। तर्हि तौ किं देहेनेति चेन्न किंचिदित्याह देह इति॥ ३०॥ उपशमं याति भ्रम इति शेषः॥ ३१॥ संसारगमितात्संसारभ्रमणशीलत्वात्। एतावत्कालं संसारवर्त्मनि श्रांतोऽहं संप्रति विश्रांतः॥ ३२॥ ये गुरवो वेदांताश्च त्वां मां मद्रूपमेव प्रवदंति॥ ३३॥ अखिलाः अनंताः संभोगाः प्रकाश्याः यस्यास्तथाविधापि प्रकाश्यदोषदृष्ट्या

रि

अयं सोऽहं तु रहं न काचिन्न कृतास्पदः। देहः पततु वोदेतु यथाभिमतयेच्छया॥ ३०॥ चिरादहमहं जातः स्वात्मलाभश्चिरादयं। चिरादुपशमं याति कल्पस्यांते जगद्यथा॥ ३१॥ चिरात्संसारगमिताद्दीर्घे संसारवर्त्मनि। विश्रांतोऽस्मि चिरं श्रांतः कल्पस्यांत इवानलः॥ ३२॥ सर्वातीताय सर्वाय तुभ्यं मह्यं नमो नमः। तेभ्योऽपि च नमस्तुभ्यं ये मां तां प्रवदंति च॥ ३३॥ अखिलानंतसंभोगा नष्टादोषदृष्टिमितः। जयत्यकृतसंरंभा साक्षिता परमात्मनः॥ ३४॥ आत्मन्पुष्प इवामोदो व्योमस्थापिंड इवानिलः। तिले तैलमिवास्मि त्वं सर्वत्र वपुषि स्थितः॥ ३५॥ अहं स्थितोऽपि चिद्धामसितमवस्फूर्जं स्थितो ह्यसि। अनहंकृतिरूपोऽपि चित्रैयं नवभासितः॥ ३६॥ जयामीश ज्वलद्दीप्तिः सर्वमुन्मीलयञ्जगत्। जयाम्युपरतारंभो जगद्भूयो निमीलयन्॥ ३७॥

निरस्तदृष्टा। न कृतः संरंभः अभिनिवेशो यया उदासीनेत्यर्थः॥ अत एव जयति॥ ३४॥ त्वमेव सर्वभासक इत्याह। आत्मन्निति॥ ३५॥ सर्वकर्तापि त्वमेवेत्याह हंसीति॥ ३६॥ सर्गकाले ईशेन त्वया चिदात्मना ज्वलद्दीप्तिर्बहिरंतश्चार्थप्रकाशनेनोज्ज्वलितोऽहं जीवभावेनानुप्रविश्य नामरूपात्मकं सर्वं जगदुन्मीलयन्व्याकुर्वंस्त्वदात्मनैव जयामि वशीकृत्य पालयामि। प्रलयकाले चाहमुपरतारंभो जगद्भूयः पुनर्निमीलयन्नुपसंहरन्त्वच्चिदात्मनैव जायाम्यभिभवामीत्यर्थः॥ ३७॥

परमाणोरप्यंतः सूक्ष्मस्य दुर्दर्शस्यास्येत्यर्थः ॥ वटत्वं वटव्यक्तिसंवलिता जातिः ॥ ३८ ॥ ३९ ॥ इदानीं स्वयं मुक्तात्माभिन्नाय ब्रह्मात्मने मोक्षोपायमुपदिशति भावना-
मित्यादिना ॥ भूरिभंगानां बहुविधविकाराणां भावानां ॥ असमवायाबाधायासमवायनिरतिशयानंदस्वरूपाविर्भावाय च असंगात्मदर्शनेन भावाभावाभ्यां बहि-
ष्कृतः विविक्तः सन् न द्वावेवं सदा विमुक्तात्मा भवान् पुनर्बंधं प्रतिपद्यसे इत्यर्थः ॥ ४० ॥ तदुपायस्तां सर्वपीठिकामुपदिशति जहीत्यादिना ॥ ४१ ॥ इति विचार्ये

परमाणोस्त्वेवांतः इदं संसारमंडलं । वटत्वं वटधानायां यथास्त्यास्ति भविष्यति ॥ ३८ ॥ हयहिपरथाकारैर्यद्वत्त्वं दृश्यते बुधैः । तदद्यालोकप्र-
मेदेव पदार्थशतविभ्रमैः ॥ ३९ ॥ भावानां भूरिभंगानामसमवायसमवाययोः । भवभावविमुक्तात्मा भावाभावबहिःकृतः ॥ ४० ॥ जहि मानं म-
हाकोपं कालुष्यं क्रूरतां तथा । न महांतो निमज्जंति प्राकृते गुणसंकटे ॥ ४१ ॥ प्राक्तनी दीर्घदौरात्म्यदशा स्मर्तव्या पुनः पुनः । कोऽहं
किं तद्भवेदिति हसन्मुक्ताछटास्थितं ॥ ४२ ॥ ते प्रयाताः समारंभा गतास्ते दग्धवासराः । येषु चिंताऽनलज्वालाकीर्णो भवानभूत
॥ ४३ ॥ अद्य त्वं देहनगरे राजा स्फारमनोरथः । न दुःखैर्ग्रस्यसे नापि सुखैर्व्योमकरैरिव ॥ ४४ ॥ अद्येंद्रियतुरंगांश्च जित्वा जितम-
नोगजः । भोगारिमभिजित्योपंक्तसाम्राज्यमधितिष्ठसि ॥ ४५ ॥ अपारांबरपांथस्त्वमजस्रास्तमयोदयः । अवभासकरो नित्यं बहिरंतश्च भा-
स्करः ॥ ४६ ॥

तिशेषः ॥ मुक्तानां छटाः कणा इव स्थितं सुभ्रं यथा स्यात्तथा हसन् प्राक्तनीं दीर्घदौरात्म्यदशां जहीति पूर्वेणान्वयः ॥ ४२ ॥ ४३ ॥ करैर्मुष्टि-
भिर्व्योमेव ॥ ४४ ॥ ४५ ॥ बहिः अविद्यादृशि अंतः स्वरूपदृशि च यथाक्रममजस्रमस्तमय उदयश्च यस्य अथवा अजस्रमभीक्ष्णं जागतः ॥ अस्तमयो-
दयौ प्रलयसर्गौ यस्मादित्यर्थः ॥ भास्करपक्षे स्पष्टं ॥ ४६ ॥



यद्येवं तर्हि सर्वं चेत्तथा कुतो नावगच्छामि तत्राह सर्वदैवेति ॥ सर्वदा अनादिकालात्सुप्तोऽसि ॥ शक्त्या भोजकादृष्टशक्त्या भोगलोकनलीलार्थं तावन्मात्रं सं-
बोध्यसे न स्वरूपात्मरूपेणेत्यर्थः ॥ ४७ ॥ भोगालोकनलीलामेव विशदयति ॥ दृक्सूक्ष्मद्वाभिरिति ॥ दृश इंद्रियवृत्तयः तद्रूपक्षणाभिः सूक्ष्मद्वाभिर्मधुम-
क्षिकाभेदैः रूपादिलक्षणं मधु स्वोदंत्यादिना तासनस्थया विच्छुरत्त्या ॥ ४९ ॥ योगिनामुत्क्रमणकाले सुषुम्नादिमार्गप्रकाशोऽपि त्वदधीन एवे-
त्याह ब्रह्मांडेति ॥ प्राणापानशब्दाभ्यां तन्निरोधाभ्यासो लक्ष्यते तत्परैर्योगिभिर्ब्रह्मोपलब्धिस्थानत्वाद्ब्रह्मपुरे देहे प्रतिक्षणं अभ्यस्तैर्हृदि सं-

सर्वदैवासि संसुप्तः शक्त्या संबोध्यसे विभो । भोगालोकनलीलार्थं कामिन्या कामुको यथा ॥ ४८ ॥ दृक्सूक्ष्मद्वाभिरुपानीतं द्रागद्रूपम-
धुलया । पीयते स्वीकृतं शक्त्या नेत्रवातायनस्थया ॥ ४९ ॥ ब्रह्मांडकोटराधीनाः प्राणापानपरैस्तव । गतागतैर्ब्रह्मपुरे संप्रेक्ष्यं-
ते प्रतिक्षणं ॥ ५० ॥ देहपुष्पे त्वमामोदो देहे दीपस्ततान्ततोऽरसस्त्वं देहविटपे शैत्यं देहहिमे भवान् ॥ ५१ ॥

पिंडितानां भ्रमणानामुत्क्रमणपरकायप्रवेशलोकांतरसंचारादावनुकूलेन नानानाडीमार्गेषु गतागतैः संचारैर्ब्रह्मांडांतरं गंतुमर्चिरादिमार्गेणास्य यं मंडलं गंतुं
वा ॥ ब्रह्मांडकोटरस्य ब्रह्मरंध्रस्य संबंधिनः अधीनाः सुषुम्नादिमार्गपर्वाणस्तवैव स्वयं ज्योतिषा करणेन संप्रेक्ष्यंते स्फुटं दृश्यंते ॥ हृदयस्या-
ग्रप्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामतीति श्रुतेर्यद्यपि सर्वेषां मरणे नाडीद्वारप्रकाश आत्मज्योतिरधीन एव तथाप्ययोगिनां पीडापारव-
श्यादिना तदवधानाशक्तेर्योगिनां चाभ्यासकाले मरणकाले च सावधानत्वात्त एवोदाहृताः ॥ ५० ॥ कृतं परमार्थसत्यस्य तस्य तद्देहलक्षणे विटपे शाख-
यां रागादिपदत्रयो क्रमनिमित्तस्म्रतोरसः ॥ ५१ ॥

वा॰टी॰७१॰ ॥३॰५॥

सर्वप्राणिनां शरीरस्य यस्यागर्वस्य निमित्तम् अतः स्नेहो योस्ति शरीरलक्षणस्य सर्पिषि घृतवत् तथा रसः त्वय्येवास्ति त्वया देहाभिमानत्यागे स्नेहादर्शनादि त्यर्थः ॥५१॥ अनुत्तमस्वादः अतिमधुरः अमृतस्वरूपमिति यावत् तेजसां सूर्यादीनां आधिदैवं प्रकाश्यप्रकाशनिमित्तं ॥ अथवा त्वं च भासां वस्तु रादिकरणानाम् अवभासकः ॥५२॥ वायूनां प्राणानां स्पंदयतीति स्पंदः मनो लक्षणस्य हस्तिनो मदः एव भ्रांतिनिमित्तं तैक्ष्ण्यमौष्ण्यं निमित्तं ॥ ५३ ॥

त्वय्यस्ति विस्मयस्नेहः शरीरक्षीरसर्पिषि ॥ त्वमंतरस्य देहस्य दारुण्यग्निरिव स्थितः ॥५१॥ त्वमेवानुत्तमास्वादः प्रकाशं तेजसामपि ॥ अवगंता त्वमर्थानां त्वं भासामवभासकः ॥५२॥ स्पंदस्त्वं सर्ववायूनां त्वं मनोहस्तिनो मदः ॥ प्रज्ञानलशिखायास्त्वं प्राकाश्यं तैक्ष्ण्यमेव च ॥५३॥ त्वद्दृशादियमास्ती यावाचा मं प्रविलीयते ॥ दीपवत्सुनरन्यत्र समुदेति कुतोपि सा ॥५४॥ त्वयि कंचसारवर्तिन्यः पदार्थावल्लयस्तथा कटकांगदकेयूरसुक्तयः कनके यथा ॥५५॥ भवानयमहं त्वं च शब्दैरेवमादिभिः ॥ स्वयमेवात्मनात्मानं लीलार्थं स्तौषि वक्षि च ॥५६॥ मंदानिलविनुन्नोर्व्योगजाश्वनरदृष्टिभिः ॥ यथा संलक्ष्यते व्योम्नि तथा त्वं भ्रांतदृष्टिभिः ॥५७॥ यथा हयगजाकारैर्ज्वालाजालमतिव्रहिष्णु ॥ तथैवाव्यतिरिक्तैस्त्वं दृश्यसे भुविसृष्टिषु ॥५८॥

वाचा वाणी आपंचैव हलंतानामिति भागुरिमते टाप् त्वद्दृशात्स्योपसंहारात् संप्रविलीयते उपशाम्यति मरणसुषुप्त्यादौ स्वप्नेषु अन्यत्र देहांतरे ॥५४॥ पदार्थवल्लयः समुद्यंतीति विपरिणामेनानुषज्यते ॥५५॥ त्वय्येव स्वात्मनि भवदादिशब्दैर्व्यवहारः क्रियते नत्वतोन्योस्तीत्याह भवानिति स्तौषि गुणैः वक्षि अन्यत ॥५६॥ अब्दो मेघः ॥५७॥ प्रत्येकं ज्वलत्सु काष्ठेषु कांसाचित ज्वालानां हयाद्याकारतापि कदाचिद्दृश्यते ॥५८॥ राम॰ ॥१॰५॥

---

ब्रह्मांडलक्षणानां मुक्ताफलानां ॥ जललोतेन आवरणाभ्यां वाकविकेन वन्नेलतेन साम्यात् ॥५९॥ सेन्त्रत्वमुपपादयति ॥ त्वया अनभिव्यक्तं अनर्ष्टा सत्या अंअ विद्याबीजं तस्या नास्त्यपदार्थानां तत्तत्स्मरिद्धत तत्स्वरूपं संसर्गेण प्रकाश्यते यथा पक्वापाकेन मांसानां स्वादवेदनं आस्वादनार्हास्वादुता प्रकाश्यते तद्वत् ॥६०॥ एवं चित्प्रकाशेनाकल्पितं सदप्यसत्वाप्यमेवेत्याह ॥ विद्यमानेति ॥ वनितासंबंधिनी रूपलावण्यसत्तेव ॥६१॥ अन्या वर्जितं अर्थक्रियाशक्त्या अननुरुद्धां सत्तातीतमपि न सत्तायै अर्थक्रियायै समर्थमित्यर्थः ॥ मुकुरादर्पणात्मि मिन्नात्म तिबिंबितं सलावण्यं यत्स्वमुखसौंदर्यं कांतानां चुंबनाधरस्वाद

त्वं ब्रह्मांडकमुक्तानामच्छिन्नसंतुराततः ॥ सेव्यं त्वममृतमस्यानां चित्रसायनसेवितं ॥५९॥ असत्तदनभिव्यक्तं पदार्थानां प्रकाश्यते ॥ तया तत्त्वं यथा पक्त्या मांसानां स्वादवेदना ॥६०॥ विद्यमानापि वस्तुश्रीर्न स्थिता त्वयि न स्थिते ॥ वनितारूपलावण्यसत्तेवाजतचक्षुषः ॥६१॥ सदपीह न सत्तायै वस्तु नावर्जितं त्वया ॥ न मयेन सलावण्यं मुकुरात्प्रतिबिंबितं ॥६२॥ त्वां विना देहः काष्ठलोष्टसमः स्थितो ॥ सन्नपसन्न्यगेहाय श्यामास्विव रविं विना ॥६३॥ सुखदुःखक्रमः प्राप्य भवंतं परिणश्यति ॥ प्राकाश्यं मांसादपथा तमस्ते जोथवाहिमं ॥६४॥ त्वदालोकनयैवैते स्थितिं यांति सुखादयः ॥ सूर्यालोकनया प्रातर्वर्णाः शुक्लादयो यथा ॥६५॥ लब्ध्वात्मानो विनश्यंति संबंधक्षण एव ते ॥ नेत्रमांसीवदीपस्य दृष्ट एव ब्रजत्यलं ॥६६॥

नाद्यर्थक्रियाप्रयुक्तत्वम् अथवा उपशमापनालमित्यर्थः ॥६२॥ नगस्य गिरेर्वृक्षस्य वो प्याय औन्नत्यं सन्न विद्यमानो प्यभानादसन् असत्काशः ॥ श्यामासु तमिस्रासु ॥६३॥ प्राप्य साक्षात्कृत्य स्वप्रकाश स्वयंप्रकाशं ॥ तेजो दीपकस्य यादिप्रभा ॥६४॥ यतस्त्वदालोकनयैव लब्ध्वात्मानः स्तिसुखादयः अतश्चरमक्षणात्कोर्हस्यात् तत्र संबंधक्षण एव ब्रजंत्यपगच्छंतीति नो पायांतरेणेत्यर्थः ॥६५॥६६॥

दीपस्य असत्तां अविद्यमानतां स्फुटतां गतातमस्तमस्तादीपालोकसंबंधसमयेसैवोत्पद्यस्वधर्मिणोविमुच्यविनश्यतितद्वत् मीतुसत्यात्रस्वभावोनन
श्यतीत्यर्थः॥६७॥ दृष्टांतो संदार्ष्टांतिकेयोजयतितदेवमिति॥ सर्वनाशेनेतिबीजभावेनसहेत्यर्थः॥६८॥ सुखदुःखश्रीर्विषयापगमेस्वरसांभंगुरत्वादिहनि
त्यनिरतिशयानंदप्रकाशात्मनिअणुमपिकालंक्षणमपिस्थातुंनक्षमा॥ यथानिमेषस्यलक्षतमभागत्वेनप्रसिद्धातन्वी अतिसूक्ष्मा कालास्वतएवन
श्यतितद्वदित्यर्थः॥६९॥ एवमतिसूक्ष्मकालत्वाल्लक्षयितुमशक्यागंधर्वनगरीवमिथ्याभूतापिसुखदुःखादिभावनाअज्ञानतत्त्वप्रमादेनस्थिरेव

तमस्तातमसोदीपासत्तांस्फुटतांगता॥ दीपसंबंधसमयेसाचोत्पद्यविनश्यति॥६७॥ तदेवंसुखदुःखश्रीर्दृष्टैवतामनामयं॥ जायते
जातमात्रैवंसर्वनाशेननश्यति॥६८॥ भंगुरत्वादिहस्थातुंकालंनाणुमपिक्षमा॥ निमेषलक्षभागाख्यातन्वीकालकलायथा॥६९॥
गांधर्वीनगरीतन्वीसुखदुःखादिभावना॥ स्फुरतित्वत्प्रमादेनत्वयिदृष्टेविलीयते॥७०॥ त्वदालोकेक्षणोद्भूतात्वदालोकेक्षणाक्ष
याभृतेवजाताजातेवमृताकेनोपलक्ष्यते॥७१॥ क्षणमप्यस्थिरंवस्तुकथंकार्यकरंभवेत्॥ तरंगैरुत्पलाकारैर्मालाकथमवेस्यते॥७२॥

मत्येवस्फुरति॥ त्वयिदृष्टेसतिविलीयतेनश्यतीत्यर्थः॥७०॥ अज्ञाततदालोकलक्षणेनईक्षणेनदृष्टवस्तुषोद्भूतासुज्ञाततदालोकेक्षणाक्षया एवंभृते
यंभृतास्वप्नेपुनर्जातेवसप्ताजाताजागरेपुनर्मृतेवेत्यर्थः॥७१॥ मिथ्यावस्तुनांक्षणस्थायित्वस्यापिदुर्घटत्वादर्थक्रियाकारित्वमत्याःश्चर्यमित्याह
क्षणमपीति॥ उत्पलाकारैरुत्पलबुध्याकल्पिताकारैः॥७२॥ 

DR BHAU DAJI MEMORIAL

ननुसौगतदर्शनवदत्रापिक्षणिकेरर्थक्रियाकिंनस्यात्तत्राहयदावेति॥ नप्रामाणिकीसौगतैरप्यर्थक्रियासाधयितुंशक्येतिभावः॥७३॥ इमंउक्तरीत्यादुर्घटामपिसुख
दुःखादिकांलक्ष्मींतद्दुर्घटताभिज्ञानंविवेकिजनानांचेतसिस्थितःसन्नहंत्वास्येव॥ अविवेकिभ्योविवेकिषुयोविशेषस्तमाहनजहासीति॥७४॥ अविवेकिषुतर्हि
दृशोहमितिप्रश्नेनोत्तरमस्तिअविवेकिकल्पनानामानंत्यादनियतत्वाच्चेत्याह अविवेकिष्विति॥ यदृच्छयाआकस्मिकनानावासनोद्बोधेननिमित्तेन॥ समवाणीति
शेषः॥ नालंनसमर्थाहेअनल्पानांअनंतानांपदानांरूपभेदानांनाम्नांचआस्पद इतिअसामर्थ्योपपादकंसंबोधनं॥७५॥ अनेल्पपदास्पदत्वेषकर्तृत्वाभ्या

यदावाज्ञिननिर्दिष्टंक्रियांवस्तुकरिष्यति॥ तदारमेतलोकोयंमालांकृत्वातडिद्गणैः॥७३॥ इमांसुखादिकांलक्ष्मींविवेकिजनचेतसि
स्थितःसन्नेवग्रहत्वासिनजहासिममास्थितिं॥७४॥ अविवेकिषुयोसितंसहजात्मन्यदृच्छया॥ तद्रूपकथनेनालंममानल्पपदास्प
द॥७५॥ निरीहेणानिरंशेननिरहंकृतिनात्वया॥ सत्तावत्समतावापिकर्तृत्वमुररीकृतं॥७६॥ जयप्रोड्डामराकारजयशांतिपरायण॥ ज
यसर्वगमातीतजयसर्वागमास्पद॥७७॥ जयजातजयाजातजयक्षतजयाक्षत॥ जयभावजयाभावजयजेयजयाजय॥७८॥

सौमत्वमित्याशयेनाहनिरीहेणेति॥ सत्तामत्तेस्थूलदेहोपाधिनाअसत्ताअमत्तेसूक्ष्मादेहोपाधिनावाशब्दःस्वप्नेसूक्ष्मस्यस्वांतःप्रद्योतनार्थः॥ अपिशब्दो
जागरेदेहद्वयसमुच्चयेनकर्तृत्वद्योतनार्थः॥७६॥ इदानींविवेक्यविवेकिप्रसिद्धरूपद्वयेनापि॥ स्तौतिजयेतिद्वाभ्यांप्रोड्डामरःप्रसृतोडामतिविस्तृतःआका
रोयस्य आगमग्रहणंसर्वप्रमाणोपलक्षणं॥ सर्वागमास्पदसर्वप्रमाणवेद्य॥७७॥ जयअविषयरूपेणजेतुंयोग्यस्वाभाविकेनत्वजयअजय॥७८॥
धं

अतएवाहमविद्यकरूपजयवलाज्जयीप्रारब्धशेषस्यापिजयायजीवामि॥ ७७॥ त्वयिमत्स्वरूपेणावस्थितेममसर्वोनर्थनिरासःसिद्धः॥ संपन्नेस्वमुपसंहरतित्व
यीति॥ मयिविगतामयात्मनिअंतरक्षस्वयंस्थितेत्वयिलत्त्वभावेस्थितेसति।भवाभवौजन्ममरणेक्व अतःशाश्वतंशमंसुखविश्रांतिमुपैमिप्राप्तोमीत्यर्थः॥ ८०॥ इति
श्रीवासिष्ठतात्पर्यप्रकाशेउपशमप्रकरणेषट्त्रिंशःसर्गः॥ ३६॥ इहसर्गःसमाधिस्थेप्रह्लादेदानवंपुरं॥ अनायकंदस्युहतंदुर्दशापन्नमीर्यते॥ इतिवर्णितप्रका

उत्तमाम्युपशाम्यामितिष्ठाम्यधिगतोस्मिच॥ जयाजयायजीवामिनमोमह्यंनमोस्तुते॥ ७९॥ त्वयिस्थितेमयिविगतामयात्मनिस्वसंस्थितो
व्यपगतरागरंजने॥ क्वबंधनंक्वचविपदःक्वसंपदोभवाभवौक्वशममुपैमिशाश्वतं॥ ८०॥ मोक्षोपायेषूपशमप्रकरणेआत्मस्तवनंसर्गः
३६॥ श्रीवसिष्ठउवाच॥ इतिसंचिंतयन्नेवप्रह्लादःपरवीरहा॥ निर्विकल्पपरानंदसमाधिंसमुपाययौ॥ १॥ निर्विकल्पसमाधिस्थश्चित्रा
र्पितइवाचलः॥ शैलादिवसमुत्कीर्णोबभौस्वपदमास्थितः॥ २॥ तथानुतिष्ठतस्तस्यकालोबहुतरोययौ॥ स्वगेहेभुवनस्यस्यमेरोरि
वसुरद्विषः॥ ३॥ बोधितापिसुराधीशैर्नाबुध्यतमहामतिः॥ अकालेबहुसेकोपिबीज [illegible] कोशइवांकुरः॥ ४॥ एवंवर्षसहस्राणि
पीनात्मातिष्ठदेकदृक्॥ शांतस्वांतःपुरपुरेमार्तंडइवचोपले॥ ५॥

रमात्मानंसंचिंतयन्॥ १॥ स्वरूपंस्वस्वरूपमात्मानं॥ २॥ स्वगेहेतथासमाधौतिष्ठतस्तस्यसुरद्विषःप्रह्लादस्यभुवनमध्यस्थस्यमेरोरिवबहुतरःकालोययौ
३॥ बीजकोशाद्बीजपुटात्॥ ४॥ पीनमहत्त्वंतमंत्रस्तजडात्मापीनात्मेतिपाठेस्पष्टं एकदृक्स्वस्थइतियावत्॥ उपलेउत्कीर्णोमार्तंडःसूर्यइवनिश्चलइतिया
वत्॥ ५॥ 

तयापरानंदाभ्यासयास्वदशायाएकांतंरकरसंपरिणामीपरिणतस्ततयानिरानंदसर्वंतासत्तायआनंदोयस्मिंस्तथाविधंपरःपरमात्मानभासतेयस्मिंस्तथावि
धंमरणमिवप्राप्तोदेहमात्रावशेषंआभासपदंदृष्टजनप्रतीतियोग्यत्वंगतः॥ ६॥ मात्स्यन्यायोबलवद्भिःस्वजातीयैरन्यैःक्षुद्रदुर्बलानांनिष्कारणंवधादिस्तेनक
दर्थितंपीडितं॥ ७॥ तत्कुतस्तत्राहहिरण्यकश्यपाविति॥ दनुसुतालयेदैत्यपुरे॥ ८॥ दानवानांपरेणापिप्रयत्नेनप्रह्लादःसमाधितोनावबुध्यत॥ ९॥ विक

परानंददशैकांतपरिणामितयातया॥ निरानंदपराभासमिवाभासपदंगतः॥ ६॥ एतावताथकालेनतद्रसातलमंडलं॥ बभूवाराजकंतीक्ष्णंमात्स्यन्यायकदर्थितं॥ ७॥ हिरण्यकशिपौक्षीणेसमाधौतत्सुतेस्थिते॥ नबभूवापरःकश्चिद्राजादनुसुतालये॥ ८॥ असुर
र्षिनांतेषांदानवानांसमाधितः॥ परेणापिप्रयत्नेनप्रह्लादोनव्यबुध्यत॥ ९॥ नप्रावृर्विकसद्रूपंपतितंममरंध्र॥ लसत्स्वलताजालनि ८
शिपत्रमिवालयः॥ १०॥ संविद्वारोनतस्यांतर्बोध्यतविचेतसः॥ भुवश्चेष्टाक्रमइवपौरुषोमतमोसतः॥ ११॥ अथोद्विग्नेषुदैत्येषुगतेष्वपि
मतांदिशं॥ विचरत्सुयथाकाममराजनिपुरेपुरा॥ १२॥ चिरायपातालमभूदभूपालतयायथा॥ मात्स्यन्यायविपर्यस्तमस्तंगतगुणक्रमं॥ १३॥

सद्रूपंप्रबोधवंतमितियावत्॥ नप्रापुर्नोपश्यत॥ १० संविद्वारःप्रबोधवार्तापिविचेतसःगलितचित्तस्य॥ गतःभासान्सर्वोयस्याःसकाशात्तथाविधायाभु
वःभूमेअंतःपौरुषःसुषुप्तपुरुषसंबंधीस्नानदानप्रस्थानधावनादिचेष्टाक्रमइव॥ ११॥ उद्विग्नेषुदुर्बलेषुदैत्येषुगतेषुबलवत्सुचदैत्येषुयथाकामंदस्यु
वद्यथेष्टंविचरत्सुपवहरत्सुसत्सुपातालंचिरायमत्स्यन्यायविपर्यस्तमभूदितिपरेणान्वयः॥ १२॥ १३॥

मात्स्यन्यायमेवतत्रोपपादयति बलीत्यादीना। बलिभिर्बलवद्भिर्मुक्ता न्यपहृतान्यबलानां पुराणि यत्र सर्वेभ्यः आर्त्ताः पीडिताः अशेषा वनिता स्त्रियो यत्र
१४। विसंस्थानं भग्नसंनिवेशं उद्यानं नगरं पदाम्यंतं स्थानं वृक्षजनाश्च लस्यंते। १५। धस्ताः निरेणुव्याप्ताः न्याशानां दिशां मुखमंडलानि यत्र। १६। सुरा
णामर्भकैरपि पराभूतं तिरस्कृतं। अंत्यजैस्तामसैर्भूतैश्चंडालैश्च श्वशृगालरक्षःपिशाचादिभिः। १७। न नियता नितियमवंतिवनिताः। अर्थाः धना
निमंत्राः सौहार्दसंकेताः युद्धानि निमित्तवैराणि च यस्य कलियुगसमये उद्दृढः परस्वहरणाश्रयः रस्य वस्तु दामं अत एवाकुलं सर्वतो भयोद्विग्नं बभूव। १८।

मूलं बलिभिर्मुक्ताबलपुरं मर्यादाक्रमवर्ज्जितं। सर्वार्त्ताशेषवनितं परस्परहृतांबरं। १४। प्रलापाक्रंदपुरुषं विसंस्थानपुरांतरं। लुठदुद्यानमगरं
व्यर्थानार्थकदर्थितं। १५। चिंतापरासुरगणं निरन्नफलबांधवं। अकांडोत्पातविवर्णध्वस्ताशामुखमंडलं। १६। सुरार्भकपराभूतं भ
मैरा क्रांतमंत्यजैः। भूतरिक्तमलक्ष्मीकं उच्छिन्नप्रायकोटरं। १७। अनियतवनितार्थमंत्रयुद्धं हृतधनदारविराविततं समंतात्। कलि
युगसमयोद्धटाकटाभं तत् सुरमंडलमाकुलं बभूव। १८। मोक्षोपाये उपशमप्रकरणे असुरमंडलव्याकुलं भवः सर्गः। ३१। श्रीव
सिष्ठ उवाच। अथाखिलजगज्जालक्रमपालनदेवनः। क्षीरोदनगरे शेषशय्यासनगतो हरिः। १। प्रावृट्निद्राव्युपरमे देवार्थम
रिसूदनः। धिया विलोकयामास कदाचित्तां गतिं गतिः। २।

इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे एकत्रिंशः सर्गः। ३१। जगद्व्यवस्थासिद्ध्यर्थं हरेश्चिंतोपवर्ण्यते। इह दैत्यकुले जातं प्रह्लादस्य प्रबोधने अखि 
लानां जगज्जालसंबंधिनां क्रमानां नियतीनां पालनमेव देवनं क्रीडनं यस्य। १। प्रावृड्निद्राव्युपरमे कार्त्तिके अंते इति यावत्। देवानामर्थे प्रयोजनं साधयितु
मिति शेषः। अनेन देवैः काले स्तुत्या प्रबोधित इति गम्यते। तां गतिं त्रैलोक्यसंबंधिनीं गतिं तात्कालिक स्थितिं। २।

विलोकनक्रममेव विविच्याह त्रिविष्टपमित्यादिना। पार्थिवं भूलोकसंबंधिनं आचारं जनानां शुभाशुभाचरणं मनसा पातालं मा जगाम पाताल स्थितिं
पर्यालोचितवानिति यावत्। ३। तत्र पाताले प्रह्लाददानवे स्थिरे समाधाने समाधौ स्थिते सति इदं इदस्य पुरे स्वर्गे प्रौढिं अभिवृद्धिमुपागतां संपदां दृष्ट्वा। ४। दैवं क्षी
रोदार्णवशायिनः पश्चात्प्रबुध्य व्यालतल्पतलस्य स्थतत्रापि पद्मासनबंधेन स्थितस्य शंखचक्रगदापाणेर्विष्णोर्मनः स्वकल्पिते जातिभास्वता

त्रिविष्टपं स्वमनसा पार्थिवं चावलोक्य सः। आचारमाजगामाशु पातालमरिपालितं। ३। तत्र स्थिरसमाधाने स्थिते प्रह्लाददानवे
दृष्ट्वा संपदमिंद्रस्य पुरे प्रौढिमुपागतां। ४। व्यालतल्पतलस्थस्य क्षीरोदार्णवशायिनः। शंखचक्रगदापाणेर्दैत्यांतरवारि
णः। ५। पद्मासनस्थस्य मनः शरीरेणाति भास्वता। इदं संचिंतयामास त्रैलोक्याब्जमहालिना। ६। प्रह्लादे परिश्रांते पाताले 
गतनायके। कष्टं सृष्टिरियं प्रायो निर्दैत्यत्वमुपागता। ७। दैत्याभावे सुरश्रेणी निर्ज्जिगीषुपदं गता। शममेष्यत्यसद्दृष्टा ध्वपर
लेषुसरिद्यथा। ८। मोक्षार्थं निर्गतद्वंद्वा ततो यास्यति तत्परं। क्षीराणि मानविरसा लते व प्रविशुष्कतां। ९।

त्रैलोक्याब्जस्य महता अलिना भ्रमरभूतेन शरीरेण इदं वक्ष्यमाणप्रकारं तेन संचिंतयामासेति त्रयाणामन्वयः। ४। ५। ६। परं क्षमाधिसाम्राज्यपदं तत्र विश्रांते
। शमं अरागद्वेषतां नदृष्टान्यत्र परलानियेषु तथाविधेषु अनावृष्टिकालेषु। ८। ततः शमात् निर्गतद्वंद्वं गतशीतोष्णादिद्वंद्वं उपलब्धं अद्वितीयमिति वा विरसा
सर्गसुखाद्विरक्ता जलसेकशून्या च। ९।

हृष्यामावात्स्वर्गसुखे दुर्लभत्वाद्दर्शनादुपेक्षापत्तेः स्वतः सात्विकत्वाच्च दैवौघेशांतिमायाते मतिमुक्तेश्च विभ्यते ॥ देवा मोहेनापि दृश्यते दानवास्तस्मादेषां तन्न प्रियं मम दे तन्न मुष्या विद्युः ॥ तस्मादेते सुरा विघ्नमाचरंति शपंति च ॥ प्रमादिनो बहिश्चित्ताः पिशुनाः कलहोत्सुकाः सन्यासिपि दृश्यंते देवसंदूषिताशयाइत्यादिश्रु तिस्मृतिवार्त्तिकादिप्रसिद्धदेवसंदूषिताशयत्वात्सिद्धेर्मनुष्याणामपि शमादिप्रसंगे भुवि यज्ञतपःक्रियाः ॥ अदेवत्वफलाः सत्यः शमं तस्मादमेष्यंतीत्यर्थः

दैवौघे शांतिमायाते भुवि यज्ञतपःक्रियाः ॥ अदेवत्वफलाः सर्वाः शममेष्यंत्यसंशयं ॥ १० ॥ क्रियास्वथोपशांतासु भुर्लोकोस्त मुपेष्यति ॥ असंसारप्रसंगोथ तस्य नाशे भविष्यति ॥ ११ ॥ आकल्पांतं त्रिभुवनं यदिदं कल्पितं मया ॥ नाशमेष्यत्यकालेन तापे हिमकणो यथा ॥ १२ ॥ किमेवमस्मिन्नाभोगे विलीयक्षयमागते ॥ कृतं मये ह भवति स्वलीलाक्षयकारिणा ॥ १३ ॥ ततो ह मपि शून्योस्मिन्नष्टचंद्रार्कतारके ॥ वपुः प्रशांतिमाधाय स्थितिमेष्यामि तत्पदे ॥ १४ ॥

१० अस्तु क्रियोत्सादः का क्षतिस्तत्राह क्रियास्विति भूर्लोकग्रहणं कर्मभूमिपरं ॥ अस्तं वैयर्थ्यं तस्य नाशे वैयर्थ्ये कर्माधीनसंसारस्योच्छेदप्रसं गइत्यर्थः ११ अस्त्वेवं किं ततस्तेषां तत्राह आकल्पांतमिति १२ अस्मिन् आभोगे जगत्संस्थाने विलीयक्षयमागते सति स्वलीलायाः क्षय कारिणा मया किं उचितं कृतं भवति न किंचिदित्यर्थः १३ ततः स्वलीलाक्षयादहमपि लीलार्थस्य वपुषः प्रशमं उपसंहारं आधाय संपाद्य अपुनः संसारोद्भवायतस्मिन्नष्टपूर्णात्मपरे स्थितिं एष्यामि प्राप्स्यामि संभावनायां अधिके पि भविष्यतिलृट् देव ॥ १४ ॥ 

एवमेवं उक्तनानाप्रकारभेदेन अकांडे अनवसरे जगत्सु उपशमं गते सति इह देवमनुष्यादिजीववर्गे श्रेयः न पश्यामीति न अपि तु पश्याम्येव वैराग्यात्प्रकृतौ लय इति स्मृतेः प्रकृतिलयेषु सुषुप्ताविव सर्वदुःखोपशमलक्षणं श्रेयः सिद्धेः किंतु तमेवं तं वेदानुवचनेन ब्राह्मणा विविदिषंतीति अनेकजन्मसंसिद्धस्ततो याति परां गति मित्यादिनित्यादि श्रुतिस्मृतिसिद्धानेकजन्मानुष्ठितनिष्कामकर्मसाध्यविविदिषात्तत्साक्षात्काराभावान्मूलाज्ञानावरणानिवृत्तेः बीजे सति पुनरावृ

अकांडे एवमेवं हि जगत्सु उपशमं गते ॥ नेह श्रेयो न पश्यामि मन्ये जीवं तु दानवाः ॥ १५ ॥ दैत्योद्योगेन विबुधास्तपो यज्ञतपःक्रियाः ॥ ते न संसारसंस्थानं न संसारक्रमोन्यथा ॥ १६ ॥ तस्माद्रसातलं गत्वा यथावत्स्थापयाम्यहं ॥ सेक्रमेदानवाधीशम्रातुः पुनरिव द्रुमं ॥ १७ ॥ विना प्रह्लादमथ चेदितरं दानवेश्वरं ॥ करोमि तत्सो मन्ये देवानामर्दयिष्यति ॥ १८ ॥ प्रह्लादस्य त्वयं देहः पश्चिमः पावनो महा न् ॥ आकल्पमिह वस्तव्यं देहेनानेन तेन च ॥ १९ ॥ एवं हि नियतिर्दैवी निश्चिता पारमेश्वरी ॥ प्रह्लादेन यथा कल्पं स्थातव्यमिह देहि ना ॥ २० ॥ तस्मात्तमेव गत्वाहं तु दैत्येंद्रं बोधयाम्यहं ॥ गर्जन् गिरिनदीसुप्तां मयूरमिव वारिदः ॥ २१ ॥ जीवन्मुक्तसमाधिस्थः करोत्वसुरनाथ तां ॥ मणिर्मुक्तमनस्कारः प्रतिबिंबक्रियामिव ॥ २२ ॥

त्तिशंकाप्रसक्तेश्च यन्निरतिशयानंदावाप्तिलक्षणं श्रेयः कस्यचित्सिद्ध्यतीति मन्ये अतः क्रमेण सर्वेषां तत्प्राप्त्यर्थं दानवा जीवंत्वित्यर्थः १५ तमेव क्रमं पुनः संक्षिप्याह दैत्योति विबुधा देवाः ततस्तेभ्यो विबुधेभ्यः १६ यथावत् यथापूर्वं क्रतुवर्षं तादिः १७ १८ १९ २० गर्जन् वारिदः २१ जीवन्मुक्तानां अ सुरातनः असंसक्तिः असंसक्तिलक्षणः समाधिस्तत्स्थः मुक्तमनस्कारः मनस्तत्त्वेष्टारहितः प्रतिबिंबक्रियां तस्मिन्सन्निहितवस्तुप्रतिबिंबधारणं २२

तत्समिद्वंद्वंद्वंपदेनतत्क्रियायुद्धंलक्ष्यते॥२३॥ सर्गस्यसज्यस्यजगतःक्षयोदयौ॥प्राक्तनसर्गसंस्थामनतिक्रम्येति॥यथासंस्थंपदार्थानतिवृत्तावव्ययीभावः ननुयोग
निद्रायाःसरूपस्सुरगमनंमुक्त्वादैत्यपुरगमनेनतवानुचितमित्याशंक्याहभावेति॥अबुद्धित्वादभिनिवेशविरहाद्यःगमनादिप्रयत्नस्तत्योगगमनमेवभवेत्नान्यतो
गमनंयतोयत्योगनिद्राप्राप्त्यंसुरंगमनयत्नादेर्भावाभावेष्वत्वनुल्यतितन्नाशेतत्स्थितौचसममितिस्वर्थः॥२५॥गच्छन्नप्यहंस्थैर्यमचलंस्वमेवयामियतोनाज्ञवत्सं

नहिनश्यतिसर्गोयमेवंसहसुरासुरैः॥भविष्यतिचततद्वंद्वंतन्मेक्रीडाभविष्यति॥२३॥ सर्गस्ययोदयावेतौसुसमौममयद्यपि॥तथापीदं
यथासंस्थंभवत्वन्येनकिंमम॥२४॥भावाभावेषुयत्तुल्यंतन्नाशेतत्स्थितौचवा॥यःप्रयत्नस्त्वबुद्धित्वात्तद्योगगमनंभवेत्॥२५॥त
स्मात्प्रयामिपातालंबोधयाम्यसुरेश्वरं॥स्थैर्यंयामिनसंसारलीलांसंपादयाम्यहं॥२६॥असुरपुरमवाप्यप्रोद्धताचारघोरं॥कमल
मिवविवस्वान्दैत्यमुद्बोधयामः॥जगदिदमखिलंस्वस्थैर्यमभ्यानयामोघनविधिरिवशैलेचंचलंमेघजालं॥२७॥ मोक्षोपाये
उपशमप्रकरणेपरमेश्वरवितर्कःसर्गः॥३८॥

सारलीलांसंपादयामीत्यर्थः॥२६॥प्रोद्धतानांनिर्मर्यादानांनिर्मर्यादानांदस्यूनामाचारेणघोरंभयानकंअसुरपुरं॥अवाप्यगत्वाविवस्वान्सूर्यःकमलमिव
दैत्यंप्रह्लादंसमाधेरुद्बोधयामः॥तेनचइदंअखिलंजगत्सागुक्तस्थैर्यमभ्यानयामःअभ्यानानविधत्वेइतिघनविधिः॥वर्षर्तुःचंचलंमेघजालेशैलेहिम
वदादौस्थैर्यमभ्यानयतितद्वदित्यर्थः॥२७॥इतिश्रीवासिष्ठतात्पर्यप्रकाशेउपशमप्रकरणेऽष्टत्रिंशःसर्गः॥३८॥ 

हरिर्दैत्यपुरंगत्वाशंखनादप्रबोधितं॥प्रह्लादमवदद्राज्यमाकल्पंपाल्यतामिति॥क्षीरोदांतर्गतःश्वेतद्वीपांतर्गताद्दात्मकाद्दात्मीयात्पुरात्॥परिवारेणसहेतिशेषः सा
नुःप्रस्थस्तेनसहितःअचलोमंदरइवाथ॥धातस्तेकल्पादेवस्तंभितंपातालकुहरप्रवेशित्रिंभोयस्मिंस्तथाविधेनक्षीरोदस्यतलरंध्रेणधम्छिद्रेणशक्रलो
कमिवरम्यमित्यर्थः॥२॥अथअत्रप्रह्लादनगरेअसुरंप्रह्लादंशैलस्यमेरोर्गुहायांलीनंअब्जजंब्रह्माणमिव॥३॥अवधूलिताःधूलिवद्ध्वस्ताःकौ

श्रीवसिष्ठउवाच॥ इतिसंचिंत्यसर्वात्माक्षीरोदादात्मकात्पुरात्॥चचालपरिवारेणसहसानुरिवाचलः॥१॥क्षीरोदतलरंध्रेणतेनैवस्तं
भितांभसा॥प्रह्लादनगरंप्रापशक्रलोकमिवापरं॥२॥हेममंदिरकोशस्थंददर्शात्रासुरंहरिः॥अथशैलगुहालीनंसमाधिस्थमि
वाब्जजं॥३॥तत्रतेतेजसादैत्यावैष्णवेनावधूलिताः॥दूरंप्रययुर्दिनेशांशुवित्रस्ताइवकौशिकाः॥४॥द्वित्रैःसहासुरैर्मुख्यैःपरिवार
युतोहरिः॥प्रविवेशासुरगृहंतारावानिवखंशशी॥५॥विनतेयासनस्थोसौलक्ष्मीविधुतचामरः॥स्वायुधादिपरीवारोदेवर्षि
मुनिवंदितः॥६॥महात्मन्प्रबुद्ध्यस्वेत्येवंविष्णुरुदाहरन्॥पांचजन्यंप्रदध्मौचधुन्वन्नकुभांगणं॥७॥महतातेनशब्देनवैष्ण
वप्राणजन्मना॥तुल्यकालपरिक्षुब्धकल्पाभ्यार्णवरंहसा॥८॥आसुरीजनतास्त्रस्तौपपातागतसंभ्रमा॥मत्तनीलाम्बुनादेनराज
था हंसावलीयथा॥९॥जनहर्षजनिताननादावैसर्वागतसंभ्रमा॥जनताजलदध्वानक्षुब्धेवकुटजावली॥१०॥

शिकाःउलूकाः॥४॥५॥६॥ककुभांदिशां॥७॥प्राणोबलंतज्जन्मनातुल्यकालपरिक्षुब्धानिप्रलयाभ्यारिप्रलयार्णवाश्चतद्वद्रंहसारंहशब्देनतत्प्रबोध
निर्लक्ष्यते॥८॥आगतसंभ्रमाप्रोद्भूतभयम्प्याः॥९॥१०॥

दानवेशः प्रह्रादः ॥११॥ मंत्रबोधकमंत्रपंचयति अस्त्रं प्रेत्यादिना ॥ आक्रमयामास आपूरयामास ॥१२॥ १३॥ प्राणेषु इंद्रियेषु प्राणो लिंगदेहस्तद्रूपस्तस्य दर्पणो बिंबिताप्रतिफलिता ॥१४॥ चेतनीयोन्मुखी विषयोन्मुखी चित् चेत्याकारसंस्कारो द्वौ धाच्चेत्यमिव भस्त्रा चिज्जडोभयरूपतो लक्षणं मनस्तां उपाययो प्रापा ॥१५॥ त

वभस्त्र संप्रबुद्धात्मा दानवेशः शनैः शनैः ॥ मेघारवसरत्स्फुद्ध्वकदंबइवकानने ॥११॥ ब्रह्मरंध्रकृतोत्थानं प्राणशक्तिरथासुरं ॥ शनैराक्रमयामास गंगा सर्वमिवार्णवी ॥१२॥ क्षणादाक्रमयामास प्राणाश्चीस्त्सर्वतोसुरं ॥ उदयानंतरं सौरी प्रभेव भुवनांतरं ॥१३॥ प्राणेषु रंध्रनवकेप्रहृतेष्वथतस्य चित् ॥ चेत्योन्मुखी वभस्त्रांतः प्राणदर्पणबिंबिता ॥१४॥ चेतनीयोन्मुखी चेत्यं चिन्मनस्तामुपाययौ ॥ द्विलं मुकुरसंक्रांतामुखश्रीरिव राघव ॥१५॥ किंचिदंकुरिते चित्ते नेत्रे विकसनोन्मुखे ॥ शनैर्बभस्त्र तुत्तस्य प्राणनीले यथोत्पले ॥१६॥ प्राणापानपराम्दृष्टानाडीविवरसंविदः ॥ वातान्तर्स्येवपद्मस्य स्पंदोस्य सम जायत ॥१७॥ निमेषांतरमात्रेण मनः पीवरतां ययौ ॥ तस्मिन्प्राणवशात्स्वर्णेतरंग इव वारिणि ॥१८॥ अथासौ विकसन्नेत्रमनः प्राणवपुर्वभौ ॥ अर्द्धोदितइवादित्ये सरः स्फुरितपंकजं ॥१९॥ अस्मिन्नवसरे यावद्बुध्यसे त्यवरद्विषुः ॥ प्रबुद्धस्तावदेवोभस्त्र द्वर्हीघनरवादिव ॥२०॥

त्यनेत्रे शनैर्विकसनोन्मुखे वभस्त्र तु ॥१६॥ प्राणापानाभ्यां अंतः प्रविष्टाभ्यां परामृष्टा याः ॥ उद्बोधिता या आसमंतान्नाडीविवरेषु संविदः संवेदनानि मितानि वातेनार्त्तस्य तु न्तपद्मस्येव अस्यात देहस्य स्पंदः ईषच्चलनं सम जायत ॥१७॥१८॥१९॥ वर्ही मयूरः घनरवान्मेघशब्दात् ॥२०॥ 

जातम् । ननं संजातप्रह्रादाहं भावप्रत्यभिज्ञं ॥ पीवरीमम्युपचिता एवावस्थादिस्मृति र्यस्यतं ॥२१॥ महतीं लक्ष्मीं देवराज्यश्रियं ॥ आलीयां स्वीयामाकृतिं देहाकारं च स्मरत्। यादेहविस्मरणेन अकांडे अनवसरे एव देहस्य विरामः । अवसानं किमर्थं क्रियते ॥२२॥ ननु तदहैव सशरीरस्य प्रियाप्रिययोरपहतिरस्तीति श्रुतेः सर्वे जनो नांतथानुभवाच्चानर्थहेतु स्मरणमिति चेत्तत्राह हेयेतिहेयोपादेयसंकल्पत्यागो ॥ सत्यपि देहे प्रियाप्रियभावाभावैस्तत्वार्थो नास्तीति नानर्थप्रसक्तिरित्यर्थः ॥२३॥ कियत्कालं तर्हि

प्रफुल्लनयनं जातमनं पीवरस्मृतिं ॥ उवाचेनं त्रिलोकेशः पुरनाम्य अजं यथा ॥२१॥ साधो स्मर महालक्ष्मीमालीयां स्मर चाकृतिं ॥ आकांड एव किं देहविरामः क्रियते त्वया ॥२२॥ हेयोपादेयसंकल्पविहीनस्य शरीरगैः ॥ भावाभावैस्तत्वार्थः किमु तिष्ठो तिष्ठ संप्रति ॥२३॥ स्थातव्यमिह देहेन कल्पं यावदनेन ते ॥ वयं हि नियतिं विद्मो यथा भ्रातामनिंदितां ॥२४॥ जीवन्मुक्तेन भवता राज्य एव हतिष्ठता ॥ क्षेप क्षे
णीयभगतो द्वेगमाकल्पांतमियं तनुः ॥२५॥ तत्वां कल्पांतशीर्णायां सेम हिम्नित यानघ ॥ वस्त्रव्यं स्फुटिते कुंभे कुंभांशेन खेमथा का
॥२६॥ कल्पांतस्थायिनी शुद्धा दृष्टलोकपरावरा ॥ इमं तव तनुर्ज्जाता जीवन्मुक्ताविलासिनी ॥२७॥ नोदिता ह्यादर्शादित्यानप्रलीनाः शिलोच्चयाः ॥ न जगज्ज्वलितं साधो तनुं त्यजसि किं मुधा ॥२८॥ वायुर्वहति नोन्मत्तस्त्रिलोकी भस्मधूसरः । लोलामरकपालो कस्तनुं त्यजसि किं मुधा ॥२९॥

देहधारणं तत्राहस्थातव्यमिति नियतिं न [illegible] दापुर्निश्चयं २४ क्षेपणीय व्यवहारे प्रेरणीया २५ कल्पांते तर्हि मम कथं स्थेयं तदाह तत्वमिति सेम हिम्नि स्वात्मभूतेनिरतिशयमहत्वे खे महाकाशे २६ २७ तर्हि किं कल्पांतः सन्निहितः नेत्याह नोदिताइत्यादिना २८ लोलान्यमराणां शिरःकपालान्यंक[illegible]स्य तथाविधः २९

वा॰टी॰उ॰प॰
॥११५॥

पुष्करावर्तारव्येषु संवर्त्तमेघेषु विद्युतस्तडितः स्फुरंति इदानीमिति सर्वत्रानुषंगः ॥ ३० ॥ धरायाः स्मेर्दह्यमानाया आसमंतात्सरणं सारः प्रकंपस्तेन विदीर्यमाणत्वाद्दृणंतः
शैलाया सु ककुभो दिशः ॥ अमरतॉर्नां विशरणयोगाद्भिगं तस्याः ब्रह्मांडमिव योग्यहंते ॥ ३१ ॥ इदं जगत् जरठः प्रौढो जीमूताः प्रलयमेघा यस्मिंस्तथाविधं
सत् ब्रह्मविष्णुरुद्राख्यदेवत्रयीमात्रशेषं स्मृतान स्थितं ॥ ३२ ॥ अद्रेर्लोकालोकाचलस्य स्मपद्मदलप्रायैः शृंगैरनुमितमंतरं मेरोः यासां न स्पर्ष्टव्यादिना त
थाविधा दिशः ब्रह्मांडमिव यः ॥ ३३ ॥ स्फुटतः दीर्यमाणस्याद्रीश्वस्य मेरोरिव टंकाराः ध्वनयो येषां सोराः द्वादशादित्यसंबंधिनः कराः किरणाः न भ्रमंति न ज

अशोक इव मं नयं पुष्करावर्त्तविद्युतः ॥ न स्फुरंति जगत्कोशे तनुं त्यजसि किं मुधा ॥ ३० ॥ धारासाररणच्छैलाः प्रज्वलज्ज्वल
नोज्ज्वलाः ॥ ककुभो निविशीर्यंते तनुं त्यजति किं मुधा ॥ ३१ ॥ न ब्रह्मविष्णुरुद्राख्यत्रयीशेषमिदं स्थितं ॥ जगज्जरठजीमूतं तनुं त्य
जसि किं मुधा ॥ ३२ ॥ न चेहाद्रिदलश्रेणीमात्रेकात्तु मितांतराः ॥ दिशो जर्ज्जरतां याताः तनुं त्यजसि किं मुधा ॥ ३३ ॥ स्फुटदद्रींद्रटंकाराः कराः
सौरा भ्रमंति खे ॥ कल्पाग्निशिखिनो गर्जंति तनुं त्यजसि किं मुधा ॥ ३४ ॥ अहं स्मृतावकीर्णासु मालोकासु खगध जनैः ॥ विहरामि रणशासु मारे
हमवधीरय ॥ ३५ ॥ इमे वयमिमे शैलाः स्मृता नीमान्यपं भवान् ॥ इदं जगदिदं व्योम मा देहमवधीरय ॥ ३६ ॥ पीवराज्ञानयोगेन यस्य पर्या
कुलं मनः ॥ दुःखानि विनिकृंततीति मरणं तस्य राजते ॥ ३७ ॥ कृशोति दुःखी मरुढोहमेताश्चानर्थभावनाः ॥ मतिं यस्यावलुंपंति मरणं त
स्य राजते ॥ ३८ ॥ आशापाशनिबद्धोंतरित श्चेतश्च नीयते ॥ यो विल्लोलमनो हेत्या मरणं तस्य राजते ॥ ३९ ॥

नुपज्यते ॥ ३४ ॥ स्मृतावकीर्णास्वंडजादिचतुर्विधप्राणिजातासु ॥ अहं विष्णुर्विहरामि ॥ मा अवधीरय त्यज तथा चेदानीं तव मरणं न शोभत इत्यर्थः ॥ ३५ ३६ ॥ कस्य तर्हि म
र...णमुचितं तमाह पीवरेत्यादिना यस्य मनः अज्ञानयोगेन दुःखानि विनिकृंततीति तस्य मरणं राजते अत्यंत पीडितो जीवः स्थूलदेहं विमुंचतीति स्मृतिसिद्धमरणे ह

श्व
राम॰
११५

DE BHAU DAJI MEMORIAL

हतभावना अपहृतविवेकांकुराः स्ता: यस्य हृदयं प्रभंजंति आम्रद्रुमिव यथा महाफलैराभ्यामंकुरप्ररोहं गृहेभ्यस्तदभिलाषिपक्षादिभ्यो सटाः प्रभंजंति तद्वत्
॥ ४० ॥ तालं हृस्वदुतालेराणाप्रपुष्पाय व तिमनो लक्षणे वने ॥ ४१ ॥ रोमराज्येव लताजालं शाखा समस्ता होयस्मिंस्तथाविधं देहलक्षणं दुर्द्दुमं विषवृक्षं कामा यनर्थल
क्षणाओघश्चं दुमारुतप्रवाहो हरति ॥ ४२ ॥ ४३ ॥ अंतः कोटरांतः ॥ ४४ ॥ मरणस्वरूपपर्यालोचनेपि तत्वज्ञस्य न संभवतीत्याह योयमिति स्फटं तं प्रसिद्धं तच्च न तत्वविदान

यस्य तृष्णाः प्रभंजंति हृदयं हतभावनाः ॥ प्ररोहमिव गर्हेभ्यो मरणं तस्य राजते ॥ ४० ॥ चिन्नह्नल्लिलता यस्य तालो तालेमनो वने
फलिता सुखदुःखाभ्यां मरणं तस्य राजते ॥ ४१ ॥ रोमराजीलताजालं यस्येमं देहदुर्द्दुमं ॥ अनर्थौघो हरत्युच्चैर्मरणं तस्य राज
ते ॥ ४२ ॥ यस्य स्वदेहविपिनमाधिव्याधिदवाग्नयः ॥ दहंति लोलां गलतं मरणं तस्य राजते ॥ ४३ ॥ कामकोपात्मका यस्य
स्फूर्जंत्यजगरा स्तनौ ॥ अंतःशुष्कद्रुमस्येव मरणं तस्य राजते ॥ ४४ ॥ योयं देहपरित्यागस्तज्ज्ञोक्तौ मरणं स्मृतं ॥ न सत्तानाश
ग
ता तेन कारणं वेद्यवेदनं ॥ ४५ ॥

सता आत्मना संपादयितुं शक्यं नाप्यसत्तातेन देहेन संपादयितुं शक्यं सदात्मनो निष्क्रियत्व त्यागक्रियायोगात् ॥ असंगस्य देहसंगाप्रसिद्धेश्च असत्तास्व
परित्यागस्य दूरनिरस्तत्वाच्च ॥ ननु देहस्यासत्वे किं कारणं तदाह कारणमिति ॥ वेद्यस्य प्रमाणैरवश्यवेदनार्हस्य स्वात्मनो वेदनं ज्ञानमेव देहादयस्त्वेकार
णं देहादिस्मृद्धावस्य यस्याज्ञाननिबंधनत्वादित्यर्थः ॥ ४५ ॥

कस्यतर्हि जीवितं शोभते तमाह यस्येत्यादिना। तथा च न देहात्प्राणोत्क्रमणं मरणं किंत्वात्मतत्त्वानवमतेरुत्क्रमणमेव तच्च ज्ञस्य नास्त्येवेति स एव तस्य जीवितं शोभते अज्ञस्यानुमतिः सदैवस्वात्मतत्त्वादुत्क्रामती यस्मोनित्यमततस्वरूपइतिभावः ॥४६॥ किंचैकदेहाभिमानेन त्यागो मरणं स्याद्यस्यतु सन्नास्ति यस्यबुद्धिस्तदीय प्रियाप्रियैर्नलिप्यते सर्वेषुभावेषु देहेषु विषयेषु च समः साधारणात्मा तस्य मरणासंभवाज्जीवितमेव मेवं राजते इत्यर्थः स्वमग्रे स्फुटं ॥४७॥ ४८॥ सम्यगसारतयाप

यस्य नोत्क्रामति मतिः स्वात्मतत्त्वावलोकनात्॥ स्वात्मैव दर्शिनो ऽस्य जीवितं तस्य शोभते ॥४६॥ यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते॥ यः समः सर्वभावेषु जीवितं तस्य राजते ॥४७॥ यो ऽन्तः शीतलया बुध्या रागद्वेषविमुक्तया। साक्षिवत्पश्यतीदं हि जीवितं तस्य राजते ॥४८॥ येन सम्यक्परिज्ञाय हेयोपादेयमुज्झता॥ चित्तस्यान्तेर्पितं चित्तं जीवितं तस्य शोभते ॥४९॥

न २ अवस्तु सदृशे वस्तुन्यसक्तं कलनामले। येन लीनं कृतं चेतो जीवितं तस्य शोभते ॥५०॥ स सर्वा दृष्टिमवष्टभ्य लीलयेयं जगत्क्रिया। क्रियते ऽवासनं येन जीवितं तस्य राजते ॥५१॥ नोत्तिष्ठति नोद्वेगमेति यो विहरन्नपि। हेयोपादेयसंप्राप्तो जीवितं तस्य शोभते ॥५२॥

रिज्ञाय। चित्तस्यान्ते अवसाने अर्पिते साक्षिणि ॥४९॥ अवस्तु शुक्तिरजतादितत्सदृशे वस्तुनि वस्तुवद्भासमाने बाह्यार्थकलनात्मकमले असक्तं चेतः ब्रह्मण्येव लीनं घनकाठिन्यमिव विलीनं कृतमित्यर्थः ॥५०॥ जगत्क्रिया जगतो व्यवहारः ॥५१॥ हेयस्य दुःखहेतोः संप्राप्तो नोद्वेगमेति उपादेयस्य सुखसाधनस्य संप्राप्तौ नोत्तिष्ठति ॥५२॥ 

---

शुद्धाः सत्त्वविरस्व पक्षाः सहायाः यस्य स्वयं शुद्धस्य सरः पक्षे शुद्धाः शुभ्रा हंसबकादयः पक्षा यस्य स्वतः शुद्धस्य निर्मलस्य पवित्रस्य च गुणाः शांतिक्षमामाधुर्यादयः शेत्यसौरभ्यादयश्च ॥५३॥ श्रुतीकर्णौ तत्पथं ॥५४॥ यस्य उदये शुभसंपत्सु उद्गमनेषु च जीवलक्षणा भ्रमरं वंतिजनलक्षणान्यंबुजानि कुमुदानि विलासवंति आनंदितानि भवंति अक्षयेंदोः क्षयरोगनिर्मुक्तचंद्रस्य आपूर्णजैवतस्येव तत्त्वविदः जीवितं राजते ते न तरस्याः ॥ इत्यर्थः ॥५५॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे एकोनचत्वारिंशः सर्गः ॥३९॥ सदेहो विदेहो वा कृतस्योपिक्रियापरः। यथाव्यवहरे ज्ञानीसक्तमोहरिणे च्यते जीवन्मुक्त

शुद्धपक्षस्य शुद्धस्य हंसौघः सरसो यथा। यस्माद्गुणौघो निर्याति जीवितं तस्य शोभते ॥५३॥ यस्मिन्श्रुतिपथं प्राप्ते दृष्टे स्मृतिमुपागते। आनंदं यांति भूतानि जीवितं तस्य शोभते ॥५४॥ यस्योदये शुभहृदयेन जनांबुजानि जीवालिवंति सकलानि विलासवंति। तस्येव भाति परिजीवितमक्षयेंदोरापूर्णतेव दनुजेश्वर नेतरस्य ॥५५॥ मोक्षोपाये उपशमप्रकरणे नारायणवचनोपन्यासः सर्गः ३९ ॥ श्रीभगवानुवाच ॥ स्थैर्यं देहस्य दृष्टस्य जीवितं प्रोच्यते जनैः। देहांतरार्थं देहस्य संत्यागो मरणं स्मृतं ॥१॥ द्वाभ्यां चैवासि पक्षाभ्यामाभ्यां मुक्तो महामते। किं ते मरणमस्तीह किं वा जीवितमस्तिते ॥२॥

स्यापि प्रह्लादस्य सन्निधिमात्रेण राज्यपरिपालननिर्वाहोपायमुपदिदिक्षुर्भगवान्वासुदेवः सत्यपि देहे तस्य तत्त्वं बंधाभावात्प्रागुक्ते जीवितमरणे गौणे एव न मुख्ये इति वक्तुं जीवनमरणयोर्लोकप्रसिद्धं स्वरूपमाह स्थैर्यमिति देहांतरार्थं पुनर्देहांतरग्रहणाय दृष्टदेहस्य संत्यागः उत्क्रम्य गमनं प्राणानां मरणं स्मृतं मृङ् प्राणत्यागे इति धात्वर्थप्रसिद्धेरित्यर्थः ॥१॥ द्वाभ्यां देहस्थैर्यप्राणोत्क्रमणपक्षाभ्यां अशरीरं शरीरेषु न तस्य प्राणा उत्क्रामंत्यत्रैव समव नीयंत इति श्रुतेरिति भावः ॥२॥

कथं तर्हि जीवितं तव शोभते मरणं न शोभते इति त्वयोक्तं तत्राह ॥ दर्शनार्थमिति ज्ञानाज्ञानगुणदोषप्रपंचनार्थमित्यर्थः ॥३॥ अदेहत्वे विदेहदृक् विगतदेहदृष्टि रिति हेतुः ॥ असक्तत्वादासंगविरहादीत ॥४॥ देहसंस्थत्वे कथं ज्ञायते तत्राह स्पर्शोऽपीति देहे शीतोष्णादिस्पर्शवेदननिमित्तत्वादन्यत्रेतदर्शनादेहस्पर्शोऽस्ति मर्वानितिशेषः ॥ त्वाचस्पर्शसंवेदनेन कथमसंगात्माकारणमिति दृष्टांतमाह अत्यंधेति ॥ यथा तरुत्सेधे अरोधकत्वात् खं उत्सेधकारणमित्युच्यते तद्वदित्यर्थः ॥५॥ अदेहत्वं तर्हि कथं तत्राह प्रबुद्ध इति ॥ त्वं ज्ञानतत्त्वात् प्रबुद्धः प्रबोधे च सति शमिनां सर्वदैतोपशमवतां देहः कृवर्तते न हि स्वप्नोपशमे स्वप्नदेहोऽस्ति इदं त्वेकं परिच्छिन्नं देहरूपमज्ञेषु प्रबोधवत्सु दुःस्थितं असंभाव्यमपि स्थितमित्यर्थः ॥६॥ यद्यज्ञोऽपि देहस्थितत्वाद्देहीतर्हि मयि देहस्पर्शयेदनास्त्य

निदर्शनार्थमेतत्तु मयोक्तमरिमर्दन ॥ न त्वं जीवसि नैव त्वं म्रियसे न कदाचन ॥३॥ देहसंस्थोऽप्यदेहत्वाददेहोऽसि विदेहदृक् ॥ व्योमसंस्थोऽप्यसक्तत्वाद्व्योमेव हि महामते ॥४॥ स्पर्शसंबोधकारित्वादेहस्पर्शोऽसि सुव्रत ॥ अत्यंधारोधकत्वेन खमुत्सेधस्य कारणं ॥५॥ प्रबुद्धो ज्ञानवत्त्वादेहः क्वशमिनामिह ॥ इदं त्वेकं परिच्छिन्नं रूपमज्ञेषु दुःस्थितम् ॥६॥ सर्वदा सर्वमेवासि चित्प्रकाशपरे कधीः ॥ को देहः कोऽथ देहस्ते यं गृहाण जहासि च ॥७॥ समुदेतु वसंतो वा वातु वा प्रलयानिलः ॥ भावाभावविहीनस्य किमभ्यागतमात्मनः ॥८॥

ननु तर्हि किं नश्यां तत्राह सर्वदेति ॥ प्रकाशकत्वेन स्थितिः ॥ सर्वदा सर्वं वस्तु तदपि तुल्येति सर्वमेव त्वमसि नाज्ञवद्देहमात्रमित्यर्थः ॥ एवं च तव कः पदार्थो देहः स्यात् यं अहं बुध्या गृहाण सि गृहीत्वा यां ॥ अदेहोऽपि कः स्यात् यं अनहं बुध्या जहासि त्यजेरित्यर्थः ॥७॥ ननु यद्युपचयात्त्वस्य हर्षोपचयः यन्नाशे रामः<br>११७
निमित्तदर्शनाच्च विषादः स देहः इतरस्त्वदेह इति भेदः किं न स्यादिति चेन्न तत्र विरोहर्षविषाद हेतुसंभवारित्याह समुदेत्वित्यादिना भाव्यते प्रीत्यास्मर्यत
इति भावः प्रियं न भाव्यते इत्यभावोऽप्रियं तदुभयविहीनस्येत्यर्थः ॥ ८ ॥

---

तिष्ठति तत्त्वज्ञ इति शेषः ॥९॥१०॥११॥ देहस्य संबंधिनि अहं इति तादात्म्याध्यासलक्षणे देहो इति तद्धर्मसंसर्गाध्यासलक्षणे च चित्तविभ्रमे क्षीणे सति मुधा निर्हेतुका निष्फला च त्यजामीति कलना किमुदिता स्यात् नैवोदेतीत्यर्थः ॥१२॥ त्यक्ष्येदं त्यक्ष्यामीति शेषः ॥१३॥ सर्वकर्तारोऽपि किंचन कंचदपि न करिष्यंतीति एवं हि नसो

मलुठत्स्वपि शैलेषु कल्पाग्निषु दहत्स्वपि ॥ वहत्सु सातवातेषु सात्मन्येव हि तिष्ठति ॥९॥ सर्वभूतानि तिष्ठंतु सर्वमेव प्रयांतु वा ॥ नश्यंतु वाथ वर्द्धंतामात्मन्येवास्मि तिष्ठति ॥१०॥ क्षीयते न क्षयं प्राप्ते वर्द्धमाने न वर्द्धते ॥ न स्पंदते स्पंदमाने देहेऽस्मिन्परमेश्वरः ॥११॥ देहस्याहमहं देहो इति क्षीणे चित्तविभ्रमे ॥ त्यजामि न त्यजामीति किं मुधा कलनोदिता ॥१२॥ इदं कृत्वा करोमीदमिदं त्यक्ष्ये दमित्यलं ॥ इति तत्त्वविदां तात संकल्पाः संक्षयं गताः ॥१३॥ प्रबुद्धाः सर्वकर्तारः करिष्यंतीह किंचन ॥ न तस्याकरणे नित्यं मकर्तृत्वपरं गताः ॥१४॥ अकर्तृत्वादभोक्तृत्वमर्थादेव समागतं ॥ संगृहीते किलानुसं केनेह भुवनत्रये ॥१५॥ शांते कर्तृत्वभोक्तृत्वे शांतिरेव हि शिष्यते ॥ सोऽदिमभ्यागता सैव मुक्तिरित्युच्यते बुधैः ॥१६॥ प्रबुद्धाश्चिन्मयाः शुद्धाः सर्वमाक्रम्य संस्थिताः ॥ किं त्यक्तं परिगृह्णंतु किं गृहीतं त्यजंतु वा ॥१७॥

ऽन्वयः न त्यक दा पकरणे नित्यमेव ते अकर्तृत्वपरं गता स्तिष्ठंतीत्यर्थः ॥१४॥ अकर्तृत्वादिति ॥ अनुसंधानादिना अनिष्पादितं वीत्यादि ॥१५॥ शांतिर्निर्विक्षेपता सोऽदि कर्तृत्वलोच्छेदेन प्ररूढतां ॥१६॥ उक्तं व्यक्तमुपपादयति प्रबुद्धा इत्यादिना ॥ आक्रम्य परमार्थस्वरूपाविर्भावेन परिभूय त्यक्तं अप्राप्तं
ते किं फलं मैहिकं परिगृह्णंतु ॥१७॥

वा०टी०उप० ।।११८।।

ग्राह्यग्राहकतत्संबंधलक्षणैरंशैः प्रमितिक्रियाकारकसंबंधघटितावांतरवा''क्यार्थलक्षणावयविकैर्महावाक्यप्रमेयावयवैरंगप्रधानक्रियाकलापल क्षणविकारैर्हीनः कूटस्थात्मा तत्कृतिसांगप्रधानक्रियानिष्पादनसाध्यं पारलौकिकं स्वर्गादिफलं वा किं गृह्णामि किं जहामीत्यर्थः ।।१८।। सैहिकामुष्मिकेष्ट निष्टसाधनहानोपादाननिमित्तग्राह्यग्राहकसंबंधोपशमे रागादिविक्षेपशांतिरुदेति सैव रागादिमूलोच्छेदेन स्थितिमभ्यागता मोक्षनाम्नोच्यत इत्युक्तो पपादनोपसंहारः ।।१९।। एवं स्थितानामपि यावत्प्रारब्धक्षयं व्यवहारसिद्धौ दृष्टांतमाह सुषुप्तेति यथा सुषुप्ताः ब्रह्मप्राप्ता अपि प्राणोदरान्नरसादिसं स्वाप्ययेन

ग्राह्यग्राहकसंबंधे प्रमितावस्मि किंक्रमैः ।। हीनः प्रमेमावयवैः किं गृह्णामि जहामि किं ।।१८।। ग्राह्यग्राहकसंबंधे क्षीणे शांतिरुदे त्यलं ।। स्थितिमभ्यागता शांतिर्मोक्षनाम्नाभिधीयते ।।१९।। तत्र स्थिताः सदा शांतास्तादृशाः पुरुषोत्तमाः ।। सुषुप्तावदवस्थं दृश्या धर्म्येणाचरंति हि ।।२०।। परावबोधविश्रांतवासनो जगति स्थितिं ।। अहं सुखदुःखे वेद्मि त्वं पश्यात्मस्थया धिया ।।२१।। न रमंते हि रम्येषु सात्म्येष्वगताशयाः ।। नो हि जंतेत्यसुखेषु स्वात्मन्येकरसायनाः ।।२२।।

दृं जीवनादृष्टमात्रसन्निधिमात्रेणाचरंतीत्युच्यते ।। तद्वज्जीवन्मुक्ता अपि चरंति व्यवहरंतीत्यर्थः ।।२०।। तद्व्यवहारमपि राज्यपालनमाचरेत्याशयेनाह परावबोधेति अहं सुखः सुखप्रजागमत्संधिस्थः ।।२१।। रम्येषु अनात्मसु स्थितिशेषः ।। आर्तामन्येषु आत्मास्पर्शिषु दुःखेषु स्वात्मन्येवस्वैकरसायनमिव मधुरं सुखं येषां त थाभोकं वार्तिकं ।। दुःखी यदि भवेत्साक्षी दुःखितो न भवेत् ।। दुःखिनः साक्षिता नास्ति साक्षिणो दुःखिता कुत इति ।।२२।। राम० ।।११८।।

कः साक्षी १

सुखदुःखाभावेन तत्प्राप्तिपरिहारार्थानि कार्माणि कथं गृह्णंतीति तत्राह नित्येति ।। अवांछयाऽनास्थया ।।२३।। यदि ते किं स्वात्मन्यप्यास्थाशून्याः नेत्याह जा ग्रतीति ।। तथा च या निशा सर्वभूतानां तस्यां जागर्ति संयमीति भगवतापि तेषामात्मास्थादर्शिता ।। प्रविवेपते प्रकंपते व्यवहरंतीति यावत् ।।२४।। विवक्षिता र्थं संक्षिप्योपसंहरति त्वमिति ।। हे महात्मन् त्वं अंतःशा। आसितस्य विष्णोः पदवी पदं स्थानं परमात्मपदं समागतः प्राप्तवानसि कमलजवासरं कल्पपर्यंतं इहैव पाताले गुणगणैः कलितां राज्यलक्ष्मीं भुक्त्वा अच्युतं विदेहकैवल्याख्यं च्युतिरहितं परमास्पदं परमपदं व्रजेत्यर्थः ।।२५।। इति श्रीवासिष्ठतात्पर्यप्रका

नित्यप्रबुद्धा गृह्णंति कार्याणीमान्यसंगिनः ।। मुकुरा इव बिंबानि यथाप्राप्तान्यवांछया ।।२३।। जाग्रति स्वात्मनि स्वस्थाः सु प्ताः संसारसंस्थितौ ।। बालवत्प्रविवेपंते सुषुप्तसदृशाशयाः ।।२४।। त्वमजितपदवीमुपागतोंऽतः कमलजवासरमेकमेव भुक्त्वा स

ज गुणगणकलितामिहैव लक्ष्मीं परमास्पदमच्युतं महात्मन् ।।२५।। मोक्षोपायेषूपशमप्रकरणे प्रह्लादबोधनं सर्गः ।। ४०।।

श्रीवसिष्ठ उवाच ।। जगत्तलसमुद्रेण त्रैलोक्याद्भुतदर्शिना ।। इत्युक्ते पद्मनाभेन ज्योत्स्नाशीतलया गिरा ।।१।। प्रह्लादनामा देहोऽसौ विकासिनयनांबुजः ।। मुदा वाचं वचो धीरो गृहीतमननक्रमः ।।२।।

शेषोपशमप्रकरणे चत्वारिंशः सर्गः ।।४०।। गृहीतशमना हेत्वासक्तां संप्राप्य सानुभावे स्वं राज्ये भिषिच्येनं वैरं छंदयद्धरिः ।। प्रलये जगत्तलक्षणानां रत्ला नां मांतः प्रवेशनात्समुद्रेण संपुटके नरसिंहकालेन्तैलोक्यलक्षण अद्भुतदर्शनशीलेन पद्मनाभेन विष्णुदेहेन इति प्राणक्रमप्रकारेणोक्तेस्मिन् ।।१।। प्रह्लादनामा असौ प्रागुक्तो देहः गृहीतमननक्रमः सन्मुदा उवाच ।। देहग्रहणं आत्मनि व्यवहर्तृतावारणार्थं ।।२।।

असुराणांकिंहितंदेवानांकिमहितमितिविचारेणश्रमितःश्रमंप्रापितःस्वणमितिसमाधौकालदैर्घ्योपन्यासाउक्तं॥३॥ स्थितिःतत्वबोधेनस्वरूपावस्थितिःरूपेणपरमार्थिकस्वरूपेणसदासमाध्यसमाध्योःसदेहविदेहमुक्त्योश्च॥४॥ इमौश्लोकौक्वचिदेवपुस्तकेदृश्येते अंतःधियाअखंडमानसंसाक्षात्काररूपया दृष्टोसिबहिर्दृष्ट्याचक्षुषादिष्ट्याभाग्यवशेनदृश्यते॥५॥ अस्यांआंतर्यांदृष्टौ॥६॥ तत्रशोकमोहादिनिमित्तवशादहंसमाधिंनाश्रितःयेनममदेहस्य

प्रह्लादउवाच॥ हिताहितविचार्येणराजकार्यशतेनच॥ इत्यहंश्रमितोदेवक्षणंविश्राममागतः॥३॥ भगवंस्त्वत्प्रसादेनस्थितिःसम्यग्यथागता॥ समाधावसमाधौचरूपेणाहंसमःसदा॥४॥ चिरमंतर्महादेवदृष्टोस्यमलयाधिया॥ पुनर्बहिरयंदृष्ट्यादिष्ट्यादेवप्रदृश्यते॥५॥ अहमासमनंतायामस्यांदृष्टौमहेश्वर॥ सर्वसंकल्पमुक्तायांव्योमवद्योम्नीवनिर्मले॥६॥ नशोकेननमोहेननचवैराग्यचिंतया॥ नदेहत्यागकार्येणनसंसारभयेनच॥७॥ एकस्मिन्विद्यमानेहिकुतःशोकःकुतःक्षतिः॥ कुतोदेहःक्वसंसारःक्वस्थितिःकेभयाभये॥८॥ यथेच्छयैवामलयाकेवलंस्वयमुत्थया॥ एवमेवाहमवसंवितते पावनेपदे॥९॥ हाविरक्तोस्मिसंसारंत्यजामीतियमीश्वर॥ अप्रबुद्धदृशांचिंताहर्षशोकविकारदा॥१०॥

गप्रसक्तिःस्यादित्याहनशोकेनेति॥७॥ दृष्टएवतेपितृराज्यादिनाशादिःशोकहेतुस्तंकथमपलपसिचेत्तत्राह॥ एकस्मिन्निति॥ सत्यमात्रदृष्टः॥ नत्वहेतात्मनिसदृइतिनतद्धेतुकोमेसमाधिरित्यर्थः॥८॥ तर्हिसमाधेस्तेकोहेतुरितिचेद्विचारजाविश्रांतिरेवेत्याहयथेच्छयेति॥ एवमेवदेहत्यागादावपिसंविदितनैव॥९॥ नचवैराग्यचिंताअतिवैराग्यापहृतोनयुक्तस्तस्यविचारएवकेसमाधावनुकूलत्वादितिचेत्तत्राहविरक्त इति॥१०॥ 

१६

वैराग्यस्यसमाधिहेतुत्वेरागवद्देहस्यापिदुःखहेतुत्वानुभवात्त्यागस्यापिसमाधिनिमित्ततास्यात्सोप्यतत्वविदएवंवांछितोनममेत्याह देहाभावेइति॥११॥ अतएवसुखलिप्सयादुःखनिवृत्तिलिप्सयापिवानसमाधिरित्याहइदमितिम्रूढमेवअवलुंपतीत्यनुकृष्यते॥१२॥ जर्ल्सस्क भेदवासनाक्षयेच्छयासमाधिस्तत्राहअहमन्यइति॥ दूरोदस्ताआत्मबुद्धिस्तत्त्वज्ञानंयेस्तेषामज्ञानामेवजयतिनतत्वविदामित्यर्थः॥ असुमतांप्राणिनां॥१३॥ तर्हिसंसारत्यागायमोक्षग्रहणायवासमाधिरस्त्विति चेत्तत्राप्याहइदमितिप्रसिद्धोदुर्हृदयः॥ संबंधीभ्रमः॥ अज्ञमिवज्ञंनोन्मत्ततांनयतीत्यन्वयः॥१४॥ सकुतस्तत्राहसर्वस्मिन्नित्यादि

देहाभावेनदुःखानिदेहेदुःखानिमेमतिः॥ इतिचिंताविषव्यालीसर्वमेवावलुंपति॥११॥ इदंसुखमिदंदुःखमिदंनास्तीदमस्तिमे॥ इतिदोलायितंचेतोमूढमेवनपंडितं॥१२॥ अहमन्योन्यएवायमित्यज्ञानंतुवासना॥ दूरोदस्तात्मबुद्धीनांजयत्यसुमतामिह॥१३॥ इदंत्याज्यमिदंग्राह्यमितिमिथ्यामनोभ्रमः॥ नोन्मत्ततांनयत्यंतर्ज्ञमज्ञमिवदुर्हृदयः॥१४॥ सर्वस्मिन्नात्मनिततेतत्वयिनामरसेक्षणः॥ हेयोपादेयपक्षस्याहितीमाकलनाकुतः॥१५॥ विज्ञानभासमखिलंजगत्सदसदुत्थितं॥ किंहेयंकिमुपादेयमिहयत्सज्यतेनवा॥१६॥ केवलंसस्वभावेनदृष्टृदृश्येविचारयन्॥ क्षणंविश्रांतवानंतःपरमात्मात्मनात्मनि॥१७॥ भावाभावविनिर्मुक्तोहेयोपादेयवर्जितः॥ एकमात्समहंसर्वमधुनेत्थंव्यवस्थितः॥१८॥

ना॥१५॥ भ्रांतिविज्ञानेशुक्तिरजतादिवदाभासतेनपरमार्थतइतिविज्ञानाभासंसत आत्मनोऽसतोमायायाश्चान्योन्यतादात्म्याध्यासलक्षणान्मिथुनीकरणादुत्थितं॥१६॥ अतएवमम तत्वविचारविश्रांतिरेवसमाधिःसंपन्नइत्याहकेवलमिति॥१७॥ एवंसमाधिकाले॥ अधुनाव्युत्थानकालेइत्थंतदाज्ञासाभोपादानयोग्यतयाव्यवस्थितोस्मीत्यर्थः॥
१८

स आत्मतां स्वस्वभावं गत आत्मा अहं मया आत्मीयं कर्तव्यतां प्राप्तं सर्वं त्वदाज्ञया कार्यं करोमि किं स्वरागेण करिष्यसि नेत्याह तुभ्यमिति त्वदिच्छानुव
वर्तितये त्यर्थः ॥१९॥ यथा त्वदाज्ञया राज्यं नियतिप्राप्तमहमंगीकरोमि तथा त्वमपि मद्वत्तं राज्यं सर्वेश्वरत्वात्तव नियतिप्राप्तं गरहाणेत्याह त्वमिति प्र
कृतिः शास्त्रलोकप्रसिद्धा नियतिः ॥२०॥ शैलेंद्रतटद्याद्रिः ॥२१॥ सत्रैलोक्यमुदारांतः स्थितं त्रैलोक्यसहितं अग्रगं पुरः स्थितो ॥२२॥ बाह्येषु रोम

समयात्मीयमापन्नं सर्वं स्वात्मा त्वतां गतः ॥ करोम्यहं महादेव तुभ्यं यत्तु विरोचते ॥१९॥ त्वमयं पुंडरीकाक्षः राज्यस्त्वावज्जगत्रये
तन्मतः प्रकृतिप्राप्तां राज्यां मादातुमर्हसि ॥२०॥ इत्युक्त्वा दानवाधीशः पुरः क्षीरोदशायिनः ॥ शैलेंद्रइव स्वर्णं दुमर्घपात्रमुपाददे
॥२१॥ सायुधं सास्वरोर्वृंदं समुरं सखगाधिपं ॥ पूजयामास गोविंदं सत्रैलोक्यमथाग्रगं ॥२२॥ स बाह्याभ्यंतरं ज्ञात्वा भुवनं भुवनेश्व
रं ॥ पूजयित्वाथ तिष्ठंतमुवाच कमलापतिः ॥२३॥ श्रीभगवानुवाच ॥ उत्तिष्ठ दानवाधीश सिंहासनमुपाश्रय ॥ यावद्दाभिषेकं ते
स्वयमेव ददाम्यहं ॥२४॥ पांचजन्यरवं श्रुत्वा यइमे समुपागताः ॥ सिद्धाः साध्याः सुरौघास्ते कुर्वंतु तव मंगलं ॥२५॥ इत्युक्त्वा पुं
डरीकाक्षो दानवं सिंहविष्टरे ॥ योजयामास योग्यं तं मेरुशृंगइवांबुदं ॥२६॥ अथैनं हरिराहृतैः क्षीरोदाद्यैर्महाब्धिभिः ॥ गंगादि
भिः सरिद्वरैः सर्वतीर्थजलैस्तथा ॥२७॥ सर्वविप्रर्षिसंघैश्च सर्वसिद्धगणैः सह ॥ पुनर्विद्याधरयुतो लोकपालसमन्वितः ॥२८॥

क्षपादिषु अभ्यंतरेषु वस्ति जठर हृदयादिषु चश्रोतानि परिवर्तमानानि भुवनानि यस्य तं ॥२३॥२४॥२५॥ सिंहविष्टरे सिंहासने ॥२६॥ ॥२७॥ पुनः शब्दस्वारस्या
त् पूर्वं स्वयमेकस्तमभ्यषिंचद्विद्याधरादिभिः सह पुनस्तस्माहातिशयादभ्यषिंचदिति गम्यते ॥२८॥ 

Dr. BHAU DAJI MEMORIAL

हरिसिंह ॥२९॥ ३०॥ धरा पृथ्वीधराः अन्ये पर्वताश्चेतिवा ॥३२॥ दृष्टा अनुत्तमा निरतिशयानंदसंभिर्येन तथाविधेन त्वया राज्ये उद्वेग अरति लक्षणः नगंतव्यः
तथाविद्यादिवत्स्वर्गे देवलोके मानवे मर्त्यलोके च उद्वेगो न गंतव्यो न गमयितव्यः ॥३३॥ यथाप्राप्तासु प्रजाशास्त्रवादिनिग्रहादिदृष्टिषु तत्तत्सुरुषानुरूपैर्देशकालक्रि
याकारैः प्रकृतं प्रसंजितं वधबंधदंडादिकार्यमातिष्ठ अनुतिष्ठ मानं संरागादिविषमं त्यक्त्वा आस्स्व ॥३४॥ अतिदेहतया देहातिरिक्ततया भावे नभावाभावेला वें

अभ्यषिंचदमेयात्मा दैत्यराज्ये महासुरं ॥ मरुद्गणैः स्तूयमानं सर्वं स्वर्गे हरिं यथा ॥२९॥ सुरासुरैः स्तूयमानं स्तूयमानः सुरासुरैः
अभिषिक्तमुवाचेदं प्रह्रादं मधुसूदनः ॥३०॥ श्रीभगवानुवाच ॥ यावन्मेरुर्धरा यावद्यावच्चंद्रार्कमंडले ॥ अखंडितगुणश्लाघी
तावद्राजा भवानघ ॥३१॥ इष्टानिष्टफलं त्यक्त्वा समदर्शनयाधिया ॥ वीतरागभयक्रोधो राज्यं समनुपालय ॥३२॥ राज्ये त्वमिन्मोग संघ
दृष्टे दृष्टानुत्तमसम्पदि ॥ न गंतव्यस्त्वयोद्वेगः स्वर्गे मानवके थवा ॥३३॥ देशकालक्रियाकारैर्यथाप्राप्तासु दृष्टिषु ॥ प्राकृतं कार्यमाति
ष्ठ त्यक्त्वा मानसमास्स्व भो ॥३४॥ अतिदेहतये दं ता ममता परिवर्जितं ॥ भावाभावे समं कार्यं कुर्वन्निह न बाध्यसे ॥३५॥ दृष्टसंसारपर्याय
स्त्वलिता तुल्य तत्सदृक्तः ॥ सर्वं सर्वत्र जानासि किमन्यदुपदिश्यते ॥३६॥ वीतरागभयक्रोधे त्वयि राजनि राजति ॥ नेदानीं दुःखदुर्ग्रंथिर्नासुरा
न् दलयिष्यति ॥३७॥

भोला भो ॥३५॥ व्यवहारे परमार्थे च त्वमेव निपुणो वीति नोपदेश्यं तवास्तीत्याह दृष्टेति ॥३६॥ अनेन तव सर्वमनोरथोपि सेत्स्यतीत्याह वीतेति ॥ दुःखदुर्ग्रंथि
स्सुरेषु इदानीं न स्थास्यति देवस्य यस्य महाराजा सुरान् नदलयिष्यतीत्यर्थः ॥३७॥
स्था

उन्मत्तावर्षामिव वर्द्धिता सरिन्नदी तीरतरंगिणी ह्रदस्तरंगा उच्चा। जगत्तत्स्थमपि मेरुस्थतीत्याह अद्येति निर्मंदरः निर्गतमंथाचलो योंभोनिधिस्तद्वत् ३९। अपरस्परमाहताः परस्परमर्दनैरवैरीकृता ॥४०॥ हे दनुसुत तेलं बहुलनिशारूपपक्षरात्रिस्तत्र नितांतनिद्रातिमिरप्रायं अज्ञानांधकारमपास्य सदा उदिता आशयश्रीः स्वप्रकाशब्रह्मात्मस्फूर्तिर्यस्य तथाविधः सन् वनितानां असुरस्त्रीणां संभजनीयशांत्यादिगुणविलासैः रम्यां अजितां शत्रुभिः

१क वाष्पश्रीर्नासुरीर्नामंजरीः प्लावयिष्यति। वनराजिमिवोन्मत्ता सरित्तीरतरंगिणी ॥३८॥ अद्यप्रभृत्यसंप्राप्तदानवामरसंगरं। निर्मंदरांभोनिधिवज्जगत्तत्स्थमिव स्थितं ॥३९॥ देवासुरकुटुंबिन्यो मर्दयंतः पुरेऽधुना। सैवैवयांतु विश्वासमपरस्परमाहताः ॥४०॥ भव बहुलनिशांतनिद्रातिमिरमपास्य सदोदिताशयश्रीः। दनुसुतवनिताविलाससम्यां चिरमजितामुपभुंक्ष्व राज्यलक्ष्मीं ॥४१॥ मोक्षोपाये उपशमप्रकरणे प्रह्लादाभिषेकः सर्गः ॥४१॥ श्रीवसिष्ठ उवाच। इत्युक्त्वा पुंडरीकाक्षः सनरामरकिन्नरः। द्वितीय इव संसारश्चचाल सुरमंदिरात् ॥१॥ प्रह्लादादिविनिर्मुक्तैः पश्चात्पुष्पांजलिव्रजैः। हर्यस्थाणो विहंगेशपाश्चात्यांगरुहोत्करैः ॥२॥ क्रमात्क्षीरोदमासाद्य विसृज्य सुरवाहिनीं। भोगिभोगासने तस्थौ श्वेताब्ज इव षट्पदः ॥३॥ भोगिभोगासने विष्णुः शक्रः स्वर्गे सहामरैः। पाताले दानवाधीश इति तस्थुर्गतज्वराः ॥४॥

कामादिषट्कैरश्वापराभूतां राज्यलक्ष्मीं स्वाराज्यलक्ष्मीं च चिरं उपभुंक्ष्वेत्याशीः ॥४१॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे एकचत्वारिंशः सर्गः ॥४१॥ विष्णोः क्षीरोदगमनेनाख्यानफलमुक्तं। समाधिमुक्त्युत्थाने हेतुश्चात्रोपवर्ण्यते। सनरामरकिन्नरत्वाद्बहुतीयः संसार इव विस्तृतः। चचाल जगाम ॥१॥ विहंगेशस्य गरुडस्य पाश्चात्येषु अंगरुहेषु उत्करवद्राशीभूतैः पुष्पांजलिव्रजैः ॥२॥३॥४॥



१९

ऐंदवो द्रवः अमृतमिव शीतला ॥५॥६॥ दुष्कृतपदेन पापं तन्मूलमज्ञानं च ॥७॥ मयोक्तं पापमेवेत्याह अज्ञानमिति ॥८॥ शतजन्मकृतमित्यापातविचारफलमेतत्। ज्ञानफलपर्यंतेन तु विचारेण प्रारब्धफलातिरिक्तसर्वपापक्षयः प्रसिद्ध एवेति ॥९॥ समाधिमुक्तस्य विदेहमुक्तेन सह विश्रांतिसुखादिसाम्ये पुनर्व्युत्थाने हेतुं जिज्ञासमानो रामः पृच्छति परे इति। मनसो विलये पांचजन्यस्वनश्रवणमपि दुर्लभमिति कथं तेन प्रबोध इति भावः ॥१०॥ प्रारब्धशेषा

संघाते कथिता राम निःशेषमलनाशिनी ॥ प्रह्लादी बोधसंप्राप्तिरैंदवद्रवशीतला ॥५॥ तां तु येमान्वा लोके बहुदुःकृतिनोऽपि हि। धिया विचारयिष्यंति ते प्राप्स्यंत्यचिरात्पदं ॥६॥ सामान्येन विचारेण क्षयमायाति दुःकृतं। योगवाक्यविचारेण को न याति परं पदं ॥७॥ अज्ञानमुच्यते पापं तद्विचारेण नश्यति ॥ पापमूलच्छिदं तस्माद्विचारं न परित्यजेत् ॥८॥ इमां प्रह्लादसंसिद्धिं प्रविचारयतां नृणां ॥ शतजन्मकृतं पापं क्षयमायात्यसंशयं ॥९॥ श्रीराम उवाच। परे पदे परिणतं पांचजन्यस्वनैर्मनः। कथं प्रबुद्धं भगवन्प्रह्लादस्य महात्मनः ॥१०॥ श्रीवसिष्ठ उवाच। द्विविधा मुक्तता लोके संभवत्यनघाकृते। सदेहैका विदेहान्या विभागोऽयं तयोः शृणु ॥११॥ असंसक्तमतेर्यस्य त्यागादानेषु कर्मणां। नैषणा तत्स्थितिं विद्धि त्वं जीवन्मुक्ततामिह ॥१२॥ सैव देहक्षये राम पुनर्जननवर्जिता। विदेहमुक्तता प्रोक्ता तत्स्था नायांति दृश्यतां ॥१३॥ भृष्टबीजोपमा भूयो जन्मांकुरविवर्जिता। हृदि जीवद्विमुक्तानां शुद्धा भवति वासना ॥१४॥

द्वौ इत्यनु द्वासना सहितभगवद्ध्यैवतत्त्वबोधे हेतुरिति विशेषं वक्तुं सदेहविदेहमुक्ती विभज्य दर्शयति। द्विविधेत्यादिना विभागो विभाजकलक्षणभेदः अयं वक्ष्यमाणप्रकार ॥११॥ कर्मणामिष्टानिष्टानां त्यागादानेषु विषयेषु एषणासंगो नास्ति तस्य तां स्थितिं जीवन्मुक्ततां विद्धि ॥१२॥ देहपदेन तद्धारणहेतुप्रारब्धशेषो लक्ष्यते तस्य भोगेन क्षये सतीत्यर्थः ॥१३॥

वा॰टी॰उप॰ ॥१२२॥ न्दृष्टानि भर्जितानि बीजान्युपमा येषामिति पुनर्दृश्यतानवाप्तौ हेतुगर्भं विशेषणं जीवन्मुक्तेषु तु समाधिव्युत्थानेन पुनर्देहदृश्यतायां हेतुरस्तीत्याह
हृदीति ॥ शुद्धा असंगमालिन्यनिर्मुक्ता पावनी शुद्धब्रह्मात्मभावना ॥ परमोदारा नष्टाका पर्ययरहिता अंतःकरणस्वब्रह्माणि लयेपि वासनास्थितौ दृ
ष्टांतमाह सुषुप्तस्येवेति ॥ १५ ॥ देहपदेनात्रापि तद्धारणहेतुप्रारब्धशेषो लक्ष्यते ॥ १६ ॥ सैव प्रह्लादबोधेपि हेतुरित्याह प्रह्लादेति ॥ १७ ॥ लीनेष्वान्ते शंखश

पावनी परमोदारा शुद्धसत्त्वानुपातिनी ॥ आत्मज्ञानमयी नित्यं सुषुप्तस्येव तिष्ठति ॥ १५ ॥ अपि वर्षसहस्रांते तथैवांतरवस्थ
या ॥ सति देहे प्रबुध्यंते जीवन्मुक्ता रघूद्वह ॥ १६ ॥ प्रह्लादोंतःस्थया शुद्धसत्त्ववासनयास्वया ॥ बोधमाप महाबाहो शंखशब्दाव
बुद्धया ॥ १७ ॥ हरिरात्मा हि भूतानां तस्य यत्प्रतिभासते ॥ तत्तथैव भवत्याशु सर्वमात्मैव कारणं ॥ १८ ॥ प्रबोधमेतु प्रह्लादो यदेवेति
चिंचिंतितं ॥ निमेषाद्वासुदेवेन तद्दैवेत दुपस्थितं ॥ १९ ॥ आत्मन्यकारणेनैव भूतानां कारणेन च ॥ स्वस्यार्थं वपुरानंतं ह्वासुदेवमयात्म
त्मना ॥ २० ॥ आत्मावलोकनेनाशु माधवः परिदृश्यते ॥ माधवाराधनेनाशु स्वयमात्मावलोक्यते ॥ २१ ॥ एतां दृष्टिमवष्टभ्य राघवा
त्मावलोकने ॥ विहराशु विचारात्मा परं प्राप्स्यसि शाश्वतं ॥ २२ ॥

ध्वस्यापि प्रह्लादस्य वाक्यमात्रेण कथं बोध इत्याशंकां परिहरन्नाह हरिरिति ॥ आत्माकारणात्मा सत्यसंकल्प इति यावत् ॥ १८ ॥ अकारणेनैव स्वहात्मनाभू राम॰
तानां कारणेनाव्याहृतेन षट्कारात्मकामकर्मादिनाचनिमित्तेन आत्मन्येव जगत्स्वस्यार्थं वासुदेवमयात्मना वपुः शरीरमात्रं स्वहीनं शब्दस्तथा स्कृतिस्र(?) ॥१२२॥
ति पुराणप्रसिद्धद्योतनार्थः ॥ २० ॥ अत एव तद्वपुर्दर्शने आत्मादर्शनं सिद्धं स्यात् आत्मदर्शने चेतद्दर्शनं सुलभमित्याह आत्मेति ॥ विहरस्व तस्मि ॥ २२ ॥
हि

१२

दुःखान्येव आसाराः धारासंपातास्तद्वती ॥ जाड्यं मौर्ख्यं रोगं च ॥ २३ ॥ यक्षी ग्रहणं सर्वपिशाचाद्युपलक्षणं मंत्रवतो मंत्रसिद्धान् ॥ २४ ॥ संसारजालरचनालक्षणा
अनंतस्य विष्णोरियं माया तस्यैवात्मनइच्छयैव घनतां ईशादिघनार्थभावं समुपागता सा च निष्कामभक्तिप्रणिधानाद्याराधितस्य तस्यात्मनइच्छयैव वि
वेकविचारादिजन्मकाले तनुतां ह्रासं उपयाति ॥ यथा पावकस्य ज्वाला वातवलयादेव घनतामुपयाति अंते चैतद्वशादेव तनुतामुपयाति तद्वत् ॥ अतः
ईश्वरप्रसादजनितविचारादिनैवावश्यं स्वानन्लोभइस्याख्यानतात्पर्यमिति भावः ॥ तथा च भगवतो बादरायणस्य सूत्रं पराभिध्यानात्तु तिरोहितं ततो ह्य

दुःखासारवती राम संसारप्रावृडाततां ॥ जाड्यं दहति परमं विचारार्कमपश्यतां ॥ २३ ॥ प्रसादादात्मनो विष्णोर्मायेयमतिभासुरा ॥ प्रबाधते
न धीरांस्तु यक्षी मंत्रवतो यथा ॥ २४ ॥ आत्मेच्छयैव घनतां समुपागतां तरात्मेच्छयैव तनुतामुपयाति काले ॥ संसारजालरचने
यमनंतमाया ज्वालेव वातवलयादिव पावकस्य ॥ २५ ॥ मोक्षोपाये उपशमप्रकरणे प्रह्लादव्यवस्थानाम सर्गः ॥ ४२ ॥ श्रीराम उवाच ॥ भ
गवन्सर्वधर्मज्ञ शुद्धैस्त्वद्वचनांशुभिः ॥ निर्वृताःस्मः शशांकस्य करैरोषधयो यथा ॥ १ ॥ कर्णाभिवांछ्यमानानि पवित्राणि मृदू
नि च ॥ सुखमंति गिरहीतानि पुष्पाणीव वचांसि ते ॥ २ ॥

स्यवंभविपर्ययमाविति ॥ मंत्रः स्मृतिर्ज्ञानमपोहनं चेति भगवद्वचनं चेति भावः ॥ २५ ॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे द्विचत्वारिंशः सर्गः
४२ ॥ ईषत्प्रसादलभ्येपि नेश्वरेदीयतां भरः ॥ पौरुषे सोंद्रिया क्रीत्या साध्यं ज्ञानमितीर्यते ॥ निर्वृताः आल्हादिताःस्मः ॥ १ ॥ कर्णाभ्यां श्रवणायाव
तं मनाय वाभिवांछ्यमानानि पुष्पपक्षे गुरुदेवतादिप्रसादरूपतया पापापहारित्वात्पवित्राणि पुष्पाण्युत्सवादीनीव ॥ २ ॥

नन्वर्हि प्रह्लादः माधववरं विनापि स्वपौरुषेणैव कथं न प्रबुद्धवान् अतः स्वपौरुषादेव सर्वत्र ज्ञानलाभ इति प्रागुक्तनियमभंग इत्यर्थः॥३॥ स्वपौरु
षसाध्यायां पुरुषार्थसिद्धौ माधववरोपि द्वारविशेष एव न स्वतंत्र इति नोक्तनियमभंग इत्याशयेन संक्षिप्योत्तरमाह यद्यदिति॥४॥ अथवा विष्णोः प्रह्ला
दात्मभेदाभावात्तत्प्रह्लादप्रयत्नादेवेति वा न परिहारः सुलभ इत्याशयेनाह आत्मेत्यादिना॥ यथा तिलांतर्गतं तत्तो निःसारितं च तैलं न भिन्नं तद्वत्
नन्वेवं सति विकारिता स्यादिति दृष्टांतांतरमाह शौक्ल्यपटवदिति॥ यथा कुसुमानां सार आमोदस्तद्वज्जीवानां परमार्थसारो विष्णुरिति वा अभेदोक्ते

पौरुषेण प्रयत्नेन सर्वमासाद्यते यदि॥ प्रह्लादस्तत्कथं बुद्धो न माधववरं विना॥३॥ श्रीवसिष्ठ उवाच॥ यद्यत्प्राप्य संप्राप्तं प्रह्लादेन महात्म
ना॥ तत्तदासादितं तेन पौरुषादेव नान्यथा॥४॥ आत्मा नारायणश्चैव न भिन्नौ तिलतैलवत्॥ तथैव शौक्ल्यपटवत्कुसुमामोदवत्तथा॥५॥ 
यो हि विष्णुः स एवात्मा योऽत्मा सो जनार्दनः॥ विष्ण्वात्मा शब्दौ पर्यायौ यथा विटपिपादपौ॥६॥ प्रह्लादनामा प्रथमम् आत्मैव स्वयमा
त्मना॥ स्वयैव परया शक्त्या विष्णुभक्तौ नियोजितः॥७॥ प्रह्लादोऽत्यात्मनैवैवं वरमर्जितवान्स्वयं॥ स्वयं विचारणं कृत्वा स्वयं विदितवा
न्मनः॥८॥ कदाचिदात्मनैवात्मा स्वयं शक्त्या प्रबुध्यते॥ कदाचिद्विष्णुदेहेन भक्तिलभ्येन बोध्यते॥९॥ चिरमाराधितोप्येष परमश्री
 तिमानपि॥ नाविचारवतो नं दातुं शक्नोति माधवः॥१०॥ यद्यत्याह कुसुमेति॥५॥ अथवा कार्यकारणोपाधित्यागे परिशिष्टचिन्मात्रस्यात्मत्वं नाभे
दस्येति लक्ष्य पर्यायोर्भिन्ना शब्दयोः पर्यायत्वेनैवेत्याह यइति विटपवत्पादकरणाकपानकर्तृत्वोपाधिभेदेपि अखंडस्वस्वरूपे यथा विटपिपादप
शब्दयोः पर्यायता न हृदित्यर्थः॥६-७॥ आत्मना स्वात्मरूपेणैव विष्णुना॥ स मनः स्वयमेव विचारणं कृत्वा स्वात्मानं स्वयमेव विदितवानित्यर्थः॥८॥
शक्त्या स्वप्रयत्नकृतविचारबलेन भक्तिलक्षणप्रयत्नलभ्येन विष्णुना विष्णुदेहद्वारेणेत्यर्थः॥९॥ अन्वयेन दर्शितमर्थं व्यतिरेकस्यापि प्रदर्शनेन द्रढयति



आत्मा यथा भपर्यंतो विचारोस्ति निवरं दत्तो हरेः पुरुषप्रयत्नोऽस्यो विचार एव मुख्यो भिमतो न वरः॥ अन्यथा ज्ञानमस्त्वित्येव वरदानप्रसंगादित्याशयेना
ह मुख्य इति॥११॥ यद्विषयप्रयत्नाद्विचारो दयस्तं दर्शयति सर्वमिति॥ चकोपग्रहणं दर्शकोपलक्षणं॥१२॥ स्वस्य शक्तिर्यत्नस्तत्प्रयुक्तात्संप्रवृत्त्या शुभावसते
ना॥१३॥१४॥ हरयनेतत्तः साक्षाक्रियते॥ नोद्धरतिना त्मतत्वं दर्शयति॥ आत्मदर्शनमेवोद्धार इत्याशयः॥१५॥ विनैव शिष्यप्रयत्नं शक्तिपातादिना गुरु

मुख्यः पुरुषयत्नोथो विचारस्यात्मदर्शने॥ गौणोवरादिको हेतुर्मुख्यहेतु परो भव॥११॥ सर्वमेव बलात्तस्माद्राक्षम्येंद्रियपंचकं
अभ्यसन्त्सर्वयत्नेन चित्तं कुरु विचारवत्॥१२॥ यद्यदासाद्यते किंचित्केन चित्क्वचिदेव हि॥ स्वशक्तिसंप्रवृत्त्यात दभ्यते नान्यतः
क्वचित्॥१३॥ पौरुषं यत्नमाश्रित्य समोद्दंत्वं य्योंद्रियपर्वतं॥ संसारजलधिं तीर्त्वा पारं गच्छ परं पदं॥१४॥ विना पुरुषयत्नेन दृश्यते चे
ज्जनार्दनः॥ मृगपक्षिगणं कस्मात्तदासौ नोद्धरत्यजः॥१५॥ गुरुश्चेदुद्धरत्यज्ञमात्मीयात्पौरुषाद्दते॥ उष्ट्रं दांतं बलीवर्दं तत्क
स्मान्नोद्धरत्यसौ॥१६॥ न हरेर्न गुरोर्नार्थात्किंचिदासाद्यते महत्॥ आक्रांतमनसः स्वस्माद्यदासादितमात्मनः॥१७॥ अभ्यास
वैराग्ययुताद्राक्रांतेंद्रियपन्नगात्॥ नात्मनः प्राप्यते यत्तत्प्राप्यते न जगत्त्रयात्॥१८॥

स्तमुद्धरतीति योगशास्त्रादिषु प्रसिद्धमिति तत्रानैकांतमाशंक्याह गुरुश्चेदिति॥ गुरुभक्त्यादिप्रयत्न एव तत्रापि ज्ञानजनने पूर्वं नुग्रहद्वारीकरोतीति भावः॥१६॥ अ
र्थाद्धनात्॥ अभ्यस्तत्वस्य तुमार्गशास्ति चित्तेनेति क्रुकतेरिति भावः आक्रांतमनसः ज्ञानदार्ढ्येन बाधितमनसः॥ यत्तु आत्मनः स्वस्मात् महत् परमपुरुषार्थरूपं आ
सादितं तत्॥१७॥ यत्परमपुरुषार्थरूपं॥१८॥

वा॰टी॰उ॰प॰ ॥१२४॥

आराधयेत् स्वकं बुद्ध्या श्रवणादिना साधयेत् सिद्धं च निरंतरानुसंधानेनार्चयेत् आलोक्य तत्त्वतः साक्षात्कृत्य संतिष्ठेत् तत्रैव सम्यग्भवति ष्ठेत् तद्ध्यानान्यवसेत् इत्यर्थः
१९ यदि स्वप्रयत्नजविचारादेव ज्ञानोदयः तर्हि किमर्थं शास्त्रेषु विष्ण्वादिभक्तिविधानं तत्राह शास्त्रेति विषयासक्तिप्राबल्यात् अध्यात्मशास्त्रेभ्य इंद्रियज
यादिय तेभ्यो विचारेभ्यश्च प्रपलायिनां हरीः स्मृतानां सर्वेषां कथं विष्णुभक्तिस्थितेः सन्मार्गे प्रवृत्त्यर्थमित्यर्थः ॥२०॥ उक्तमेवार्थमुपपादयति अभ्या

आराधयात्मनात्मानमात्मनात्मानमर्चय ॥ आत्मनात्मानमालोक्य संतिष्ठस्वात्मनात्मनि ॥१९॥ शास्त्रप्रयत्नविचारेभ्यो मर्त्यानां प्रपला
यिनां ॥ कल्पिता वैष्णवी भक्तिः प्रवृत्त्यर्थं शुभस्थितौ ॥२०॥ अभ्यासयत्नौ प्रथमं मुख्यौ विधिरुदाहृतः ॥ तदभावे तु गौणः स्यात् ऽज्यार
जाभयक्रमः ॥२१॥ अस्ति चेदिंद्रियाक्रांतिः किं प्राप्यं पूजनैः फलं ॥ नास्ति चेदिंद्रियाक्रांतिः किं प्राप्यं पूजनैः फलं ॥२२॥ विचारोप
शमाभ्यां हि न विना साध्यते हरिः ॥ विचारोपशमाभ्यां च मुक्तस्याब्जकरेण किं ॥२३॥ विचारोपशमोपेतं चित्तमाराधयात्मनः ॥ तस्मिन्
सिद्धे भवान् सिद्धो नो चेत्त्वं वनगर्दभः ॥२४॥ क्रियते माधवादीनां प्रणामप्रार्थना स्वयं ॥ तथैव क्रियते कस्मान्न स्वकस्यैव चेतसः ॥२५॥
सर्वस्यैव जनस्यास्य विष्णुरभ्यंतरे स्थितः ॥ तं परित्यज्य ये यांति बहिर्विष्णुं नराधमाः ॥२६॥

सेव्यादिना ॥२१-२२॥ आत्मा साध्यते स्वात्मभावेन तत्त्वतो लभ्यते ॥ हरिः पूर्णानंदात्मा विचारोपशमाभ्यामेव मुक्तस्य परमपुरुषार्थप्राप्तस्याब्जकरेण हरिदेहेन कि रा॰म॰
मधिकं प्राप्यमस्तीत्यर्थः ॥ अथवा विचारोपशमाभ्यां मुक्तस्य रहितस्य विषयासक्तस्य अब्जकरेण ईश्वरेणापि किं हितं कर्तुं शक्यमित्यर्थः ॥२३॥ आराधय प्रसाद ॥१२४॥
य सिद्धे प्रसन्ने सति भवानपि सिद्धः परमपुरुषार्थलक्षणां सिद्धिं प्राप्तः ॥२४॥ क्रियते यथेति शेषः ॥२५॥ मनोभक्तिरेव मुख्या विष्णुभक्तिः न तु बाह्येत्याह सर्वस्येत्यादिना ॥२६॥



चिह्नलक्षणं तत्तेऽजबाधितं वस्तु सनातनमेव सनातनं शाश्वतं वपुः स्वरूपं । गौणो मायागुणकल्पितं आगंतुकमिति भावः ॥२८॥ रसायनममृतं साध्यं औरनादिसंसाधय
ति हृष्यादिनो सारयति ॥२९॥ कस्तर्हि वा विष्णुभक्त्यधिकारी तमाह यस्त्विति द्वाभ्यां ॥ यः आत्मतत्त्वचमत्कृतौ स्थितिं न प्राप्तः स एव शंखचक्रगदापाणिं परमेश्व
रमर्चयेदित्यन्वयः ॥३०॥ वैराग्यकारिणा तपसा ॥३१॥ आशु अग्रहेण प्रसादावश्यंभावद्योतनार्थं ॥ सहकारः पुष्पफलाघ्रातिसौरभः तद्वाललक्षणं दर्शः ॥३२॥

हृदि ह्रावासि चित्तत्वं मुख्यं सनातनं वपुः ॥ शंखचक्रगदाहस्तो गौण आकार आत्मनः ॥२७॥ यो हि मुख्यं परित्यज्य गौणं समनुधावति
स रसायनं सिद्धं साध्यं संसाधयस्य सौ ॥२८॥ यस्तु आत्म स्थितिमेवास्य आत्मज्ञानचमत्कृतौ ॥ नासादयति संमत्तमनाः सर
घुनंदन ॥२९॥ अप्राप्तात्मविवेकोऽन्तरज्ञचित्तवशीकृतः ॥ शंखचक्रगदापाणिमर्चयेत् परमेश्वरं ॥३०॥ तत्पूजनेन कष्टेन तपसा त
स्य राघव ॥ कालेन निर्मलतामेति चित्तं वैराग्यकारिणा ॥३१॥ नित्याभ्यासविवेकाभ्यां चित्तमाशु प्रसीदति ॥ आम्रमेव दृढमेति सह
कारो शनैः शनैः ॥३२॥ एवं यथात्मनैवात्मा फलमाप्नोति भावितं ॥ हरिरजाकमाख्येन निमित्तेनारिसूदन ॥३३॥ वरमाप्नोति योऽपि
पि विस्रोरमिततेजसः तेनस्वस्यैव तत्त्वात्मं फलमभ्यासशालिनः ॥३४॥ सर्वेषामुत्तमस्थानां सर्वासां चिरसंपदां ॥ स्वमनोनिग्रहो भूमिर्भू
मिः सस्यश्रियामिव ॥३५॥

शास्त्रे हरिरजाकमाख्येन निमित्तेन यत्फलं भावितं तदपि आत्मना स्वेनैव दत्तं कल्पितं प्राप्नोतीत्यर्थः ॥३३॥ योऽपि विस्रोः सकाशाद्वरं प्राप्नोति तेनापि स्वस्य
सीयस्यैवाभ्यासशालिनः फलं प्राप्तं नान्यस्मिन्कमित्यर्थः ॥३४॥ उत्तमस्थानां प्रशस्तपुरुषार्थाभिनिवेशानां चिरसंपदां चिरभोग्यमन्वादिसंपदां च ॥ स्वमनोनि
ग्रहः सर्वभूमिरुद्भवस्थानमित्यर्थः ॥३५॥

उर्वीखननोत्कस्य सगरसुतादेः शिलोच्चयं मंथाचलं कर्षतो देवासुरादेरपि निषिद्धत्वादित्याभा द्वोर्वीखननाद्युत्कस्येव॥ मनसरेकाग्र्यं विना महाकार्यासिद्धेरित्याशयः॥३६॥
॥३७॥ वत्सलाः स्यार्वतोपि व्रत्साद्याः मनो व्याधेरुपशवान्नत्रायंते॥३८॥ बाह्यं वहिरिंद्रियगम्यमांतरमंतःकरणगम्यं चाकारभासुरं विषयरूपं त्यक्त्वा अजं जन्मा॥
दिक्रियाशून्यं संविन्मात्रस्यैकमखंडाकारं चिंतनं कुर्वित्यर्थः॥३९॥ उक्तमेवव्यक्तोक्त्योपसंहरति संवेद्येति। हे राम त्वं संवेद्यैर्बाह्यांतरविषयैर्निर्मुक्तं यन्निराम

अप्युर्वीखननोत्कस्य कर्षतोपि शिलोच्चयं। स्वमनोनिग्रहादन्यो नोपायोस्तीह कश्चन॥३६॥ तावज्जन्मसहस्राणि भ्रमंति भुवि मानवाः। याव
वन्नोपशमं याति मनोमत्तमहार्णवः॥३७॥ अस्य विष्णिवेंद्रुद्राद्याश्चिरं संप्रजिता अपि। उपशवान्मनोव्याधेर्नत्रायंते पिवत्सलाः॥३८॥
आकारभासुरं त्यक्त्वा बाह्यमांतरमप्यजं। कुरु जन्मक्रियाशून्यं संविन्मात्रैकचिंतनं॥३९॥ संवेद्यनिर्मुक्तनिरामयैकसंविन्मयास्वा
दमनंतरूपं। सन्मात्रमास्वादय सर्वसारं पारं परं प्राप्स्यसि जन्मनद्याः॥४०॥ मोक्षोपाये उपशमप्रकरणे प्रह्लादविश्रांतिः सर्गः॥४३॥
श्रीवसिष्ठ उवाच॥ रामापर्यवसानेयं माया संसृतिनामिका॥ आत्मचित्तजयेनैव क्षयमायाति नान्यथा॥१॥ जगन्मायाप्रपंचस्य वै
चित्र्यप्रतिपत्तये॥ इतिहासमिमं वक्ष्ये शृणुष्वावहितोनघ॥२॥ यैकसंविन्मयं स्वयमेवास्वदते निरतिशयानंदात्मना स्फुरति तथाविधं सन्मात्रं निरं
तरतदाकारवृत्त्या आस्वादय स्वमास्वादयन्॥ जन्मनद्याः परं पारं प्राप्स्यसीत्यर्थः॥४०॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे त्रिचत्वारिंशः सर्गः॥४३॥ मनो
वैराग्यसिद्ध्यर्थं संसारदुःखस्वरूपता। दृश्यस्य विस्तरेणास्मिन्नाख्याख्याने प्रदर्श्यते॥ तत्र विसुवराह्वायेर्जलेमायानिरीक्षणोत्सहेमतस्थनीतस्यश्मशानेदोहई
र्यते॥ अपर्यवसाना अपरिमितभ्रांतिहेतुरितियावत्॥१॥ अवहितः सावधानचित्तः॥२॥

Dr BHAU DAJI
M.S. C.P. LIB



मंडलो देशविशेषः॥ मेरौ कल्पवृक्षवनं नंदनादीव॥३॥ तत्र तस्मिन्मंडले॥४॥ निष्कलंकावदातेनेति भ्रमतोपि विशेषणं॥५॥ कार्यं तपः प्रयोजनं॥६॥ द्विजस्य वनेजाता अ
श्विन्याद्याः सारा दर्शनीयतमा यस्मिन्॥७॥ आशीरिदर्शनं विष्णुदर्शनपर्यंतं तपोर्थं सरसि प्राटट् पयदइव आकंठं अंबुनिमग्नः सन् आविशत् प्रविश्य

स्य

अस्मिन्स्मिन्वसुधापीठे कोशलो नाम मंडलः। कल्पवृक्षवनं मेराविवरत्नगणाकरः॥३॥ तत्राभूद्ब्राह्मणः कश्चिद्गुणी गाधिरिति श्रुतः।
परमश्रोत्रियो धीमान्धर्ममूर्तिरिवस्थितः॥४॥ आबाल्यात्सुविरक्तेन चेतसा सव्यराजत। निष्कलंकावदातेन भुवनं नभसा यथा॥५॥
किमप्यभिमतं कार्यं विनिधाय स्वचेतसि। बंधुवृंदाद्विनिष्क्रम्य तपस्तप्तुं वनं ययौ॥६॥ उत्फुल्लकमलं प्राप्य सरस्तत्र स विप्रराट् चं
द्रप्रसन्नविमलं तारासारमिवांबरं॥७॥ आशौरिदर्शनं तस्मिंस्तपोर्थं सरसि द्विजः॥ आकंठमंबुनिर्मग्नः प्राटट्पयदइवाविशत्॥८॥
ययौ मासाष्टकं तस्य मग्नस्य सरसोंभसि॥ वासपंकजसंकोचमनाक्भग्नमुखच्छवेः॥९॥ अथैनं तपसा तस्मा आजगामैकदा हरिः
निदाघार्तं घनः श्यामः प्रावृषीव धरातलं॥१०॥ श्रीभगवानुवाच॥ विप्रोत्तिष्ठ पयोमध्याद्गृहाणाभिमतं वरं॥ अभीप्सितफलोपेतो
जातस्ते नियमद्रुमः॥११॥ ब्राह्मण उवाच॥ असंख्येयजगद्भूतहृत्पद्मकुहरालिने॥ जगत्त्रयैकनलिनीसरसे विष्णवे नमः॥१२॥

स्थित इत्यर्थः॥८॥ वासो निवासस्थानं तत्रत्यानां पंकजानां सूर्यवियोगेन संकोचे तत्संवासस्नेहान्मनाक्भग्ना मुखच्छविर्यस्य॥९॥ श्याम इति हरेरपि
विशेषणं॥१०॥ नियमद्रुमः तपोवृक्षः अभीप्सितेन फलेन उपेतः फलितो जात इत्यर्थः॥११॥ असंख्येयानां जगति विद्यमानानां भूतानां प्राणिनां हृत्प
द्मकुहरस्थाय श्यामतार अलिने भ्रमराय॥१२॥

पारमात्मिकींपरमात्मनन्यधर्मा॥१३॥मायादर्शनमात्रेणपरमपुरुषार्थफलकस्यस्वाराधनतपसःसार्थकमालाभान्नतस्यरूक्षसिचेत्सप्रार्थितोपिभगवताद्वितीयोव
रोदत्तःअदृश्यत्वमंतर्धानं॥१४॥१५दर्शनस्पर्शाभ्यांरिपुरुक्तेःस्थावराणामपिचाक्षुषादिज्ञानमस्तीतिगम्यते॥१६॥ब्राह्मणकर्मणातपःस्वाध्यायातिथिपूजादिना
॥१७॥उदितपंकजेकुल्यपद्मेयथामहर्षियोगबलेनअतीतानागतंद्रष्टुंमानसेचिंतमतिंनदूत॥१८॥सकलाद्यविद्यानार्थंअघमर्षणार्थंअंतर्जले

मामामिमांत्वद्दर्शितांभगवन्पारमात्मिकीं॥द्रष्टुमिच्छामिसंसारनाम्नीमांध्यैककारिणीं॥१३॥श्रीवसिष्ठउवाच॥इमांद्रक्ष्यसिमायांत्वंतत
स्यरूक्षसिचेत्सजमा॥उक्त्वायथावदृश्यत्वंगांधर्वमिवपत्तनं॥१४॥गतेविष्णौसमुत्तस्थौजलात्सब्राह्मणेश्वरः॥शीतलामलसर्वांगोत्ता
रिंदुःक्षीरोदकादिव॥१५॥बभूवपरितुष्टात्मादर्शनेनजगत्पतेः॥दर्शनस्पर्शनैरिंदोरुत्फुल्लमिवकैरवं॥१६॥अथास्यकति
चित्तस्मिन्दिवसानिर्ययुर्वने॥हरिसंदर्शनानंदवतोब्राह्मणकर्मणा॥१७॥एकदारब्धवान्स्नानंसरस्युदितपंकजे॥चिंतय
न्नेवतंत्वंवाक्यंमहर्षिरिवमानसे॥१८॥अथस्नानविधावंतर्जलमेवचकारह॥सकलाद्यविद्यानार्थंपरिवर्तमिवात्मना॥१९॥
अंतर्जलविधौतस्मिन्विस्मृतध्यानमंत्रधीः॥पर्यस्तसंवित्प्रसरःसोपश्यज्जलमध्यतः॥२०॥स्वतमात्मानमात्मीयेसदनेशो॥
च्यतांगतं॥पतितंवातवेगेनकंदरांतरिवद्रुमं॥२१॥

लंपरिवर्तमावर्तमिवसकुशेनकरेणचकारेत्यर्थः॥अंतर्जलेनिमज्जनप्राणवादिमंत्रस्मरणलक्षणेअघमर्षणविधौपर्यस्तःविपरीतग्रहणोन्मुखःसंवित्प्र
सरोयस्यतथाविधःसन्॥२०॥कंदरांतर्दरीगर्भेपतितंद्रुममिव॥२१॥



२३ २

स्वतमित्यस्यविवरणंप्राणापानेनिर्वातपतितंकदल्यादिस्तंडकमिव॥२२॥शवीभूतंइवकारोमिथ्यात्वपरोनोपमार्थः॥२३॥अवग्रहोवर्षप्रतिरोधस्तेनोद्धतंग्राम
मिव॥२४॥करुणयाआक्रंदोरोदनंतत्कारिभिःकुररैःपक्षिविशेषैः॥२५॥सेतुभंगाज्जलद्भिःप्रवहद्भिर्वारिभिर्ह्रियमाणंमुखमिवअब्जं॥तस्यास्तुआविधयानलि
न्याकमलिन्या॥२६॥तारेणोच्चतरेणाक्रंदेनरुदंतोरेफाद्विरेफाइवप्रलापेअनर्थकवक्तवाक्येदीर्घस्वरालापेचलुब्धयाआसक्तया॥नवेर्थेजनैःस्वप्न

प्राणापानप्रवाहेणमुक्तमंतमुपागतं॥संशांतावयवस्पंदंनिर्वातइवखंडकं॥२२॥पांडुराननमाम्लानंवृक्षपर्णमिवारसं॥शवीभूत
मिवाम्लानंछिन्ननालमिवांबुजं॥२३॥विपर्यस्तेक्षणंप्रांतमग्नतारमिवांबरं॥सावग्रहमिवग्रामंसर्वतःपांसुधूसरं॥२४॥बाष्प
क्लिन्नमुखैर्दीनैःकरुणाक्रंदकारिभिः॥आवृतंबंधुभिःखिन्नैःकुररैरिवपादपं॥२५॥सेतुभंगजलह्रियमाणमुखाब्ज
या॥नलिन्यासमधर्मिण्याभार्ययापादयोःश्रितं॥२६॥ताराक्रंदरणद्रेफप्रलापालापलुब्धया॥मात्रागद्गदीनंचुबुकेनवध्यंज
नलांछिते॥२७॥अन्यैःपार्श्वगतैर्दीनैःस्वबंधुमुखैर्जनैः॥श्रितंगलद्वाष्पैःशुष्कपर्णैरिवद्रुमं॥२८॥वियोगभीत्यासं
योगपरिहारपरैरिव॥दूरंविप्रसृतैरंगैरनात्मीयैरिवावृतं॥२९॥परस्परमलप्याभ्यांओष्ठाभ्यांदशनैःसितैः॥सविरागमिवाम्लानैर्ह
संतंस्वात्मजीवितं॥३०॥मौनध्यानमिवापन्नंपंकादिवविनिर्मितं॥अप्रबोधायसंसुप्तंविश्राम्यंतमिवोत्सुकैः॥३१॥

भिर्लांछितेविद्रुते॥२७॥श्रितंपरिवेष्टितं॥२८॥संयोगाविप्रयोगांताइतिन्यायप्रापितवियोगभीत्यासंयोगपरिहारपरैरिवेत्युत्प्रेक्षा॥अंगैर्हस्तपादादिभिःअ
नात्मीयैरस्वीयैरस्वजनैरिवेत्युपमा॥२९॥आम्लानैरीषन्मलिनैर्दशनैःस्वात्मजीवितं॥एतावत्कालंवृथेतिहसंतंसविरागंविरक्तपुरुषमिव॥३०॥मौनाध्यानमित्या
धाश्वतस्त्वउत्प्रेक्षाः॥३१॥

बांधवेषु कस्माधिकः स्नेहः कस्याल्प इति तत्तदाशयविमर्शार्थं पतत्तः अवहितमनस्कतया तस्थौ तदाक्रंदानं शृण्वंतमिव॥ अथ क्रमेण स्वजनैर्निःकालितं
गृहाद्बहिर्निष्कासितमिति परेणान्वयः॥२३॥२४॥ मांसांत्रेत्यादि जगत्त्रयमिल्वेतानि श्मशानविशेषणानि॥२५॥ शिवानां अशिवैर्मुखनिर्गतज्वालाजालैः प
ल्लवितेवार्चनियस्य॥२६॥ वहद्रक्तसरित्सु केचित्स्नाताः केचिन्मग्नाश्च कंकाउग्रवायसाश्च यत्र॥ रक्तैरर्द्रार्णां तंत्रीणां प्रसरलक्षणैर्जालैराच्छादितं जगत्त्रय

यं बांधवाक्रंदसंरंभकोलाहलगतागिरः॥ स्नेहभावविचारार्थं शृण्वंतमिव यत्नतः॥२२॥ अथ तत्कालकल्लोलप्रलापाकुलचेष्टितैः॥ सोरस्ताडन
मूर्छोत्थनेत्रवारिवहाप्लुतैः॥२३॥ क्रमेण स्वजनैःक्षुब्धैस्ताराक्रंदादिघर्घरैः॥ निष्कालितममंगल्यमपुनर्दर्शनाय वै॥२४॥ नीतं श्मशानं मां
सांत्रवसापंककलंकितं॥ शुष्काशुष्करसक्लिन्नकंकालशतसंकुलं॥२५॥ गृध्राभ्रच्छन्नसर्पांशुचिताज्वलननिस्तमः॥ शिवाशिव
मुखज्वालाजालपल्लवितावनि॥२६॥ वहद्रक्तसरित्स्नातमग्नकंकोग्रवायसं॥ रक्ताई तंत्रिप्रसरजालाबद्धजगत्त्रयं॥२७॥ तत्रातैर्ज्वलने
दीप्ते चक्रुस्तं भस्मसाच्छवं॥ बांधवाः सलिलापूरं समुद्रा इव वाडवे॥२८॥ चितिश्चटचटास्फोटैः शवमांसुदराहसा॥ शुष्केंधनबहूच्छूनज्वा
लाजालजटावली॥२९॥ अम्बुधस्तकटकटारवमुक्तगंधव्यासांबुवाहपटलोऽस्थिचयं हुताशः॥ दंतीसरं ध्रमिव वेणुवनं समंतादुद्दांतमे
दुररसं दलयांचकार॥३०॥ मोक्षोपाये उपशमप्रकरणे गाधिविनाशनं सर्गः॥४४॥ गावहवः पक्षिणो यत्र॥२८॥ वाडवे वडवाग्नौ समुद्राः सलिलापूरं 
यथा भस्मसाच्चक्रुस्तद्वत्॥२९॥ शुष्कैरिंधनैर्बहु उच्छूना अभिवृद्धा ज्वालाजाललक्षणा जटावलिर्यस्याः सा चितिश्चिताचटचटाशब्दैः शवमांसुदराहसत्॥ 
अम्बुदध्वस्तैः कटकटारवैर्मुक्तैः गंधैश्च व्याप्तान्यंबुवाहपटलानि येन तथाविधो हुताशोऽग्निः समंतादुद्दांतां उद्दीर्णां मेदुरां उपचितां रसां यस्मात्तथाविधं अ
स्थिचयं दंतीसरंध्रं वेणुवनमिव दलयांचकार विलयामास इत्यर्थः॥४४॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे चतुश्चत्वारिंशः सर्गः॥४४॥
द



इहास्य पुल्कसीकुक्षौ जन्म कैरातकी स्थितिः॥ स्तनबंधोः कीरपुरे राज्यप्राप्तिश्च वर्ण्यते॥ स्वस्याधिभिर्भानमदुःखैः पीवरयानुपचितया इत आरभ्य सर्वेषां कारणानां विंशतितम
श्लोकस्थे अपश्यदित्यत्र क्रमेणान्वयः॥१॥ स्तनमंडलात्वोरेशमेरुः तस्य पर्यंतः सीमा तत्रत्यग्रामस्य उपांते सन्निहित स्रमो निवासिनां॥ गर्भवासपदेन तत्रत्य दुःखा
निलक्ष्यंते तद्दूरेणाक्रांतं पीडितमित्यादिस्तत्स्थैव प्रपंचः॥३॥ श्वपच्याकाले प्रसूतं अश्वं मेध्यं॥४॥ यामुनं यमुनाप्रवाहपतितं उत्पीडं उत्तंसो त्पलमिव॥४॥ सारमेयाः

श्रीवसिष्ठ उवाच॥ अथापश्यत्स गाधिः स्वाधिपीवरयाधिया॥ अंतर्ज्जलस्य एवांतरात्मनात्मनि निर्मले॥१॥ स्तनमंडलपर्यंतग्रामोपांतनि
वासिनां॥ श्वपचानां स्त्रिया गर्भे स्थितमात्मानमाकुलं॥२॥ गर्भवासभराक्रांतं पीडितं पेलवांगकं॥ श्वपची हृदये सुप्तं स्वविष्ठायामिवा
कुलं॥३॥ शनैः पक्वतया काले प्रसूतं मेचकच्छविं॥ श्वपच्या प्राप्तवपुर्बद्धं श्याममावलितं मले॥४॥ संपन्नं श्वपचागारे शिशुं श्वपच
वल्लभं॥ इतश्चेतश्चापुच्छं नमुत्पीडमिव यामुनं॥५॥ द्वादशाब्दं दर्शायातं संस्थितं षोडशाब्दिकं॥ पीवरं समुदारांगं पयोदमिव मेदु
रं॥६॥ सारमेयपरीवारं विहरंतं वनाद्वनं॥ निघ्नंतं मृगलक्षाणि पौलिंदीं स्थितिमागतं॥७॥ तमालतायेवाथ श्रितं श्वपचकन्यया स्त
नस्तबकशालिन्या नवपल्लवहस्तया॥८॥ श्यामया मलिनाकारदशनोर्मलया॥ वनपल्लवया स्मरविलासवलितांगया॥९॥
मल
श्वानस्तेव मृगयार्थं परिवारा यस्य॥ पौलिंदीं कैरातीं स्थितिं वृत्तिं॥७॥ अथ श्वपचकन्यया श्रितं कृतोद्वाहमिति यावत्॥८॥ दंतधावनाभावान्मलिनाकारास्वा
भाविकशौक्ल्याद्रमलादशनमाला यस्यास्तया॥ वनपल्लवाभरणं यस्यास्तया तथाविधैर्स्मरविलासैर्वलितांगया वनपल्लवशब्दे उपपदे आतेः क्विप्॥९॥

नवत्वादेवेश्यानवं नित्यामध्वनं यथास्यात्तथा इत्यथा वा कुसुमर्द्धिषु पुष्पसमृद्धिमत्सु वनांतेषु ॥१०॥ आकारमभ्यागतं गृहीतपुरुषाकारं विंध्यकान्तारमिव दुःखत्वेक्षा ॥११॥
१२॥ किंकिरातादिपदे स्वतन्त्रं जयोग्यत्वं तो ॥१३॥ काननकोशेषु विषमेषु तद्दुं अमाधरणवंतमित्यर्थः ॥ बहुज्ञं पंडितं ॥१४॥ अत्यंतविषमाः श्रोतुमप्याशक्याः उदंता
श्चरित्राणि येषां ॥१५॥ अथ तत्र होऽसौ तमं दुःलात्स्वदेश स्वदीयग्रामसंबंधिनी जन्मभूमिमुपेत्य हरेतालादिपर्णैर्मठिकां कुटीं कृत्वा स्थितं स्वदेहसमप्रमाणः पुत्रा

विलसंतं वनांतेषु तया सहनवेश्यया ॥ श्यामलं श्यामया भृंगं भृंग्येव कुसुमर्द्धिषु ॥१०॥ वनपर्णलतापत्रे वसंतं व्यसनाहतं ॥ विंध्यकां
तारमाकारमभ्यागतमिवोद्भटं ॥११॥ विश्रांतं वनकुंजेषु सुसंगिगिरिदरीषु च ॥ निलीनं पत्रपुंजेषु गुल्मकेषु कृतालयं ॥१२॥ किंकिरा
तावतंसाढ्यं प्रथिकास्त्रग्विभूषितं ॥ केतकोत्तंससुभगं सहकारस्तनस्त्रगाकुलं ॥१३॥ लुलितं पुष्पशय्यासु भ्रांतमब्धितटीषु
च ॥ तद्दुं काननकोशेषु बहुज्ञं मृगमारणे ॥१४॥ प्रसूतमथ शैलेषु पुत्रान्निजकुलांकुरान् ॥ अत्यंतविषमोदंतानबदिरः कंटका
निव ॥१५॥ कलत्रवंतं संपन्नं स्थितं प्रक्षीणयौवनं ॥ शनैर्जर्जरतां यातं दृष्टिहीनमिव स्थलं ॥ १६ ॥ ततोऽसौ तत्र हग्रामजन्म
देशमुपेत्य तं ॥ संस्थितं मठिकां पर्णैः कृत्वा हरे मुनीन्द्रवत् ॥१७॥ जराजरठतां यातं स्वदेहसमपुत्रकं ॥ जीर्णप्राग्भारसश्वभ्रतमा
लतरुसन्निभं ॥१८॥ प्रौढश्वपचगार्हस्थ्यं कुर्वाणं बहुबांधवं ॥ क्रूरनामार्थवचनां परां वृद्धिमुपागतं ॥१९॥

यस्य जीर्णप्राग्भारसाथस्तथाविधेन श्वभ्रोत्सन्नतमालतरुणा सन्निभं सदृशं ॥१८॥ क्रूराणि नामान्याख्याः अर्थाः क्रियाः वचनानि यस्याः परां कुटुंबवृद्धिमुपाग
तं स्वं अपश्यदिति एतदंतानां सर्वविशेषणानां परेणान्वयः ॥१९॥



अन्येभ्यः श्वपचेभ्यो जरठः असौ गाधिः अथानंतरं भ्रमहारिणः भ्रांतिमेवानुवर्तमानस्य कलत्रिणः कुटुंबिनः स्वात्मनः स्वस्य यावत्कलत्रं कुटुंबं अभूत्तत्
रसुना आवृत्य आशेषेण निःशेषतया नीतं अपश्यदिति द्वयोरन्वयः यथा आसारसलिलेन वृष्टिजलप्रवाहेन वनपतितशुष्कपर्णगणो नीयते तद्वदि
त्यर्थः ॥२०॥२१॥ अथासौ जरठ एक एव अटव्यां प्रलपति रोदिति ॥२२॥२३॥ अंडजो हंसादिः ॥ अन्येन प्रेर्यमाणः पराधीन इव ॥२४॥ कीराणां जानपदानां अ

अथापश्यदसौ गाधिर्यावत्तस्य कलत्रिणः ॥ जरठश्वपचेभ्यश्च स्वात्मनो भ्रमहारिणः ॥२०॥ तत्कलत्रमशेषेण नीतमात्म
मृत्युना ॥ आसारसलिलेनाशु वनपर्णगणो यथा ॥२१॥ प्रलपत्येक एवासावटव्यां दुःखकर्षितः ॥ विप्रस्थ इवासारंगो विगता
स्रोऽश्रुलोचनः ॥२२॥ दिनानि कतिचित्तेन नीतानि शोकपरीतधीः ॥ तहो स्वदेशं संशुष्कपद्मं सर इवांडजः ॥२३॥ विजहार बहून्दे
शानना स्थितयान्वितः ॥ प्रेर्यमाण इवान्येन वातनुन्न इवांबुदः ॥२४॥ एकदा सा पकीराणां मंडले श्रीमतीं पुरीं ॥ खेऽसौ
विहरन्शून्ये सद्विमानमिवांबरे ॥२५॥ न स्यद्दत्तांशुकच्छन्नमार्गवृक्षलतांगनं ॥ आगुल्फाकीर्णकुसुमं चंदनाग
रुसुंदरं ॥२६॥ सामंतैर्ललनाभिश्च नागरैश्च निरंतरं ॥ स्वर्गमार्गोपमं राजमार्गमध्यमवापसः ॥२७॥ मणिरत्नकृतागारं तत्र
मंगलहस्तिनं ॥ ददर्शामलशैलेंद्रमिव संचारचंचलं ॥२८॥ अतो राजनिराजार्थं विहरंतमितस्ततः ॥ रत्नमिव रत्नार्थं चिंतामणि
रिदृक्षया ॥२९॥

वासभूते मंडले शून्ये अंबरे विहरन् संचरन् २५ न स्यंतः रत्नैरंशुकैश्च छन्ना मार्गस्था वृक्षाः अंगनाश्च यस्मिंस्तथाविधं राजमार्ग
मध्यमवापेति परेणान्वयः २६ निरंतरं निबिडितं २७ मणिरत्नैर्मणिप्रोतैः कृतागारं कृताश्रयं कृतजालकं शैलेंदुपक्षे कृतरेवमरने अमरशैलेंद्रं मेरुं २८
इतस्ततो विहरंतं संचरंतं रत्नं परीक्षाकुशलपुरुषं २९

अमौश्वपचः ३० स्वस्यगंडस्थलेऽयोजयत्नआरोहयामास ३१ महांतोअर्णवाः समुद्राइव ३२ आशाशिरोमनोरथाश्च ३३ ३४ आवारयामासुः परिवव्रुः क्षीरोदस्य
गतेनमथनकृतक्षोभेनविश्रांताः ३५ गुणेषुसूत्रेषुप्रोतैर्ग्रथितैर्मालाम्रस्तैरितियावत् नानावर्णमणिषुप्रतिबिंबनात्तत्तत्प्रभाभिः प्रभातोऽर्कोयासुतथाविधाः

तमसौश्वपचोनागंकौतुकोद्धुरयादृशा चिरमालोकयामासस्पंदयुक्ताचलोपमं ३० आलोकयंतमादायतंकरेणसवारणः स्वकरेयोजय
न्मेरुस्तटेर्कमिवसादरं ३१ तस्मिन्कूटगतेनेदुर्जयदुंदुभयोभितः कल्पांबुदाइवाकाशमविरूढमहार्णवाः ३२ श्रीतालोबभौराजाज
यतीतिजनस्वनः उदस्रत्संप्रबुद्धानांविहगानामिवारवः ३३ उदस्रद्वंदिवृंदानांघनकोलाहलस्ततः वेलाविलुलितांभूनामंबुधीना
मिवध्वनिः ३४ तंतत्रावारयामासुर्मंगलार्थंवरांगनाः क्षीरोदगतविश्रांतालहर्यइवमंदरं ३५ मानिन्यस्तंगुणप्रोतैर्नानारत्नैरप्र
रयन् नानाप्रभाप्रभातार्कावेलाइवतटाचलं ३६ तुषारशिशिरस्पर्शैस्तास्तंहारैरभूषयन् श्यामाः वननदीपूरैर्वर्षाः शृंगमिवो
त्तमं ३७ विचित्रवर्णसौगंध्यैः पुष्पैरावलयस्त्रियः वनंमधुश्रियइवतल्लोलकरपल्लवाः ३८ नानावर्णरसामोदैस्तास्तमाप्लु
विलेपनैः अथ लेपयन्प्रभाजालैर्नगोन्नमिवधातुभिः ३९ रत्नकांचनकांतौवारदेवितमाततं संध्याभ्रतारंकुनदीव्याप्तंमेरु 
रिवांबरं ४० भूषितः सविलासाभिर्बालवल्लीभिरावृतः रत्नपुष्पांशुकाकीर्णः कल्पवृक्षइवावभौ ४१ तादृशंतमुपाजग्मुः
परिवारसमन्विताः सर्वाःप्रकृतयःफुल्लंमार्गंद्रुममिवाध्वगाः ४२ 

वेलाःस्वतटस्थमचलंगिरिमिव, ३६ श्यामाःयुवत्यः वर्षाः वृष्टयः वननदीनांपूरैस्तन्मध्यपतितंगिरिशृंगमिव ३८ नगोगिरिर्द्रुतुभिर्लक्षणयाधातु
संबंधिभिः प्रभाजालैरभ्रमाकाशंमेघमिववा ३९ रत्नकांचनभूषणैः कांतः भूषितः अमौराजाचित्तमारदेतासामितिशेषः ४० ४१ ४२

तः प्रकृतयः सैंहंआसनंउपवेश्यक्रमात्ब्राह्मणादिवर्णक्रमादभिषिषिचुः अभिषिच्यतस्मिन्प्रागुक्तेगजेउपवेश्यानुजग्मुरितिशेषः ४३ ४४ ४५ ४६ हरिणाहतानांहिदारि
तानांकरिकुंभानांउन्मुक्तानांमुक्ताफलानांकलापैः प्रविरचितंभूषितंशरीरंयस्यशांताः प्राक्तनचिंताः विषादाश्चयस्यतथाविधः सन्ततनगरेसद्भिःसंविदोदारिभिःसहभोगै
रमततेमे यथारविकरैर्मदनेवतसद्मः सरस्यांवारिरुहैरमतेतद्वत् ४७ परितोविस्तृतंप्रस्तंतन्त्रपौजाराजशक्तिर्यस्य अतएवसर्वदिक्षुसंस्थिताआज्ञाय

तासनमासनेसैंहेतत्राभिषिषिचुःक्रमात् तस्मिन्नेवगजेशक्रमैरावतेइवामराः ४३ एवंसश्वपचोराज्यंप्रापकीरपुरांतरे आ
रण्यहरिणंपुष्पसप्राणमिववायसः ४४ कीरीकरतलांभोजप्रमृष्टचरणांबुजः सर्वांगेकुंकुमालेपैःसंध्याबुधरशोभ
नः ४५ जज्वालकीरनगरेनागरीगणवानसौ सिंहीगणयुतःसिंहोयथाकुसुमितेवने ४६ हरिहृतकरिकुंभोन्मुक्तमुक्ता
कलापप्रविरचितशरीरःशांतचिंताविषादः अरमतसहसद्भिस्तत्रभोगैःसरस्यां रविकरमदतप्तोवारिरुहैरिवेभः ४७ परिवि
स्तृतप्रतापौजाः सर्वदिक्संस्थिताज्ञः कतिपयदिवसैर्हासिद्धदेशव्यवस्थः प्रकृतिभिरलभ्रंडशेषराजन्यभारःसगवलइतिना
म्नातत्रराजाबभूव ४८ मोक्षोपायेउपशमप्रकरणेगाधेवृत्तांतेश्वपचराज्यलाभःसर्गः ४५

म्नाकतिपयदिवसैरीहयास्वेच्छयैवसिद्धाराज्यव्यवस्थायस्य सश्वपचःगवलइत्यभिनवेनाम्नाप्रसिद्धः तत्राकीरदेशेराजाबभूवेत्यर्थः ४८ इतिश्रीवासिष्ठता
त्पर्यप्रकाशेउपशमप्रकरणेपंचचत्वारिंशःसर्गः ४५

इहतं श्वपचात्मुलात्श्वपचं त्वलैंजने। प्रविष्टेसोपि निर्दग्धः सबुद्धो गाधिरीर्यते। विलासिनीभिर्वलित इत्यादिविशेषणाः सः विस्मृतात्मस्वभावोस्मदिति त्रितीयेनान्वयः॥१। सिद्धम प्रतिहतं। अनुशासनमाज्ञापनं यस्य, वीतशोकभयायासाः प्रजाः यस्य।२। क्षीबो मत्तइव।३। आर्यवृत्तं दयादाक्षिण्यशौचादि।४। नविद्यंतेतमस्मा रकें दुर्कतेजो स्वं भोदाश्रयस्मिं स्तथाविधमंबरमिव सर्वतोनीलं।५। किमर्थं सत्कम्स्वगणास्तत्राह बहुि ति। प्रभुतया हृंहितमुपचितं। आहर्यकृत्रिमं भूषणं

श्रीवसिष्ठ उवाच। विलासिनीभिर्वलितो मंत्रिमंडलपूजितः। वंदितः सर्वसामंतैश्छात्रचामरलालितः॥ १। सिद्धानुशासनः कांतो ज्ञातराज्यगुणक्रमः। वीतशोकभयायासप्रजः प्राप्तमहायशाः॥ २ विस्मृतात्मस्वभावोस्मदनिशंस्तवमंगलैः। आनंदरूपं यांयाहस्थामस्तंशंसी बइवासवैः॥ ३ चीरेषु श्वपचो राज्यं वर्षाण्यष्टौ चकार ह। आर्यवृत्तमशेषेण तावत्कालं बभार ह॥ ४। सद्द छ्वे कदाथासाव निष्ठस्यक्तभूषणः। अतमस्मारकं दुर्कतेजोभोदमिवांबरं॥ ५। बहुमन्यतनोहारकेयूरवलयान्यसौ। प्रभुतां हृंहितं चेतो नाहार्यमभिनंदति॥ ६। एक स्वाजिरं बालं ताद्दग्वेषः सनिर्ययौ। मुख्यांगणान्तभोभागारस्तंगच्छन्निवांशुमान्॥ ७। तत्रापश्यद्दूनश्यामंपीनं श्वपचपेटकं। गायन्तं दुवसंतोत्थं कोकिलानामिवव्रजं॥ ८। धुनानो वद्धकीतंत्री करपल्लववलीलया। मदुरेफं रणद्रेफामलिश्रेणीमिवद्रुमं॥ ९।

दिनामिनंदति।६। आंतरान्मुख्यजनाश्रितादंगणाद्वाह्यं नीचजनसाधारणमजिरमंगणं निर्ययौ यथा। अस्तंगच्छन्गगनमिव अन्तः अंशुमानमुख्याद्गगनांगणं गणात्मांतर्नभोभागं निर्यातितद्वत्।७। श्वपचानां पेटकं संघं मदुमधुरं गायन्तं।८। वद्धक्यावीणायास्तंत्रीगुणं मदुरेफं मदुस्वरं दुमं धुनानां कंपयंतीं रणंतः रेफाः पक्षाः यस्यास्तथाविधामलिश्रेणीं भ्रमरपंक्तिमिव।९। राम॰ ॥१३०॥

DR BHAU DAJI

हिमैः आस्रणं काचमयं गिरेःशृंगमिवस्थितः श्यामोधूलिधूसर इतियावत्।१०। कंटनेति स्वेनाम्ना वरनं बोधयन्।११। रक्तकंठं मधुरकंठध्वनिं मानयति बहुमन्यते किं रागवान्स्वरवित्। कांता ध्वनुरागवान्वा। स्हस्यवस्त्रासनानां चार्पणैर्दानैः।१२। मधुर्वसंतः रसोपेदीर्घः निर्हतिं सुखं।१३। सीमांतः परमावधिः सीमंतः केशवेशेस्यइत्युक्तेः

एकस्तस्मात्समुत्तस्थौ नरवानरक्तलोचनः। काचशृंगं हिमापूर्णमिवश्वपचनायकः॥ १०। भोकटं जेतिसहसावरत्नीरमहीपतिं इह राजाभवंतं वा कश्चित्केयक्रियाविदं॥ ११ रक्तं कंठं मानयति रागवानिवकोकिलं। आस्रयति वाकश्चिद्दहवस्त्रासनार्पणैः॥ १२ मधुरसालविटपं फलपुष्पभरैरिव। दर्शनेन नता धात्रा हंपरां निर्हतिमागतः॥ १३ पद्मं सूर्योदयेनेव चंद्रोदय इवौषधीः। आनंदानामशेषाणां लाभानां महतामपि॥ १४ विश्रामाणामनेतानां सीमांतो बंधुदर्शनं। श्वपचे प्रवदत्येवं राजाजावत्तयातया॥ १५ चकारतत्कालजयाचेष्टमेवावधीरणं। श्रुतावातायनगताः कांताः प्रकृतयस्तथा। श्वपचोयमितिज्ञात्वा म्लानतामलमाययुः॥ १६ पद्मास्तुषारप्राहत्यायामासावग्रहाइव। दावंतइवाहीशनागरानविरेजिरे॥ १७ नृपो वधीरयामास तां तां श्वपचसंकथां। वृक्षाग्रंत मार्जारफेत्कारं मृगराडिव॥ १८ सतरं प्रविवेशांतः पुरमाम्लानमांबुनैः राजहंसइवावर्षसीदत्सरसिजंसरः॥ १९ ग२

परस्रूपाभावः।१४। अवधीरणं तिरस्कारं। तुषारैः प्रातिपस्यतीतितस्यातुषारपाहत्याइवेत्यत्रापिसंबंध्यते। प्राहरणेइत्यस्मात्क्विपिन्तृतीयैकवचनेआतोधातोरित्यालोपः माबग्राहाः अनावृष्टिपीडिताः देवैर्भीतो निस्तब्धं तइव।१७। अवधीरयामास निर्भर्त्सयामास संकथां संभाषां।१८। सीदत्सरसिजं म्लानपुष्पसंकजं।१९।

वै॰ द१

सर्वेषावयवेषु विश्रांतां व्याप्तां। जान्वि वस्तम्भाति विष्टभ्नोतीति जानुस्तंभो मूलभागस्तदंतराल स्थो महारंध्रे कोटरे अग्निर्यस्य द्रुमः शाल्मल्यादिः २० जालपदेन पुष्प जाला स्तदंगुल्यं गृह्यते आखुना मूषकेण भुक्तमूलं खंडितमूलं। २१ गृहे एव तिष्ठंतमपि नास्राक्षुः नस्पृष्टवंतः ॥२२ २३ दग्धं स्थलं श्मशानदेशमिव। २४ ज नाजनसमूहः अस्यपार्श्वं नाढौकत नाभ्यर्पत। गिरेः पार्श्ववप्रशिलाभागं अग्निरिव। २५ सुअज्ञाशक्त्या तां कुतोनवशी चकार तत्राहमंदोत्साह इति। सम्पैर्भरा

सर्वावयव विश्रांतां म्लानतामयमाययौ। जानुस्तंभांतरमहारंध्राग्निरिव द्रुमः। २०। तत्रापश्यदसौ सर्वं विपण्णवदनं जनं। जालं कु कुमपुष्पाणां भुक्तमूलमिवाखुना। २१ मंत्रिणो नागरा नार्यस्ततस्ते तं महीपतिं। नस्प्राक्षुरपि तिष्ठंतं गृहस्थं शवं यथा। २२ भृत्याश्चाकृतसत्कारं दूरस्थनमथास्यजन्। दुःखयुक्ताघनस्नेहा अपि बालाः शवं यथा। २३॥ अनानंदमुखं श्यामं शरी रश्रीविवर्जितं। दग्धं स्थलमिवैनं ते बहुमन्यं तनाकुलाः। २४। धूमायमानदेहस्य परितापदशावतो नाढौकतास्य जनिता पार्श्वमग्निर्गिरेरिव। २५। मंदोत्साहाः सनुद्भूताः सम्पसंघातवर्जिताः। नतदाज्ञाः परं प्रापुर्मस्वनीवांबुविप्रुषः। २६। क्रूर कर्मकरोत्संगताशुभदायिनः। तस्माद्विशेषेण जना राक्षसादिव दुद्रुवुः। २७। एक एव वसन्वासौ जनमध्यगतोपि सन्। अ र्थादिगुण निर्मुक्तः परदेश इवाध्वगः। २८



दिसंघातैश्च वर्जिताः उपेक्षितास्तदाज्ञाः परं विषयमाज्ञापनेमोघं पुरुषं नप्रापुः २६ संगतेन अशुभस्य पापस्य वधादेश्च दायिनः राक्षसादिव भीता इतिशेषः २७ अर्थाः धनानि आदिपदात्सुजनसुहृद्दारयोगः लंते २८



वेणूनामपि मुक्ताकरत्वान्मुक्ताजालयुतायवायुनाकूजते कीचका सवेणुजातिभेदाः। २९। ३०। शुष्केरिंधनैरेधिताः वर्द्धिताः तारकास्विव ज्वलिता सुदीप्यमाना सुमती पुत्र कर्मकलात्कर्तीरिकव ३१। नागरपदेन तस्याजनालक्ष्यंते। ३२ तदेवनगरं वर्णयति करुणेत्यष्टभिः। अवष्टब्धं रुद्धवलं बेनविष्टब्धं ज्वलतां कुंडानां सुपांते संदा बनाम्रढारुदंतास्वप्रजायंच। रुदत्तअश्रु निर्मुंचत् कंदत आक्रुशदितिभेदः मारुतैः सावश्यय इंझानिलैः। ३५ चिता साहदीपिता नां विशेषेद्दाराणां मांसेमां

सशमालपरोव्यस्येनाघापं नागरा ददुः। मुक्तजालयुतायापि कीचकायाधगाइव। २९। अथसर्वे वयं दीर्घकालं श्वपचदूषिताः प्रायश्चित्तैर्नशुद्धामः प्रविशामो हुताशनं। ३०। इति निर्णीय नगरे नागरा मंत्रिणस्तथा। अभितो ज्वालयामासुश्चिताः शु ष्कैंधनैरेधिताः। ३१। ज्वलिता समितस्तासु तारकास्विव रेखतरा। बभूव नगरं सर्वमाक्रंदपरमानवं। ३२ करुणारावमुखरैः क लत्रैर्बाष्पवर्षिभिः। अवष्टब्धं ज्वलत्कुंडोपांतमंदरुदत्प्रजं। ३३। अग्निकुंडप्रविष्टानां मंत्रिणां भस्तरोदनैः रुदत्क्रंदद्धृढत रमरण्यमिव मारुतैः। ३४ चितादीपितविस्रंदमांससमांसलगंधया। जीतनीहारमुत्पातवात्यमावकरोद्धतैः ३५ वातदीर्घवसा गंधहृतानीतखगोर्जितैः चक्रैर्व्योमाभवच्छन्नभास्करं जलदैरिव। ३६ वातोद्धूतचिताबह्निप्रज्वलद्व्योममंडलं उड्डीना ग्निकणव्रातताराधारदिगंतरं। ३७

मलउपचितोगंधोयस्यास्तया वात्यया अवकरेभ्य उत्करेभ्यः उत्थितैरजोभिः जातनीहारउद्भूतमिहिकमिवस्थितं ३५ पातेन दीर्घहूरमस्तैर्वसागंधैर्हृतानी तैः खगैः पक्षिभिः पिशाचादिभिश्चोर्जितैस्तेषां चक्रैर्मंडलैः जलदैश्छन्नभास्करं व्योमैव नगरमभवत् नगरव्योमैव वाविशेष्यं व्याख्येयं ३६ ३७

पुनः कीदृशं तदभवत्तदाह प्रमत्तेति. प्रमत्तैरुद्धतैस्तस्करैर्मर्षणाद्यपहारकाले कं दंतः बालाः कुमारा रीपत्नी दास्यश्च यत्र संत्रस्तैर्नागरैः पार्थ त्यक्तं जीवितं आस्था स्वना
मत्वयत्रा असंस्थितिनिर्मर्यादं. ३८. मरणाय व्यग्रा स्तत्र माराणा नागरा यत्र तथाविधम मवरित्यनुषज्यते. ३९. ४०. ४१. अयं कदर्थोऽनर्थः ४२. ४३. वपुः स्वशरीरं

प्रमत्ततस्करक्रंददुग्धबालकुमारकं. संत्रस्तनागरापास्तजीविताख्यमसंस्थिति. ३८. अलक्षितगृहंचोरलुंठिताखिलसंपदं. त्यक्त
पुत्रकलत्रं तन्मरणव्यग्रनागरं. ३९. तस्मिंस्तथावर्तमाने कष्टे विधिविपर्यये. अशेषजनताशेषकल्पांतसदृशस्थितौ. ४०. राज्य
सज्जनसंपर्कपवित्रीकृतधीरधीः. गवलश्चिंतयामास शोकेनाकुलचेतनः. ४१. मदर्थे हि कदर्थोऽयं देशेऽस्मिन्स्थितिमागतः. अ
कालकल्पांतमयः सर्वनायकनाशनः. ४२. किं मे जीवितदुःखेन मरणं मे महोत्सवः. लोकनिंद्यस्य दुर्जंतोर्जीवितान्मरणं वरं. ४३
इति निश्चित्य गवलो ज्वलिते ज्वलने पुनः. पतंगवत्स्वदेहेन मकरोदाहुतिं वपुः. ४४. तस्मिन्ज्वलाकुलवलनाग्निहुताशशोदेहे पतत्य
वयवाकुलतां प्रयाते. स्वांगावदाहदहनस्फुरणावरोधादंतर्जले झटिति बोधमवाप गाधिः ४५. श्रीवाल्मीकिरुवाच. इत्युक्तव
त्यथ मुनौ दिवसो जगाम सायंतनाय विधये स्तमिनो जगाम. स्नातुं सभा कृतनमस्करणा जगाम श्यामाक्षये रविकरैश्च सहाजगाम
४६ दिन १२ मोक्षोपाये उपशमप्रकरणे गाधिवृत्तांते राज्यभ्रंशः सर्गः ४६.

ज्वलितेऽनले आहुतिमकरोत्. ४४. तस्मिन्ज्वलनाग्निदेहे निर्वेदबलाद्धुताशशशोपतति सति स्वांगानां हस्तपादादीनां अवदाहे दहनेनाग्निस्फुरणानि संचलनानि तैर्नुरो
धात् अप्यमर्षणं कुर्वन् गाधिरंतर्जले झटिति बोधमवापेत्यर्थः. ४६. इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे षट्चत्वारिंशः सर्गः. ४६.



गाधिः स्वप्नमिव स्वत्वात् क्षीरन्न पश्चेष्टितं. गत्वा दृष्ट्वा मुहुः पृष्ट्वा विस्मितो भरितीर्यते. आधिरूपात् प्रागुक्तभवभ्रमात् प्रशशाम आकुलीभवत्यस्मिन्नित्याकुलीभावः
अधिकरणे घञ् वेलासन्निहितै आवर्तैरिव. १. २. स्वप्राक्तनगाध्यहंभावउत्सर्गं बोधमापठन्निद्राव्यपेतनिद्राधी र्यस्य स इव. क्षीवतायां मदिरादिमदे. परिणता
शयः स्वस्थचित्तः. ३. ओजले स्नाना या वतीर्णः सोऽयं गाधिरहं इदं स्नानशेषतर्पणादिकृत्यमेका मेंद इं प्राग्दृष्टं चंडालराज्यादि न कार्यं. लोको जनो यथा प्रत्य
तितद्गत. ४. पदे पादं उदृश्ये उद्धृतवान् शिशिरांते शीतापगमे प्रहृतो स्वयं संजातमुकुलमुखं माधवो वसंतः ५. एषा चासौ वारिककुप्यो भवती चेति वारयतेः परिदृश्य

श्रीवसिष्ठ उवाच. मुहूर्तं द्वितीयेनाथ गाधिराधिमयभ्रमात्. प्रशशामाकुलीभावो वेलावर्त इवांबुधेः १. मनोनिर्माणसंमोहात्तस्मा
त्सविरराम ह. कल्पांतसमये ब्रह्मा जगद्विरचनादिव. २. बोधमाप शनैः शांतः स्वमेवोन्निद्रधीरिव. क्षीवतायां प्रशांतायां यथा परिण
ताशयः ३. अयं सोऽहमिदं नैतिरदर्शहं निशाव्यपगमे लोको यथाक्षीणतमःपटः ४. स्वतस्वरूपो थपरस्तु दृश्ये सजलांतरात् शि
शिरांते प्रवृत्तास्यं सरोजमिव माधवः ५. एतद्वारिककुप्योऽमवंती मिमां अन्यामिव पुनः पश्यन्विस्मयं परमं ययौ. ६. कोऽहं किं व
पश्यामि किमकार्षं महं किल. सर्वं विचारयंश्चित्ते सम्रमंगमभ्रत्क्षणं. ७. श्रांतस्तक्षणमात्रेण संभ्रमं दृष्टवानहं. इति
विज्ञाय सलिलादुदस्थादुदयार्कवत्. ८. चिंतयामास च तटे क्षणमात्रा क्षमाप्रिया. यदाहं प्रतिमायातो मध्ये मातर्महेलयोः ९

मानेवर्यादिर्मिस्तद्गतीतिवाविषदः ६. सम्रमंगं स्वमंतर्विचारयन् अभवत्. ७. मतस्य छीतिवशात् क्षणमात्रेण संभ्रमं महाभ्रमं उदस्थात् उद्गिनाति स्थेतिमि
मीलुरु. उदयोगिरिः कालीवातत्स्थार्कवत्. ८. चिंताप्रकारमेव दर्शयति क्षेत्यादिना. महिलाशब्दे स्वे च महेलेति वोदसोऽत्तमः ९

कार्यमिदं
१ वसुमती

मि

अमतेः अप्रौढचित्तावस्थस्य वातनीतस्य पत्रस्य पर्णस्य मातापितृस्थानीयं वद्वीरूपं अग्निनेव मत्युना नष्टौ १० द्विजो विप्रः मदिरायाः स्वरूपं रसमिव ११ स्वदे
शस्य स्वजन्मभूमेः स्वाः बांधवाः ज्ञातयः येषां मध्ये अहं जीवंस्य जामि मरणं दृष्टवान् स्थितेके नामेति संबंधः १२ विविधं आरम्यत इत्यारंभं पदार्थजातं संरंभं

बालस्य मातापितरौ नष्टौ किल मम मामतेः वातनीतस्य पत्रस्य वद्वी वृक्षमिवाग्निना १० अविवाहो स्मि जानामि न स्वरूपमपि स्त्रियः
दुष्टायाः सोमकारिण्या मदिराया इव द्विजः ११ अतिदूरतरीभूताः स्वदेशस्य स्वबांधवाः केनाम मम येषां तेमध्ये जीवंस्य जा
म्यहं १२ तस्मादेतत्समुद्भूतमहं किं नाम दृष्टवान् विविधारंभसंरंभं गंधर्वनगरं यथा १३ तदास्तामेतदेषा हि बंधुमध्ये म
तस्थितिः मायामोहेमनागस्मिन्न सत्यमुपलभ्यते १४ नित्यमेवमनंतासु भ्रांतिदृष्टिषु देहिनां चेतो भ्रमति शार्दूलो वनरा
जिष्विवोन्मदः १५ अवधार्येति तं चित्ते मोहं गाधिर्निनाय सः दिनानि कति चित्तस्मिन्स्वक एवाश्रमे तदा १६ एकदा गाधि
मगमत्कश्चित्तत्र प्रियोऽतिथिः ब्राह्मणा मिव दुर्वासाः स विशश्राम सश्रमः १७ परमां तुष्टिमानीतः फलपुष्परसाशनैः सो
ऽतिथिर्गाधिना तेन वसंतेनेव पादपः १८ मिथो वृद्रेतिसंध्यौ नीकृत जाप्यावुभावपि क्रमाच्छयनमासाद्य तस्थतुर्मृदुपल्लवे १९

जन्माद्यभिनिवेशं च किंचन मदृष्टवान् १३ स्वप्नेस्येव बाध्या मिथ्यात्वं निश्चित्योपेक्षतेतदास्तामिति ततस्तस्मादेषा भ्रांति रास्तां नामेत्यर्थः १४ १५ स्वक एवा
श्रमे कति चिद्दिनानि निनाय १६ कृशत्वात्सश्रमः सोऽतिथिस्तदाश्रमे विशश्राम विश्रांतिमकरोत् सायमुपासेतियावत् १७ तुष्टिं तृप्तिं १८ १९



ससतपोध्यानादिव्यापारेणमुचिता अनुरूपा कथा प्रावर्ततेति इति खल्वर्थे निपातः शांता शांतिरसप्रधाना सक्रियया कृत्स्नां कृतुर्लमिनोतिपरिच्छिनत्तीति कृतु
तमः सूर्यस्तस्य आशाया उत्तरदिशश्च योगेव संतेतद्दुचिता पुष्पश्रीरिव २० तयोर्वार्ता प्रसंगपतितं २१ वयं अस्मदो द्वयोश्चेति बहुवचनं २२ नानाविधा आ

ततः प्रववृते शांता तयोस्तापसयोः कथा सव्यापारोचिता पुष्पश्रीरिवर्तुत्समाशयोः २० तं पप्रच्छातिथिं गाधिः प्रसंगपतितं वचः
किं ब्रह्मन्सुकृशांगस्त्वं किमिति श्रमवानसि २१ अतिथिरुवाच ममातिकार्श्यश्रमयोर्भगवन्शृणु कारणं कथयामि
तथाभूतं वयं नासत्यावादिनः २२ अस्त्यस्मिन्वसुधापीठे उत्तराशानिकुंजके कीरो नामातिविख्यातः श्रीमान्जनपदो महा
न् २३ तत्राहमवसं मासं पूज्यमानः पुरे जनैः नानात्मसादलोलात्मा चित्रवेतालमोहितः २४ एकदैकेन तत्रोक्तं कथागस्ता
वतः क्वचित् इहाभूच्छ्वपचो राजा वर्षाण्यष्टौ द्विजेति मे २५ ततो ग्रामेषु तत्पृष्टैः प्रोक्तं सकलजंतुभिः राजाभूत्स्वपचो
वर्षाण्यष्टाविहेति तैः २६ सोऽयं मत्तेः परिज्ञातः प्रविष्टो ज्वलनं जवात् ततो द्विजशतानीह प्रविष्टानि हुताशनं २७ इति तेषां मु
खाच्छ्रुत्वा तस्मान्निर्गत्य मंडलात् प्रयागे कर्षणं दृष्ट्वा प्रायश्चित्तमहं द्विज २८ कृत्वा चांद्रायणस्यांते त्वत्तीयस्याद्य पारणं इ
हाहमागतस्तेन श्रांतोऽस्म्यतिकृशोऽस्मि च २९ श्रीवसिष्ठ उवाच इति स्मृ भवता तेन गाधिना सतदा द्विजः भूयः पृष्टो यथैतदेव कथयमा
मामनान्यथा ३० अथ विस्मयवान्गाधिस्तां नीत्वा तत्र शर्वरीं जगद्गेह महादीपे रवावुदयमागते ३१

त्मनः स्वरं तेरोचतइति नानात्मसादामोऽज्यमेदाम्नेपुलो भोगार्थो तदात्मा प्रधानः सन् कृतः स्वमेव मम तत्राह चित्रेति २४ २५ २६ सस्वपचः अंते अष्टवर्षांते

विस्मयेन उद्धुरया गरीयस्या ॥ अथ गाधिः स्वौटजमागते स्नातिथौ आप्लव्य गते सति इदं वक्ष्यमाणं संचिंतयामासेति परेण संबंधः ॥ ३२ ॥ मया यत्स्वभ्रमे भ्रांतिदशायां दृष्टं
तत् द्विजेनातिथिना सत्यमेतदुक्तं मम इति सर्वरूपमिदं किं मायालक्षणः शंबरस्यासुरस्य रचनाक्रमः स्यात् संभावनायां लिङ् ॥ ३३ ॥ सा माया मिथ्यैव तत्र संशयो
द्रष्टुं शक्यः शेषमवशिष्टं तस्यातिथेश्चांद्रायणनिमित्तं तं आत्मश्वपचोदंतं पश्यामि द्रक्ष्यामीत्यर्थः ॥ ३४ ॥ तदेवाह तदिति तस्यातेदवस्यास्यात्मनः श्वपचस्य उदंतं

स्नातप्रातःस्नानविधावाप्लव्यास्वातिथौ गते । इदं संचिंतयामास विस्मयोद्धुरया धिया ॥ ३२ ॥ यन्मायासंभ्रमे दृष्टं सत्यमुक्तं द्विजे-
न तत् । उक्तं ममेति किं नाम स्यान्माया शंबरक्रमः ॥ ३३ ॥ यद्बंधुमध्ये मरणं मयात्तदृष्टमात्मनः । सा मायैव न संदेहः शेषं प-
श्यामि तस्य तं ॥ ३४ ॥ तदात्मश्वपचोदंतं द्रष्टुं तावदखिन्नधीः । भूतलं मंडलपर्यंतं ग्रामं गच्छामि सत्वरं ॥ ३५ ॥ इति संचिंत्य मन-
गंतुं मंडलांतरमादरात् । उत्तस्थौ भास्करः पार्श्वमेरोर्द्रष्टुमिवोद्यतः ॥ ३६ ॥ मनोराज्यमपि प्राज्ञा लभंते व्यवसायिनः ।
गाधिना स्वप्नसंदृष्टं गत्वा लब्धमखंडितं ॥ ३७ ॥ सर्वमध्यवसायेन दुःप्रापमपि लभ्यते । पश्चाद् गाधिर्जगन्मायां प्रमे-
यीकर्तुमुद्यतः ॥ ३८ ॥ विनिर्गत्याश्रमवन्मार्गे प्रावृडोघजवेन सः । देशान्तु लंघयामास बहून्वाततुरंगवत् ॥ ३९ ॥ तत्रैव दश-
निजाचारं भूतमंडलमागतः । करभः कंटकाढ्येकः कारंजमिव काननं ॥ ४० ॥

वृत्तांतं ॥ ३५ ॥ इति संचिंत्य गाधिर्मंडलांतरं द्रष्टुं उत्तस्थौ उद्यत उद्युक्तः ॥ ३६ ॥ तत्कथं द्रष्टुं शक्यमिति चेत् पुरुषप्रयत्नस्यालभ्यं नास्तीत्याह मनोराज्यमिति ॥ ३७ ॥ 
प्रमेयीकर्तुं चक्षुःप्रमाणगोचरीकर्तुं ॥ ३८ ॥ सः मार्गे प्रावृषि यः ओघो जलप्रवाहस्तज्जवेन त्वरमाणो भवन् वातसवतुरंगो वाहनं यस्य स मेघ स्यतद्वत् ॥ ३९ ॥ इद- 
शः प्रागदृष्टप्रकारो निजाचारो यस्मिंस्तद्भूतमंडलं च प्रथममागतः ॥ ४० ॥

---

संविदि बुद्धौ स्थितेनैव स्मर्यमाणेनैव सन्निवेशेन संस्थानविशेषेण स्थितं कंचिद्ग्रामकमपश्यत् ॥ ४१ ॥ ४२ ॥ चित्ते चिंतितः जन्मादिविस्तारो यत्र तथाविधः सप्रागृ
हो योग्गृहादिसंनिवेशस्तत्प्रचुरं आत्मनः श्वपचत्वं च लिंगैः पुनर्दृष्टवानित्यर्थः ॥ ४३ ॥ तच्छ्वपचास्पदं कर्तृतस्य मनः कामपि वैराग्यपदवीमनयत् प्रापया
मास ॥ ४४ ॥ तदेव वर्णयति प्रावृडित्यादिना किंचिदादृष्टं प्रत्यभिज्ञातं तत्त्यक्तं शयनकटखंडादि यस्मिन् ॥ ४५ ॥ कुड्यमतृमित्यवशेषगृहाकारमिति यावत् ॥ यैर्भी

स तत्र संस्थितेनैव सन्निवेशेन वै पुनः । अपश्यद्ग्रामकं किंचिद्गंधर्वं स्वपत्तनं ॥ ४१ ॥ ददर्श तस्य पर्यंते तमेव श्वपचालयं । अध-
स्ताद्भुवनस्येव पातालेन रकव्रजं ॥ ४२ ॥ चित्तचिंतितविस्तारसन्निवेशमयं परं । गंधर्वपदमावाल्यश्वपचत्वं च दृष्टवान् ॥ ४३ ॥ तेनै-
व संनिवेशेन प्राग्दृष्टं श्वपचास्पदं । तस्य कामपि वैराग्यपदवीमनयन्मनः ॥ ४४ ॥ प्रावृडासारलुठितं भित्तिजातयवांकुरं । प-
र्णस्तच्छादनार्के किंचिदादृष्टतल्पकं ॥ ४५ ॥ दारिद्र्यांतहृतमिव दौर्भाग्यमिव कुड्यमात्र । भ्रष्टांगमिव दौरात्म्यं दौस्थित्यमि-
व खंडितं ॥ ४६ ॥ गाधिर्दंतावदलितैर्गवाश्वमहिषास्थिभिः । धवलैर्व्याप्तपर्यंतं मास्फपकर्तमिव स्थितैः ॥ ४७ ॥ भुक्तं पीतं पुरातेन
येषु खर्परकेषु वै । तैरसंरंभ्रसलिलैः पानपात्रैरिवावृतं ॥ ४८ ॥ तामिरेवांत्रतंत्रीभिः संशुष्काभिर्लतावृतैः । रक्ताभिरिव दीर्घाभिः
परितः परिवेष्टितं ॥ ४९ ॥ चिरमालोकयामास स तदात्मगृहं जवात् । प्राक्तनं शुष्कशवतां यातं देहमिवात्मवान् ॥ ५० ॥

तं । यवारित्वारववं । भ्रष्टांगं सवलिनावयवं चौर्यादिदौरात्म्यमिव दौस्थित्यं दुर्दशां खंडितं छिन्नैकदेशं ॥ ४६ ॥ गाधिश्चिरमालोकयामासेति तृतीयेन संबंधः ॥ ४७ ॥ अस्यंदा
न्यभ्रसलिलानि दैवागतवृष्टिजलानि येषु तैः ॥ ४८ ॥ लतावृतैर्लतावत्तत्ताभिः परिवेष्टनैः परितः परिवेष्टितं आंत्रतंत्रीभिरिति पाठे लतानामावृतैरुखरलैरक्तामिस्तांत्र-
भिः प्रतापनैः परिवेष्टितमित्यर्थः ॥ ४९ ॥ शुष्कशवतां यातं स्वदेहमिव आत्मवान् तत्त्ववित् ॥ ५० ॥

तत्स्वगृहे मुद्रं ग्राममध्यतत्समीपस्थं ग्रामकं कुग्रामं ५१ श्वपचक्रमं श्वपचवृत्तांतं ५२ न शयंति स्फुटं स्मरंतीति यावत् ५३ ५४ ५५ अनल्पः स्मयो विस्मयः संरंभः प्रश्नोद्यो गश्च यस्मिन्कर्मणीति क्रियाविशेषणं आर्तेन रोगार्तेन ५६ ५७ ५८ दवे भवो दावः ५९ ६० ६१ ६२ संते बंधुः किं मम वत अथवा तेस्वतः स्वयमेव त

अतिविस्मयमातस्थे ग्रामकं समुपाययौ । उदग्रं ग्राममध्ये छ नगरमार्यदेशमिवाध्वगः ५१ तत्रापृच्छज्जनं साधो कच्चित्स्मरति भो भवान् । प्राग्वृत्तमस्य ग्रामस्य पर्यंते श्वपचक्रमं ५२ सर्वमेव हि धीमंतश्चिरवृत्तमपि स्फुटं । करस्थमिव पश्यंति मयेति श्रुत नाच्युते ५३ अत्र श्वपचमेकांतेवासिनं वृद्धमुत्तमं । स्मरस्येनं किमुत भो दुःखानामिव देहकं ५४ यदि जानासि भोः साधो तन्मे कथय तत्त्वतः । पांथसंशयविच्छेदे महत्पुण्यफलं स्मृतं ५५ भूयो भूय इति ग्राम्याः पृष्टा गाधिद्विजन्मना । अनल्पस्मयसंरंभमार्तेनेव चिकित्सकाः ५६ ग्राम्या ऊचुः यथा कथयसि ब्रह्मन्संस्तत्तथा न तदन्यथा । कटंजनामा श्वपच इहाभूद्दारुणाकृतिः ५७ पुत्रपौत्रसुहृद्भृत्यबंधुस्वजनपेटकं । यस्यातिविस्तीर्णमभूत्सत्त्रं वृंदं तरोरिव ५८ यस्य वृद्धस्य तत्सर्वं कलत्रं मृत्युराच्छिनत् । अद्रेः पुष्पफलोपेतं दावो वनमिवानलः ५९ यस्ततो देशमुत्सृज्य ययौ कीरपुरांतरं । वर्षाण्यष्टावनुष्ठेगं तत्र राजा बभूव सः ६० यस्तत्रार्थं परिज्ञाय जनैर्दूरं निराकृतः । यथा राशिरनर्थस्य यथा ग्रामे विषद्रुमः ६१ ततो जनेन्निं प्रविश्यात्मनो येहुताशनं आर्यतामार्यसंमार्गादागतः प्रविवेश ह ६२ किं तमेव प्रयत्नेन श्वपचं पृच्छसि प्रभो । किं ते बंधुरसौ कच्चिदभूद्वास्तव्यस्ततोथवा ६३



हृं धुरभवः ॥ ६३ ॥ ६३ ॥ ६३ ॥ ६३ ॥ ६३ ॥ ६३ ॥ ६३ ॥ ६३ । ६३ ॥ ६३ ॥ ६३ ।

तत्र ग्रामे सर्वेषु प्रीतेषु तत्र द्वासयोग्यगृहे स्थितिया वत् ६४ ६५ सकलभूतमुखादप्याहतममर्थार्थकं वाक्यमाकर्ण्य स्वयं चाबाधितप्रत्यभिज्ञया यथानुभूतम वलोक्य लज्जया गूढाकृतिर्गाधिः शशांकस्येव हेमलवत्कलंकमिव स्वहृदये अधिरूढं परमविस्मयमाजगाम प्रापेत्यर्थः ६६ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥ गाधिना कीरनगरे गत्वा दृष्टाच विस्मयात् ॥ तपसातोषितो विष्णुः सर्वमायेत्युवाच तं लुठितं

सर्वं कथयतो ग्राम्यान्गाधिः पृच्छन्पुनः पुनः । सर्वेषु तत्र प्रीतेषु मासमेकमुवास सः ६४ यथा तेनानुभूतं तत्पृष्टापचं तत्तथैव तैः । ग्रामीणैस्तस्य कथितं सर्वैरेवाविखंडितं ६५ अव्याहतं सकलभूतमुखात्ततदाकर्ण्य सम्यगवलोक्य यथानुभूतं । गाधिः शशांकमलवद्धृदये धिरूढं रूढाकृतिः परमविस्मयमाजगाम ६६ मोक्षोपाये उपशमप्रकरणे गाधिवृत्तांते प्रत्यक्षावलोकनं सर्गः ४७ श्रीवसिष्ठ उवाच लुठितं श्वपचागारे पुनर्विस्मयमाययौ । गाधेर्मनो हि नायाति तृप्तिमाश्चर्यदर्शने १ तत्रावलोकयामास स्थानानि सदनानि च । कल्पक्षोभविघट्टानि जगंतीवायुजोद्भवः २ उवाच स्वात्मनैवेदमरण्ये लुठितालये । शुष्कास्थिमालावलितेपिशाचकदंबद्रुमे ३ इमास्ता मृतमातंगदंतमालाशतोत्कृताः । आस्थापिसंस्थिताः कल्पप्रतिमेरुशिखा इव ४

परिवृत्तं चिरमासक्तमिति यावत् कल्पः संवर्तस्तदीये क्षोभे उपप्लवे विघट्टानि विभग्नानि अंबुजोद्भवो ब्रह्मा २ लुठितालये भग्नगृहे समनस्खेव उवाच द्रुमेरमशानवृक्षे ३ यदुवाच तदाह इमास्ता इत्यादिना वृत्तो प्राकारे कृताः श्लब्धिलिखाताः मृतमातंगदंतमाला स्ताइमाः प्रत्यक्षं प्रत्यभिज्ञायत इत्यर्थः कल्पप्रलयकाले प्रतिलक्षी कृत्य मेरोः शिखाः शिखराणि व ४

वा॰टी॰उ॰ १३६ पक्वैर्वंशांकुरैः करीरव्यंजनैः सह ५ केसरिणोऽश्वपचकर्मणि गजमदेनतिक्तमित्युक्त्याहस्तिपकात्क्रीतंमैरेयमितिगम्यते मैरेयमदशक्तत्वत्कर्षाय हस्तिपका गजमदमपिमेलयंतीतिप्रसिद्धं ६ कौलेयककुटुंबिन्यः शुन्यः पिण्याकैः पलैर्मांसैश्च वर्द्धिताः वरस्थाभिश्चर्मरज्जुभिः ७ वारणमुक्तानांगजमौक्तिकानांपिठरत्रयंउखात्रयप्रमाणंदंतगजदंतरचितंपात्रंइहास्मिन्स्थलेआसीत् ८ एतासुदृश्यमानासुतासुसर्वदृष्टासुअत्रास्मिन्ग्रामांतेविलुठितंपं

इह तद्दानरीमांसं पक्ववंशांकुरैः सह भुक्तं पुरा मयोन्मत्तैः सह श्वपचबंधुभिः ५ आलिंग्य श्वपचश्यामामिह केसरिचर्मणि सुप्तमापीय मैरेयं तिक्तं गजमदेन च ६ कौलेयककुटुंबिन्यः पिण्याकपलवर्द्धिताः इह ब्रह्मा वरस्थाभिर्मृतेमरदकाष्ठके ७ इह वारणमुक्तानां यदासीत्पिठरत्रयं पिनद्धं माहिषेणाग्रचर्मणांबुदशोभिना ८ स्थलीष्वेतासु तास्वत्र मह श्वपचबालकैः चिरं विलुठितं स्रस्तपत्रपुंजेष्विकैरिव ९ अत्र तद्बालनिश्वासरणद्वंशप्रवृत्तवत् गीतं पीतं शुनी रक्तं साधिता शवभस्मिताः १० अत्र साई कुटुंबेन जन्यत्रेषु कुटुंबिना न्यंतं तत्क्ततमुन्नारंकल्लोलैर्जलधाविव ११ अत्रोड्डयनलोलानां काक भासपतत्रिणां शतानामन्यदाशार्थं ग्रथितं वेशपत्तनं १२ श्रीवसिष्ठ उवाच एवंप्रायाः स्मरन्नाधिः प्राक्तनीः श्वपचक्रियाः विस्मयोत्कंपितशिरा धातुश्चेष्टां परामृशन् १३ चचाल चास्माद्दीर्घेण देशात्कालेन कार्यवित् भूतमंडलमुत्तरज्यप्राप देशांतरं क्रमात् १४ सुक्रीडास्विदित्यर्थः ९ बालानां निश्वासैः मुखवातैः रणतां वंशानां प्रवृत्तस्वारतालप्रवृत्तिस्तद्वत्तदनुरूपतयागीतं शवा नुभस्मितं शीलमस्येतिशवभस्मितं श्मशानमात्स्यचंदनादितस्मादितितैः साधितासर्वैषांमलंक्रियेतिशेषः १० जन्यत्रेषु विवाहेषु ११ अन्यदाअशनेआशः दिनांतरेभक्षणार्थः दामार्थानितिपाठेतु दस्यु हिंसायामित्यस्माद्धञ दिनांतरे हिंसनार्थमित्यर्थः १२ परामृशन्तर्कितेवान् १३ १४ न राम॰ १३६

तुषारादिकुक्षौ रत्नमिव श्रेष्ठं जनास्पदं जनपदं प्राग्दृष्टकीरदेशमित्यर्थः १५ नगसन्निभं पर्वतवदुन्नतप्रासादं रत्नाढ्यं च १६ अनुभूतानि स्वगृहे प्रासादादीनि दृष्टानि परगृहप्रासादादीनि आसेवितान्यारामस्थानशालादीनि स्थानानि १७ यथाविधि विधिविधानमनतिक्रम्येत्यर्थः १८ नामेतिप्रसिद्धौ १९ २० अंतः स्वप्नस्यमिज्ञासंवादाद्यसारयति चमत्कारमनुभवत्यपीत्यर्थः २१ तस्य भगवदनुग्रहात्तस्मिन्पुरेराजरूपेण भवदर्शनमभूदित्याह अथेति सबलवाह

समुद्रे घनदीशैलमंडलाररायसंततिं आसमासतुषाराद्रिरत्नं किल जनास्पदं १५ तत्रप्राप महीपालनगरं नगसन्निभं जगद्भ्रमणखिन्नात्मा स्वर्लोकमिव नारदः १६ अथात्मनानुभूतानि दृष्टान्यासेवितानि च स्थानानि नगरे पश्यन्
श्व प्रच्छ जनमादृतः १७ साधो स्मरसि किंचित्त्वमिह पचमीश्वरम् यदि जानासि तत्त्वमेव र्णय शुयथाविधि १८ नाग राजचुः अभूदिह ष्टौ वर्षाणि श्वपचो भूमिपो द्विज राजत्वमर्पितं यस्य नाममंगलहस्तिना १९ अंते च संपरिज्ञातः संप्रविष्टो हुताशनं अद्य द्वादशवर्षाणि समतीतानि तापस २० ये ये पृच्छन्स्य सोऽगाधिर्जनं जातकुतूहलः तस्य तस्य मुखादेव श्रुणोत्यास्वादयन्नपि २१ अथापश्यत्पुरे तस्मिन्नृपं सबलवाहनं देवं चक्रधरं विष्णुं मंदिरान्निर्गतं बहिः २२ सहस्रास्थगिताकाशं चलरेणुपयोधरैः प्राक्तनीराजतांस्मृत्वा समुवाचातिविस्मयः २३
नं प्रवर्दृष्टबलवाहनं सहितं मंदिरात्तराजसदनाद्बहिर्निर्गतं २२ बाप्यवस्तुदर्शनव्यामुग्धचित्तस्य तस्य दृष्टायामपि भगवन्मूर्तौ तत्प्रभावो विचारोपि वा नाभूत्किं तु प्राक्तनेष्वनुभूतस्मृतौ च्छत्रचामरादिषु प्रत्यभिज्ञाकौतुके एव चित्तं बभ्रामेत्याशयेनाह सहस्रैरितिचलैः रणत्कृतैः रेणुलक्षणैः पयोधरैर्मेघैः स्थगितमा च्छादितमाकाशं येन तथाविधं तत्त्वैस्तं दृष्ट्वेत्यर्थः २३

ताइमाः प्रसमिज्ञाताः कीरन्टपतेः कामिन्यः वेश्याः २४ चंद्रकराणां संपिंडः पिंडीभावइव पांडुराः स्थिराम्रन्निभावात्स्थैर्यमापन्नाये निर्झराः गिरिवारिप्रपाताः तत्
त्संकाशाः २५ क्रूह्यःउष्पमंजरीसमूह्यइव २६ मत्तमातंगाणां घटाः संघाः घटिताः रंताग्रनिर्भिन्नाः दिक्तटायाभिस्ताः संभावनयातिशयोक्तिः
संकल्पानुसारिफलदाः पादपा येषु २७ तामवस्यथमादयो लोकपाला इव महीभृतस्तेतेसामंताः आंतरदेशाधीशाः २८ सर्वे धनधान्यादिवस्त्वोघाः

इमास्ताः कीरकामिन्यः पद्मगर्भोपमत्वचः कनकद्रववर्णिन्यो लोलनीलोत्पलेक्षणाः २४ चामरौघाइमे चंद्रकरसं
पिंडपांडुराः स्थिरनिर्झरसंकाशाः काशपुष्पचया इव २५ कांताभिरवधूयंते बालव्यजनराजयः इमास्तावनदे
द्योभिर्दीप्यमाना इव द्रुमाः २६ इमास्तामत्तमातंगघटाघटितदिक्तटाः संकल्पपादपामेरोरिव शृंगपरंपरा २७
एतेतेयमवारीशकुबेरप्रतिमौजसः सामंतावासवस्येव लोकपाला महीभृतः २८ इमास्ताः सर्ववस्त्वौघाः सर्वा
भिमतदास्तताः कल्पवृक्षलताकुंजपुंजसुंदर्यो गृहपंक्तयः २९ इदंतत्कीरजनताराज्यं प्राग्भुक्तमद्यमे
आलजन्मांतराचारइव प्रत्यक्षतांगतं ३० सत्यंस्वप्नइवायंमे जाग्रद्भूतः पुनस्थितः नजानेकिंकृतोस्यानामाये
यं प्रविजृंभते ३१ अहोनुखलु दीर्घेण ममनो मोहोनवल्गता वैवश्यमुपनीतोहं जालेनेव शकुंतकः ३२ हापि
कष्टमबुद्धं मेमनोवासनयाहतं पश्यतिभ्रमजालानि विततानि शिशोरिव ३३ राम॰ १३७

यासु २९ प्राग्भुक्तं अद्यजन्मांतराचारो जन्मांतरचरित्रमिव प्रत्यक्षतांगतं ३० सत्यंनिश्चितं प्राक्स्वप्नइवदृष्टः पुनर्जाग्रद्भूतः स्थितः किंकेनकिम
र्थंवाकृत उत्थानं आविर्भावो यस्या ३१ वैवश्यं अस्वाधीनता ३२ अबुद्धमप्रबुद्धं ३३

---

तेनप्राक्प्रसादितेन चक्रधारिणा विष्णुना ३४ जन्मस्थितिपदाभ्यां तन्निमित्तं लक्ष्यते ३५ ३६ पयश्चुलुकस्य भोजनं पानं कुर्वन्निति शेषः शार्ङ्गधन्वनो विष्णोः
धनुश्चेत्यनड्पक्षइव प्रसादस्तस्मात्ताम्रन्निर्वस्य हृदपक्षेपयस एवमूर्तिः स्वरूपं यस्य ३७ द्विजस्य गाधेर्मंदिरं निवासभूतं कंदरं पयोधरवरध्याद्यच्छानि
र्मलतराछविः कांतिर्यस्य पयोधरवद्व्योमन्यावसत् अतिष्ठदितिवा ३९ दिष्टं दैवमेवमतिः प्रतीतिनिमित्तं यस्य नवस्तु तत्तदात्मकं ४० चित्तेनाभिग

सुप्रापिमायामहती तेनमेचक्रधारिणा दर्शितेत्यधुनासाधु मयास्यतमखंडितं ३४ तदिदानींतथायत्तं करिष्येगिरिकंदरे
यथाकुसंभ्रमस्यास्य जानेजन्मतथास्थितिं ३५ इतिसंचिंत्यनगराद्गाधिस्तस्माज्जगामह कंदरंप्राप्यशैलस्य तस्थौवि
श्रांतसिंहवत् ३६ तत्रसंवत्सरंसार्धं पयश्चुलुकभोजनं तपश्चक्रेमहातेजास्तुष्टयेशार्ङ्गधन्वनः ३७ अथास्यपुंडरी
काक्षः पयोमूर्तिरुपाययौ प्रसादमुसलश्यामः शरदीवमहाह्रदः ३८ तमाजगामशैलेंद्रकंदरं द्विजमंदिरं पयोधरस्व
रछायाछछविर्व्योमन्यथावसत् ३९ श्रीभगवानुवाच गाधेकच्चित्त्वयादृष्टा मायाममगरीयसी दृष्टंत्वयाजगज्जाल
चेष्टितं दैष्टिकात्मकं ४० चित्ताभिगतसत्तास्मिन्प्राप्ते सम्यग्निरितः तपोगिरितटेकुर्वन् किमन्यदभिवांछसि ४१
श्रीवसिष्ठउवाच एवंवदंतमालोक्य हरिंगाधिर्द्विजोत्तमः अर्घ्यकुसुमपूरेण पादयोः पर्यपूरयत् ४२

तेवांछिते एतस्मिन्मन्मायादर्शने प्राप्ते सति पुनर्गिरितटे तपः कुर्वन्ननिरितः श्रुद्धस्त्वं अन्यत्किमभिवांछसीत्यन्वयः ४१ अर्चा नित्यपूज्यमानां भगवत्प्रतिमां
पादयोरर्घ्यपूजां कुसुमपूरेण करोन्मुक्तपुष्पप्रवाहेण पयःपूरवत् पूर्णांचकारेति वा अनेन पूजाकाले भगवदागमनं गम्यते ४२

वा·टी·उप· अर्घ्यं उत्तरार्घ्यं प्रदक्षिणैः सह प्रणम्य प्रणामांतौ ए जां समाप्य ४३ ४४ यन्मे त्वं ज्ञातव्यांशस्तमाह भ्रममिति भ्रमं मिथ्याविषयज्ञातं ४५ प्रत्यक्षतां चिरं चक्षुरा
१३८ दिगोचरतां अमलमविद्यामलरहितं परमात्मस्वरूपं प्रतिष्ठा यस्य ४६ मदीयैः श्वपचभ्रमैः कृते अस्मै देर्घ्याद्वैर्घ्ये तथा श्वपचशरीरस्य भवाभवाउत्पत्तिनाशौ स्वअंतर्मनस्येव स्थि
ताः कथं न स्युः बहिस्ते कथं तिष्ठंतीत्यर्थः ४७ हे गाधे भवान्यत् उरुमहज्जगद्विभ्रमं पश्यति तत् अदृष्टतत्त्वस्य अत एव वस्तुनिष्ठेरणाधिभिर्वासनारोमैर्गृहीतस्य चेत

यं२ दत्तार्घ्यं कीर्णकुसुमः प्रणम्याशु प्रदक्षिणैः विष्णुमाह द्विजो वाक्यं मम मोहमिमं ततः ४३ गाधिरुवाच देव यैषा त्वया माया दर्शि
तातितमोमयी महीं प्रातरिवादित्य स्तां मे प्रकटतां नय ४४ भ्रमं पश्यति मनो वासनामलमालितं स्वप्नवत्स कथं देव जागत्यपि
हि दृश्यते ४५ मुहूर्तमुपलब्धश्च नलांतः स्वप्नविभ्रमः कथं प्रत्यक्षतां प्राप्तो मममलपदास्पद ४६ देर्घ्याद्वैर्घ्यस्य
कालस्य शरीरस्य भवाभवाः कथमंतः स्थिता न स्युर्मदीयैः श्वपचभ्रमैः ४७ श्रीभगवानुवाच गाधेत्वाधिविधुतस्यस
रूपस्यैतदात्मकं चेतसो दृष्टतत्त्वस्य यत्पश्यस्युरुविभ्रमं ४८ बहिर्न किंचिदप्यस्ति त्वाद्व्यब्ध्युर्वीदिगादिकं एतत्स ८
चित्तस्यवास्ति पत्रपुंजमिवांकुरे ४९ फलादि स्फारतामेति यथैव बहिरंकुरात बहिः प्रकटतां याति तथा पृथ्व्यादि
चेतसः ५० सत्यं पृथ्व्यादिचित्तस्थं न बाह्यं तु कदाचन अंकुरस्थः पत्रवल्लियस्मात्तस्मात्फलश्रियः ५१ राम·

मश्चित्तभावापन्नस्यात्मस्वरूपस्य एतदात्मकं रूपं भासते तदुक्तेनान्तर्न वा बहिर्नाल्पं न वा दीर्घमित्यर्थः ४८ यदिवास्तीति मन्यसे तर्हि स्वचित्तरएवास्तीत्या १३८
ह बहिरिति खं आकाशं अद्रयः पर्वता अब्धयः समुद्रा उर्वी पृथ्वी दिशश्चेत्यादिकं जगदित्यर्थः ४९ ५० यस्माद्धेतोः फलश्रियस्तस्माद्दृश्यं तदिति शेषः ५१

वर्तमानविषये चक्षुरादिना रूपालोकः भाविनि चु ...... मनसा समर्थनात्मनस्कारः अतीते च स्मर्यमाणेन तात्त्रिरूपका स्त्रिविधाः कालास्तद्धंजिकाव
सूर्यादिक्रियैस्सैवमात्मकं हंति स्वात्मन्युपसंहरति करोति सृजति च ५२ सर्वानुभवसिद्धं चेदमित्याह आबालमिति ५३ मलैरागक्रांतारः अवनिः पृथ्वी येन तथाविधे
धे पादपे इव जिमनसो पधिष्ठाने सर्वे दृश्यं भवलाज्जगद्वारकलमिति घोतनार्थं ५४ स्वका वनेरुन्मेलितस्यैति यावत ५५ तथाचेदं श्वपचत्वं मनः स्थितानंत

रूपालोकमनस्कारतत्त्वाः कालक्रियात्मकं कुंभकारो घटमिव चेतो हंति करोति च ५२ आबालमेतत्सुरुषैः सर्वैरेवानुभूयते स्वप्नभ्रमम
दावेगरागरोगादिदृष्टिषु ५३ चित्ते हंतीतलक्षाणि संस्थितान्यात्मवासने पादपे फलपुष्पाणि म्लानकांतावनाविव ५४ स्वकावनेर्वि
टपिनो स्यः पत्राणि गोमथा निर्वासनस्य जीवस्य पुनर्जन्मादिनो तथा ५५ एवमानंतजगज्जालं संस्थितं तेन ते जसा श्वप
चत्वं प्रकटितं यदितद्धिस्मयोत्र किं ५६ अवबुद्धमप्रपन्नता प्रतिभासवशात्त्वया यथैवानल्पसंसारं भावि चित्राधिविकारता ५७ त
थैवातिथिरायातो भुक्तवान्सुप्तवान्द्विजः कथां कथितवांश्चेति दृष्टवानसि संभ्रमं ५८ यथैवोत्थाय गच्छामि ग्रामोहं
भूतमंडलं इमे भूतास्इमे ग्रामा दृष्टवानसि संभ्रमं ५९ तथैवेदं कटंजस्य मात्रं नलुठितं दृढं जनैरुक्तं कटंजस्य दृष्ट
वानसि संभ्रमं ६० तथैव कीरनगरं प्राप्तोस्मि कथितं च मे कीरैः श्वपचराजत्वं दृष्टवानसि संभ्रमं ६१ एवं सर्वं त्वया दृष्टं मोह
जालं द्विजोत्तम यत्सत्यमिति जानासि यत्स्वासत्यमवैषिव ६२ वासनाजालेएकदेशप्रकटनमित्याह पत्रेति ५६ तव सत्यत्वेनाभिमतम
तिथ्यागमनादिप्रपंचजातमपि स्वप्नवत्स्वमनःस्थमेवेत्याह अवबुद्धेत्यादिना ५७ ५८ इमे ग्रामा इति संभ्रमं दृष्टवानसि इति सर्वत्र इति शाब्दोऽध्याहार्यः ५९
६० ६१ ६२

वा॰टी॰उप॰ १३९ साधितं क्षणेनैव सिद्धं ६३ ६४ किंच त्वया इदानीमपि न भूतमंडले कीरनगरे वा गतं किं तु तिथिवाक्यं श्रुत्वा भूतदेशं प्रतिगच्छता प्रस्थितेन पांथेन त्वया पथि कस्मिंश्चि
द्गिरिकंदरे विश्रांतं तत्र श्रमेण मूर्छया परवशचित्तत्वात्त्वमवत इदं तद्भूतमंडलं इदं तत् श्वपचागारमित्यादि दृष्टं न परमार्थ इति द्वयोरित्यर्थः ६६ तत्रस्मिन्कं
दरे तदैव श्रमकाले कीरनगरं दृष्टवानसि अन्यदा अघमर्षणकाले वापि तथैव मायामयमर्थं भवान्दृष्टवानित्यर्थः ६७ जले कंदरे तदेति च देशकालनियमो

वासनावलितं चेतः किं भ्रामं तन्न पश्यति साधितं दृश्यते स्वप्ने वर्षसाध्यं प्रयोजनं ६३ नातिथिर्न च भूतास्ते न कीरास्ते न तत्पुरं सर्व
मेतन्महाबुद्धे व्यामोहाद्दृष्टवानसि ६४ गच्छता भवता भूतदेशं पांथेन कंदरे कस्मिंश्चिद्द्विज विश्रांतं कुरंगेणेव कानने ६५ तत्रै
व श्रममूर्छितादिदं तद्भूतमंडलं तदेतच्छ्वपचागारमिति दृष्टं न सत्यतः ६६ तथैव कीरनागरं दृष्टवानसि तत्तथा तदैवान्य
दापि मायार्थं हि भवान्द्विज ६७ सर्वदैव समभ्रांतो विहरन्नसि दृष्टवान् रिक्तप्रोन्मत्तकरवविभ्रमं मनसा मुने ६८ तदु
त्तिष्ठ निजं कर्म कुर्वन्नास्तिशोपशांतधीः न स्वकर्म विना श्रेयः प्राप्नुवंतीह मानवाः ६९ श्रीवसिष्ठ उवाच इति निगदितवान्स
पद्मनाभो भुवनगतापसवृंददृश्यमानः विबुधमुनिगणैः पवित्रहस्तैर्हृत उदधिं निजमास्पदं जगाम ७० इति श्रीरामायणे
मोक्षोपाये उपशमप्रकरणे गाधिवृत्तांते मायामहत्त्वकथनं नाम सर्गः ४८ भ्रमस्य नास्तिया यावत्तत्त्वबोधं सर्वदा सर्वत्र भ्रांत्यैव विरचणादिव्यव
हारदर्शनादित्याशयेनाह सर्वदैवेति ६८ निजं ब्रह्मचर्याश्रमोचितमिति कार्यं स्वाध्यायादिकर्म ६९ भुवनगैस्त्रिभुवनगतैस्तापसवृंदैः दृश्यमानः स
पद्मनाभः इति उक्तप्रकारेण निगदितवान् भगवच्चरणस्पर्शसेवादिना पवित्रहस्तैर्विबुधमुनिगणैर्हृतः सन्निजमास्पदं क्षीरोदधिं जगामेत्यर्थः ७०
इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे अष्टचत्वारिंशः सर्गः ४८

राम॰ १३९

---

गाधिर्देशौ पुनर्गत्वा हरिं दृष्ट्वा पुनः पुनः सर्वं मायेति निश्चित्य जीवन्मुक्तो भवत्क्रमात् तथैवेत्थं प्रागच्छामि प्राप्तो हं भूतमंडलं इमे भूता इमे ग्रामा दृष्टवानसि संभ्रमं ना
तिथिर्न च भूता निन कीरास्ते न तत्पुरमित्यादि भगवद्वचनार्थं स्वमेव भावना विपरीतभावनादार्ढ्याद्र प्रतिपद्यमानो गाधिर्जगदधिष्ठानात्मतत्त्वसाक्षात्कारं विनैव
सर्वदृष्टदेशादीनां बाधोस्ति न वेति परीक्ष्यानुभवितुकामः पुनर्भूतमंडलादिदेशान्वभ्रामेत्याह अथेति भूतादिकं भूतमंडलादिदेशं १ आत्मनः स्वयंमो
हस्य स्वश्वपचत्वादिवृत्तांतं तथा दृष्ट्वानुभूतवेदेवोपलभ्य श्रुत्वा लिंगैर्दृष्ट्वा च भगवद्वाक्यतात्पर्यबोधाय पुनर्हरिमाराधयामासेत्यर्थः २ ३ प्रसादवान् प्रस

श्रीवसिष्ठ उवाच अथ गाधिर्गते विष्णौ पुनर्भूतादिकं क्रमात् स्वयं मोहविचारार्थं बभ्राम भ्रमिवांबरं १ उपलभ्य तथैवात्मवृत्तां
तं जनतस्ततः हरिमाराधयामास पुनरद्रिगुहां गतः २ आजगामेन मल्पेन कालेनाथ जनार्दनः सहृदाराधनेनैव माधवो या
ति बंधुतां ३ उवाच गाधिं भगवान्मयूरमिव वारिदः किं त्वं प्रार्थयसे भूयस्तपसेति प्रसादवान् ४ गाधिरुवाच भ्रांतोस्मि देव प स्मि दे
रामासा भूते कीर जनास्यं तत्र व्यभिचरत्यस्माद्वृत्तांतो न कथास्वपि ५ मायया भूतभूर्दृष्टा तयेत्युक्तोस्मि किं प्रभो
मोहनाशाय महतां वचो नो मोहहद्धृदये ६ श्रीभगवानुवाच काकतालीययोगेन चेतसि श्वपचस्थितिः सर्वेषां भूतकीरा
णां तवैव प्रतिबिंबति ७ तेनागतवृत्तांतं यथावत्कथयंति ते प्रतिभासोहि नायाति पुनरप्रतिभासतां ८

न्नः सन् ४ कथासु जनप्रवादेषु अपि पराह्लिंगमत्स्यमिज्ञारिसंवादिसंवादेष्वपि न व्यभिचरतीत्यर्थः अत्र तथा किं त्वं नाह मायये ति मायाहप्राथाः अवश्यं कालां
तरे व्यभिचरंति अव्यभिचारिणश्चैते र्थाः कथं मायेत्यवधारयितुं शक्या इति मोहं हृदये त्वद्वचनं संपन्नमिति भावः ६ मायिकस्यापि कथास्वव्यभिचारे उपप
त्तिमाह काकतालीयेति प्रसिद्धभूतदेशजानां कीरदेशजानां च जनानां चेतसि तव चेतसि च कदैककश्वपचस्थितिर्यतोस्तत्तया भ्रांत्या प्रतिबिंबतीत्यर्थः ७ त
थापि तेषि स्वभ्रांत्यैव तथा वदंतीत्यर्थं प्रमाजप्रस्तं हृद्वचनं संवादेन सत्यतापादक इत्याह तेनेति प्रतिभास इति नाबाध मिति शेषः ८

त १२

वा॰टी॰उप॰
१३०

प्रत्यभिज्ञासंवादस्य तर्हि कागतिस्तामाह केनचिदिति । आविष्टं मयेदं प्रागनुचितमिति भ्रांत्यभिनिवेशविपर्यासकृतं । ९ । प्रतिभासो भ्रांतिरूपः प्रतिभासः एकात्मरूपैव काकोलोदीर्णकाकाख्यः
काकजातिभेदः तस्य तालेपकतालफले तालमूले वा स्थितिरूपवेशनं तद्वत् । १० । सापि निद्रा तद्वद्भ्रमदे नमेरेयमदेन मंथरचिन्ताः यथा बहवस्तुल्यरूपाघूर्णमाना उर्वदिशः पश्यंति तत्
वत् । ११ । एकस्यामेव सिकतादिसन्निवेशसंकेतकल्पितगृहप्रासाददुर्गादिभ्रमलीलायां बहवो बालकारमंते । लीलायां शार्दूलश्यामलतायां वनस्थल्यां सारंगपोताः । १२ ।
अतिबहुलाहतैर्विधबंधपराजयपलायनादिनानाकारैरस्वप्रारब्धफलपाकेलम्येऽपि बहवः सैनिकादिजनाः तुल्यकालजयलाभभोगादीनां तुल्यरूपाणां कर्मणां प्रयोक्
नानां भ्रांत्याप्रतिभासेन तन्तो भाग्यसुदारितायंतेत इति प्रसिद्धमित्यर्थः । १३ । यदि मानसकल्पनैव जगत्तर्हि हेमंतादिः कालो ब्रीह्यादिरंकुरो रक्षस्य प्रतिबंधको यवादीनां चाभ्यनुज्ञा

केनचिच्छूपचेनांते ग्रामस्थिरचितं गृहं । तस्मादृष्टमाविष्टमिष्टकारं खंडतोगतं ॥ ९ ॥ कदाचित्प्रतिभेकैव बहूनामपि जायते । काकोलतालस्थि
तिवद्विविज्ञाहि मनोगतिः ॥ १० ॥ तथाहि बहवः स्वप्नमेकं पश्यंति मानवाः । आपभ्रमदमैरेयमदमंथरचित्तवत् ॥ ११ ॥ एकस्यामेव लीलायां रमंते
बहुबालकाः । एकस्यामेव लीलायां वनस्थल्यामिवैणकाः ॥ १२ ॥ बहवस्तुल्यकालेन प्रतिभासेन कर्मणां । जनाः यतंते सफलपाकेति
बहुलाहतौ ॥ १३ ॥ प्रतिबंधाभ्यनुज्ञानां कालो रातेतिया श्रुतिः । विप्रसंकल्पमात्रो सौ कालो ग्राम्यनितिष्ठति ॥ १४ ॥ अमूर्त्तो भगवान्कालो
ब्रह्मैव तमजं विदुः । न जहाति न चारत्नैः किं चित्कस्य करेति च ॥ १५ ॥ नेतिलोकप्रसिद्धेर्बाधः स्यान्मानसकल्पनायां बाधकालस्य व्यवस्थापकतायोगादि

स्याशंकांगाथेः परिहरन्नाह प्रतिबंधेति । श्रुतिर्लौकिक प्रसिद्धेर्बाधः स्यान्नविरुद्धा तद्इति शेषः यत्तो सौ प्रतिबंधाभ्यनुज्ञा नहेतुरपि कालः संकल्पमात्रः दिग्विशेषावच्छिन्नां
सूर्यक्रियां द्रष्टा मनसैव यथाशास्त्रं मासर्त्वादिभेदकल्पनादिति भावः कस्तर्ह्यकल्पितः कालस्तमाह काल इति यस्त्वकल्पितोऽखंडः कालः परमात्मा स सात्मन्येव
तिष्ठति न कस्यचित्प्रतिबंधमभ्यनुज्ञां वा ददातीत्यर्थः । १४ । अमुमेवार्थं स्पष्टयति अमूर्त्त इत्यादिना । १५ ।

राम॰
१३०

वादग्रवलं ३५

BHAU DAJI

आद्यस्य संकल्पात्मतामुपपादयति लौकिक इति जन्यमात्रस्य कालोपाधितात्सूर्यक्रियाचंद्रपिंडादिपदार्थौघैः संकल्प्यते तेन बंधानुज्ञाभ्यां सर्वपदार्थौघस्तत्क्रियाफलादिव्यवस्था च
संकल्प्यत इत्यर्थः । तुशब्दश्चार्थे । १६ । प्रासंगिकीं शंकां परिहृत्य प्रकृतमालंब्याह समानेति भ्रतदेशजः कीरदेशजाः स्वजनो वा जनसमूहः ॥ १७ ॥ तर्हि मया किं का
र्यं तत्राह स्वव्यापारेति स्ववर्णाश्रमोचिताचरणपर इत्यर्थः । १८ । आधिपीवरया आधिनोपचितया । १९ । २० । मनसा च वचसा हस्तेन कर्मणा च स्वजयामास उक्तेन प्रश्न्ना

लौकिको यस्त्वयं कालो वर्षकल्पयुगात्मकः । संकल्प्यते पदार्थौघैः पदार्थौघश्च तेन तु ॥ १६ ॥ समानप्रतिभासोत्थं संभ्रमं भ्रांतचेतसः । तथा
तं दृष्टवंतस्ते भ्रतकीरजनोचयः ॥ १७ ॥ स्वव्यापारपरो भ्रतां धियात्मानं विचारय । साधो गतमनोमोहमिहैवास्व जाम्यहं ॥ १८ ॥ इत्युक्त्वा
भगवान्विष्णुर्जगामांतर्हितो मीश्वरः । अतिष्ठत्कंदरे गाधिराधिपीवरयाधिया ॥ १९ ॥ ततः कतिपयेष्वेव मासेष्वतिगतेषु सः । पुनराराधयामास पुंडरीककरं द्विजः ॥ २० ॥ ददर्श चैकदा नाथमागतं प्रणनामतं । पूजयामास मनसा वोक्तेनोवाच चेश्वरं ॥ २१ ॥ गाधिरुवाच
भगवन्संस्मरंश्चैतामात्मनः श्वपचस्थितिं । इमां संसारमायां च परिमुह्यामि चेतसा ॥ २२ ॥ तदुक्त्वाऽस्य यथावस्तु महामोहनि
वृत्तये । एकस्मिन्नेव विमलेमां नियोजय कर्मणि ॥ २३ ॥ श्रीभगवानुवाच । ब्रह्मन्जगदिदं माया महाशंबरडंबरं । सर्वा आश्चर्य
कल्पनाः संभवंतीह विस्मृतेः ॥ २४ ॥ भ्रतकीरपुरे मोहाद्दृष्टवांस्तत्र थाभवान् । इत्येतत्संभवत्येव दृश्यते हि जनैर्भ्रमः ॥ २५ ॥
पुज्जावाक्येन उवाच पप्रच्छ च । २१ । इमां जननमरणाद्यनर्थबहलां संसारमायां च संस्मरन् । २२ । तत्तस्माद्धेतोर्महामोहस्य निवृत्तये उपायमुक्त्वा झटिति न गच्छ किं तु यावत्संश
यमोक्षस्तावत्तिष्ठेत्यर्थः । २३ । विस्मृतेः स्वात्मतत्त्वविस्मरणाद्यावरणानिमित्ताद्ज्ञानादिति यावत् । २४ । मायायां वाससंभावितमर्थमपि संभवत्येवेत्याह भ्रतेति । तच्च पचला
दितथा तत्तत्प्रकारेण दृष्टवानित्येतन्मोहादज्ञानात्संभवत्येव तथा हि जनैर्निद्रादावसंभावितोऽप्यर्थो विभ्रमो दृश्यत इत्यर्थः । २५ ।

स्त्र २

मुधा मिथ्यैवेति एवं मिथ्यात्वभावमपि सत्याभं दृष्टवंतदित्यर्थः समेन संकल्पेन समानकालादेः संभवादित्यर्थः २६ यथाभूतं यथास्थितं अनिंदितं तच्च श्वपचनिंदासंबंधनिवार
कमित्यर्थः तनुतां अपक्षयं तेन त्वद्दृष्टसदृशेनैव सन्निवेशेन शरीरग्रामगृहदाराद्याकारेण तथैव युक्तोऽभवदित्यर्थः २८ तथैवेति सर्वत्रानुषंजनीयं २९ यदि तथाभू
तोऽन्यो भूत्तर्हि मम कथं तदनुभवपथं प्राप्तस्तत्राह भवत इति जलांतर्वर्त्तिनो भवतश्चित्ते साकटंजाचारसंस्थितिः प्रौढत्वात्केवलं प्रतिभाता मत्संकल्पवशादित्यर्थः ३० कदा

भूतास्त्वमिव कीराग्र्य दृष्टवंतस्तथा भ्रमं ॥ मुधैवेत्यपि सत्याभं समकालादिसंभवात् ॥ २६ ॥ इदं तु शृणु वक्ष्यामि यथाभूतमनिंदि
तं ॥ यथैति तनुतां चिंता मार्गशीर्षलतेव ते ॥ २७ ॥ योसौ कटंजको नाम श्वपचो भूतमंडले ॥ तेनैव सन्निवेशेन स तथैवाभवत्पु
रा ॥ २८ ॥ तथैव विकलत्वं प्राप्य देशांतरं गतः ॥ बभ्रवकीरनृपतिः प्रविवेशानलं ततः ॥ २९ ॥ भवतः केवलं चित्ते जलांतर्वर्त्ति
नस्तथा ॥ प्रतिभाता तथाभूता कटंजाचारसंस्थितिः ॥ ३० ॥ दृष्टानुभूतमप्यर्थं कदाचिद्धि स्मरत्यलं ॥ कदाचिदप्यदृष्टं तु चेतः प
श्यति दृष्टवत् ॥ ३१ ॥ यथा स्वप्नमनोराज्यधातुसंस्थितिविभ्रमाः ॥ जाग्रत्यपि तथैवांग दृश्यंते मनसा स्वयं ॥ ३२ ॥ भविष्यद्भूतका
लस्थं यथा त्रैकाल्यदर्शिनः ॥ प्रतिभामेति गाधेद्यकटंजाचरितं तथा ॥ ३३ ॥ अयं सोहमिदं तन्म इति मज्जति नात्मवान्
अयं सोहमिदं तन्म इति मज्जत्यनात्मवान् ॥ ३४ ॥ अदृष्टस्य देशांतरस्थस्यातीतस्य च कथं पुरो वर्त्तमानतया दर्शनं तत्राह दृष्टेति यथानुभूतमपि
विस्मरति तथा अदृष्टमपि पश्यतीत्यर्थः ३१ धातुसंस्थितिः संनिपातः ३२ यथा त्रैकाल्यदर्शिनो योगिनो दृष्ट्या भविष्यदपि वस्तु उत्तरकालिकेषु दृश्यमाने 
षु भूतकालस्थं भवति तथा हे गाधे अतीतमपि कटंजाचरितं वर्त्तमानप्रतीतिं प्राप्नोतीत्यर्थः ३३ नन्वनात्मन्यनात्मीये च कटंजके तदीयगृहकलत्रादौ च मम
सत्त्वाहंतदीयमेव तन्ममेदमीयमिति कथं मज्जनमिति चेत् सत्यमिदमुच्यते अनात्मविदां सर्वेषामपि अनात्मनि देहे अनात्मीये च गृहकलत्रादावहं ममेत्यभिमान
दर्शनादात्मविदस्तु केवलं तन्मज्जनाभावादित्याशयेनाह अयमिति ॥ ३४ ॥

सर्वाहंभावनयापि तत्त्वविदस्तत्र न मज्जनं परिच्छिन्नाहंभावस्यैव मज्जनहेतुत्वादित्याह सर्वमेवेति ३५ सर्वाहंभावेप्यहंकारसत्तामन्नप्रायोपि ३६ अथ तर्हि कीदृश इ
ति चेद्रातृपालिक इत्याह त्वमिति स्वस्थं स्वरूपावस्थितमात्मानमागतः प्राप्तः ३७ मेघपदेन तत्कार्यवृष्टिर्लक्ष्यते दूरवनगृहप्रवेशादिसम्यग्भूतत्वमन्यः पुरुष
इव ३८ आक्रम्य स्वेतरदभिमानेन परिभूय सहे ३९ नाभिमर्षं सर्वतो भ्रमत इति शेषः तच्चित्तमाक्रम्य आत्मनि प्रविलापनेन तिरस्कृत्य तन्मायाचक्रं किंचिद

सर्वमेवाहमेवेति तत्त्वज्ञो नावसीदति ॥ जगत्स्वातिपदार्थेषु विभागानर्थभावनां ॥ ३५ ॥ तेनासौ भ्रमयोगेषु सुखदुःखविलासिषु
न निमज्जति मग्नोपि तुंबीपात्रमिवांभसि ॥ ३६ ॥ त्वं तावद्वासनाजालग्रस्तचित्तो विचेतनः ॥ किंचिच्छेषमहाव्याधिरिव न स्वस्थ
मागतः ॥ ३७ ॥ ज्ञानस्यापरिपूर्णत्वान्न शक्तोभिमनोभ्रमं ॥ विनिवारयितुं मेघमसम्यग्यत्नवानिव ॥ ३८ ॥ यदेवं ते मनो मात्रेम
हसा प्रतिभासते ॥ तस्करुरुत्वजने नैव ते नैवाक्रम्य सेक्षणात् ॥ ३९ ॥ चित्तं नाभिः किलैस्येह मायाचक्रस्य सर्वतः ॥ स्थीयते चेत्त
दाक्रम्य तन्न किंचित्प्रबाधते ॥ ४० ॥ त्वमुत्तिष्ठ गिरेः कुंजदशवर्षाण्यखिन्नधीः ॥ तपः कुरु ततो ज्ञानमनंतं समवाप्स्यसि ॥ ४१ ॥
इत्युक्त्वा पुंडरीकाक्षस्तत्रैवांतरधीयत ॥ याताभ्रवद्दीपवच्च यमुनोत्पीडवत्क्षणात् ॥ ४२ ॥ गाधिर्विवेकवशजं वैराग्यपदमागतः
शरत्समयपर्यंतं वैरस्यमिव पादपः ॥ ४३ ॥ विचित्रं चेष्टितं धातुरसमंजसमागतं ॥ भ्रमद्भ्रमभरोन्मुक्तमतिमंदं मगर्हयत् ॥ ४४ ॥
पि न प्रबाधते ४० तपः चित्तनिरोधाभ्यासं ४१ वातलीनाभ्रवन्निर्वाणदीपकवत् यमुनातरंगवच्चेति नानोपमा ४२ वैरस्यं अस्निग्धतां ४३ भ्रमता भ्रमभरेणोन्मुक्ता
मतिर्यस्य तथाविधः सन् असमंजसं धातुः शाक्तं नकर्मलक्षणायुदैवस्य असमंजसं अपुत्रश्वपचभावादिप्रदर्शनरूपं विचित्रं चेष्टितमगर्हयत् ॥ ४४ ॥

नियमाय चित्तनियमनाभ्यासाय कच्छमरकं मतंगाश्रमस्थं अचलं ४५ तपः मनसश्चेंद्रियाणां च ऐकाग्र्यं परमं तप इति प्रसिद्धं ४६ तदनु आत्मज्ञानप्राप्त्यनंतरं महा
त्मा आधिः स्वां पारमार्थिकीं सत्तां प्राप्य अपगतभयशोकः सन् सततमुदितं जीवन्मुक्तरूपं यस्य तथाविधः अत एव अपरिच्छिन्नस्वानंदमरेन पूर्णितमा पूर्णं च चे
तो यस्य तथाविधः सन् सकलः कलापूर्णः शशांक इव अपरिच्छिन्ने ब्रह्मात्मकाशे अरमत विजहार विश्रांतिं प्राप इत्यर्थः ४७ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपश

जगाम करुणार्द्रात्मा नियमायोत्तमश्रिये विश्रांत्यै कच्छमरकं तपोधर इवाचलं. ४५ निरस्ताशेषसंकल्पस्तपस्तत्र चका
र ह दशवर्षाणि तेनासावात्मज्ञानमवाप ह ४६ अरमत तदनु स्वां प्राप्य सत्तां महात्मा व्यपगतभयशोको भोगभूमावनी
षु सततमुदितजीवन्मुक्तरूपः प्रशांतः सकल इव शशांको पूर्णिताः पूर्णचेताः ४७ मोक्षोपायेषु उपशमप्रकरणे गाधि
वृत्तांतः सर्गः ४९ श्रीवसिष्ठ उवाच एवमेवातिविततादुर्ज्ञाना रघुनंदन महामोहमयी माया विषमा पारमार्थिकी १ क्व मु
हूर्तं द्वयस्वप्नसंभ्रमालोकदृष्टता क्वानेकवर्षसंभुक्तश्वपचावनिपभ्रमः २ क्व संभ्रमोपलब्धत्वं क्व भ्रमस्य निदर्शनं क्व
सत्यत्वमसंदिग्धं क्व सत्यपरिणामिता ३ अतो वच्मि महाबाहो मायेयं विषमा न्वहं असावधानमनसं संयोजयति संकटे ४

मप्रकरणे एकोनपंचाशः सर्गः ४९ गाध्युपाख्यानं संपूर्णं चित्तस्याक्रमणोपायाः ज्ञानमाहात्म्यमुत्तमं चेतोहि पीनता दोषहेतवश्चात्र कीर्तिताः वर्णितं गाध्युपाख्या
नं प्रकृते योजयति एवमित्यादिना दुर्ज्ञाना अचिंत्या पारमार्थिकी परमात्ममात्राश्रयविषया १ दुर्ज्ञानतामेव त्रेधा दर्शयति क्वेति द्वाभ्यां २ ३ ४।



चित्तं नाभिः किल अस्य इह मायाचक्रस्य सर्वतः स्थीयते चेत् तदाक्रम्य तन्न किंचिद्भ्रमबाधते इति यावत् भगवता तत्र उपदिष्टं तदुपायं जिज्ञासुः रामः पृच्छति एवमिति कुर्युः अधिकारिण इति
शेषः पूर्णानंदात्मनः परिच्छेदे दुःखापादनमेव अंगच्छेदः तस्मात् अंगच्छेदस्य कारिणः ५ भगवदुपदिष्टमायाचक्रावष्टंभप्रकारं प्रथमं प्रपंचयितुमुपक्रमं अनुवदति
अस्येत्यादिना ६ मायाचक्रं गृहीतनाभिर्यस्य तत् तथाविधं सत् वहनाद्भ्रमणान्निरुध्यते निवर्तत इति यावत् ७ यथा बालानां काश्यादिमयस्य क्रीडाचक्रं तं

श्रीराम उवाच एवमस्य कथं ब्रह्मन्मायाचक्रस्य रोधनं कुर्युः प्रवहतो वेगात्सर्वांगच्छेदकारिणः ५ श्रीवसिष्ठ उवाच अस्य संसार
रूपस्य मायाचक्रस्य राघव चित्तं विद्धि महानाभिं भ्रमतो भ्रमदायिनः ६ तस्मिंस्तु तमवष्टब्धे धिया पुरुषयत्नतः गृहीतनाभिवहना
न्मायाचक्रं निरुध्यते ७ अवष्टब्धमनोनाभि मोहचक्रं न गच्छति यथा रज्जुनिरुद्धायां कीलकं रज्जुवेष्टितं ८ चक्रयुद्धैकतज्ज्ञो
सि कस्माज्ज्ञानासि नानघ चक्रं नाभाववष्टब्धे वशमायाति नान्यथा ९ चित्तं नाभिमवष्टभ्य तस्माद्यत्नेन राघव संसारचक्रं वहना
दात्मनः परिरोधय १० एतां युक्तिं विना दुःखमनंतमितमात्मनः अस्यां दृष्टौ क्षणाद्दृष्टं तं गतमेवावलोकय ११ चित्ताक्रमणमात्रात्तु प
रमौषधाद्दृते प्रयत्नेनापि संसारमहारोगो न शाम्यति १२ तस्माद्राघव संत्यज्य तीर्थदानतपःक्रियाः श्रेयसे परमायातां चित्तमेव
वशं कुरु १३

तु वेष्टितं नाभिकीलकं तज्जन्यभ्रमनिबद्धायां रज्जौ तं तेनो निरुद्धायं न गच्छति न भ्रमयति तद्वत् ८ किंच हे राघव त्वं चक्रयुद्धे एको मुख्यतज्ज्ञश्च
विद्वंभ्रमणाद्यभिज्ञोसि अतः कस्मादुक्तदृष्टांतं न जानासि ९ आत्मनः वहनात् अनर्थपरंपराप्रापणात् सम्यक् परिरोधय निरुद्धि १० एतां चित्तरोधनलक्षणां युक्तिं योगमु
पायं विना आत्मनः अनंतं दुःखं इतं प्राप्तं तच्च दुःखं अस्यां दृष्टौ प्राप्तायां सत्यां अंते नाशं गतमेव अवलोकय मदुक्तार्थे संशये त्वं यथा कलापश्येत्यर्थः ११ उपायांतरं वनात्ती
त्याह चित्तेति १२ १३

वा॰टी॰ उ॰प॰ तत्रोपपत्तिमाह चित्तांतरिति. १४. यथा कुंभके निरुद्धो मशकादिः स्वदुःखसंसरणाकाशकोटरं दैवात्कुंभनाशेन विनाश्य अतुलितमनुपमं महाकाशस्वरूपमाविश्य मुक्तवं
१४ २ धः सुखी भवति तथात्मपि नाशेन चित्तकुंभस्य विनाश्य अतुलितब्रह्माकाशमाविशेत्यर्थः ।। १५ ।। चित्तनाशे तर्हि क उपायस्तमाह वर्तमानमिति भूतभविष्यद्विषया
नुसंधानत्यागे एकमात्रितं सीयत इत्यर्थः ।। १६ भाविविषयसंकल्पस्य तदंशभूतार्थानुसंधानस्य च वर्जनं प्रतिक्षणं सावधानतया करोषि चेत्तर्हि ।। १७ ।। खे

चित्तांतरे वसंसारः कुंभांतः कुंभखं यथा ।। चित्तनाशेन संसारः कुंभनाशेन कुंभखं ।। १४ ।। चिरं संसरणाकाशकोटरं चित्तकुंभखं ।। विनाश्या
तुलिताकाशस्वरूपं रूपमाविश ।। १५ ।। वर्तमानमनायासं भज बाल्यं धियाक्षणं ।। भूतं भविष्यं द्भज घ्नाति चित्तमचित्ततां ।। १६ ।। संकल्पां
शानुसंधानवर्जनं च प्रतिक्षणं ।। करोषि तद् चित्तत्वं प्राप्तस्यापि पावनं ।। १७ ।। यावत्संकल्पकलना तावच्चित्तविभ्रतम ।। यावज्जल
दविस्तारस्तावत्खे जलबिंदवः ।। १८ ।। सचित्तं चेतनं यावत्तावत्संकल्पकल्पनं ।। सर्वं चंद्रांशुजं गच्छेत्तावत्प्रालेयलेशका ।। १९ ।। १
चेतनं चित्तरिक्तं चेद्भावितं तत्स्वसंस्थितेः ।। आमूलमेवदग्धानि विद्धि मूलानि सिद्धवत ।। २० ।। चेतनं चित्तरिक्तं हि प्रत्यक्चेत
न मुच्यते । निर्मनस्कस्वभावं तन्न तत्र कलना मलः ।। २१ ।।
जलस्य वर्षस्य बिंदवः ।। १८ एवं संकल्पा अपि सतिचित्ते दुर्वारा इत्याह सचित्तमिति चेतनं चि
दात्मरूपं ।। १९ ।। चित्तरिक्तं चित्तात्पृथक्कृतं कूटस्थमिति यावत् ।। तत्र दास्वसंस्थितेर्मलानि कामकर्मवासनादीनि आमूलं मूलाज्ञानेन सह दग्धानीति सिद्धवत्तका राम॰
रे गामहासिद्धसाम्येन वा विद्धीत्यर्थः ।। २० ।। ननु स्वतादाहस्तथापि चेतने पुनः कलवशाच्चित्तारिसमुद्भवः किं न स्यादित्याशंक्याह चेतनमिति ।। २१ ।। ।। १४४ ।।

---

चित्तरहितचेतनस्वरूपं यत्स्वैव परमार्थसत्यता शिवता निरतिशयानंदरूपता सैव परमात्मस्वभावभूता अवस्था एवं ज्ञाता सर्वावभासकचिद्रूपता दृष्टिः परमार्थदृक्तय
त्र यस्या अवस्थायां क्षतमिति निर्दार्थविशेषणं ।। २२ ।। निर्दग्धतावीजान्येवदर्शयतिमन इति ।। २३ ।। ननु विदुषामपि मनोस्ति तत्राप्याशादीनि कुतो नोपजायंते तत
त्राह संसृतीति. सत्यमस्ति तथापि ते षां मानसे संकल्पे आशादिः सर्वभावव्यवस्थापिका भाः संसारवल्याः वासनात्मकं बीजमेव न जायते वस्तुगतावबोधे
न बोधितत्वादित्यर्थः ।। २४ ।। वस्तुत्वेनावगतानां केनोपायेनावस्तुतावगमलक्षणो बाधस्तमाह; शास्त्रेति. ।। २५ ।। उपादृत्य निवर्त्यं उद्यमः पुरुषप्रयत्न
ना सा सत्यतां शिवता सावस्था पारमात्मिकी ।। सर्वज्ञता सा सा दृष्टिर्न तु यत्र मनः क्षतं ।। २२ ।। मनो यत्र तु तत्राशास्तत्र दुःखसुखानि च ।। सरा
सन्निधिमायांति श्मशान इव वायसाः ।। २३ ।। वस्तुतत्त्वावबोधेन सर्वभावव्यवस्थितेः ।। संसृतिव्रततेर्बीजं संकल्पेनोपजायते ।। २४
शास्त्रसज्जनसंपर्कात्संततात्यासयोगतः ।। जागतानामवस्तुत्वं भावानामवगम्यते ।। २५ ।। अविवेकादुपादृत्य चेतः सोद्यम
निश्चयैः ।। बलात्कारेण संयोज्यं शास्त्रसत्सुरुषक्रमैः ।। २६ ।। मुख्यकारणमात्मैव परमात्मावलोकने ।। अगाधे पतितं रत्नं
रत्नेनैवावलोक्यते ।। २७ ।। स्वानुभूतानि दुःखानि स्वात्मैव त्यक्तुमिच्छति ।। तेनात्मैवात्मविज्ञाने हेतुरेकः परः स्मृतः ।। २८ ।।
सत्सु हि नैरवश्यमस्मिन्जन्मनि ज्ञानं साधयामीति दृढनिश्चयैन ।। २६ ।। किं मुख्यं कारणमवलंब्य शास्त्रादिना प्यात्मान्वेष्य इति चेत्स्वयंज्योतिरूपं प्र
त्यगात्मानमेव ।। न हि दृश्यैर्लक्षणैनैतस्यैवस्तनः प्रथमानतादित्याशयेनाह मुख्यमिति रत्नेन प्रकाशमानेनैव रत्नेनैवेत्यर्थः ।। २७ ।। उक्तं मुख्यकारण
तां स्फुटयति स्वेन अनुभूतानि दृश्यजातानि दुःखान्येवेति विवेके न येन हेतुनात्यक्तुमिच्छति तेनैव हेतुनास्वात्मावलोके न तत्प्रतिकूलस्वभावः स्वसंमुखो
हेतुः न हि स्वमप्पसुखजडस्वभावत्वेन तत्प्रतिकूलं स्यादिति भावः ।। २८ ।।

वा॰टी॰उप॰ तस्मात्त्वं सततं स्वैकप्रवणो भव तच्छ्रमाभ्यासायाह प्रलपन्नित्यादिना। २९। जन्ममरणग्रहणांतराले मद्दुःखदुःखांतरेषु स्वात्मप्रवणतायाः अविस्मरणविधानार्थं शोधनेना
।।१४४।। मलतां प्राप्तेषु संविन्मात्रो भव। ३०। इदं पुरोवर्ति तद्दूरस्थं मम अयं सः अहमेव ज्ञायमनो देहोऽहं इति वासनाः सम्यक्त्यक्त्वा। ३१। वर्तमाना बाल्यादि स्थितिर्भविष्यंती
यौवनाज्यादिस्थितिः तयोः अनुसंधानं ध्यानं समाधानं समाधिः। ३२। उक्तमेव स्पष्टमाह बाल्येति। ३३। संवेद्यं बाह्यविषमलक्षणं। ३४। शुभाशुभलक्षणौ यौ स्वसंक

प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि। निरस्तमननानंतसंविन्मात्रपरो भव॥ २९॥ जायमानस्तथा जीवन्म्रियमाणः
क्रियारतः। स्वात्मन्यमलतां प्राप्तेषु संविदंशे स्थिरो भव॥ ३०॥ ममेदं तदयं सोऽहमिति संत्यज्य वासनाः। एकनिष्ठतया तस्य संवि
न्मात्रपरो भव। ३१। वर्तमानभविष्यंत्योः स्थित्योरारेहमेकधीः स्वसंवित्त्यानुसंधानसमाधानपरो भव। ३२। बाल्ययौवनदे
हेषु दुःखेषु च सुखेषु च। जाग्रत्स्वप्नसुषुप्तेषु स्वसंवित्तिपरो भव। ३३। मलं संवेद्यमुत्सृज्य मनो निर्गलयन्परं। आशापाश
मलं छित्वा स्वसंवित्तिपरो भव। ३४। शुभाशुभसंकेतसंशांताशाविषविकः। नष्टेष्टानिष्टदृष्टिस्त्वं संवित्सारपरो भव। ३५।
स्वकर्तृकर्मकरणान्स्वास्पर्शानंतरास्पृशन्। निर्विकल्पनिरालंबः स्वचिन्मात्रपरो भव। ३६। जाग्रत्येव हि संसुप्तां भावय
न्सुस्थिरां स्थितिं। सर्वमस्मीति संवित्स्यन्नैकांतसुखो भव। ३७।

सं
स्पकृतं केतौ तयोः संशांता आशाविषविकारो यस्य अत एव नष्टेष्टानिष्टदृष्टिर्यस्य। ३५। कर्त्ता विज्ञानमयः कर्म बाह्यविषयाः करणानीन्द्रियाणि सहितानि स्वं राम॰
न स्पृशंतीति स्वास्पर्शान् एवंविधसंसारान् स्वस्यांतरमध्ये मतिः स्वांतर्गत प्रतिबिंबानि स्पृशन् अभयमन। ३६। संसुप्तां सुषुप्तवन्निर्विकल्पां। ३७। १४४।

---

नानादेशनानारत्वमोऽनानाशसुषुप्तिस्ताभ्यां सर्वं स्मलयदशाभ्यां वा मुक्तः समग्रस्य दृश्यस्य कलनायां प्रथा यो दीपः समस्तानां कलनानां बुद्धिवृत्तीनां दीपवत्प्रकाशक इति
२ धर्मतां वा। ३८। आत्मता स्वतापरता तदन्यता ते त्यक्त्वा। ३९। निर्दुर्मा धर्माधर्मरहितता। ४०। सर्वस्वात्मत्वेन संपन्नविषयस्यापि अमृततायाः अर्थसिद्धत्वादिति भावः। ४१। अ
मतिर्विस्मृतिरज्ञानमिति यावत्। ४२। ४३। श्रीर्लक्ष्म्येति सस्वरूपेतामा स्यैवाशामहार्णवतरणात्सोऽप्यपरं दृष्ट्वा निवर्तेत इति भगवद्भजनादिति भावः। ४४। मुक्तस्यान्यत्रा
शासंभावना दूरे अमृतास्तादिरसायनास्वादेष्वानंदरसास्वादविघ्नत्वसंभावनया विषयबुद्धेः यत्तादुद्विग्नेस्याद्दिस्यात्स्वे गाहस्वभाव इति प्रतिकूलं विषमिवाचरति प्र

नानानानादशामुक्तोऽमुक्तोऽमुक्तताया समो। समग्रकलनादीपस्वचिन्मात्रपरो भव॥ ३८॥ आत्मतापरते त्यक्त्वा निर्विभागो जगत्स्थितौ व
ज्रस्तंभवदात्मानमचलं ब्रह्म स्थिरो भव॥ ३९॥ छित्वा तमोन सामान्याशानाशरूपानुदारया धियाधैर्यैकधर्मिण्या निर्दुर्मा धर्मतां
व्रज॥ ४०॥ समासादयतस्तत्ते स्वसंवेदनधर्मिणः। विषं हलाहलममृतयिया स्वस्यमृतता मया। ४१। तदोदेति महामोहः संसृतिभ्र
मकारणं। निर्मलाया निरंशायाः संवित्तेश्चामतिर्यदा। ४२। तदा संक्षीयते मोहः संसारभ्रमकारणं। निर्मलायां निरंशायां संस्थि
तौ स्थितिर्यदा॥ ४३॥ स्वरूपमनुयातस्य तीर्णस्याशामहार्णवं। प्रसरिष्यतितेसंवित्त्वं शुरिव सर्वगः॥ ४४॥ सभावलोकनं यात मा २
आनंदाद्वयसंस्थितेः रसायनमपि स्वादु रामप्रतिविषायते। ४५। तेनेमं भजामहे पुंभिर्ये स्वभावमुपागताः। शेषाः पुरुषनामा
नो गर्दभा दीर्घबाहवः। ४६। तिविषायते। ४७। ये पुरुषाः नः अस्माकं स्वभावं प्रत्यगात्मभावमुपागता जीवन्मुक्ताः पुंजन्मसार्थकीकरणात्पुरुषार्थसाधनात्
फलपौरषत्वाच्च पुंभिस्तैः पुरुषधौरेयैः सह भजामहे सदा मैत्रीमिति शेषः। अन्ये तु पुरुषार्थोपयोगिपौरुषरहितत्वान्नाममात्रेण पुरुषा नार्थलेशेनापीति गर्दभव
दुपेक्ष्याः स्वनदर्शनादियोग्या अपीत्याशयेनाशेषा इति। ४६।

वा०टी०उ०प०
॥१४५॥

नन्वन्येपियोगिनउपासकाश्च जगति महांतः संत्येव तेभ्योपि तत्त्वविदः स्वकउत्कर्षस्तत्राह पर्वतादिति । स्वसंविन्मात्रसर्वोन्नतस्थितेरत एव परां कोटिमुत्कर्षकाष्ठां प्रयातस्य तत्त्वविदः पुरः योगिप्रभृतयः ज्ञानार्थं जाः स्वात्महतउपसर्पंतः अद्रेर्मेरोः पुरः देतिनः प्रखंतपार्श्वतात्सर्वतोतरं यांति इव भासंते तेन मेरुरिव सर्वोन्नतादद्रेः श्रीताश्चेत्यर्थः । ४७ स्वसंविन्मात्रउन्नतस्थितिमुपपादयति अदृष्टेति प्राक्तनाप्यदृष्टाः सीमांतमग्रे च अदृश्याः दृश्यमशक्याः सीमानोऽवधयो यस्य तत्त्वभूत्विधस्य स्वसंविल्लक्षणं दिव्यं चक्षुर्यस्य तस्य तत्त्वविदः अंतःकाम्यितानि सूर्यादीन्यखिलान्यपि तेजांसि नोपकुर्वंतीति स्वसंविन्नेत्रवतस्योन्नतस्थितिरित्यर्थः । ४८ न केवलं नोपकर्तुं शक्नुवंति किंतु तत्सुस्तुतोऽवस्कृतामेव गच्छंतीत्याह अवस्कृतामिति । ४९ । अतएवोक्तं सिद्धमित्याह तेजोंशुष्विति जसः अंशु

पर्वतात्सर्वतो यांति पुरोद्रेरिव दंतिनः । परां कोटिं प्रयातस्य स्वसंवित्युन्नतास्थिते ॥ ५७ ॥ अदृष्टादृश्यसीम्नोंतः सूर्यादीन्यखिलान्यपि न तेजांस्युपकुर्वंति स्वसंविद्दिव्यचक्षुषः ॥ ४८ ॥ अवस्कृतां प्रजंत्येते मथ्या हेइवरीपकाः ॥ अर्कादयो महालोकाश्चिदृश्याधिगतात्मनः ॥ ४९ ॥ तेजोंशुषु प्रभावेषु बलिष्वपि महत्स्वपि सर्वेष्वन्नतियुक्तेषु तत्त्वज्ञः परमोन्नतः ॥ ५० ॥ भांतीह भासा यस्याकर्ववह्नीदुमणितारकाः ॥ तथा जगतिरानंते ज्ञातज्ञेया नरोत्तमाः ॥ ५१ ॥ धराविवरकीटेभ्यो गर्दभेभ्योपि मानवाः ॥ तिर्यग्भ्यश्चापतत्त्वज्ञा रामतुच्छतराः स्मृताः ॥ ५२ ॥ तावत्संमोहवेतालो देही यावदनात्मवान् ॥ आत्मज्ञस्तु संयुक्तश्चेतनेनेति तद्विदः ॥ ५३ ॥

पुकार्येषु प्रकाशेषु योगसिद्धिवशितादिप्रभावेषु शरीरादिबलवत्सु ऐश्वर्यायुरादिना महत्सु अन्येष्वपि वाग्मितादयुन्नतियुक्तेषु मध्ये परमोन्नतः सर्वोन्नततानाम तस्मिन्नध्यस्तत्वादिति भावः ॥ ५० ॥ यस्य जगदीश्वरस्य भासा भांति तथा तत्तुल्यतयेत्यर्थः ॥ ५१ ॥ तुच्छतरा मूढतराः तत्त्वज्ञानाभावेन तत्तोपगमयोनिकोटिप्रा दुर्वारत्वादिति भावः ॥ ५२ ॥ सतोप्यात्मनः अज्ञानेनासत्त्वापादनादनात्मवान् अतएवासावेतनेन संयुक्त इति तद्विद आहुरिति शेषः ॥ ५३ ॥ रम० १४५

चेतनइतिआत्मज्ञएवचे१४

DR BHAU DAJI

दुःखदाहार्थोऽहाचेष्टायस्य स्वार्थेतु शद्वः ॥ ५४ चित्ते पीवरतां स्थौल्यं गते सति आत्मज्ञताई उत्तंपारितापिहरद्याति ॥ ५५ ॥ अतः कारणान्मनः प्राप्तानां भोगानां विषयाणामाभोगः सेवनं तत्तिरस्कारैरप्राप्तानां तस्याभिलाषस्यापहारैश्च चिराभ्यस्तैः कालेन अजीर्णपर्णवत्कार्श्यमपचमंनेयमित्यर्थः ॥ ५६ ॥ केतेमनः पीनताहेतवो यद्वर्जनेन तत्कार्श्यं स्यात्तानाह अनात्मनीत्यादिना ॥ ५७ ॥ विकारेण विकासेन ममतालक्षणेन मलेहेलया लीलया आमत्वेनितियावत् हर्षममतामलमाहइ

अनात्मज्ञो हि दुःखेहः प्रस्फुरन्नपि भूतले ॥ शवएवमवस्तुश्चेरात्मज्ञस्तु सचेतनः ॥ ५४ ॥ दूरादात्मज्ञतायाति चित्ते पीवरतां गते ॥ आलोकलक्ष्मीरमितो महामेघइवोत्थिते ॥ ५५ ॥ भोगाभोगतिरस्कारैः कार्श्यं नेयं शनैर्मनः ॥ रेभ्यापहारैस्तत्त्वेन कालेनाजीर्णपर्णवत् ॥ ५६ ॥ अनात्मन्यात्मभावेन देहमात्रास्थया नया ॥ पुत्रदारकुटुंबैश्च चेतोगच्छति पीनतां ॥ ५७ ॥ अहंकारविकारेण ममतामलहेलया ॥ इदं ममेतिभावेन चेतोगच्छति पीनतां ॥ ५८ ॥ जरामरणदुःखेन व्यर्थमुन्नतिमीयुषा दोषाशीविषकोशेन चेतोगच्छति पीनतां ॥ ५९ ॥ आ [illegible] धिव्याधिविलासेन समाश्वासेन संस्तेः ॥ हेयादेयप्रयत्नेन चेतोगच्छति पीनतां ॥ ६० ॥ २
स्नेहेन धनलोभेन लाभेन मणियोषितां ॥ आपातरमणीयेन चेतोगच्छति पीनतां ॥ ६१ ॥ दुराशाक्षीरपानेन भोगाऽनिलबलेन च ॥ आच्छादनेन चारेण चिर्न्नहिर्यांति पीनताम् ॥ ६२ ॥ आगमापायवपुषा विषवैषम्यशंसिना ॥ भोगाभोगेन भीमेन चेतोगच्छति पीनताम् ॥ ६३ ॥

दमितिइदंशरीरं मम आत्मा भोगायतनं चेतिभावेनेत्यर्थः तमेवभावं विशिनष्टि जरेति ॥ ५९ ॥ संस्रतेः समाश्वासेन रम्यताचिरस्थायितादिविश्वासेन ६० ६१ चारेण नानाविषयसंचारेण ॥ ६२ ॥ आगमापायो वपुः स्वभावो यस्य क्षिप्रोल वैषम्यं दाहमूर्च्छादिव्याकुलतां तच्छंसिना तात्सर्य्य वसितेनेतिया वत् भोगानां आभोगेन प्राप्त्याख्यातेन ॥ ६३ ॥

वा० टी० उ० प० १४६ शरीरलक्षणे दुःखश्वभ्रे चिराय प्ररूढं स्पन्नं चित्तविषद्रुमं तं अशंकं विचारसारक्रकचेन छिंधीति परेणान्वयः। चिंतावयस्य वल्ल्याकृतयो मंजर्यो यस्मिन् इत्येतस्येति
कम् ६४ विकल्पा एव पत्रं यस्मिन् ॥ ६५ इदानीं तदेव चेतोगजत्वेन वर्णयति मनःक्षणमिति द्वाभ्यां हे राघवराजसिंह त्वं उक्तदशविशेषणविशिष्टं चेतोग
जं सुतीक्ष्णयाधीकरजाग्रपंक्त्या विदारयेति द्वितीयेनान्वयः। मनःक्षणं विवेकप्रमादवती मरुद्धरणिश्च आगमानुमानलक्षणोई क्षणो यस्य तं। एकस्मिन्बहिर्मुखलक्ष
णे यस्य तं। एकस्मिन्बहिर्मुखलक्षणे संसाराद्रितटे उपवेशनमुपवेशो यस्य तं अत एव अंतर्मुखविश्रांति सौख्येषु समर्थं दुःखमत्स्यादिभीषणत्वात् उग्रं सुजनैः
क्रम्यंत इति सुजनक्रमः शमदमतितिक्षादयस्त एव क्षणस्य अभ्रखंडस्य पयश्चवनस्य आलोकने उत्कंठं परं तु चंडं अतिकोपनं तत्क्षणायोग्यमिति यावत् सुखदुः सोऽर्कं

शरीरदुःखश्वभ्रचिरप्ररूढं चिंतावयोच्चाकृतिमंजरीकं। जरामृतिव्याधिफलौघनम्रं कामोपभोगोपचिकाशिपुष्पं ॥ ६४ ॥ विचार
सारक्रकचेन चित्तविषद्रुमं त्वं द्रुतमद्य कृत्स्नं। आशामहाशाखमशंकमेनं छिंधि प्रमत्तात्र विकल्पपत्रं ॥ ६५ ॥ मनःक्षणं चैक
तटोपवेशं विश्रांतिसौख्येषु समर्थमुग्रं। आलोकनोत्कं सुजनाक्रमाभ्रखंडस्य चंडं सुखदुःखगंडं ॥ ६६ ॥ चेतोगजं कायकुका
ननस्थं सुतीक्ष्णयाधीकरजाग्रपंक्त्या। विदारयादीर्घविकारदंतं क्रियाकरं राघवराजसिंह ॥ ६७ ॥ रतिंगतं नित्यमसत्प्रदेशे
शरीरमांसग्रसनेन पुष्टं दुष्टक्रियाकर्कशचंचुरुग्रं मेकेक्षणं पुष्टतमोंऽशुकृष्णं ॥ ६८ ॥

खेदवशीतो सवाष्पमदस्त्राविरोगंडौ यस्य ॥ ६६ ॥ आदीर्घाः कामादिविकारा एव दंता यस्य अत एव वधे यादि च प्रविदारणक्रियाकरं ॥ ६७ ॥ असतिकुत्सिते स्त्री
व्यंजनश्मशानादिप्रदेशे रतिमासक्तिं गतं शरीरलक्षणस्य मांसस्य ग्रसनेनैवातर्भावापादनेन पुष्टं उपचितं दुष्टक्रियापरमर्मतोदनं तद्वत्कर्कशश्चंचुर्दंडस्त्रोग्रं तं रा० म० १४६
तद्दशोऽछ्व्यापारो यस्य एकस्मिन्स्वार्थ एव दृष्टिक्षणं दर्शनं यस्य पुष्टे स्तमोंऽशुभिस्तामसवृत्तिभिः कृष्णं मलिनं काकपक्षे चत्वारि विशेषणानि स्पष्टानि पुष्टास्तमों
शः सांधकारा भागा इव कृष्णं निजचित्तकाकं कायकुलायकोशात् हरे समुत्सारयेत्युत्तरेणान्वयः ॥ ६८ ॥

दोदुरात्मनो दृक्षादेश्च दृष्टथा श्मरेतु तादृशरस्तं गंधेभ्यो दुर्वासनाभ्य उद्धृतं आविर्भूतं प्रस्थितं च ॥ ६९ ॥ तदेव चित्तपिशाचत्वेन रूपयंस्तदनुत्सारणे मोक्षासिद्धिमा
हतेंसेति द्वाभ्यां अज्ञानलक्षणेषु महत्सु वटेषु वा देहशतेषु अनंतकोटिदेहलक्षणायाम टव्यामिति व्यस्तरूपकं स्वस्य चित्तस्य संसरतौ अपसरणे चेतनवर्जिते
पुरस्त्यक्षस्वेतनेऽपि तिष्ठावत। ईदृशमेनं चित्तपिशाचं स्वविदात्मगेहात् तावत् हृदयात् यावन्नोत्सारयेत्तावदात्मस्वभावस्तावसिद्धिर्मुक्तिः कुतः इत्यन्वयो
रन्वयः ॥ ७० ॥ ७१ ॥ इदानीं मनो महाहिं भयदत्वेन रूपयंस्त्याजयति शुभेति द्वाभ्यां शुभाशुभलक्षणमास्येम वमास्यं शरीराव वृत्ताद्यत देष्ट्रा द्रष्टुं यस्य

दूरे समुत्सारय भारभूतं दुश्चेष्टितं कर्कशमारटंतं। गंधोद्धतं कायकुलायकोशाद्दोषोपशांत्यै निजचित्तकाकं ॥ ६९ ॥ तत्क्षापि
शाच्यापरिचर्यमाणं विश्रांतमज्ञानमहावटेषु भ्रांतं चिरं देहशतेष्वटव्यां संसरतौ चेतनवर्जितेषु ॥ ७० ॥ विवेकवैराग्यगुरु
प्रयत्नमंत्रैः स्वतंत्रैः स्वविदात्मगेहात्। नोत्सारयेच्चित्तपिशाचमेनं यावत्कुतस्तावदिहात्मसिद्धिः ॥ ७१ ॥ शुभाशुभास्यं हतमा
नवौघं चिंताविषं कायकुकंचुकं च। अजस्रमच्छश्वसनाशनं च सर्वस्य नानाभयनाशनं च ॥ ७२ ॥ हृदन्तदुःशाल्मलिकोटर
स्थममोघयाचित्तवगमंत्रशक्त्या। नीलाशमंगममनोमहाहिं मयं भ्रशं प्रोज्झ्य भवाभवात्मा ॥ ७३ ॥

अच्छः श्रमादिदोषपरामृष्टः श्वसनः प्राणवायुरशनं यस्य पवनाशनत्वात् नानाविधं भयं नाशं मरणं च ददातीति नानाभयनाशनं ॥ ७२ ॥ ईदृशं मनोलक्षणं म
हाहिं अमोघया चित्तवगस्य चिदेकरसगरुडस्य बोधकार्ये सत्यं ज्ञानमनंतं ब्रह्मेत्यादिमंत्राः तेषां शक्त्या शमं मरणाज्ञानेन सहोच्छेदं नीलाभयं भ्रशं नि:
शेषं प्रोज्झ्य विहाय अभवोऽभयो वा आत्मा भवेत्यर्थः ॥ ७३ ॥

वा॰टी॰उप॰ ॥१४७॥

व नदेव चित्तं गृध्रत्वेन रूपयति अमंगलेति द्वाभ्यां शरीरलक्षणानां शवावलीनां संततं सेवनेनानुसंधानेन भक्षणेन चक्राकर्कककर्कंक चंचुप्रहारैरुपमानव्यपशोकभयादिभिश्च
क्षतेनेवं पुष्पा सुबुद्धो श्मशानवृक्षं तत्सदृशमुत्कटं देहं वसेवते तत्वान्भ्रोलोर्थ॥७४॥ अधीरः विहंगुद्ध्या गृध्रोऽभिलाषो यस्य ईदृशा श्चित्तगृध्रो यस्मिन्स देहद्रुमा दुड्डीय गच्छति
तन्नहिंतेनिपुणं नितरां जयइत्यर्थः॥७५॥ तदेव मनइदानीं मर्कटत्वेन रूपयति भ्रांतमिति द्वाभ्यां एकस्माज्जन्मान्तरं प्रयातं जननां जन्मसमूहे तदीयसंसार जन्मजन्मेऽ
बंधं च हसंतं स्वचेष्टितैः विडंबयंतं॥७६॥ असिनाम्नयोः स्मृताहारोऽसिनासंतरेव आसमंतात्कुसुमानियस्मिन्भुजकरादयः शाखायस्मिन्विलोलांगुलि

अमंगलाकारधरः शरीरशवावलीसंततसेवनेन॥ दिगावलीसंभ्रमणश्रमार्त्तः श्मशानमेवीव पुपास्तते नः॥७४॥ भोगामिषोदि-
क्ष्य भिथावमान गुल्कंधरोधीर विहंगगृध्रः॥ उड्डीय गच्छेद्यदि चित्तगृध्रो देहद्रुमात्तन्निपुणं जयस्त्वं॥७५॥ भ्रांतं वनांतेषु दि-
गंतरेषु फलार्थिनं चंचलमाकुलांगं॥ जन्माटवीजन्ममहीप्रयातं संसारबंधं जनताहसंतं॥७६॥ द्रुमासिनामाकुसुमेभु-
जादिशाखेविलोलांगुलिजालपत्रे॥ समुद्धसंतं परिमारयांतर्मनोमहाकं मर्कटमंगसिद्धं॥७७॥ अभ्युत्थितं सत्फल-
संक्षयाय लसन्मुखासंगितडित्प्रकाशं॥ वर्षंतमासारमनर्थसार्थं मारोलितं वासनवात्ययातः॥७८॥

जालं पत्राणि यस्मिन्नीदृशे देहहस्से समुद्धसंतं मनो महामर्कटं परिजो निरोधेनं मारयेत्यर्थः॥७७॥ इदानीं तदेव चित्तं मेघत्वेन रूपयति॥ अभ्युत्थितमिति द्वा-
भ्यां सत्फलस्य परमार्थसुखस्य पक्षस्य फलस्य च क्षयाय अकाले समुत्थितं मुखे मुखसदृशे बहिर्मुखदृष्ट्यग्रे आसंगी प्रतिबिंबनेन विषिक्तः तडित्स- राम॰
दृशश्चिदाभासप्रकाशो यस्य अनर्थसार्थरूपं असारं वर्षंतं वाहनानि वासनास्तद्रूपेण वात्यया अंतः आरोलितं परिवर्तितं॥७८॥ ॥१४७॥

दुरंतां बरस्थं ईदृशं चित्तमेघं संकल्पानां यानि सम्यक् कल्पनानि पुनः पुनः स्मरणेनानि तेषां वर्जनेन रूपात् तद्यमंत्रप्रभावात् सोत्साहं उत्सारयते न च हृद्धज्जीवन्मु-
क्तिफलं प्राप्य आस्व इः हे वसिष्ठ त्वमावो नित्यमुक्तात्मेव अलं सम्यक्पूर्णो भवेत्यर्थः॥७९॥ इदानीं तदेव चित्तं पाशत्वेन रूपयति ग्रंथीकृतमिति द्वाभ्यां आ आत्मदृ-
न ष्टे आत्मोपादानकं कल्पादिसर्गमर्यादिकृतस्य अद्यतनकालपर्यंतं कृतैः सुकृतदुष्कृतकर्मभिर्निरंतरं ग्रंथीकृतं ग्रंथितानेन दृढीकृतं अत एव समस्तानां जाल-
तरणानां नानायोनिजन्मनेदानीं क्रमात् दूषनायदीर्घमेवस्थितं॥८०॥ अत एव संप्रोतानि सख्या शरीरमालायस्मिन् अस्त शंकः पुनर्जन्मशंकाशून्यः

संकल्पसंकल्पनवर्जनोग्रमंत्रप्रभावाद्दुरयांबरस्थं॥ सोत्साहमुत्सादय चित्तमेघं हृत्फलं प्राप्य भवामलौघः॥७९॥ ग्रंथीकृ-
तं कर्मभिरात्मदृष्टेमंत्रैरमेध्यं ज्वलनैरदग्धं॥ पीडांपरामात्मनिकल्पयंतं समस्तजालांतरदीर्घदाम॥८०॥ संप्रोतनिःसंख्य-
शरीरमालं बलात्संकल्पनमात्रशस्त्रैः॥ छित्वा सयं राघव चित्तपाशं यथासुखं त्वं विहरास्तशंकः॥८१॥ फूत्कारदग्धा-
खिलपांथलोकमसंततदुःसापपरप्रबोधं॥ आशीविषं शोषितलोकखंडं व्यासामिषोद्धृतशरीरदंडं॥८२॥ आशांबरं दे-
हगुहासुगुप्तं संकल्पघोराजगरं जवेन॥ अकामनानाममहानलेन बलेन दग्ध्वा विभवे भवत्वं॥८३॥

८१॥ इदानीं तं संकल्पमजगरत्वेन रूपयंस्तद्वधोपायमाह फूत्कारेति द्वाभ्यां फूत्कारेण क्रोधादिरूपसविषश्वासेन दग्धाः पांथा लोकाः दक्षिणोत्तरमार्गगाः
ना जीवा येन आशीविषं विषपरं अतस्व शोषिता संचिता लोकखंडा भुवनभेदा येन व्यासेत्यात्सात्सलक्षणमुखव्यादेनेन विषयामिषार्थं उद्धृतः कंपितश्च तुर्वि-
धशरीरदंडो येन॥८२॥ मोक्षोद्योगालसतादामं धरं संदर्गति ईदृशं संकल्पघोराजगरं अकामनापरवैराग्यं तन्नाम्ना महता अनलेन वह्निना दग्ध्वा भस्मी-
~~कृत्वा निर्भयं निःस्विमवेतं~~ भवेत्यर्थः॥८३॥

वैराग्येण संकल्पत्यजनेये चित्तशुद्धौ सत्यां तथैव बोधसमाधिक्रमेण चित्तजयोपि सिद्ध्यतीत्याह चित्तेनेति। सहसा कृतार्थतां बुद्ध्वा प्रयत्नोपरमो मम स्फुरितीति विचार्येति तत्
त्स्कसङ्गमाह त्यजेति॥४९॥ आत्यन्तिकचित्तोपशमे निःशेषं देहादावहं ममताभिमानत्यागसिद्ध्या जीवन्मुक्तिविहारसुखसिद्धिरित्याशयेनोपसंहरति अमलमि
तीति उक्तप्रकारेण स्वकारणात्माग्गुपदिष्टतत्त्वावबोधेन स्वअंतःप्रत्यगात्मन्युपशमितमनो विमलं निरस्तरागादिमलं कृत्वा तादृशेन चेतसा आ देहं स्थूलसूक्ष्म
कारणदेहपर्यंतं सर्वमेवदृश्यं हेयहः स्यात्तृणलवादपि लघु तुच्छतं त्वा प्रशस्तरीत्यादिवदत्यन्तोपेक्षाहं अमरेवेति पश्यन्ग्रासंसारपारस्त्वं सार व्यशेषभो
गार्थमात्मक्रीड आत्मरतिः क्रियावानेष ब्रह्मविदां वरिष्ठ इति श्रुतिदर्शितलीलया लोकसंग्रहाय सोमादि पिबन् क्लिणादिभिर्यज्ञैः पुविहरणास्वाति

चित्तेन चेतः शममाशु नीत्वा शुद्धेन घोरास्त्रमिवास्त्रयुक्त्या॥ चिराय साधो स्वजनं चचलत्वं विमर्कटो वृक्षइवास्त तृष्णीः॥४९॥ अमल
मिति चकृत्वा चेतसा वीतशंकमुपशमितमनोंतः सर्वमारे हमेव॥ तृणलव लघुपश्यद्धीलयारेयदृष्ट्या पिब विहर रमस्व प्राप्तसं
सारपारः॥५०॥ मोक्षोपायेषूपशमप्रकरणे राघवाशयविनियोगो नाम सर्गः॥५०॥ श्रीवसिष्ठ उवाच॥ परिदीर्घासु तन्वीषु सु
मतीक्ष्णासु सितासु च॥ क्षुरधारोपमानासु चित्तवृत्तिषु तिष्ठ मा॥१॥ इह लौकिकेपि रमस्वचातेनननवपुनर्बंधप्रसक्तिरित्यर्थः॥५०॥ इ
ति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे पंचाशत्तमः सर्गः॥५०॥ उद्दालकमुनेः शांतेपदे विश्रांतिमिच्छतः। युंजानस्य मनो दोषैर्विक्षेपो बहुधे
र्यते श्रवणमननाभ्यामवधारितेप्यात्मतत्त्वे चित्तविश्रांतिमंतरेण निर्विक्षेपजीवन्मुक्तिसुखाप्राप्तिरिति तदर्थं समाध्यभ्यासे प्रमादेन बो
ध्य वर्ष्मनमावश्यकमित्युद्दालकाचरित्रवर्णनमुखेनोपदिदिक्षुः स्तरवतारयन् प्रथमं चित्तवृत्तिषु विशेषविश्वसनीयता मा हू परिदीर्घासिति से
हिकामुष्मिकदूरस्थविषयासंगात्परिदीर्घासु वासनाप्रचुरत्वात्तन्वीषु प्रमाद्यतो झटिति समाधिसुखविच्छेदक्षतहेतुत्वात्सुतीक्ष्णासु आत्मप्रतिबिंब
ग्रहणयोग्यतालक्षणनैर्मल्यात्सितासु अतएव क्षुरधारोपमानासु क्लिष्टचित्तवृत्तिषु चारित्रेषु प्रमादात् हि विश्वस्तो मा तिष्ठेत्यर्थः॥१॥ 

ना॰१

सत्कुलक्षेत्रे जातायां कायलतायां चित्तशुद्धिश्रवणादिदोहदोपायैरियं परमात्मपरिचयलक्षणा बुद्धिवल्लरी तव जातां तां बाह्यदृश्यव्यावृत्तिलक्षणविवेकाम्रतसेकेन वृद्धिं
नयेत्यर्थः॥२॥ साच बाल्यात्प्रभृति सिच्यमाना वर्द्धते वार्द्धकादिना कायलताम्लानौ तेपतनसंभावनात्तु दृढ रोपयशक्यो हरेत कौंजरी वर्द्धनमित्याशयेनाह यावदि
तिभूतले अपतितां स्वां कायलतां गुरुशुश्रूषा श्रवणादिनाऽदृढत्वबुद्धिवल्लरीं पालयेत्यर्थः॥३॥ विवेकसेकस्य वक्ष्यमाणध्यानरूपमहाकार्यार्थे से वेष्यत्वा
वधार्यपुनः पुनर्भावनं। तत्र वस्तु वशमननयुक्तो नामसत्त्वादित्याशेषेनाहमहाक्यैति सर्वादिरिमेयरा॥४॥ यथा अभ्रं वस्वसमेघगर्जितस्य भावनात्सुखमाप्नोति तद्वदित्य

कालेन महता क्षेत्रे जातेयं बुद्धिवल्लरी॥ वृद्धिं विवेकसेकेन नयेतां नयकोविद॥२॥ यावन्नायाति नो कायलतिका कालभासतां॥ भूत
लेपतितां तावदेनामुद्धृत्य धारय॥३॥ महाकार्थैकतत्त्वज्ञ महाकार्थैकभावनात्॥ सुखमाप्नोति सर्वार्थ यथा भ्ररसभावनात्
॥४॥ उद्दालकवत्तत्त्वं विशीर्णं भूतपंचकं॥ कृत्वा कृत्वा धिया धीर धीस्थं तद्विचारय॥५॥ श्रीराम उवाच॥ केन क्रमेण भगवान्मु
निनोद्दालकेन तत्॥ भूतपंचकमालूनं कृत्वा तत्प्रविचारितं॥६॥ श्रीवसिष्ठ उवाच॥ शृणु राम यथा पूर्वं भूतवृंद विचारणा
त्॥ उद्दालकेन संप्राप्ता परमा दृष्टिरक्षता॥७॥ जगज्जीर्णगृहस्यास्य कोणे कस्मिंश्चिदाततो॥ भूमेरनिलदिग्गान्तिमस्तिखंडसमाकुले

र्थः॥४॥ तामेवाख्यायिकामवतारयति स्वर्थविचारकर्तव्यतामाह॥ उद्दालकवदिति देहाधारं भर्कवाद्यत्र पंचारं भकं च भूतपंचकं तत्त्वार्थशोधनयाधिया अन्वेनमो
न्यथं गेनापोर्लमविच्छेतिः कृतिर्शितसुवाकारणव्यतिरिक्तकार्यं कुणपलापात्त्वं संमल्लाविद्याविशरणात् हि शीर्णं च कृत्वा तदधिष्ठानसन्मात्रान्वेषणे
मधीरेभ्योपि धीरया धिया अंतर्विचारयेत्यर्थः॥५,६,७॥ भूमैतत्स्वरूपु जीर्णकुटजमांडानितैः समाकुले इति प्रकोणलाम्योपपादकं विशेषणं॥८॥

वा॰टी॰उ॰ ॥१५९॥ पुष्पिता द्रुमा एव कर्पूरसदृशपरागैः केसरैश्च सर्वतो व्याप्तत्वात्कर्पूरकेसरा यस्यां ॥१०॥ स्वस्यो महामणयः स्थैव दर्पणा निय यस्यां ॥११॥ सानौ प्रस्थप्रदेशे ॥१२॥ मानी अवश्यं
यत्नैः पुरुषार्थं साधयिष्यामीत्यभिमानवान् आगमानुमानादिमानकुशलश्च महामतिरक्तः इमेना ॥१३॥ शुभाशमना प्रबोधानुकूले सुकृतसंभृतेंततः करणैः

गंधमादनशैलेंद्रे नाम्नी काचित्किल स्थली। विद्यते कीर्णकुसुमा द्रुमकर्पूरकेसरा ॥१०॥ विचित्रवर्णविहगा नानावल्लीविलासिनी ॥ वने
चरव्याप्ततटी पुष्पकेसरभासिनी ॥११॥ क्वचित्स्फीतमहारत्ना क्वचिन्नीलांबुजोत्पला ॥ क्वचिन्नीहारकबरी सरसी दर्पणा क्वचित
॥१२॥ तत्र कस्मिंश्चिदुरिते सानौ सरलपादपे ॥ आगुल्फाकीर्णकुसुमे स्निग्धच्छायामहाद्रुमे ॥१२॥ उद्दालको नाम मुनिर्मौनी मा
नी महामतिः ॥ अप्राप्तयौवनः पूर्वं सुवासो दाम तापसः ॥१३॥ प्रथमं तु बभूवासावल्पप्रज्ञो विचारवान् ॥ अप्राप्तपद
विश्रांतिरप्रबुद्धः शुभाशयः ॥१४॥ ततः क्रमेण तपसा शास्त्रार्थनियमैः क्रमैः ॥ विवेक आजगामैनं नवर्तुरिव भूत
लो ॥१५॥ अथेमं चिंतयामास संसारभयभीरुधीः ॥ एकांत एव निवसन्कदाचित्क्रांतमानसः ॥१६॥ किं तत्प्राप्यं प्रधानं
स्याद्यद्विश्रांतो न शोच्यते ॥ यस्मात्पुनर्जन्मनाम्नः पुंसः संबंधो नोपजायते ॥१७॥ कदाहं त्यक्तमनने पदे परमपावने ॥ चिरं
विश्रांतिमेष्यामि मेरुशृंग इवांबुदः ॥१८॥ कदा शममुपेष्यंति मम भ्रांत भोगसंविरः ॥ आलोलकल्लोलरवाः ऊर्मयोंबुनिधाविव
इदं कृत्वेदमप्यन्यत्कर्तव्यमिति कल्पनां ॥ कदांतर्विहसिष्यामि परविश्रांतया धिया ॥२०॥ ॥२१॥ राम॰ ॥१४९॥

१५॥ क्रमैरभ्यासपरिपाकक्रमैः नवर्तुर्वसंतः ॥१५॥ इमं वक्ष्यमाणप्रकारं चिंतयामास कांतमानसः शुभचित्तः क्लांतमानस इति पाठे स्पष्टं ॥१६॥ प्राप्यानां
पुरुषार्थानां मध्ये प्रधानं प्राप्यं मोक्षाख्यं किं तत्स्यात् ॥१७॥ त्यक्तानि मननानि मनोव्यापारा यत्र ॥१८॥ भोगसंविरो भोगतृष्णाः ॥१९॥ २०

---

आभासमात्रेण स्थितमप्युपेक्ष्यमाणत्वादुज्झितासंगं २१ मत्तां अविवेकमत्तद्वीं २२ क्रियां बाह्यप्रवृत्तिं आकुलीं व्यग्रचित्तां २३ विकल्पैः पर्यस्तं
विक्षिप्तं दोलेव अवदोलनं अविश्रांतं शांतं वातो जमः प्रशांतो स्वात्मवातरोगस्य भ्रमो विक्षिप्तेव २४ उदितवपुषा आविर्भूततत्स्वरूपस्य भासा स्वप्रकाशस्फु
रणेन विराट् ब्रह्मांडशरीर आत्मेव स्थांतः पूर्णधीः २५ समेन परमात्मना समसमः एकरसः समेन मा सहितेन विष्णुना समः सश्रीकश्च आकारो यस्य सर्वेष्वर्थेषु

कदा विकल्पजालं मे न लगिष्यति चेतसि ॥ स्थितमप्युज्झितासंगं पयः पद्मदले यथा २१ कदा बहुलकल्लोलां नावा परम
याधिया परितीर्णो भविष्यामि मत्तां तृष्णातरंगिणीं २२ कदेमां जागतैर्भूतैः क्रियमाणाममन्मयीं क्रियामपहसिष्यामि
बाललीलामिवाकुलां २३ कदा विकल्पपर्यस्तं मनो दोलावदोलनं शममेष्यति मे शांतवातोजस इव भ्रमः २४ कदो
दितवपुर्भासा विहसन्जागतीर्गतीः अंतः संतोषमेष्यामि विराडात्मेव पूर्णधीः २५ अंतः समसमाकारः सौम्यः सर्वार्थ
निःस्पृहः कदोपशममेष्यामि मंथमुक्तामृताब्धिवत २६ कदेमामचलां दृश्यश्रियमाशाशतात्मिकां सर्वं सुषुप्तवत्पश्य
न्भविष्याम्यंतराततः २७ सबाह्याभ्यंतरं सर्वं शांतकल्पनया धिया पश्यंश्चिन्मात्रमखिलं भावयिष्याम्यहं कदा २८
कदोपशांतचित्तात्मा चिंतामुपगतः परां परमालोकमेष्यामि जात्यंध इव गमादिव २९

धर्मार्थकामेषु अमृतकौस्तुभादिषु निस्पृहः मंथेन विक्षेपेण मुक्तोऽमृताब्धिः क्षीरार्णवस्तद्वत् २६ सुषुप्तवत्तन्मात्रात्मना पश्यन् २७ भावयिष्यामि त
द्भावनया स्थिरो भविष्यामि २८ परां चितां चिदेकरसतां परं परमात्मानं पुरःस्थितं पुरस्पांतरं च जात्यंध इति भावप्रधानो निर्देशः जात्यंधता सदृशो नादिमूलाज्ञाना
पगमादिति भावः २९

तीत्वी बाधितानुवृत्तिरूपत्वात्तुच्छं अल्पावशिष्टं च आयुःशेषलक्षणां कालकलां आत्मस्पर्शित्वाद्दूरादेवालोकयिष्यामीत्यर्थः ॥३०॥३१॥ जाड्येन मौर्ख्येण हिमेन च जर्जरितं हृदंबुजं यया दोषो ऽविद्यामलस्तल्लक्षणा यामिनी रात्रिः ॥३२॥ निर्विकल्पसमाधिना शांतमननः चिदेकरस्यः विगलितमनोवृत्तिः ॥३३॥ मानो हंकारस्तल्लक्षणो मातंगः स्वेच्छाशमस्ताः अभिमानवृत्तय एव महांतः मदप्रवाहा यस्य ॥ सत्यं परमार्थसन्मात्रं तत्त्वबोधलक्षणेन हरिणा सिंहेन ॥३४॥ तृणमयं कुलायं नीडं घर्णिकाः पक्षि

कदाभ्यासोपलब्धेन चित्प्रकाशेन चारुणा ॥ दूरादालोकयिष्यामि तुच्छां कालकलामिमां ॥३०॥ ईहितानीहिते मुक्तो हेयोपादेयवर्जितः ॥ कदांतस्तोषमेष्यामि स्वप्रकाशपदे स्थितः ॥३१॥ कदा शाकौशिकीर्णा जाड्यजीर्णहृदंबुजा ॥ स्वयमेष्यति क्षयं कदा मे दोषयामिनी ॥३२॥ कदोपशांतमननो धरणीधरकंदरे ॥ समेष्यामि शिलासाम्यं निर्विकल्पसमाधिना ॥३३॥ कदा मे मानमातंगः स्वाभिमानमहामदः ॥ सत्यावबोधहरिणा हतो नाशमुपैष्यति ॥३४॥ निरंशध्यानविश्रांतेर्मूकस्य मम मूर्द्धनि ॥ कदा तार्णं करिष्यंति कुलायं वनघर्णिकाः ॥३५॥ कदा निःशंकमुरसि ध्यानधीरधियः खगाः ॥ मम विश्रांतिमेष्यंति शैलस्येवाचलस्थितेः ॥३६॥ तृष्णाकरंजजटिलां जन्मजर्जरगुल्मिकां ॥ संसारारण्यसरणीं त्यक्त्वा यास्याम्यहं कदा ॥३७॥ इति चिंतापरवशो वने तत्रोद्दालको द्विजः ॥ पुनः पुनस्तपविशन्ध्यानाभ्यासं चकार ह ॥३८॥ विषयैर्नीयमाने तु चित्ते मर्कटचंचले ॥ न मलेभे समाधानप्रतिष्ठां प्रीतिदायिनीं ॥३९॥

निरंशे निर्विकल्पे ध्याने न विश्रांतिर्यस्य मूकस्य मौनव्रतिनो मम मूर्द्धनि तार्णं तृणमयं कुलायं नीडं घर्णिकाः पक्षिभेदाः ॥३५॥ ध्याने धीरा स्थिरा धीर्यस्य उरसि उरो लंबितटाग्ररचितनीडा इत्यावृत्तं ॥३६॥ तृष्णालक्षणैस्तीररुहैः करंजैर्जटिलां जन्मान्येव कामादिमृगसंचारजर्जराणि गुल्मांतराणि यस्याः ॥३७॥३८॥३९॥

DR BHAU DAJI MEMORIAL

प्रत्याहारेण बाह्यानां विषयसंस्पर्शानां त्यागादनंतरं सत्त्वगुणप्रधानसमाधिषु स्थितो रजसा क्षोभ्यमाणं भयात् रत्ना लस्यादिरूपं प्रोद्वेगमगमत् ॥ अथवा संस्थितो मानसिकदेवादिभोग्ये विषये मानसिकवृत्तिसुखबास्वादे वा प्रोद्वेगं मनोरथैश्चलनं अगमत् ॥४०॥ आंतरान् समाधिसुखस्पर्शानपि वेगेन रभोसतो यथालोकांतरं प्रयाति तद्वत्तत्सक्षे आंतरान् ज्ञानोदयान्निःसंबंधिनः स्पर्शान्देहोष्मणः ॥४१॥ आंतरे हार्दे तमसि गलितोऽरिताकार्मते जो दृष्ट्वान तथा च श्रुतिः ॥ नीहारधूमार्कानलानिलानां खद्योतविद्युत्स्फटिकशशीनां ॥ एतानि रूपाणि पुरःसराणि ब्रह्मण्यभिव्यक्तिकराणि योगे इति ॥४२॥ आंतरं स्वांधतमसः अज्ञानांधकारस्य ईष

कदाचिद्बाह्यसंस्पर्शपरित्यागादनंतरं ॥ तस्यागच्छच्चित्तकपिः प्रोद्वेगं सत्त्वसंस्थितेः ॥४०॥ कदाचिदांतरान्स्पर्शान्परित्यज्य मनः कपिः ॥ लोलत्वात्तस्य संयातो विषयं श्येनविहगवत् ॥४१॥ कदाचिदद्भुताकारं तेजो दृष्ट्वांतरे मनः ॥ विषयोन्मुखतां याति तस्य तामरसेक्षण ॥४२॥ आंतरांधतमस्त्यागं कृत्वा विषयलंपटं ॥ तस्योद्विग्नमनो याति कदाचित्त्रस्तपस्विवत् ॥४३॥ बाह्याभ्यंतरसंस्पर्शत्यक्तनिद्रं च तन्मनः ॥ तमस्तेजोंतिके लीनं कदाचित्प्राप शाश्वतीं स्थितिं ॥४४॥ इति पर्याकुलस्यांतः सर्वत्र ध्यानवृत्तिषु ॥ दरी
क्षण्वहमुप्रासवातभग्न इव द्रुमः ॥४५॥ अतिष्ठद्ध्यानसंरूढमननः संकटे यथा ॥ दोलायितवपुस्तत्र स्त्रीतरतरंगकैः ॥४६॥ ८२

दूरस्थानिव्यक्त्या त्यागईषत्स्पर्शं कृत्वा तदानीमेव विषयवासनोद्बोधात्तत्र परं स्खलेत्यर्थः ॥४३॥ बाह्याभ्यंतरस्पर्शैश्च्याव्यातौ तमसः ॥ अज्ञानस्य तेजस आत्मज्योतिषश्चांतराले संधौ लीनं सन्निद्रयैव शाश्वतीं चिरानुवृत्तां स्थितिं लेभे ॥४४॥ दरी गुहा ध्यानसंरूढमननः स्फूर्पर्याकुलस्य मनसः मध्ये मध्ये वातेन सन्निहितफले भग्नो मग्नितो द्रुमः यथा तथा त्स्त्रीलक्षणे स्त्रीरतरंगकैर्दोलायितवपुः सन्संकटे अतिष्ठदिति परेण संबन्धः ॥४५॥४६॥

विजहारसंचचारमहामेरौमेरैवार्कपारसंबंधदर्शनान्नत्रार्कविहरणकल्पनयोपमोक्तिः॥४७॥समस्तमहतदुःप्रापामतएवसंशांतसर्वसंचारांर्करागमोक्षदशामाधारणेविशे
षरोओसर्गसमासेःकंदरैर्वविशिष्यते॥४८॥परमाकाशोत्रस्त्रेवशोभमानां॥४९॥ज्योतिरूपोरसश्चंद्रस्तरश्मभिश्चंद्रकांतैःसहसंप्रोतैर्वरिनैर्मणिभिःकृता
मिव॥५०॥द्वारिसुस्निग्धशीतलच्छायां॥५१॥कौद्वारस्मेलेवंतेप्रसरंतीतिकुलेवनाःअहिमाःशीतनिवारणमात्रक्षमाःआलोकाःमस्यांअतएवनात्युष्णाना
तिशीतलांउदितार्कस्यबालसूर्यस्यहेमेवगौरीपीतां॥५२॥बालेनआलोकेनपरिम्लानांशुष्कांअनेनगुहाप्राङ्मुखीतिगम्यतेकोमलःअल्पःअशब्दश्चमा

अथपर्याकुलमनाविजहारमुनिर्गिरौ॥प्रत्यहंदिवसार्धीशोमहामेराविवैककः॥४७॥समस्तम्हतदुःप्रापामेकांसप्रापकंदरां॥संशां
तसर्वसंचारांमुनिर्मोक्षदशामिव॥४८॥अपर्याकुलितांवातैरप्रासमगपक्षिणीं॥अदृष्टांदेवगंधर्वैःपरमाकाशशोभनां॥४९॥पुष्प
प्रकरसंछन्नांमृदुशाद्वलकोमलां॥ज्योतीरसाश्मसंप्रोतैःकृतांमरकतैरिव॥५०॥सुस्निग्धशीतलच्छायांप्रकटांरत्नदीपकैः॥सु
स्निग्धशीतलच्छायांप्रकटांरत्नदीपकैः॥सुगुप्तांवनदेवीनामंतःपुरकुटीमिव॥५१॥कुलेवनाहिमालोकांनात्युष्णांनातिशीतलां॥
शारदस्योदितार्कस्यहेमगौरीप्रभामिव॥५२॥बालालोकपरिम्लानांकोमलाशब्दमारुतां॥मंजरीजटिलोपेतांबालांमालावतीमिव॥५३॥उ
पशमपदवीमिवानुरूपांकमलजविश्रमणाययोग्यरूपां॥कुसुमनिकरकोमलाभिरामांमरसिजकोटरकोमलांसमंतात्॥५४॥ उद्दालकमनोरथोसर्गः॥५१॥

रुतोयस्यांतेनप्रत्यग्भागेविगवासकृतागम्यतेमंजरीजटिलैस्तरुभिरुपेतांअनेनसुरभितागम्यते॥स्वयंवरोद्युक्तांमालावतींबालांराजकन्यामिवास्थितामित्यर्थः
॥५३॥सरसिजकोटरमिवकोमलांअतएवकमलजस्यधातुर्विश्रमणाययोग्यरूपांसमंतात्कुसुमनिकरैश्चकोमलांरम्यांउपशमपदवीमिवमहैवाश्रयितुमनुरूपांकं उप॰
दरांप्राप्येतिपर्वत्रसंबंधः॥५४॥इतिश्रीवासिष्ठतात्पर्यप्रकाशेउपशमप्रकरणेएकपंचाशःसर्गः॥५१॥ ॥१५१॥

---

गुहायामासनस्थेनसमाधिंप्रविविक्षिता॥चित्तप्रबोधनोपायाश्चिंतिताइववर्णिताः॥चित्रेणबहुविधेनभ्रमणेनान्वेषणेन॥पद्मकुटीमिवेत्यनेनप्रविष्टस्यतत्रनिरतिशयानंदरसपानाद्वि
श्रांतिर्भविष्यतीतिगम्यते॥१॥आत्मनःउर्ध्वंसत्यलोकस्थायामपराजितारव्यायांभगवन्नाभिपद्मलक्षणायांवा॥२॥अंतर्मध्येस्वशरीरंगुच्छमिवयस्मिन्भासेततथाविधं
अंतेषुसानितत्तत्सन्निबंधानिपुष्पगुच्छानिवायस्मिन्॥तथाविधंआसनं॥मेघान्विरधातीतिमेघविधिरिंद्रः॥अंभोदमेघहंदच्छिन्नमिवततस्तस्येअंतेषुप्रसृतानिस्वगुच्छा

श्रीवसिष्ठउवाच॥सतांविवेशधर्मात्मागंधमादनकंदरां॥चित्रभ्रमणसंप्राप्तामलिःपद्मकुटीमिव॥१॥समाधानोन्मुख
तमाप्रविशन्नाविराजते॥सर्गव्यापारविरतावात्मपुर्यामिवाब्जजः॥२॥चकारासनमम्लानैःपत्रैरंतःस्वगुच्छकं॥मृदु
३६ मेघविधिरिंद्रसंभोधमिवततत्रसः॥३॥सतत्रास्तारयामासपृष्ठेचारुमृगाजिनं॥नीलरत्नतटेमेरुस्तारासारमिवांबरं॥४॥सत
त्रोपाविशद्धीमानेतसमस्तनुतांनयन्॥अंतःशुद्धवपुःशृंगेवृष्टमुक्तंबांबुदः॥५॥बद्धवत्सुदृढंबद्धापद्मासनमुद ६२
ङ्मुखः॥पार्ष्णिभ्यांवृषणौधृत्वाचकारब्रह्मांजलिं॥६॥वासनाभ्यःसमाहृत्यमनोमृगमुपप्लुतं॥निर्विकल्पसमाध्यर्थंचकारे
मांविचारणां॥७॥

नीवविप्लुतःयस्मिन्निनितियोज्यं॥३॥ततस्यासनस्यपृष्ठेउपरितत्तत्कक्षास्थंमृगाजिनमितिवातारास्एवसाराःबहुमूल्यरत्नानियस्मिन्अनेनतत्स्पर्शताजिनमितिगम्यते॥४॥
चेतसःवृत्तीजडविषयत्यागेनतनुतांयथाअंबुदःवृष्टवृष्ट्यासत्वजाड्यंविहायशुद्धवपुःशुभ्ररूपःसन्कोपिगर्जनैःसनगिरिशृंगेउपविशतितद्वत्वृष्टेत्यासमासेत्युपश
ब्दांदमःकृष्यमकइतिपाठेऽप्युपसाध्येमयशृंगे॥५॥प्रबुद्धवत्प्रबुद्धकपिलादिवत्॥पद्मासनग्रहणंतिद्धोमनोपलक्षणं॥पार्ष्णिभ्यांवृषणौधृत्वेत्युक्तेस्तत्रैवोपपत्तेःब्रह्मांजलिं
नो जलिंब्रह्मादिगुरुपरंपराप्रणामांजलिं॥६॥उपसमीपेविषयेषुप्लुतंधावितं॥७॥

अयीति कोमलामंत्रणे ॥ ८ ॥ मंदाराः देवतरुभेदाः तेषां वनं ॥ ९ ॥ महीरंध्रं पातालं निर्वाणं निरतिशयसुखविश्रांतिं ॥ १० ॥ त्वं भोगाशाशतेनापूर्णं चेत् त्वमपि एवं प्राग्रुक्तरीत्या सर्वदुःखदं भव सि । अतः परं भोगाशास्त्यज त्यक्त्वा त्यज इति छांदसः ॥ नित्यनिर्दुःखनिरतिशयानंदरूपत्वादेकांतसुंदरं परं श्रेयो निर्वाणं याहि ॥ ११ ॥ इष्टसंपादनेन भावः अनिष्टनिवारणमभावस्तत्स्वरूपा भावाः विचित्राः कलनाविषयाः ॥ १२ ॥ हतशब्दो निंदार्थः ॥ मंडूकिका यथा मेघे शब्दादिकामिव्यर्थवृत्तिभिर्भ्रमति तथेत्यर्थः ॥ १३ ॥ तदेव स्पष्टमाह मन इति भुवनं जगज्जालं च ॥ १४ ॥

अपि सर्वमनः कोऽर्थस्तव संसारवृत्तिभिः ॥ धीमंतो न निषेवंते पर्यंते दुःखदाः क्रियाः ॥ ८ ॥ अनुधावति यो भोगांस्त्यक्त्वा समरसायनं ॥ संत्यज्य मंदारवनं स याति विषजंगलं ॥ ९ ॥ यदि यासि महीरंध्रं ब्रह्मलोकमथापि वा ॥ तन्न निर्वाणमाप्नोषि विनोपशमनामृतं ॥ १० ॥ आशाशतावपूर्णं चेत्त्वमेवं सर्वदुःखदं त्यज्य याहि परं श्रेयः परमैकांतसुंदरं ॥ ११ ॥ इमा विचित्राः कलना भावाभावमयात्मिकाः ॥ दुःखायैव तवोदग्रा न सुखाय कदाचन ॥ १२ ॥ शब्दादिकाभिरेताभिः किं मत्स्य हतवृत्तिभिः ॥ भ्रमस्यविरतं व्यर्थं मेघे मंडूकिका यथा ॥ १३ ॥ मनो मंडूकिके व्यर्थमियंतं कालमंधया ॥ भ्रमत्या भुवनं क्षिप्रं किं समासादितं त्वया ॥ १४ ॥ यस्मात्किंचिदवाप्नोषि यस्मिन्वह सि निर्वृतिं ॥ तस्मिंश्चेतः शमे सर्वेनानुबध्नासि किं पदं ॥ १५ ॥ आगत्य श्रोत्रतां सर्वव्यर्थोत्थानोपबृंहितं ॥ धियाशब्दानुसारिण्या मृगवन्मा क्षयं व्रज ॥ १६ ॥

किंचिदवाङ्मनसागम्यं विदेहकैवल्यसुखं निर्वृतिं जीवन्मुक्तिविश्रांतिसुखं वहसि प्राप्नोषि ॥ तस्मिन् शमे सर्ववृत्त्युप रमलक्षणे समाधौ ॥ हे चेतः पदं व्यवसायं किं नानुबध्नासि ॥ १५ ॥ कलनाः दुःखायैवेति यदुक्तं तत्प्रत्येकं दृष्टांतोदाहरणैः प्रपंचयति आगत्येत्यादिना व्यर्थेन ... बहि र्मुखतालक्षणेनोत्थानेन उपबृंहितास्तुपचितां श्रोत्रेंद्रियतादात्म्यापत्तिरूपां श्रोत्रतामेत्य प्राप्य ॥ प्राणान्वेव प्राणो नाम भवति वदन्वाक्पश्यंश्चक्षुः शृण्वन्श्रोत्रमिति लिंगा दात्मनः श्रवणादिकाले श्रोत्रादिभावश्रुतेरिति भावः ॥ लुब्धगीतघंटास्वनमोहितमृगवत् ॥ १६ ॥ राम॰ ।।१५२।।

---

त्वक्कांतलिंगेंद्रियतां ॥ गजीकरेणुस्तस्यां तत्स्पर्शे लुब्धगजेंद्रवत् ॥ सुशिक्षितया करिण्या वनगजेंद्रं प्रलोभ्याकृष्य गर्तां पातादिना हस्तिपका बध्नंतीति प्रसिद्धं ॥ १७ ॥ हे अंध दुरं धसं दुरंत्वानां गर्दनामिलाषेण ॥ १८ ॥ चाक्षुषी दृशिं चक्षुस्थां ॥ प्रभाकांतिस्तत्संबंधी यो रूपचयो नानारूपभेदस्तदुन्मुखीं तत्परां ॥ १९ ॥ गजोन्मदितपद्म सस्यार्थं गवत ॥ २० ॥ एकैकसक्तस्याप्येवमनर्थेन सर्वसक्तस्य तव दुर्वारमेव निरतिशयदुःखमित्याह कुरंगेति ॥ अनर्थैरनर्थसाधनैः शब्दादिभिर्युक्तैर्मिलितैः हे

त्वक्तामागत्य दुःखाय स्पर्शोन्मुखतया धिया ॥ सर्वेमा बहुतामेहि गजी लुब्धगजेंद्रवत् ॥ १७ ॥ रसनाभावमागत्य गर्दनां धृदुरं धसं ॥ मानेशमेहि बडिशपिंडलंपटमत्स्यवत् ॥ १८ ॥ चाक्षुषीं दृशिमाश्रित्य प्रभारूपचयोन्मुखीं ॥ मागच्छ दग्धकांतिलुब्धपतंगवत् ॥ १९ ॥ घ्राणमार्गमुपाश्रित्य शरीरं भोजकोटरे ॥ गंधोन्मुखतया बंधं मा त्वं संश्रय भृंगवत् ॥ २० ॥ कुरंगालिपतंगेभमीनास्त्वेकैकशो हताः ॥ सर्वैर्युक्तैरनर्थैस्तु व्याप्तस्याज्ञ कुतः सुखं ॥ २१ ॥ हे चित्त वासनाजालं बंधायाभवतो हितं ॥ स्वात्मनः सहजः फेनस्ततः कुकृमिणा यथा ॥ २२ ॥ शरदभ्रवदागत्य शुद्धिं त्यक्त्वा भवामयां ॥ यदि शाम्यसि निर्मलं तदनंतो जयस्तव ॥ २३ ॥

अज्ञेति चित्तसंबोधने ॥ २१ ॥ कुत्सितेन कृमिणा कोशकारकीटकेन सहजः स्वाभाविकस्तन्तुफेनः स्वात्मनो बंधाय यथा कोशात्मना ॥ ततो विस्तारितस्तथा ॥ वासनाजालं स्वात्मनो बंधायकृहितं कुत्सितकेनिर्मितमित्यर्थः ॥ भवतः अहितमिति वाच्छितात्तमिति लिंगविपरिणामेन योज्यं ॥ २२ ॥ कथं तर्हि मया दृढतं स्यास्य बंधस्य जयस्तदाह शरदस्त्रमिति प्रथमं कर्मोपसनादिभिः शरदभ्रवच्छुद्धिमागत्य ततः भ्रगिणि परिपाकाद्ध्यानोदयेन निर्मलं यदि शाम्यसि तत्तदा अनंतो जयः इत्यर्थः ॥ २३ ॥

वा॰टी॰उप॰ ॥१५३॥ वक्तव्यं सर्वं पिंडीकृत्यैकोक्त्याह क्षयेति॥ क्षयोदयौ जन्ममरणे दशा बाल्यादिरिग्राद्यास्तासां धात्रीं॥ पर्यंते मरणोत्तरमपि नरकस्थावरादिगतिपरितापनशीलां॥ जगत्त्रस्थिं जागती प्रवृत्तिं २४
अथवा अहितस्य चित्तस्य नानुशासनं कार्यं किंतु बलान्निग्रह विचारेणोच्छेद एव कार्य इत्याशंकेनाह॥ करोमीति॥ अनुशासनं हितोपदेशं॥ २५॥ अथवा न चित्तोच्छेदे पिथक्प्रयत्नः
तस्य मलाज्ञानान्वयव्यतिरेकानुविधायित्वयात्तदुच्छेदेनैवोच्छेदः साध्य इत्याशयेनाह यावदिति त्रिभिः॥ २६॥ उत्तरे यावत्तावदिति निपातौ यावांस्तावानित्यर्थकौ॥ २७ तानवं

क्षयोदयदशाधात्रीं पर्यंतपरितापिनीं॥ जानन्नपि जगत्स्थिंन त्यक्ष्यसि विनंक्ष्यसि॥ २४॥ करोम्यथ किमर्थं वा तवैतदनुशासनं॥ वि
चारणवतः पुंसश्चित्तमस्ति हि नान्यथा॥ २५॥ यावदज्ञानघनता तावत्स्याद्घनचित्तता॥ यावत्प्रौढ दृढता तावन्नीहारभरिता॥ २६॥ यावदज्ञा
नतनुता तावच्चित्तस्य तानवं॥ प्रावृट्परिक्षयो यावत्तावन्नीहारसंक्षयः॥ २७॥ यावन्नानवमायातं शुद्धचित्तं विचारतः॥ तावत्तत्क्षीणमेवा
म हं मन्ये शारदमेघवत्॥ २८॥ अनुशासनमेतच्चेदसतो नश्यतोथवा॥ क्रियते तन्नभोवारि पवनाहननैः समं॥ २९॥ तस्मात्त्वं क्षीयमा
णत्वाच्यजामि त्वामसन्मयं॥ मौर्ख्यं परमेवाहुः परित्याज्यानुशासनं॥ ३०॥ निर्विकल्पोस्मि चिद्दीपो निरहंकारवासनः॥ त्वमहंका
रबीजेन न संबोद्ध्योस्यसन्मय॥ ३१॥

भासनाक्षयं न मौर्ख्यं॥ २८॥ अविवेकिनश्चित्तमनुशासनायोग्यमेव विवेकिन स्तन श्यत्येवत्यं॥ नष्टं वा तत्स्तुतरां तथेत्याशयेनाह अनुशासनमिति॥ नभसो वारिणः पवनस्य च आह राम॰
ननैस्ताडनैः समं व्यर्थमिति यावत्॥ २९॥ उक्तमेवानुवादेनोपसंहरति तस्मादिति॥ ३०॥ आत्मनस्तदसंबंधदर्शनमेव तत्त्यागइत्याशयेनाह निर्विकल्पइति॥ ३१॥ ॥१५३॥

मम कोपराधो येन मां विनाशाय परित्यजसीति चेद्देहादावहंतादुर्दृष्ट्यावलंबनमेवेत्याह अयमिति॥ सा च दुर्दृष्टिः शंकाविषप्रयुक्ताविहृचिकेव मिथ्याहेतुकापि मूढानां विनाशायैव संपद्यत इ
ति अपराध इत्यर्थः॥ ३२॥ कुतो मिथ्यात्वमिति चेदनुपपन्नत्वादेवेत्याह आनंतस्येति॥ इतिरेवं रूपे परिच्छिन्ने मनसि तत्त्वी परिच्छिन्नात्स्थितिर्देहाद्यहंभावेन स्थितिर्न संभवति नोपपद्य
त इत्यर्थः॥ वासिता करिणी दंती वनयोर्विल्वांतःस्थितिर्यथा न संभवति तथेत्यर्थः॥ ३३॥ चित्तस्य त्याज्यत्वे हेत्वंतरमप्याह महाश्वभ्रीति॥ हे चित्त त्वय्या महती श्वभ्री जीर्णकूपादि
वगंभीरा अदृश्यतला कामक्रोधलोभादिसर्पदृश्चिकापि शाचालयत्वादुःखदा दुर्वासनैव तस्यालयत्वेनाश्रितावतेतिरते देअहं तु एनां नानुसरामीति तदनुसारिणं त्वां त्यजामीत्यर्थः॥ ३४॥

अयं सोहमिति व्यर्थदुर्दृष्टिरवलंबिता॥ त्वयामूढ विनाशाय शंकाविषविहूचिका॥ ३२॥ अनंतस्यात्मतत्त्वस्य तन्वाति मनसि स्थि
तिः॥ न संभवति विल्वांतर्वासिता दंतिनो यथा॥ ३३॥ महाश्वभ्री गंभीरा दुःखदा वासनाश्रिता॥ त्वयैषावत चित्तेति नैनामनुसराम्यहं पे
३४॥ कः किलायं मुधा मोहो बालस्येवाविचारिणः॥ अयं सोहमिति भ्रांतिस्त्वहंता परिकल्पिता॥ ३५॥ पदार्थगुच्छात्थिरेयावत्
कणशः प्रविचारितं॥ न लभ्यो भावहंनाम कः स्यादहमिति स्थितः॥ ३६॥ भरिताशेषदिक्कुंजं यत्स्यामेकं जगत्त्रये॥ संवेदनमसं
वेद्यं सर्वत्र विगतात्मकं॥ ३७॥

किंचायं देहः स आत्माहमिति भ्रांतिस्त्वया अहंता परिकल्पिता बालस्येवाविचारिणो मोहः विचारिणो मम कः किल न कश्चिदपि नास्त्येवेत्यर्थः॥ ३५॥ तन्नास्तित्वमेव विभ्रस्याप्युप
पादयति पदार्थं गुच्छादित्यादिना॥ कणशो विविच्येति शेषः॥ ३६॥ यद्यहं पदार्थो नास्त्येव तर्हि कस्त्वं तत्राह भरितेति द्वाभ्यां॥ भरिताशेषदिक्कुंजं दिक्कृतपरिच्छेदरहितं एक
रस्त्कृततद्रहितं असंवेद्यं कर्मसंवेद्यावस्यात्रैलक्षणकालकृतपरिच्छेदशून्यं अतएव सर्वत्र सर्वेषु प्रकारेषु विगतो वस्त्वंतरात्मा यस्य ईदृशं संवेदनमेवाहं स्यामित्यर्थः॥ ३७॥
प

इयत्तापरिच्छिन्नं रूपं ॥ एकता एकत्वसंख्या अन्यता तदन्यसंख्या महत्त्वाणुत्वे परिमाणे ॥ ३८ ॥ अतोऽहं संवेदनात्मा ततस्तस्मात्ताभिः स्वतेन स्वेन संवेद्यत्वाच्चित्तं वेद पश्यामि ततो दुःख
कारणत्वादेव इदं वस्थमार्गविवेकमाश्रयहन्यसे ॥ ३९ ॥ विवेचनप्रकारमेव दर्शयति इदमित्यादिना ॥ ४० ॥ स्पंदांशः सर्वोऽपि वातशक्तीनां प्राणानां अवबोधांशस्तु महाचि
तः परमात्मनः ॥ जरामृतिश्च येते कायकोटौ ॥ ४१ ॥ अन्यदहं पदार्थाद्व्यतिरिक्तं ॥ ४२ ॥ ४३ ॥ यथाभूततत्तया परमार्थतया विचारे मनः अहं न न त्वं चित्तमहं ॥ वासनापि

दृश्यते यस्य नैवान्तर्नाम परिकल्पना ॥ नैकता नान्यता वेह न महत्त्वं न चाणुता ॥ ३८ ॥ वेदतत्त्वां समं वेद्यमात तं तदुःखकारणं ॥ विवेक
जेन बोधेन तदिदं हन्यसे मया ॥ ३९ ॥ इदं मांसमिदं रक्तमिमान्यस्थीनि देहके ॥ इमे ते श्वासमरुतः कोऽसावहमिति स्थितः ॥ ४० ॥ स्पंदो
हि वातशक्तीनामवबोधो महाचितः ॥ जरामृती च कायेऽस्मिन्कोऽसावहमिति स्थितिः ॥ ४१ ॥ मांसमन्यदसृगन्यदस्थीन्यन्यानि
चित्तहे ॥ बोधोऽन्यः स्पंदनं चान्यत्कोऽसावहमिति स्थितः ॥ ४२ ॥ इदं घ्राणमियं जिह्वा त्वगियं श्रवणे इमे ॥ इदं चक्षू रसोऽस्पर्शः को
ऽसावहमिति स्थितः ॥ ४३ ॥ यथाभूततया नाहं मनो न त्वं न वासनाः ॥ आत्मा शुद्धचिदाभासः केवलोऽयं विजृंभते ॥ ४४ ॥ अहमेवे
ह सर्वत्र नाहं किंचिदपीह वा ॥ इत्येवमन्वयी दृष्टिर्नेतरो विद्यते क्रमः ॥ ४५ ॥

नाहं आत्मा तु सर्वथा अहं तया न स्पृष्ट इत्याह आत्मेति ॥ ४४ ॥ तस्मिन्नात्मनि यद्यध्यारोपदृष्टिस्तर्ह्यहमेव सर्वत्रापि ज्ञानमिति सर्वमेवाहं ॥ यद्यपवाददृष्टिस्तर्हि नाहं किं
चिदपीति ॥ नैकदेहमात्रपरिच्छिन्नाहंभावलक्षण इतरोऽहंकारक्रमो विद्यत इत्यर्थः ॥ ४५ ॥



अज्ञानलक्षणेन धूर्तेन कितवेनाहं तया वंचनया चिरं पोथितः संक्लेशितोऽस्मि ॥ लब्धेनेति भावे क्तः विप्रलंभेनेत्यर्थः ॥ स्वर्गपोतक इवेति शेषः लब्धेवेति पाठः साधुः
पशुपोतको वत्सः ॥ ४६ ॥ संप्रति पारमार्थिकं यद्रूपं तत्लक्षणस्वार्थस्य धनस्यापहारिणं ॥ ४७ ॥ परस्परविरुद्धस्वभावयोर्न संबंधोऽपि नास्ति हरे सेक्ष्यमित्याशयेनाह
निर्दुःख इति ॥ शैलस्य अंबुदः यथा कश्चिदपि न भवति तद्वत् ॥ ४८ ॥ यदि ते सर्वथाहंकारादिर्नास्ति तर्हि कथं वंचनादिना व्यवहरसि तेत्राह भूत्वेति नट इवतो

चिरमज्ञानधूर्तेन पोथितोऽस्मि वहं तया ॥ वृकेन दृष्टेनाटव्यां लब्धेन पशुपोतकः ॥ ४६ ॥ दिष्ट्येदानीं परिज्ञातो मयैवाज्ञानतस्करः ॥
पुनर्न संश्रयाम्येनं स्वरूपार्थापहारिणं ॥ ४७ ॥ निर्दुःखो दुःखयोगस्य नाहं तस्य न चैव मे ॥ कश्चिद्भवति शैलस्य तस्य एव य
थाम्बुदः ॥ ४८ ॥ भूत्वात्वहमिदं वस्मि चिबेस्मि तिष्ठामि यामि च ॥ आत्मावलोकनेनाहमनहंकारतां गतः ॥ ४९ ॥ न त्वमेवाहमेवैते मन्ये
ऽज्ञाश्चक्षुरादयः ॥ यौ तु तिष्ठंतु वा देहे मम ते तु न किंचन ॥ ५० ॥ कष्टं कोऽयमहं नाम कथं केनोपकल्पितः ॥ जगज्जालकवेतालस्तालो
त्तालातुलाकृतिः ॥ ५१ ॥ एतावंतं चिरं कालं व्यर्थमालुठितो वटे ॥ अहमत्र तृणोन्मुक्ते दुरन्ते हरिणो यथा ॥ ५२ ॥ स्वार्थमालोक
नेच्छुर्यदि तन्मुखतां गतां ॥ तदहं नामको सौ स्याद्योऽस्मिन्दुःखेन मोहितः ॥ ५३ ॥

कालिकेन तद्भावकल्पनेनाहंकारोऽभूत्ता इदं तु उपदेशश्चन्नरिवाभिचक्षुरादिना वेद्मि ॥ ४९ ॥ नूनं निश्चितमेवमन्ये इमे चक्षुरादयस्तत्त्वतोऽहमेव यदि मद्व्यतिरिक्ता
स्तर्ह्यज्ञा जडाः देहे तिष्ठंतु यांतु वा नैते मम किंचने त्यर्थः ॥ ५० ॥ तालादप्युत्तालाः दीर्घा अतुला आकृतिर्यस्य ॥ ५१ ॥ इदानीं प्राक्तनीमविचारदशामनुशोचति एतावंत
मिति ॥ ५२ ॥ इदानीमंतीन्द्रियविषयसंबंधमहं प्रत्याख्यास्यं दर्शयति स्वार्थमित्यादिना ॥ ५३ ॥

निजेतत्ते विषये ॥५४॥ स्वकर्मेस्वविषयेसामान्येएकवचनंपरसंस्कारपक्षाश्रयात् ॥५५॥ शब्दशक्तिंशब्दलक्षणविषयं ॥ स्वार्थः श्रवणतत्स्नात्तेनपीडितेवशीकृते आगमः प्रसंगः ॥५६॥ भरितया स्वोदरपूरकतयागर्हे नेति यावत् मातात्रा भिमता ॥५७॥ एषाउक्तस्याः लेषु प्रसिद्धा भावनाअहंताकल्पनातस्याभावनायामसत्यायांसत्यामर्थे देहः सः अहमिति भावः संभ्रमो भ्रांतिरेवेति ॥ सर्वथा देहाहंभाववासनात्याज्येत्यर्थः ॥५८॥ ननु वासनाभावे बाह्यप्रवृत्तीनां सर्वथोपरमः स्यादिति

स्पर्शनायनिजेतत्त्वेयदिजातात्वगुन्मुखी ॥ ततोयंस्यादहंनामकुपिशाचइवोदितः ॥५४॥ रसेष्वभिनिपाते स्मिन्स्वकर्मे रसनेंद्रिये ॥ अहं मस्मभुगित्येषकुतस्त्यः कुत्सितोभ्रमः ॥५५॥ शब्दशक्तिंगतेश्रोत्रेवराकेस्वार्थपीडिते ॥ तदहंकारदुःखस्यनिर्बीजस्यक आगमः ॥५६॥ आत्मंभरित्वेननिजेघ्राणेस्वांगंधमागते ॥ अहंघ्रातेतियोमातातंचोरंनैववेद्म्यहं ॥५७॥ स्वगात्स्वाक्रमेणैषाभावनाव्यर्थभाविनी भावस्तस्यामसत्यायांयःसोयमितिसंभ्रमः ॥५८॥ वासनाहीनमप्येतच्चक्षुरादींद्रियैःस्वतः ॥ प्रवर्तते बहिःस्वार्थे वासनानात्रकारणं ॥५९॥ वासनारहितंकर्मक्रियतेननुवित्तहे ॥ केवलंनानुभूयंतेसुखदुःखदशोग्रगाः ॥६०॥ तस्मान्मुख्याणींद्रियाणि त्यक्ता तद्वासनो निजां ॥ कुरुध्वंकर्म हे सर्वे न दुःखं समवाप्स्यथ ॥ ६१॥

जीवनमेव पुरुषस्य न स्यात् तत्राह वासनाहीनमपीति ॥ एतच्छरीरं स्वार्थे जीवनहेतौ कर्मणि वासनाहीनमपि प्रवर्तते करणानां प्राग्युद्धादि ग्रहे. तिवर्णनादितिभावः ॥५९॥ यदि प्रवर्तते तर्हि तस्मात् प्रयुक्तं दुःखमपि भविष्यत्येवेति वासनात्यागात् को गुणस्तत्राह वासनेति ॥ तात्कालिकभोगाभासे अहंदुःखीति नाभिमानअग्रगभाविन्यस्त सुखदुःखदृशो नानुभूयंत इति तत्प्रयुक्ताः शोकमोहभयविषादचिंतोद्वेगादिसर्वसंतापशांतिरेवास्य गुण इति भावः ॥६०॥ इदानीमिंद्रियाणि संबोध्याप्युमर्थं विविच्योपदिशति तस्मादित्यादिना ॥६१॥

DR BHAU DAJI MEMORIAL



वालैः प्रथमं पंकक्रीडनकमिव पश्चात्तद्विनाशेन खिन्नतेवच भवद्भिर्विषयौर्जनेतद्विनाशेन च दुःखायैव भोगवासनाज्ञानलानिवासिते त्यर्थः ॥६२॥ अतएव विदुषामज्ञानबाधिताः सहस्राकार्यैः शुद्धात्मैव संपन्ना इति न पृथक् तेतीत्याह वासनाद्या इति आद्यपदेन तत्कार्यरागप्रद्वेषादिर्गृह्यते ॥ ज्ञस्यैवताः न संतिनः अन्यस्याज्ञस्येत्यर्थः ॥६३॥ अतएवा

वा॰टी॰१ ज्ञैस्तत्स्वार्थेवेंद्रियाणि नाशित्याह तत्स्वार्थेवेति ॥ स्वर्गं भुवास्तत्पदोद्भूतया ॥६४॥ इहअधः संसारशिलाकंटकभुविलुठध्ययथाशिखरिपथिकाः ॥ पर्वतशिखरेगच्छंतः

भवद्भिरेवदुःखायवासनावासितामुधा ॥ बालैः पंकक्रीडनकं विनाशेनेवखिन्नता ॥६२॥ वासनाद्यादृशः सर्वा व्यतिरिक्तास्तु नात्मनः ॥ जलादिवतरंगाद्या ज्ञस्यैवान्यस्य नानघा ॥६३॥ तत्स्वार्थेवविनष्टाः स्थव्यर्थमिंद्रियबालकाः ॥ कोशकारः कुरुमयस्तंतुनेवस्वमंभुवा ॥६४॥ तत्स्वार्थेवेदखुदथजरामरणसंकटे ॥ भ्रमदस्थेवशिखरिपथिकाः श्वभ्रभूमिषु ॥६५॥ वासनैवेहभवतांहेतुरेकत्रबंधने ॥ रज्जुः शून्याशयप्रोतामुक्तानामाततायथा ॥६६॥ कल्पनामात्रकलितामृत्येषा हि न वस्तुतः ॥ असंकल्पनमात्रेण दात्रेणेव विलूयते ॥६७॥ एषाहिमवतामेतिविमोहायक्षयायच ॥ बालैर्वेरवेदीपानीस्फुरतामपितेजसां ॥६८॥

पित्तवशात् भ्रमवशात् भ्रमंत्याः स्वस्याः शिखरात् सिताअधो विषमेलुंठंतित्यद्धत ॥६५॥ यथामुक्तानां च्छिद्रिते आशये गर्भे प्रोता आतता दीर्घा रज्जुस्तंतुर्बंधनेहेतुस्तद्वत् ॥६६॥ ... कल्पनामात्रोतिसन्मात्रेण कल्पिता संपादिता एषा वासना ॥६७॥ भवतां विमेंद्रियाणां बहुमाना विमोहायक्षयाय मरणादिदुःखाया स्फुरतो तेजसां ॥ उल्काडीनामपि ॥६८॥

तस्मा दुःखहेतोः सर्वेंद्रियाणां कोशवदाधारहे चित्त त्वं सर्वेंद्रियैः सह सैक्यमेकमत्यमुपेत्य त्वं निश्चयेनात्मानं स्वं अमत्वरूपं मिथ्याभूतमालोक्य सम्यक् निर्वाणममलबोधमात्रं तत तोभूत्वा आस्व नभ स्यश्चित तद्रूपमादत्स्वेत्यर्थः ॥ ६९॥ सर्वशास्त्र तत्वज्ञाभिमतो यो हि तवामनापरिहारस्तद्रूपलक्षणया अभिलषितविषयत्वात् लक्षणया वार्म त्रयुक्त्या अनंतां असंख्यदुःखां अहंस्थितिरहंकारस्तद्वासनालक्षणां विषमविषसंदर्शनजानम प्रयुक्तां विशूचिकां निपुणं अपास्य विभवः विसंसारः सन् भक्तियामरणादि सर्वभयानामभूमिरनास्पदं भगवान्सर्णानंदात्मैव भवेत्यर्थः॥ ७०॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे द्विपंचाशः सर्गः ॥५२॥ वासनाभिरलेपित्वमहंकारे

हे चित्त सर्वेंद्रियकोशतस्मात्सर्वेंद्रियैरैक्यमुपेत्य त्वं ॥ आलोक्य चात्मानममत्वरूपं निर्वाणमेवामलबोधमास्व ॥ ६९॥ विषयविष विशूचिकामनंतां निपुणमहं स्थितिवासनामपास्य ॥ अभिमतपरिहारमंत्रयुक्त्या भव विभवो भगवान्भियामभूमिः ॥ ७०॥ मोक्षोपाये उपशमप्रकरणे उद्दालकविचारः सर्गः ॥ ५२॥ उद्दालक उवाच ॥ अपारपर्यंतवपुः परमाणवणुरेव च ॥ चिदैवैत्यात दाक्रांतो न शक्ता वासनादयः ॥ १॥

णाचालनं ॥ शरीरमनसोर्वैरमित्याद्युत्रोपपाद्यते ॥ परिच्छिन्नत्वात्तादिः कुसुमादिभिर्वास्यते आत्मचित्तु न विद्यते पारः प्रावधिः पर्यंतः पूर्वपश्चिमपार्श्वावधयश्च यस्य तत आ विधस्व रूपात्तथा स्थूलाः पृथिव्यप्तेजोवायवः कस्तूर्यादिना वास्यंते चित्तु परमाणोः पंचीकृताकाशस्याकृताकाशाद्वाणुः सूक्ष्मतमा अतस्तस्मा आक्रांतो ईषदपि स्पर्शे वासनादयो न शक्ता इत्यर्थः ॥ साक्षात्तत्स्पर्शाशक्तावपि तद्वेत्यस्पर्शद्वारा तत्संबंधप्रसक्तिशंकावारणाय विशिनष्टि अचेत्येति ॥ १॥ 

ननु त्वत्प्रकाशितविषयैर्वासनोत्थ्या दर्शनात्स्वयैव वितता सा कथं त्वत्स्पर्शिन्यस्तत्राह मन इति न मयाताः किं तु जडेंद्रियैरुपात्तानां विषयाणां शेमुष्यां बुद्धौ अहंकारे च चित्प्रतिबिंबैर्हेतुभिः तत्सूक्ष्मावस्थारूपा अतएव शून्या असद्रूपा अपि वेतालाइवासनोद्यताः ॥ वासनाः विततविस्तारिता मनः अनुभवतीति परेणान्वयः ॥ २॥ नो गरे भूरिशः कृतेभ्यो विषमविचारेभ्यः अनुभूतेभ्यश्च विषयेभ्यः भूयोपि स्वप्ने अंतर्नाडीच्छिद्रांतर्वासनामयानेव विषयांस्तन्मनः अनुभवति ॥ नव बुद्ध्यहंकारकृतेन मनोनुभूतेन वा मम लेपः हि यस्मात् सलेपिका चिदेवाहं न मनआदिसंघातात्मेत्यर्थः ॥ तथा च श्रुतिः स यत्तत्र किंचित्पश्यत्यनन्वागतस्तेन भवत्यसंगो ह्ययं पुरुष इति ॥

मनः शेमुष्यहंकारप्रतिबिंबैर्जडेंद्रियैः ॥ वासनाविततीः शून्या वेतालवासनोद्यताः ॥ २॥ तत्कृतेभ्यो विचारेभ्यो नुभूतेभ्योपि भूरिशः ॥ भूयोप्यनुभवत्यंतरहं हि चिदलेपिका ॥ ३॥ स्थूलदुर्भावोपरि चितं देहः संसारसंस्थिति ॥ न कृतालवथस्य जन्तुवार्वीप्य हं हि चिदलेपिका ॥ ४॥ चितो न जन्ममरणे सर्वगत्वाश्चितुः किल ॥ किं नाम म्रियते जंतुर्मार्यते केन वापि किं ॥ ५॥ चितो न जीवितेनार्थः सर्वात्मा सर्वजीवितं ॥ किं प्राप्स्यति कदात्मैव प्राप्यतां यदि जीवितं ॥ ६॥ जीवते म्रियते चेति कुविकल्पकमालिनी ॥ कलना मनसामेव नात्मनो विमलात्मनः ॥ ७॥

स्थूलदेहकृतेनापि न लेप इत्याह स्थूलदुर्भावेति ॥ दुर्भावाद्युत्पन्नः स्थूलरूपश्चितौ ॥ ४॥ अतएव तज्जन्ममरणे अपि मय्यसत्यानीत्याह चित इति ॥ सर्वगत्वाच्चित्त्वाच्चेति हेतुपर्भोविशेषणोइति घोतनाय किलेति निपातः ॥ अविनाशद्वितीयात्मदर्शनेव ध्यदर्शकत्वसिद्धिर्निर्विषये संपद्यत इत्यात्यंतिकाभ्यासिद्धिरित्याशयेनाह किं नामेति ॥ ५॥ यस्य हि जीवितेनार्थस्तस्य मरणाद्भयं स्यात् ॥ न तस्य चित इत्याह चित इति यतः सर्वात्मा चिदेव सर्वत्र स्वनं जीवितं ॥ एवमस्याः सर्वदेशकालवस्तुषु प्राप्यता स्वरूपं चिदेव यदि जीवितं तदा तेन जीवितेन कदा किमन्यदप्राप्तं प्राप्स्यति यदि चेदित्यर्थः ॥ मरणजीवनयोर्मनः कल्पनामात्रता दपि न ते हि तथा बांध्यप्रसक्तिरित्याह जीवत इति ॥ ७॥

योहि देहाहंभावतांप्राप्तः सदेहभावाभावरूपैर्जन्ममरणैर्गृह्यते॥ यदेहाहंभावना किमहंकारस्य तु तन्मनसः तु तत्पदार्थवर्गस्य तत्राद्यो नप्रमाणवेद्यात्विं सद्रूपोपदार्थस्तत्त्वं तजडो नामी
मिमानयोग्याइति निर्विषयानिराश्रयाचसेसोहं अहंभावइति अहंभावोहंकारः ॥ एतदुक्तमेवार्थं भंग्यंतरेणविस्तरेणाहरक्तेत्यादिना॥ १०॥ आत्मंभरितयाश्रयस्वविषयमात्रव्या
दृततात्लक्षणास्वोदरमात्रपरकतया नाहंकारपुष्टिलक्षणपरोपकारितये त्यर्थः परार्थत्वेपदार्थस्वरूपौ॥ ११॥ गुणाः सत्वादयः गुणानामर्थे प्रकाशप्रवृत्तिमोहलक्षणे स्वव्या

योस्त्वहंभावनांप्राप्तो भावाभावैः स गृह्यते॥ आत्मनो नास्त्यहंभावो भावाभावौ कुतोस्यतौ॥ यो अहंभावो मुधामोहो मनश्च मृगतृष्णिका
जडः पदार्थसंभारः कस्याहंकारभावना॥ एतत्क्रमं समयोर्देहमनोन र्न्विचारणात्॥ जडाश्रितादरूपः सर्वे कुतोहंभावभावना॥ १०॥ आ
त्मंभरितया नित्यमिंद्रियाणि स्थितान्यलं॥ पदार्थाश्च पदार्थत्वे कुतोहंभावभावना॥ ११॥ गुणागुणार्थे वर्तते प्रकृतौ प्रकृतिः स्थि
ता॥ सदेवसति विश्रांतं कुतोहंभावभावना॥ १२॥ सर्वगं सर्वदेहस्थं सर्वकालमयं महत्॥ केवलं परमात्मानं चिदात्मैवेदृशं स्थितः
॥ १३॥ एवं किमाकृतिः कोवा किमादेशश्च किंकृतः॥ किंरूपः किंमयः कोहं किंगृह्णामि त्यजामि किम्॥ १४॥

पारेप्रकृतौ गुणसाम्यावस्थालक्षणे स्वभावे प्रकृतिः प्रधानाख्यामायासद्रूपसति स्वात्मन्यस्ते सत्स्वभावे स्वविश्रांतं॥ १२॥ इहास्मिन्देहे यश्चिदात्मासोपि सर्वगत्वादिवि
शेषणं परमात्मानमेवाहमिति निर्धायस्थितः सोपिनाहंकारास्पदमित्यर्थः॥ १३॥ एवंसति अहमित्येतद्देहमात्राभिमानी किमाकृतिः॥ किंजातीयः कीदृशसंस्थानो 
व्याप्तत्वतः कोवा॥ किमादेशः कइति निर्देशार्हः केन हेतुना वा कृतः॥ किंवर्णः कस्य विकारः॥ तद्भावेन किंगृह्णामि अतद्भावेन किंवा त्यजामि॥ १४॥ 

अतो निर्वकुमयोग्यत्वान्मिथ्यैवाहंकारइति नात्मन स्तत्संबंधइत्याह तेनेति॥ भावस्येअभावत्वेवाउपपत्तिमान्॥ १५॥ द्वित्वकल्पनात्वंअहमिति द्वैविध्यकल्पना॥ १६॥ सर्व
म द्वस्त्वव्यतिरिक्तं पदार्थपरिमार्गणोपितस्य मिथ्यात्वमेवपर्यवस्यतीति सद्रूपाद्वैत साम्राज्यं प्रतिष्ठितमिति नशोकस्यावकाशइत्याह सत्यमिति॥ १७॥ सदद्वैतात्वे
द्वित्वाद्ध्यहंकारो निरसितुं शक्यइत्याशयेनाहएकस्मिन्निति॥ १८॥ अस्तुवा पदार्थत्वस्मीस्तथापिसंबंधी दुर्वचइति नतत्साधकप्रमाणादिप्रसरात्तत्त्विद्धि

तेनाहंनाममेनेहास्ति भावाभावोपपत्तिमान्॥ अनहंकाररूपस्य संबंधः केनमे कथं॥ १५॥ असत्यत्वमहंकारे संबंधः कस्य केन कः॥ संबंधाभाव
संसिद्धौ विलीना द्वित्वकल्पना॥ १६॥ एवं ब्रह्मात्मकमिदं यत्किंचिज्जगतिस्थितं॥ सदेवास्ति तदेवास्मि परिशोचामि किं मुधा॥ १७॥ एक
स्मिन्नेव विमलेपदे सर्वगते स्थिते॥ अहंकारकलंकस्य कथं नामोदयः कुतः॥ १८॥ नास्त्येव हि पदार्थश्री राम सेवास्ती हसर्वगः॥ पदार्थल
क्ष्म्यां सत्यां च संबंधोस्ति न कस्यचित्॥ १९॥ इंद्रियैरिंद्रियैरंगैर्मनो मनसि वल्गति॥ चिदलिप्तवपुः केन संबंधः कस्य किं कथं॥ २०॥
उपलायशलाकानां संबंधो न यथा मिथः॥ तथैकत्रापि दृष्टानां देहेंद्रियमनश्चितां॥ २१॥ असदभ्युत्थितेव्यर्थमहंकारमहाभ्रमे
ममेदमिदमस्येति विपर्यस्तमिदं जगत्॥ २२॥ अतत्त्वालोकजातेयमहंकारवमत्कृतिः॥ तापेन हिमलेखेव तत्त्वालोके विलीयते॥ २३॥

रितिमौढिं निदर्शयन्नाह पदार्थलक्ष्म्यामिति॥ १९॥ असंबंधमेवोपपादयति इंद्रियैरिति॥ अंगैः स्वावयत्वेन काल्पितैरिंद्रियैरिंद्रियैः॥ सर्वेंद्रियैर्मनः मनस्येवसम्यग्व
ल्गतीति नवाह्यार्थान्स्पृष्टुं क्षमते चित्तु इंद्रियैर्वाह्यार्थैश्च अलिप्तत्वनुसंगत्वभावा॥ स्वंच कस्य केनसह संबंधः॥ कथं वा केनवासिद्ध्यतीत्यर्थः॥ २०॥ असंबंधे दृष्टांत
माह उपलेति॥ २१॥ कुतस्तर्हि लौकिकानां ममेदं धनमित्यादिव्यवहारस्तत्राह असदिति विपर्यस्तं भ्रांतं॥ २२॥ २३॥

इति मे मम प्रीतिरस्तु त्वं परं तु मयमसिद्धं वा तत्त्वं॥२४॥ इदानीमहंकारमार्जनोपायमाह अहंकारेति। प्राग्व्याख्यातं॥२५॥ शरत्तं शरदि खे निर्मले स्वभावइवा॥२६॥ सलिलं सलि
न्कास्थितिस्तमाह ददातीत्यादिना॥२७॥ सलिलात्मनि दुर्वासनामलिलगनी॥२८॥ मरणं मरणादि पारलौकिकदुःखं जीवितं पुनर्जन्मगतदुष्पांतं तरवधिकं एवं जीवि
तं॥ ऐहिकदुःखं मरणांतं गमरणावधिकं॥ भावाभोग्यवर्गाः अभावान्नाशाद्यवाच्छिन्नाः खंडितना॥२९॥ अर्करत्नानां सूर्यकांतमणीनां ग्रीष्मकाले अग्नि

आत्मनो व्यतिरेकेण न किंचिदपि विद्यते॥ सर्वं ब्रह्मेति मे तत्त्वमेतत्तद्भावयाम्यहं॥२४॥ अहंकारभ्रमस्यास्य जातस्याकाशवर्णवत्॥ अपुनःस्म
रणं मन्येन्नं विस्मरणं वरं॥२५॥ समस्तं संपरित्यज्य चिरायाहंकृतिभ्रमं॥ तिष्ठाम्यात्मनि शांतात्मा शरत्तं शरदीव खे॥२६॥ ददासन
र्थनिचयं विस्तारयति दुःकृतं॥ विस्तारयति संतापमहंभावोनुसंहितः॥२७॥ स्फुरत्यहंकार घने हृद्व्योम्नि सलिलात्मनि॥ विकस
त्यमितः कायकदंबे दोषमंजरी॥२८॥ मरणं जीवितोपांतं जीवितं मरणांतगं॥ भावाऽभावाद्यवच्छिन्नाः कष्टेयं दुःखवेदना॥२९॥
इदं लब्धमिदं प्राप्स्यामीत्यार्तिर्दाहकारिणी॥ न शाम्यत्यर्करत्नानां ग्रीष्मेग्निरिव दुर्हृदयां॥३०॥ नास्तीदमिदमस्तीति चिंता धाव
त्यहंकृति॥ जडाशया जडामभ्रमालोशैलावलीमिव॥३१॥ अहंभावे परिक्षीणे शुष्कः संसारपादपः॥ स्वयः प्रयच्छत्यरसो न पाषाण
वदंकुरं॥३२॥ स्वत्प्राकृसभोगिन्यो देहद्रुमकृतालयाः॥ कापि यांति विचारेणान्याग नेविनतापुते॥३३॥

रिव नित्यमुद्दवत्येवेत्यर्थः॥३०॥ जडाशया जडाश्रया जलाश्रया च धावत्यनुसरति शैलावली पक्षे जडांगुरुतरां॥३१॥ न प्रयच्छति न जनयति यतः अरसः
रागलक्षणांकुरजननशक्तिशून्यः अतएव पाषाणतुल्यः॥३२॥ विचारात्मनि विचाररूपे विनतापुते गरुडे॥३३॥ 

म.स:
असतो मिथ्याभूतादज्ञानात्समुत्थिते अतएव भ्रमादध्यासादेव सन्मये विश्वस्यासत्त्वेपि तत्र प्रयुक्तो व्यवहारः स्यादित्यत आह असन्मयपरिस्पंदे इति॥ मे दृश्यव्यवहार
मात्रस्यासन्मयत्वेत्यहमिति कमो मे दृश्यव्यवहारोपि कल॥२४॥ अतएवाकारणं सत्यप्रयोजनमस्त्यमेव अकारणो कारणत्वान्नहि दैवाज्ञानादुदेति॥ ततः किं तत्राह यदिति
॥२५॥ एवं चोत्पत्तेः पुरा देहादेर्यादृशी स्थितिस्तादृश्येव सर्वदेति सिद्धमित्याह अपश्यंतं इति॥ सरित्कुंभरूपा आकृतिः संस्थानमिव अपुनरिवशब्दे व्यर्थे॥२६॥ उक्ते
र्थे दृष्टांतमाह मध्येति॥ यथा वारि मध्ये तरयोः पूर्वोत्तरकालयोरविकृतपयोमात्रं मध्यं तु कंचित्कालं वालोवलं वंचलं सत् आद्यंतयोः पूर्वोत्तरकालयोः प्र

असदभ्युत्थिते विश्वेतज्ज्ञाते भ्रमसन्मये॥ असन्मयपरिस्पंदे त्वहंत्वं चेति कः क्रमः॥२४॥ इदं जगदुदेत्याराद्कारणमकारणात्॥ यदकारण
मुद्भूतं तत्सदित्युच्यते कथं॥२५॥ अपश्यंत पुरा कालेसरित्कुंभवदाकृतिं॥ देहो भवरिदानीं तु तथैवास्ति भविष्यति॥२६॥ मध्ये तरपयोमात्रं कं
चित्कालं चलाचलं॥ आद्यंतसौम्यते स्पष्टा वारिवीचितया यथा॥२७॥ अस्मिन्क्षणपरिस्पंदे देहे विस्मरणोन्मुखे॥ तरंगे चनिबद्धास्था ये
हतास्ते कुबुद्धयः॥२८॥ प्राक्पुरस्ताच्च सर्वाणि सैति वस्तूनि नामितः॥ मध्ये स्फुरत्स्वमेतेषां कैवास्थाहतरूपिणी॥२९॥

सिद्धे सौम्यते स्पष्टा वीचितयास्थितं वार्येव नवस्त्वंतरं तद्वद्देहा द्यपि कालत्रयेपि ब्रह्मैव न वस्त्वंतरमस्तीत्यर्थः॥२७॥ क्षणपरिस्पंदे अस्मिन्देहे विस्मरणोन्मु
खे तरंगे च ये अहंत्वेन निबद्धास्थास्ते कुबुद्धयस्तन्नाशेनैव ते हता इत्यर्थः॥२८॥ देशतः परिच्छिन्नत्वादपि देहादिवस्तुषु नास्था युक्तेत्याह प्रागिति॥ म
ध्ये स्वाधिकरणवितस्त्यादिमितदेशमात्रे स्फुटत्वं विद्यमानतया प्रतीयमानत्वं॥ तदपि कालत्रयैकदेशाभ्यां विकल्प्य विमर्शे दुर्वचमेवेति तत्रापि निर्विषय
ताद्भुतरूपिणी आस्था केवा अनुचितैवेति भावः॥२९॥

उक्तं न्यायं लिंगेपि दर्शयंस्तस्यापि तथात्वमाह चित्तमिति॥ चित्तं चितोपलक्षितं लिंगं सोत्सत्तेः पूर्वं पूर्वकाले पुरस्तात्पुरोदेशे च स्वदेहं समासाद्य चिन्मात्रस्वभावं एवं उत्तरकाले देशांतरे च शांतं नष्टइति अनयैवदेशतः परिच्छिन्नमपि स्वे मंलीनमिवार्थं तत्तिरोहितं सदासद्देति दुर्वचं॥ एवं विधं चित्तं मध्ये संप्रतमेतद्देशसद्भावातिरिक्तं किमुदितं न किंचिदित्यर्थः॥४१॥ यदि स्थूलसूक्ष्मदेहाद्यसदेव कीदृशस्तर्हि तत्प्रतिभासस्तमत्राह यथेत्यादिना॥ संभ्रमाः व्याघ्रचोरादिभयानि तद्दृष्टिषु॥ असत्त्वपि व्याघ्रादिषु सर्वत्र व्याघ्रादिशंका भवति तद्वत्॥४२॥ धातुविकारेषु वातपित्तादिसंनिपातेषु॥ चक्षुरादीन्द्रियस्य तिमिरादौ विक्लवे दोषाद्वैवं द्वारिभ्रमः॥ अतिसंभ्रमहेतौ अतिप्रिय

चित्तं पूर्वं पुरस्ताच्च विदेहं शांतमित्यपि॥ सदसद्धास्वसंलीनं मध्ये स्मिन्किं तवोदितं॥४१॥ यथास्वप्नविकारेषु यथा संभ्रमदृष्टिषु॥ यथा वा मदलीलासु यथा नौ पानसंभ्रमो॥४२॥ यथा धातुविकारेषु यथा चेंद्रियविक्लवे॥ यथातिसंभ्रमानंदे दोषावेशदशासु च॥४३॥ दृश्यते क्षीयते चैव रूपं सदसतो भ्रमे॥ तथैवेयमिह त्वेषा कालेनान्यूनातिरिक्ता॥४३॥ मा च त्वया कृता नित्यं चित्त दुःखसुखोदये॥ यथा वियोगयामिन्यो मत्तयो हि तिरोगिराः॥४४॥ मयैवेहासदाभ्यासान्मिथ्या सदिव लक्ष्यसे॥ मे गतप्रेसेवनेनैतत्त्वत्कृतं मत्कृतं भवेत्॥४५॥

तमत्ताभादिप्रसक्ते आनंदे विधुरादीनां कामादिदोषावेशदशासु च यथा सदसतो भावाभावयोरूपं चलं प्रतीतिकालमात्रस्थायि किंचित्कामिन्यादिरूपं प्रदृश्यते वर्धते क्षीयते च॥ तथैव एषा भ्रांतिरिति परेणान्वयः॥४२॥ योधिशेषस्तमाह इहत्विति॥ स्वप्नादयोऽल्पकालाः॥ जगद्भ्रमस्तु यावन्मोक्षमिति कालेनान्यूनातिरिक्तैव विशेषइत्यर्थः॥४३॥ हे चित्त सा कालेन्यूनातिरिक्ता त्वया व्यावहारिकवस्तुषु सत्यभ्रांत्या वियोगसंयोगाभ्यां नित्यं सुखदुःखयोः हृदये निमित्ते तया कृता मतीत्याहं तिपीडयति यथा अमत्स्यपि भार्यापुत्रादिमरणे प्रतारकवाक्यादुत्पन्नास्तन्मरणप्रत्ययाः तत्कल्पितवियोगयामिन्यश्चरागिणं घ्नंति तद्वदित्यर्थः॥४४॥ अथवा नायं तवापराधः किंतु लब्ध्वहं भावाभ्यासिनो ममैवापराधः येन मिथ्याभूतोपि त्वं सदिव लक्ष्यसे त्वत्कृतं च सर्वं मत्कृतं संपन्नमित्यर्थः॥४५॥

राम॰
॥१५९॥

अतएव त्वदीयविवेकज्ञानात्स्वमदपराधरूपस्य तव शांतिरित्याशयादिदमिति॥४६॥ तद्धेतुभोगवासनानामपि तत एव क्षयइत्याह अवस्त्विति॥४७॥ अथवा चित्तमिति विंबग्रहणेन चित्ताद्धीतरागेण अतएव संत्यक्तमननव्यसनेन चरमसाक्षात्कारहस्याद्दृष्टात्मना मनसा स्वयमेव स्वस्थेन मोक्षविश्रांतिमतो भूयते मया॥ सदैकरूपत्वादित्याशयेनाह चित्तादित्यादिना॥४८॥ चित्तं स्वप्नमेव बहिः प्रवृत्तं स्वाववरेंद्रियादिस्वेदत्यागतत्त्वबोधेन परमात्मानं लेक्षितं सत आत्मानं चित्तस्वरूपं दग्ध्वा अलभतं तं शाश्वतीं नित्यां

यदिदं किंचिदाभोगि तत्सर्वं दृश्यमंडलं॥ अवस्त्विति विनिर्णीय मनो यात्यमनः पदं॥४६॥ अवस्त्विदमिति स्फारेरूढे मनसि निश्चये॥ हेमंतरवमंत्वर्थः क्षीयंते भोगवासनाः॥४७॥ चित्ताद्दृष्टात्मनानंतं संत्यक्तमननौजसा॥ मनसा वीतरागेण स्वयं स्वस्थेन भूयते॥४८॥ परमात्मानमलेक्षितं संदृष्ट्वा च मनं स्वयं॥ दग्ध्वात्मानमलं वित्तं श्रद्दतामेति शाश्वतीं॥४९॥ देहमन्यतया दृष्ट्वा त्यक्त्वा विषयवासनां॥ विना शमुरी कृत्य मनो जयति वीरवत्॥५०॥ मनः शत्रुः शरीरस्य शरीरं मनसो रिपुः॥ एकाभावेन नश्यते आधाराधेयकार्यवत्॥५१॥

श्रद्धतामेतीत्यर्थः॥४९॥ यथा वीरः पुरुषो युद्धे स्वदेहं स्वर्गगामिन्यान्यतया दृष्ट्वा देहसंबंधिगृहक्षेत्रधनादिविषयवासनां त्यक्त्वा मरणमभ्युपगीकृत्य एवं स्वलोके जयति तद्वन्मनोपीत्यर्थः॥५०॥ इदानीं देहमनसोः परस्परतेप्यतापकतया विरोधं परस्परतादात्म्याभिमानात्परस्पराभिहत्या परस्परोपजीव्यतां एकतराभिमानोच्छेदेनोभयोच्छेदं च विस्तरेण दर्शयितुमुपक्रमते मन इति॥ शत्रुरिपुशब्दौ तापकपरौ॥ एकाभावेन एकतरवासनोच्छेदेन॥ यथा आधाराधेययोः जलघटयोः कार्यं भूतः संयोग एकतरनाशेन नश्यति तद्वत्॥५१॥

इदानीं दे[illegible] तथा च परस्परोपजीविला द्राग वतोः परस्परोपतापकत्वाद्द्वेषवतोर्योग्ययोः सतोर्वनहरिण्योरेव तयोः सतोर्न जीवस्य सुखं किं त्वेतयोर्मूलकाषेण मल्लोग्रेनेनाशेन विनाशेन परं सुखमित्यर्थः॥५२॥ ननु मरणेन भोगायतनदेहनाशादेव सर्वदुःखपरिहारः किं न स्यात्तत्राह एतयोरिति देहनाशेप्येकस्य मनसः संस्थाने देहकल्पनायो अनिवारणान्मतिरिति कथा व्योम्नि अयागच्छंत्या स्त्रियाधरात्मभिर्भुक्ता प्रसिद्धा कथया समा असंभावितार्थेत्यर्थः॥ अयतेः क्लिपिय लोपेदापिसर्वर्णदीर्घे आनया अया॥ अयः स्त्रियेति पाठे तु अयो विकारस्तया स्त्री प्रतिमया व्योम्नि धरा भुक्तेति कथा समेत्यर्थः॥ अयः प्रतिमायाः व्योम्नि गमने धराभक्षणं च यथा

न्या रागद्वेषवतोर्नित्यमन्योन्यं तिविरुद्धयोः॥ एतयोर्मूलकाषेण विनाशः परमं सुखं॥ ५२॥ एतयोरेकसंस्थाने मतिरित्येवया कथा॥ व्योम्न्ययास्त्रिया भुक्ता धरेति कथया समा॥ ५३॥ अकृत्रिमविरोधं स्यौ मत्र संपादितावुभौ॥ धाराइव पर्तल्येव तत्रानर्थ परंपरा॥ ५४॥ मिथो विरुद्धसंसर्गे रतिमेत्य धमो हियः॥ स्वक्तव्यः सपात्हाराग्निराशा वलेपने॥ ५५॥

था असंभावितं तथा मनसि मतिमरणमपीति भावः॥ ५३॥ तयोः सतोः काक्षाजिस्तत्राह अकृत्रिमेति॥ युध्यतोरंतराले स्थित स्य देहेस्व दुःशरादिधाराइव॥ ५४॥ मिथो विरुद्धे देहमनसी संसृज्येते अस्मिन्निति विरुद्धसंसर्गो वैषयिकसुखभोगस्तस्मिन्नयः॥ अधमः रतिं आस्थामेति सपुरुषः॥ अलेपने निरावरणे पतद्वारोपर्तनिवारीणि समुद्रोदकानि यस्मिंस्तथाविधे अग्निराशौ वडवानले त्यक्तव्यः सतत्रापि रतिमेष्यतीत्यर्थः॥ ५५॥

रागद्वेषवतोरिति यदुक्तं तत्र मनसो देहे रागद्वेषौ दर्शयति संकल्पेनेति मनः स्वसंकल्पेन बालो यक्षमिव शरीरं परिकल्प्य अस्मै आ आयुः यावदायुःकालं अशनं परिकल्प्य पुष्ट्वा स्वाभिनिवेशनिमित्तानि सर्वदुःखानि प्रयच्छतीत्यर्थः॥ ५६॥ देहस्यापि मनसि द्वेषांशं सहनिमित्तं दर्शयति तेरिति॥ दुर्विषय सेवनेन मनसि रागद्वेषशोकमोहपापादिजननेन तत्पीडयितुमिच्छतीत्यर्थः॥ ननु मनोजनितत्वात्पुत्रप्रायो देहः पितृस्थानीयं मनः॥ कथं हंतुमिच्छति तत्राह पुत्र इति॥ उद्यतासि विषाग्निवशापोद्यतेकरंतथा॥ अथर्वणोन हंतारं पिशुनं चैव राजसु भार्यातिक्रमिणं चैव विद्यात्सप्ताततायिनः इति विष्णुकात्यायनोक्ता नामाततायिनां पदं स्वपीडाव्यवेशायं गतं प्राप्तमित्यर्थः॥ ५७॥

संकल्पेन मनः पुष्ट्वा शरीरं बालयक्षवत्॥ आयुरेवाशनान्यस्मै सदुःखानि प्रयच्छति॥ ५६॥ तैर्दुःखैस्तापितो देहो मनो हंतुमपेक्षति॥ पुत्रोपि हंति पितरं [illegible] मातताायिपदंगतं॥ ५७॥ नास्ति शत्रुः प्रकृत्यैव न च मित्रं कदाचन॥ सुखदं मित्रमित्युक्तं दुःखदः शत्रवः स्मृताः॥ ५८॥ देहो दुःखान्यनुभवन्स्वमनो हंतुमिच्छति॥ देहं मनः स्वदुःखानां संकेतं कुरुते स्मरणात्॥ ५९॥ एवं मिथो दुःखदयोः श्लिष्टयोः कः सुखागमः॥ एतयोर्देहमनसोर्जात्यैवाति विरुद्धयोः॥ ६०॥ मनस्येव परीक्षीणे न देहो दुःखभाजनं॥ तत्स्यपोक्तनयानित्यं देहोपि परिधावति॥ ६१॥ नष्टे न नष्टमनर्थाय शरीरं परमापदो॥ अलब्धात्मविवेकेन मनसा सुप्रजायते॥ ६२॥ तत्स्य शत्रुत्वं लोकप्रसिद्धन्यायेनोपपादयति नास्तीति॥ ५८॥ संकेतं भोगायतनमिति यावत्॥ ५९॥ विरोधमुपपादितमनूद्य तत्र सुखदौर्लभ्यमुपसंहरति एवमिति॥ ६०॥ मनसि क्षीणे पुनर्देहस्य दुःखप्रसक्तिरस्तीत्याह मनसीति॥ अन्यस्त्वस्यैवउक्तनयात्सोत्कंठतया॥ ज्ञानेनतत्साधनोपायेषु परिधावतियततेइतियावत्॥ ६१॥ तर्हि मनोपि देहनाशायैव कुतो न यतते तत्राह। नष्टेति अलब्धात्मविवेकेन मनसा न नष्टं नाशितं वा शरीरं आपदां परं सदनर्थायैव सुप्रजायते इति तन्नाशान्मनसो नेष्टसिद्धिरित्यर्थः॥ ६२॥

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी स्मारक

वा॰टी॰उ॰प॰ १६१ मिथः अनुग्रहादिति शेषः। सस्यस्येव विटपेऽङ्गादि निष्पत्तिद्वारा पयो दानुग्राहिकोऽक्कचित्तं भवेदित्युपमोपपत्तिः॥ ६३॥ मिथो विरुद्धयोरेतयोः किमर्थं सहभाव इति
चेद्वारिवह्न्योः पाकार्थमिव पुरुषस्य भोगमोक्षोपायव्यवहारार्थमित्याशयेनाह मिथ इति। विरुद्धतया द्विधा स्थिते अप्येते अन्योन्यताऽऽत्म्याध्यासादेकरूपे
सति दुःखाय दुःखानि भोक्तुं परिहर्तुं च साकं भोगमोक्षव्यवहारसाधनपरे संपन्ने इत्यर्थः॥ ६४ देहस्य चित्ताधीनतोक्तेः फलमाह चित्त इति॥ ६५॥ ६६॥ अतो मनस

एते मनःशरीरे हि मिथः पीवरतां गते॥ जडरूपे हि वर्षासु पयोऽम्भसरसी यथा॥ ६३॥ मिथो दुःखमसंपन्ने एकरूपे द्विधा स्थिते॥ व्यवहारप
रे सार्द्धं लोके वार्यनलाविव॥ ६४॥ चित्ते क्षयिणि संक्षीणो देहो ह्यात्मलितो भवेत्॥ वर्द्धमाने तु हरिवशत शाखः प्रवर्त्तते॥ ६५॥ क्षी
यते मनसि क्षीणो देहः प्रक्षीणवासनः॥ मनो न क्षीयते क्षीणो देहे तस्मात्प्रयत्नमनः॥ ६६॥ संकल्पपादपेत्र साल तं छित्वा
मनोवनं॥ विततां भुवमासाद्य विहरामि यथासुखं॥ ६७॥ प्रक्षीयमाणमेवेदं न मनो मनसि स्थितम्॥ प्रशाम्यद्वासनाजालं प्रावृडन्तइवाम्बुदः॥ ६८॥ धातूनां सन्निवेशोऽयं देहनामारिपुर्मम॥ प्रक्षीयमाणो म्लानिमिगलत्वेपो वतिष्ठतु॥
६९॥ यदर्थं किल भोगश्रीर्वाञ्छ्यते स कलेवरं॥ तन्मे नापि न तस्माहं कोऽर्थः सुखलवेन मे॥ ७०॥

वनाशयामीत्याह संकल्पेति॥ ६७॥ संकल्पनाशे च मनः मनसि मनःस्वभावेन स्थितमपि प्रशाम्यद्वासनाजालं सत् प्रावृडन्ते अम्बुद इव नंक्ष्यतीत्यर्थः॥ ६८॥ त्वगसृङ्मांसमे राम॰
दोऽस्थिमज्जाशुक्राख्यानां धातूनां सन्निवेशात्मकोऽयं देहः मनसि प्रक्षीयमाणो गलतु तिष्ठतु वा न कापि क्षतिरित्यर्थः॥ ६९॥ तिष्ठति देहे सुखदुःखमपि किं न स्यादिति चेत्तत्सं १६१
बंधहेतोर्मनसो नाशात्संबंध एव नास्ति हर्षे दुःखप्रसक्तिरित्याशयेनाह यदर्थमिति॥ ७०॥

नाहं देह इत्यस्मिन्क्रम्यते बुध्यत इति क्रमो वश्यज्ञातव्यार्थस्तस्मिन्युक्तिमुपपत्तिं वल्गाति दर्शनश्रवणादिनाव्यवहरति॥ ७१॥ तस्मात्सर्वस्य बोधात्प्रदर्शनात्। यः विमु
क्तेन स्तूर्यमण्डलेऽपि सत्ताद्वास्तां हंगं प्राप्य व्योमनिभास्करं वेति स एव चिद्रूपोऽहमित्यर्थः॥ ७२॥ ७३॥ स्मृतिमन आदेः प्रसक्तिरेव नास्तीत्याह यत्रेति। श्रेष्ठसन्नि
धौ क्षुद्राणामनवस्थाने लोकप्रसिद्धमुदाहरति पामरा इति महीभृतो राज्ञः॥ ७४॥ तत्पदं अनुयातः प्राप्तोऽस्मि॥ ७५॥ किंच प्रारब्धशेषभोगलीलया सा

नाहं देह इति तस्मिन्स्युक्तिमाकर्णयत्क्रमे॥ सर्वाङ्गेष्वपि सत्त्वेवशवः कस्मान्न वल्गाति॥ ७१॥ तस्माद्देहादतीतोऽहं नित्योऽनस्तमितद्युतिः
यः संगभास्वतां प्राप्य वेद्मि व्योमनिभास्करं॥ ७२॥ नाज्ञो हं न च मे दुःखं नानर्थो न च दुःखिता॥ शरीरमस्तु मा वास्तु स्थितोऽस्मि
विगतज्वरः॥ ७३॥ यत्रात्मा तत्र न मनो नेन्द्रियाणि न वासनाः॥ पामराः परितिष्ठन्ति निकटे न महीभृतः॥ ७४॥ यदं तदनुया
तोऽस्मि केवलोऽस्मि जयाम्यहं॥ निर्वाणोऽस्मि निरंशोऽस्मि निरीहोऽस्मि निरीप्सितः॥ ७५॥ इदानीमस्य मंबद्धो मनोदेहेन्द्रि
यादिभिः॥ पृथक्कृतस्य तैलस्य तिलैर्विगलितैरिव॥ ७६॥ स्वस्मात्स्वदेवादस्माल्लीलयाचलितस्य मे॥ पृथक्कृतमतेः किं
च परिवारोऽयमशुभः॥ ७७॥ स्वच्छतोर्ज्जितता सत्ताहृद्यता सत्यता ज्ञता॥ आनंदितोऽपि शमिता सदा चमुदुभाषिता॥ ७८॥
पूर्णतोदारता सत्या कान्तिमत्तैकतानता॥ सर्वैकता निर्मयता क्षीणाद्वित्वविकल्पता॥ ७९॥

त्स्वरूपात्पदपूर्वेण ह्यवहाराभासे चलितस्य सर्ववासनया पृथक्कृतमतेः॥ अयं देहेन्द्रियोर्मे परिवारः परिजन इव विनोदहेतुरित्यर्थः॥ ७६॥ तस्यां लीलायां स्व
च्छतादिगुणसंपदः स्वस्य हृदयवल्लभाः कान्ता इति रूपयति स्वच्छतेत्यादि त्रिभिः ऊर्ज्जितता पूर्णकामता ज्ञता विदितात्मता॥ ७८॥ उदारता निर्लोभता स

स्ताः मम नित्यमुदिताः अभ्युदयशालिन्यः कान्ताः ॥८०॥ संभवति कल्पनयेति शेषः॥ अतः सर्वविषयजातं प्रति वांछावांछे रागद्वेषौ। सुखासुखे तत्फले सुख
दुःखे ॥८१॥ अतो हं शरदि नभस्तले घनलव इव शीतले निस्तापे आत्मनि दृश्यभावं परित्यज्य विश्राम्यामीत्यर्थः॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे उप
शमप्रकरणे त्रिपंचाशः सर्गः॥५३॥ दृढ नालोचनाद्यैः स्वाभाव्यमन्वैषलंवीतनुं॥ दृष्ट्वा विकल्पान्विश्रांतः समाधौ सह्वतीर्यते॥ धवलया विशुद्धया ततया

नित्योदिताः समाः स्वस्थाः सुंदर्यः सुभगोदयाः॥ ममैकात्ममतेर्नित्यं कान्ता हृदयवल्लभाः॥८०॥ सर्वथा सर्वदा सर्वं सर्वस्मि
न्संभवत्यतः॥ सर्वं प्रति मम क्षीणौ वांछावांछे सुखासुखे॥८१॥ विगतमोहतया विमनस्तया गतविकल्पनचित्ततया स्फुटं॥ उ
परमाम्यहमात्मनि शीतले घनलवः शरदीव नभस्तले॥८२॥ मोक्षोपाये उपशमप्रकरणे उद्दालकविलासो नाम सर्गः
५३॥ श्रीवसिष्ठ उवाच॥ इति निर्णीय ततया धिया धवलया मुनिः॥ बद्धपद्मासनस्तस्थावर्धोन्मीलितलोचनः॥१॥
ओमित्येतत्परं ब्रह्म निर्णीय स मुनिस्तदा॥ ॐकारोच्चारितो येन तेनाप परमं पदं॥२॥ ॐकारमकरोत्तारस्वरमू
र्ध्वगतध्वनिं॥ सम्यगाहतलांगूलं घंटाकुंडमिवारवं॥३॥

अक्षद्व्याधिया इति उक्तरीत्या निर्णीय॥१॥ स मुनिरुद्दालकः येन ॐकार उच्चारितः तेन परमं पदं आप्तं प्राप्तमेवेत्यलोर्पसिद्धेः संधिरार्षः॥२॥ ओमित्येतदक्षरं
परस्य ब्रह्मणः अभिधानत्वात्प्रतीकत्वाच्च परमेव ब्रह्म इति निर्णीय तारः उच्चैः स्वरो यस्य तथाविधं ऊर्ध्वगतः ध्वनिर्यस्य तथाविधं ॐकारं अकरोत् 
उच्चारितवान् सम्यगाहतलांगूलं लंबमानजिह्वाकारलोहं यस्मिंस्तथाविधं घंटायाः कुंडं मुखाकाशं आरवं नादमिव॥३॥

कियत्कालमोंकारमकरोत्तत्राह॥ ओमिति॥ ॐकारं पुनःपुनरुच्चारयतस्तस्योद्दालकस्य मूलाधारमारभ्य ब्रह्मरंध्रपर्यंतं प्रसिद्धायामस्योंकारस्य मूर्ध्नि स्थितेऽर्धमा
त्रोपरमो ध्वनिरभिव्यक्ते वितते अमलात्मनि ब्रह्मणि संविदेकाकाराकारवृत्त्युपहिते चैतन्ये तलक्षं दृश्यं जीवं च चैतन्यं च यावत्तु उन्मुखे अखंडब्रह्मचैतन्योन्मुखे भवति तावत्ता
लं ओंकारमकरोदिति पूर्वेण संबंधः॥४॥ तत्र निर्विकल्पकसमाधिप्रतिष्ठायोग्यतासिद्ध्यर्थं प्रथमं तेनैव प्रणवेन स्थूलदेहस्य शोषणदहनदुष्टमूलांशनिरसना
प्लावनदिव्यदेहांतरनिर्माणाद्यपि प्रथमं तद्भावनया वृत्तमित्याह सार्धत्र्यंशेत्यादिना॥ सार्धत्र्यंशा अर्धमात्रासहिताः अकारोकारमकाराख्या आत्ममात्राः स्वा
वयवा यस्य तथाविधस्य प्रणवस्य प्रथमेंशे उदात्ते अकारभागे स्फुटारवे उच्चैः स्वरेणाभिव्यक्ततारभावे अत एव सम्यगास्फोटबहिर्निर्गमने ध्रुक्तैः प्राणैः

ॐ मुच्चारयतस्तस्य संवित्त्वे तदुन्मुखे॥ यावदोंकारमूर्धस्थे वितते विमलात्मनि॥४॥ सार्धत्र्यंशात्ममात्रस्य प्रथमेंशे स्फुटारवे॥ प्रण
वस्य समाक्षुब्धप्राणापूरितदेहके॥५॥ रेचकाख्योऽखिलं कायं प्राणनिःक्रमणक्रमः॥ रिक्तीचकार पीतांबु अगस्त्य इव सागरं॥६॥ अति
ष्ठत्प्राणपवनश्चिदापूरितांबरे॥ त्यक्तदेहः परित्यक्तनीडः खग इवांबरे॥७॥ हृदयाग्निर्ज्वलज्ज्वालो ददाह निखिलं वपुः॥ उत्पातपव
नोद्धूतो दावः शुष्कमिव द्रुमं॥८॥ यावदित्थमवस्थैषा प्रणवप्रथमक्रमे॥ बभूव न हठादेव हठयोगो हि दुःखदः॥९॥

मूलाधारमारभ्य ओष्ठपुटावधि पूरिते देहके जाते सति रेचकाख्यः प्राणनिष्क्रमणक्रमः अखिलं रिक्तीचकार रेचनेन शोषयामासेति द्वयोरर्थः॥५॥६॥ तस्य रेचितः प्रा
णपवनः क्व तिष्ठत्तत्राह॥ अतिष्ठदिति॥ चिद्रूपेण ब्रह्मभावनाभिव्यक्तहार्दरूपेण आपूरिते अंबरे बाह्याकाशे॥७॥ तदानीं भावनया यद्वृत्तं तदाह हृदयाग्निरिति॥ प्रा
णानां निष्क्रमणसंघर्षणाद्धृदये भावनया उद्भूतो वह्निः दवे अरण्ये भवो दावोग्निः॥८॥ प्रणवस्य पूर्वोक्ते प्रथमक्रमे प्रथमेंशे॥ इदं च सर्वं भावनया वृत्तं न हठादे
व कृतं तत्राह हठयोग इति हठात्प्राणानां निर्गमने मूर्छामरणादिप्रसंगादिति भावः॥९॥

इतरोंशउकारभागस्तस्य अनुदात्तमंद्रोच्चारणावसरे कुंभस्य जलवन्निश्चलत्वात्कुंभकोनामक्रमः॥१०॥ उक्तं कुंभकनामविशदयतिनबहिरिति॥११॥ अशनिवद्देहद्युताग्निवत्॥१२॥ यत्रयस्यामवस्थायां शरीरास्थीनिकर्पूरधूलिरचितायांशय्यायांसुप्तानीवभावनादृशालक्ष्यंते॥१३॥ वात्यापवनेरूर्ध्वमानीतंभास्थिअस्थिसहितंतद्भस्मवायुरूर्ध्वग्राहीचंडपवनःत्रिनेत्रस्यरुद्रस्यव्रतंअस्थिभस्मधारणं॥ तद्वानिवमृशंउत्पन्नेतपःकृशइवालक्ष्येस्वदेहेअयोजयत्उद्धूनयामासेतियावत्॥१४॥ तत

अथेतरांशावसरेप्रणवस्यसमस्थितौ॥ निःकंपकुंभकोनामप्राणानामसवक्रमः॥१०॥ नबहिर्नांतरेनाधोनोर्ध्वंनाशासुतत्रते॥ संक्षोभमागमन्प्राणाआपःसंस्तंभिताइव॥११॥ दग्धदेहपुरोवन्हिःशशामाशनिवत्क्षणात्॥ अदृश्यतसितंभस्मशरीरंहिमपांडुरं॥१२॥ यत्रकर्पूरशय्यायांसुप्तानीवसुखोचितं॥ शरीरास्थीनिलक्ष्यंतेनिष्पंदानिसितानिच॥१३॥ तद्भस्मपवनानीतंभास्थिवायुस्योजयत्॥ स्वदेहेभृशमुत्पन्नेत्रिनेत्रव्रतवानिव॥१४॥ तच्चंडपवनोद्धूतमात्मस्वगगनंक्षणात्॥ शरदीवाभ्रमिदिक्कापि भस्मास्थिभ्रमद्ययौ॥१५॥ यावदित्थमवस्थोषाप्रणवस्यापरेक्रमे॥ बभूवनहठादेवहठयोगोहिदुःखदः॥१६॥ ततस्तृतीयावसरेप्रणवस्योपशांतिदे॥ पूरणात्पूरकोनामप्राणानामभवत्क्रमः॥१७॥

अस्थिभद्भस्मक्वापिययौ॥१५॥ प्रणवस्यमध्यभागमाध्येकुंभकाख्येक्रमेइत्थमेषावस्थाभवनयैवबभूवनतुहठात्॥१६॥ तृतीयभागोच्चारणावसरे यद्यपिरेचकपूरककुंभकेषुसमग्रस्यैवप्रणवस्यसाधनत्वंप्रसिद्धंतथापिरेचकेआदिभागएवजायतेकुंभकेमध्यमभागएवपूरकेचरमभागएवकंठान्निर्गच्छताप्राणेनकंठ्यभागस्यैवाभिव्यक्तेःसंकुचद्भ्यामोष्ठाभ्यांउकारभागस्यैवाभिव्यक्तेरोष्ठसंपुटितेमकारभागाभिव्यक्तौपुनःप्रविशत्यपिप्राणेतत्स्वरस्यारस्यैवानुवर्तनादितितत्तद्भागावसरविभागोक्तिरितिबोध्यं॥१७॥



चेतनाजीवचित्तस्याभाविततयदमृतंतन्मध्यगाः॥ व्योम्निबहिराकाशे॥१८॥ गगनकोशस्याधमाःनीहारभागाः शीतलांबुदभावमिव॥१९॥ अमृतमयानीकलानांकलापैःसंपातैःसंपूर्णेअतएवरसायनमहार्णवेतस्मिंश्चंद्रमंडलेपुण्यराशौधर्ममेघाख्यसमाधाविवाहादेनापूर्णे तेप्राणावयवःरसायनमयाअमृतमयाःकिरणधाराःसंपन्नाइतिपरेणान्वयः॥२०॥ मणियष्टिःस्फटिकदंडवत्समाकाराः॥२१॥ शेषेपवनाद्भूतावशिष्टेरसानामयनीप्रवहणी॥२२॥ तयाधारयामथ

अस्मिन्नवसरेप्राणाश्चेतनामृतमध्यगाः॥ व्योम्निशीतलतामीयुर्हिमसंस्पर्शसुंदरीम्॥१८॥ क्रमाद्गगनमध्यस्थाश्चंद्रमंडलतांययुः॥ धूमागगनकोशस्थाःशीतलांबुदतामिव॥१९॥ कलाकलापसंपूर्णेतेतस्मिंश्चंद्रमंडले॥ पुण्यराशौविवापूर्णेरसायनमहार्णवे॥२०॥ रसायनमयाधाराःसंपन्नाःप्राणवायवः॥ मणियष्टिसमाकाराज्जालेर्भिंदोरिवांशवः॥२१॥ सापपातांबरात्ताराशेषेशरीरसद्मनि॥ रसायनीहरशिरःपतितेवसुरापगा॥२२॥ उदुम्बरिंदुबिंबामंचनुर्बाहुवपुस्तया॥ प्रस्फुरन्मंदरारब्धेःपारिजातइवद्रुमकः॥ उद्दालकशरीरंतन्नारायणतयोरिते॥ प्रफुल्लनेत्रवक्त्राब्जमाबभौरीसितद्युति॥२४॥ रसायनमयाःप्राणास्तच्छरीरमपूरयन्॥ सलिलौघाइवसरोवृक्षंमधुरसाइव॥२५॥ अतः कुंडलिनीप्राणाःपरयामस्तुराहृताः॥ चक्रानुवर्तप्रसृतांपयांसीवसरिद्धरा॥२६॥

नेनप्रस्फुरन्मंदरोत्थस्मिंस्तथाविधाद्ब्धेःपारिजातोद्रुमइव॥२३॥ नारायणतयानारायणशरीरतया॥२४॥ मधौवसंतेपल्लवोद्गमहेतवोभौमारसाद्वृक्षमिवचेतिपरमोपमा॥२५॥ चक्राकारैरनुवर्तैंप्रसृतांप्रवहंतींसरिद्धरांगंगां॥ सरित्वातिमितिपाठेप्रसृतमितिपाठः॥२६.

दहनप्लावनादिना विलुलितशरीरात्मनो लतिकथनस्य प्रयोजनमाह । प्रकृतस्यमिति ॥ यथा अवनेस्थलं शरदि चरमवृष्ट्या धौतं संघःशोषितं च सत्सा द्रद्कालप्रसिद्धस्य पंकशैवलादिदूषितस्य शरीरस्य स्वाकारस्य विगमे प्रसन्नं निर्मलं च सत्स्य बहारिणां प्रकृतया त्रादिकार्ययोग्यं भवति तथा अस्य तत्शरीरमपि दहनप्लावनादिभावनाधौतं विकलुषं सत्प्रकृतं समाधिकार्यस्यं बभूवेत्यर्थः ॥ २७ ॥ पद्मासनबंधेन स्थितिं कृत्वा देहेंद्रियपंचकं दृढं बबंधा ॥ २८ ॥ स्वभावं स्वात्मानं स्वमनो वा ॥ २९ ॥ स्वभावमेव विशिनष्टि प्रशांतेति ॥ प्राणायामाभ्यासात्प्रशांताः प्राणादिवाता हरिणायस्मिन् ॥ आशा तृष्णा लोभ उत्कलिकाप्रतिक्षेप्यादिभेद प्रसिद्धेन गणेन बहिर्गमनशीलं

प्रकृतस्यं बभूवास्य तच्छरीरं द्विजन्मनः । प्रावृट्शरविगमे धौतं तलमिवावनेः ॥ २७ ॥ अथ पद्मासनगतः कृत्वा देहे स्थितिं दृढां । आलान इव मातंगं निबबंधेंद्रियपंचकं ॥ २८ ॥ निर्विकल्पसमाध्यर्थं व्यवसायमुपाददे ॥ स्वभावं स्वच्छतां नेतुं शरत्काल इवामलं ॥ २९ ॥ प्रशांतवातहरिणमाशारि गणगामिनं ॥ चिंतयाहृदयं निन्ये हृदाद्रज्जेव कीलकं ॥ ३० ॥ धावमानमधोमत्तं चित्तं विमलमाकुलं ॥ बलात्संरोधयामास सेतुर्जलमिवद्रुतं ॥ ३१ ॥

स्वभावं प्रशांतवातहरिणं कृत्वा स्वच्छतां नेतुं व्यवसायमुपाददे इति पूर्वेणान्वयः ॥ एवं कुर्वतो यद्वृत्तं तदाह चिंतयेति ॥ तस्य हृदयं मनः इर्षानुभूतगृहक्षेत्रपुत्रमित्रादिचिंतया निन्ये यथा अदृढनिखातमश्वादिबंधनकीलकं तदाकृष्टया रज्वा उत्खायापनीयते तद्वत् ॥ ३० ॥ तदा स यच्चकार तदाह ॥ धावमानमिति धावमानं चित्तं विवेकपौरुषबलाद्विमलं कृत्वा संरोधयामासेत्यर्थः ॥ द्रुतं द्रवणोन्मुखं जलं सेतुर्पालिरिव द्रुतं शीघ्रमिति वा ॥ ३१ ॥ 

ततः स किं चकार तदाह निमिमीलेति ॥ परस्परग्रथनात्सरितस्तु अभयतः पक्ष्मलानि पक्ष्मवंती च पक्ष्माणि ययोस्तथा विधे निस्पंदाभ्यां तारयाभ्यां कनीनिकाभ्यां मधुरे सुंदरे दृशौ अर्द्धं निमिमील निमीलनवान् अंबुजपक्षे निस्पंदौ तारे कनीनिके इव मधुरातःपिवतः इव इतिमधुरौ भ्रमरौ ययोस्ते ॥ ३२ ॥ तस्य प्रथमं राजयोगानुकूलं बाह्यप्राणापाननिरोधमाह सौम्यतामिति ॥ यथा चक्रवर्तिनो जन्मादिनिमित्तभूतः प्रशस्तः समयः जगच्छ्रेयसे स्वचेनायशेल्लमंघादिगुणं श्वसनं वायुं तज्ज्ञ न्मदेशे समंत्रि मितं नयति तद्वत् ॥ तथा चोक्तं भगवता प्राणापानौ समौ कृत्वा नासाभ्यंतरचारिणाविति ॥ ३३ ॥ तस्य प्रत्याहा-

निमिमील दृशावर्द्धं परिपक्ष्मलपक्ष्मके ॥ निस्पंदतारामधुरे संध्याकाल इवांबुजे ॥ ३२ ॥ सौम्यतामनयन्मौनी प्राणापानजवं सुखे । श्वसनं श्रेयसे देशे प्रशस्तः समयो यथा ॥ ३३ ॥ तिलेभ्य इव तैलानि पृथक्चक्रे प्रयत्नतः ॥ इंद्रियाणींद्रियार्थेभ्यः कूर्मोंगानीव गोपयन् ॥ ३४ ॥ बाह्यान्स्पर्शानशेषेण जहौ हरे स धीरधीः ॥ सहसा कुंडकच्छन्नो मणिर्हरत्विषो यथा ॥ ३५ ॥ विलीनानांतरांश्चक्रे स्पर्शानुज्झितदर्शनात् । रसान्विटपकोशस्थान्मार्गशीर्षे इव द्रुमः ॥ ३६ ॥ रुरोध गुदसंकोचान्नवद्वारानिलानथ मुखसंस्थगितः कुंभो रंध्रकोशानिवेतरान् ॥ ३७ ॥

रक्रमप्राह तिलेभ्य इत्यादिना इंद्रियाणीत्येतद्गोपयन्नित्यत्रापि संबध्यते ॥ ३४ ॥ प्रत्याहारफलमाह बाह्येति कुंडकेन अल्पच्छरेण छन्नः पिहितो मणिर्हरप्रसृतांस्त्विषो रश्मीन ॥ आंतरान्मनोवासनारूपान्स्पर्शान्विषयानधिष्ठानतत्त्वे आकर्षणेन बाधाद्विलीनांश्चक्रे ॥ ३६ ॥ पार्ष्णिनाम्नपादावष्टंभेन गुदसंकोचान्नवद्वारानिलान् हृदये रुरोध यथा अधोमुखं पूर्णकुंभो मुखे दृढं संस्थगितः पिहितोंतर्वायुप्रवेशं तरेण छिद्रांतरेभ्यो जलस्रवणयोग्यानितरान् रंध्रकोशान् रुणद्धि तद्वत् ॥ ३७ ॥

सात्मैवरत्नं तत्प्रकाशेन स्वात्मनो रत्नानां प्रकाशैश्च आर्द्धां रंजस्तमोभ्यामनावरणात्स्वच्छं ॥ प्रसन्नमुखपद्मकुसुमेन कल्पद्रुमकुसुमैश्चलांछितां यथा मेरुस्तथा बिभ्रत्स्वशृंगलक्षणां शिखां धारयति स्मेत्यर्थः ॥ ३८ धारणामाह बभारेति ॥ एकविषये धारणाध्यानसमाधयः संयमस्तत्प्राप्तिः आगतं उन्मुखं युक्तिभिः प्रत्याहारोपायैर्वशीकृतं ॥ ३९ ॥ धारणया चित्तप्रसादात्परिपूर्णात्तद्ध्यानविश्रांतिमाह शरन्नभोवदिति ॥ ४० ॥ ब्रह्माकारवृत्तिमयचित्तवृत्तिधाराविच्छेदिनो मध्ये मध्ये प्रतिभासमुपेयुषो विपरीतभावनाविकल्पौघान्दुधाव निरस्तवान् ॥ ४१ ॥ ४२ ॥ तम स्तमोगुणोद्रेकप्रयुक्तमंधकारं ॥ ४३

सात्मरत्नप्रकाशाढ्यां स्वच्छां कुसुमलांछितां ॥ दधारकंधरां धीरो मेरुः शृंगशिखामिव ॥ ३८ ॥ बभार हृदयाकाशे मनः संयमप्रागतं ॥ विंध्यखात इवोन्मत्तं गजं युक्तिवशीकृतं ॥ ३९ ॥ शरन्नभोवदामाद्यन्निर्मलामतिसौम्यतां ॥ जहार परिपूर्णाब्धेर्निर्वातस्याचलां श्रियं ॥ ४० ॥ दुधावातिविकल्पौघान् प्रतिभासमुपेयुषः ॥ पुरः परिस्फुरद्रूपान्मशकानिव मारुतः ॥ ४१ ॥ आगच्छतो यथाकामं प्रतिभातांस्तु नः पुनः ॥ आच्छिनन्मनसा शूरः खड्गेनेव रणे रिपून् ॥ ४२ ॥ विकल्पौघोपरान्ते सोऽपश्यद्धृदयांबरे ॥ तमश्छन्नविवेकार्कं लोलकज्जलकं ॥ ४४ ॥ तमस्युपरते कांतं तेजः पुंजं ददर्श सः ॥ शार्वरे तिमिरे शांते प्रातः संध्यामिवांबुजं ॥ ४५ ॥ तच्च तुलावत्सत्वलावण्यं वनं बाल इव द्विपः ॥ अपि वन्यापस्करे वैतालइव वेगतः ॥ ४६ ॥



२ सत्वगुणोद्रावनम्री मनसप्रज्ञा नो रितेन सीतं मनसा इयेणाविव स्वात्मर्यग्रा ४५ २

सत्वगुणोद्रावकन्यग्रसनतदनुरूपस्तेजः पुंजमस्तम्यास्मरित्याह तमसीति अंबुजंकर्त्तं उच्चदर्को पलक्षितं प्रातः संध्यामिव ॥ ४५ ॥ तत्किं तद्विरोधि रजो गुणाद्युद्रवेनलुलावने त्याह अपिवरिति ॥ अधिष्ठानतत्त्वदर्शनेन बाधादग्रसदित्यर्थः अस्मस्परं रक्तप्रवाहं तेन सौलोहितवर्णत्वं ॥ स्वगुपमा ॥ ४६ ॥



Dr BHAU DAJI
MEMORIAL
डाक्तर भाऊ दाजी स्मारक

---

रजसा समाधिध्यानाच्चालितस्य चित्तस्य विषयालाभेन विलयान्निद्रामज्जनमाह तेजसीति ॥ लोलं तरंगैर्निद्रानुकूलतमा आंदोलितं क्षीबो मदिरामत्तस्तद्वत् ॥ ४७ ॥ व्यालश्वेन भुजंगनागपर्याये राधिंतोगजो वालस्यते ॥ लुलाव विवेकप्रबोधेनेति भावः ॥ ४८ ॥ व्योम श्यामलं पश्यतीति व्योमश्यामल दृक्यदा सर्यातपर्य तुले व्योम्नि प्रसारित दृष्टिर्जंतुः कोशं दुर्वदरका भासमसरशिखंड कारान्विभावयति तद्वन्मनो नानावासना परिकल्पितरूपवद्व्योम भावयामासेत्यर्थः ॥ ४९ ॥ तापिच्छं तमालपुष्पं तद्विरक्ष्याशीर्यते श्यामतां चेन हातीति अच्छालस च्छस्वभावेन व्योमापि समाजी ॥ ५० ॥ मद्ढंकस्मलोपहृतं ॥ ५१ ॥ समाजं विशोध्यापनिन्ये ॥ ५२ ॥ कामपि वाचामगोचरां निर्विकल्प

तेजस्युपरते तस्य घूर्णमानं मनो मुनेः ॥ निशाभवदगान्निद्रां लोलं क्षीब इवैव वा ॥ ४७ ॥ मेघमालामिव मरुद्व्यालोनीला जिनीमिव ॥ यामिनीमिवतीक्ष्णांशुस्तामपास्य लुलाव सः ॥ ४८ ॥ निद्राव्यपगमे तस्य भावयामास तन्मनः ॥ व्योमश्यामलदृग्जंतुर्नभसीव शिखंडकान् ॥ ४९ ॥ पयोद इव तापिच्छंनीहारमिव मारुतः ॥ दीपस्तम इवाच्छालं तत्प्राशु समार्जसः ॥ ५० ॥ व्योमसंविदि नष्टायां मद्ढं तस्य मनो मनः ॥ निद्रायां तु विलीनायां ॥ मैरेयमदवानिव ॥ ५१ ॥ मोहमप्येष मनसस्तं ममार्ज महाशयः ॥ यामिनीजनितं जाड्यं भुवनादिव भास्करः ॥ ५२ ॥ ततस्तेजस्तमो निद्रामोहादिपरिवर्जितं ॥ काम प्यवस्थामोसाद्य विशश्राम मनः क्षणं ॥ ५३ ॥ विश्रम्याशु पपातांगसंविदं विश्वरूपिणीं ॥ सेतुस्कंदं सरो वारि प्रतीपस्वमिवास्पदं ॥ ५४ ॥

समाध्यवस्थां ॥ विशश्राम विश्रांतिं प्राप्त क्षणमल्पकालं ॥ ५३ ॥ विक्षेपसंस्कारप्राबल्यात्तत्र स्थैर्यं न प्राप्येत्याह विश्रम्येति अंगेति संबोधने ॥ विश्वरूपिणीं बाह्यप्रपंचसमाकारां वृत्तिसंविदं पपात प्रापेति यावत् प्राग्बाह्याक गदाकृष्य पूर्णात्मनि निरुद्धस्य पराप्रवृत्त्य पुनर्बाह्याकारपत्ताव नुरूपं दृष्टांतमाह सेतुस्विति यथासरो वारि कुल्याद्वारा केदारे प्रवेशितं केदारमार्गेऽर्थे तत्सेतुरुद्धं सत्कुल्याद्वारा परावृत्त्य प्रतीपं प्रतिकूलं सत्पुनः स्वास्पदं सरस्येव प्रविशति तद्वदित्यर्थः ५४

वास्वसंविदः प्राक्स्वपुनः स्वसंविदंप्रतिनीयमानस्य अंतराले सविकल्पकसमाधिप्राप्तिमाह चिरेति॥ प्राक्ध्यानादिना चिरानुसंधानवशात्समाधौ आनंदानुभवेन स्वदनाच्च हेतोस्त
त्संस्कारेण पुनस्तत्रारुह्यमाणं मनस्ततः अंतराले चिन्मयतां चिरस्फुरत्सविकल्पसमाधिस्वरूपतां आगात्॥ यथा हेमरेणावलमत्ता नुरूपां न स्फुरतां याति तद्वदित्यर्थः॥५५॥ च
एवं सविकल्पसमाधिनाक्रमेण निरिंधनाग्निवत्स्वक्षीयमाणां क्षीरोदकवद्विवेकस्य जगामेत्याह चित्तत्वमिति॥ चित्तं स्वीयं चित्तत्वं संत्यज्य चिरेवय ... त्वीतद्भा
वगतं संस्थानवस्थातो न्यदेव बभूव॥ यथा कुंभस्थितः पंकिलजलपंको जलशोषे कुंभभावमिवागच्छति तद्वदित्यर्थः॥५६॥ चित्तस्य चितिभावापन्नतत्प्र
तिबिंबचैतन्यस्य बिंबचित्सामान्यैक्यं दर्शयति चेत्यमिति॥ चेत्यं स्वभावं भास्यं दृश्याकारं संत्यज्य प्रतिबिंबचिच्छुद्धा सती सर्वदृक्तिसाधारणसाक्षिचित्सामा

चिरानुसंधानवशात्स्वादनाच्च स्वसंविदः॥ ततश्चिन्मयतामागाद्धेमन्त स्फुरतामिव॥५५॥ चित्तत्वमथ संत्यज्य चित्तं चित्त्वतां गतं॥ अन्यदे
व बभूवाशु पंकः कुंभस्थितो यथा॥५६॥ चेत्यं संत्यज्य चिच्छुद्धा चित्सामान्यमथाययौ॥ त्यक्तवीच्यादिभेदो ब्धिर्वा सामान्य
मिवैकधीः॥ ५७॥ त्यक्तमस्तो घमननं ततो विश्वंभरं महत्॥ चिदाकाशं ततः शुद्धं सोभवद्बोधमागतः॥ ५८॥ तत्र प्राप्य
थानंदं दृश्यदर्शनवर्जितं॥ अनंतमुत्तमास्वादं रसायनमिवार्णवं॥ ५९॥

न्यभावमुपाययौ यतः सा एकधीः एकरसीभूता स्वोपाधिवृत्तिर्यस्यास्तथाविधेत्यर्थः॥५७॥ एवं निर्विकल्पसमाधिप्रतिष्ठितस्योद्दालकस्य तत्परिपाकात्तत्व
साक्षात्कारं तत्फलं ब्रह्मवेद ब्रह्मैव भवतीति श्रुतिदर्शितं ब्रह्मभावं च दर्शयति त्यक्तेति॥ ततस्तदनंतरं स उद्दालकस्तत्समाद्दृष्टसमाधेर्बोधं तत्त्वसाक्षात्कारमागतः स
न्विश्वंभरं सर्वजगदधिष्ठानं त्यक्तभूतो घमननं द्वैतप्रतिभासरहितं शुद्धं महच्चिदाकाशमभवत्॥५८॥ तद्भावस्य निरतिशयानंदावाप्तिरिति दर्शयति तत्रेति॥ उ
त्तमैर्ब्रह्मादिभिरास्वाद्यत इत्युत्तमास्वादं रसानां सर्वविषयसुखकणानां अयनं आधारभूतमर्णवमिव स्थितं॥ ५९॥ 

तामेव दशां वर्णयति शरीरादित्यादिना॥ शरीरात्सम्यगवगत्य इतः निर्गत इव शोषित इति यावत्॥ ६०॥ उडुपश्चंद्रः॥ ६१॥ एवं वृष्टः पश्चाच्छरदि स्तब्धः निर्गतजलश्चयो बुदस्तत्स
दृशस्थितिः॥ ६२॥ तत्सहारूढो ब्रह्मलोकं तत्सिद्धिगणान्॥ पारणाते न प्रार्थयतीपि कटाक्षेणापि न पश्यतीत्येतद्दर्शयति अथेत्यादिना॥ ६३॥ ६४॥ ६५॥ आनंदस्य मंदिरे
तस्मिंस्तादृशसमाधौ॥ उत्तरायणधारे दिक्तटे अर्क इव परायणं॥ ६६॥ ततस्तत उत्तरोत्तरोत्कृष्टं स स्वभूमिका प्रतिष्ठां सुरा देवाः सिद्धाः देवयोनिभेदाः॥ साध्याः गणदेवताः सु

शरीरात्सम्भवेतोसौ कामप्यवनिमागतः॥ सद्यःसामान्यरूपात्मा बभूवानंदसागरः॥ ६०॥ द्विजचेतनहंसोसावानंदसरसि स्थितः
अतिष्ठच्छरदच्छे खे कलापूर्णइवोडुपः॥ ६१॥ बभूवावातदीपाभो लिपिकर्मार्पितोपमः॥ वीतवीच्यम्बुधिप्रख्यो दृष्टभूकाम्बुदस्थि
तिः॥ ६२॥ अथ तस्मिन्महालोके तिष्ठन्नुद्दालकश्चिरं॥ अपश्यद्व्योमगान्सिद्धानमरानपि भूरिशः॥ ६३॥ आगतानि विचित्राणि
सिद्धिजालानि चाभितः॥ शक्रार्कपदहर्तॄणि नीरं धाराणप्सरोगणैः॥ ६४॥ तानि नादरयांचक्रे सिद्धिवृंदानि स द्विजः॥ गंभीरम
तिरक्षुब्धो विलासानिव शैशवान्॥ ६५॥ सिद्धिसार्थमनादृत्य तस्मिन्नानंदमंदिरे॥ अतिष्ठद्दष्टपरमा सादिक्तटे अर्क इवोत्तरे
॥६६॥ जीवन्मुक्तपदं तत्र यावत्संप्राप्तवान्द्विजः॥ तत्र सिद्धाः सुराः साध्याः स्थिता ब्रह्महरादयः॥ ६७॥ आनंदे परिणामित्वा
न्नानंदपदं गतः नानंदेन निरानंदे ततस्तत्संविदाबभौ॥ ६८॥ क्षणं वर्षसहस्रं वा तत्र लब्ध्वा स्थितिं मनः॥ रतिमेति न भोगौघे दृष्टस्वर्ग इवावनौ॥ ६९॥

रैम्भस्तेषां पृथग्ग्रहणं गोबलीवर्दन्यायेन॥ ६७॥ तस्मिंश्चानंदे रसास्वादलक्षणचित्तपरिणामशून्यत्वान्न विद्यते आनंदो ऽस्येति व्युत्पत्त्या नानंदपदं गतः प्राप्तः
ततस्तस्माद्धेतोस्तत्स्वसंविदात्मचैतन्यं न विषयिणामिव क्षुद्रानंदे बभौ नापि निरानंदे दुःखे किं तु स्वप्रकाशैकरसपूर्णवत्स्थिरस्तदित्यर्थः॥ ६८॥ तस्मात्सोन्यपुनः क्षुद्रानंदस्पृही
द्रव इत्याह क्षणमिति॥ दृष्टस्वर्गो अनुभूतस्वर्गविभवः पुरुषः अवनौ भूलोकसुखे॥ ६९॥

वा॰टी॰उप॰
१६७

तदेव सर्वोत्कृष्टमिति वर्णयति तदित्यादिना ॥ ७० ॥ ७१ ॥ श्रवणमननसमाधिपरिष्कृता चित्तादामाद्य अपरोक्षतया प्राप्य विनादि पठेद्विचारितशास्त्रात् ॥ ७२ ॥ बुद्धं चित्तं दृश्यदर्शांसमाधिव्युत्थानदशांस्पाभिन्नुत्याः न्तरं प्रजिकदर्शात् परेषां महतः प्रयत्नाद्बोधमाया जिषष्ठ्यस्मिकायां नायात्येव सप्तमस्मिकायां ॥ ७३ ॥ अंभोदकोशान्नीहारपटलात् नभो चैत्रे ॥ ७४ ॥ प्राग्दृष्ट एव रमणीं द्युविमानपरंपरां च पुनर्ददर्शेति परेणान्वयः ॥ ७५ ॥ गौरमंदाररेणुच्छन्नाः भ्रमराश्चामराश्च यासां स्फुरंति पताकापटलानि यास्विति विमानवाणोविशेषणे ॥ ७ ॥ विद्याधरपत्नीनपि ददर्शेत्यनुकृष्यते ॥ ७७ ॥ ते वैमानिका मुनयश्च तमुद्दालकमूचुर्हे भगवन्तः अस्मत्प्रणामादरं नानुग्रहदृशा अवलोकय ७८ सहि आगच्छ स्वर्गस्यानुपेक्षायां हेतुमाहुः स्वर्ग एवेति ७९

तत्पदं सा गतिः शांता तच्छ्रेयः शाश्वतं शिवं ॥ तत्र विश्रांतिमासाद्य भूयो नो बाधते भ्रमः ॥ ७० ॥ तत्परं साधवः प्राप्य दृश्यदृष्टिमिमां पुनः ॥ नायांति खदिरोद्यानं लब्ध्वा चैत्ररथादिव ॥ ७१ ॥ तां महानंदपदवीं चित्तादामाद्य देहिनः ॥ दृश्यं न बहु मन्यंते राजानो दीनतामिव ॥ ७२ ॥ चेतस्तत्पदविश्रांतं बुद्धं दृश्यदशां प्रति ॥ कदर्थाद्बोधमायाति नायात्येवाथवानघ ॥ ७३ ॥ उद्दालकोत्र पदमासाद्य हरोत्थारितसिद्धिभूः ॥ उषितो निमिषितो मोदकोशादर्कोमधाविव ॥ ७४ ॥ ददर्श संप्रबुद्धात्मा पुनः परमतेजसः ॥ प्रणामलालसाः स्निग्धाश्चंद्रबिंबवपुर्द्युराः ॥ ७५ ॥ रमणीर्गौरमंदाररेणुभ्रमरचामराः ॥ स्फुरत्पताकपटला द्युविमानपरंपराः ॥ ७६ ॥ अस्मदादीन्मुनीन्दर्भपवित्रांककरांबुजान् ॥ विद्याधरीभिर्वलितान्विद्याधरपतीनपि ॥ ७७ ॥ ते तमूचुर्महात्मानमुद्दालकमुनिं तथा ॥ प्रसादेन प्रणामान्नो भगवन्नवलोकय ॥ ७८ ॥ आरुह्येदं विमानं त्वमेहि त्रैविष्टपं पुरं ॥ स्वर्ग एव हि सीमांतो जगत्सु भोगसंपदां ॥ ७९ ॥

राम॰
१६७

---

आकल्पं द्विपरार्धावसानांतकालं अनेनैव सर्वेषां तपःक्लेशादिसार्थक्यमित्याहुः स्वर्गादीति ॥ ८० ॥ ८१ ॥ धर्मार्थयोः फलत्वात्सारः ॥ ८२ ॥ गतसंभ्रमं मिथ्यात्वादिनिश्चयाद्विगतकुतूहलं यथा स्यात्तथा आतिष्ठत् ॥ ८३ ॥ स्वव्यापारः समाधिस्तत्परोऽभवत् ॥ ८४ ॥ उपास्य चिरमतीक्षा प्रणामप्रशंसादिनोपक्रम्य ॥ ८५ ॥ ८६ ॥ ८७ ॥ संभ्रमपरं यथा स्यात्तथा अवसत् ध्यानलीलये त्यनेन ध्यानमपि तस्य लीलयैव तेनापि न तस्य साध्यमस्तीति सूचितं ॥ ८८ ॥ ध्यानासक्तः समारूढः ॥ ८९ ॥

आकल्पमुचितान्भुंक्ष्व भोगानभिमतान्विभो ॥ स्वर्गादिफलभोगार्थमेवाशेषतपःक्रियाः ॥ ८० ॥ हारचामरधारिण्यो विद्याधरवरांगनाः ॥ पश्येमास्त्वामुपासीनाः करिण्यः करिणं यथा ॥ ८१ ॥ कामो धर्मार्थयोः सारः सुयोषितः ॥ वसंत इव सर्वजयः स्वर्ग एव मतं तिताः ॥ ८२ ॥ एवं कथयतः सर्वानतिथीनित्यसौ मुनिः ॥ परिपूज्य यथान्यायमतिष्ठद्गतसंभ्रमं ॥ ८३ ॥ नाभ्यनंदन्न तत्याज तांविस्मृतिं स धीरधीः ॥ मोक्षिद्वा प्रजनते त्युक्त्वा स्वव्यापारपरोऽभवत् ॥ ८४ ॥ अथ स्वधर्मनिरतं भोगेष्वरतिमागतं तमुपास्य ययुः सिद्धादिनैः कतिपयैः स्वयं ॥ ८५ ॥ जीवन्मुक्तः स च मुनिर्विजहार यथासुखं ॥ यावदिच्छं वनांते षु मुनीनामाश्रमेषु च ॥ ८६ ॥ मेरुमंदारकैलासहिमवद्विंध्यसानुषु ॥ द्वीपोपवननदीकुंजजंगलारण्यभूमिषु ॥ ८७ ॥ ततः प्रभृति संप्राप्य उद्दालको द्विजः ॥ गुहासु गिरिकुक्षीणामवसद्ध्यानलीलया ॥ ८८ ॥ कदाचिद्व्यासेन कदाचिद्वत्सरेण च ॥ कदाचिद्वत्सरौघेन ध्यानासक्तोऽन्वबुध्यत ॥ ८९ ॥ उद्दालकस्तदारभ्य व्यवहारपरोऽपि सन् ॥ सुसमाहित एवासौ चित्तत्वैकत्वमागतः ॥ ९० ॥ चित्तत्वैकमयाभ्यासान्महाचित्तमुपेत्य सः ॥ बभूव सर्वत्र सम

व्यवहारकालेपि सुसमाहित एव नाज्ञवद्विक्षेपवानित्यर्थः ॥ ९० ॥ चित्तत्वं अंतःकरणात् दृश्यानुगततत्साक्षिचिन्मात्रं तेजः सौरमिवावनौ ॥ ९१ ॥

त्वं तस्यैव चिच्चमदर्शनधारणालक्षणात्समाधिरूढाभ्यासात्महाचित्तमपरिच्छिन्नचिद्भावं सर्वत्र सर्वस्य तेषु स्वेहहेपवर्जनात् कारुण्यादिविषमनसमावदर्शनात्सम इत्यः

[illegible]

अथास्य सप्तमभूमिकाविश्रान्तिं दर्शयति चित्सामान्येति । सर्वथा दृश्यस्य तत्संस्कारस्य चोच्छेदे तत्र तथारूपत्वलक्षणचित्त्वव्यवहारस्याप्यपरमात्मस्वप्रकाशनिरतिशयानंदसन्मात्रपरिशेषात्सत्तासामान्यं स्वरूपं प्राप्य चित्ररविवद्दश्यिन्दृश्ये सति स्थितोऽस्तं सः समुत्थाय तान्येवानुविनश्यति न प्रत्यग्ज्ञानानीत्यादिश्रुतिदर्शितमाविर्भावतिरोभावलक्षणमस्तमयमुदयं च नायातं तद्वीजाविद्याकर्मवासनानामत्यंतोच्छेदादिति भावः ॥७२॥ सत्तामेव स्थितिं प्रपंचयन्नुपसंहरति शमेति । सर्वविक्षेपोपशमान्निरतिशयानंदरूपपरपदलाभप्राप्त्या सम्यक् शांतं गलितं मनो यस्य अत एव सर्वकर्मबीजक्षयात् गलितास्तज्जननपाशाः क्षीणाः संदेहदोला यस्य । यश्च तथाविधः स नु शरदि खमिव शांतं प्रशांताऽविद्यामेघाडंबरं व्याततमपरिच्छिन्नं । अत एव निरंकुशत्वाद्धत्वान्निरतिशयसत्तास्फूर्तिसुखोत्कर्षादूर्जितं

चित्सामान्यचिराभ्यासात्सत्तासामान्यमेत्य सः ॥ दृश्ये स्थितौ चित्ररविवन्नास्तमायान्न चोदयं ॥७२॥ शमपरपरलाभप्राप्तिसंशांतचेताः गलितजननपाशः क्षीणसंदेहदोलः । शरदि खमिव शांतं व्याततं चोर्जितं च स्फुटममलमचोऽस्तद्वपुः संबभार ॥७३॥ मोक्षोपायेषु उपशमप्रकरणे उद्दालकविश्रान्तिः सर्गः ५४ ॥ श्रीराम उवाच ॥ आत्मज्ञानदिनैकार्क मत्संशयतृणानल ॥ अज्ञानदाहशीतांशो सत्तासामान्यमीशकिम् ॥१॥

निरावरणत्वात्स्फुटं प्राक्तनदशाया अत्यंतविस्मरणादचेतस्तद्विलक्षणभावापन्नं वपुः स्वरूपं संबभार न प्राणिवोद्दालकवपुरित्यर्थः ॥७३॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे चतुःपंचाशः सर्गः ॥५४॥ सत्तासामान्यलक्ष्मास्य युक्त्यादेहोऽस्त्यनक्रमः ॥ त्यक्तदेहेन लिंगं खिन्या भूपाल्ले लिङ्ग्य वर्ण्यते ॥ मुमुक्षुभिः प्रसाद्यरामश्चरमपर्यायोक्तसत्तासामान्यलक्षणं जिज्ञासमानः पृच्छति आत्मज्ञानेति । अज्ञानप्रयुक्ततापत्रयलक्षणस्य दाहस्य संतापस्य शीतांशो । अज्ञानांधकारोच्छेदे तत्प्रयुक्तसंशयविपर्ययाद्युच्छेदे तत्प्रयुक्तसर्वदुःखोच्छेदे च त्वमेव समर्थ इति विशेषणत्रयतात्पर्यार्थः । ईशेत्युक्तिर्गुरावीश्वरदृष्टिरेव सदा कार्या न साधारणबुद्धिरिति द्योतनाय ॥१॥



षष्ठभूमिकायां चिरकालमभ्यासेन रिक्तं चित्सामान्यस्वरूपमात्रं तस्य चेत्याभावस्यात्यंतभावनाच्चेत्यसंस्कारराणामात्यंतिकोच्छेदे सति यदा चित्तं संक्षीयते तदा सन्मात्रसत्ताभासतः सिध्यंती परिशिष्टचिदचिद्भ्यामनुगतसत्तैव सत्तासामान्यमित्यर्थः ॥२॥ सर्वदृश्यिप्रति बिंबितो चित्तस्य दृश्यबाधेन चेत्यांशेन कृतद्विपथैः रहिता सती यदात्मा तमनिर्विकल्पचैतन्ये लीयते तदा तस्य विबसस्य असद्रूपं यस्मिंस्तदसद्रूपमाकाशंस्तद्रूपत्वच्छ सत्तासामान्यताबोध्येत्यर्थः ॥३॥ चेतश्चित्तं दृश्यमिव्यकारवंड चैतन्यं ॥४॥ यदा सर्वाणि भूतानि स्वपारमार्थिकरूपेणास्वरूपमेव आभासप्रथा नान्या तथाविधं सत्तासामान्यात्मकं वेदनं चिन्मात्रं भवतीति शेषः ॥५॥ अभावितानि भावनप्रयत्नं विनैव सहजदृशेत्यर्थः ॥६॥

श्रीवसिष्ठ उवाच ॥ यदा संक्षीयते चित्तमभावात्यंतभावनात् ॥ चित्सामान्यस्वरूपस्य सत्तासामान्यता तदा ॥२॥ सर्वं चेत्यांशरहिता चिद्यदात्मनि लीयते ॥ असद्रूपवदस्त्यच्छा सत्तासामान्यता तदा ॥३॥ यदा सर्वमिदं किं चित्सबाह्याभ्यंतरात्मकं ॥ अपलपय संचेतः सत्तासामान्यता तदा ॥४॥ यदा सर्वाणि भूतानि सत्तासामान्यवेदनं ॥ स्वरूपेण स्वरूपाभं सत्तासामान्यता तदा ॥५॥ दृष्टिरेषा हि परमा सदेहादेहयोः सदा ॥ मुक्तयोः संभवत्येषा तुर्यातीतपदोपमा ॥७॥ कूर्मांगानीव दृश्यानि लीयंते स्वात्मनात्मनि ॥ अभावितान्येव यदा सत्तासामान्यता तदा ॥६॥ व्युत्थितस्य भवत्येषा समाधिस्थस्य चानघ ॥ ज्ञस्य केवलमज्ञस्य न भवत्येव बोधजा ॥८॥ अस्यां दृशि स्थिताः सर्वे जीवन्मुक्ता महाशयाः ॥ विहारसारा इव भुवि व्योमवीथ्यामिवानिलाः ॥९॥ एषा सप्तमभूमिकारूढदृष्टिर्यतस्तुर्यातीतपदोपमा अतः सदेहादेहमुक्तयोः समानस्वरूपस्थितौ विशेषो नास्तीत्यर्थः ॥७॥ सेयं दृष्टिः पंचमादिभूमिकासु विसमाधिस्थस्य भवति सप्तमभूमिकारूढस्य तु व्युत्थितस्यापि केवलमज्ञस्य न भवत्येवेत्यर्थः ॥ सर्वेऽपि जीवन्मुक्ताः अस्यां दृशि स्थिताः संतः भुवि विहारसाराः पारदारयद्वव्योमवीथ्यामनिलाइवचरंति कामुष्मिकभोगतत्साराजो मिरस्य सामिष्ठंतीत्यर्थः ॥९॥

तानेवोत्तरत्यति अस्य त्वम्स्तयोमुदिनारराद्या व्योमवीथ्यां ब्रह्मसाद्याः तदूर्ध्वलोके स्थिता इत्यर्थः॥ १०॥ यावदिदं यावत्प्रारब्धक्षयं॥ ११॥ निश्चलादृढा॥ १२॥ चिंतितवानचिंतितार्थं दृढनिश्चयवान्सन्॥ १३॥ मात्रास्पर्शान् शब्दस्पर्शादिगोचरवृत्तीः विचिन्वानः बराणि चैककशः उपसंहत्य हृदि निवेशयन्॥ हृदि निविष्टानां चतेषां परमार्थरूपः भावितः स्वांगमिवस्वात्मनैकीकृतश्चिद्रूपो घनः सैंधवघनवदेकरसो येन॥ १४॥ समसंस्थानार्कधराकंठो यस्य॥ तालुमूलतले आलग्नेन कंठच्छिद्रैकपाटवाग्निवेशितेन जिह्वामूलेन उन्नतमिवलम्बसुखं यस्य॥ १५॥ अर्थरूपादिविषयेन संयोजितमनोदृष्टी येन प्राणादिप्रवाहाणां संरोधेन समस्तक्रियाहृतदेहमनःकरणं यो चल्यश्रू

अस्मत्स्वम्स्तयः सर्वेनारदाद्याश्च राघव॥ ब्रह्मविष्ण्वीश्वराद्याश्च दशावस्थां व्यवस्थिताः॥ १०॥ एतामालंब्य पदवीं समस्तभयनाशिनीं
उद्दालको मावमस्थावदिदं जगद्गृहे॥ ११॥ अथ कालेन बहुना बुद्धिमान्स महामनाः॥ विदेहमुक्ततामेमि देहं त्यक्त्वेति निश्चला॥ १२॥
एवं चिंतितवानद्रिगुहायां पद्मवासने॥ बद्धपद्मासनस्तस्थावर्धोन्मीलितलोचनः॥ १३॥ संयम्य गुदसंरोधात् द्वाराणि नव चेतसः॥ मात्रास्प
र्शान्विचिन्वानो भावितस्वांगचिद्घनः॥ १४॥ संरुद्धप्राणपवनः समसंस्थानकंधरः॥ तालुमूलतलालग्नजिह्वामूलोन्नतस्थिरः॥ १५॥ न
बहिर्नांतरे नाधो नोर्ध्वं नार्थेन शून्यके॥ संयोजितमनोदृष्टिर्दंतैर्दंतानसंस्पृशन्॥ १६॥ प्राणप्रवाहसंरोधसमः स्वच्छाननच्छविः॥ अंगवि
त्तिविदुत्तानरोमकंटकितांगम्स्ः॥ १७॥ अंगचित्तविदाभ्यासाच्चित्सामान्यमुपाददे॥ तदभ्यासादवापांतरानंदस्यंदमुत्तमं॥ १८॥

न्यः स्वच्छाननच्छविः प्रसन्नवदनः॥ १६॥ अंगेति संबोधने वित्तिविदा चिद्रूप ब्रह्मानंदानुभवेन उत्तानैः ऊर्ध्वर्जुभिः रोमभिः कंटकिता संजातकंटका अंगम्स्र्यस्य॥ १७॥ तस्यानंदविर्भावे एवोक्तमेवक्रममाह॥ अंगेति॥ अंगेषु अंतःकरणैकदेशम्स्तद्वृत्तिभेदेषु प्रतिबिंबिता चित्॥ अवच्छिन्ना संविदाच्चस्योपाधिम्स्तद्वृत्तिभेदानां विलयाभ्यासाद्धिं वम्स 
तचित्सामान्यमुपाददे प्रविवेश॥ बिंबम्स्तचिन्मात्रात्मसंधानाभ्यासाच्च अंतरुदितमसर्वोत्कृष्टमानंदस्पंदं अवापअनुबभूवेत्यर्थः॥ १८॥

तस्य सर्ववस्तुसत्तासामान्यानुप्रवेशमाह तदास्वादनतइतिया वन्निरतिशयानंदास्वादनं तावदेव चित्तं निरोधक्लेशमपेक्षते जया बहिः प्रवर्तते आस्वादितेत्वानंदे तत्रैव गुडपिपीलिकान्यायेनासक्तं स्वरूपमपि विस्मृत्य सत्तानुगतं चित्सामान्यं निरतिशयस्वप्रकाशसत्तासामान्यभावं नयति सएव चित्सामान्यदशाक्रमस्य लयम्स्तस्य सत्तासामान्यप्राप्तिश्चेतिभावः॥ १९॥ तथैव तस्या पुनरावर्तिनी स्थितिमाह तस्यामिति सममेभ्योपि समः आत्यंतिकविक्षेपवैषम्यशून्य आभोगः स्वरूपं यस्या॥ नविद्यंते आनंदाः स्मायस्य तथाविधानंदेन प्रसन्नतमत्वात् मुग्धेभ्यः सुंदरेभ्योपि [illegible] मुग्धा सुखद्युतिर्यस्य तथाविधः सन्॥ २०॥ आनंदाविर्भावलिंगरोमांचादीनामपि क्रमाद्

तदास्वादनतो लीनाचित्सामान्यदशाक्रमं॥ विश्वंभरमनंतात्म सत्तासामान्यमाययौ॥ १९॥ तस्यां सममसमाभोगः परां विश्रांतिमागतः॥ अना
उ॰४२ नंदसमानंदमुग्धमुखद्युतिः॥ २०॥ संशांतानंदपुलकः परं प्राप्यामलं गतः॥ चिरकालपरिक्षीणमननादिभवभ्रमः॥ २१॥ बभू
वसमहासत्त्वो लिपिकर्मार्पितोपमः॥ समः कलावपूर्णेन शरदभ्रांबरेंदुना॥ २२॥ उपशांतमशनैर्दिवसैः सौकतिपयैः स्वपदे विमला
त्मनि॥ तरुरसः शरदं तदिवामलेर विकरो जमिजन्मदशातिगः॥ २३॥ गतसकलविकल्पो निर्विकारो भिरामः सकलमलविलासोपा
धिनिर्मुक्तमूर्तिः॥ विगलितसुखमाद्यं तत्सुखं प्राप यस्मिंस्तृणमिव जलराशावृह्यते शक्रलक्ष्मीः॥ २४॥

परमप्राहसंशांतेति॥ जीवन्मुक्तपदं प्राप्य प्रारब्धभोगहेतुमलशेषक्षयात् अमलं गतः सन्॥ २१॥ कलाभिरपूर्णेन॥ २२॥ नतस्य प्राणा उत्क्रामंत्यत्रैव समवलीयंते इति श्रुत्युक्तरीत्या तत्रैव तत्प्राणानां तच्छरीरकौश्चल्यवच्च क्रमादुपशममपि मेत्याह उपशांतमेति॥ शरदं ते हेमंते तरुर्णां रसः रविकरैः जमीव विमले स्वपदे नुपशांतम २३॥ प्राणाद्युपशमे परिशिष्टं तत्स्वरूपं वर्णयति गतेत्यादिना॥ अग्निविस्फुलिंगवत्स्वात्मरूपाधिभिर्विगलितानि निःसृतानि हैरण्यगर्भांतविषयसुखानि यस्मात्तत्तथाविधं आद्यं तद्ब्रह्म वाङ्मनसगोचरं सुखं प्राप यस्मिन् प्रविशक्रलक्ष्मीः अब्धौ तृणमिव ऊह्यते तर्क्यतेवात् दृष्टिभिरित्यर्थः॥ २४॥

वा॰टी॰उप॰
१४०

असौ ब्राह्मण उद्दालकः प्रतिब्रह्मांडभेदात्परिमितान्यनंतानि नभांसि अंतःस्वोदरे व्याप्नुवंतीति यादिशस्ता अपि व्याप्नुं शीलमस्य अनेन देशकृतपरिच्छेदनिरासः सर्वदा सर्ववस्तुपूरणं सर्ववस्त्वाधारभुवनानां भरणं धारणं पोषणं च शीलं यस्य अनेन सर्वाधिष्ठानतो वस्तुकृतभेदनिरासः भूरिभिर्भव्यैर्भोग्यैरुत्तमजनैश्चोपसेव्यं कथनेन गुणेन वा प्रवृत्तिनिमित्तधर्मान् अतीतं अनंतमाद्यं कालकृतपरिच्छेदहीनं सत्यं सत्त्वादिलक्षणं आनंदयति सुखैकरसीकरोति स्वविलसितैरानंदं परमाद्यं परमसुखं बभूवेत्यर्थः २५ अथ तच्चेतसि जीवे स्वच्छभावं निर्मलस्वरूपं आद्यं परं गतवति प्राप्तवति तस्य हि जस्य तनुः शरीरं तत्रोपविष्टे वसती षड्भिर्मासैः रविकरैः परितप्ता शुष्का सती प्रवहद्वातध्वनजैर्भांकारैः क्वणितैः रम्या तनुतरूणां बालवृक्षाणां भुजानां वादनयोग्याभिः शिरातंत्रीभिः शैलस्य पर्वतस्य वीणेव विलासहे

अपरिमितनभोंतर्व्यापि दिग्व्यापि पूर्णं भुवनभरराशीलं भूरिभव्योपसेव्यं । कथनगुणमतीतं सत्यमानंदमाद्यं परमसुखमनंतं ब्राह्मणोसौ बभूव ॥ २५ ॥ गतवति परमाद्यं चेतसि स्वच्छभावं हि जतनुरथ मासैः सोपविष्टे वषड्भिः । रविकरपरितप्ता वातभांकाररम्या तनुतरुभुजतंत्री शैलवीणा बभूव ॥ २६ ॥ अथ बहुतरकाले नैतदद्देर्भुवं तामुपययुरथ कन्याः संयुता मातरः स्वाः । अभिमतफलसिद्ध्यै संयुताः स्वसर्वा अनलमिव शिखानां पंक्तयः पिंगकेश्यः ॥ २७ ॥ दिनकरकरशुष्कं विप्रकंकालकं तज्झटिति मुकुटकोटौ खट्वखट्वांगमध्ये । सकलविबुधवंद्या खिंखिनी देवदेवी निशिनवतरहृत्ता कांतकांतिं चकार ॥ २८ ॥

तुर्बभूवेत्युत्प्रेक्षा २६ अथ बहुतरकालेन षण्मासेनेति यावत् एतत्तत्संबंधि तामद्रेर्भुवं स्थानं मस्तालात् आ कन्याः संयुताः परस्परसहचारिता नियमात्सर्वाः संयुताः सदाभिलिताः स्वस्थिताः ब्राह्म्याद्या मातरः कस्यचिद्भक्तस्याभिमतफलसिद्धौ शिखानां ज्वालानां पंक्तयः अनलमिव ताः अद्रेर्भुवं उपययुः २७ तासां मातॄणां मध्ये निशि रात्रौ नवनवभूषावैचित्र्यान्नवतरा शिरःप्रभृति स्त्रां नियम्यास्ते आविधा सकलैः ब्रह्मादिभिर्विबुधैर्वंद्या देवानामपि देवी खिंखिनी चामुंडा दिनकरस्य करैः शुष्कं तं विप्रस्योद्दालकस्य कंकालं कंशवं झटिति खट्वखट्वांगयोर्मध्ये अंतरालस्थायां स्वमुकुटस्य किरीटस्य कोटौ कांतिं भूषणं च कारेत्यर्थः २८

यस्य भूषा दृष्टिकल्पितो मलमांसादिमयः स्थूलदेहो पि चित्रंजगद्धृष्टायादेव्याः शिरोभूषणतया सर्वोत्कर्षं प्राप्तस्तेन सर्वोत्कृष्टपदं प्राप्नमिति किं वाच्यमिति ज्ञानमाहात्म्योत्कर्षं दर्शयन्नाह इतीति उद्दालकस्य कुत्सितो देहो देहकं सुष्ठु विलसति विराजमानेन भास्वरवर्हाणां व्रजः समूहः तद्भूषणाः व्यालोलाः कंपमानाः अंचले वामे पदं तं डायस्मिन् नवैः प्रत्यग्रैर्मंदारमालागणैर्विवलिते वेष्टिते खिंखिणिकाख्यायामहत्याभगवत्याः लीलार्थेलज्जाभैरिशिरोभूषणमाल्येअंते पुष्पपटलानियस्य तथा विधे वेणीभ्रूलालसम्बन्ध्स्थतउपागच्छति लताजाले भृंग इव शोभते स्म विचित्रां प्रजाते इत्युत्प्रेक्षा २९ उक्तमुद्दालकाख्यानमुपसंहरन्नुत्सरीरशीलनप्रगणसमतापोपशमं परमपुरुषार्थफललाभं च दर्शयति सप्रपेति सर्वदृश्य विवेकस्फुरन्त्यः स्वानंदः प्रसवप्रविकासो भासी निकुसुमानि यस्य तथा विधा एषा दर्शितप्रकारा उद्दा

इत्युद्दालकदेहकं सुविलसन्भास्वरबार्हव्रजव्यालोलाञ्चलवेन्नवैर्विवलितेमंदारमालागणैः शोते खिंखिणिकामहाभगवतीलीलालल्लामे लताजालेभृंगइवोन्तपुष्पपटलेपश्चादुपागच्छति २९ एषोद्दालकचित्तवृत्तिकलनी वद्धी विवेकस्फुरत्स्वानंदप्रविकाशभासिकुसुमा हृत्काननेविस्तृता रूढा यस्य कदाचिदेव विहरन्नप्येवमेष्याययानासावेति वियोगमेतिसफलेनोच्चैस्तरां संगमं ३० मोक्षोपायेषूपशमप्रकरणे उद्दालकनिर्वाणं नाम

लकचित्तस्य वृत्तेर्विदेहकैवल्यप्राप्त्यंतफलत्वचरित्रस्य कलना आदरेण अंतर्याभ्यासशिक्षां तल्लक्षणा कल्पवल्ली वस्य हृत्काननेरूढा प्रारूढमूलास्ती उत्तरोत्तरभूमिकाधिरोहणाक्रमेणा विस्तृता असौ पुरुषस्ताकृत्यार्कर्म कुले व्यवहारे विहरन्नपि चरन्नपि मस्य शांतिर्निरस्यादिगुणावृभिणी तत्र एयानंतोपलक्षणया छायया अपि रणतोऽर्थेष्वप्रकारः कदाचिदपि वियोगं नैति न प्राप्नोत्येव किंच सपत्नैस्तरां सर्वोत्कृष्टतमेन मोक्षफलेन संगमं पुनरागतिरहितं स्वात्मभावेन संबंधं प्रतिप्राप्नोति सुवश्यं मा वक्री हृदि संगोपयि तारणीयेत्यर्थः ३० उपशमप्रकरणे पंचपंचाशः सर्गः ५५

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी स्मारक ग्रंथालय

वा.टी.उप.
१७१

निर्द्वंद्वसमाध्यादिभिः प्रबुद्धो ध्वस्तवासनः व्यवहारप्रसक्तोपि समाधिस्थ इतीर्यते अनेनउक्तप्रकारेण विचारवैराग्यसमाध्यभ्यासक्रमेण विहरन् १ शास्त्रश्रवणेन अर्थतत्त्वपरीक्षणेन गुरुवचनविश्वासेन स्वचित्तशोधनेन च सर्वदृश्यबाधेन परमपदविश्रांतिपर्यंतं अवश्यं विचारः कर्तव्य इति तात्पर्यार्थः २ ३ प्रज्ञास्वरूपमाह संप्रबोधवतीति प्राप्नोति प्रापयति ४ कश्चित्प्रबुद्धः व्यवहारपरोपि सन् जातसमाधिकइव विश्रांतइत्यन्वयः ५ ६ अंतःशीतलतारूपं कामनाज्ञानप्रतिष्ठाफलं

श्रीवसिष्ठउवाच क्रमेणानेन विहरन्विचार्यात्मानमात्मना॥ विश्रांतिमेहि विततेपदे पद्मदलेक्षण १ शास्त्रार्थगुरुचेतोभिस्तावद्धि चार्यते॥ सर्वदृश्यक्षयाभ्यासाद्यावदासाद्यतेपदं २ वैराग्याभ्यासशास्त्रार्थप्रज्ञागुरुपराक्रमैः॥ पदमासाद्यते पुण्यं प्रज्ञयैवैकयाथवा॥ ३ संप्रबोधवतीतीक्ष्णाकलंकरहितामतिः॥ सर्वसामग्र्यहीनापिपरं प्राप्नोतिशाश्वतं ४ श्रीरामउवाच भगवन्सर्तमध्येशकश्चिज्जातसमाधिकः प्रबुद्धइव विश्रांतो व्यवहारपरोपिसन् ५ कश्चिदेकांतमाश्रित्यसमाधिनियतस्थितः तयोस्तु कतरः श्रेयानितिमेभगवन्वद ६ श्रीवसिष्ठउवाच॥ इमं गुणसमाहारमनात्मत्वेनपश्यतः अंतःशीतलतायास्यसमाधिरिति कथ्यते॥ ७ दृश्यैर्मनसिसंबंधइति निश्चित्यशीतलः॥ कश्चित्संव्यवहारस्थः कश्चिद्ध्याने व्यवस्थितः॥ ८ द्वावेतौराम सुखितावंतश्चेत्परिशीतलौ अंतःशीतलतायास्यात्तदनंततपःफलं ९ समाधिस्थानकस्यस्यचेतश्चेद्वृत्तिचंचलं तत्तस्यतत्समाधानं सममुन्मत्ततांडवैः १० उन्मत्ततांडवस्थस्यचेतश्चेत्क्षीणवासनं तदस्योन्मत्तवृत्तं तत्तु संबुधसमाधिना ११

राम.
१७१

तद्ध्यानेविक्षेपप्रसक्त्यभावात्स्वैव समाधिरभिधीयत इत्यर्थः ७ मनसि सहितैर्दृश्यैर्विक्षेपहेतुभिः संबंधः स्यात् न तु मत्तइत्सीति निश्चित्येत्यर्थः दृश्यैर्मनसः संबंधइतिपाठस्तत्स्पष्टएव ८ ९ १० ११

अससंदेहं सर्वसंदेहोच्छेदि परमपदं गतौ तत्र प्रतिष्ठितौ चेत्यर्थः १२ व्यवहारिणि कर्तृत्वसत्त्वमुक्तो बंधः किं न स्यादत आह अकर्त्रिति प्रतनुवासनं निर्वासनं यथा कांतादिकथासंश्रवणे अन्यत्र प्रसक्तमनाः कुर्वन्नपि रागादिविकारानुदयात्तत्प्रयुक्तैर्दोषैर्न बध्यते तद्वदित्यर्थः १३ निःसंगान्योगानि देहावयवाय स्वतथाविधमपि सुप्तस्यमनः स्वप्नपाते तत्र स्थितौ च यथा कर्तृत्वं तद्वत् १४ निर्वृतिः सुखविश्रांतिः १५ ध्यानाध्याने समाध्यसमाधी तद्दृश्यौ अनंकुरं अंकुरवीजवासनाशून्यमिति यावत् १६ १७

व्यवहारीप्रबुद्धोयः प्रबुद्धोयोवनस्थितः॥ द्वावेतौसुसमौ नूनमसंदेहपदंगतौ॥ १२ अकर्तृकुर्वदप्येतच्चेतः प्रतनुवासनं॥ दूरंगतमनाजंतुः कथासंश्रवणेयथा १३ अकुर्वदपि कर्त्रैवचेतःप्रघनवासनं॥ निःसंगोगमपिस्वप्नेश्वभ्रपातस्थितादिव॥ १४ चेतसोयदकर्तृत्वंतत्समाधानमुत्तमं तद्विद्धि केवलीभावं साशुभा निर्वृतिः परा १५ चेतश्चलाचलत्वेनपरमं कारणं स्मृतं ध्यानाध्यानदशोस्तेन तद्वेदानंकुरंकुरु १६ आवासनं स्थिरं प्रोक्तं मनोध्यानं तदेवतु सएवकेवलीभावःशांतएवसदातरः॥ १७ तनुवासनमत्युच्चैः परायोपातसुप्यते अवासनेमनोकर्तृपदं तस्मादवाप्यते १८ घनवासनमेतत्तु चेतःकर्तृत्वभाजनं सर्वदुःखप्रदं तस्मात्वासनांतनुतांनयेत् १९ प्रशांतजगदास्थोंतर्वीतशोकभयैषणः स्वस्थोभवतियेनात्मासमाधिरितिस्मृतः २० चेतसासंपरित्यज्यसर्वभावात्मभावनां यथातिष्ठसितिष्ठत्वंतथाशैलेगृहेथवा २१ गृहमेवगृहस्थानांसुसमाहितचेतसां शांताहंकृतिदोषाणां विजनावननिर्मथः २२ आरण्यसरतनुवासनं चतुर्थ्यादिभूमिकासु क्षीयमाणवासनं आवासनेतुल्येसमाहितमनोदृशां भवतामिहमत्तानां मत्तानांमहत्तामिव २३

नं क्षीणवासनं पदं सप्तमभूमिकाप्रतिष्ठा १८ प्रशांताजगति देहादिदृश्ये आस्था अहं ममता भिनिवेशो यस्य स्वस्थः स्वरूपप्रतिष्ठः येन भवति २० सर्वेषु भावेषु आत्मभावनां अहं ममताध्यासं शैले समाहितः गृहे व्यवहरन् वा २१ २२ इह नित्यापरोक्षप्रत्यगात्मनि मत्तानां स्थितानां महतामाकाशादीनामिव २३

शांतचित्तमहात्मनस्य शरदाकाशकल्पस्येत्यर्थः ॥ २४ ॥ रागादिवृत्तिमत्ताचित्तेन मत्तस्य ॥ २५ ॥ व्युत्थितं रागादिविक्षिप्तं चित्तं नानाविधविषयभ्रमस्थाने लयेन पुनर्व्यु-
त्थानसहस्रबीजभूतां सुषुप्तां संपत्तिं निर्वाणं शांतरागादिवासनं तु चित्तं निर्वाणं मोक्षमेति ॥ २६ ॥ तर्हि प्राकृतवत् व्यवहार्यव्यवहारिणो सत्त्वविवेकत्वः समाधि-
रुक्तस्तत्राह सर्वेति ॥ तत्त्वविवेकमार्गे सर्वभावपदातीतं पश्यति व्यवहारे तु सर्वात्मकं पश्यत्येकपिंडमात्राहं मानाभावात्तस्य रागादिरिति न विक्षेपप्रसक्ति-
रिति भावः ॥ २७ ॥ उक्तमेवार्थं फलतो आह ईहितेति ॥ ईहितानीहिते रागद्वेषौ ॥ २८ ॥ कथं सर्वे भावाः समास्तद्दर्शयति सदात्मनेति ॥ तस्य मनः यथास्वप्ने तथा जा-

शांतचित्तमहात्मस्य जनजालोज्ज्वलान्यपि ॥ नगराण्यपि शून्यानि वनान्यवनिपात्मज ॥ २४ ॥ वृत्तिमच्चित्तमत्तस्य विजनान्यवनान्य-
पि ॥ नगराणि महालोकसंपूर्णानि परवीरहन् ॥ २५ ॥ व्युत्थितं चित्तमभ्येति भ्रमस्थाने सुषुप्ततां ॥ निर्वाणमेति निर्वाणं यथेच्छसि तथा
कुरु ॥ २६ ॥ सर्वभावपदातीतं सर्वभावात्मकं च वा ॥ यः पश्यति सदात्मानं स समाहित उच्यते ॥ २७ ॥ ईहितानीहिते क्षीणो यस्यांतर्वितता
कृते ॥ सर्वे भावाः समा यस्य स समाहित उच्यते ॥ २८ ॥ सदात्मना सदेवेदं जगत्पश्यति नो मनः ॥ यथा स्वप्ने तथैवास्मिन् जाग्रत्यपि जने-
श्वर ॥ २९ ॥ यथा विपणिकालोका विहरंतोप्यसत्समाः ॥ असंबंधात्तथा तस्य ग्रामोपि विपिनोपमः ॥ ३० ॥ अंतर्मुखमना नित्यं
सुप्तो बुद्धो व्रजन्नपि ॥ पुरं जनपदं ग्राममरण्यमिव पश्यति ॥ ३१ ॥ सर्वमाकाशतामेति नित्यमंतर्मुखस्थितेः ॥ सर्वथानुपयोग्यत्वाद्भू-
ताकुलमिदं जगत् ॥ ३२ ॥

ग्रत्यपि इदं दृश्यं सदात्मना सदेव पश्यति जगत्सद्व्यतिरिक्तरूपं नो पश्यतीत्यर्थः ॥ २९ ॥ नगराण्यपि शून्यानीति यदुक्तं तदुपपाद-
यति ॥ यथेति विपणिका पण्यवीथिका तत्र समवेता अपि बहवो जनाः स्वस्वकार्यव्यवहारं तोप्युदासीनस्यानुपकारित्वादसत्समा यद्वत् ॥ ३० ॥ ३१ ॥ भूतैः प्राणिभिः
पृथिव्यादिभिश्चाकुलमपि ध्यायितत्वादाकाशतां शून्यतां ॥ ३२ ॥



आजीवितस्थितेर्यावज्जीवं ॥ ३३ ॥ यस्मात् अंतर्वर्तत्या दर्शितं शीतलं वा चित्तं तदेव बहिर्जगदाकारेण स्थितमित्यर्थः ॥ ३४ ॥ तदेवाह द्यौरिति ॥ ३५ ॥ ३६ ॥ अध्यारोपदृ-
ष्ट्योक्ता अपवाददृष्ट्या आह न बहिष्ठमिति कथं तर्हि तत्र जगदाकारभानं तत्राह यदिति ॥ यद्वत् स्वप्ने गगनस्य नीलता यथा कचितं तथा तद्द्वैषेण परमार्थतत्त्वमेवोत्थितमित्य-
र्थः ॥ ३७ ॥ आत्मतत्त्वरूपं यत् अंतरं वस्तु तदेव बहिष्ठत्वेन जगत्तया भातीति तत्र दृष्टांतः कर्पूरादि सौरभे संकोचे प्रसृति प्रविकासि च भवति ॥ यथा संपुटांतस्थं कर्पूरं गंधरूपेण तथा

अंतःशीतलतायां तु लब्धायां शीतलं जगत् ॥ विज्वराणामिव नृणां भवत्याजीवितस्थितेः ॥ ३३ ॥ भवत्यखिलजंतूनां यदंतस्तद्बहिः स्थितं
अंतस्तृष्णोपतप्तानां दावदाहमयं जगत् ॥ ३४ ॥ द्यौः क्षमा वायुराकाशं पर्वताः सरितो दिशः ॥ अंतःकरणतत्त्वस्य भागा बहिरिव स्थिताः ॥ ३५ ॥
सं वटधानावटइव यदंतरात्मनः ॥ तद्बहिर्भासते भास्वद्विकारे पुष्पगंधवत् ॥ ३६ ॥ न बहिष्ठं न वांतस्थं क्वचित्किंचन विद्यते
यद्यथा कचितं चित्त्वात्तथा तत्समुत्थितं ॥ ३७ ॥ आत्मतत्त्वांतरं भाति बहिष्ठत्वेन जगत्तया ॥ कर्पूरमिव गंधेन संकोचे प्रवि-
कासि च ॥ ३८ ॥ आत्मैव स्फुरति स्फारं जगत्त्वेनाप्यहंतया ॥ बाह्यत्वेनांतरत्वेन सचनात्मनयात्मना ॥ ३९ ॥ बहिष्ठेनांतरं बा-
ह्यमंतस्थेनांतरं स्थितम् ॥ यथा विदितमात्मायं स्वचित्तमनुपश्यति ॥ ४० ॥

भाति भवतीत्यर्थः ॥ ३८ ॥ आत्मत्वस्फुरणाद्दृश्याहंकारादिरूपः नाविमान तद्दृश्य बाह्यस्थूलरूपः किंतु चिन्मात्रमयानुस्यूततन्मात्ररूप इत्यर्थः ॥ ३९ ॥
अतएवायमात्मा अंतरं स्वचित्तमेव यथाविदितं सर्ववेदनानुसारेण बहिष्ठेन बहिर्मुखेन चक्षुरादिना बाह्यं जगदाकारमनुपश्यति ॥ अंतःस्थेन जाग्रद्वा मनो-
वांतरं दृष्टिस्थितं स्वप्नराज्याद्यनुपश्यतीत्यर्थः ॥ ४० ॥

वा॰टी॰उप॰
१७२

नच हि खंनचांतस्थमितियदुक्तंतदुपपत्त्यानुभावयति सबाह्येति सबाह्याभ्यंतरं द्विविधमपि जगदुभयमनुस्यूतसदात्मनः सकाशाद्दीदितं पृथक्कृतं सत् असदेवेति शांतं सत्तमेवे
त्यर्थः तत्पृथक्करणाभावे तु तत्सन्मात्रैक्येनैव बाह्याभ्यंतरभेदे स्थिते सति तदहंममताध्यासाः तत्तद्भंगेस्फुरितभंगमयमेवेदित्यर्थः ४१ स्फुरितभंगमयमुपपादयति द्यौरि
ति तत्तदाधिभिरहंतात्मनो धूमूक्ष्मादिसर्वदेवस्कृतापत्त्यज्वालाज्वलितं सत् तथाविधः कल्पादिः प्रलयारंभसमय एव सदा संपद्यत इत्यर्थः ४२ सन्मात्रात्मदर्श
नेतु कर्मेंद्रियैर्व्यवहारेपि अभिमानाभावान्न हर्षशोकादिविक्षेपलेशस्यापि प्रसक्तिरिति सदा समाधिस्थतुल्यतैव फलतीत्याशयेनाह यस्त्वित्यादिना ४३ ४४ ए
वं पर्यंतस्वस्तिर परपर्यंतो नाशस्तद्रहितां सतां सम्यक् जनप्रसिद्धास्वहंममतादृष्टिषु ४५ किमर्थं हमतीति चेदहंममेति दृष्टिगोचरयोरभिमानाभिमंतव्यलक्ष

सबाह्याभ्यंतरं शांतमात्मनो मे दितं जगत् अहंत्वादिस्थितं मे देस्फुरितभंगमयं ततः ४१ द्यौः क्षमा वायुराकाशं पर्वताः सरितो दिशः कल्पादिरे
वज्ज्वलितं सर्वमाधिहतात्मनः ४२ यस्त्वात्मरतिरेवांतः कुर्वन्कर्मेंद्रियैः क्रियाः न वशो हर्षशोकाभ्यां स समाहित उच्यते ४३
यः सर्वगतमात्मानं पश्यन्सुप्रशांतधीः न शोचति ध्यायति वा स समाहित उच्यते ४४ सपूर्वापरपर्यंतां यः पश्यन्त्यागतीं गतिं दृष्टिस्थे
तां सुहसति स समाहित उच्यते ४५ समे परेपि नाहंता न जगज्जन्मनो मयि वीचिवृंदे विवात सा नाकाशे फलधातवः ४६

गयोरहंताजगतोराश्रयस्यैवासिद्ध्या मिथ्यात्वादित्याह समेइति तेहि सर्वानुभवसिद्धप्रत्यक्स्वभावेमयि शास्त्रातो श्रुतिसिद्धब्रह्मस्वभावे वानंतावन्मयि दृशो दृश्याश्रय
त्वायोगान्नापि परे ब्रह्मणि असंगद्रष्ट्रकूटस्थस्वस्वरूपे समेत स्मिन्नहंता जगज्जन्मादिवैषम्याधारत्वायोगात् यथा शरदातपसंभिन्नेषु दूराद्दृश्यमानेषु वीचिवृंदे
षु दृश्यमाना आतपाग्रंत सद्गुतरंगतमाया विस्फुरंती वुंतीस्ताकांतिर्न वीचिवृंदे संतरं गति समीपोपसर्पणे तेषु निमज्जनान्वेषणे चादर्शनात् नापि तदंतर्बहिष्ठे आकाशे असंग उप॰ १७३
कूटस्थेचतुर्विधक्रियाफलधाव दर्शने न वीचिक्रियाजन्यफलाश्रयत्वस्य दूरनिरस्तत्वात् अतः साकांतिरिवाहंता जगती अपि निराश्रयत्वान्मिथ्यैवेत्यर्थः ४६

अहंतामाद्येदं निरस्यतद्दृष्टमेदं निरस्यति यस्येति यस्य अंतः आंतरं प्रत्यगात्मरूपं तत्स्थितं अहंत्वं यस्मिंस्तथाविधं संपन्नं दृश्यजगद्विभागादिकं मनश्चनास्ति तस्य तदधीनक
ल्पने चेतनाचेतनते अपि नस्तः अतः सस्कएव सर्वात्मा अस्ति तदितरो जनश्चेतनधातुर्नास्ति नान्योतोस्ति द्रष्टेत्यादिश्रुतेरित्यर्थः ४७ तस्य लक्षणान्याह व्योमेति द्वाभ्यां सम्य
क् शास्त्रशिष्टाचाराविरोधने शमः शांतिस्वभावः ४८ धर्म तत्त्वज्ञस्यैव समदर्शित्वे उपपत्तिमाह अर्थ इति अज्ञेनमूढेन अतनुर्महान् हिरण्यगर्भैश्वर्यादिः तनुरल्पः काकि

यस्यांतरस्थिताहंत्वं न विभागादिनो मनः न चेतनाचेतनते सोस्ति नास्तीतरो जनः ४७ व्योमस्वास्थ्योविहिस्थे हां सम्यगाचरतीह यः हर्षाम
र्षविकारेषु काष्ठोपलसमः शमः ४८ आत्मवत्सर्वभूतानि परद्रव्याणि लोष्टवत् स्वभावादेव न भयाद्यः पश्यति स पश्यति ४९
अर्थोतनुस्तनुर्वापि नामरूपेणाचेत्यते सद्रूपेणानुस्मृतोऽज्ञेन ज्ञेनैव तु तन्मया ५० ईदृशाशयसंपन्नो महामतपरं गतः तिष्ठतरे
तुयायातुस्मृतिमेतु न तत्स्थातो ५१ वसतत्वमभोगाढ्ये स्वगृहे वाजनाकुले सर्वभोगोज्झितो भोगे सुमहत्यथवा वने ५२ उद्दाम
मेथयानेतत्सुरो वापि नृत्यतु सर्वसंगपरित्यागी समनायातु वा गिरौ ५३ चंदनागरुकर्पूरैर्वपुर्वापरिलिंपतु ज्वालाजटिलवि
स्तारे निपतत्वथवानले ५४ पापं करोतु सुमहद्बहु कुर्वन्पुण्यमेव च अद्यवास्तु मायातु कल्पांतनिचयेनवा ५५

नीमात्रोविवाकनककामिन्यादिर्थो विषयः असद्रूपेण मिथ्यात्वेन न चेत्यते न दृश्यते अपि ज्ञानसद्रूपब्रह्मतानुस्मृत इति तन्मयामन्मात्रस्वभावेनापि न चेत्यते ज्ञेन तत्त्व
वेदेव तथा दृश्यत इति तत्त्वबोधयथापि समदर्शित्वमुपपद्यत इत्यर्थः ५० यस्याशयेसमदर्शनं विमृष्टं स सर्वत्र सर्वास्वप्यवस्थासु न हर्षविषादादिना लिप्यत इत्याह
ईदृशेत्यादिना तिष्ठत्विति वनः तदंतुमेस्वमंत्रान्स्वरसंप्राप्तो तन्ना स्मृतिं पुनर्वानवाति स रगतं तत्स्याभो अभ्युदयास्मिन्निति सेतु ५१ उद्दामसमन्मथमितिक्रियाविशेष

अमौ समदर्शी किंचिन्मरणदुःखादि विकारि मन आदि हंताश्रयः अत एव तेन किंचित्कृतं ५६ अज्ञेषु तर्हि कस्य कलंकस्तद्दर्शयति संविदितिसकलंकैः शास्त्रानभ्य
स्तज्ञाततत्त्वैरन्वहं पिनैः वासनारूपैः सेंद्रियक संविद्ग ... लताय तेनेन पुरुषेण देहेनेंद्रियैः शब्दार्थरूपैर्विषयैश्च अहंत्वं अहंकार प्रधान लिंगात्मा त
५७ कस्मादुपायात्ततः कलंकोपशम इत्यत आह समस्ते ति स्वभावस्य चित्तस्य कलंकः आभासत्त्यास्वतः प्रशांतो भवतीति शेषः ५८ संसार दुःखप्राप्ते
स्तर्हि किं कारणं तदाह अहंत्वाध्यासाद्वासनामन र्थानां प्रसूतेरुद्बोधात्पुरुषस्य जन्मानि संततीत्यर्थः ५९ अत एवाहंत्वशांत्या संसार दुःखनिवृ 

नात्मैः किंचिन्नता किंचित्कृतं ते नाम हात्मना ॥ नात्मै कलंकमाप्नोति हेमपंकगतं यथा ॥ ५६ ॥ संवित्सुरूपशब्दार्थैः सकलंकैः कलंक्य
ते ॥ अहंत्वं वासनारूपैः शुक्तिकारजतोपमैः ॥ ५७ ॥ समस्तवस्तुप्रशमात्सम्यग्ज्ञानाद्यथास्थितेः स्वभावस्योपशांतौ ततः कलंकोऽस
त्ययास्वतः ॥ ५८ ॥ अहंत्ववासनानर्थप्रसूतेः संविदात्मनः ॥ पुरुषस्य विचित्राणि सुखदुःखानि जन्मनि ॥ ५९ ॥ रज्ज्वां सर्पभ्रमे शांते ऽ
हिर्नेति ... ईतिर्यथा ॥ अहंत्वभावसंशांतौ तथांतः समता मता ॥ ६० ॥ यत्करोति यदश्नाति यद्ददाति जुहोति वा ॥ न तदस्य न तन्नाशो मा
करोतु करोतु वा ॥ ६१ ॥ कर्मणास्ति न तस्यार्थो नार्थस्तस्यास्त्यकर्मणा ॥ यथास्वभावावगमात्स आत्मन्येव संस्थितः ॥ ६२ ॥ इच्छास्त
तः समुद्यंति न मज्जं मदे गोपलात् ॥ यास्त्वोद्यंति च ताः सर्वाः स्वयं आग्निवीचयः ॥ ६३ ॥

त्तिस्याहरत्वामिति समता सर्वदुःखवैषम्यशून्यता ६० दुष्कृतफलमिव सुकृतफलमपि ज्ञस्य नास्तीति तस्य सर्वकर्तव्यहानिरित्याह यदित्यादिना ६१ अकर्म
णाकर्मत्यागेन ६२ फलेच्छया हि तदुपाये कर्मणि प्रवृत्तिः स्यात्सैव तस्य पूर्णत्वान्नोदेतीत्याह इच्छा इति कदाचिद्वासनाभासादुदिताः अपीच्छाः परमार्थद
शातस्य स्वात्मस्वरूपतामेवेत्याह याश्चेति ६३ 

तस्य सर्वात्मतां सर्वस्य तदात्मतां च दृढयन्नुभयोर्निष्प्रपंचचिन्मात्रत्वेन परमार्थतः फलितेति दर्शयति सकलमिति अखिलं अखंडं यतः अत्र जगति विभागिता त्रि
विधपरिच्छेदशालिता काचिन्नास्ति एवं भेदकानां कार्यकारणोपाधीनां तत्त्वतः स्वास्ति चिन्मात्रत्वे सत्त त्वविततसर्वजगदधिष्ठानसन्मात्रमेव यतो सौ परमः शरणं त्वात्पुरुषः
सर्वदोषास्पर्शात्पावनो यः परमात्मा तदेकरूपी इति अनया रीत्या अकिंचित्सर्वद्वैतबंधनिर्मुक्तस्वरूपमात्रपरिशिष्टो सौ नित्यमुक्तः संपन्न इत्यर्थः ॥ ६४ ॥ इति श्रीवा
सिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे षट्पंचाशः सर्गः ॥ ५६ ॥ अंतर्तं स्वभावाविद्दृक्त्वादृश्यस्वभावतां ॥ यां धते सा चिदेवेति चिदन्यन्ने निर्णयते ॥ एवं सर्वं जगात्स्वरभेदे त

सकलमिदमसावसौ च सर्वं जगदखिलं न विभागितात्र काचित ॥ परमपुरुषपावनैकरूपी समदितितत्स्वदकिंचिदेव नासौ ॥ ६४ ॥ मोक्षोपा
ये उपशमप्रकरणे ध्यानाचारो नाम सर्गः ॥ ५६ ॥ श्रीवसिष्ठ उवाच ॥ यदात्ममणिस्यांतश्चित्त्वातीक्ष्णत्ववेदनं ॥ तदहंतादिभेदादि देशकाला
दिचेत्यतः ॥ १ ॥ यदात्मलवणस्यांतश्चित्त्वाच्छ्रवणवेदनं ॥ तदहंतादिभेदादि देशकालादिमत्स्थितं ॥ २ ॥ स्वतो यदंतरात्मेक्षोश्चि
त्वान्माधुर्यवेदनं ॥ तदहंतादिभेदादि जगतत्वादि जृंभितं ॥ ३ ॥ स्वतो यदात्मदृषदश्चित्त्वात्काठिन्यवेदनं ॥ तदहंतादिभेदादि दे
शकालादितां गतं ॥ ४ ॥ स्वतो यदात्मशैलस्य ज्ञतया जाड्यवेदनं ॥ तदहंतादिभेदादि भुवनादीति संस्थितः ॥ ५ ॥

परमार्थतः सिद्धं व्यवहारेऽपि ज्ञाद्वैचित्र्यं तत्तद्रूपचित्स्वभावस्यैवेति फलितमित्याह यदित्यादिना आत्मैव स्वप्रकाशमैस्यस्वांतश्चित्त्वात्तैक्ष्ण्यप्रथारूपं यद्वेदनं
तन्म्यारीयं अज्ञातब्रह्मस्वभावस्य अहंतात्वंतादिरूपं घटकुड्यभेदादिरूपं तदाधरदेशकालादिरूपं च जगदिति अतश्चिद्भेदसाधनात्फलितमित्यर्थः १ २
तत्वादिना तत्तदाकारभेदेन जृंभितं अभिव्यक्तं ३ ४ जाड्यं गौरवं ५

वा॰टी॰ उ॰प॰ १७४ असौ सम्दर्शी किंचिन्न रतदुःखादिविकारि मन आदिरहंताश्रयः अत एव तेन किंचित्कृतं ५६ अज्ञेषु तर्हि कस्य कलंकस्तद्दर्शयति संविदिति सकलंकैः शास्त्रानभ्य
नुज्ञातैर्वनहषितैः वासनारूपैः सेंद्रियकसंविद्... लरायते तेन पुरुषेण देहे नं ज्ञो ये: शब्दार्थरूपैर्विषयैश्च अहंत्वं अहंकारप्रधानलिंगात्मा त
५७ कस्मादुपायादतः कलंकोपशमस्तमाह समस्तेति स्वभावस्याचितस्य कलंकः आभादसक्त्याखतः प्रशांतो भवतीति शेषः ५८ संसारदुःखप्राप्ते
स्तर्हि किं कारणं तदाह अहंत्वाध्यासाद्वासनानामनर्थानां प्रसरतेरुद्बोधात् पुरुषस्य जन्मानि सतीत्यर्थः ५९ अत एवाहंत्वशांत्या संसारदुःखनिवृ

नासौ किंचिन्नता किंचित्कृतं तेन महात्मना। नासौ कलंकमाप्नोति हेमपंकगतं यथा ५६ संविल्लुरुषशब्दार्थैः सकलंकैः कलंक्यते अहंत्ववासनारूपैः शुक्तिकारजतोपमैः ॥५७॥ समस्तवस्तुप्रशमात्सम्यग्ज्ञानाद्यथास्थितेः स्वभावस्योपशांतोंतः कलंकोस्त्यास्वतः ५८ अहंत्ववासनानर्थप्रसरे तु सविदात्मनः पुरुषस्य विचित्राणि सुखदुःखानि जन्मनि ५९ रज्ज्वां सर्पभ्रमे शांते ऽहिर्नेति ... हि तिर्यथा अहंत्वभावसंशांतौ तथांतः समता मता ६० यत्करोति यदश्नाति यद्ददाति जुहोति वा न तदस्य न तन्नाशो मा करोतु करोतु वा ६१ कर्मणास्ति न तस्यार्थो नार्थस्तस्यास्त्यकर्मणा यथास्वभाववगमात्स आत्मन्येव संस्थितः ६२ इष्टास्तः सम्पुष्यंति न संजमेद्दृष्टोपलात यास्त्वोद्यंति चताः सर्वाः सरस्वाम्भिव वीचयः ६३

त्तिस्याहरज्जामिति समता सर्वदुःखवैषम्यशून्यता ६० दुष्कृतफलमिव सुकृतफलमपि ज्ञस्य नास्तीति तस्य सर्वकर्तव्यहानिरित्याह यदित्यादिना ६१ अकर्मणा कर्मत्यागेन ६२ फलेच्छया हि तदुपाये कर्मणि प्रवृत्तिः स्यात्सैव तस्य पूर्णत्वान्नोदेतीत्याह इष्टा इति कदाचिद्वासनाभासा दुर्ईताः अपीष्टाः परमार्थद राम॰ १७४
शातस्य स्वात्मभूता एवेत्याह याश्चेति ६३

सं तस्य सर्वात्मतां सर्वस्य तदात्मतां च दृढयन्ननुभवो निष्प्रपंचचिन्मात्रैनैव परमार्थतः फलितेति दर्शयति सकलमिति अखिलं अखंडं यतः अत्र जगति विभागिता त्रि
विधपरिच्छेदशालिता काचिन्नास्ति एवं भेदैकानां कार्यकारणोपाधीनां तत्त्वतः चिन्मात्रत्वे सति तत्त्वविदः सर्वजगदधिष्ठानसन्मात्रमेव यतो सौ परमः श्रेष्ठस्तत्पुरुषः
सर्वदोषास्पर्शात्पावनोयः परमात्मा तदेकरूपी इति अनयारीत्या अकिंचित्तः सर्वद्वैतबंधनिर्मुक्तस्वरूपमात्रपरिशिष्टो सौ नित्यमुक्तः संपन्न इत्यर्थः ॥६४॥ इति श्रीवा
सिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे षट्पंचाशः सर्गः ॥५६॥ अंततः स्वभावाविद्वकृताद्दृश्यस्वभावता ... ते मा चिरेवेति चिदन्मन्ते ... एवं सर्वं जगत्स्थिरभेदं त

सकलमिदमसावसौ च सर्वं जगदखिलं न विभागिता त्र काचित। परमपुरुषपावनैकरूपी समदिति तत्सदकिंचिदेव नासौ ॥ ६४ ॥ मोक्षोपायेषु उपशमप्रकरणे ध्यानाचारो नाम सर्गः ५६ ॥ श्री वसिष्ठ उवाच ॥ यदात्मसम्विस्यांतश्चित्त्वात्तीक्ष्णत्ववेदनं ॥ तदहंतादिभेदादि देशकालादिचेत्यतः ॥ १ ॥ यदात्मलवणस्यांतश्चित्त्वात्स्वलवणवेदनं ॥ तदहंतादिभेदादि देशकालादिसंस्थितं ॥ २ ॥ स्वतो यदंतरात्मेक्षोश्चित्त्वान्माधुर्यवेदनं ॥ तदहंतादिभेदादि जगत्त्वादि विजृंभितं ॥ ३ ॥ स्वतो यदात्मदृषदश्चित्त्वात्काठिन्यवेदनं । तदहंतादिभेदादि देशकालादितां गतं ॥ ४ ॥ स्वतो यदात्मशैलस्य ज्ञतया जाड्यवेदनं । तदहंतादिभेदादि भुवनादीति संस्थितः ॥ ५ ॥

परमार्थतः सिद्धेऽप्यव्यवहारे पि जगद्वैचित्र्यं तत्तद्रूपचित्स्वभावएवेति फलितमित्याह यदित्यादिना आत्मैव स्वप्रकाशत्वेनैश्यर्यं मरिचं तस्य चित्त्वात्तैक्ष्ण्यप्रथारूपं यद्वेदनं
तन्मात्रानीयं अज्ञात ब्रह्मस्वभाव एवाहंतात्वंतादिरूपं घटकुड्यभेदादिरूपं तदाधारदेशकालादिरूपं च जगदिति अतश्चिद्भेदसाधनात्फलितमित्यर्थः १ २
तत्त्वादिना ततनदाकार भेदेन जृंभितं अभिव्यक्तं ३ ४ जाड्यं गौरवं ५

अप्र नं १

आकारितात्तत्तदाकारवत्ताइवस्थितमित्यनुषज्यते।६। सतवर्त्तमानं तथास्फुरद्भासमानं ७ भावनं कल्पनं।८। दिव्यदृष्टिः शून्यत्वं सर्वत्रव्योम।९। स्थिरता तु मोविषयमिति भेदः।१०। निरंतर्य्यं निबिडताबहिर्दृश्यत्वाच्चिद्व्यतिरिक्तमिवेत्यर्थः।११। चेतना निचिदाभासा।१२। चित्तं दाले भेदमिन्ने चिदाभासेषु तु गतं सामान्यं वेदकल्पमतिः जीवः।१३। रसायनममृतं। स्वत आस्वादितं स्वप्रकाशतयाऽनुभूतं उदितमाविर्भूतं।१३। आंतरे स्वात्मन्येव।१४। चेतनारूपे आत्मपदे स्वरूपे।१५। मायिकज

स्वतो यदात्मतो यस्य चिद्वत्वादिविवर्त्तनं॥ तदा वत्तोघ्यहंतादिभेदाद्याकारिताइव॥६॥ स्वतो यदात्मदृक्सम्पशारवादिसत्स्ववेदनं॥ तद
हंतादिभेदादिभुवनादीवभतस्फुरत।७॥ यदात्मगगनस्यांतश्चित्ताच्छून्यत्ववेदनं॥ तदहंतादिभेदादिभुवनादीनिभावनं॥८॥ यय
दात्मगगनस्यांतश्चित्तौ मोषिर्यवेदनं॥ तदहंतादिभेदादिशरीरादिचदीपितं॥९॥ स्वतो यदात्मकुड्यस्य नैरंतर्य्यं निरंतरं॥ तद
हंतादिभेदेनचित्ताद्बहिरिवस्थितं॥१०॥ स्वतो यदात्मसत्तायाश्चित्तात्मत्वैकवेदनं॥ तदहंतादिभेदादिचेतनानीतिवत्स्थितं
११॥ अंतरात्मप्रकाशस्य स्वतो यदवभासनं॥ तदहंतादिचित्तादिजीवद्वत्त्वेववेदनः॥१२॥ अंतरस्ति यदात्मेंदोश्चिद्रूपश्चिद्रसाय
नं॥ स्वत आस्वादितं तेन तदहंतादिनोदितं॥१३॥ परमात्मगुडस्यांतर्यश्चित्स्वमो॥१४॥ नचकिंचन वेत्त्यंतर्वेद्यस्यासंभवादिह॥ न
चास्वादयति स्वादुस्वाद्यस्यासंभवाद्यं॥१६॥ नचकिंचिच्चिनोत्यंतश्चेत्यस्यासंभवेऽपि॥ विंदते नच वा किंचिद्वेद्यस्यासंभवाद्यसौ॥१७



गदाकारानुभवस्य स्वप्रकाशत्वात्मानुभवमात्रत्वमुत्पादनाय पश्यति वेत्यास्वादयत्यास्वाद्यते। इति कर्मकर्तृभावव्यपदेशो न तद्वेद्यसाधनाशयेनेत्याह नचेति।१६
चिनोति चैतन्यांतरात्मना विकरोति। वेद्य स्थलम्बस्य।१७॥

२ स्वाद्यत्वात्मकं॥ तेन स्वाद्यते तेन स्वमाहंतादिनांतरे॥१४॥ परमात्ममणेश्चित्वात्प्रतःकनकं
स्वयं। चेतनात्मतदेनांतरहमित्याभवे ॥२

अहन्त्आभासतद्वत्माभासो जगदाकारो यस्मिंस्तथाविधस्वात्।१७। तर्हि मदात्मरविस्येत्याद्युक्तेः कोभिप्रायस्तमाह। अनयेति।१८। एवं दृष्टवान्पश्चात्स्वरादिमकल्पस्वीभ
तेंबुद्धवसितेंशुद्धं। अधिष्ठानसन्मात्रमात्रमापरिशिष्टं बाधितं जगत्शांतमेवशाम्यतीत्यर्थः।२०। ज्ञप्तामात्मा वीमर्वतः स्वमायाहृतेज्ञप्तिरूपे आत्मनि अहंतादिरूप
तां जीवभावं जगद्भावमितियावत्।२१। यदागतो वामौ परमार्थतो ज्ञप्तिमात्ररूपे ज्ञे सर्वत्रेश्वरे।२२। तर्हि जीवजगद्रूपेण ईश्वरेणानन्येतद्विज्ञेतः जीवेश्वरभावयोः कोविशेषस्तमा
हज्ज्ञइति। ज्ञ ईश्वरः ज्ञतया ईश्वरभावेन शिवं निरतिशयानंदरूपं स्वरूपज्ञानेज्ञानलक्षहत्या अनावरणपरिच्छेदत्वलक्षणया ज्ञानाभिव्यक्त्यासदेवजानाति अहंतारिअ

अमदाभासस्वात्मा अनंतो भरिताकृतिः॥ स्थिताः सदैवैकघनो महाशैलइवात्मनि॥१८॥ अनया तु वचोभंग्या
मयाते रघुनंदना॥ नाहंतादिजगत्तादिभेदोस्तीतिनिदर्शितं॥१९॥ नचित्तमस्ति नो चेता न जगत्तादिविभ्रमः॥ दृष्टमत्कां
बुद्धसितं शांतं शाम्यति केवलं॥२०॥ यथा वर्त्तादिता मेति द्रवत्वाद्वारि वारिणि॥ तथाहंतादिता मेति ज्ञप्त्याज्ञप्सौ ज्ञ आत्मनि
२१॥ यथा द्रवत्वं पयसि यथा स्पंदः सदागतो॥ अहंता देशकालादि तथा ज्ञे ज्ञप्तिमात्रके॥२२॥ ज्ञो ज्ञतयाशिवं ज्ञानं जाना
ति ज्ञानहृत्या॥ ज्ञायतेहंतया ज्ञेन जीवादीत्यभिजीवनैव॥२३॥ यथोदेति यथा ज्ञस्य तत्प्रज्ञानिनयादृशी॥ अनन्ये
चान्यता बुद्धासतथा जंभ तेतया॥२४॥ हंकारस्थूलदेहरूपजीवभावेतु ज्ञेनचेतनमस्ते नापि अभिजीवनेनैव देहेतुभिः प्राणकरणविषयसं
बंधाध्यासैर्जीवादिरूपस्वात्मेति ज्ञायते न तत्त्वत इति विशेष इत्यर्थः।२३। अत एव जीवस्य यथा यथाज्ञोतिस्तथा तथेश्वरो विवर्त्तत इत्याह यथेति। यथा यया कामकर्म
वासनया यादृशा विषमज्ञानेनअतस्य यथा येन येन दर्शनेनाभोपभोगवैचित्र्यप्रकारेण यादृशी प्रियमोहादिनानाप्रकारत्वत्रिरूपभोगं करोति अनन्यो स्वरूपेभोग्यभोगवैचित्र्य
रूपता अन्यताया ज्ञेन बुद्धा परमेश्वरस्तया तयातरीभकामादिवासनया तथा तथा जंभ तेस्वगात्राणि विनाम्यति विवर्तते वैचित्र्यं धत्ते इति यावत्।२४॥

Dr BHAU DAJI

वा॰टी॰उ॰प॰ यदात्वनेनसम्यग्ज्ञानस्वरूपदेशाद्भोग्यस्यजगतोज्ञाततात्अधिष्ठानसन्मात्ररूपास्फूर्तिरेवजीवनंसारःपरमार्थस्थितिर्ज्ञाताजीवानांसर्वेषांयदधीनंजीवनंतादृश
७६ मानंदरूपमेवजीवनंभोक्तृःसारोज्ञातताताभोग्यभोक्तृधिष्ठानयोर्द्वयोरपिचिद्रूपत्वेपरिशिष्टे ज्ञाजीवयोःजीवेश्वरयोर्भेदःअत्यंतंनास्तिसर्वथैवनिवर्ततइत्यर्थः
जीवेश्वरभेदकाज्ञानेनष्टेप्राज्ञतुरीयभेदोपिनिवृत्तइत्यखंडरूपेणानंदैकरसचिन्मात्रमात्राज्यंसिद्धमित्याहयथेति।२६।निष्कृष्टार्थमनंत्योपसंहरतिसर्वमितिस
र्वंजगत्आसमंतात्भास्वरंसर्वस्वप्रकाशरूपंस्वदनंस्वानंदैकरसंचेत्यैर्विषयैःस्त्रिहेनस्वप्नावर्तकधर्मेणचेरंहितंप्रशांतंब्रह्मतदेवसर्वंप्रशांतमितितात्कालि

जीवनंज्ञाततात्ज्ञाताजीवनंजीवजीवनं॥अत्यंतंमेस्तिनोभेदश्चिद्रूपत्वेज्ञजीवयोः।२५।यथाज्ञजीवयोर्नास्तिभेदोनामत
थैतयोःभेदोस्तिनज्ञशिवयोर्विद्धिशांतमखंडितं।२६।सर्वंप्रशांतमजमेकमनादिमध्यमाभास्वरंस्वदनमात्रमचेत्य
चिह्नं।सर्वंप्रशांतमितिशब्दमयीतुदृष्टिर्बोधार्थमेवहिमुधैवताहोमितीदं।२७।मोक्षोपायेउपशमप्रकरणेभेदनिरा
सोनामसर्गः॥५७।

कंशब्दमयीपरवाच्यार्थाभेदैर्सर्गगोचराआहार्याभेददृष्टिःसाक्षात्प्रयोजनशून्यत्वान्मुधैवहियस्मात्कारणात्विरोधप्रतिसंधानेभागत्यागलक्षणाश्रयद्वारालक्ष्या
र्थाखंडबोधार्थमेवनतत्वाक्यबोध्यमखंडार्थरूपंतुॐइतिॐकारंजगद्रूपत्वैकीकृत्यविराड्हिरण्यगर्भाव्याकृततुरीयात्मकानकारोकारमकारार्धमात्रापादैश्चतुर्धा रा॰मू॰
विभज्यपर्वपर्वपरानुसारेणार्धमात्रविलापनार्धमात्रयायदद्वयंपूर्णानंदैकरसंनित्यापरोक्षप्रत्यक्चिन्मात्ररूपंलक्ष्यतेइदमेवंस्वरूपमित्यर्थः २७.इतिश्रीवा ७६
सिष्ठतात्पर्यप्रकाशेउपशमप्रकरणेसप्तपंचाशःसर्गः।५७॥ नसं२ रमका

किरातेशस्यसुरघ्योर्निर्वेदेनोपवर्ण्यते।मांडव्येनोपदेशश्चसर्वत्यागाद्युपायतः॥अनात्मसिद्धशब्दमयीदृष्टिर्बोधार्थमेवेतितुक्तेर्थे।१।सुरघ्योर्निवासदेशंकथयितुं
तत्सन्निहितंहिमवच्छृंगंवर्णयति।।उत्तरस्यादिशइत्यादिनाभेदःसारइतिभावत।भुवःसंभृतंनिर्गतंकर्पूराणांपटलंराशिःशार्वहसनंचांद्रंआतपोवेतिमत्वे
कमु लेक्षाः अथवादिशोभेदःशार्वहसनंचांद्रआतपोभुवःसंभृतमिवाथकर्पूरपटलंसंभृतमित्यौत्प्रेक्षिकवैकल्पिकनानाहेतूपपाद्यासकैवविशिष्टो
त्प्रेक्षा।२।हिमाद्रेःशृंगमितिविशेषणान्मेरुसन्निहितप्रसिद्धरजताद्रेर्व्यवच्छेदइतिगम्यते।शैलकुंजरेणपर्वतश्रेष्ठेनहिमवतानिर्मुक्तस्यध्वस्तस्यस्फुट

श्रीवसिष्ठउवाच॥अत्रैवोदाहरंतीममितिहासंपुरातनं।किरातेशस्यसुरघोर्वृत्तांतंविस्मयास्पदं।१।उत्तरस्यादिशोभेदःकर्पूरपटले
भुवः॥संभृतंहसनंशार्वंशुक्लोवाचांद्रआतपः।२।हिमाद्रेःशृंगमस्तीहकैलासोनामपर्वतः।शैलकुंजरनिर्मुक्तकलापस्येवना
यकः।३।विष्णोःक्षीरोदकइवस्वर्गःसुरपतेरिव।अब्जजस्येवनाभ्यब्जंगेहंयःशशिमौलिनः।४।रुद्राक्षवृक्षदोलाभिःसा
प्सरोभिर्विभातियः।लोलरत्नशलाकाभिर्लहरीभिरिवार्णवः।५।गणांगनानामनिशंमत्तानांचरणैर्हताः।अशोकाइवराजंते
यत्राशोकाविलासिनः।६।संचरन्शंकरोदिक्षुभ्रमरगुच्छिदुमणिद्रवैः।प्रवर्तंतेनिवर्तंतेयत्राजस्रंतुनिर्झराः।७

गपरंपरालक्षणस्यमुक्ताकलापस्यनायकोमणिरिवस्थितइत्यर्थः।शैलस्यकुंजरेभ्योनिर्गलितस्यमुक्ताकलापस्यनायकःसंग्राहकोराशिरिवेतिवा ३ नाभ्य
ब्जंविष्णुनाभिकमलंगेहंब्रह्मणःकल्पितमित्यर्थाद्गम्यते ४ रुद्राक्षवृक्षेषुलंबमानाभिर्दोलाभिःप्रेंखोलिकाभिःलोलरत्नशलाकाभिरितिलहरीणामपिवि
शेषणं ५ गणांगनानांप्रथमस्त्रीणां ६ यत्रयासुदिक्षुसंचरन्भवतितत्रभ्रमरगुच्छप्रपातस्थानेषुप्रवर्तंतेअन्यासुनिवर्तंते।७

म

प्रसांडवरिवेतिउक्तार्थानामपिप्रयोगोदृश्यतेयथाह्रस्वत्यावानयेतिमहाभाष्योक्तिदर्शनात्प्रद्योतकानांबहूनामप्युपर्शतं वाआदित्यानिरनुसमारोहतीतिवत्स
हप्रयोगसंभवाद्वहुतिनोक्तेपिसादृश्यैरवशब्दप्रयोगः।अंडवत्विरडाकारंविशिष्टंब्रह्मलेवेतिमतुवंतंवायोज्यं॥६॥तस्याहिमवतश्शृंगस्यस्थलेमरुलदेशे १
तेषांजीवनोपायमाह।कैलासेति।कैलासाख्यस्यशृंगस्यपादाःप्रत्यंतपर्वतास्तदीयानामरण्यानांसंबंधिभिःहृदोसेरन्यैश्चतरुगुल्मकैःफल

योलतावृक्षगुल्मैश्चवापीहृदनदीनदैः।मृगैर्मृगगणैर्भूतैर्ब्रह्मांडवदिवावृतम्॥७॥तस्यहेमजटानामकिराताःसंस्थिताःस्थले
पिपीलिकावटतरोर्मूलकोशगताइव॥८॥कैलासपादारण्यानांरुद्राक्षैस्तरुगुल्मकैः।वर्धतिष्ठकवत्क्षुद्रास्तेवैनिकटजी
विनः॥१०॥आसीत्तेषामुदारात्माराजापरपुरंजयः।जयलक्ष्म्यामुजइवयःप्रजायाश्चदक्षिणः॥११॥सुरघुर्नामबल
वान्सुरघोरारिदर्पहा।अर्कःपराक्रमइवमूर्तिमानिवमारुतः॥१२॥जितोवैराज्यविभवैर्धनैर्गुह्यकनायकः।शतक्रतुपु
रुर्बोधैःकाव्यैरसुरदेशिकः॥१३॥सचक्रेराजकार्याणिनिग्रहानुग्रहक्रमैः।यथाप्राप्तान्यखिन्नांगोदिनानीवदिवाकरः॥१४॥
तज्जाभ्यांसुखदुःखाभ्यामथतस्याभ्यभ्रयत।सगतिर्वागुराबंधैःम्लिष्टांगस्येवपक्षिणः॥१५॥

उष्पकाशमूलाद्युपजीवनेनानिकटजीविनः॥१०॥जयलक्ष्म्यामुजइवपरपुरंजयःप्रजयाःपालनेचदक्षिणःराजावक्ष्यमाणविशेषणैर्ब्रह्मविद्याधिका
रदर्शनाच्चायंक्षत्रियइतिगम्यते॥११॥पराक्रमेअर्कइवेतियोजना॥१३॥राज्यविभवैर्द्धनैश्चगुह्यकनायकोराजराजोधनेश्वरोपिजितस्तेनेतिशेषः काव्यैःरसा
लंकारादिशालिप्रबंधरचनैरसुरदेशिकःशुक्रः॥१३॥१४॥१५



क

दुःखवशाच्चिंताशोकाद्यद्भवंदर्शयतिकिमार्त्तमिति।स्वंप्रजाजनं॥१६॥कर्त्तव्यसंशयप्रथमंकोविंदर्शयतिधनमितितत्रस्माद्धेतोःआर्त्तायास्मैजनायधनंप्रयच्छामि
अतिनिग्रहेश्वअलंप्रयोजनंनास्तीत्यर्थः॥१७॥द्वितीयंदर्शयतिअथवेतिनिग्रहेणविनाप्रजानवर्त्ततस्वस्वमर्यादायामितिशेषः १८ निग्रहोवधबंधा

किमार्त्तंपीडयाम्येनंतिलान्यंत्रमिवौजसा।सर्वेषामेवभूतानांममेवार्त्तिःप्रजायते॥१६॥धनमस्मैप्रयच्छामिधने
नानंदवान्जनः।भवत्यहमिवाशेषमतदलंमेतिनिग्रहैः॥१७॥अथवानिग्रहंप्राप्तंकरोम्येतेनवैविना।वर्त्ततेनप्रजैवेयंवि
नावारिसरिद्यथा॥१८॥हाकष्टमेषनिग्राह्योनित्यानुग्राह्यएषमे।दिष्ट्याहंसुखवानस्मिकष्टमद्यास्मिदुःखवान्॥१९॥
इतिदोलायितंचेतोनविशश्राममन्नृपतेः।एकत्रांबुमहावर्त्तेचिरंतृणमिवभ्रमात्॥२०॥अथैकदागृहंतस्यमांडव्योमुनिराययौ
भ्रांताशेषककुप्कुंजोवासवस्येवनारदः॥२१॥तमसौरजयामासपप्रच्छचमहामुनिं।संदेहदुर्द्रुमस्तंभपरशुंसर्वकोविदं॥२२॥सुरघुरु
वाच।भगवन्मननेनास्मिन्मुनेनिर्वृतिमागतः।परमीवसुधापीठंसंप्राप्तइवमाधवे॥२३॥अद्यातिधन्यहंनाथधन्यानांधुरिधर्मतः।वि
काशिरविरोवाकुंयत्त्वयास्म्यवलोकितः॥२४॥भगवन्सर्वधर्मज्ञचिरंविश्रांतवानसि।तन्मेसंशयंछिंधिममार्कस्तिमिरंयथा
२५ महतांसंगमेनार्त्तिःकस्यनामननश्यति।संदेहंतुपरामार्त्तिमाहुरागमविदोजनाः॥२६॥

दिनार्द्रजः॥१९॥एकत्रअविशश्रामयथात्वपितनिद्राणस्यचिरंत्संमनः।अंबुमहावर्त्तेभ्रमतितद्वत्॥२०॥भ्रांतान्यशेषाणिककुप्कुंजा निदिङ्मंडलानि
२१ २२ परमांनिर्वृतिंसुखंप्राधवेसंतेविष्णौवा॥२३॥२४॥चिरंविश्रांतवानगतश्रमोसितर्हि।अथवापरमपदेचिरंविश्रांतवानसितत्तस्माद्धेतोः॥ २५ २६

वा॰टी॰ उप॰ १७८ मत्यग्रहणं शत्रुमित्रादिसर्वोपलक्षणं। रिपुषि विषयेस्थितानिरूढाः। कर्षतिपीडयंति॥२७। समतासमदृष्टिः अन्याविषमदृष्टिर्यथानोदेतितथा। २८। वैराग्यत्यागादि
रूपेणस्वयत्नेन श्रवणमननादिनास्वर्थ्यं जकोपायेनस्वसंस्थेनस्वात्मबोधपर्यवसितेन। पेलवतामदुताहर्षविषादस्थानकंटकसहत्ववेधार्हतेतियावत्॥ २९॥ ३०
स्वानिस्वीयानिपुत्रमित्रादीनिस्वशरीरगतानींद्रियाणिचादन्यानिचतत्वतः। कानियुक्तितः कीदृशानिचेतिविचारयेत्यर्थः॥ ३१। अविचाराध्यपरिछिन्नतापगमा

मन्येग्रहैरनुग्रहजाम इत्यवपुषिस्थिताः। कर्षंतिमामलं चिंतागजेंद्रं हरिणाइव॥ २७॥ तद्यथासमतोदेतिसूर्यांशुरिवसर्वदा
मत्तोममभुनेनोन्या तथाकरुणयाकुरु॥ २८॥ मांडव्यउवाच॥ स्वयत्नेनस्वसंस्थेनस्वेनोपायेनभूपते। सर्पामनः पेल
वताहिमवत्सविलीयते॥ २९॥ स्वविचारणयैवाशुशाम्यत्यंतर्मनोज्वरः शरदागममात्रेणमिहिकामहतीयथा॥ ३०
स्वेनैवमनसास्वानिस्वशरीरगतानिच। विचारयेंद्रियाण्यंतः कीदृशान्यथकानिच॥ ३१॥ कोहंकथमिदंकिंवाक
थंमरणजन्मनी॥ विचारयांतरेवत्वंमहत्तामलमेष्यसि॥ ३२॥ विचारणापरिज्ञातस्वभावस्यसतस्तव॥ हर्षामर्ष
दशाश्चेतनोलयिष्यंतिनाचले॥ ३३॥ मनःस्वरूपमुत्सृज्यशममेष्यतिविज्वरं। भूतएवंवपुर्भूत्वातरंगः पयसीवते
३४ तिष्ठदेवमनोरूपंपरित्यक्ष्यतितेनघ। कलंकविकलंकालंमन्वंतरगताविव॥ ३५॥

न्महतां। ३२। सतः परमार्थवस्तुभूतस्यतवचेतः नतोलयिष्यंतितुलाध्यामिवनोन्नमनानमनाभ्यामनियतस्थितिंकरिष्यंतीत्यर्थः॥ ३३॥ विज्वरं तेमनः स्वमनो
रूपमुत्सृज्यभूतएवंवपुः एवंसिद्धब्रह्मस्वभावंभूत्वाशमंनिर्विक्षेपतामेष्यति। ३४। तर्हिकिंमनसः सत्तैववर्णस्यातिनेत्याहतिष्ठदेवेतियथापूर्वमनोरंतेकलिकालंप्राप्य
कलंकैः पापैर्विकलंभुवनंपुनर्मन्वंतरगतौसत्यांतिष्ठदेवकलंकंत्यजतितद्वन्मोनोपिजीवन्मुक्तव्यवहारक्षमतयातिष्ठदेवदर्शनंमनोरूपंत्यजतीत्यर्थः ३५ राम॰ १७८

नकेवलंदुःखनिवृत्तिरेवज्ञानफलंकिंतुनिरतिशयानंदसाम्राज्यमपि यत्रब्रह्मादयोप्यनुकंप्याइत्याह अनुकंप्याइति। ३६। यदाआकाशादीनामपिमहत्तात्सत्ताधानात
ज्ञातस्यनिरतिशयंमहत्वंकिंवाच्यमित्याशयेनाहविवेकेति। विवेकजन्येनज्ञानदीपेदृष्टआत्मायेन॥ ३७॥ ३८। कृपणंकामकार्पण्यदूषितं। पेलवेक्षुद्रेपिकार्येनिमज्जतिमुह्यति
३९। तयाप्रसिद्धया। ४०। तर्हिकियत्सुविषयेषुकियत्कालंवावैराग्यंकर्तव्यमितिचेत्तत्राहतावदिति। स्वयंज्योतिरात्ममात्रपरिशेषानुभवपर्यंतमित्यर्थः। ४१। नानाश्रु
तिशास्त्रपर्यालोचनमप्यात्मदर्शनपर्यंतमेवेत्याहतावदिति। धातुः स्वर्णाकरधातुः सर्वंअध्यात्मशास्त्रं॥ ४२॥ सार्विकयासर्ववस्तुभूतयाबुध्यासर्वदासर्वत्रदेशेसर्वं

अनुकंप्याभविष्यंतिश्रीमंतः सर्वएवते॥ दृष्टात्मनस्तुदृष्टस्यजनाः पितुरिवावनौ॥ ३६॥ विवेकदीपदृष्टात्मामेर्वब्धिनभसामपि॥ अथाकरिष्यति
नृपमहत्तामुत्तमार्थदां॥ ३७॥ महत्तामागतंचेतस्तवेमंसारवल्लिषु। ननिमज्जतिहेसाधोगोष्पदेष्विववारणः॥ ३८ कृपणंतुमनोराजन्पेलवे
पिनिमज्जति॥ कार्येगोष्पदतोयेपिजीर्णोगोमशकोयथा॥ ३९॥ चेतोवासनयापंकेकीटवत्परिमज्जति॥ दृश्यमात्रावलंबिन्यास्वयाहीन
तयातया॥ ४०॥ तावन्नाक्रमहाबाहोस्वयंसंत्यज्यतेखिलं॥ यावद्यावत्सकललोकः परमात्मैवशिष्यते॥ ४१॥ तावत्प्रक्षाल्यतेधातुर्यावद्धेमै
वशिष्यते॥ तावदालोक्यतेसर्वंयावदात्मैवलभ्यते॥ ४२ सर्वैः सार्विकयाबुध्यासर्वैः सर्वत्रसर्वदा। सर्वथासंपरित्यज्यस्वात्मनात्मोपलभ्यते। ४३
यावत्सर्वंनसंत्यक्तंतावदात्मानलभ्यते॥ सर्वावस्थापरित्यागेशेषआत्मेतिकथ्यते॥ ४४॥ यावदन्यन्नसंत्यक्तंतावत्सामान्यमेवहि॥ वस्तुना
साद्यतेसाधोस्वात्मलाभेतुकाकथा॥ ४५॥

दृश्यंसर्वथापरित्यज्यसर्वैः एपआत्मास्वात्मनैवोपलभ्यतेनकदाचित्कुत्रचित्कथंचित्कतिपयविषयत्यागमात्रेणेत्यर्थः ४३। उक्तमेवार्थंव्यतिरेकमुखेनापिद्र
ढयतियावदिति। नकुतस्तत्राहसर्वेति ४४। सामान्यंलोकव्यवहारसाधारणंगोधनादिअप्यर्थेएवकारः यावदन्यत्सद्धिरोपिवस्तुनसंत्यक्तंतावन्नासाद्यते ४५

यत्रस्मिन्विषयेतत्तंविषयं ४६ सर्वंदृश्यंपरित्यज्ययत्किंचित्सर्वथापरित्यक्तमशक्यंदृश्यंतदेवंपरंपदमित्यर्थः ४७ मनःसकलकारणकार्यपर्परामयेजगतिमणिषु
सूत्रमिवानुगतेसन्मात्रेस्वकल्पनयाक्लिष्टंमितंतद्व्यतिरिक्तंसर्वंरूपंअलंनिःशेषमपास्यततस्तदनंतरंस्ववपुर्मनोरूपमपिमलाज्ञाननाशाद्बाधेनपरिविलापयच्चित्
न्मात्रैकरसंवस्त्वेवतिष्ठामोतिदेवतत्ब्रह्मस्वरूपमित्यर्थः ४८ इतिश्रीवासिष्ठतात्पर्यप्रकाशेउपशमप्रकरणेऽष्टपंचाशःसर्गः ५८ बाह्यमाभ्यंतरंचैवदृश्यंसंत्यज

यत्रासर्वात्मनैवात्मालाभायपततिस्वयं त्यक्त्वान्यकार्यंप्राप्नोतितन्नामनन्दपनेतरत् ४६ स्वात्मावलोकनार्थंतुतस्मात्सर्वंपरित्यजेत् सर्वं
किंचित्परित्यज्य यद्दृष्टंतत्परंपदं ४७ सकलकारणकार्यपर्परामयजगद्गतवस्तुविक्लिष्टंमितं अलमपास्यमनःस्ववपुःस्वतःपरिविला
पयदेतितदेवतत् ४८ मोक्षोपायेउपशमप्रकरणेसुरघुवृत्तांतमंडव्योपदेशःसर्गः ५८ श्रीवसिष्ठउवाच इत्युक्त्वाभगवानेनंसुरघुंर
घुनंदन ययौस्वमेवरुचिरंमांडव्योमौनमंडलं १ गतेवरमुनौराजागत्वैकांतमनिंदितं धियासचिंतयामासकोनामाहमितिस्वयं २ नाहं
मेरुर्नमेमेरुर्जगन्नाहंनमेजगत् नाहंशैलानमेशैलाधरानाहंनमेधरा ३ किरातमंडलंनेदंममनाहंचमंडलं निजसंकेतमात्रेणकेव
लंदेशस्वमे ४ त्यक्तोमयैषसंकेतोनाहंदेशोनचैषमे इदानींनगरंशिष्टमेषस्वात्रनिश्चयः ५ पताकावनपंक्त्याढ्यामंस्योपवनसंकुला
गजाश्वसामंतयुतापुरीनाहंनमेपुरी ६

तौरहः इहराज्ञोविचारेणस्वात्मलाभउदीर्यते उक्त्वाउपदिश्यस्वंस्वीयंमौनमंडलंमुन्यावासदेशं १२ तत्रापिबाह्येदृश्येआत्मतांआत्मीयतांचविचार्यनिर
स्यतिनाहमित्यादिषड्भिःजगत्परेनऊर्ध्वाधोलोकागत्यंते ३ निजसंकेतःसर्वजनसंमत्यापट्टाभिषेकादिनाअहंराजेतिकल्पनातावन्मात्रेण ४ अत्रएतस्मि
न्नगरेपिसंकेतत्यागादेषएवनिश्चयः ५ तमेवनिश्चयंस्फुटमाहपताकेति ६ 

---

व्यर्थेनसंकेतेनसंबध्यतइतिसंबंधः ७ आकुलःकाकिनीकार्षापणसंबंधवदंधपरंपराव्यवहारसिद्धइतियावत् ८ संकेतमात्रत्यागोपायेनवाह्यैःसर्वंधंनिरस्यअचे
तनत्वहेतुनादेहेंद्रियादिमिरपितंनिरसितुमारभतेदेहमात्रमित्यादिना ९ संश्लेषंसंबंधमपिनैति असंगत्वादित्यर्थः १० ११ १२ बुद्धींद्रियाणिज्ञानें
द्रियाणि १३ अथबुद्धिरहंकारइतियादृश्यतइतिदृष्टिःसापिनाहंनममेत्यनुषज्यतेयतःसामनोमयीअंतःकरणवस्थाभेदरूपेतियावत् १४ श

मंबधं व्यर्थसंकेतसंकेतविगमेसतं भोगवृंदंकलत्रंचनाहंनैतन्ममाखिलं ७ एवंसमस्तंसबलंसवाहनपुरांतरं नाहंराज्यंनमेराज्यंसंकेतोह्य
यमाकुलः ८ देहमात्रमहंमन्येहस्तपादादिसंयुतं तदिदंतावदाश्वेतरलमालोकयाम्यहं ९ तदत्रतावन्मांसास्थिनाहमेतद
चेतनं नचैतन्ममसंश्लेषमेत्यम्बुस्ययथाजलं १० मांसंजडंनतदहंनैवाहंरक्तमप्यलं जडान्यस्थीनिनैवाहंनचैतानिममक्व
मं चित् ११ कर्मेंद्रियाणिनैवाहंनचकर्मेंद्रियाणिमे जडंयत्किलदेहेस्मिंस्तदहंनैवचेतनः १२ नाहंभोगानमेभोगानमेबुद्धींद्रिया
णिच जडान्यसत्स्वरूपाणिनचबुद्धींद्रियाण्यहं १३ मलंसंसृतिदोषस्यमनोनाहंजडंहितत् अथबुद्धिरहंकारइतिदृष्टिर्मनो
मयी १४ मनोबुद्धींद्रियाद्यंतोमस्तकोशश्चलद्वपुः नाहमेवंशरीरादिःशिष्टमालोकयाम्यहं १५ शेषस्तुचेतनोजीवःसहचेन्ये
नचेतति अन्येनबोध्यमानोसौनात्मतत्त्ववपुर्भवेत् १६

गिरादिमनोबुद्धींद्रियाद्यंतःमस्तकोशःस्थूलसूक्ष्मनसंघातःएवमुक्तरीत्यानाहंशिष्टमवशिष्टंआलोकयामिदृष्ट्याविचारयामीतियावत् १५ चेतनःप्रमा
ताचेन्येनप्रमेयेनसहचेतति तथाचअहमिदंचेतयामीतित्रिपुटीमालिन्याबोध्यमानःअसौप्रमातानआत्मनस्तत्त्ववपुस्ताविकंरूपमितिमंभाव्यतइत्यर्थः १६

एवमनयैवयुक्त्यामासिसंवेद्यंप्रमितिंप्रमेयंचत्यजामिहियस्माच्चेत्यंनाहंकिलेतिप्रसिद्धं विशुद्धचिच्छुद्धसाक्षीअहंआत्मेतिस्थितः निश्चयेप्रतिष्ठितइत्यर्थः
१७ तद्दर्शनमात्रेणकंठचामीकरवत्प्राप्तममाश्चर्यमस्तंतदर्शयतिचित्रमिति कालेनअनादिकालोदारभ्येयतमानोपिअद्यकार्यवान्परमपुरुषार्थफलवान्जा
तोस्मीत्यर्थः १८ एषब्रह्मेषइंद्रइत्यादिश्रुतिगणानुभवेनसंवादयति ब्रह्मणीति १९ अज्ञानांभयहेतुत्वाद्भैरवाकारधारिणी सर्वेषुभावेषुमनोवृत्तिषु

एवंत्यजामिसंवेद्यंचेत्यंनाहंहितत्किल शेषोविकल्परहितोविशुद्धंचिदहंस्थितः १७ चित्रमेषोस्मिलब्धआत्माजातःकालेनकार्य
वित् एषमोहमनंतात्मानीतोस्म्यपरमात्मनः १८ ब्रह्मणीद्रेयमेवायंसर्वमस्तगणेतथा सम्यग्भगवानात्मातंतुर्मुक्तास्विवस्थितः १९
चिच्छक्तिरमलामेषाचेत्यामयविवर्जिता सरिताशेषदिक्कुंजाभैरवाकारधारिणी २० सर्वभावगतासूक्ष्माभावाभावविवर्जिता आ
ब्रह्मभुवनांतस्थासर्वशक्तिसमुद्रिका २१ सर्वसौंदर्यसुभगासर्वप्राकाश्यदीपिका सर्वसंसारमुक्तानांतंतुरातततरूपिणी २२
सर्वाकारविकाराढ्यासर्वाकारविवर्जिता सर्वस्तोघतांयातासर्वदासर्वतांगता २३ चतुर्दशविधान्येषास्तानिभुवनोदरे सततम
यीयंकलनाजागतीवेदनात्मका २४ मिथ्यावभासमात्रंतुसुखदुःखदशागतिः नानाकारमयाभासःसर्वमात्मैवविस्तरा २५ सोय
मात्मासमव्यापीसेयंयदवबोधनं सेयमाकलितांगाभाकरोतिन्रपविभ्रमं २६ अस्याःसवप्रमादेनमनोदेहस्थेस्थितं संसारजालली ला
सुयातिवल्गतिनृत्यति २७ इदंमनःशरीरादिनकिंचिदपिवस्तुतः नष्टेनकिंचिदप्यस्मिन्परिनश्यतिपेलवे २८



गतागतिबोधविदितंमतमितिश्रुतेः २१ सर्वसौंदर्यंनिरतिशयानंदस्तेनसुभगापूर्णा संसारलक्षणानांमुक्ताफलानां २२ २३ भुवनसंख्ययाचतुर्दशविधा
निभूतानिधत्तेइतिशेषः २४ २५ व्यापीजगदनुगतः अवबोधनंसंबुद्धिसाक्षीसेयंचितदृश्यदृश्यमेरेनकलितशरीरामतीन्नपोहमितिविभ्रमंकरोतिप्राकृतवतीत्यर्थः
२६ २७ २८

एतयाउक्तयामासिरूपया २९ ३० ३१ चितोयोनिष्पंदःमाययाजीवभावस्त्रमस्तदंशःसप्तदशकलिंगभ्रमस्तस्यमात्राःबाह्यांतःकरणभेदस्त्रमात्लदंशोजाग्रत्स्वप्नदृश्यभ्र
मस्तस्मादन्यत्किंचित्स्थाशवतंकालत्रयाबाध्यंदृश्यंनविद्यतइत्यर्थः ३२ एवंजगतोमृषात्वेनिग्रहानुग्रहकर्मोतत्प्रयोजकहर्षामर्षकर्मोचनिराश्रयोनिष्प्रकारोनि
र्विषयोनिस्वरूपोचसंपन्नावित्याह क्वेति ३३ स्वमोहेपगतेसुखदुःखादिप्रसक्तिरेवनास्तीत्याहकिमिति सांप्रतंअस्तदःस्वरूपेस्थितोस्मीत्यर्थः ३४ एवं

जगज्जालमयंन्यत्नमिदंचित्तनटैस्ततं सतयैवैकयाबुध्यादृश्यतेदीपलेखया २९ कष्टंमुधैवमेचिंतानिग्रहानुग्रहस्थितौ बभूवदेहनि
ष्ठेहनकिंचिदपिदेहकं ३० अहोत्वहंप्रबुद्धोस्मिगतंदुर्दर्शनंमम दृष्टंद्रष्टव्यमखिलंप्राप्तंप्राप्यमिदंमया ३१ सर्वंकिंचिदिदंदृश्यंदृश्य
तेयज्जगद्गतं चिन्निष्पंदांशमात्रांशान्नान्यत्किंचनशाश्वतं ३२ क्वतौकीदृग्विधौवापिकिंनिष्ठौवाकिमात्मकौ निग्रहानुग्रहौलोकेहर्षाम
र्षक्रमौतथा ३३ किंसुखंकिंतुवादुःखंसर्वंब्रह्मेदमाततं अहमासंमुधामूढोदिष्ट्यामूढोस्म्यहंस्थितः ३४ किमस्मिन्नेवमालो
केशोच्यतेकिंविमुह्यते ३३ किंप्रेक्ष्यतेकिंक्रियतेस्थीयतेवाथगम्यते ३५ किंचिदेवमिदंनामचिदाकाशंविराजते नमोनमस्तेनिस्तत्त्वरि
स्यादृष्टोसिसुंदर ३६ अहोनुसंप्रबुद्धोस्मिसम्यग्ज्ञातमलंमया नमोमह्यमनंतायसम्यग्ज्ञानोदयायच ३७

आनंदैकरसस्वभावेनालोक्यते अनुभूयतइत्येवमालोकस्तस्मिन्किंशब्दाः आक्षेपेशोकादिसंभावनैवनास्तीत्यर्थः ३५ किंचिदलौकिकचमत्का
रदृष्टंचिदाकाशं ३६ सम्यग्ज्ञानेनदयआविर्भावोयस्यतथाविधायचकारःपूर्वश्लोकनमस्कार्यसमुच्चयार्थः सम्यग्ज्ञानलक्षणायास्मुखायचेतिवा ३७

DR BHAU DAJI MEMORIAL

विगतरंजनत्वादेव निर्मलत्वावस्थात्मविषयस्थितिरिति शोधितत्वंपदार्थनिर्देशः गतभवभ्रमत्वादेव विश्वस्याध्यारोपं जितवर्जितेति शोधिततत्पदार्थनिर्देशः भावेक्तः स्थिर
यासुषुप्तिकलयासाम्ययुक्त्ये वउपाधिविगमादभिगतस्वैकीभूतइत्यखंडैक्यनिर्देशः ततस्तस्मादहं आत्मनि प्रत्यग्ब्रह्मणि सममसमं आश्यति कामेदलक्षणां परमसाम्ये
ननिवसामि न कदाचिदपि मे पुनर्वैषम्यप्रसक्तिरिति फलावस्थानिर्देशः ॥३८॥ इतिश्रीवसिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे एकोनषष्टितमः सर्गः ५९ आदेहपा

विगतरंजननिर्विषयस्थितिर्गतभवभ्रमरं जितवर्जिते। स्थिरसुषुप्तकलाभिगतस्ततः समसमं निवसाम्यहमात्मनि ॥ ३८ मोक्षो
पाये उपशमप्रकरणे रघुविश्रांतिर्नाम सर्गः ॥ ५९॥ श्रीवसिष्ठ उवाच। इति हे मजदाधीशोक्ते मे परमनुत्तमं। विवेकाध्यवसायेन
ब्राह्मणमिव गाधिजः ॥ १ ॥ अनर्थाकारकार्यासु नासीश्चेष्टासु खेदवान्। भूयोभूयः प्रयुक्तासु दिनमालासु विश्वेश्वरः ॥ २ ॥
ततः प्रभृति सोतिष्ठत्सर्वदा विगतज्वरः समासमेस्वके कार्ये जलोघाग्र इवाचलः ॥ ३ ॥

तं सुरघोरसंगाचार उच्यते। जीवन्मुक्तस्य तस्याथ देहशांतौ खवत्स्थितिः गाधिजो विश्वामित्रः ॥ १ ॥ भूयोभूयः पुनः पुनः प्रयुक्तासु अनुष्ठितासु धर्मार्थं प्रस्तुपा
यचेष्टासु परचेष्टितैर्दैवादनर्थाकाराति विफलानि दुःखपर्यवसितानि वा कार्याणि फलानि यासां तथाविधासु सत्स्वपि खेदवान्नासीत् ईश्वरो दिनेश्वरः सूर्यः ॥ २ ॥ 
समासमे अनुग्रहनिग्रहरूपे निजे राजोचिते कार्ये यथा नदीमध्यगतः पर्वतो निष्कंपस्तिष्ठति तद्वत् ॥ ३ ॥

कार्यमाय व्ययादि आहरन्कुर्वन् ॥ ४ ॥ सुषुप्ताविव निश्चलयेतिया वत् ॥ ५ ॥ अमत्सरीति पाठे अत्यंतनिर्मत्सर वत्सरदोषोपेक्षकः ॥ ६ ॥ अचापलधीरयेति छेदः पी
 ष्टरीयोऽर्णवेंदुर्नवत् ॥ ७ ॥ सइत्यस्य समाधिस्थो भूदिति परेणान्वयः । तत्र हेतुर्यतस्तस्य परिपूर्णामतिर्बभाविति ॥ ८ ॥ उद्यन्सन्न्युपाविकसन्चेतसा प

हर्षामर्षविनिर्मुक्तः प्रत्यहं कार्यमाहरन्। उदारगंभीरवपुर्जहारांबुनिधेः श्रियं ॥ ४ ॥ सुषुप्तपदधर्मिण्या चित्तवृत्त्याव्यरा
जत ॥ निष्कंपयाप्रकाशिन्या दीपः स्वशिखयेवसः ॥ ५ ॥ न निर्दयो न दयावान्नो न द्वंद्वी नाथमत्सरी ॥ न सुधीर्नासुधीर्नार्थी नान
र्थी समवभूव ह ॥ ६ ॥ समदर्शनया नित्यं वृत्त्याऽचापलधीरया ॥ अंतःशीतलया रेजे परिपूर्णार्णवेंदुवत् ॥ ७ ॥ सर्वं चित्तत्वकल्पनं
जगदित्यवलोकयन्। प्रशांतसुखदुःखश्रीस्तस्य पूर्णा मतिर्बभौ ॥ ८ ॥ उद्यन्नविकसन्पूर्णास्तिष्ठन्नाप्तनिशानस्वपन्
अभूत्समसमाधिस्थः प्रबुद्धश्चिद्द्रयं गतः ॥ ९ ॥ स कुर्वन्विगतासंगं राज्यं राजीवलोचनः ॥ आक्रांतदक्षताकारो भूरिवर्षश
तान्यथ ॥ १० ॥ सन्निवेशमिमं देहनामकं तदनु स्वयं। स जहौ तेजसाक्रांतो रूपं हिमकणो यथा ॥ ११ ॥ विवेशपरमाद्यं तकारणं
कारणेश्वरं। प्रज्ञयामरितां वारि परिपूर्णमिवांबुधिम ॥ १२ ॥

१० आक्रांतः शोषितः स्वर्पः स्वर्तकारं ११ सर्वेषामेवांतः करणानां हिरण्यगर्भादीनामीश्वरं नियंतारं सर्वजगतामाद्यंतयोः सृष्टिप्रलययोः कारणं परं ब्रह्म प्रज्ञ
यामाश्यान्नागृत्या जन्मादिहेतुबीजशक्त्याविद्यावरणबाधेन सरितां वारि कूलद्वयपरिच्छेदत्यागेन पूर्णमर्णवमिव विवेशेत्यर्थः १२ ।

तत्रविश्रयासौकीदृगस्तत्राह अधिगतेति। असौरघुः प्रज्ञयाअधिगतंस्वात्मतयाप्राप्तं विमलंएकरूपमानंदैकरसंतेजः स्वप्रकाशात्मरूपंयेनतथाविधःसन् विजनांजन्मादिविक्रियाहीनांदशांसमुपेत्यशांतसर्वशोकःसन् घटभंगेघटखंअंबरेणमहाकाशेनसंयुतमेकीभूतमिवपरस्वरूपमेवअभवततदेवास्यनिर्वाणमित्यर्थः। ९३। इतिश्रीवासिष्ठतात्पर्यप्रकाशेउपशमप्रकरणेषष्टितमःसर्गः। ६०। सहजैकसमाधानलक्षणप्रतिपत्तये परिघेणात्रसंवादः सुरघोरुपवर्ण्यते। हेराघवअस्यसुरघुवत्त्वमपि

समुपेत्यशां॰ अधिगतविमलैकरूपतेजाविजनदशांतशोकः। अलमभवदसौपरस्वरूपंघटखमिवांबरसंयुतंमहात्मा॥ ९३॥ मोक्षोपाये उपशमप्रकरणे सुरघुवृत्तांतेसुरघुनिर्वाणंनामसर्गः॥ ६०॥ श्रीवसिष्ठ उवाच। एवमुत्पलपत्राक्ष राघवाद्य विपर्यये। पदमासाद्य यादृग्भूविशोकोभवभूतये॥ १॥ एतांदृष्टिमवष्टभ्य नमनःपरितप्यते। घोरेतमसि निर्मग्नंलब्धदीपंशिशुर्यथा॥ २॥ विवेकावस्थयावेतस्तथैवायातिनिर्वृतिम्। पतच्छ्रमेदृढतृणप्रचयालंबनादिव॥ ३॥ अथैतांपावनींदृष्टिंभावयित्वापुरा हरन्। नित्यमेकसमाधानोभवभूषितभूतल॥ ४॥

श्रीरामउवाच। कथमेकसमाधानंकीदृशंवामुनीश्वर। वाताहतमयूरांगरुहलोलंमनोभवेत॥ ५॥ श्रीवसिष्ठउवाच। अत्रशृणु वृत्तंसुरघोःप्रबुद्धस्यमहात्मनः। पर्णादस्यचराजर्षेःसंवादमिममद्भुतं॥ ६॥ एवमेकसमाधानबोधितात्मयोजितात्मनोः। परस्परं समालापमिमंप्रकथयामिते॥ ७॥

अघस्यहर्षशोकादिनिमित्तस्यपापस्यविपर्ययेतत्त्वबोधेनसमूलमुच्छेदेसति। १। शिशुर्बालइवघोरेअज्ञानतमसिनिर्मग्नंमनःएतांदृष्टिमवष्टभ्यलब्धदीपंप्राप्तप्रकाशंसततेनपरितप्यते। २। एवंभ्रमोमोहांधकूपेपतन्मनः। तयाताद्दृश्यासुरघुपवर्णितप्रकारयेवविवेकावस्थयादृढस्यतृणप्रचयस्यफक्षस्यआलंबनादिवनिर्वृतिंविश्रांतिसुखं ३ भावयित्वापुनःपुनःपरिशीलनेनस्वयंदृढीकृत्यान्येभ्योपुरा हरन्नुपदिशन्। ४। वातेराहतंमयूरांगरुहंबर्हमिवलोलंचपलंमनःएकसमाधानेकथंकेनप्रकारेणभवेत ५ ६ हेराघवएकसमाधानेबोधितआयोजितआत्माययोः ७ उप॰ १८२

पारसीकादेशविशेषात्पार्थिवोराजास्पंदनेरथेपरिघोऽर्गलंदंडइवाधारभूतः। ८ माधवोवसंतः ९ अवर्षअनावृष्टि किंराजदोषात्नेत्याहप्रजेति। १०। ११। १२ अजिनप्रधानःमुनींद्राअजिनमुनींद्रास्तद्वत्। १३। अपरेद्वितीयेलोकांतरेपरलोकइवेत्युत्प्रेक्षा। १४। अतिविरक्तत्वात्पर्णकुड्यादिपरिग्रहोप्यस्यनाभूदितिसूचनायकंदर

बभूवपारसीकानांपार्थिवःपरवीरहा। परिघोनामविख्यातःपरिघःस्पंदनेयथा॥ ८॥ सबभूवपरंमित्रंसुरघोरघुनंदन। नंदनोद्यानसंस्थस्यमदनस्येवमाधवः॥ ९॥ कदाचित्परिघस्याभूदवर्षमंडलेमहत्। कल्पांतइवसंसारेप्रजादुष्कृतदोषजो॥ १०॥ विनेशुर्जनतास्तत्रबह्व्यःक्षुत्क्षामतनुविग्रहाः। ज्वलितेविपिनेवन्योयथाभूतपरंपराः॥ ११॥ तदुःखंपरिघोदृष्ट्वाविषादमतुलंययौ। तत्याजाशवरिलंराज्यंदग्धंग्राममिवाध्वगः॥ १२॥ प्रजानाशप्रतीकारेष्वसमर्थोविरागवान्। जगामविपिनेकर्तुंतपोजिनमुनींद्रवत्॥ १३॥ पौराणामपरिज्ञातेकस्मिंश्चिद्दूरकानने। समुवासविरक्तात्मालोकांतरइवापरे॥ १४॥ तपश्चरंश्चांतमतिर्दांतःकंदरमंदिरे। स्वयंशीर्णानिशुष्काणितत्रपर्णान्यभक्षयत्॥ १५॥ चिरंहुताशवच्छुष्कपर्णान्येवाथभक्षयन्। पर्णादइतिनामासौप्रापमध्येतपस्विनां॥ १६॥ ततःप्रभृतिपर्णादनामाराजर्षिसत्तमः। जंबूद्वीपेबभूवासौविख्यातोमुनिसत्तम॥ १७॥ ततोवर्षसहस्रेणतपसाराहणात्मना। आपस्म्याखवशतोज्ञानमात्मप्रसादजं॥ १८॥ बभूवविगतद्वंद्वोनिराशःशांतमानसः। निरागोनिरनुक्रोशोजीवन्मुक्तःप्रबुद्धधीः॥ १९॥

मंदिरेइत्युक्तं अमौपरिघः १७ आत्मप्रसादश्चित्तशुद्धिः ईश्वरानुग्रहश्चतस्माज्जातंतत्त्वज्ञानंप्रापतप्राप्तवान् १८। १९

सिद्धैः साध्यैः सह हक्षमिथ्यकदाचित्परिवृतः। हंसैः सहितः सहंसः अलिर्भ्रमरः॥ अब्जिनीं कमलिनीमिव। २०। हेमचूडः स्वर्णजटाख्यो देशस्तन्महीपतेः सुरघोः। २१। मौर्ख्यसंसारस्तस्माद्धि निर्गतौ जीवन्मुक्तावित्यर्थः। २२। कल्याणैः फलितमितिमावैकः। २३। २४॥ चितिशक्तिप्रधाने आनंदाविर्भावः मननशक्तिःप्रधाने तापोपशम इति विशेषद्योतनाय चेतोमन इति भेदोक्तिः। २५। अछिन्नमूला छिन्नशाखो द्रुम इवेति योज्यं। २६। विश्रब्धान् विश्वासगर्भान् तान् प्राक्तनान्

विजहार यथाकामं त्रिलोकीमठिकामिमां। सिद्धैः साध्यैः समं साधो सहंसालिरिवाब्जिनीं॥२०॥ एकदा तस्य सदनं हेमचूडमहीपतेः प्राप रत्नविनिर्माणं मेरोः शृंगमिवापरं॥२१॥ तेतत्र प्राक्तने मित्रे पूजां मकुरुतां मिथः। पूर्णौ विज्ञातविज्ञेयौ मौर्ख्यगर्भाद्धि निर्गतौ॥२२॥ अहो नु बत कल्याणैः फलितं मम पावनैः। संप्राप्तवानहं यत्त्वामित्यन्योन्यमथोचतुः॥२३॥ आलिंगितशरीरौ तावन्योन्यानंदितात्कृतौ। एकासने विविशतुश्चंद्रार्काविवमूर्धरे॥२४॥ परिघ उवाच॥ परमानंदमायातं चेतस्त्वद्दर्शनेन मे। इंदुबिंब इवोन्मग्नं मनः शीतलतां गतं॥२५॥ अकृत्रिमसुखं प्रेम वियोगे शतशाखतां। प्रयाति पल्लवलतादेछिन्नमूल इव द्रुमः॥२६॥ विश्रब्धांस्तान्कथालापांस्ता लीलास्तच्च वेष्टितं। संस्मृत्य प्राक्तनं साधो हृष्यामि च पुनः पुनः॥२७॥ ज्ञानमेतन्मया प्राप्तं त्वया ज्ञातं यथानघ। मांडव्यस्य प्रसादेन परमात्मप्रसादजं॥२८॥ अद्य कच्चिद्दुःखस्त्वं कच्चिद्विश्रांतवानसि। परमे कारणे मेरावि वसुमंडलाधिपः २९

सुखदुःखकथालापान्। २७। त्वया यथा मांडव्यस्य प्रसादेन ज्ञातं तथैव मया परमात्मन ईश्वरस्य तपसाऽऽराधितस्य प्रसादजं एतज्ज्ञानं प्राप्तं। २८। परमे कारणे विवर्तोपादाने तत्त्वोपलक्षिते ब्रह्मणि कच्चिदुत्तरोत्तरभूमिकापरिपाकेन विश्रांतवानसि। २९। 

प्रसादो रजस्तमोभ्यामनावरणं। ३०। कार्याणि सर्वजनहितत्वादवश्यकर्तव्यान्येव कार्याणि कर्माणि करोषि। ३१। जनताः प्रजासमूहाः। ३२। धारा पृथ्वी उद्दामफलिनी उत्कृष्टसस्यफलवती फलैरानम्रा फलिनी कल्पलतेव तव प्रजाः फलाग्रैः काले काले तत्तदभिलषितफलप्ररोहैः भृशं अतिशयेन बिभर्ति पोषयति। ३३। चंद्रस्य अंशुपंजरं किरणजालमिव ३४ सरोभ्यः सासाभ्योगोदकेन अवाप्ताः स्वांतर्गताः विसानां मृणालानां भूमयइव त्वया दिशः गुणगणौर्यशोभिर्निर्विवरीकृताः पूरिताः कच्चित। ३५। कलमकेदाराणां कोणा

कच्चित्परमकल्याण आत्मारामतया तव॥ प्रसादो जायते चित्ते शरदीव सरोंभसि॥३०॥ कच्चित्करोषि समया सुप्रसन्नगभीरया। दृष्ट्या सुभगकार्याणि कार्याण्येव नराधिप॥३१॥ निराधिव्याधयो धीराः कच्चित्संपन्नशालयः। जनतास्तव देशेषु तिष्ठंति विगतज्वरं॥३२॥ कच्चिदुद्दामफलिनी फलिनीव फलानता। धरा तव फलाग्रैर्भृशं धारयति प्रजाः॥३३॥ कच्चित्तव दिगंतेषु चंद्रस्येवांशुपंजरं। तुषारनिकराकारं प्रसृतं पावनं यशः॥३४॥ कच्चिद्गुणगणौरेता दिशो निर्विवरीकृताः। त्वया सरोंभसा बाप्ता बिसानामिव भूमयः॥३५॥ कच्चित्कलमकेदारकोणस्थानेषु हृष्यतीः॥ प्रतिग्रामं कुमार्यस्ते गायंत्यानंदनं यशः॥३६॥ कुशलं तव धान्येषु धनेषु विभवेषु च॥ भृत्येषु च कलत्रेषु पुत्रेषु नगरेषु च॥३७॥ आधिव्याधिविहीने यः कच्चित्कायस्तातव। फलं फलति पुण्याख्यं यदिहामुत्र चोदितं॥३८॥

स्थानेषु कलमं धयंत्यत्र त्वेषां अंतीस्थानेषु हृष्यतीः हृष्यंत्यः छांदसो विभक्तिव्यत्ययः। ३६। ३७। इह से हिकफलत्वेन चोदितं कारीर्यादि अमुत्र पारलौकिकफलत्वेन चोदितं ज्योतिष्टोमादि। ३८।

तव मनः विषयसर्पेषु कच्चित्त्वविरागं वैर्तते वर्त्तते ॥ ३९ ॥ ५० ॥ इष्टानिष्टजनसंयोगजास्तद्वियोगजाश्च सुखदुःखदशाः ॥ ५१ ॥ अन्यत्वं वियोगमागताः प्राणिनियतेः प्राणिकर्मानुसारिण्याईश्वरेच्छयाः विधिर्विलासश्चित्रः अद्भुतः ॥ ५२ ॥ परीयोक्तमर्थमनुमोदमानः सुरघुराघ भगवन्नित्यादिना दैविक्याः दैवईश्वरस्तदिच्छारूपायाः ॥ ५३ ॥ देशतः दूरे कालतश्च दूरदशासु इति एवं व्यपोह्य वियोज्य ॥ ५४ ॥ ५५ ॥ तथा तादृशचित्तसमाधानात्मना फलितं यथा वयं न व्याकुलाः सर्वव्याकुलता

आपातरमणीयेषु वैर्नेतात्यंतवैरिषु ॥ कच्चिद्विषमसर्पेषु सविरागं मनस्तव ॥ ३९ ॥ अहो बत चिरं कालमावां विश्लेषमागतौ ॥ कालेन श्लेषितौ भूयो वसंतादितटाविव ॥ ५० ॥ न ता जगति विद्यंते सुखदुःखदशाः सखे ॥ जीवद्भिर्याः न दृश्यंते संयोगजवियोगजाः ॥ ५१ ॥ तथैता स्वतिदीर्घा सुदशास्त्वन्य लमागताः ॥ भूयो वयमपि श्लिष्टाश्चित्रो हि नियतेर्विधिः ॥ ५२ ॥ सुरघुर्वाच ॥ भगवन्नियतेरस्या गतिं सर्पगतेरिव दैविक्याः को हि जानाति गंभीरां विस्मयप्रदां ॥ ५३ ॥ त्वमहं च व्यपोह्येति दूरे दूरदशासु च ॥ अद्य संदृतौ भूयः किमसाध्यमहो विधेः ॥ ५४ ॥ वयं त्वद्य महात्मन्शंकुशालिनः स्थिताः ॥ त्वदागमनपुण्येन परां पावनतां गताः ॥ ५५ ॥ पश्य त्वदागमक्षीणपापानां पुण्यमादृशैः ॥ तथा फलितमस्माकं न यथा वयमाकुलाः ॥ ५६ ॥ सर्वाः संपत्तयोस्माकं राजर्षे संस्थिताः पुरे ॥ भवदागमनेनाद्य प्रयाताः शतशाखतां ॥ ५७ ॥ विकिरद्विपरितोरसायनानामिव निकरं मधुरं महानुभाव ॥ तव वचनमवेक्षणं च पुण्यं परमपदं प्रतिमोहि साधुसंगः ॥ ५८ ॥ मोक्षोपाये उपशमप्रकरणे सुरघुपरिघ

निर्मुक्ताः कृतकृत्याः संपन्नाः ॥ ५६ ॥ शतशाखतां सर्वतः फलोन्मुखतामितियावत् ॥ ५७ ॥ हे महानुभाव पुण्यं तव वचनं अवेक्षणं दर्शनं च परितोरसायनानाममृतानां निकरं विकिरति वर्षतीव हि यस्मात्साधूनां संगः समागमः परमपदं प्रति मोक्षसुखप्राप्तितुल्य इत्यर्थः ॥ ५८ ॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे एकषष्ठितमः सर्गः ॥ ६१ ॥ रा॰ १८५

अज्ञानावरणे ध्वस्ते नित्यविस्फुरणस्थितेः ॥ सदैवैक समाधानं विदुषामत्र वर्ण्यते ॥ आत्मधस्याभिधानामयस्य आयुधाभिधः परिघः ॥ १ ॥ किमयं तत्त्वविदो व्यवहारसमाध्योः सुखताः तम्यं इच्छन्स्तुतेनेतिपरीक्षणाय प्रथमं स्वानुभवं उद्घाटयति सद्वदिति अन्यस्य अज्ञस्य ॥ २ ॥ एवं स्वानुभवमुद्घाट्य त्वं वा दीवेति परानुभवं जिज्ञासमानः समाधौ विश्रांत्यापि क्व मिवदर्शयन्प्रच्छति कच्चिदिति ॥ विक्षेपदुःखानां परमम् उपशमं संसारिकसुखेभ्यश्च श्रेयः प्रश्नश्च अनुपपन्न एवेति ॥ त्वदनुभवं संवादेनाप्नोत्यनुभवं इत्याशयेन सुरघुः संकल्प॰ बा॰ सं॰ २

प्रपञ्चस्यान्तरं सामान्येन्येन सबवाल्मीकिता ॥ ३ ॥ समाहितचित्तस्य सर्वकर्मतुल्यत्वोपशमत्वे समाधौ विश्रांत्यापि क्व दर्शनं व्यवहारसमाधिमेदाभ्युपगमेन × १४

श्रीवसिष्ठ उवाच ॥ अथैवं श्रामयात्तत्र विश्रंभकथया चिरं ॥ प्राक्तनस्नेहगंभीरया स्थितो वा चायुधाभिधः ॥ १ ॥ परिघ उवाच ॥ यद्यत्संसारजाले स्मिन्क्रियते कर्म भूमिपाः ॥ तत्समाहितचित्तस्य सुखायान्यस्य नानघ ॥ २ ॥ कच्चित्त्वं कल्पनारहितं परं विश्रमणास्पदं ॥ परमोपशमं श्रेयः समाधिमनुतिष्ठसि ॥ ३ ॥ सुरघुरुवाच ॥ एतन्मे ब्रूहि भगवन्सर्वसंकल्पवर्जितं ॥ परमोपशमं श्रेयः समाधिरिति किमुच्यते ॥ ४ ॥ यो ज्ञो महात्मन्सततं तिष्ठन्व्यवहरंश्च वा ॥ असमाहितचित्तोसौ कदा भवति कः किल ॥ ५ ॥ नित्यप्रबुद्धचित्तास्तु कुर्वंतोपि जगत्क्रियाः ॥ आत्मैकतत्त्वसंनिष्ठाः सदैव सुसमाधयः ॥ ६ ॥

रहितं परमोपशमं श्रेय इति ॥ तदुक्तं शम्यात्मस्वरूपेपि संभवात्तावदभ्युपगच्छन्विश्रमणास्पदं समाधिमनुतिष्ठसीत्यंशस्य समाधेयस्य विश्रमहेतो मनसो बाधितत्वादेवासंभवं मन्यमान आक्षिपति एतदिति सर्वसंकल्पवर्जितं परमोपशमं श्रेय इत्यतन्मेसम्यक्त्वात्क्वहि समाधिरनुष्ठेय इति किमर्थं त्वयोच्यत इत्यर्थः ॥ ४ ॥ यः ज्ञः तत्त्ववित्सः व्यवहरन्नपि कः किंस्वरूपः किल येतः सदैवानावृताहृदयचित्तस्वभावोसौ कदाप्यसमाहितचित्तो भवति न कदाचिदपीत्यर्थः ॥ ५ ॥ यदि तु निश्चलात्मस्वरूपावस्थितेरेव समाधित्वमिमतः स्यात्तर्हि समदैवास्तीति नानुष्ठेयं किंचिदस्तीत्याह नित्यामिति ॥ ६ ॥

वा॰टी॰उप॰ १८५ यदि त्वं मामहं मन्यसे तदापि समाध्युपदेशो नुपपन्न इत्याशयेनाह वद्धेति । कथं केनोपायेन वा यत्र चित्तं समाधेयं तस्यैवापरिचयादित्यर्थः ॥ ७ ॥ तत्त्वावबोध इति सम्यक् सम स्तसर्वाशाविषयबाधेनात्मनः परमार्थस्वरूपे आधानं समाधिरिति भावः ॥ ८ ॥ अबाधितात्म दर्शनरूपा परा प्रज्ञा ॥ ९ ॥ तामेव फलतो वर्णयति अक्षुब्धेति द्वा भ्यां ॥ १० ॥ ११ ॥ स्यात्तु ममस्वदैवमेव सिद्धेति नानुष्ठेयेत्याशयेनाह यत इत्यादिना ॥ १२ ॥ यथा हस्मात् कृष्टो बिसतंतुः क्षीणः शिशोर्हस्ताद्विच्छिद्यते तद्वदित्तिरे के दृष्टांतः ॥ १३ ॥ अत्रि॰२

वद्धपद्मासनस्यापि कृतब्रह्मांजलेरपि ॥ अविश्रांतस्वभावस्य कः समाधिः कथं च वा ॥ ७ ॥ तत्त्वावबोधो भगवन् सर्वाशातृणपावकः प्रोक्तः समाधिशब्देन न तु तूष्णीमवस्थितिः ॥ ८ ॥ समाहिता नित्यतृप्ता यथाभूतार्थदर्शिनी ॥ साधो समाधिशब्देन परा प्रज्ञोच्यते बुधैः ॥ ९ ॥ अक्षुब्धा निरहंकारा द्वंद्वेष्वननुपातिनी ॥ प्रोक्ता समाधिशब्देन मेरोः स्थिरतराकृतिः ॥ १० ॥ निश्चिंता अभिगताभीष्टा हेयोपादेयवर्जिता ॥ प्रोक्ता समाधिशब्देन परिपूर्णमनोगतिः ॥ ११ ॥ यतः प्रभृति बोधेन युक्तमात्यंतिकं मनः ॥ तदारभ्य समाधानमव्युच्छिन्नं महात्मनः ॥ १२ ॥ नहि प्रबुद्धमनसोऽन्तर्भाविच्छिद्यते पुनः समाधिर्हस्मात् कृष्टो बिसतंतुः शिशोरिव ॥ १३ ॥ समग्रं दिनमालोकाद्धिरमत्यंशयो यथा ॥ आजीवितां तनोः प्रज्ञा तथा तत्त्वावलोकनात् ॥ १४ ॥

DR BHAU DAJI MEMORIAL

ननु ब्रह्माकारवृत्तिविच्छेदे व्युत्थानात् समाधिविच्छेदः स्यात् तत्राह समग्रमिति ॥ अंशयः सूर्यः उत्तरार्द्ध स्थं तनोः इति पदं सर्वार्द्धे पि नो विरमतीति संबध्यते ॥ तथा प्रज्ञा ब्रह्माकारवृत्तिरपि आजीवितांतं विदेहकैवल्यपर्यंतं तत्त्वावलोकनान्नोपरमति दृढसंस्कारबलादनुवर्तत एवेत्यर्थः ॥ १४ ॥

स्वरूपाच्छादकस्याज्ञानस्य सकृदुदितया हत्यानिःशेषनाशे पुनरावरकाभावाद्वजस्य न स्वरूपनिरोधलक्षणसमाधिभंगप्रसक्तिरित्याशयेनाह अजस्रमिति । न रुध्यते आवरणेन न प्रतिबध्यते ॥ १५ ॥ परमप्रेमास्पदत्वाद्वा सकृद्लब्धस्य तस्य न विस्मरणप्रसक्तिरित्याशयेनाह न विस्मरतीति ॥ १६ ॥ १७ ॥ भग्नावरण आत्मैव याबज्जीवं स्वाकारवृत्तिपरंपरां जनयन्नेवास्ते इत्याशयेनाह ॥ गतिमिति ॥ कालस्य कला मूर्तिः सूर्यादिः चिच्छितिः चैतन्यस्फूर्तिः राहोः शिर इतिवदुपचारः गतयः स्वाकारवृत्तीः छंदसो विभक्तिव्यत्ययः ॥ १८ ॥ बोधस्यात्तज्जीवनकालधर्मत्वाद्वा न विच्छेदप्रसक्तिरित्याशयेनाह यथेति ॥ १९ ॥ अग्नेरुष्ण्यवत्तत्स्वभावत्वाद्वा न विच्छेदप्रसक्तिरित्याशयेनाह न संभव ॥

अजस्रमंबुवहनाद्यथा नद्या न रुध्यते ॥ तथा विज्ञानदृग्बोधात्स्मरणमात्रं न रुध्यते ॥ १५ ॥ न विस्मरत्यविरतं यथा कालः कलागतिं ॥ न विस्मरत्यविरतं स्वात्मानं प्राज्ञधीस्तथा ॥ १६ ॥ न विस्मरति सर्वत्र यथा सततगो गतिं ॥ न विस्मरति निश्चेत्यं चिन्मात्रं प्राज्ञधीस्तथा ॥ १७ ॥ गतिं कालकला यद्वच्चिन्वाना समवस्थिता ॥ चिच्छितिश्चेत्यरहिता चिन्वाना गतयस्तथा ॥ १८ ॥ यथा सत्ताविहीनात्मा पदार्थो नोपलभ्यते ॥ तथात्मज्ञानहीनात्माकालो ज्ञस्य न लभ्यते ॥ १९ ॥ न संभवति संसारे गुणहीनो गुणी यथा ॥ न संभवत्यात्मसंविद्वर्जितो ह्यात्मवांस्तथा ॥ २० ॥ सर्वदैवास्मि संबुद्धः सर्वदैवास्मि निर्मलः ॥ सर्वदैवास्मि शांतात्मा सर्वदास्मि समाहितः ॥ २१ ॥ भेदः केन समाधेर्मे जन्यते कथमेव वा ॥ आत्मनो व्यतिरेकेण नित्यमेव समाहात्मता ॥ २२ ॥ तस्मात् कदाचिदपि मे नासमाधिमयं मनः ॥ न वा समाहितं नित्यमात्मतत्त्वैकसंभवात् ॥ २३ ॥ सर्वगः सर्वदैवात्मा सर्वमेव च सर्वथा ॥ असमाधिर्हि कोऽसौ स्यात् समाधिरपि कः स्मृतः ॥ २४ ॥ नित्यं समाहितधियः सुसमा महांतास्तिष्ठंति कार्यपरिणामविभागमुक्ताः ॥ तेनाऽसमाहितसमाहितभेदभंग्या सन्नोदितः ऋतु — समुत्तमराकस्य पंच ॥ २५ ॥ इत्यध्यायः

भवतीति २० २१ भेदो विच्छेदः सत्समाधेरात्मस्वरूपाद्व्यतिरेकेण हेतुनेत्यर्थः ॥ महात्मता समाहितेत्यर्थः २२ यदि मनो नास्तीति मन्यसे तर्हि मम समाहितमेव यदि तु नास्तीति तदा समाधिरपि मा भूत् विक्षेपहेतोरेवाप्रसक्तेरित्याशयेनोपसंहरति तस्मादिति २३ २४ सम्यक्तत्त्वबोधेन हितार्थाः तेन हेतुना असमाहितसमाहितभेदभंग्या महत्त्वस्य सुदृढ्यमपंचकः कश्चिदप्यवतिष्ठते अतो मिथ्यैवोदितमित्यर्थः २५ इति श्रीवासिष्ठतात्पर्य

परिघेणपरीक्ष्यात्रस्मृतः सुरघुर्निजांसहजस्थितिमेवात्रवर्णयामासविस्तरात् ॥त्वंननिश्चयेनप्रबुद्धस्तत्त्वविदसिपरीक्षणेनमयाप्रबुद्धस्त्वमसीतिवा। १। आनंदेनमधुनामकरंदेनसंस्पर्शो ॥ राजीवंपद्ममिवराजसे ।२। निर्मलत्वादेवप्रकटः स्पष्टदृश्यः आशयः अंतःप्रदेशोमनश्चयस्य ॥३। सर्वत्रइष्टानिष्टविषये ।५। परिच्छेदैर्विचार्यनिर्णीयस्तत्पारगः ॥ अखंडितमपरिच्छिन्नब्रह्मस्वरूपं ।६। तत्त्वज्ञेर्यतंसंबोधनंउदिताशयमितिवाछेदः । गमागमौ आरोहावरोहौ ........ तत्र

परिघउवाच । राजन्त्वंप्रबुद्धोसियथाभवानितित्वदां संशीतलांतःकरणः पूर्णोदुरिवराजसे ॥१॥ आनंदमधुसंस्पर्शोलक्ष्म्याचपरयाश्रितः । शीतलःस्निग्धमधुरोराजीवमिवराजसे ॥२॥ निर्मलोवितितःपूर्णोगंभीरःप्रकटाशयः । वेलानिलविलासेनमुक्तोब्धिरिवराजसे । ३। स्वच्छआनंदसंस्पर्शोनष्टाहंकारवारिदः । स्फुटोविस्तीर्णगंभीरः शरत्वमिवराजसे ॥४॥ सर्वत्रलक्ष्यसेस्वस्थः सर्वत्रपरितुष्यसि । सर्वत्रवीतरागोसिराजन्सर्वत्रराजसे ॥५॥ सारासारपरिच्छेदपारगस्त्वंमहाधिया । जानासिसर्वमेवेदंयथास्थितमखंडितं ॥६॥ भावाभावपरिच्छेदतत्वज्ञमुदिताशयां । गमागमदशालौल्यमुक्तंतववपुःस्थितं ॥७॥ वस्तुनावस्तुनेवांतरम्रतेनेवसागरः । अपुनः प्रसन्नायेवपरितृप्तोसिसुंदर ॥८॥ सुरघुरुवाच । नतदस्तिमुनेवस्तुयत्रोपादेयतास्तिनः । यावत्किंचिदिदंदृश्यंतावदेतन्नकिंचन ॥९॥

योजिकाभोगरागितादशातयातत्संयुक्तलौल्येनचमुक्तं ।७। नविद्यतेवस्तुपरमार्थवस्तुयस्मात्तथाविधेनवस्तुनात्वात्मनास्वांतस्थेनअमृतेनसागरइवपरेस्वेमहिम्नितृप्तोसि ।८। तदुक्तंसर्वयुक्तिभिः समर्थयन्ननुमोदमानः सुरघुरुवाचनतदित्यादिना । नकिंचनअनृतमित्यर्थः ।९।



उपात्तस्यत्यागोदिहानंतत्रप्रतियोगिहानप्रतिकूलंहानेनव्यवच्छेद्यंविनाश्यंतुपादानंविनाहेयमिति । किंउच्यते नकुंशक्यते । नकिंचिदित्यर्थः ।१०। ननुतुच्छंहेयमतुच्छमुपादेयंकिंनस्यात्तत्राहतुच्छत्वादिति । यथाहुः बद्धमुक्तोमहीपालोग्राममात्रेणतुष्यति । सप्तवद्वैसंसदोनराज्यंबहुमन्यतइति ।१२। इदमन्यंतेइतिशेषः ।१३। अतोनकिंचित्तुच्छतुच्छानिचास्तत्यंवेत्याहवर्ज्येइति ।१४। १३। वस्तुशब्दोभावप्रधानः सत्यत्वशून्यानीत्यर्थः ।१४। अध्यात्ममांसास्थिमयेअधिम्रतंवरारुम्रहत्वा दिमयेरत्नशब्दः शिलापरम्परा ध्यायदिसर्वमेवासारंकिंतर्हिसारम्रतंसेवितुमुचितंतत्राहअलमिति । यदिमनः उपशमितरसंसर्वतोनीरागंसमंविक्षेपवैषम्यरहितंस्यात्

उपादेयस्यवाभावाद्धेयमप्यास्तिकिंकिल । प्रतियोगिव्यवच्छेद्यंविनाहेयंकिमुच्यते ॥१०॥ तुच्छत्वात्सर्वभावानामतुच्छत्वाच्चकालतः । चिरंममपरिक्षीणेतुच्छातुच्छेमनःस्थिती ॥११॥ देशकालवशादेवतुच्छस्यातुच्छतामिह । अतुच्छस्यतुतुच्छत्वंवर्ज्येनिदास्तुतौबुधैः ॥१२॥ रागान्निदास्तुतीलोकेरागश्चपरिवांछिते । वांछ्यतेचमहोदारंवस्तुशोभनबुद्धिना ॥१३॥ त्रैलोक्येचरस्त्रियः शैलाः समुद्रवनराजयः । म्रतानिवस्तुशून्यानिसारोनास्त्यत्रवस्तुतः १४ मांसास्थिदारुम्रद्रत्नमयेजगतिजर्जरे । वांछनीयविहीनेस्मिन्शून्येकिमिववांछ्यते ॥१५॥ वीछायांविनिहृत्तायांसंक्षयोहेयरागयोः । दिनलक्ष्म्यांव्यपेतायामालोकातपयोरिव ॥१६॥ अलमतिविततैर्वचः प्रपंचैरियमुचितेहमुराधयद्दृष्टिरेका । उपशमितरसंसमंमनोंतर्यदिमुदितंतदनुत्तमाप्रतिष्ठा ॥१७॥ मोक्षोपायेउपशमप्रकरणेसुरघुपरिघनिश्चयः सर्गः ६३

श्रीवसिष्ठउवाच । सुरघुःपरिघश्चैवविचार्येतिजगद्भ्रमं । मिथः सपूजितौतुष्टौस्वव्यापारपरौगतौ ॥ तदेवराघवस्वात्मापरमंबोधकारणं

अंतःस्वात्मन्येवमुदितंतत्रहिंसैवोत्तमाप्रतिष्ठाविश्रांतिरियमेवैकदृष्टिः सुरत्वाधयद्दामेवितुमुचि । अनेनेषविबोधेनमवलब्धास्पदः स्फुटम् ।२।

तेत्यर्थः ।१७। इतिश्रीवासिष्ठतात्पर्यप्रकाशेउपशमप्रकरणेत्रिषष्टितमः सर्गः ।६३। येरूपायेरूपामज्ञोमनोदोषैर्नबाध्यते । आत्माचोद्ध्रियतेदुःखात्तउपायाइहोदिताःइतिविर्णितप्रकारेणविचार्य १ तदुदितंसर्वस्वरूपंबोधकारणंश्रवणमननादेवश्रवणावधारितंबोधायपर्याप्तमितिस्वनायप्रथमस्वकारः एतावद्धौपस्वमप्रतिष्ठितः परमपदमाप्तयेपर्या

[illegible]

धीरैर्विद्वद्भिः सहविचारेण स्वविचारेण च गततीक्ष्णया प्राप्तनिशितभावया ॥ हृदंबरे अहंकारलक्षणे कालमेघे गलति सति । ३ । समस्तेत्यादि विशेषणानि शरत्काले पियोज्यानि ॥ ४ । सर्वानर्थनिवर्तकत्वाच्छरण्ये । ५ । अध्यात्ममय आत्मैकविचारप्रचुरः । अंतर्मुखो बाह्यासक्तिशून्यः । चित्स्वैवात्मसंधानं पुनः पुनरादरादास्वादनं यस्य । ६ । रागद्वेषमयः रागद्वेषप्रचुरइव मूढैः कल्प्यमानोपि ॥ ७ ॥ ८ ॥ दुर्द्रुमो विषकंटकवृक्षः हि यस्मात् इत्थं चित्तं महावपुः स्फटइसुखलवनिस्पृहमिति यावत् ॥ ९ । यथा विरक्तो मा

परया प्रज्ञया धीरविचारगततीक्ष्णया ॥ गलत्यलमहंकारे कालमेघे हृदंबरे ॥ ३ ॥ समस्तलोकानुमते सफले ह्लादकारिणि ॥ निर्मले वितते चेतःशरत्काले उपस्थिते ॥ ४ ॥ ध्येये शरण्ये सुगमे सकलानंदसंपदि ॥ सुप्रसन्ने चिदाकाशे स्थीयते परमात्मनि ॥ ५ ॥ यो नित्यमध्यात्ममयो नित्यमंतर्मुखः सुखी ॥ नित्यं चिरंतनुसंधानो मनःशोकैर्न बाध्यते ॥ ६ ॥ व्यवहारपरोप्युच्चै रागद्वेषमयोपि सन् ॥ नांतः कलंकमाप्नोति पद्मो जलगतो यथा ॥ ७ ॥ सम्यग्विज्ञानवान्शुद्धो योंतःशांतमना मुनिः ॥ न बाध्यते समनसाकरिणेव मृगाधिपः ॥ ८ ॥ भोगैकशरणं दीनं न चित्तं ज्ञस्य विद्यते ॥ नंदने दुर्द्रुम इव ज्ञचित्तं हि महावपुः ॥ ९ ॥ विरक्तो जन्ममरणे यथा दुःखी न मानवः ॥ परिज्ञाताखिलाविद्यं तथा चित्तं न दुःखितं ॥ १० ॥ परिज्ञातमनोमोहो जगद्भावोद्भवात्मना ॥ स्पृश्यते नैनसा साधो रजसेव नभस्तलं ॥ ११ ॥ अविद्यासंपरिज्ञानमिदमेव महौषधं ॥ अविद्याविततव्याधेस्तिमिरस्येव दीपकं ॥ १२ ॥ मं२

क

मानवः जायामरणे सति कामुंइव न दुःखी तथा परितो विचार्य ज्ञाता अखिला विषयेंद्रियशरीरादिसर्वदृश्यतत्त्वरूपा अविद्या मिथ्याभ्रांतिर्येन तथाविधं ज्ञचित्तं न दुःखितं भवतीत्यर्थः ॥ १० । तस्य भोविदुःखहेतुपापसंबंधोपि नास्तीत्याह परिज्ञातेति । जगति व्यवहारपरे भावः कर्तृत्वाभिमानेनत्मस्मादुद्भवतीति जगद्भावोद्भवं तदात्मना स्मनसा पापेन ॥ ११ ॥ अविद्यालक्षणजगदाकारविलीर्णव्याधेः अविद्यामात्रं जगदिति सम्यक्परिज्ञानं विचारजन्यं ज्ञानमेव महौषधमित्यर्थः ॥ १२ ।



स

यथा स्वप्नोयमिति परिज्ञाते न स्वप्नेन तद्भोगभ्रमः परिक्षीयते तद्वत् ॥ १३ । मत्स्या नामीक्षणं चक्षुर्भ्रमा न स्पृश्यते तद्वत्तत्स्वैर्शपिहिताक्षाणां तेषां जले दर्शनादि व्यवहारे न स्यादिति भावः ॥ १४ । शेमुषी प्रज्ञा । १५ । ज्ञायते ऽनेनेति ज्ञानं शास्त्रं तद्रूपेणार्केण बोधितः । तत्तादृशं प्रबोधं । १६ । इदानीं विद्यास्तौति । दिनानीत्यादिना । जीव्यंते इ भावे लः । दिनानीति कालाध्वनोरत्यंतसंयोगे द्वितीया न तु कर्मणि । येषु दिनेषु चिज्ज्योत्स्ना हृदयांबरे आह्लादयति विराजते वेति शेषः । १७ । १८ । येभ्यो मित्रादिभ्यो निमि

तदैवहि

अविद्यासंपरिज्ञाता यदैवहि ॥ सा परिक्षीयते भ्रमः स्वप्नेनेव हि भोगभ्रमः ॥ १३ ॥ व्यवहारपरोप्यंतरसक्तमतिरेकधीः ॥ स्पृश्यते नैनसा साधुर्मत्स्येक्षणमिवांभसा ॥ १४ ॥ प्राप्ते चिद्विमलालोके प्रक्षीणाज्ञानयामिनी ॥ शेमुषी परमानंदमागता ज्ञस्य राजते ॥ १५ ॥ अज्ञाननिद्रोपशमे जनो ज्ञानार्कबोधितः ॥ तत्प्रबोधमवाप्नोति पुनर्येन न मुह्यति ॥ १६ ॥ दिनानि जीव्यते तानि सानंदास्ते क्रियाक्रमाः ॥ आत्मचंद्रोदिता येषु चिज्ज्योत्स्ना हृदयांबरे ॥ १७ ॥ नरो मोहसमुत्तीर्णः सततं स्वात्मचिंतया ॥ अंतःशीतलतामेति सामृतेनेव चंद्रमाः ॥ १८ ॥ तानि मित्राणि शास्त्राणि तानि तानि दिनानि च ॥ विरागोद्यासवानेभ्य आत्मचिंतोदयः स्फुटः ८
॥ १९ ॥ चिरं शोचंति ते दीना जन्मजंगलवीरुधः ॥ आत्मावलोकने हेला येषामविगतैनसां ॥ २० ॥ आशापाशशतैर्बद्धं भोगोलपलालसं ॥ जराजर्जरिताकारं शोकोच्छ्वासकदर्थितं ॥ २१ ॥ व्यर्थं दुःखमहाभारं जन्मजंगलजीवितं ॥ कुकर्मकर्दमालिप्तं मोहपल्वलशायिनं ॥ २२ ॥

त्तेभ्यः विरागोद्यासवान् आत्माकारवृत्तिलक्षणश्चित्ताभ्युदयः स्फुटं सिध्यतीति शेषः ॥ १९ । हेला अवहेलनमुपेक्षेति यावत् । अविगतैनसां अक्षीणपापानां ॥ २० । इत आरभ्य त्रयाणां द्वितीयांतपदानां नवमश्लोकस्थे जीवन्नीवर्द्धं त्यजारयेदित्यत्र संबंधः । जलपान्तरणविशेषाः ॥ २१ । विशेषेणाकृष्टः दुःखमहाभारो येन ॥ २२ ।

वरत्रया चर्ममय्या नामास्त्वा। मनोरूपस्थाणुवणिजः निकेते अज्ञानलक्षणे संकेते निवासे च स्थितं बंधुजनलक्षणैर्बंधनैर्निश्चलं चलितुमशक्तं। २३। कुकर्दमे गोमयपंके। २४। २५। बहिराकारमात्रेणाभासुरं मंतस्कंदीनं बाह्येंद्रियैश्चक्षुरादिभिराक्रांतं आरूढं। कर्मपदेन काम्यकर्मप्ररोचकार्थवादा लक्ष्यंते। तद्व्यसनेन घंटारवेणाक्रांतं। २६। चक्रावर्तधुरा शकटभारः साहि शकटचक्रे रावर्तनेन दुर्वहं। २७। करुणं यथा स्यात्तथा आक्रंदकारिणं। २८। चिरं परमं यत्नमास्थाय ज्ञानबलादुत्त

रागद्वेषावलीदष्टं कष्टं तृष्णावरत्रया। मनोवणिङ्निकेतस्थं बंधुबंधननिश्चलं। २३। पुत्रदारजराजीर्णमग्नोन्मग्नं कुकर्दमे। श्रांतं विगतविश्रामं भग्नमादीर्घवर्त्मनि। २४। भ्रमभ्रमपरिक्षीणं संसारारण्यचारिणं। अलब्धशीतलच्छायं तीव्रतापोपतापितं। २५। आकारभासुरं दीनं बाह्येंद्रियाक्रांतमिंद्रियैः। कर्मघंटारवाक्रांतं क्रांतं दुःकृतताडनैः। २६। आविर्भवतिरोभावचक्रावर्तधुरोद्वहं। अज्ञानविकटाटव्यां लुठितं सन्नगात्रकं। २७। निजानर्थमदामग्नं सीदमानमकिंचनं। सन्नांगं कर्मभारेण करुणाक्रंदकारिणं। २८। रामजीवबलीवर्दमिमं संसारपल्वलात्। परमं यत्नमास्थाय चिरमुत्तारयेद्बलात्। २९। तत्त्वावलोकनात्क्षीणे चित्ते नो जायते पुनः। जीवः कदाचनत्राम वेत्तीर्णभवार्णवः। ३०। महानुभावसंपर्कात्संसारार्णवलंघने। युक्तिः संप्राप्यते राम स्फुटा नौरिव नाविकात्। ३१। यस्मिन्देशे मरौ तज्ज्ञो नास्ति सज्जनपादपः। सफलः शीतलच्छायो न तत्र निवसेद्बुधः। ३२।

रयेदित्यर्थः। २९। उत्तारितस्य पुनः पंकमज्जनशंकां वारयति तत्त्वेति। ३०। उत्तारणोपाया ज्ञानलाभस्तु सद्गुरोरभिगमनात्सिद्ध्यतीत्याशयेनाह महानुभावेति। ३१। देशो मरुरिव देशमरुस्तस्मिन्। ३२। ३३।



सुजनलक्षणे चंपकवृक्षे विशेषणान्युभयसाधारण्येन योज्यानि। ३३। तदभावे सा तत्त्वलाभविश्रांत्यभावे। इह संसारे न स्वसत्वं। ३४। एवं अनेनोपायेन उद्धरेदात्मानमित्यर्थः। अवलेपेन देहाभिमानवर्गेण। ३५। कस्मात्सयो यस्य किं क्षयं। देहाधीनं दुःखं प्रेक्षणीयं सबुद्ध्या शास्त्रसज्जनसहायेन च विचारणीयं। द्वौ इति शब्दो विचार्यविचारप्रकारबाहुल्यद्योतनार्थौ। ३६। शास्त्राण्यनात्मशास्त्राणि। ३७। किं तर्ह्युपकरोतीति तदाह मनोमात्रेणेति। सुहृदा अरिः शुद्धेनेति यावत्। ३८। ३९।

स्निग्धशीतवचःपत्रे सच्छाये स्मितपुष्पके। क्षणाद्विश्राम्यते राम श्रमः सुजनचंपके। ३३। तदभावे महामोहतापसंपत्तिदायिनि। किंचिज्ज्ञातविवेकेन न स्वस्थं यन्नेह धीमता। ३४। आत्मैव ह्यात्मनो बंधुरात्मनात्मैवमुद्धरेत्। नात्मानमवलेपेन जन्मपंकार्णवे क्षिपेत्। ३५। किमिदं कथमायातं किं मूलमिति किं क्षयं। देहदुःखमिति प्राज्ञैः प्रेक्षणीयं प्रयत्नतः। ३६। न धनानि न मित्राणि न शास्त्राणि न बांधवाः। नराणामुपकुर्वंति मग्नस्यात्मसमुद्धृतौ। ३७। मनोमात्रेण सुहृदा सदैवसहवासिना। सह किंचित्परामृश्य भवत्यात्मा समुद्धृतः। ३८। वैराग्याभ्यासयत्नाभ्यां स्वपरामर्शजन्मना। तत्त्वालोकनपोतेन तीर्यते भवसागरः। ३९। शोच्यमानं जनैर्नित्यं दृश्यमानं दुराशयानात्मानमवमन्येत प्रोद्धरेदेनमादरात्। ४०। अहंकारमहालानं तत्क्षारस्तंभमनोमयं। जन्मजंबालनिर्मग्नं जीवदंतिनमुद्धरेत्। ४१। अयमेतावतैवात्मा त्रातो भवति राघव। यदपास्य विमूढत्वमहंकारः प्रमार्ज्यते। ४२। एतावतैव सन्मार्गे याति प्रकटतामलं। यदपास्य मनोजालमहंभावो विलूयते। ४३।

नावमन्येत नोपेक्षेत। ४०। आत्मानं गजबंधनस्तंभः जंबाले पंके निर्मग्नं। ४१। विमूढत्वं स्वात्मज्ञानं। ४२। सतः परमात्मनो मार्गे ज्ञानमार्गे बोधपर्यंते विचारे मता त्मन्त्रकटतां स्फुटावलोकनतां। मनो रचितं बाह्याध्यात्मिकामक्तिजालं। ४३।

तत्रापि दुस्त्यजदेहाभिमानत्याग एव मुख्य इत्याशयेनाह एतावतैवेति ४४ तद्दर्शनस्य परिणामेन भूमिकापरिपाकेन चिद्दिवाकरभावापत्त्या ४५ अवलोकनं सिद्ध्यतीति शेषः ४६ सुखमोदो निरतिशयानंदविश्रांतिस्तज्ज्ञाता द्रूपेणाविर्भूता निर्विकल्पावस्था ४७ तामेव वर्णयति परिपूर्णेत्यादिना रंजनं दृश्योपरागः ४८ तयैवसोपमीयते नान्यत्तदुपमानमस्तीत्यर्थः ४९ केन तर्हि निदर्शनेन तत्संभावना स्यात्तत्राह अदूरेति निर्विक्षेपत्वांशेन सन्निहितात्सादृश्यादित्यर्थः उपसमीपे लक्ष्यते अ

एतावतैव देवेशः परमात्मावगम्यते ॥ कायलोष्ठसमत्वेन देहो यद्वल्लोक्यते ॥ ४४ ॥ अहंकारांबुदे क्षीणे दृश्यते चिद्दिवाकरः ॥ ततस्तत्परिणामेन तत्पदं समवाप्यते ॥ ४५ ॥ यथा ध्वांतसमुच्छेदे स्वयमालोकवेदनं ॥ तथाहंकारविच्छेदे स्वयमात्मावलोकनं ॥ ४६ ॥ अहंकारे परिक्षीणे यावस्था सुखमोदजा ॥ सावस्था भरिताकारा व्योमव्यामं प्रयत्नतः ॥ ४७ ॥ परिपूर्णार्णवप्रख्यानवाग्गोचरमेति नः ॥ नोपमानमुपारूतेनानुधावति रंजनं ॥ ४८ ॥ केवलं चित्प्रकाशांशकलिकास्थिरतां गता ॥ तुर्या चेत्प्राप्यते दृष्टिस्तत्तयासोपमीयते ॥ ४९ ॥ अदूरगतसादृश्यात्सुषुप्तस्योपलक्ष्यते ॥ सावस्था भरिताकारा गगनश्रीरिवातता ॥ ५० ॥ मनोहंकारविलये सर्वभावांतरस्थिता ॥ समुदेति परानंदा या तनुः पारमेश्वरी ॥ ५१ ॥ सा स्वयं योगसंसिद्धा सुषुप्ताददूरभाविनी ॥ नगम्या वचसा राम हृद्येवेहानुभूयते ॥ ५२ ॥ अनुभूतिं विना तत्त्वं खंडादेर्नानुभूयते ॥

अनुभूतिं विना रूपं नात्मनश्चानुभूयते ॥ ५३ ॥

ज्ञानावरणं चेन्न दानस्यात्तर्हि तुर्यावस्थैव स्यादित्यनयारीत्येत्यर्थः ५१ घटविलये तदाकाशस्य महाकाशत्वमिव मनोहंकारोपाधिविलये त्वंपदलक्ष्यस्य तत्पदलक्ष्यात्मस्वभावता सिद्ध्यतीत्याह मन इति ५१ सुषुप्तस्य अदूरभाविनी संनिहिता हृद्येवानुभूयते स्वानुभवातिरिक्तं तत्परिचायकं नास्तीत्यर्थः ५२ यथा खंडाद्यसाधारणगवादिस्वरूपपरिचयेनानुभवादन्यन्नानं तथा आत्मन्यपीत्याह अनुभूतिमिति आत्मनो रूपं परमार्थस्वरूपं चेत्यर्थः ५३ ॥ 

इदं अखिलं आत्मतत्त्वमेव तर्हि तत्कथमनुभूयते तत्राह दृष्टेति चित्तस्य बहिर्विषयेषूपशमिते अंतः प्रत्यगात्मनि क्षीरोदकवदैकरस्येन दृढं परिणामिनि स्थिते निश्चले सति चराचराणां आत्मा प्रत्यग्भूतः देवानां चक्षुरादीनां देवः साक्षितया प्रकाशयिता स्वयं साक्षादनुभूयत एव नात्र संशयः कार्य इत्यर्थः ५४ एवं चतुर्थभूमिकायां आत्मानुभवे तदनु पंचमभूमिकायां आत्यंतिकविषयवासनाविनाशस्तदनु षष्ठभूमिकायां विनैव यत्नं शुभः परमपुरुषार्थरूपः स्वात्मनः स्फुटः प्रकाशः सदैव पूर्णभावानुभवः सिद्ध्यति तदनु सप्तमभूमिकायां समाध्यसमाध्योः समतावशाद् आत्यंतिकवैषम्यनिवृत्तेः समुद्रांतर्विलीनसैंधवघनवत्स्वैकरसतयापरिणमने सिद्ध्यति तत्स्वमहांब्रसादी नाम

अखिलमिदमनंतमात्मतत्त्वं दृढपरिणामिनि चेतसि स्थितेंऽतः ॥ बहिरुपशमिते चराचरात्मा स्वयमनुभूयत एव देवदेवः ॥ ५४ ॥ तदनु विषयवासनाविनाशस्तदनु शुभः परमः स्फुटप्रकाशः ॥ तदनु च समतावशात्स्वरूपे परिणमनं महतामचिंत्यरूपं ॥ ५५ ॥ मोक्षोपाये उपशमप्रकरणे उपदेशः सर्गः ॥ ६४ ॥ श्रीवसिष्ठ उवाच ॥ मनसैवमनस्छित्वा यद्यात्मा नावलोक्यते ॥ ममेत्यहमिति त्यक्त्वा तत्ताम्रसलोचन ॥ १ ॥ नास्तमेति जगद्दुःखं यथा चित्रगतो रविः ॥ आयात्यापदनंतत्वं महार्णववदाततां ॥ २ ॥ पुनः पुनरुपायाति जलस्कंधोलकारणं ॥ मेघनीलतमःश्यामा संसृतिः प्रावृडाकुला ॥ ३ ॥

पिदयत्रया अचिंत्यरूपं यतो वाचो निवर्तंते अप्राप्य मनसा सहेति श्रुतेरित्यर्थः ५५ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे चतुःषष्टितमः सर्गः ६४ सत्त्वात्यशैलस्यात्रेराश्रमस्तत्र वर्ण्यते विलासभासयो जन्मकर्मशोकोदयक्रमः आत्मदर्शनोपायोपेक्षणे शोकमोहादिदुःखपरंपरादुर्वारेत्यर्थे भासविलासाख्यायिकामवतारयिष्यन्नाह मनसेवेति यदि नावलोक्यते तर्हि जगद्दुःखं यथा चित्रगतो रविर्नास्तमेति तथा नास्तमेतीति परेणान्वयः १ आपत् अनंतत्वं अपरिच्छेदत्वं आयाति २ मेघनीलतमोभिश्श्यामा संसृतिरूपा प्रावृड्वर्षर्तुः । ३

सुहृदोर्मित्रयोः शुद्धचित्तयोश्च ॥४॥ पीठेन उपत्यकाभागेन तलेन मध्यांतःप्रविष्टमूलभागेन ॥ जितशब्द आक्रांतपरः ॥५॥ अविषह्याद्दक्प्रसरप्रतिघातिनी भाः रत्नादिदीप्ति र्यस्मिन् ॥६॥ भानुभिः सूर्यरत्नादिकिरणैर्भासुर मिति भिदीं अवश्रैः पाटलमिति । र्मिरिति पाठेप्येवं ॥ कांचनैस्तटैर्निर्तंबैः कटैर्गंडैः जात्याख्यायां बहुवचनं ॥७॥८॥

अत्रैवोदाहरंतीममितिहासंपुरातनं ॥ संवादंसुहृदोः मध्यमानोभासविलासयोः ॥४॥ अस्त्युत्तमधनिताकाशः पीठेनजितभूतलः तलेनजितपातालस्त्रिलोकविजयोगिरिः ॥५॥ असंख्यकुसुमापूर्णो संख्यनिर्मलनिर्झरः ॥ गुल्मकारस्मितनिधिः सह्यनामाविषह्यभाः ॥६॥ मुक्तापटलसंपूर्णैर्भानुपाटलमितिभिः ॥ भासुरः कांचनतटैः कटैरिव सुरद्विपः ७॥ क्वचित्पुष्पभरामारो धातुसागततःक्वचित् ॥ ८॥ क्वचित्कुसुमस्मारो ... रत्नशालिशिलः क्वचित् ॥ ८॥ इतोरटन्निर्झरवानितःक्वणितकीचकः ॥ इतोरटद्गुहावातइतःषट्पदघुंघुमः ॥९॥ सानोगीतोप्सरोवृंदैर्वने मृगखगारवः ॥ अधित्यकायांमृतान्वोगगनैरवगारवः ॥१०॥ विद्याधराश्रितगुहोम्दगगीतांवुजाकरः ॥ किरातगीतपर्यंतःखगगीतवनद्रुमः ॥११॥ स्कंदेषुदेवैर्वलितःपादेषुवलितोनरैः ॥ पातालेवलितोनागैर्जगद्गृहमिवापरं ॥१२॥ कंदरेषुश्रितःसिद्धैर्निधानैरंतराश्रितः ॥ चंदनेषुश्रितोनागैः सिंहैःशृंगशिखासुच ॥ १३॥

तुसारैर्हरितालमनःशिलागैरिकादिभिराततः ॥ ८॥ इतइतइति प्रदेशभेदोक्तिः ॥ ९॥ सानौ प्रस्थे । मत्तानीवगर्जंत्यम्भांसि यस्मिन् ॥ १०॥११॥ जगत्पदेन लोकत्रयवासिनो लक्ष्यंते तेषांगृहमिव त्रैलोक्यलक्षणं । ब्रह्मांडगृहमिदेहितिवास्थितइतिशेषः ॥ १२॥ निधानैर्निखाताधनैः ॥ १३॥ 

१४॥ मंदारः कल्पवृक्षभेदस्तस्यैवस्तदारूढैरिव ॥१५॥ शिलास्त्वाभिसारिकातेनोत्प्रेक्षते अत्रेति ॥ क्वणन्मंजिरादिरवचित्तरत्नानामभिसारविरोधितान्स्करलविभूषिताः शृंगैरभिसारिकाइवाश्लिष्टत्वात् शृंगाभिसारिकाः ॥ १६॥ तत्र उत्तरतटे अत्रेराश्रमोस्तीति चतुर्थे संबंधः ॥ १७॥ स्रुत द्रुमाणां लताभिः शाखाभिरुन्मुक्तेरूर्ध्वभागेत्र

पुष्पाभ्रसंवीतवपुः पुष्परेणवभ्रपांसुलः ॥ पुष्पवात्याभ्रहद्भ्रांतःपुष्पपादपपांडुरः ॥ १४॥ धातुधत्त्यभ्रकष्लिोरत्नोपलतलस्थितैः ॥ मंदारगैरिवपुरस्त्रीगणैरलमाश्रितः ॥ १५॥ अभ्रनीलांशुकच्छन्नाभ्रकरत्नविभूषणाः ॥ शिलाः कनकसुंदर्योयत्रशृंगाभिसारिकाः ॥ १६॥ तत्रोत्तरतटेसानौविमलफलपादपे ॥ रत्नपुष्करिणीजालवहन्निर्झरवारिणि ॥ १७॥ चूतद्रुमलतोन्मुक्तपुष्पस्तवकदंतुरे ॥ विस्फुरत्कोलपुन्नागनीलनीरजदिक्तटे ॥ १८॥ लतावितानेछन्नैर्केरलांशुभरभास्वरे ॥ स्तवज्तंबरसमस्रतेसवर्ोकाह्लादकारिणि ॥ १९॥ ब्रह्मलोकसमःस्वर्गरम्यःशिवपुरोपमः ॥ अत्रेरस्त्याश्रमःश्रीमान्स्निग्धश्रमहरोमहान् २० महत्यस्याश्रमेतस्मिंस्तापसौहौबभूवतुः कोविदौतनमोमार्गइवशुक्रबृहस्पती २१ तयोरथैकोस्यरथोत्तत्रास्तांसुताबुभौ ॥ स्फुटांकुरौशुद्धतन्तरसरस्यांबुजयोरिव ॥ २२ विलासभासनामानौवृद्धिमाययतुःक्रमात् तौ पित्रोःपक्ष्मवेदीर्घेलतापादपयोरिव ॥ २३ आस्तामन्योन्यमुस्निग्धौसुहृदौवत्सौमिथः ॥ तिलतैलवशाश्लिष्टौतौपुष्पामोस्वत्स्थितौ २४

सारितैः पुष्पस्तवकैर्दंतुरे उन्नतदंतवत्स्थिते । नीलनीरजानि नीलोत्पलानि १८। स्वर्लोकः स्वर्गस्थानमिवाह्लादकारिणि ॥ १९॥२०॥ महति विस्तीर्णे काविदौविद्वांसौ शुक्रबृहस्पतीइवइति तयोर्नामनिर्देशोपि ॥ २१॥ अंबुजयोः पद्मगुल्मयोः स्फुटांकुरौ पुष्पप्रकृतिभूतेकलिकेइव ॥ २२॥ लतापादपयोः पक्ष्मवेदवृद्धिमाययतुः ॥ २३॥ २४॥

वा॰टी॰उ॰ ॥१९१॥

नायुक्तौ न वियुक्तौ पुत्रार्थं युक्तौ परस्परं च सुरक्तौ दंपती इव ॥२४॥ मौनेन मुदितेन मुनियुक्तेत्व ॥२६॥२७॥२८॥ पंचत्वं मरणं गतयोः सतोः ॥ २९॥ और्ध्वदैहिकमिस्युनुशतिका
दित्वादुभयपरवृद्धिः ॥ परिदेवनं विलापं ॥ ३०॥ निरस्तसमस्तचेष्टौ चेत्किं मृतौ नेत्याह अशून्यहृदाविति ॥ तथा च मूर्छितौ विवृत्तौ संपन्नावित्यर्थः ॥ ३१॥ इति श्री वासि

नायुक्तौ पुत्रयुक्तौ तु सुरक्ताविव दंपती ॥ सर्कं हितमिवापन्नं समभासीत्तयोर्मनः ॥२५॥ तौ तथान्योन्यमुदितौ मनोहरतराकृ
ती ॥ तस्थतुः स्वाश्रमे मौनेन सरोजद्वयषट्पदौ ॥ २६॥ प्राप्तयौवनं बाल्यमुत्सृज्य नववल्लभौ ॥ कालेनाल्पतरेणैव चंद्रसूर्या
विवोदितौ ॥२७॥ जग्मतुर्देहमुत्सृज्य ततस्तौ पितरौ तयोः ॥ स्वर्गं जरातौ वृद्धौ यन्नीडाविव विहंगमौ ॥२८॥ पंचत्वं गतयोः पित्रोर्दीनव
क्त्रौ बभूवतुः ॥ तत्संगे विगतोत्साहौ पद्माविव जलोद्धृतौ ॥२९॥ तत्रौर्ध्वदैहिकं कृत्वा चक्रातेपरिदेवनं ॥ लोकस्थितिरलंघ्या
हि महतामपि मानद ॥ ३०॥ कृतौर्ध्वदैहिकमथो व्यथयाभिमृतौ शोकोत्थया करुणयार्तगिरा विलाप्य ॥ चित्रार्पिताविव
निरस्तसमस्तचेष्टौ तौ संस्थितौ सुखमशून्यहृदौ विवृत्तौ ॥ ३१॥ मोक्षोपायेषूपशमप्रकरणे भासविलासवृत्तांते सह्यगिरिवर्णनं स
र्गः ॥ ६५॥ श्रीवसिष्ठ उवाच ॥ अतिशोकपराभूतौ तौ तस्थतुर्दृढतापसौ ॥ तापसंशुष्कसर्वांगौ तावरण्यद्रुमाविव ॥ १॥ विरक्तौ विपि
ने कालं क्षिपयामासतुर्द्विजौ ॥ वियुक्ताविव संसारं गवनास्थामागतौ परां ॥ २॥ जग्मुर्दिनानि मासाश्च वर्षाण्यथ तयोस्तदा ॥ क्रमात्
द्वावपि संयातौ जरां श्वभ्रद्रुमाविव ॥३॥ राम॰ ॥१९०॥

ष्ठ तात्पर्यप्रकाशे उपशमप्रकरणे पंचषष्टितमः सर्गः ॥ ६५॥ अप्रबुद्धमतेरत्र दुःखैव्योपरिवर्तनं ॥ भासस्य वचनेनात्र विस्तरेण प्रकाश्यते ॥ आरण्यद्रुमपक्षे तापेन
तपसंबंधिना ग्रामातपेन दावाग्निना च संशुष्कसर्वांगौ ॥ १॥ अनास्थां गृहस्थे धनादावनासक्तिं ॥ २ ॥३

---

मंथरितौ कंचित्कालं दैवाद्वियुज्य पुनर्मीलितौ ॥ ४॥ जीविताय्यं श्रेष्ठं जीवनं तल्लक्षणं द्रुमफलमस्य तु हृदि आवासो यस्य तथाभूतं तां बुधेइति मैत्र्यतिशयोद्दीपने विशेषणे ५ ६.
आत्मवान् प्रबोधलब्धात्मा ॥ अत एव फलितविद्यः ॥ ७॥ अलं स्पष्टं प्राह ॥ ८॥ ९॥ चित्तेभवतीति चित्तभूः काम संकल्पादिः ॥ १०॥ वीरुधो लतापाशदात्रकेण शंकुकुद्दा

त४

अथास विमलज्ञानौ विराज्जर्जरतापसौ ॥ तावेकदा संघटितावितरमन्योन्यमूचतुः ॥ ४॥ विलास उवाच ॥ जीविताग्र्यद्रुमफलहृदावासामृतांबु
धे ॥ जगत्यस्मिन्महाबंधो भासस्वागतमस्तु ते ॥ ५॥ एतावतो दिनान्क्वासीर्मद्वियोगवतालय ॥ वदकच्चित्ताः साधोकच्चित्ते सफलं तपः ६ क
च्चित्ते विज्वरा बुद्धिः कच्चिज्ज्ञातस्त्वमात्मवान् ॥ कच्चित्फलितविद्यस्त्वं कच्चित्कुशलवानसि ॥७॥ श्रीवसिष्ठ उवाच ॥ इत्युक्तवंतं संसारसमुद्विग्नमलं त
था ॥ प्राह प्राप्तमहाज्ञानं सुहृत्सुहृदमादरात् ॥ ८ भास उवाच ॥ साधो स्वागतता दैवदिष्ट्याद्दृष्टोसि मानद ॥ कुशलं तु कुतोस्माकं संसारे तिष्ठता
मिह ॥ ९॥ यावन्नाधिगतं ज्ञेयं यावत्क्षीणा न चित्तभूः ॥ यावन्नीर्णो न संसारस्तावन्मे कुशलं कुतः ॥ १०॥ आशापावदशेषेण नच्छिन्ना चि
त्तसंभवाः ॥ वीरुधो दात्रकेणैतावन्तः कुशलं कुतः ॥ ११॥ यावन्नाधिगतं ज्ञानं यावन्न समतोदिता ॥ यावन्नाभ्युदितो बोधस्तावन्नः कुश
लं कुतः ॥ १२॥ आत्मलाभं विना साधो विनाज्ञानमहौषधं ॥ उदेतिपुनरेवेयं दुःसंसृतिविषूचिका ॥ १३॥ शैशवांकुरितोज्जृंभमाणवयौवन
पल्लवः ॥ जराकुसुमितोभ्येति पुनः संसारदुर्द्रुमः ॥ १४॥ कायजीर्णतरोरस्माद्बांधवाक्रंदषट्पदा ॥ जराकुसुमितोदेति पुनर्मरणमंजरी १५

त्वादिना ११ ज्ञानं शोधिततत्त्वपदार्थज्ञानं बोधोऽखंडवाक्यार्थ इति भेदः १२ १३ शैशवलक्षणोऽंकुरितस्य उज्जृंभमाणमुज्जृंभमानं अतीत्येति त्यल्लोपे हेतौ वा पंचमी १४
बांधवानामाक्रंदा एव षट्पदाः ॥ भ्रमणयात्रहुंकारवाः यस्यां जरयाकुसुमितासंजातकुसुमा १५

नायुक्तौ न वियुक्तौ पुत्रार्थं युक्तौ परस्परं च सुरक्तौ दंपती इव ॥२४॥ मौनेमुदितेमुनियुक्ते च ॥२६॥२७॥ २८॥ पंचत्वं मरणं गतयोः सतोः ॥ २९॥ ओह्रद्दैहिकमिस्थनुशतिका
दित्वा उभयपरवृद्धिः ॥ परिदेवनं विलापं ॥ ३०॥ निरस्तसमस्तचेष्टौ चेत्किंस्तौ नेत्याह अशून्यहृदाविति ॥ तथा च स्वर्छितौ विहनौ संपन्नावित्यर्थः ॥ ३१॥ इति श्री वासि

नायुक्तौ पुत्रमुक्तौ तु सुरक्ताविव दंपती ॥ सकं हितमिवापन्नं समभासी त्तयोर्मनः ॥२५॥ तौ तथान्योन्यमुदितौ मनोहरतराकृ
तौ ॥ तस्थतुः स्वाश्रमे मौने सरोजइव षट्पदौ ॥ २६॥ प्राप्तयौवनं बाल्यमुत्सृज्य नववत्क्रमौ ॥ कालेनाल्पतरेणैवं चंद्रसूर्या
विवोदितौ ॥२७॥ जग्मतुर्देहमुत्सृज्य ततस्तौ पितरौ तयोः ॥ स्वर्गं जरार्त्तौ कुडीयनीडाविव विहंगमौ ॥२८॥ पंचत्वं गतयोः पित्रोर्दीनव
क्त्रौ बभूवतुः ॥ तत्संगौ विगतोत्साहौ पद्माविव जलोद्धृतौ ॥२९॥ तत्रौर्ध्वदैहिकं कृत्वा चक्रातेपरिदेवनं ॥ लोकस्थितिरलंघ्या
हि महतामपि मानद ॥ ३०॥ कृत्वौर्ध्वदैहिकमथो व्यथयाभिभूतौ शोकोत्थया करुणयार्त्तगिरा विलाप्य ॥ चित्रार्पिताविव
निरस्तसमस्तचेष्टौ तौ संस्थितौ सुरवमशून्यहृदौ विहनौ ॥३१॥ मोक्षोपायेषूपशमप्रकरणे भासविलासवृत्तांते महागिरिवर्णनं स
र्गः ॥६४॥ श्रीवसिष्ठ उवाच ॥ अतिशोकपरावर्त्तौ तौ तस्थतुर्दृढतापसौ ॥ तापसंशुष्कसर्वांगौ तावरण्यद्रुमाविव ॥१॥ विरक्तौ विपि
ने कालं क्षिपयामासतुर्द्विजौ ॥ विपर्थाविवसारंगावनास्थामागतौ परां ॥२॥ जग्मुर्दिनानि मासाश्च वर्षाण्यथ तयोस्तदा ॥ क्रमात्
द्वावपि संयातौ जरांश्वभ्रद्रुमाविव ॥३॥

छतात्पर्यप्रकाशे उपशमप्रकरणे पंचषष्टितमः सर्गः ॥६४॥ अप्रबुद्धमतेरत्र दुःखाव्धौ परिवर्तनं ॥ भासस्य वचनेनात्र विस्तरेण प्रकाश्यते ॥ आरण्यद्रुमपक्षे तापेन
तपसंबंधिना ग्रामातपेन दावाग्निना च संशुष्कसर्वांगौ ॥ १॥ अनास्थां गृहं हंसे बंधनादावनासक्तिं ॥ २ ॥३



मं घटितौ कं चित्कालं दैवाद्धियुज्य पुनर्मीलितौ ॥ ५॥ जीविताश्रेष्ठं जीवनं तदेवं शरणं द्रुमफलं स्मरत्व हृदि आवासो यस्य तथाभूतं तां बुधे इति मैत्र्यतिशयोद्दीपने विशेषणे ५ ६.
आत्मवान् प्रबोधलब्धात्मा ॥ अत एव फलितविद्यः ॥ ७॥ अलं स्वप्नं प्राह ॥ ८॥ ९॥ चित्तेभवतीति चित्तभूः कामसंकल्पादिः १०। वीरुधो लतापाशादात्रकेण शंकु कुद्दा

अथ ग्राप्तविमलज्ञानौ चिराज्जर्ज्जरतापसौ ॥ तावेकदा संघटितौ विरमन्योन्यमूचतुः ॥ ४॥ विलास उवाच ॥ जीविताग्र्यद्रुमफलहृदावासामृतांबु
धे ॥ जगत्यस्मिन्महाबंधो भास स्वागतमस्तु ते ॥५॥ एतावत्यो दिनान्यद्य मद्वियोगवतात्वया ॥ वदकस्त्वपिताः साधो कच्चित्ते सफलं तपः ६ क
च्चित्ते विज्वरा बुद्धिः कच्चिज्ज्ञातस्त्वमात्मवान् कच्चित्फलितविद्यस्त्वं कच्चित्कुशलवानसि ॥ ७॥ श्रीवसिष्ठ उवाच ॥ इत्युक्तवंतं संसारसमुद्विग्नमलं त
था ॥ प्राह प्राप्तमहाज्ञानं सुहृत्सुहृदमादरात् ॥ भास उवाच ॥ साधो स्वागता द्यैव दिष्ट्या दृष्टोसि मानद ॥ कुशलं तु कुतोस्माकं संसारे तिष्ठता
मिह ॥ ९॥ यावन्नाधिगतं ज्ञेयं यावत्क्षीणा न चित्तभूः ॥ यावत्तीर्णो न संसारस्तावन्मे कुशलं कुतः ॥ १०॥ आशापावदशेषेण नैव नाच्छि
न्नं मे भवानः ॥ वीरुधो दात्रकेणैतावन्नः कुशलं कुतः ॥ ११॥ यावन्नाधिगतं ज्ञानं यावन्नात्मसमुदितः ॥ यावन्नाभ्युदितो बोधस्तावन्नः कुश
लं कुतः ॥ १२॥ आत्मलाभं विना साधो विनाज्ञानमहौषधं ॥ उदेति पुनरेवेयं दुःसंसृतिविषूचिका ॥ १३॥ शैशवांकुरितो ज्जृंभमाणयौवन
पल्लवः ॥ जराकुसुमितो भ्यैति पुनः संसारदुर्द्रुमः ॥ १४॥ कायजीर्णतरोरस्मात्कोबंधवाक्रंदषट्पदा ॥ जराकुसुमितो रेति पुनर्मरणमंजरी १५



न्नाहिता ११ ज्ञानं शोधित तत्त्वपदार्थज्ञानं बोधो ऽखंडवाक्यार्थ इति भेदः ११, १२, १३, शैशवलक्षणो अंकुरितस्य उज्जृंभमाणमुज्जृंभमाणं अतीत्य एतितत्य श्लोपे हेतौवा पंचमी १४
बांधवानामाक्रंदा एव षट्पदाः भ्रमरा यान्नहं जारवाः यस्यां जरयाकुसुमिताः संजातकुसुमा । १५

मरणोत्तरं देवान्नरकस्थावरतिर्यग्जन्मप्राप्तौ भुक्तानि दुष्कृतकर्माणि येषु तथाविधैः शीतोष्णवातवर्षादंशमशकादिसंकुलैर्वसंतादिऋतुभिर्विरसा देवात्स्वर्गादिप्रा
प्तावपि तत्र पुण्यसंचयानधिकारात्सर्वसंचितपुण्यव्ययाद्दर्पासूयाकामादिदोषबहुलत्वाच्च शमदमाद्यसंभवेन ज्ञानस्यापि दौर्लभ्यात्केवलभोगैकलंपटतया पुरा
रोः प्राग्बहुशोऽनुभूतत्वादभिनवविषयाभावात्पुराणतनप्रायैरेव दिवसैः उंमिता पूरिता अत एव नीरसप्राया संवत्सरावली पुनर्वृथैव नीयत इत्यर्थः॥१६॥ दैवात्पुन
र्मानुष्येऽत्रापि दुर्लभतः मेत्रा सरणादिशरीरे प्राप्तेऽपि सा प्रतिकरेहइव भोगलंपटत्वयैव भ्रमणं दुर्वारमित्याशयेनोह महादरीष्विति॥ विषयभोगलक्षणानि फलान्येव
व्यालाः यासु तत्रस्था महस्तैः संजातकंटकासु देहलक्षणस्या देर्महाभीषणदरीप्रायच्छिद्रेष्वेव क्रियाशक्तिषु देहिकामुष्मिकाभोगोपायलौकिकवैदिककियासु वपरि

भुक्तकर्मसु विरसासु पुराणदिवसोंमिता॥ नीयते नीरसप्राया पुनः संवत्सरावली॥१६॥ महादरीषु देहाद्रेस्तत्सा कंटकितास्वपि॥ फलव्या
लासु च पुनः क्रियासु परिलुठ्यते॥१७॥ दुःखैः सुखलवाकारैर्दीर्घादीर्घैः शुभाशुभैः॥ अपर्यंतं प्राग्मापाया: प्रयांत्यायांति रात्रयः
१८॥ अयथार्थक्रियारंभैः कदाशावेशपक्षवैः॥ क्षीयते कर्मभिस्तैस्तैरायुराहतकर्मभिः॥१९॥ उन्मूलिता प्रयालानो मनो मत्तमतं
गजः॥ तस्माकरेणुको निद्रोहहरं विपरिधावति॥२०॥

लुठ्यते न तत्रापि आत्मविवेकसंभावनास्तीत्यर्थः॥१७॥ चिराल्पकालभोग्यत्वाभ्यां दीर्घा
दीर्घैर्दुःखैः॥ अपर्याप्ता असमाप्ता आगमापाया यासु रात्रिग्रहणं कालमात्रोपलक्षणं प्रयाति सर्वजन्मस्विति शेषः॥१८॥ उक्तमेव तत्कारणमुखेनाह अयथार्थेति
अयथार्था मिथ्याभूताः क्रियाभिरारभ्यंत इति क्रियारंभाः फलानि येषां तथाविधैः कर्मभिः आहतानि भूताभूतानि कर्माणि येषां तथाविधैर्जंतुभिरायुः क्षीयते
विनाश्यते॥१९॥ जन्मनि जन्मनि विवेकविरोधिप्राबल्यं तत्सहायदौर्बल्यं प्रपंचयति उन्मूलित इत्यादिना॥ आश्रयः परमात्मा तत्र बंधनहेतुर्विवेक आलानं भ्रमदुन्मू
लितं येन॥ तस्मात्परेन तद्विषयो लक्ष्यते तद्रक्षणायां करेणुकायां सकामत्वाद्दुन्निद्रो निर्निद्रः॥ २०॥

त्यर्थं पतन् परमपुरुषार्थोपयोगी आयुर्लक्षणो विवेकैर्लक्षणश्च चिंतामणिर्यस्मात्तथाविधे कायलक्षणद्रुमस्योमहातिहरयलक्षणे आलये नीडे गर्ह्णः स्वाद्वन्नाद्यमिलाषः
सएव गर्भः॥२१॥ यस्य मदौर्बल्यामयादिनापर्णतिकार्याक्षमाणि भवंति गात्राणि यस्यां दिवसावली परेनतत्परिछिन्ना कायलताप्रक्षते॥२२॥ वार्द्धक्ये पुत्रभृत्यावमानी भूरजो
भिश्च धूसं॥ अस्तं गता वपुःश्रीर्यस्य तथाविधं॥ त्वीबेभ्रमोड्डलुकच्छंदमः॥२३॥ राजहंसइवेति शेषः भोगलक्षणानि पुष्पाणि पर्णानि च अधो निपतंति अपर्यंतीतियावत्
२५॥ भोगेषु निवृत्तेष्वपि भोगाशातर्षशक्तिदुःखं तत्स्मृत्या चिंताशोकमोहादि श्रयद्वृत एवेत्याशयेनाह भोगेत्यादिना॥२६॥ चैत्यदेवाद्यायतनं॥ अग्रे बद्धा पताकेव हरे

जिह्वा चपलता लग्नः कायद्रुमहालये॥ पतश्चिंतामणेरुद्धो गर्द्धगृध्रो विवर्द्धते॥२१॥ नीरसानिः सुखालब्धी पतत्येल वणात्रिका॥ जीर्णपर्णमर्वर्ते
यं क्षीयते दिवसावली॥२२॥ अवमानरजोधस्तंगतवपुःश्रियं॥ मुखं धूसरतामेति हिमेषुः प्त्यमिवाहतं॥२३॥ शुष्यतः कायसरसः प्राणलक्ष्यो
वनंभ्रमतः॥ राजहंसक्षणाद्वायुरनिवर्तिपलायते॥२४॥ कालानिलवलोद्धूताज्जर्जराज्जीवितद्रुमात्॥ भोगपुष्पाणि दिवसपर्णानि निपतं
त्यधः॥२५॥ भोगभोगिषु शितेष्वंतर्दुःखदर्दुरधारिषु॥ मनो मोहांधकूपेषु प्रदरेषु विनिमज्जति॥२६॥ नानानुरंजनास्पष्टात्तस्मात्तरलपेलवा
चैत्यमग्रपताकेव हरं समधिरोहति॥२७॥ अस्मिन्संसारतंत्रस्य कालवि[illegible] लास्पदः॥ जीविताशामयं तंतुमंतकाखुर्निकृंतति
२८॥ यौवनोत्कटकल्लोलावर्ताल्लोलाक्षिफेनिला॥ प्रावर्तमहावर्ज्या याति जीवितदुर्नदी॥२९॥ कलाकुलजगत्कार्यकल्लोलकुलसं
कुलं॥ क्रियासरित्पर्यंताव हत्याकुलकोटरा॥३०॥ अनंताबंधुजनतास्तोयगंभीरकोटरे॥ अजस्रं निपतंत्येता विततेकालसागरे॥३१॥

पुच्छितं यथाभ्यासं तथा॥२७॥ संसारलक्षणस्य तंत्रस्य प्रवाहस्य जीविताशा प्रचुरं आयुस्तंतुः॥२८॥ महल्लोला सिसदृशा क्रोधद्वेषभयादिनाफेनिला पराभ्रम्मीः लोभ
तृष्णादिना भ्रमणान्येव महांत आवर्ता यस्याः॥२९॥ शिल्पतर्कनीतिशास्त्रादिभिः कलाकुलैः कौशलवृंदैर्जगद्व्यवहारकार्यलक्षणैश्च कल्लोलैराकुला संकु
ला च क्रियाप्रवृत्तिलक्षणा सरिता, प्रतिजन्म एवमेव वहतीत्यर्थः॥ ३०। ३१।

देहरत्नपरमपुरुषार्थसाधनत्वाद्रत्नशलाका॥ ३२॥ गर्त्तावर्त्तेसच्छिद्रावर्त्ते॥ ३३॥ ३४॥ कलनाजालेवलिताबद्धासतीमूर्च्छितामोहिता॥ ३५॥ नीलोत्पलानियथा विनिकृंततितथामेममममर्माण्यपि॥ ३६॥ उच्छूनतांविवृद्धिं क्षणानअंतंतिगतयोयस्यसक्षणांतइतिश्वपलइत्यर्थः॥ ३७॥ अनात्मीयान्यात्मासंस्पर्शीनिअनात्मदेहादिनिमित्तानिचदेहादाव त्मबुद्ध्या॥ ३८॥ सर्वजन्मसुदुःखस्यानानामानंत्यंदर्शयन्नुपसंहरतिबहुविधेति॥ जरामरणलक्षणेनप्रवातेनचंडवायुनाभग्नःपुनःपुनरामर्दितः जगद्गर्त्तस्तलेउ

देहरत्नशलाकेयंनाशपंकार्णवोदरे॥ नज्ञायतेक्वमग्नेतिताततजन्मनिजन्मनि॥ ३२॥ चिंताचक्रेचिरंबद्धंकुक्रियाचारचंचुरं॥ चेतोभ्रम तिसामुद्रेगर्त्तावर्त्तेतृणंयथा॥ ३३॥ उह्यमानमनंतेषुचेतःकार्यमहोर्मिषु॥ क्षणमेतिनविश्रांतिंचिंताताडवितांशयं॥ ३४॥ इदंकृतंक रोमीदंकरिष्यामीदमप्यलं॥ कलनाजालवलितामूर्च्छितामतिपक्षिणी॥ ३५॥ अयंसुहृदयंशत्रुरितिद्वंद्वमहाद्विपः॥ विनिकृंततिमर्मा णियथानीलोत्पलानिमे॥ ३६॥ चिंतानद्यामहावर्त्तेवीचिकानिचयेचिरं॥ क्षणोच्छूनतामेतिमनोमीनःक्षणद्युतिः॥ ३७॥ अनात्मीया निदुःखानिवहन्न्येवंविधान्ययं॥ आत्मबुध्याविचिन्वानोजनोगच्छतिदीनतां॥ ३८॥ बहुविधसुखदुःखमध्यपातीवितत जरामरणप्रवा तभग्नः॥ जगदुदरगिरौलुठज्जनोयंगतरसपर्णवदेतिजर्जरत्वं॥ ३९॥ मोक्षोपायेउपशमप्रतिपादनंसर्गः॥ ६६॥ श्रीवसिष्ठउवाच एवं तौकुशलप्रश्नंकृतवंतौपरस्परं॥ कालेनासाद्यविमलेज्ञानंमोक्षंततोगतौ॥ १॥ ततोवच्मिमहाबाहोयथाज्ञानेतरागतिः॥ नास्तिसंसारतरणेपा शबंधस्यचेतसः॥ २॥

दरगिरौलुठन्नयंजनःगतरसपर्णवच्छुष्कपर्णवत्॥ ३९॥ इतिश्रीवासिष्ठतात्पर्यप्रकाशेउपशमप्रकरणेषट्षष्टितमःसर्गः

देहात्मनोःसंबंधंसमर्थयितुमीर्यते॥ अंतःसक्तिकृतोबंधस्तत्त्यागाच्चनिवार्यते सवमुक्तप्रकारसंसारासारताविचारबहुलंकुशलप्रश्नं॥ १॥ पाशइवबंधोबंधनहेतु वोयस्मिंस्तथाविधस्यचेततःसंसरणंसंसारस्तस्यतरणेगतिरुपायः॥ २॥



इदंवर्णितप्रकारंदुःखमव्यमतेर्विवेकिनःपेलवंकोमलंसुखोच्छेद्यमितियावत्॥ अतरेदुस्तरःसर्पारेर्गरुडस्य॥ ३॥ देहद्वयाभिमानत्यागएवतदुच्छेदोपायइत्याश येनाहदेहातीताइत्यादिना॥ ४॥ स्थितिईस्थितिःक्षतिरित्यर्थः॥ ५॥ चित्तस्यचित्त्वभावस्यात्मनःवैपरीत्यंसंसरणंतास्वरूपप्रच्युतिः॥ ६॥ अहंत्यागकस्यापिक्वापिममं ताप्रसक्तिरेवनास्तीत्याशयेनाह॥ केमवन्नित्यादिना॥ नत्वचेतनामसंगविनोवाममताप्रसक्तिरस्तीतिभावः॥ ७॥ अंतरेमध्येगिरिभिःसंबाधेसंकुलेत्वेपिचित्तत्वंपरमात्म

इदंमव्यमतेर्दुःखमनंतमपिपेलवं॥ कुखगस्यांतरेंभोधिःसर्पारेर्गोष्पदायते॥ ३॥ देहातीतामहात्मानःचिन्मात्रसात्मनिस्थिताः॥ दूराद्देहं समीक्षंतेप्रेक्षकाजनतामिव॥ ४॥ देहेदुःखातिसंक्षुब्धेकानःस्थितिरुपस्थिता॥ रथेविधुरितेभग्नेसारथेःकेवरंकरना॥ ५॥ मनसिक्षु ब्धतांयातेचित्तस्यांगकिमागतं॥ तरंगजालसंतानेवैपरीत्यंकिमंबुधेः॥ ६॥ केमवन्न्यऽस्माहेसाःपयसामुपलाश्चके॥ काःशिलाःकि लदारूणांकेभोगाःपरमात्मनः॥ ७॥ संबंधःकइवश्रीमन्शिलापरसमुद्रयोः॥ अंतरेगिरिसंबाधेकेश्वचित्तत्वबंधयोः॥ ८॥ अप्युत्संगो ह्यमानानिपद्मानिसरिदंभसां॥ कानिनाममवंतीहशरीराणितथात्मनः॥ ९॥ संघट्टात्काष्ठपयसोर्यथोत्तुंगाःकणद्वयः॥ देहात्मनोःसमायो गात्तथैताश्चित्तदृत्तयः॥ १०॥ संबंधाद्दारुपयसांप्रतिबिंबानिदारुणः॥ यथापयसिलक्ष्यंतेशरीराणितथात्मनि॥ ११॥ यथादर्पणवीच्यादौप्र तिबिंबानिवस्तुतः॥ नासत्यानिचसत्यानिशरीराणितथात्मनः॥ १२॥ दारुवार्युपलास्फोटेदुःखितानयथाक्वचित्॥ संयुक्तेषुवियुक्ते षुनतथापंचसुक्षतिः॥ १३॥

बंधःसंसारस्तयोःकःसंबंधःनह्याकाशःपाशैर्बध्यतइतिभावः॥ ८॥ उत्संगेअंकेइवऊह्यमानानिधार्यमाणान्यपिपद्मानि॥ ९॥ संघट्टादभिघातात्समायोगादन्योन्यतादा त्म्याध्यासात्सुखदुःखादिचित्तदृत्तयः॥ १०॥ देहसंबंधस्याध्यासिकत्वेदृष्टांतमाहसंबंधात्संनिधिमात्रान्निमित्तात्॥ ११॥ १२॥ पंचसुदेहाद्याकारपरिणतेषुभूतेषुकंचदेहा दिसंयुक्तेषुस्त्रीपुत्रादिवियुक्तेषुचक्षतिर्दुःखादिप्रसक्तिः॥ १३॥

वा॰टी॰उप॰ ॥१९५॥

चित्सन्निधिमात्रेणाधिष्ठायपरितोबोधितात् ॥१४॥ मासमानाः सुखदुःखादिसंवित्तिः कस्यतर्हितिचेन्नकस्यापीत्याहनेति ॥१५॥ अनुस्मृतयः सुखानुभवाः देहदेहिनोर्देहतदभिमानिनोः संगे ॥१६॥ तर्हिज्ञाज्ञयोरविशेषः किंनस्यात्तत्राह अज्ञस्येति ॥ १७॥ कीदृश्यस्तर्हिज्ञस्यप्रारब्धभोगानुस्मृतयस्तत्राह अंतरिति ॥ अंतः संगोभिमानः ॥ अंतरनुप्रवेशश्च । स्नेहाः संबंधाः दृषदीजन्मानीचसमाहारे ॥१८॥ असंगः परमार्थसंगशून्यः ॥१९॥ जलकाष्ठयोर्यद्वदितिशेषः ससंबंधः ॥ चकारोप्यर्थः ॥ एवंसलिलकाष्ठोपन्यासः

दारुसंश्लेषिताज्जोयात्कंपशब्दादयोयथा ॥ प्रजायंतेतथैवास्माद्देहाच्चित्सरिबोधितात् ॥१४॥ नशुद्धजडयोरेताः संविदश्चिच्छरीरयोः ॥ एताश्चज्ञानमात्रस्यतस्मिन्नष्टेचिदेवनः ॥ १५॥ यथानकस्यचिद्वारिदारुश्लेषेनुस्मृतयः ॥ तथानकस्यचिद्देहदेहिसंगेनुस्मृतयः ॥१६॥ अज्ञस्यायंयथादृष्टः संसारः सत्यतांगतः ॥ नज्ञस्यायंतथास्मृतः संसारः सत्यतांगतः ॥१७॥ अंतः संगविहीनास्तुयथास्नेहादृषज्जलेतथासक्तमनोवृत्तेर्बाह्यभोगानुस्मृतयः ॥१८॥ अंतः संगेनरहितोयद्वत्सलिलकाष्ठयोः ॥ संबंधस्तद्वदेवांतरसंगोदेहदेहिनोः ॥१९॥ अंतः संगेनरहितः संबंधोजलकाष्ठयोः ॥ सदेहदेहिनोश्चैवंप्रतिबिंबाभसोस्तथा ॥ २०॥ स्थितासर्वत्रसंवित्तिः शुद्धासंवेद्यवर्जिता ॥ द्वित्वोपलंभिताश्चान्याद्दुःसंवित्तिर्नविद्यते ॥२१॥ अदुःखमेतिदुःखित्वमंतः संवेदनात्स्फुटं ॥ स्फारोभवतिवेतालोवेतालत्वेनभावितः ॥२२॥ असंबंधोभवत्यंतार्वेनिश्चयात्तात्स्वभोगनाम्सुरतवत्स्याणुवेतालसंगवत् ॥२३॥ असत्यायोहिसंबंधोयथासलिलकाष्ठयोः ॥ तथैवमिथ्यासंबंधः शरीरपरमात्मनोः

प्रियसंबंधो

संसर्गाभावेदृष्टांतार्थाइहतादात्म्याभावेइत्यपोनरुक्त्यं ॥ २०॥ ननुसुखदुःखादिसंवित्तिनिषेधेसंवित्त्यंतराप्रसिद्धेः शून्यतास्यादित्याशंक्याहस्थितेति ॥ नविद्यतेत ॥२१॥ द्विषयानिरूपणादित्यर्थः ॥२२॥ असतोपिअज्ञानाद्भ्रांत्याअस्तीतिमानंप्रसिद्धमित्याहअदुःखमिति ॥२२॥ संबंधआध्यासिकयोगः आद्यः संसर्गाध्यासेद्वितीयस्तादात्म्याध्यासेदृष्टांतः ॥२३॥२४॥

राम॰ ॥१९४॥

अंतः संगंविनाअहंताध्यासाभावात् ॥ नभग्नस्यातेनपीड्यतेयथेत्यर्थः ॥ अंगसंगरहितोदेहाध्यासशून्यः ॥२५॥२६॥ दार्वेतान्यर्थात्यक्त्वलपतितानि ॥ २७॥ रहितारहिताजानिशसञ्छांदसोडादेशस्तातापिंडानांप्रजुहोमीतिवत् ॥ २८॥ २९॥ ३०॥ शतशाखंअनंतशाखंकामवृत्तीनामानंत्यात् ॥ ३१॥ यथाभग्नमंतर्विदीर्णस्फाटिकंलिंगादिअपाव

अंतः संगंविनानांबुकाष्ठघातैः प्रगृह्यते ॥ आत्मांगसंगरहितोदेहदुःखैर्नदृश्यते ॥ २५॥ देहभावनयेवात्मादेहदुःखवशेस्थितः ॥ तत्त्यागेनततोमुक्तोभवतीतिविदुर्बुधाः ॥२६॥ अंतः संगविहीनत्वाद्दुःखवंत्यंगनोयथा ॥ पत्रांबुमलदारूणिश्लिष्टान्यपिपरस्परं ॥ २७॥ अंतः संगेनरहितायांतिनिर्दुःखतांपरां ॥ श्लिष्टान्यपितथैवात्मदेहेंद्रियमनोंस्वलं ॥२८॥ अंतः संगोहिसंसारेसर्वेषांरामदेहिनां ॥ जरामरणमोहानांतरूणांबीजकारणं ॥ २९॥ अंतः संसर्गवान्जंतुर्मग्नः संसारसागरे ॥ अंतः संसक्तिमुक्तस्तुतीर्णः संसारसागरात् ॥३०॥ अंतः संसर्गवच्चित्तंशतशाखमिवोच्यते ॥ अंतः संसर्गरहितंविलीनंचित्तमुच्यते ॥३१॥ भग्नस्फाटिकवद्विद्धिमनः सक्तमपावनं ॥ अभग्नस्फाटिकाभासमसक्तंविद्धिमेमनः ॥ ३२॥ असक्तंनिर्मलंचित्तंमुक्तंसंसार्यपिस्फुटं ॥ सक्तंतुदीर्घतपसामुक्तमप्यतिबंधवत् ॥ ३३॥ अंतः सक्तंमनोबद्धंमुक्तंसक्तिविवर्जितं ॥ अंतः संसक्तिरेवैकंकारणंबंधमोक्षयोः ॥ ३४॥ अंतः संसक्तिमुक्तस्यकुर्वतोपिनकर्तृता ॥ गुणदोषवतीतोयेदारुवाहननौर्यथा ॥ ३५॥ अंतः संसक्तितोजंतोरकर्तुरपिकर्तृता ॥ सुखदुःखवतीस्वप्नेसंभ्रमोन्मुखतायथा ॥ ३६॥

नंघ्नाद्ययोर्यतद्वता ॥ ३२॥३३॥३४॥ दारूणिकाष्ठभागाः वाह्यंतेउह्यंतेययातथाविधानौर्यथास्वयंदारुस्मृतापिदाहगातैश्छेदभेदाहारिगुणदोषैर्जलगतैश्चलनपरिवर्तननैर्मल्यपंकिलत्वादिगुणदोषैश्चनतद्वतीतथेत्यर्थः ॥ ३५॥ संभ्रमोन्मुखताव्याघ्रादिभयपलायनादिव्याकुलता ॥३६॥

वा॰टी॰उप॰
॥१९५॥

अदेहस्यदेहचेष्टा शून्यस्यापिस्वप्नपुरुषस्येवस्वप्नदृष्टादिपश्यतः॥ जाग्रतोपिस्वप्नादाविवकर्तृत्वंविद्यते। अतोविस्फब्धसुखदुःखदर्शनेनसुखदुःखकर्तृत्वमेवतदपीत्यर्थः॥ ३७ नचेत
तिनाभिमन्यतेनैवकिंचित्करोमीतिप्रयुक्तोमन्यतेततस्तविदितिभगवद्वचनात्॥ ३८॥ मंतःनचेतितिहेतोपकारःनहिचित्तेकर्तृत्वंतदाशक्तिर्नास्तियेनदेहःकर्त्ताकल्प्येतेत्यर्थः॥ ३९॥ अ
स्यार्थेहितीयएवकारः॥ ४०॥ अग्रगैःपुरोगतैःशीतोष्णानुभवादिकार्यैःतत्त्वोर्दश्यासक्तस्यपुरुषस्य सः अभिहिमिंद्राहत्यारव्यानेचप्राकप्रपंचितमितिभावः॥ ४१॥ मधुरवृ
त्तिर्निर्विक्षेपसौख्यंतद्वान्॥ ४२॥ संसक्तित्यागमात्रेणसर्वेजीवन्मुक्तगुणामनसिसिद्धंतीत्याशयेनाह अंतरिति॥ ४३॥ उपसंहरति॥ तस्मादिति॥ सर्वांतरस्यात्म
चित्तेकर्तरिकर्तृत्वमदेहस्यापिविद्यते॥ स्वप्नादाविवविस्फब्धसुखदुःखदृशोपमं॥ ३७॥ अकर्तरिमनस्यंतरकर्तृत्वं [illegible] स्फुटंभवेत्॥ शून्यचित्तोहि
पुरुषः कुर्वन्नपिनचेतति॥ ३८॥ चेतसाकृतमाप्नोतिचेतसानकृतंतुन॥ नकचित्कारणंदेहोनचचित्तेनकर्तृता॥ ३९॥ असंसक्तमकर्त्रैवकुर्वदेवम
नोविदुः॥ नकर्मफलभोक्तृत्वमसक्तंप्रतिपद्यते॥ ४०॥ ब्रह्महत्याश्वमेधाभ्यामसंसक्तोनलिप्यते॥ हरस्थकांतासंलीनमनाःकार्यैरिवाग्र
गैः॥ ४१॥ अंतःसंसक्तिनिर्मुक्तोजीवोमधुरवृत्तिमान्॥ बहिःकुर्वन्नकुर्वन्वाकर्ताभोक्तानहिक्वचित्॥ ४२॥ अंतःसंसक्तिमुक्तंयन्मनःस्यात्तद
कर्तृकं॥ तद्धिमुक्तंप्रशांतंतत्तद्युक्तंतदलेपकं॥ ४३॥ तस्मात्सर्वपदार्थानांश्लिष्टानांनिश्चितंबहिः॥ सर्वदुःखकरींक्रूरामंतःसक्तिंविवर्ज
येत्॥ ४४॥ विरहितमलमंतःसंगदोषेणचेतःशममुपगतमाद्यंव्योमवन्निर्मलाभं॥ सकलमलविमुक्तेनात्मनैकत्वमेतिस्थिरमणिनिभ
मंभोवारिणीवारिनीले॥ ४५॥ मोक्षोपायेषूपशमप्रकरणेअंतःसंसर्गविचारःसर्गः॥ ६७॥

जयेतविव

काशनसगणानंच नोबहिर्बहिःश्लिष्टानांपंचेबंधुभूतानांसर्वपदार्थानांनिरासेइदमेवैकंसुखोपायतयानिश्चितंयत्सर्वदुःखकरीसक्तिंविवर्जनमित्यर्थः॥ ४४॥ अंतःसंगःसंसक्तिस्तद्दोषेण
अलमत्यंतंविरहितंअतएवआद्यंसंसारदशातःप्राक्तनंशमंप्रपंचोपशमरूपंप्रत्यक्तत्त्वमुपगतंचेतस्तदात्मनासकलमेकत्वमेकरस्यमेतियथास्थिरमणिःस्फटिकःतन्निभंअंभःअ
राःनिशितधारायेषांसंतितेअरिणःखड्गादयइवनीलेयमुनादिवारिणिमीलितमेकत्वमेतितद्वदित्यर्थः॥ ४५॥ इतिश्रीवासिष्ठतात्पर्यप्रकाशेउपशमप्रकरणेसप्तषष्ठितमःसर्गः॥ राम॰ ॥१९५॥

DR BHAU DAJI MEMORIAL

लस्यसंसक्त्यसंसक्तयोश्चिकित्सोपायसंश्रुतेः॥ बंधाबंधविभागश्चफलंचात्रोपवर्ण्यते॥ कथंकेनप्रकारेणकिंप्रकारश्चबंधायकश्चकीदृशश्चमोक्षाय॥ कथंकेनचिकित्स्यते॥ १॥
देहस्यक्षेत्रस्यदेहिनःक्षेत्रज्ञस्यचयोजाड्यचित्त्वभावतालक्षणोविभागोविरुद्धस्वभावतातस्यएकपरित्यागेनअत्यंतापर्यालोचनेनअन्योन्यतादात्म्यधर्मविनिमयभावना
तदेहमात्रेआत्मताविश्वासोयः॥ सएवबंधाहोबंधहेतुःसंगइत्यर्थः॥ २॥ लक्षणांतराण्याहअनंतस्येत्यादिना॥ सपर्यंतत्वंत्रिविधपरिच्छेदसहितत्वंतान्निश्चयेसतिस्व

श्रीरामउवाच॥ कीदृशोभगवन्संगःकथंबंधायवान्रणां॥ कश्चमोक्षायकथितःकथंवैषचिकित्स्यते॥ १॥ श्रीवसिष्ठउवाच॥ दे
हदेहिविभागैकपरित्यागेनभावनात्॥ देहमात्रेतुविश्वासःसंगोबंधार्हउच्यते॥ २॥ अनंतस्यात्मतत्त्वस्यसपर्यंततत्त्वनिश्चये॥ यत्सुरता
थितमंतःससंगोबंधार्हउच्यते॥ ३॥ सर्वमात्मेदमखिलंकिंवांछामित्यजामिकिं॥ इत्यसंगस्थितिंविद्धिजीवन्मुक्ततनुस्थितिं॥ ४॥
भवंतु नाहमस्मिनचान्योस्तिमाभवंतुवा॥ सुखान्यसक्तइत्यंतःकथ्यतेमुक्तिभाङ्नरः॥ ५॥ नाभिनंदतिनैष्कर्म्यंनकर्मस्वनुस
ज्जते॥ सुसमोयःफलत्यागीसोसंसक्तइतिस्मृतः॥ ६॥ आत्मतत्त्वैकनिष्ठस्यहर्षामर्षवशंमनः॥ यस्यनायात्यसक्तोसौजीवन्मु
क्तःसकथ्यते॥ ७॥ सर्वकर्मफलादीनांमनसैवनकर्मणा॥ निपुणोयःपरित्यागीसोसंसक्तइतिस्मृतः॥ ८॥

परिच्छिन्नत्वस्वभावविस्मरणायहिपश्नेभ्यःसुखार्थित्वमित्यर्थः॥ ३॥ तद्विरोधिनीमसंगस्थितिंलक्षयतिसर्वमिति॥ ४॥ अहं अहंकारपरिच्छिन्नोनास्मिमदन्यश्च
२भवंतु नास्ति अतोमिथ्याभूतेदेहादौविषयसुखानिमाभवंतुवाअहंतुदेहाद्यसंगस्वभावइत्येवंदृढनिश्चयादसक्तः॥ ५॥ नैष्कर्म्यंसर्वकर्मत्यागंफलमनुलक्ष्यनसज्ज
तेअभिनिविशतेसुसमःसिद्ध्यसिद्ध्योरितिशेषः॥ ६।७॥ लोकसंग्रहस्यावश्यद्योतनायनकर्मणेति॥ ८॥

त्रीन्त्रश्चानमाधायचतुर्थश्रश्नंसमाधत्ते असंसंगेनेति॥ चेष्टाः दुश्चेष्टाः॥ नानाविधैः फलरागैर्विजृंभिताः श्रवणादिचेष्टाश्च निर्विघ्नतयाश्रेयः॥ संपादयंति॥ ९॥ इदानीं संसक्तफला
नि प्रपंचयति संसक्तिवशतइत्यादिना॥ १०॥ गर्दभानामपिनासारज्जुदेशभेदे प्रसिद्धाग्राम्यपशुजन्ममात्रोपलक्षणमेतत् एवमग्रेपिसंसक्तेर्विजृंभितंफलविस्तारः॥ ११॥ एक

असंसंगेनसकलाश्चेष्टानानाविजृंभिताः॥ चिकित्सिताभवंतीहश्रेयः संपादयंतिच॥ ९॥ संसक्तिवशतः सर्वे विततादुःखराशयः॥ प्रयांतिशतशारव
त्वंखभ्रकंटकवृक्षवत्॥ १०॥ रज्जुकृष्टघनघ्राणोयद्रुत्यापथिगर्दभः॥ भारंवहतिभीतात्मातत्संसक्तिविजृंभितं॥ ११॥ शीतवातातपक्लेशमेकदे
शनिषण्णया॥ तरुर्वहतियत्तन्वातत्संसक्तिविजृंभितं॥ १२॥ धराविवरनिर्मग्नोयत्कीटःपीडितांगकः॥ खिणोतिकिकलःकालंतत्संसक्तिविजृं
भितं॥ १३॥ क्षुत्क्षामकुक्षिःक्षपयत्यायुर्व्याघातभीरुधीः॥ पक्षीवृक्षशिखाशायीतत्संसक्तिविजृंभितं॥ १४॥ दूर्वांकुरतृणाहारःकि
रातशरपीडया॥ जहातियन्मृगोदेहंतत्संसक्तिविजृंभितं॥ १५॥ कृमिकीटत्वमायांतिजायमानैः पुनःपुनः॥ यस्मिाज्जनताजी
र्णास्तत्संसक्तिविजृंभितं॥ १६॥ उत्पद्योत्पद्यलीयंतेतरंगिणितरंगवत्॥ भूतानियदनंतानितत्संसक्तिविजृंभितं॥ १७॥ वीरुत्तृ
णादशांयताम्रियंतेयत्पुनःपुनः॥ नराविगतसंचारास्तत्संसक्तिविजृंभितं॥ १८॥ रसातलरसायोगात्तृणगुल्मलतादयः॥ जनयंतियदा
कारंतत्संसक्तिविजृंभितं॥ १९॥

देशेनिषण्णयातन्वास्थावरदेहेनवहत्यनुभवतीतियावत्॥ १२॥ १३॥ व्याघातःशरपाषाणमृत्कुविकाद्यभिघातस्तस्मात्अतिक्षणंभीरुर्भयवती धीर्यस्य॥ १४॥ १५॥ ज
नताः पुण्यपापाधिकारिजनसमूहाः॥ १६॥ तरंगिणितरंगवतिजलाशयेतरंगवत्॥ १७॥ वीरुत्लता॥ १८॥ रसायाः भूमेस्तलेनिपतितस्यरसस्यआयोगात्उपयो
गान्मूलैःपानात्जनयंतीतियत्तदितिसंबंधः॥ १९॥



स्वस्याः अनर्थांतराण्यनर्थादनर्थांतराण्यनर्थपरंपरास्तत्संकाशैर्विच्छेदभ्रांतिनिपातादिविक्षेपसहस्रहेतुभिर्बाह्याभ्यंतरपदार्थशतैः संकुलामत्ताप्रवृद्धा॥ २०॥ वंद्या
प्रशस्यावंध्यापुरुषार्थफलशून्या॥ २१॥ यादृढासंसारेसक्तिःसावंध्या॥ २२॥ २३॥ वंद्यसंसक्तेर्जीवन्मुक्तस्यव्यवहारादिसर्वोत्कर्षनिर्वाहकत्वंप्रपंचयतिशंखेत्यादिना
२४ अनारतंसंततंरविःपांथतांकरोतिसंचरतीतियावत्॥ २५॥ महाकल्पःप्राकृतप्रलयस्तत्रसमाधानंविश्रांतिकैवल्यविश्रांतिस्तदर्थंचिरंद्विपरार्द्धकालंकल्पिताःसर्गादि

स्वानर्थांतरसंकाशपदार्थशतसंकुला॥ यत्संसारनदीमज्जानत्संसक्तिविजृंभितं॥ २०॥ संसक्तिर्हिद्विधाप्रोक्तावंद्यावंध्याचराघव॥ वंध्यासर्वत्रमू
ढानांवंद्यातत्वविदांनिजा॥ २१॥ आत्मतत्वावबोधेनहीनादेहादिवक्तजा॥ भूयः संसारसक्तिर्यादृढावंध्येतिकथ्यते॥ २२॥ आत्मतत्वावबो
धेनसत्यभूतविवेकजा॥ वंद्याहिकथ्यतेसक्तिर्भूयःसंसारवर्जिता॥ २३॥ शंखचक्रगदाहस्तोदेहोविविधदेहया॥ वंद्यसंसक्तिवशतः परिपा
तिजगत्त्रयं॥ २४॥ अनारतनिरालंबेव्योमवर्त्मनिपांथतां॥ वंद्यसंसक्तिवशतः करोतिरविरन्वहं॥ २५॥ महाकल्पसमाधानचिरक

त्पितकल्पनं॥ वंद्यसंशक्तिवशतोब्रह्मास्संस्फुरतिवैवपुः॥ २६॥ लीलयाललनालानलीनंभूतिविभूषितं॥ वंद्यसंसक्तिवश
तःशरीरंशांकरंस्थितं॥ २७॥ विज्ञानगतयःसिद्धालोकपालास्तथेतरे॥ वंद्यसंसक्तिवशतस्तिष्ठंतिजगतोंगरो॥ २८॥ धत्तेशा
रीरंत्रैलोक्यमन्याभुवनसंततिः॥ वंद्यसंसक्तिवशतोजरामृतिविवर्जितं॥ २९॥ मनःपततिभोगेषुग्रामोमांसलवेष्विव वंध्यसं
सक्तिवशतोव्यर्थयारम्यशंकया॥ ३०॥

कल्पनाःयेनब्रह्मणोहैरण्यगर्भंवपुःस्फुरतिव्यवहरति॥ २६॥ ललनागौरीतद्रूपएवआलानेबंधनस्तंभेलीलयैवलीनंसक्तं॥ २७॥ विज्ञानेब्रह्मतत्वबोधेगतिर्दृ
ढप्रतिष्ठायेषां २८ त्रैलोक्यत्रयादन्याभुवनसंततिपरेनमहर्जनःतपःसत्यादिलोकस्याप्रतत्वविदोलक्षणयोच्यंते॥ २९॥ वंध्यसंसक्तेर्वंध्यात्वमुपपादयतिमन
इति॥ ३०

स

मुक्तामुक्तव्यवहारमात्रे संसक्तिनिर्वाह्यमिति प्रपंचं दर्शयति संसक्तिवशत इत्यादिना॥ ३१। ३२॥ ३३॥ विरसं यथा तथा उत्पत्त्योत्पत्त्य॥ ३४॥ मात्स्यन्यायेन परस्परनिगीर्णा गाः॥ ३५॥ मशकसंततिरिवेति शेषः। अंगेरुपां मंत्रणे॥ ३६॥ पातोत्पातौ उदयास्तमयौ वृद्धिक्षयौ पतनोत्पतने च॥ सदैवेतद्दशया जीर्णं शिथिलं अत एव कालरूपवालकस्य कंदुकभूतं तत्तलं जलमयं लडयोरभेदाज्जडं च आमलिनं कलंकम्लानं चेति बहुदोषत्वाद्धातुं योग्यमपि वपुः संसक्तिवश्यादेवाद्यापि न जहाति॥ ३७॥ नानाविधा

संसक्तिवशतो वाति वायुर्भुवनकोटरे॥ पंचभूतानि तिष्ठंति वहतीयं जगत्स्थितिः॥ ३१॥ दिवि देवा भुवि नराः पाताले भोगिनो सुराः॥ ब्रह्मांडोदुंबरफले स्फुरन्मशकवत्स्थिताः॥ ३२॥ जायंते च म्रियंते च निपतंत्युत्पतंति च भूतानि यदनंतानि तरंगिणितरंगवत्॥ ३३॥ उत्पत्त्योत्पत्त्य लीयंते तत्संसक्तिविजृंभितं॥ भूतानि विरसं भूयो निर्झरांबुकणा इव॥ ३४॥ परस्परनिगीर्णांगा जनता जाड्यजर्जरा॥ संभ्रांता भ्रमभस्त्यंगशीर्णपर्णमिवांबरे ३५॥ नक्षत्रचक्रं गगने द्रुमे मशकसंततिः॥ स्फुरत्यावर्तवत्स्थैव पाताले गजलौघवत्॥ ३६॥ पातोत्पातदशाजीर्णं कालबालैकंदुकं॥ अद्यापि न जहातीदं जलमामलिनं वपुः॥ ३७॥ नानापारुष्यगावर्तदुःखालोकनकर्कशं॥ न लुनाति मनःखंडं दुःखिगीर्वाणमंडलं॥ ३८॥ वासनामात्रवशतः परे व्योमनि केन चित्॥ इदमारचितं चित्रं विचित्रं पश्य राघव॥ ३९॥ मनःसंगैकरंगेण मृन्येव्योम्नि तगन्मयं॥ यदिदं रचितं चित्रं तत्सत्यं न कदाचन॥ ४०॥

नाम परापरुष्यगावर्तदुःखानामालोकनेन पुनःपुनरनुभवेन कर्कशं कठोरमनोलक्षणं खंडकं छेदनचिकित्स्यं व्रणविशेषं तद्दुःखेन सदा दुःख्यविगीर्वाणमंडलमिंद्रादिदेवसमूहः संसक्तिवशादेव न लुनाति छेदेन न चिकित्स्यते॥ ३८॥ संसक्तिश्च विवेकमात्रजन्यबोधेनोच्छेत्तुं शक्येति दर्शयितुं तद्विषयस्य जगतो वासनामात्रकल्पितत्वमाह वासनेति॥ ३९॥ मनसः संगः संसक्तिस्तद्रूपेणैकेनैव रंगेण रंजकद्रव्येण॥ ४०॥ 

जरत्त्वा शरीराण्यपि तिष्ठत्यति॥ ४१॥ संसक्तिदोषात्मा मानां जरत्त्वयाभक्षितानां देहानामानंत्यमाह परिसक्तेति॥ परितो विषयेषु सक्तमतेर्जीवस्य अंभसां पत्युः समुद्रस्य सिकताः परिसंख्यातुं गणयितुं॥ ४२॥ मेरोः आपादमस्तकं लंबिन्या अत एव मुक्तालतत्वेनोत्प्रेक्ष्यमाणायाः गंगायाः तरंगलक्षणमुक्ताः गणयितुं कदाचित् गणयितुं शक्यंते॥ सक्तचेतसां देहास्तु नेत्यर्थः॥ ४३॥ ४४॥ ४५॥ ४६॥ संसक्तचित्तं प्रति आयांति॥ ४७॥ संसर्गः संसक्तिस्तद्रूपेयः अत एव स्वयं शिरसि गृहीतः शिलादिभार इव अवश्यं वोढव्यस्तेन भारभूतं शरीरं यया॥ स्थयो मरणं उदयो जन्म तदुभयं दुर्दर्शं जीवस्य प्रार्थयंत्येव स्थिरया अविद्यया सर्वं दुःखजालं ततमित्यर्थः॥ ४८॥ संसक्तिस्त्यागस्त सर्व

संसक्तमनसामस्मिन्संसारे व्यवहारिणां॥ अतिरत्त्वा शरीराणि तरणान्यग्निशिखा यथा॥ ४१॥ परिसक्तमतेर्देहान्विकताः पत्युरंभसां॥ कः शक्तः परिसंख्यातुं भ्रमरेणुगणं यथा॥ ४२॥ मुक्तालतायां गंगाया मेरोरापादमस्तकं॥ तरंगमुक्ताः गण्यंते न देहाः सक्तचेतसां॥ ४३॥ संसक्तमनसा मेता भ्यांतः पुरपंक्तयः॥ रचिता रौरवावीचिकालसूत्रादिनामिकाः॥ ४४॥ सक्तचित्तजनं दुःखशुष्कविंधनसंचयं॥ ज्वलती नरकाग्नीनां विद्धि तेनज्वलंति ते॥ ४५॥ दुःखजालमिदं नाम यत्किंचिज्जगतीगतं॥ संसक्तमनसामर्थे तत्सर्वं परिकल्पितं॥ ४६॥ संसक्तचित्तमायांति सर्वदुःखपरंपराः॥ जलकल्लोलवलिता महानद्य इवांबुधिं॥ ४७॥ मनःसंसर्गरूपिण्या भारभूतशरीरया॥ स्थयोदयदशार्थिन्या सर्वं ततमविद्यया॥ ४८॥ असंसंगेन भोगानां सर्वा राम विभूतयः॥ परं विस्तारमायांति प्रावृषीव महापगाः॥ ४९॥ अंतःसंसंगमंगानामंगानां विद्धि राघव॥ अनंतः संगमंगानां विद्धि राम रसायनं॥ ५०॥ संसंगेनांतरस्थेन दह्यते प्रकृतिः स्वयं॥ स्वकालोत्थेन रक्तोशीपावकेन यथौषधिः॥ ५१॥

सुखावह इत्याह असंसंगेनेत्यादिना ४९॥ अनंतः संगं अंतः संगपरित्यागं॥ ५०॥ रसाः रक्तास्तलणविशेषास्तान् कंबनायकोऽस्तेइति रक्तोशी कर्मण्यनु ओषधिर्लता यथा स्वं कलयंति विश्रयंति याविरणानि तदुत्थेन पावकेन दह्यते तथा प्रकृतिकार्यदेहादि संसंगात्प्रकृतिभूतः स्वयं जीवोपि दह्यत इत्यर्थः॥ ५१

असक्तं मनः सर्वत्र सुखायैव अनंतमाकाशमिव संस्थितं ॥ ५२ ॥ असक्तत्वं तत्सदाभासतां च विषयविभागेन विहरवन्तु पर्वतं हरति विद्यादर्शीति प्रकृष्टं सुरयं स्वर्यादि वारा
विमौर्व ॥ ५३ ॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे अष्टपष्ठितमः सर्गः ॥ ६८ ॥ मनः सर्वार्थसंसक्तिस्यागाच्छिन्मात्रसुस्थिरं । चिन्मात्रशेषं येन स्यात्सत्कमोत्रनिगद्यते विजा
नताविवेकिना सर्वदा तत्सत्कालोचितसर्वव्यवहारसंस्थेन तत्सद्व्यवहारोचितेष्टमित्रभ्रात्पुत्रादिना सर्वेण सह तिष्ठता अनिषिद्धलौकिकशास्त्रीयसर्वकर्मरतेना
पिमनो वक्ष्यमाणलक्षणं कार्यमित्यर्थः ॥ अथवा एकैककालदेशमित्रभ्रात्रादिसाध्येन कतिपयकर्मरतत्वापादकपरिच्छिन्नसंसक्तिनिवारणाय प्रथमं सर्वदे
शकालादिसर्वोपकरणसंपत्त्या सर्वजगद्व्यवहारकर्मरतेनापि तेन । तत्पश्चाद्वक्ष्यमाणप्रकारं मनः कार्यमित्यर्थः ॥ २ ॥ चेष्टादिकालकलनां तेषु मनः सक्तं न कार्यं

सर्वत्रासक्तमाशांतमनंतमिव संस्थितं ॥ असक्तत्वं सदाभासं सुखायैव मनो भवेत् ॥ ५२ ॥ विद्यादर्शिप्रोदयमागतेन स्वयं त्वविद्याविषयेगतेन ॥ सर्व
त्रसंसक्तिविवर्जितेन स्वचेतसा तिष्ठति यः स मुक्तः ॥ ५३ ॥ मोक्षोपाये उपशमप्रकरणे संगविचारयोगोपदेशः सर्गः ॥ ६८ ॥ श्रीवसिष्ठ उवाच ॥ सर्वदा सर्व
संस्थेन सर्वेण सह तिष्ठता ॥ सर्वकर्मरतेनापि मनः कार्यं विजानता ॥ १ ॥ न सक्तमिह चेष्टासु न चिंतासु न वस्तुषु ॥ नाकाशे नाप्यधो नाग्रे न दिक्ष
न लतासु च ॥ २ ॥ न बहिर्विपुलाभोगेन चैवेंद्रियवृत्तिषु ॥ नाभ्यंतरे न च प्राणे न मूर्द्धनि न तालुनि ॥ ३ ॥ न भ्रूमध्ये न नासांते न मुखे नैव तार
के ॥ नांधकारे न चाभासे न चास्मिन्हृदयांबरे ॥ ४ ॥ न जाग्रति न च स्वप्ने न सुषुप्ते न निर्मले ॥ नासिते न च वापीते रक्तादौ शबले न च ॥ ५ ॥ न चले न स्थि
रे नादौ न मध्ये नेतरत्र च ॥ न दूरे नांतिके नाग्रे न पदार्थे न चात्मनि ॥ ६ ॥ मितिसंबंधः साध्यविषयासु चेष्टासु ॥ अतीतविषयासु चिंतासु वर्त्तमानेषु वस्तुषु अग्रेम
ध्ये लतासु दिक्शाखाप्रायासु विदिक्षु ॥ २ ॥ बहिराधिभौतिके विपुले आभुज्यत इत्याभोगे कलत्रभ्रात्रादिविषये । तद्भोगलक्षणासु इंद्रियवृत्तिषु आभ्यंतरे आध्या
त्मिके प्राणमूर्द्धादौ नियोगशास्त्रोक्तानि तत्तत्काम्यसिद्ध्युत्क्रूलानि धारणास्थानानि तेष्वपि ॥ ३ ॥ तारके दर्शिणासिकनीनिकायां ॥ ४ ॥ निर्मले शुद्धसत्त्वगुणे ॥ अ
सिते तमसि पीते रक्तादौ रजसि शबले गुणसमाहारे ॥ ५ ॥ चले कार्मवर्गे स्थिरे कारणे अव्यक्ते आदिमध्येतराः सर्गादिकालास्तेषु दूरादिषु दिक्परिच्छेदेषु पदार्थे नाम रूप

राम॰
१९८

रूपांतग्रहणांसग्रहणंधयोरप्युपलक्षणं मोहो विषयाभिलाषपारवश्यं आनंदवृत्तयो विषयोपभोगफलानि तेष्वपि ॥ गमागमचेष्टासु तेचरत्वादिसिद्धिषु कालकलनासु अतीतानाग
तज्ञता चिरजीवनादिसिद्धिषु ॥ ७ ॥ किंचिच्चेत्यं निश्चलत्वाबुद्धिस्तद्वलं विनिवृत्त्याक्षिणो ॥ आत्मरतं स्मरानंदप्रवणं अत एव सर्वत्र नीरसं रसोऽप्यस्य परं दृष्ट्वा निवर्त्तत इति भगवद्व
चनात् ॥ [illegible] ॥ इत्थं कारस्तादृशमनः स्थितेरपि मिथ्यात्वद्योतनार्थः ॥ ९ ॥ अजीवत्वं प्रसक्तं ॥ १० ॥ स्वात्मरतिः स्वात्मैकप्रियः ॥ ११ ॥ चेत्यांशं प्राकृतबुद्धिसाक्षित्वं

न शब्दस्पर्शरूपेषु न मोहानंदवृत्तिषु ॥ न गमागमचेष्टासु न कालकलनासु च ॥ ७ ॥ केवलं चितिविश्रम्य किंचिच्चेत्यावलंबिनि ॥ सर्वत्र नी
रसमिव तिष्ठत्यात्मरसं मनः ॥ ८ ॥ तत्रस्थो विगतासंगो जीवोऽजीवत्वमागतः ॥ व्यवहारमिमं सर्वं मा करोतु करोतु वा ॥ ९ ॥ अकुर्वन्नपि कुर्वा
णो जीवः स्वात्मरतिः क्रियां ॥ क्रियाफलैर्न संबंधमायाति खमिवांबुदैः ॥ १० ॥ अथवा तमपि त्यक्त्वा चेत्यांशं शांतचिद्घनः ॥ जीवस्तिष्ठतु
संशांतोज्ज्वलन्मणिरिवात्मनि ॥ ११ ॥ निर्वाणमात्मनि गतः सततोदितात्मा जीवोऽस्तु विव्यवहरन्नपि राम भद्र ॥ नो संगमेति गतसंगतया फले
न कर्मोद्भवेन सहतीव च देहभारं ॥ १२ ॥ मोक्षोपाये उपशमप्रकरणे शांतसमायात योगोपदेशः सर्गः ॥ ६९ ॥ श्रीवसिष्ठ उवाच ॥ असंगा
सुखाभ्याससंस्थितैर्विततात्मभिः ॥ व्यवहारिभिरप्यंतर्वीतशोकभयैः स्थितं ॥ १ ॥

१२ ॥ अहृविर्व्यवहारफलेच्छाशून्यः जीवगतया संगनिमित्ताविद्याकामकर्मवासनाशून्यतया हेतुना कर्मोद्भवेन फलेन संगं नो एति किंतु यावत्प्रारब्धक्षयं देहभारमा
त्रं सहतीव ॥ तस्य तावदेव चिरं यावन्न विमोक्ष्ये इत्यादिश्रुतेरिति भावः ॥ १२ ॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे एकोनसप्ततितमः सर्गः ॥ ६९ ॥ असंगसुखे विश्रां
तो व्यवहारसमुद्भवैः ॥ यथा न दूयते दोषैस्तथा युक्त्योपपाद्यते ॥ असंसंगसुखस्याभ्यासो निरंतरमासक्त्या दृढ़ं तत्र स्थितैर्विश्रांतैः ॥ १ ॥

वा॰टी॰उ॰प॰ १९७

तेषां तथास्थितिः केन लिंगेन ज्ञाता तत्राह भक्ष्यभ्ध्येति यतः प्रक्षोभनिमित्तैः पुत्रधननाशं [illegible]नागबंधनापमानादिभिः भक्ष्यभ्ध्यदेहवद्वक्ष्यमाणस्यापि वस्तु नस्तद्द हितस्य संविदाश्रित्य तदतः परमार्थसुखेऽविसंवादेन अविप्रलंभेन हेतुना अंतः पूर्णस्यइंदुपक्षे ज्योतिश्चक्रआदिगत्या भक्ष्यभ्ध्यदेहस्यापि वामने स्थिरत्वाद् भक्ष्यभ्ध्यदेहस्यसंवेदयती ति संवित्स यस्तस्य अविसंवादेन पूर्णमास्यामत्यंतसांमुख्याद् वैषम्येणांतरस्तैः पूर्णस्य वदनमदर्शे बिंबो ॥२॥ यदनुग्रहादन्योपि [illegible]क्षोभमालिन्यान्मुच्यते तेतस्यनिर्विक्षोभत्वं दृष्टं किं वाच्यमित्याशयेनाह चेत्येति ॥३।४।५॥ विक्षोभदर्शने पि तदभावे दृष्टांतमाह चित्तेति रंगो रंजकोपाधिर्जपाकुसुमादिः मसृणः स्निग्धः ॥६॥ उदितेति निरतिशयानंदाभ्युदयं प्रा

भक्ष्यभ्ध्यस्भ्ध्यदेहस्याविसंवादेन संविदः ॥ अंतः पूर्णस्य वदने श्रीरिंदोरिव लक्ष्यते ॥२॥ चेत्यहीनं चिदालंबं मनो यस्यगतज्वरं ॥ तेनांबुकतकेनेव जनता संप्र सीदति ॥३॥ नित्यमोदितदृशा लीनो ज्ञः स्वस्थश्चंचलोपि सन् ॥ भक्ष्योदयस्तस्याचो प्रतिबिंबार्कवन्मुधा ॥४॥ आत्मारामा महात्मानः प्रबुद्धाः परमोदयाः ॥ बा ह्यैः पिष्टा प्रतरलाः अंतर्मेरुरिवाचलाः ॥५॥ चित्तमात्मत्वमायातं सुखदुःखानुरंजनं ॥ नोपैति रंगसंयुक्तो मसृणः स्फटिको यथा ॥६॥ संसारदृष्टिरुदि तज्ञातलोकपरावरं ॥ न रंजयति सच्चित्तं जललेखा यथांबुजं ॥७॥ आत्मध्यानमयो ध्याने प्रबोधं परमात्मनः ॥ कलनामलनिर्मुक्तः स्वसक्त इति क थ्यते ॥८॥ आत्मारामतया जीवो यात्यसंसंगतामिह ॥ आत्मज्ञानेन संसंगस्तनुतामेति नान्यथा ॥९॥ जाग्रत्येव सुषुप्तस्थो जीवो भवति राघव ॥ अस्यां दृ शिगतो द्वंद्वो नित्यो नस्तमयोदयः ॥१०॥

सर्वं तं ज्ञातं लोकानां परईश्वरतत्त्वमवरं जीवतत्त्वं च येन ॥७॥ यावदयमंतः स्वसंसक्तो न भवति तावद्बाह्येषु असंसक्तिर्दुर्लभेत्याशयेन स्वसंसक्तलक्षणमाह आत्मेति यदा अयं परमात्मनः प्रबोधं बोधं प्राप्य कलनाहेतुभिर्मलैर्निर्मुक्तः सन् आध्याने पि निरतिशयानंदात्मनः स्वतः स्फुरणान्निर्विकल्पसमाधाविव सदैव आत्मध्यानमयइव सु खमग्नो भवति तदा स्वसक्त इति कथ्यत इत्यर्थः ॥८॥ ज्ञानपरिपाकोत्कर्षादात्मसं[illegible]त्कर्षक्रमेणासंसर्गः क्षीयत इत्याह आत्मारामतयेति ९ अस्या उक्तलक्षणा यां [illegible]कि दृशिगतः परिणत अद्वंद्वः प्रियाप्रियरहितः १० राम॰ १९७

न्थु२

प्रौढिं अभ्यासक्रमात् प्ररूढतां परिणामः क्रमात्कलापचयस्तद्वशात् जलमये मंडले प्रतिबिंबात्माइंदुर्यथा आमावास्यायां स्वबिंबास्तताकतामेति तद्वदित्यर्थः ॥११॥ जाग्रत्येव सुषुप्तस्थ इति यदुक्तं तद्विशदयति चित्तेइति ॥१२।१३॥ निरहंभावसाम्याद्यंत्रपुत्रकोनर्तकप्रतिमा तत्तुल्यदेहः ॥१४॥ चित्तस्यबाधिका पीडाकरी अहंभावलक्षणो वशक्तिः ॥ साहि अनिष्टानामिष्टानां च भावाभावाभ्यामागमापायाभ्यां उपतापदा ॥१५॥ एवं सा घनदशामारभ्यैवावहेलया अभिनिवेशत्यागेन ॥१६॥ प्रकृतिवर्णे

अत्र प्रौढिमुपायातः स्वर्यतामेति पावनी ॥ परिणामवशादिंदुरमावास्याकतामिव ॥११॥ चित्ते चेत्सदृशाहीने या स्थितिः क्षीणचेतसां सोच्यते शांतकलना जाग्रत्येव सुषुप्तता ॥१२॥ तां सुषुप्तदशामेत्य जीवन्व्यवहरन्नरः सुखदुःखवरैर्भिर्नकदाचन कृष्यते ॥१३॥ जाग्रत्येव सुषुप्तस्थो यः करोति जगत्क्रियां ॥ तं यंत्रपुत्रकमिव नायाति सुखदुःखदृक् ॥१४॥ चित्तस्यबाधिका शक्तिर्भावाभावोपता पदा ॥ आत्मतामागते चित्ते तस्याः किं बाधते कथं ॥१५॥ सुषुप्तबुद्धिः कर्माणि एवमेवावहेलया ॥ कुर्वन्न बध्यते जीवो जीवन्मुक्तत यास्थितः ॥१६॥ सौषुप्तीं वृत्तिमाश्रित्य कुरु मा कुरु वानघ ॥ कर्म प्रकृतिजं पाकवशादुपगतं स्थितं ॥१७॥ नादानं न परित्यागः कर्मणो ज्ञाय रोचते ॥ तिष्ठंत्यवगतात्मानो यथाप्राप्तानुवर्तिनः ॥१८॥ कुर्वन्नपि न कर्तास्मि सुषुप्तैकस्थया धिया ॥ अकर्तापि च कर्तास्मि यथेच्छसि तथा कुरु ॥१९॥ यथा न किंचित्कलयन्नंबके स्पंदते शिशुः तथा फलान्यकलयन्कुरु कर्माणि राघव ॥२०॥

प्रकृतस्वभावसमुत्पन्नं तदुचितं प्रारब्धपाकवशादुपगतं प्राप्तं लोकशास्त्रस्थितं ॥१७॥ येत्वाप्रमोचितमपि कर्म त्याज्यमेवेति मन्यंते तान्प्रत्याह नादानमिति ॥१८॥ यदि तत्त्वज्ञः अयदि वा अतत्त्वज्ञः इति पूर्वोत्तरवाक्ययोः शेषः ॥१९॥ न किंचित्प्रयोजनं कलयन् संकल्पयन् सहजानंदलीलयैव स्पंदते ॥२०॥

यत्तच्छब्दौ वीप्सितौ बोध्यौ ॥२१॥ यथा अद्रिः षट्स्वपि ऋतुषु अविकृतत्वात्समस्तदृत्सर्गा सु आपत्सु पदवस्थासु समो भवतीत्यर्थः ॥२३॥ धीरात्मा लौकिकवैदिकक्रि
यासु बहिरेव मेवं लोललामिवायाति नो ऽतः भवनकंपी यस्तु तथा विधो भवति ॥ यथा वायुना बहिर्वृक्षतृणादौ प्रस्पंदितो ऽचलः पर्वतस्तद्वदित्यर्थः ॥२४॥ क्रियासि
वतस्य मरणजीवनयोरप्यविकारिता तुल्यैतन्निश्चयेनाह सुषुप्तेति ॥२५॥ ननु विदुषां सदैव तुर्यस्थितिर्युक्ता नासौ सुषुप्तेति शंकामलक्ष्याह रपषेवेति ॥ २६ ॥ जर्हि

अचेत्यचित्पदस्वच्छो जाग्रत्यपि सुषुप्तधीः ॥ यद्यत्करोति लब्धात्मा तस्मिंस्तस्य न कर्तृता ॥२१॥ दशामामाद्य सौषुप्तीं स्वचित्ते च विवासन
ः ॥ अंतः शीतलतामेति ज्ञो रसेन यथा शशी ॥२२॥ सुषुप्तस्थो महातेजाः सर्गाः सर्गाद्युदिवर्तते ॥ समः सर्वास्ववस्थासु भवत्याद्रिरिवर्थ सुषु॥२३॥
सुषुप्तसमस्थो धीरात्मा बहिरायाति लोलतां ॥ क्रियासु नो भावकंपः प्रस्पंदित इवाचलः ॥२४॥ सुषुप्तावस्थितो भूत्वा देहं विगतकल्मषः ॥ पा
तयाश्यथवा दीर्घकालं धारयशैलवत् ॥२५॥ एषैव राम सौषुप्ती स्थितिरभ्यासयोगतः ॥ प्रौढा मता तुर्यमिति कथिता तत्त्वकोविदैः ॥२६॥
आनंदम यस्वांतः प्रक्षीणमकलामयः ॥ अत्यंतानंगतमना भवति ज्ञो महोदयः ॥२७॥ तत्रस्थो ऽज्ञः प्रमुदितः परमानंदघूर्णि
तः ॥ लीलामिवेमां स्वनीं सदा समनुपश्यति ॥२८॥ वीतशोकभयायासो गतसंसारसंभ्रमः ॥ तुर्यावस्थामुपारूढो भूयः पतति नात्म
वान् ॥२९॥ प्राप्य स्वोपरवीं पुरायां यथेदं भ्रमितं जगत् ॥ शैलमूर्ध्नस्थ इवाधःस्थं हसन्पश्यति धीरधीः ॥ ३०॥ अस्यां तु तुर्यावस्था
यां स्थितिं प्राप्याविनाशिनीं ॥ आनंदैकांतलीनत्वाद्नानंदपदं गतः ॥ ३१॥

सौषुप्ती स्थितिरित्युक्तेः कोभिप्राय इत्यमाह आनंदमय इति ॥ निर्दुःखत्वे सति निरतिशयसुखसमृद्धता सौषुप्ते आनंदमयेरूढा तद्धि वक्ष्यातयोक्तिरित्यर्थः
२७॥ तत्स्थस्य कीदृशं जगद्दर्शनं तत्राह तत्रेति ॥२८॥ ननु तां लीलां पश्यंस्तत्र स पुनः पतेदपि नेत्याह वीतेति ॥२९॥ कुतो न पतति तत्राह प्राप्येति ॥ यतो दोषदृ
ष्ट्या हसन्पश्यति न पुरुषार्थबुध्येत्यर्थः ॥३१॥

DR. BHAU DAJI MEMORIAL



इत्थं यावज्जीवं तस्य तुरीयास्थितिमुक्त्वा ते विदेहस्य तुर्यातीतस्थितिमाह अनानंदेति ॥ आनानंदमवस्थात्रयपदं तदपेक्ष्य तुर्यपदं महानंदमिति तज्जीवन्मुक्तस्य सदा भवति विदे
हमुक्तौ तु आनानंदस्मरणयोगात्तदपेक्ष्या माह सकलनायोगात्तदतीतस्ततोपि मुक्तस्तुर्यातीतपदंगतश्च उच्यते इत्यर्थः ॥३२॥ तामेवस्थितिं वर्णयन्नुपसंहरति परिगलि
तेति ॥ यतः सकला विलीना समो मया अभिमानो यस्य अत एव परिगलितसमस्तजन्महेतुकामकर्मवासनापाशः ॥ महात्मा जलगतसैंधवखंडवत्खंडभावविलम
तरमोरसतदिति ॥ रस आनंदः स नैकवेद्यांशश्च तन्मयीं सत्तां परमार्थस्थितिं प्रयातीत्यर्थः ॥३३॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे सप्तितमः सर्गः
॥७०॥ परस्यामव्यवहार्यत्वात् तुर्यमात्रोपवर्ण्यते शरीरादिनिरासेन यथा मोहाज्जनिक्रमः तुर्यातीतपरस्य वागादिव्यवहारविषयत्वं दर्शयितुं भूमिकां रचयति ॥

अनानंदमहानंदकलातीतस्ततोपि हि ॥ मुक्त इत्युच्यते योगी तुर्यातीतपरंगतः ॥३२॥ परिगलितसमस्तजन्मपाशः सकलविलीनतमोमया
भिमानः ॥ परमरसमयीं प्रयाति सत्तां जलगतसैंधवखंडवन्महात्मा ॥३३॥ मोक्षोपाये उपशमप्रकरणे असंसंगविकल्पोपदेशः सर्गः ॥७०॥
श्रीवसिष्ठ उवाच ॥ यावत्तुर्यपरामर्शस्तावत्केवलतापरं ॥ जीवन्मुक्तस्य विषयो वचसां चरघटक्रिया ॥१॥ अत ऊर्ध्वमदेहानां मुक्तानां वचसां
तथा विषयो न महाबाहो पुरुषाणामिवांबरं ॥२॥ सा हि विश्रांतिपरवीहरेभ्योपि दवीयसी ॥ गम्या विदेहमुक्तानां खले खेवनभस्वतां ॥३॥
सुषुप्तावस्थया प्राकं चित्कालं मुक्त्वा जगत्स्थितिं ॥ तुर्यतामेति तदनु परमानंदघूर्णितः ॥ ४॥

वरिति ॥ अवस्थात्रयपाद्यान्परामर्शयतत्मासिद्धिन्मात्रे तद्विलापनक्रमेण चिन्मात्रपरिशेषावस्थितिलक्षणतुर्यस्य यावत्परामर्शः साक्षादनुभवस्तावन्मात्रं के
वलतापरं जीवन्मुक्तस्य श्रुत्यादिवचसां च विषयः वाच्य जन्याखंडाकारवृत्तेस्तावत्येव पर्यवसानादिति भावः ॥१॥ अत ऊर्ध्वं अदेहानां प्राप्यमपि तुर्यातीतपदं तेषां
वेदवचसां विषयो न तद्विषयतापादनहेतोर्मनसः स्यात् यथा नासुराणामंबरमाकाशं पुरुषाणां मनुष्याणां विषयो न तद्वदित्यर्थः ॥२॥ गम्या प्राप्या खले खोम्नवीथीन
भस्वतां वायुनामिव ॥ ३ ॥ अतः सदेहमुक्तानां पंचभूमिकाक्रमेण समर्पीतभूमिकात्वेव स्थितिरित्याह सुषुप्तेति ॥४॥

ज्ञानदार्ढ्यं तु तुर्यातीतपदविश्रान्तिपर्यंतं त्वया कार्यं नान्तराले कृतभूमिकामात्रपर्यवसितमित्याह तुर्यातीतेति॥ ५। तत्र प्रथमं पंचमभूमिकैव शास्त्रीयव्यवहारनिर्वाहार्थम्भ्यसनीयेत्याशयेनाह सुषुप्तावस्थयेति। क्षयो मृत्युः कलाभ्रंशश्च उद्वेगो भयं रागरूपरोधश्च॥ ६॥ ननु देहनाशे संविन्नाशस्याप्यवर्जनात्कथं संविदात्मना मे न क्षय इत्यत्राह शरीरेति॥ संविदः क्षयं स्थैर्यं चेति शेषः॥ ७॥ यदि देह इति भ्रमस्तर्हि स एव नाश्यतां तत्राह देहेति प्रकृते स्वात्मबोधस्थैर्ये आरंभः प्रयत्नो यस्य तथाविधो भ

तुर्यातीतां दशां तद्वा यथा यात्यात्मकोविदाः॥ तथाधिगच्छ निर्द्वंद्वं पदं रघुकुलोद्वह॥ ५॥ सुषुप्तावस्थया राम भव संव्यवहारवान्॥ वि
त्तेदोऽरिवतेनस्तः क्षयोद्वेगावरिंदम॥ ६॥ शरीरसन्निवेशस्य क्षयस्थैर्यं च संविदः॥ मा गृहाण भ्रमो ह्येष शरीरमिति ज्ञं भते
७॥ देहनाशेन कोऽर्थस्ते कोऽर्थस्ते देहसंस्थया॥ भव त्वं प्रकृतारंभस्तिष्ठस्वेष यथास्थितं॥ ८॥ ज्ञातवानसि तत्सत्यं बुद्धवा
नसि तत्पदं॥ प्राप्तवानसि रूपं स्वं विशोको भव भूतये॥ ९॥ ईप्सितानीप्सितं व्यक्ताशीतलालोकशोभया॥ अंध
कारात्तथा भोगान्मुक्तं खमिव शोभते॥ १०॥ मनस्तवात्मसंपन्नं नाधः समनुधावति॥ योगमंत्रतपःसिद्धः पुरुषः
खादिवावनिं॥ ११॥ इह शुद्धा चिदेवास्ति पारावारविवर्जिता॥ अयं सोऽहमिदं तन्म इति ते मास्तु विभ्रमः॥ १२॥

व। स एव देहः॥ ८। स्वात्मबोधे संदेहं वारयति ज्ञातवानसीति सत्ता जगदधिष्ठानतत्त्वं। पदं अवस्थात्रयाधिष्ठानं स्वरूपं अखंडवाक्यार्थस्वरूपं। ९। ख अर्थाच्छरदाका 
शं॥ १०॥ अधः अर्वाक्तन विषयसुखे सिद्धः खेचरसिद्धिं प्राप्तः खात्स्वं विहाय यथा अवनिं न समनुधावति तद्वत्॥ ११॥ पारावारे परार्वाचीतीरे परिच्छेद इति यावत् 
१२।

यदि शुद्धा चिदेकैवास्ति तत्सर्वोत्मेति तद्व्यतिरिक्ता अभिधा कथं तत्राह॥ १३॥ १४॥ समस्तात्सर्गोज्ज्वलात्। जगतः स्फाराज्जगदात्मना विस्तृतात्॥ १५॥ देहादिभावे पृथक्त्वं य
च्चतेतत्किं॥ यन्न तत्त्वं यद्भवानतेतत्किं॥ अध्यासदशा कस्यापि त्वदात्मतायास्तत्त्वं स्फुटतायाश्चासंभवादधिष्ठानदृशा सर्वत्रैव तत्त्वं भवाच्चेति भावः॥ १६॥ परमार्थतस्तु
द्वित्वमेव नास्तीति तदधीनादेहतत्संबंधतदुपादानकलंकादिसंभावनाहरन्निरस्तेत्याह नेति॥ १७॥ अभ्युपगतेऽपि द्वैते देहादिसत्यत्वे च चिदात्मनस्तत्संस्पर्शो न संभवत्ये

आत्मेति व्यवहारार्थमभिधा कल्पिता विभो॥ नामरूपादिभेदस्तु हरम स्मादलंगतः॥ १३॥ जलमेव यथाम्भोधिर्न तरंगादिकं पृथ
क्॥ आत्मैवेदं तथा सर्वं न भूतो यादिकं पृथक्॥ १४॥ यथा समस्तोज्ज्वलधौ जलोदन्यन्न लभ्यते॥ तथैव जगतः स्फारादात्मनोऽन्यन्न
लभ्यते॥ १५॥ अयं सोऽहमिति प्राज्ञ कृतरोषि व्यवस्थिति॥ किं तत्त्वं किं च वा तेऽस्ति किं न त्वं किं च वानते॥ १६॥ न द्वित्वमस्ति नो देहाः संबं
धौ विभो भवेत॥ १७॥ छायातपप्रसरयोः प्रकाशतमसोर्यथा॥ न संभवति संबंधस्तथा वै देहदेहिनोः॥ १८॥ यथा शीतोष्णयोर्नि
त्यं परस्परविरुद्धयोः॥ न संभवति संबंधो राम देहात्मनोस्तथा॥ २०॥ अविनाभाविनोर्यस्तु संबंधः कथमेतयोः॥ जडचेतनयोर्देहदेहि
नोरनुभूयते॥ २१॥ चिन्मात्रस्यात्मनो देहसंबंध इति या कथा॥ सैषा दुःखबोधार्थादावग्नौ जलधिर्यथा॥ २२॥

वेति सौढिमादर्शयन्नाह द्वित्वमित्यादिना॥ १८॥ आद्य एकप्रदेशप्रसरलक्षणे संसर्गे द्वितीयस्तादात्म्ये दृष्टांतः॥ १९॥ २०॥ मास्तु संयोगस्तादात्म्यं वा समवायस्तु किं न स्या
त्तत्राह। अविनाभाविनोरिति॥ अयुतसिद्धयोरित्यर्थः॥ २१॥ या कथा उक्तिः देहस्य चिदाश्रयत्वे विषयत्वायोगात्स्फुरणात्पूर्वं विषयत्वे चाश्रयत्वायोगात्समवायाद्यापि
द्वैविषयतासंबंधस्य च मिथ्यार्थसाधारणस्यसत्त्वायोगाद्दुःखबोधार्थेत्यर्थः॥ अग्नौ जलधिरिति कथेति शेषः॥ २२॥
१४ न पतैः स्थितः। संभाव्यते कलंकागमा नो रविनतमः पटैः॥ द्विचममभ्युतगम्यापि कथमामितवारिहन्। देहादिभिः स
द्विरपिन संबंधो ४२

तर्ह्यस्त्वध्यस्त एव संबंधस्तत्राप्याह सत्येति। देहात्मसंबंधो ध्यासस्तु आत्माधिष्ठानकल्पे आत्मदर्शनादेव बाधः स्यादित्यर्थः। साम्यं अध्यस्तवैषम्यं बाधं यथा यातीति शेषः॥२३॥ शुद्धमपापविद्धमित्यादिश्रुतिसिद्धस्वाभाविकस्य शुद्धत्वाविरोधादध्यात्मानाशुद्धं देहादिस्पृशतीत्याह चिदात्मेति॥२४॥ नन्वात्मसंबंधाभावे देहस्य स्पंदादिः कथं मृतदेहे तददर्शनादिति चेत्तत्राह स्पंदमिति। वातेन प्राणवायुना भ्रतैरन्नादिभिः प्राणवत्ष्टंभहेतुभिः पीवरीकृतः उपचितः आहितबल इति यावत्। तथा च। तस्य स्पंदमानो बलं वा हेतुर्नात्मेत्यर्थः। अप्यर्थे सकारः। न संबंधो देहस्य॥२५॥ एवं द्वैतसत्त्वाभ्युपगमे यदा न संबंधस्तदा किं वाच्यं तदनभ्युपगमे इति प्रौढिवादमुपसंहरन्नाह सिद्धे इति सिद्धे सत्ये॥२६॥ ननु द्वित्वासिद्धिरेव कुत इत्याशंक्य संबंधदूषणार्थं दर्शितां युक्तीस्तत्रापि दिशति इतीति॥ द्वित्वस्य सत्यत्वे केन चिद्

साम्य

सत्यावलोकनेनैषा मिथ्यादृष्टिर्विनश्यति॥ अवलोकनयामातपे जलधिर्यथा॥२३॥ चिदात्मा निर्मलो नित्यः स्वावभासो
निरामयः॥ देहस्त्वनित्यो मलवांस्तेन संबद्ध्यते कथं॥२४॥ स्पंदमायाति वातेन भ्रतैर्वा पीवरीकृतः॥ देहस्तेनन संबंधो म
नागेव सदात्मना॥२५॥ सिद्धे द्वित्वेपि देहस्य न संबंधस्य संभवः॥ द्वित्वासिद्धौ तु सुमते कल्पनैवेदृशी कुतः॥२६॥ इत्ये
तदेव तत्त्वं त्येतत्रैवांतः स्थितिं कुरु॥ न बंधोस्ति न मोक्षोस्ति कदाचित्कस्यचित्क्वचित् ॥२७॥

शंक्यमाने सति प्रागुक्तमेतदेव युक्तिजातं उपन्यसनीयं॥ द्वितीयसिद्धौ हि द्वित्वं स्यात् द्वितीयं चिच्चेत्तत्र भेदकाभावः। जडं चेत् छायातपाविव मिथो विरोधात्सर्वसिद्धचिद्विरुद्धं न सिद्ध्यतीति स्वस्यासंबद्धं जडं साधयतीति कथा दुरवबोधार्था अध्यस्तं चेत्तस्य चिदवलोकनमात्राद्विनश्येत् निर्मलासंगत्वाद्यात्मस्वभावविरुद्धं च मलिनं जडं असंगेन कथं साध्येतेत्यादि युक्तीनामत्रापि साम्यादिति भावः॥ अतो द्वैतास्त्रमं विहाय तत्र अद्वितीयचिन्मात्र एव स्थितिं कुरु तत्र च बंध 
मोक्षादिशंकैव नास्तीत्यर्थः॥२७॥

कीदृशी सा स्थितिर्या मया कार्या तामाह सर्वमिति॥२८॥ सर्वात्मदृष्टिश्च विरुद्धदुर्दृष्टिनिरासे दृढीभवति नान्यथेत्याशयेनाह सुखीति॥ तत तर्हि॥२९॥ ननु देहदुःखादयोपि प्रत्यक्षादिभिः पुरस्कृताः॥ आत्मा विश्रुतियुक्तिभिः पुरस्कृतस्तत्र नयोस्तुल्यत्वे को विशेषो येनात्मदृष्टिमवलंब्य देहादिदृष्टिर्निरसनीयेत्युच्यते तत्राह यइति क्रमो विशेषः॥ यथा चक्षुषा दृश्ययोः शैलतृणयोर्मध्ये महत्त्वात् स्थिरत्वाच्च शैलदृष्टिः सुकरा चलत्वात्सेलवत्वाच्च तृणदृष्टिर्दुष्करा यथा वा त्वचा मृदुत्वात्सुखस्पर्शाच्च कौशेयस्पर्श उपादेयः कठोरत्वाद्दुःखत्वाच्च उपलस्पर्शो हेयस्तथा अपरिच्छिन्नत्वात्सदा स्वप्रकाशत्वादानंदरूपत्वाच्च परमात्मदृष्टिः सुकरा उपादेया च देहाद्यनात्म

सर्वमात्ममयं शांतमित्येवं प्रत्ययं स्फुटं॥ सबाह्याभ्यंतरं राम सर्वत्र दृढतां नय॥२८॥ सुखी दुःखी विमूढोस्मीत्येता दुर्दृष्टयः स्मृ
ताः॥ आस्तुचेद्दुस्तु बुद्धिस्तेन चिरं दुःखमिच्छसि॥२९॥ यः क्रमः शैलतृणयोः कौशेयोपलयोस्तथा॥ साम्येप्रतिसस्वोक्तः पर
मात्मशरीरयोः॥३०॥ यथा तेजस्तिमिरयोर्न संबंधो न तुल्यता॥ अत्यंतभिन्नयो राम तथैवात्मशरीरयोः॥३१॥ यथा शीतोष्ण
योरैक्यं कथा स्वप्नेपि दृश्यते॥ जडप्रकाशयोः श्लेषो न तथात्मशरीरयोः॥३२॥ देहश्चलति वातेन तेनैवायाति गच्छति॥ शब्दं
करोति वातेन देहनाडीविलासिना॥३३॥ शब्दः कचटतप्रायः स्फुरत्यंत्रः समीरणैः॥ यथा प्रजा यते वंशाद्देहरंध्रात्तथैव हि॥३४॥

दृष्टिस्तु पेलवत्वादस्थिरत्वान्मन आदिसापेक्षत्वाच्च दुष्करा हेया चेति॥ महदंतरमस्तीति न साम्यमित्यर्थः॥३०॥ विरुद्धत्वादपि संबंधवत्सादृश्यमपि निरसितुं शक्यमित्याशयेनाह यथेति॥३१॥ विरोधादेव तादात्म्यशंकाया अपि संभवो नास्तीत्याशयेनाह यथेति श्लेषः संयोगस्तन्मूलोध्यासः संभवेत् कथं हर निरस्तमित्याशयः॥३२॥ सर्वात्मसंबंधाभावेपि देहचेष्टादेवाते न गतार्थतोक्ता अत्र तु स्वात्मैक्याभावेपीति न पौनरुक्त्यं॥३३॥ देहरंध्रं कंठमादुदुहतैः प्राणसमीरणैः कंठताल्वादिस्थानेषु जिह्वादिनाभिहन्यमानैः सार्यमाणैः कवर्गचवर्गटवर्गादिः शब्दः स्फुरतीति प्रत्यक्षसिद्धमित्यर्थः॥ वंशाच्छिद्रकीचकात्॥३४

वा॰टी॰उ॰प॰ २०३ ।।

एवं चक्षुरादिसर्वेंद्रियस्पंदोपि वायुत एव आत्मनस्तु केवलं संविदेव कार्यं नान्यदित्याह कनीनिकेति ।। विषयप्रदेशवक्षःस्पंदस्य निमित्तभूतः कनीनिकापरिस्पंदोपि मारुतादेव । एवं सर्वेंद्रियस्फुरणाज्जायमाना या स्फूर्तिलक्षणा संविदेव केवलं आत्मनो नान्यदित्यर्थः ।। ३५ ।। यद्यपि सा संवित्सर्वगता सदातनी च तथापि चित्तवृत्तिष्वेवाभिव्यक्ता नान्यत्रेत्याह आकाशेति ।। ३६ ।। अत एव तद्गमनादेवात्मनः परलोकगमनादिव्यवहारोपीत्याह शरीरे ।। ३७ ।। ३८ ।। ३९ ।। अवनतं निम्नं आत्मसंविदां चित्तविंबानां ।। ४० ।। सत्यं व्यावहारिकं असत्यं प्रातिभासिकं ।। अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीत्यादिश्रुतेरिति भावः ।। ४१ ।। अंतःकरणं नेत्यमच्छ-

कनीनिकापरिस्पंदश्चक्षुःस्पंदश्च मारुतात् । इंद्रियस्फुरणात्सैव संवित्केवलमात्मनः ।। ३५ ।। आकाशोपलकुड्यादौ सर्वत्रात्मदशा स्थिता
प्रतिबिंबमिवादर्शे चित्त एवात्र दृश्यते ।। ३६ ।। शरीरात्प्रयमुत्सृज्य यत्र चित्तविहंगमः ।। स्ववासनावशाद्याति तत्रैवात्मानुभूयते ।। ३७ ।। य-
त्र पुष्पं तत्र गंधसंविदः संस्थिता यथा ।। यत्र चित्तं हि तत्रात्मसंविदः संस्थितास्तथा ।। ३८ ।। सर्वत्रास्थितमाकाशमादर्शे प्रतिबिंबति । य-
थात्तथात्मा सर्वत्र स्थितश्चेतसि दृश्यते ।। ३९ ।। अपामेव न तत्स्थानमास्पदं भूतले यथा ।। अंतःकरणमेवात्मसंविदामास्पदं तथा ।। ४० ।। स-
त्यासत्यं जगद्रूपमंतःकरणबिंबितात् ।। आत्मसंवित्तनोतीदमालोकमिव सूर्यभा ।। ४१ ।। अंतःकरणमेवातः कारणं भूतसंसृतौ ।। आ-
त्मा सर्वानुगत्वात्तु कारणं सहकारणं ।। ४२ ।। अविचारणमज्ञानं मौर्ख्यमाहुर्महाधियः ।। संसारसंसृतौ सारमंतःकरणकारणं ।। ४३ ।। अ-
सम्यक्प्रेक्षणान्मोहाच्चेतः सत्तां गृहीतवत् ।। संमोहबीजकणिकां तमोर्कादिव दृश्यते ।। ४४ ।।

त्मा हिरण्यगर्भः प्रतिबिंबद्वारा कारणं सदपि स्वतः अकारणं ।। ४२ ।। अंतःकरणस्याप्यत्कारणं तदाह अविचारणमिति पर्यायत्रयोपादानं प्रसिद्धद्योतनार्थं ।। ४३ ।। असम्यक्प्रेक्षणादन्यथाग्रहणसंस्कारबलात् मोहात् ।। संमोहानां भ्रमाणां बीजधानाभूतां चेतःसत्तां चित्ताकारपरिणामं यतः संमोहादर्कात्तमइवास्वितां संभावितमपि जन्मजरामरणाद्यनर्थपरा दृश्यत इत्यर्थः ।। अथवा अज्ञानं सर्वैः स्वात्मनि अहमज्ञ इति प्रत्यक्षं दृश्यते यथा अर्कान्नष्टादिति तमो राहुर्दृश्यते तद्वदित्यर्थः ।।

रा॰म॰ २०३

येन तर्हि चित्तनाशस्तदाह यथेति ।। ४५ ।। केनोपायेनात्मतत्त्वपरिज्ञानं तदाह संसारेति ।। इत एतस्माद्धेतोः संसारकारणं अज्ञानं इतः प्राप्तोधिकारी स्वयमिति बाह्यं विचारमेतमाह जीवइति जीवादिनामानि यस्य तं ।। आदिपदादुत्पत्तिप्रकरणोक्तनामांतराणामपि संग्रहः ।। ४६ ।। रूढिं योगरूढिं ।। कथं केन योगेन सिद्धये त्वदुक्तविचारसिद्धये ।। ४७ ।। तत्रादौ रूढियोगाभ्यां जीवनामनिर्वक्तुं वसिष्ठः पीठिकां रचयति सर्वे भावा इत्यादिना ।। भावाः पदार्थाः ।। आत्मतत्त्वेन सहस्रैकबाध्यासादेकरूपिणः समष्टिचित्तादेवोत्पन्ना इति प्रागुक्त

यथा भूतात्मतत्त्वैकपरिज्ञानेन राघव ।। असत्तामेत्यलं चेतो दीपेनेव तमः क्षणात् ।। ४५ ।। संसारकारणमितः स्वयं चेतो विचारयेत् ।। जीवोंतः-
करणं चित्तं मनश्चेत्यादिनामकं ।। ४६ ।। श्रीराम उवाच ।। एताः संज्ञाः प्रभो ब्रह्मंश्चेतसो रूढिमागताः ।। कथमित्येव कथय समयिमान रसिद्धये
४७ ।। वसिष्ठ उवाच ।। सर्वे भावा इमे नित्यमात्मतत्त्वैकरूपिणः ।। चित्तात्तरंगकगणा जलैककलिता यथा ।। ४८ ।। आत्मा संदैकरूपात्मा स्थि-
स्ते तेषु क्वचित्क्वचित् ।। तरंगेषु विलोलेषु पयोधेः सलिलं यथा ।। ४९ ।। क्वचित्स्पंदरूपात्मा स्थितस्तेषु महेश्वरे ।। तरंगत्वाप्रयातेषु जलभा-
वो जलेष्विव ।। ५० ।। तत्रोपलादयो भावा अलोलाः स्वात्मनि स्थिताः ।। सुराः फेनबुद्बुदस्पंदा लोलास्तत्पुरुषादयः ।। ५१ ।। तत्र तेषु शरीरेषु
सर्वशक्तिस्तदात्मनः ।। कलिताज्ञानकलनात्तेनाज्ञानमसौ स्थितः ।। ५२ ।। तदज्ञानमनंतात्म भूषितं जीव उच्यते ।। स संसारे महामोहमाया-
पंजरकुंजरः ।। ५३ ।। जीवनाज्जीव इत्युक्तो हंभावः स्यात्त्वहंतया ।। बुद्धिर्निश्चायकत्वेन संकल्पकल्पनात्मनः ।। ५४ ।।

मीरणं ।। ४८ ।। उत्पन्नानां चरस्थावरविभागे निमित्तमाह आत्मेत्यादिना ।। ४९ ।। ५० ।। ५१ ।। कलितस्य कल्पितस्याज्ञानस्य कलनाप्रसिद्धा तेन हेतुना तत्त्वरूपकाल्पितमज्ञानं स्वयमेव भूत्वा प्रलयसुषुप्त्योः स्थितः ।। ५२ ।। अनंतेनात्मना प्रतिबिंबभावापन्नेन भूषितमिव स्फुरत्तत एवरूढांशेन जीव उच्यते ।। ५३ ।। तत्र योगांशमाह जीवनादिति ।। प्राणधारणादित्यर्थः ।। अहंभावादिति सोहमित्ययेन्याहरत्तस्मादहंनामाभावादिति श्रुतेः ।। नामांतराण्यपि निराह बुद्धिरित्यादिना ।। ५४

वा॰टी॰उ॰ २०४

दिग्धतयाउपचिततया। प्रकृतिभावेनअज्ञानांशप्राधान्येनस्वात्मसत्तयाचित्प्राधान्येन॥५५॥ जडाजडदृशोरज्ञाननतत्वसिद्धोर्मध्यंआंतरालिकंसाभासंमनःतदेवनाना
त्वंप्राप्तजीवबुद्धिमनश्चित्ताहंकारादिनानासंज्ञाभिरातत मित्यर्थः॥५६॥ परमात्मनएवोपाधिप्रवेशेनऔपाधिकनानात्वसंज्ञालाभेश्रुतीः प्रमाणयतिसएवमितिसएष
इहप्रविष्टआनखाग्रेभ्यइत्युपक्रम्योक्तंप्राणन्नेवप्राणोनामभवतिवदन्वाक्पश्यंश्चक्षुःशृण्वन्श्रोत्रंमन्वानोमनइ तितान्येतस्यकर्मनामान्येवेति तथासमानःस
न्नुभौलोकावनुसंचरतिध्यायतीवलेलायतीवसधीः स्वप्नोभूत्वेमंलोकमतिक्रामतिरूपाणी तितथाश्रुत्यंतरेबुद्धेर्गुणेनचैववालाग्रमात्रोह्यवरोपिदृष्टः। वालाग्रश
तधाकल्पितस्यचभागोजीवःसविज्ञेयःसचानंत्यायकल्पतइतितत्सृष्ट्वातदेवानुप्राविशत्। तदनुप्रविश्यसच्चत्यच्चाभवदितितैत्तिरीयके॥ सएतमेवसीमानंविदार्येत नात्मगुलेन४

प्रकृतिः प्रकृतित्वेनदेहोदिग्धतयास्थितः॥ जडःप्रकृतिभावेनचेतनःस्वात्मसत्तया॥५५॥ जडाजडदृशोर्मध्यंयत्तत्त्वंपारम ःमात्मिकं।त
देतदेवनानात्वंनानासंज्ञाभिराततं॥५६॥ एवंस्वरूपंजीवस्यबृहदारण्यकादिषु। बहुधाबहुधाप्रोक्तंवेदांतेषुकिलानघ॥५७॥ अज्ञै
स्तासुसंज्ञासुकुविकल्पकुतार्किकैः॥ मोहोयंकेवलंमद्वैर्व्यर्थमास्थाःप्रकल्पिताः॥५८॥ एवमेषमहाबाहोजीवस्संसारका
रणं॥ भेकेणाविवराकेणदेहकेनेहकिंकृतं॥५९॥ आधाराधेययोरेकनाशेनान्यस्यनष्टता॥ यथातथाशरीरविनाशेनात्मनिन
ष्टता॥६०॥ एकपर्णरसेक्षीणेरसोनैतियथाक्षयं। यातिपर्णरसश्चार्करश्मिजालंतथैव॥६१॥

याहृशप्रापश्यत। तस्मादिदंद्रोनाम। यदेतद्धृदयंमनश्चैतत्संज्ञानमाज्ञानंप्रज्ञानमित्याद्यैतरेयकोत्वमेकोसिबहूननुप्रविष्टः एकोदेवोबहुधाविचार एकःसन्बहुधा राम॰
विचारेत्यादिश्रुतिशतेषुचबहुधाप्रोक्तमित्यर्थः॥५७॥ अतएवावैदिककुतार्किकाणामन्यथान्यथाजीवस्वरूपकल्पनाः। नारर्त्नव्याइत्याशयेनाहअज्ञैरितिआ २०४
स्थाःअभिनिवेशाः॥५८॥ एवंचनशुद्धात्मनःसंसारितानापिदेहस्यकिंत्वांतरालिकस्यजीवस्यैवेति सिद्धमित्याशयेनाहएवमिति। भेकेनवाणादिश्रन्येन जडेने
तियावत्॥५९॥ अतएवदेहनाशेपिनजीवनाशइत्याह। आधारेति नाशेनइतिच्छेदः॥६०॥ ६१॥

श्रपा१

एवासनश्चेतशरीरसंक्षये वासनायांतिष्ठतिनिर्वासनश्चेद्ध्योम्नित्रसाकाशस्वभावेतिष्ठतीत्यर्थः॥६२॥ अमतेर्मर्त्यस्यअशरीरंवावसंतंनप्रियेस्पृशतइतिश्रुतेरभयदे
तौदेहनाशेभयहेतुत्वलक्षणविपरीतदर्शिनोमूढस्यमातुःस्तनादपिवेतालोत्थानसंभावनमात्तन्यपानेनजीवनमपिदुर्लभंस्यादित्याशयः॥६३॥ देहस्यजीवव्य
तिरिक्तत्वान्नाशक्तन्नाशाद्भयंचितस्यजीवस्वरूपत्वात्तन्नाशात्तुजीवस्यभयंयुक्तमेवेतिचेत्त्रत्राहयस्येति॥ यस्यउपाधेर्वज्ज्रनिगडवद्बंधनभूतस्यास्यैतिकोना
शःस्याच्चेदसौजीवःस्वतःप्रत्यभिज्ञातब्रह्मभावःसन्नुदितःनिरतिशयानंदलक्षणमभ्युदयंप्राप्तोभवतितादृशचित्तनाशोहिजीवस्याविनाशःस्मात्तंमन्यते
सएवतस्यमोक्षःपरमपुरुषार्थइतिशास्त्रेकथ्यतेअतस्तस्मादपिमयसंभावनाअत्यंतमनुचितैवेत्यर्थः॥६४॥ सजीवःअनुभूयतेपुनर्देहांतरग्रहणेदृश्यते २

शरीरसंक्षयेदेहीनक्षयंयातिकस्यचित्॥ निर्वासनश्चेद्व्योम्नितिष्ठत्यात्मपदेतथा॥६२॥ देहनाशेविनष्टोस्मीत्येवंयस्यमतिर्भ्रमः मा
तुःस्तनतटात्तस्यमन्येवेतालउत्थितः॥६३॥ यस्यस्वात्यंतिकोनाशःस्यादसावुदितःस्वतः। चित्तनाशोहिनाशःस्यात्समोक्षइतिकथ्यते॥६४॥
स्ततोनष्टइतिप्रोक्तोमन्येतच्चमृषात्मसत् सदेशकालांतरितोभूत्वाभूत्वानुभूयते॥६५॥ इहोह्यंतेजनैरेवतरंगांतस्तरणैरिवा मरणव्यपदे
शामृदेशकालतिरोहितैः॥६६॥ वासनावस्थितोजीवोयात्युत्सृज्यशरीरकं। कपिर्वनतरुंत्यक्त्वातर्वंतरमिवस्थितः॥६७॥ पुनस्तदपिसंत्यज्य ने
गच्छत्यन्यदपिक्षणात्। अन्यस्मिन्नितरेदेशेकालेन्यस्मिंश्चराघव॥६८॥ इतश्चेतश्चनीयंतेजीवावासनयास्वया। चिरंतरपिजीविन्याधस्त्या
धात्र्येवबालकाः॥६९॥ वासनारज्जुवलिताजीर्णपर्वतकुक्षिषुजग्र्यंयातिदुःखेनजीवितंजीवजीविकाः॥७०॥

६५ इहसंसारेमरणव्यपदेशामृनदीषुतरंगांतस्तरणायमानैर्जनैःजीवैःइहसंसारेदेशकालतिरोहितैःस्वरूपैःएवंवर्णितप्रकारास्ततोनष्टोजातोमिथ्येद्धःमृतीत्यादि
भावाकृतंतेभ्रांत्याचितकर्मतइत्यर्थः॥६६॥ तथाकहनवैचित्र्यहेतुरित्याशयेनाहवासनेति॥६७॥ तान्जीवान्विधामतिरस्कृत्यजीविनुंशीलंयस्याःमातरविजी
वि नीतथाविधयावासनयाधर्त्र्यापुंयोगडीपर्तीसकृधाच्याउपमात्रा॥६९॥ वासनारज्जुभिर्वलिताबेष्टिताःजीवाएवपरस्परोपयोगाज्जीविकाजीवनोपायोयेषांतथा
विधाजीवाः इवजीर्णत्वंप्राप्तंजरयंति॥७०॥

प्रियेगमनं६२

जनताः जीवाः हृदयनिहितवासनानुवृत्त्यानिमित्तेन जरठेऽप्यपि जरंतो जीर्णाः संतः उपोढाः दारिद्र्यरोगवियोगादिदुःखभारा यैस्तथा विधः परिणत्यानानायोनिदु
र्दशापरिणामैर्जर्जरैर्दुःखैः खंडनेन शिथिलीकृतमिव जीवितं यासां तथाविधाश्च सत्यः॥ नरकभरे सुचिरं पतंति वसंती त्याहो वासनादोषमृत्युक्ता अनंता दुर्दशेत्यर्थः
७१॥ ७२॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे एकसप्ततितमः सर्गः॥ ७१॥ ननु गौरोऽहं स्थूलोऽहमिति आत्मनि देहतादात्म्यानुभवाद्देहनाशे कथमात्मस्थि

मौतिकत्वाच्छरीरस्य शोकमोहा
यौग्यताहस्पर्शसंबंधः सा
सौशुद्धस्य वर्ण्यते॥ सर्वार्थे
उत्तमार्थोहेतुः॥१॥

जरठजरदुपोढदुःखभाराः परिणतिजर्जरजीविताश्च सत्यः॥ हृदयजनितवासनानुवृत्त्या नरकभरे जनताश्चिरं पतंति॥ ७१॥ श्रीवाल्मीकि
रुवाच॥ इत्युक्तवत्यथ मुनौ दिवसो जगाम सायं तनाय विधये स्तमिनो जगाम॥ स्नातुं सभा कृतनमस्कारणा जगाम श्यामाक्षये रविकरै
श्च सहाजगाम॥ ७२॥ मोक्षोपाये उपशमप्रकरणे संसारदेशः सर्गः॥ ७१॥ श्रीवसिष्ठ उवाच॥ देहे जाते न जातोऽसि देहे नष्टे न नश्यसि॥ त्वमात्मन्य
कलंकोऽत्मा देहस्तव न कश्चन॥ १॥ यः कुंडबदरन्यायो योऽयं घटाकाशसंस्थितिः॥ तत्रैकस्मिन्क्षते क्षीणे द्वे इतिव्यर्थकल्पना॥ २॥ विनाशि
नि विनष्टेऽस्मिन्देहे सांस्थितिमागते॥ विनश्यामीति यः खेदी तं धिगस्त्वंधचेतसं॥ ३॥ यादृशो रश्मिरथयोः स्नेहो द्वेगविवर्जितः॥ सं
बंधस्तादृशो देहचित्तेंद्रियसुखैश्चितेः॥ ४॥ गते मरेतरापेक्षः सरः पंकामलीमसं॥ यथा राघव संबंधस्तथा देहेंद्रियात्मनां॥ ५॥ यादृशो
ध्वागताध्वानां निरास्थापरिदेवनः॥ संयोगो विप्रयोगश्च तादृशो देहदेहिनोः॥ ६॥

तिलत्वात्तहयइति संस्थितिर्मर्यादा मेदः से वा तथा त्वानतादात्म्यं॥ तत्रैवं सतिस्कस्मिन्कुंडे घटे वा क्षते नष्टे सति द्वे अपि क्षीणे इति मूढानां व्यर्थकल्पनेत्यर्थः॥
२॥ विनाशि निनश्वरस्वभावे॥ ३॥ यद्यात्मनो देहादितादात्म्यं नास्ति तर्हि कथं शाखाकंपेन वृक्ष इव तत्स्पंदेन त्वाय संसरति। तत्राह यादृश इति स्नेहः श्रीतियोग्य
ता उद्वेगो द्वेषयोग्यता ताभ्यां विवर्जितः॥ ४॥ इतरेतरापेक्षापरस्य रानुरागः ५ [illegible] गताध्वानां आस्था अहंममताभिमानः परिदेवनं
तद्वियोगजो विलापः तदुभयायोग्य इत्यर्थः॥ ६॥

C.H. BHAU DAUJI MEMORIAL

न

तत्कुगतत्राहयथेति। कल्पितवेतालस्य विकाराः करालवदनत्वादयो दर्शनजन्या त्रसभयास्तुनः पुनस्तत्स्मरणेन बालस्य भीतयः॥ ७॥ ८॥ ९॥ १०॥ स्वदेहस्नेहा
द्यायोगत्वमुपपादयस्याद्विर्पिंडेपि तद्दर्शयति कइति। पतंगवद्यामोहरागाभ्यां मोदुतानां जनानां विषयाग्नौ पात नदृश्यमानायां चेष्टायां नातिशये नोपपन्नो तसौ तिशयः
को नामेत्यर्थः॥ ११॥ मुकुरेमारसुंदराविव सन्निवेशविशेषस्य सौतिशयो दृश्यते तत्राह सन्निवेश इति। १२॥ आनादि पुराणे वारमति मिथ इति। एकोपलपुत्रयो

यथा कल्पितवेतालविकारभयभीतयः॥ मिथ्यैव कल्पितास्ते तथा स्नेहसुखादयः॥ ७॥ भूतपंचकसंपिंडाश्चिता जाजनताः स्थकाः॥ एकस्मादेव वि
टपाद्विचित्राइव पुष्पिकाः॥ ८॥ काष्ठेतरत्काष्ठभारे किंचिदन्यन्न दृश्यते॥ भूतपिंडेतरद्देहे किंचिदन्यन्न दृश्यते॥ ९॥ भूतपंचकविक्षोभनाशोत्ता
देषु हे जनाः॥ हर्षामर्षविषादानां किं भवंतो वशंगताः॥ १०॥ को नामातिशयः पुंसां स्त्रीणामन्योपसान्निध्ये वा पेलवे भूतसंघाते प्रोद्भूतजनपातवत्॥
११॥ सान्निवेशांशवैचित्र्यमज्ञानमिव तुष्टये॥ न ज्ञानी तु यथा भूतं भूतपंचकदर्शनं॥ १२॥ मिथः शिलापुत्रकयोर्यथैकोपलपुत्रयोः
श्लिष्टयोरपि नो रागस्तथा चित्तशरीरयोः॥ १३॥ भूसंगमो यादृशोन्योन्यमाशयः संगमे भवेत्॥ बुद्धींद्रियात्ममनसां संगमे तादृशस्त्वते॥ १४॥
नान्योन्यस्नेहसंबंधभाजनं शैलपुत्रकाः॥ देहेंद्रियात्मप्राणाश्च कस्यात्र परिदेवना॥ १५॥ इतश्चेतश्च जातानि यथा संश्लेषयं त्यलं॥ तरंग
स्तरणजालानि तथा भूतानि देहदृक्॥ १६॥ संयुज्यंते वियुज्यंते वियुज्यंते तरणान्यब्धिजले यथा॥ मुक्तांतःकलनं देहे भूतान्यात्मनि वै तथा॥
१७॥

रेकोपलजन्ययोः श्लिष्टयोराश्लिष्टयोः॥ १३॥ भूत्तिर्निर्मितानां पुंसां प्रतिमानां संगमे तन्वपि यादृशः मम तादिशून्यः आशयो मे भावो भवेदित्युत्प्रेक्षितः॥ १४॥ १५॥
इतश्चेतश्च भिन्नप्रदेशयोर्जातानि तरणजालानि॥ १६॥ मुक्तांतःकलनं निर्मुक्तगाणाभिमानं यथा स्यात्तथा॥ भूतानि उत्पश्वादि प्राणिनः पृथिव्यादीनि वा स्वार
भ्यो देहे स्वाधिष्ठाने आत्मनि च तथा संयुज्यंते वियुज्यंते चेत्यर्थः॥ १७॥

वा.टी.उप. २०६

यथाब्धिरावर्तवृत्तांत आवर्ताकारस्तत्कल्पनेन उत्सिक्तमुपचितं वेगं प्राप्य तृणकाष्ठादीनाश्लेषयन्स्थितस्तथा आत्मापि चित्ततया चित्तवेगं प्राप्येत्यर्थः । १८ केनोपायेन तर्हि आत्मा स्ताश्लेषनिमित्ताच्चित्तभावान्मुच्यते तत्राह प्रबोधेत्यादिना त्यक्त्वा आ[illegible]लमनच्छ लं कल्पनत्सुरुपेन कारस्लोपे सवर्णदीर्घः । मुदुभावच्छांदसः १९ विश्लिष्टस्ततो योमनः कृतस्ताश्लेषनिर्मुक्तः संप्रति बोधकाले । वायुस्कंधागतः खेचरो देवादिः । २० तत्फलमाह एथगिति । २१ मुक्तसीबतया निर्मुक्ते

आत्मा चित्ततया देहस्तान्याश्लेषयन्स्थितः । तृणान्यावर्तवृत्तांतकलनोत्सिक्तमब्धिवत् ॥ १८ प्रबोधाच्चेत्यतां त्यक्त्वा व्रजत्यालानतां स्वयं स्वस्पंदवशतो वारि त्यक्त्वावर्तमिवावर्ततां । १९ ततो विविक्तस्तो योदेहं संप्रति पश्यति ॥ वायुस्कंधगतो जंतुर्वसुधामंडलं यथा ॥ २० एथगस्तु गणो दस्मादेहातीतो भवत्यजः । परं प्रकाशमायाति सूर्यकोटिरिवाहनि ॥ २१ ॥ जानात्यथात्मनात्मानमानमेयामयोज्झितं । मुक्तक्षीबतयेवांतः स्वां संविदमनुस्मरन् । २२ आत्मैव स्पंदते विश्वं वत्कृजातैरिवोदितं । तरंगकणकल्लोलैरनंतांबुधाविव २३ सर्वं प्राप्य महाबोधावीतरागागतेनसः । जीवन्मुक्ताश्चरंतीह महासत्वपदं गताः । २४ यथाचरंति विविधैर्मणिरत्नैर्महोर्मयः । निरस्तवासनाश्चित्तव्यवहारैस्तथोत्तमाः ॥ २५ ॥ न कूलकाष्ठैर्जललेषिनिर्नरजोभिर्नभस्तलं । नम्लायतिनिजैर्लोकव्यवहारैरिहात्मवान् ॥ २६ ॥ गतैरम्यागतैः स्वच्छैश्चपलैर्मलिनैर्जडैः । नरागो नाबुधेर्द्वेषो भोगैश्चाधिगतात्मनः २७ यन्मनो मननं किं चित्तमयं जगति स्थितं । तच्चेत्योन्मुखचित्तत्वं विलं मोक्षमनं विदुः ॥ २८ ॥

मदिरामत्ततया २२ । ३ ४ विविधैर्मणिश्रेष्ठैः संबध्यमानां अपि तरंगमालात्वात्तेषु शिलाशकलादिसाम्येन यथाचरंति व्यवहरंति । २५ । यथा तथेति परेवा अध्याहार्ये २६ स्वच्छैर्न रागः मलिनैर्न द्वेषः । विशेषणान्युभयत्रयोज्यानि अधिगतात्मनस्तत्वविदः २७ कुतो न रागस्तत्राह यदिति । मनो मननं सर्वं । चिद्विलासएवेति तेयत्नोविदुरित्यर्थः । २८ ।

राम. २०६

---

यत् अहमादिसर्वं दृश्यदर्शनसंबंधविस्तारैर्भासितं तत्केवलं मन एव विजृंभते नान्यदित्यर्थः । २९ इहदृक्दृश्यनेति हृदयमध्ये एकांदृष्टिमुपाश्रितं तत्स्थीनसिद्धि कं यत्तदृश्यंतत् असत्यदेहे त्वनिर्णीतत्वाद्धर्षशोकायोग्यं । अन्यत्त्वतः सिद्धं दृग्रूपं तत्त्वलेपकमसंगं उत्तम्भाभ्यामपि हर्षशोकाभ्यां न युज्यत इति तमोरुभयथापि संभावनैव नास्तीत्यर्थः । ३०

स सेद्धा किंचासत्ये विषये हर्षशोकौ सत्यासत्ये वा नत्रिधापि कल्प्येषु तद्योग्यते त्याह । असत्यमिति असत्यमेव तत्र हर्षशोकयोर्निर्विषयत्वात्सत्येव । सत्यं तु नित्यमत्वलाभप्रयुक्तहर्षस्य अपगमप्रयुक्तशोकस्य च । सोप्यसत्यमेव । यत्तु तृतीयं सत्यासत्यं तद्विरुद्धैकयोगादसदेवेत्यात्यकत्वमेव प्रविशति तथा च न किंचिद्योग्यं जगत्यस्तीति तद्धि यमेमोहो अयुक्त एवेत्यर्थः । ३१ । ३२ किंच भोगसुखार्थं सर्वं दृश्यदर्शनयो विषयेंद्रिययोः संबंध इष्यते तत्राभिव्यज्यमानं पारमार्थिकमेव सत्व प्रकाशत्वा

यदहं यच्चमत्तादि कालत्रितयभावितं । दृश्यदर्शनसंबंधविस्तारैस्तद्विजृंभते । २९ मह दृश्यं तदसत्सद्दृग्दृष्टिमेकामुपाश्रितं । अन्यत्त्वलेपकं तस्माद्धर्षशोकदृशौ कुतः । ३० असत्यमेवासत्यं हि सत्यं सत्यं सदेव हि । सत्यासत्यमसद्धि द्वितदर्थं किं नु मुह्यसि । ३१ । असम्यग्दर्शनं त्यक्त्वा सम्यक्पश्य सुलोचन । नक्कचिन्मुह्यति प्रौढः सम्यग्दर्शनवानिह ३२ दृश्यदर्शनसंबंधविस्तारैस्तद्विजृंभते । दृश्यदर्शनसंबंधे यत्सुखं पारमार्थिकं ३३ अनुभूतिमयं तस्मात्सारं ब्रह्मेति कथ्यते । दृश्यदर्शनसंबंधे सुखसंविदनुत्तमा । ३४ दृढात्वज्ञायसंसारं त्यायमो संसदोदयं । दृश्यदर्शनसंबंधसुखं संविद्वपुर्विदुः ३५ तद्दृश्यबलितं बंधस्तन्मुक्तं मुक्तिरुच्यते । दृश्यदर्शनसंबंधसुखं संविरनामया ३६ स्वात्तिशयमुक्ताचेन्मुक्तिः सोच्यते बुधैः । दृश्यदर्शनसंबंधेयानुभूतिः स्वगोचरा । ३७ दृश्यदर्शननिर्मुक्ता तामालंब्य भवामवः । सैषुप्तीदृष्टिरेषा हि या स्वैवं संप्रकाशते । ३८ सर्वं

यां पुन्ना चयाति तुर्यत्वमेवमुक्तिरितिस्मृता दृश्यदर्शनमुक्तायां परयाधिया । ३९ दृग्भूत्वमिन्नं दृश्यपाधिकृतमेदतारतम्यादिनिरासेनाखंडैक्ये ब्रह्मैवतदित्याह दृश्यदर्शनेत्यादिना ३३ ३४ विषयाकारदृत्याआस्वाद्यमानं विषयोपारिरोपजननेन संसारं ददाति तद्विवेकेनाखंडैकात्मभावेनास्वाद्यमाणं तु मोक्षमित्यर्थः ३५ ३६ स्वात्तिशयी युत्पतारतम्यप्रयुक्तदृत्तिनाशवैशयोक्त यंप्रयुक्तौ तन्मुक्ताचेत्स्वगोचराऽर्थदृष्टर्णानंदस्फुरणात्मिका ३७ एवंमुक्तस्वरूपालंबेनेमेौषुप्तीस्वरूपावरणदृष्टिः भाति अपागच्छति यथा स्वेनरूपेण दृष्टिः स्वप्रकाशते ३८ ३९

दृश्यदर्शनसंबंधसंवित् सर्वं तुर्यत्वमेतीति सर्वत्रान्वयः ॥ तुर्यतालक्षणायां मुक्तौ यादृश आत्मा परिशिष्यते तं दर्शयति अस्मीत्यादिना ॥ ४० ॥ चेतनश्चेतन्यवान् सन्मयः अस्तितास्य हि तीयभावविकारप्रकारः प्रचुरः एकः एकत्वसंख्याश्रयः ॥ ४१ ॥ अभ्याशे समीपे तिष्ठतीत्यभ्याशस्थः ॥ अस्तिसत्ताश्रयः ॥ ४२ ॥ न पदार्थो वाच्यत्वायोगात् नापदार्थस्तुर्यादिपदलक्ष्यत्वात् पंचात्मा भूतात्मा नापि तन्मात्रात्मेति न पंचभूतस्वभावश्चेत्यर्थः ॥ उक्तार्थे उपपत्तिमाह यदिदमिति ॥ ४३ ॥ यथाभूतं यथास्थितं सम्यक् तत्त्वतः संपश्यतः ॥ ४४ ॥ कथं तर्हि भूम्यादिभूततया दृश्यते तत्राह काठिन्येति ॥ आत्मैव तस्मिन् काठिन्यस्य द्रवणस्य स्पंदस्य खाख्य भूदृष्टिद्रस्य अवकाशस्य प्रकाशस्य च ॥ अवलोकनैः क्रमाद्भूवाय्वादिषु जगज्जावेषु नटवत्स्थित इति निश्चितं तत्राह सत्तैवेति वस्तुतो यायाम् सत्तासा चिता तत्स्वथात्मना विना यतो नास्ति ततइत्य

दृश्यदर्शनसंबंधसंविदस्मि तु राघव ॥ नात्मा स्थूलो न चैवाणुर्न प्रत्यक्षो न चेतरः ॥ ४० ॥ न चेतनो न च जडो न चैवासन्न सन्मयः ॥ नाहं नान्यो न चैवैको नानेको नाप्यनेकवान् ॥ ४१ ॥ नाभ्याशस्थो न दूरस्थो नैवास्ति न च नास्ति च ॥ न प्राप्यो नातिचाप्राप्यो न वा सर्वो न सर्वगः ॥ ४२ ॥ न पदार्थो ना पदार्थो नापंचात्मा न पंचक यदिदं दृश्यतां प्राप्तं मनःषष्ठेंद्रियास्पदं ॥ ४३ ॥ तदतीतं परं यत्स्यात्तन्न किंचिदिवेह तत् ॥ यथाभूतमिदं सम्यक् ज्ञस्य संपश्यतो जगत् ॥ ४४ ॥ सर्वमात्ममयं विश्वं नास्त्यनात्ममयं क्वचित् ॥ काठिन्यद्रवणस्पंदस्वावकाशावलोकनैः ॥ ४५ ॥ आत्मैव सर्वं सर्वेषु भूवाय्वग्निसमस्तकालकल्पक्रमांतरगतानिगतागतानि ॥ आत्मैव नेतरकलोनास्ति काचिदित्थं मतिर्भवतयाति गतो महात्मन् ॥ ४७ ॥ मोक्षोपायेषूपशमप्रकरणे मोक्षस्वरूपोपदेशः ॥

कल्प१ र्थः ॥ ४६ ॥ उक्तं सर्वं पिंडीकृत्योपसंहरति सकदिति । समस्ते काले अनंतेषु कल्पक्रमेषु अंतरे मध्ये गतानि निविष्टानि जगंति तेषु सकलानि गतागतानि जीवसंसरणानि च सकलआत्मैव इतरकला कलना काचिन्नास्त्येव हे महात्मन् त्वं इत्थं मतिः सन् तया मत्या संसारमतिगतो भवेत्यर्थः ॥ ४७ ॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे द्विसप्ततितमः सर्गः ॥ ७२ ॥

राम॰
२७

रवात्तिषु ॥ ४५ ॥ सत्तैवास्ति न वस्तूनां यायाम् सामाचिता विनायतो रिक्तं ततो न्तिं विद्धि म्योनान्यित ॥ ४६ ॥ को नगं तिसकलानि ४२

देहे अहंभावने यामाये स्यात्यादहंभावात्परा ॥ अहंभावत्रयापाये मुक्तस्य निश्चयं च कीर्त्यते । स्वभावः स्वरूपावस्थितिलक्षणा मुक्तिः तद्द्वैतं द्वैतात्मद्वैतं तदेव चिंतामणिः तस्येंदेर्वैः १ सर्वाहंभावक्षपितं दर्शयितुं प्रक्रमते अथेति ॥ २ ॥ महत्त्वं ब्रादिप्रभाव ३ रजो रेणुः ४ सर्वातिरिक्त परिच्छिन्नः कोऽहं मदन्यद्देहादिकं । सर्वं भूतस्यैकस्य मम हि तत्त्वं स्वगतभेदरूपं कीदृशं

श्रीवसिष्ठ उवाच ॥ एवं विचारया दृष्ट्या द्वैतत्यागेन राघव स्वभावः प्राप्यते तज्ज्ञैस्तज्ज्ञैश्चिंतामणिर्यथा ॥ १ ॥ अथेमामपरां दृष्टिं शृणु राम नयायथा ॥ द्रक्ष्यस्यात्मानमचलमभिवृष्यमिचदिव्यदृक् ॥ २ ॥ अहं रत्नमहं मादित्यो दिशोहमहमप्यधः ॥ अहं दैत्या अहं देवा लोकाश्चाहमहं महः ॥ ३ ॥ अहं तमोहमभ्राणि भूः समुद्रादिकं त्वहं रेजो वायुरथाग्निश्च जगत्सर्वमिदं त्वहं ॥ ४ ॥ जगत्त्रये हे सर्वत्र य आत्मैवं किल स्थितः कोहं किमन्यद्देहादि हि तल्ममे कस्य कीदृशं ॥ ५ ॥ इति निश्चयवानंतर्भूतमात्मतया जगत् ॥ पश्यन्हर्षविषादाभ्यां न वशः परिभूयते ॥ ६ ॥ तन्मये स्मिन्किल जगत्यखिले संस्थिते नघ ॥ किमात्मीयं परं किं स्यात्कमलेक्षण कथ्यतां ॥ ७ ॥ किं ततद्व्यतिरेकेण विद्यते यदुपागतं ॥ हर्षमेतु विषादं वा विषादज्ञो जगन्मयः ॥ ८ ॥ अहंकारदशावेते सात्त्विके द्वे ति निर्मले ॥ तत्त्वज्ञानात्प्रवर्तेते मोक्षदे पारमार्थिके ॥ ९ ॥ परोऽणुः सकलातीतरूपोहं चेत्यहंकृतिः प्रथमा सर्वमेवाहमित्यन्योकार एव हह ॥ १० ॥ अहंकारदृगन्या तु तृतीया विद्यते नघ । देहोहमिति तां विद्धि दुःखायैव न शांतये ॥ ११ ॥ अथ चैतत्त्रयमपि त्यक्त्वा सकलसिद्धये ॥ यच्छेषं तदुपालभ्याति शावष्टभ्यते त्वदः ॥ १२ ॥

५ इति विचार्य निश्चयवान् अनंतरं नंतरं स्थांतर्भूतं जगदात्मतयापश्य । ६ तन्मये आत्ममये स्वार्थे मयट् ॥ ७ । यदुपागतं चेदिति शेषः विषादे दृश्यमाने अतस्वा सोयतो जगन्मयो न चिन्मय इत्यर्थः । ८ स्त्रे वक्ष्यमाणे ९ । अणुः आकाशवत्सूक्ष्मस्वभावः सकलदृश्यात्मन्यदृश्यादतीतः १० विद्यते स्वभावतो न शास्त्रतः ११ यतः शेषं शिष्यमाणं निरहंभावं पूर्णचिन्मात्रं । १२

शोधनेन सर्वातीतस्वरूपः बाधनेन तु सर्वा सत्तां गतः। सर्वबाधे आत्मापरिशेषशंकां वारयति असत्तेति। असत्तया जगद्बाधोपायेनैव सत्त्वेन आपूरितं जगद्येन १३ युक्तयः शास्त्राणि गुरुवचनानि च दिक्प्रदर्शनमात्रं तत्परिचयस्तु स्वानुभवेनैवेत्याशयेनाह स्वानुभूत्येति। आशया देहादिवासनास्ताभिः हितं हृदयग्रंथिं अहंकारतादात्म्याध्यासं ॥१४॥ ननु तं त्वौपनिषदं पृच्छामीति श्रुते धर्माधर्मादिवस्तुनि तद्दर्शितयुक्तिमात्रविश्वासाद् लौकिक आत्मास्तीति ज्ञायते स कथं स्वानुभववेद्यः स्यात्तत्राहनेति न धर्मादिवदत्यंतपरोक्षात्मसद्भावं प्रतिपादयितुं श्रुत्यादयः प्रवृत्ताः किंतु सर्वानुभवसिद्ध सत्ताकमात्मानं विवेचयितुमिति भावः ॥१५॥ सर्वेषां स प्रत्यक्ष इति यदुक्तं तदुपपादयति यदिदमिति। बाह्याभ्यंतरविषयेषु अंतःकरणवृत्तिस्पंदनात्स्पंदि यद्दर्शनं साक्षाद् अर्थप्रथारूपं अपरोक्षं प्रसिद्धं यत्र किंचिदनुमित्युपमितिशाब्दसंविदा

सर्वातीतस्वरूपोऽपि सर्वा सत्तां गतोऽपि च। असत्तापूरितजगदस्त्येवात्मा प्रकाशकः ॥१३॥ स्वानुभूत्यैव पश्यामः सर्वे वाशिसरोरिताः। आशयं हृदयग्रंथिं त्यज तत्त्वविदां वर ॥१४॥ नात्मास्त्यनुमया रामन चाप्तवचनादिना। सर्वदा सर्वथा सर्वैः स प्रत्यक्षोऽनुभूतितः ॥१५॥ यदिदं दर्शनं स्पंदं किंचिद्यत्संविदाद्यपि। तत्सर्वमात्मा भगवान्दृश्यदर्शनवर्जितः ॥१६॥ न सन्नासन्न सो देवो नाणुर्नापि महानसौ। नाप्येतमोर्हं शोभं ध्रुमस्य वेदं च सर्वतः ॥१७॥ स एव चैवं वदति स च वक्तुं न युज्यते। नतदन्यदिदं तस्माद्यात्मानमनामयं ॥१८॥ नात्मायमयमप्यात्मा संज्ञाभेद इति स्वयं। तेनैव सर्वगतया शक्त्या स्वात्मनि कल्पितः ॥१९॥

द्यपि प्रसिद्धं तत्सर्वं दृश्यविषयस्य दर्शनस्यांतःकरणवृत्त्युपाधेश्च वर्जने भगवान्स्वप्रकाश आत्मैव नित्यापरोक्षः सर्वानुभवसिद्धः परिशिष्यत इत्यर्थः तथा च श्रुतिः प्रतिबोधविदितं मतममृतत्वं हि विंदत इति १६ तस्य प्रत्यक्षपरोक्षवेद्यव्यक्ताव्यक्तोभयवैलक्षण्योक्त्या दृश्यदर्शननिर्मुक्ततामुपपादयति न सन्नासन्निति तस्मिन्जगद्बाधप्रदर्शनेनापि तदुपपादयति स एवेति १७ सर्ववागादिकर्मेंद्रियप्रवृत्तिनिमित्ततया च तद्व्यवहार्यं तं परिचीय वागादेः तद्विषयस्य च तत्र बाधेन स एव परिशिष्यत इत्याशयेनाह स एवेति इदं वागादि तद्व्यवहार्यं च १८ आत्मानात्मनाम रूपविभागस्तेनैव साज्ञानशक्त्या कल्पित इति बाध्यतोपपत्तिरित्याशयेनाह नेति १९ 

नित्यापरोक्षस्वप्रकाशस्वरूपस्वभावोऽपि सूक्ष्मत्वात्स्थूलात्मसक्तबुद्धिभिः सन्न विभावयितुं शक्य इत्यर्थः। २० स्थूलात्मसक्तौ तु तस्य मोहात् पुर्यष्टकोपाधौ प्रतिबिंबनेन जीवभावापत्तिर्निमित्तमित्याशयेनाह सत्त्विति। सत्सु सर्गक्रमेणोत्पन्नेषु भोग्यभोगायतनाद्यनेकपदार्थेषु। २१ अनुभूयते अहमित्यभिव्यक्तस्वरूपः क्रियते यत्नेन न तैर्नयत्नाद्विनाऽऽस्पंदान्नोदनात्। २२ नाभेत्स्वधारणेन क्वचिद्देहस्थ एव संस्थित इति नेत्यर्थः। २३। परिच्छिन्नाहंतया स्फुरणे तु पुर्यष्टकं हेतुरित्याह सतीति। २४। पुर्यष्टके इयं प्रसिद्धा लेच्छा प्रीति

संस्थितः स हि सर्वत्र त्रिषु कालेषु भास्वरः। सूक्ष्मत्वात्स महत्त्वाच्च केवलं न विभाव्यते ॥२०॥ सत्स्वनंतपदार्थेषु जीवत्वेनाभिबिंबति। आत्मा पुर्यष्टकादर्शे स्वभाववशतः स्वतः ॥२१॥ पुर्यष्टकोदयादेव स्वयमात्मानुभूयते। सर्वदा सर्वसंस्थः स्वेद्य नास्पंदादिवानिलः ॥२२॥ चिदात्मा सर्वगो व्यापी न क्वचिन्नाम संस्थितः। यद्वत्सर्वपदार्थानां सत्तात द्वन्महेश्वरः ॥२३॥ सति पुर्यष्टके तस्मिन्जीवः स्फुरति नोपले। सजिवाया विवरजन्मतिर्दीप इवेक्षणं ॥२४॥ इयं पुर्यष्टके स्वेच्छा स्वात्मन्येवात्मनि स्थिते। सति स्फुरत्यस्फुरिते भानाविव जनेषणा ॥२५॥ यदि सूर्ये स्थिते व्योम्नि तादृशो चित संस्थितिः। न श्यति व्यवहारोऽयं भास्करे तत्किमागतं ॥२६॥ यद्यात्मनि स्थिते देवे तत्सत्ता लब्धसंस्थितिः। देहो नाशमुपायाति तत्किं नष्टमिहात्मनि ॥२७॥ न जायते न म्रियते नादत्ते नाभिवांछति। न मुक्तो न च बद्धोऽयमात्मा सर्वस्य सर्वदा ॥२८॥ आत्मा प्रबोधास्फुरिता निरात्मन्यात्मतां गता। सर्परज्जुभ्रमाकारा भ्रांतिर्दुःखाय केवलं ॥२९॥

विचित्रभोगेच्छा च परमप्रेमास्पदे निरतिशयानंदस्वात्मनि स्थिते स्फुरति यथा भानौ सूर्ये नभसि स्थिते सति सर्वजनानां तत्क्रियाफलेषणा स्फुरति तद्वत्। आत्मनस्तु कामाय सर्वं प्रियं भवतीति श्रुतेरात्मैव सर्वव्यवहारहेतुः प्रियाप्रियादिसर्वव्यवहारनिर्वाहक इत्यर्थः ॥२५॥ अस्त्वेवं किं ततस्तत्राह यदीति तादृशे तत्र देहगुणाफले उचिता अनुरूपा स्थितिर्यस्याः ॥२६॥२७॥ आत्मा तर्हि स्वतः कीदृशस्तमाह नेति ॥२८॥ अत एव तस्याज्ञानादेवानर्थभ्रांतिरित्याह आत्मेति २९

वा०टी०उप
।२०५

प्रबोधेतरहिकीदृशमाह अजातत्वादिति ॥ ३० ॥ ३१ ॥ एवंगुणविशिष्ट इत्यंतस्य भावइतियावत् ॥ ३२ ॥ मौर्ख्येणोपगताये लोका जनास्तद्वत् ॥ ३३ ॥ यथा पर्वतदेशे जलयंत्रेणपेषणेप्रवृत्तेन तत्सन्निधिमात्रेण तत्कुर्वाणेनेवस्थितेन आत्मना स्वतस्तूष्णींमौनिना कायादिव्यापारस्पन्देन पुरुषेण स्थीयते तथा विदुषा देहादिनाव्यवहर्तव्यमित्यर्थः ॥ ३४ ॥ सम्यग्ज्ञानेन विबोधितं बोधात्ममात्रतां नीतं ॥ ३५ ॥ आशास्वाशास्यमानेषु विषयेष्वसंसक्त्या स्वयं स परिणामबोधरूपस्याक्षयः ॥ ३६ ॥ दीनतया कार्पण्येन ॥ भक्त्या नित्यप्राप्ते प्यप्राप्तिकल्पनया ॥ ३७ ॥ दृ

अनादित्वान्न जातोयमजातत्वान्न नश्यति ॥ आत्मात्मव्यतिरिक्तं तु नाभिवांछत्यसंभवात् ॥ ३० ॥ दिक्कालाद्यनवछेदान्न बद्धोयं कदाचन बंधाभावे क्व मुक्तिः स्यादमोक्षस्तेन संस्थितिः ॥ ३१ ॥ एवंगुणविशिष्टोयमात्मा सर्वस्य राघव ॥ अविचारवशान्मूढो लोकोयं परिरोदिति ॥ ३२ ॥ सम्यगालोकिताशेषपर्वापरजगत्क्रमः ॥ मा शोकं गच्छ सुमते मौर्ख्योपगतलोकवत् ॥ ३३ ॥ द्वे एव कलने त्यक्त्वा मोक्षबंधात्मिके यथा ॥ विदुषा व्यवहर्तव्यं यंत्रेणेवात्ममौनिना ॥ ३४ ॥ न मोक्षो नभसः पृष्ठे न पाताले न भूतले ॥ मोक्षो हि चेतो विमलं सम्यग्ज्ञानविबोधितं ॥ ३५ ॥ सकलाशास्वसंसक्त्या मोक्षो भिवांछ्यते ॥ ३७ ॥ परं प्रबोधमासाद्य चित्ते चित्तत्वतां गते ॥ दृशमोक्षानवांछ्यंते किमु तेको हि मोक्षकः ॥ ३८ ॥ अयं मोक्षस्त्वयं बंधः पेलवां कलनामिति ॥ परित्यज्य महात्यागी सत्वमेवम वामभव ॥ ३९ ॥ परिगलितविकल्पनो प्रयातः सगरसुतोपनिखातमेखलांकं ॥ अवनिवलयमंतरस्तसंगश्चिरमनुपालय सर्वदोदितश्रीः ॥ ४० ॥ मोक्षोपाये उपशमप्रकरणे स्वात्मविचारः सर्गः ॥ ७३ ॥

राम०
।२०५

स्वतां पारमार्थिकचिन्मात्रतां वोहे अभवस्मोक्षस्त्वमेवमभव ॥ ३९ ॥ परिगलिता विकल्पना यस्य तथाविधो रघुनंदन प्रयातस्त्वं सगरसुतैर्निखाता मेखला समुद्रस्तदंकं तच्चिह्नितं अवनिवलयं चिरमनुपालय ॥ यतस्त्वं अंतः अस्तसंगस्ततस्ते राज्यादि पालनं दोषायेत्यर्थः ॥ ४० ॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे त्रिसप्ततितमः सर्गः ॥ ७३ ॥

३ यः स्वयं चेतसः क्षयः स मोक्षनाम्ना कथितस्तत्वज्ञैरात्मदर्शिभिः ३६ यावत्प्रबोधो विमलो नोदितस्तावदेव मः मौर्ख्याद्दीनतया रामं ३
नत्यो

प्रमाणतंसृतिभ्रांतिः प्रबोधास्तर्णतासदा ॥ जीवन्मुक्तिगुणास्तेच विस्तरेणात्र वर्ण्यते ॥ अविचारवशान्मूढो लोकोयं परिरोदितीति यदुक्तं तत्र, दीप्रपंचयति लीलयेत्यादिना प्रलयसुषुप्तौ रज्ञानावृतत्वान्निरतिशयानंदरूपत्वात् परमप्रेमास्पदं स्वरूपमपश्यति आत्मनि कामकर्मवासनापरिपाकक्रमे प्राप्ते नसर्गजागरादिकालेन लीलया चिद्विलासेनैव वपुः स्थूलसूक्ष्मसमष्टिशरीरं जायते ॥ यथा रम्यस्य स्वकांतापुत्रादेर्वक्त्रं अपश्यतो विरहिपुरुषस्य हरिम्लानिकार्श्यादिदीरूप्यापादिकादौर्मनस्यधीर्निरंतरं जायते तद्वदित्यर्थः ॥ १ ॥ तस्य देहद्वयस्य वशात्तत्र हंभावाध्यासेन तद्दृशतां प्राप्तेन, इयं निरतिशयानर्थरूपामायामिथ्याभ्रांतेर्ब्रागलोभमोहादिर्मदस्य महाशक्तिरायाता ॥ २ ॥ तयात्मयाराग

श्रीवसिष्ठ उवाच ॥ लीलयाऽपश्यति वपुः कालेनात्मनि जायते ॥ रम्यस्यापश्यतो वक्त्रं हरिद्रोरूप्यधीरिव ॥ १ ॥ तद्वशादियमायाता महतीमेदुरोदरं मायामरमहाशक्तिः सुरासादलवादिव ॥ २ ॥ तयान्यथा विकारिण्यात दतद्भावभूतया ॥ इदं संपन्नमखिलं तापाब्धिमरीचयः ॥ ३ ॥ मनो बुद्धिरहंकारो वासनाक्षंद्रियाण्यपि ॥ एवं कलितनामांकैः स्फुरत्यात्मा चिरं बुभिः ॥ चित्ताहंकारयोर्द्वित्वं क्वचस्यात्तिनेवक्तनः ॥ यच्चित्तं सत्वहंकारो योहंकारो मनो हि तत् ॥ ५ ॥ व्यतिरिक्तं हि माछोत्कृत्यमिति संकल्प्यते यथा ॥ मुधैव कल्प्यते भेदश्चित्ताहंकारयोस्तथा ॥ ६ ॥ मनोहंकारयोरंतर्द्वयोरेकतरक्षये ॥ क्षीणो द्वे एव हि यथा पटशौक्ल्ये पटक्षये ॥ ७ ॥ तृष्णां मोक्षविषयं त्यक्त्वा बंधबुद्धिं तथेषणां ॥ स्ववैराग्यविवेकाभ्यां केवलं क्षपयेन्मनः ॥ ८ ॥

दिरागक्र्या प्रवृत्तिभोगपुण्यपापवासनाद्यनर्थपरंपराविकारवत्या, तस्य परमात्मनः अतद्भावोन्यथाभावस्तेन भूतया लब्धसत्तया लब्धसमया ॥ ३ एवं कलितानि नामान्यंकानि सहृपाणि च यैस्तथाविधैः स्वस्वरूपैर्बुभिः ४ अनर्थप्राप्तिप्रकारमुक्त्वा तदुच्छेदोपायं वक्तुं प्रथममर्थे चेतनादित्वं तन्मननान्मनस्तदध्यवसायाद्बुद्धिस्तदभिमानादहंकार इति एकमेवांतःकरणं अंकुरकांडमूलप्ररोहशाखादिप्ररोहक्रमेणाहृद्वयवदर्वतः प्रस्तमवतिष्ठत इत्याह चित्तेतिद्वाभ्यां ५ ६ ऐक्योक्तिफलमाह मन इति ७
इदानीं तदुच्छेदोपायमाह तृष्णामिति ८

वा॰टी॰उप॰ मोक्षेच्छाकुतस्त्यात्यात्राह मोक्षइति॥ मनसि मननोल्के सति तदेव वपुः शरीराकारं भवति तच्च पुनर्बहिर्मुखतापादनाद्दोषायेत्यर्थः॥ ९॥ परिच्छिन्नवपुर्भावस्वास्वरोपोनुषु
२१० द्वात्मभावो जगदात्मभावो वेत्याशयेनाह आत्मनीति॥ तस्मात्परिछेदमननमेव निर्मलं कुर्वित्यर्थः॥ १०॥ प्राणादिवायधीनं चलनादिधर्मकं देहादि वैलक्षण्यमात्मनो दर्शयति
वायित्यादिना॥ स्फुरति संचलति॥ ११॥ १२॥ देवोचलो मेरुः॥ १३॥ नन्वस्तु द्वात्मभावो
सर्वात्मभावे४ तु एरवाचलनादृक्षस्येवात्मनश्चलनं दुर्वारमिति चेत्तत्राह प्रतिबिंबितेति। तथा च चलदनेकप्रतिबिंबात्मभावापन्नापि स्फटिकशिलायथा कूटस्था तथा आत्मापीति भावः

मोक्षो मे स्त्विति चिंतांतर्जाता चेदुत्थितं मनः। मननोल्के मनस्युच्चैर्वपुर्दोषाय केवलं। ९॥ आत्मन्यतीते सर्वस्मात्सर्वं भूत्वा तथा
तते॥ को बंधः कस्य वा मोक्षो निर्मलं मननं कुरु॥ १०॥ वायुस्पंदनधर्मत्वाद्यदा चलति देहकः। तदा स्फुरति हस्तांगरसनापद्म
वावली॥ ११॥ पादपेपल्लवश्रेणीं चालयत्यनिलो यथा तथैवांगावलीं वायुर्देहे संचालयत्यलं॥ १२॥ चित्सर्वव्यापिनी सूक्ष्मा न
चलानैव चाल्यते। न स्वतः स्पंदमायाति देवाचल इवानिलैः॥ १३॥ प्रतिबिंबितसर्वार्था केवलं स्वात्मनि स्थिता॥ प्रकाशयति
बोधेन जगंतीमा निदीपवत्॥ १४॥ तत्र कोयं मुधा मोहो भवतामति दुःखदः। अयं सोहं ममांगानि ममेदं चेति दुर्धियां॥ १५॥ अ
तिकश्मलहतायादृशा नित्यमनित्यया। आत्मकर्तृत्वभोक्तृत्वक्रिया समुपलभ्यते॥ १६॥

१४॥ तत्रैवमत्यंतवैधर्म्ये सति अयं देहः सः प्रसिद्धो हं इदं बालस्त्रीपुत्रादि मम इति मोहः। भवतामिति रामेतरजनाभ्रसुक्तिः॥ दुःस्थिताधीर्येषां॥ यक्रियायुक्ताः प्रादयस्तं
प्रत्येव गत्युपसर्गसंज्ञा इति ध्यायत्यर्थप्रतिदुरः अगतित्वात् कृतिकारकेतरदर्वपदस्य यणेप्यत इत्युक्तेर्न यण्॥ १५॥ एवमत्यंतवैधर्म्येपि देहेंद्रसादयः आत्मनि कर्तृत्वा रा॰म॰
दयश्च विरुद्धधर्माः अविद्याकश्मलरागाद्युपहतया देहादितादात्म्यसंसर्गाध्यासप्रयुक्तत्वादनित्यया भ्रांतिदृशैवोपलभ्यंत इत्यर्थः॥ १६॥ २१०

DR. BHAU DAJI MEMORIAL

उपलब्ध्यनुसारेणैवोत्तरोत्तरस्वांतिबीजभूतवासनाभिजायत इत्याह तत्रेति॥ अज्ञातापः कृत्वाज्ञानादतत्तापो महदात्मपरत्वात्॥ १७॥ १८॥ १९॥ २०॥ आलोकः अपरिच्छिन्नात्मप्र
काशः एति आविर्भवति॥ २१॥ स्वाद्ददिति निश्चय दृति वद्बुद्धिः॥ ज्ञातात्तत्तद्रोऔ आशाप्रभीतर्कमत्तं अज्ञानं मिनति॥ २२॥ आशायाः परिकरे परिवारभूते देहाभिमानादौ॥ २४॥ अथ

तत्रायमहमागंता भोक्ताकर्तेति जायते। स्पृधैवाज्ञानतापोस्या स्मृगत्रस्यैव वासना॥ १७॥ अज्ञाते पापमनोभ्रमणे विषयतर्षुलं॥ अभस्यैव हि मत्येव स
गत्रस्यैव कर्षति॥ १८॥ विज्ञातात्मस्वरूपांग नाशं यातिफलात्मिको॥ विभ्रमध्यासारिज्ञाता यथा चांडालकन्यका॥ १९॥ अविद्यासंपरिज्ञाता नचैनं
परिकर्षति। मृगतृस्नापरिज्ञाता तर्षुलं नावकर्षति॥ २०॥ परमार्थावबोधेन समस्तं रागवासना। दीपेनेवांधकारश्रीर्गलत्यालोक एति च॥ २१॥
नास्त्यविद्येति संज्ञाते निश्चये शास्त्रयुक्तितः। गलत्यविद्यातापेन तुषारकणिका यथा॥ २२॥ देहस्यास्य जडस्यार्थे किं भोगैरिति निश्चयः॥ भिनत्या
शामलं ज्ञातापंजरं केसरी यथा॥ २३॥ आशापरिकरे रामन्नंनपरिहते हृदा। पुमानागतमोदेभ्यो ज्ञास्मामाति चंद्रवत्॥ २४॥ परां शीतलतामेति
दृष्टिधौत इवाचलः॥ निर्वृतिं परमां धत्ते प्राप्तराज्य इवाधमः॥ २५॥ शोभते परया लक्ष्म्या शरदीव नभस्तलं। आत्मन्येव न मात्युच्चैः क
ल्पस्यांत इवार्णवः॥ २६॥ भवत्यपेतसंरंभो हृष्टिमूकइवांबुदः॥ तिष्ठत्यात्मनि संवेत्ता प्रशांत इव वारिधिः॥ २७॥ परं धैर्यमुपारते
स्थैर्यं मेरुरिवाचलः॥ राजते स्वच्छया लक्ष्म्या शीतैंधन इवानलः॥ २८॥ भवत्यात्मनि निर्वाणः प्रशांत इव दीपकः। रश्मिमायाति परमां
नरः पीतामृतो यथा॥ २९॥ अंतर्दीपो घट इव मध्यज्वाल इवानलः। स्फुरद्दीप्तिर्मणिरिव प्रध्यात्यंततः प्रकाशते॥ ३०॥ सर्वात्मकं सर्वगतं सर्वेशं
मोदरिद्र॥ २५॥ नमातिनसंमितो भवति न परिच्छिद्यत इति भावः॥ २६॥ अपेतसंरंभः सर्वनायकं॥ सर्वाकारं निराकारं समात्मानं प्रपश्यति॥ ३१॥
क दुरमिति वेगः वर्षानृष्टाप्राप्यस्मि कोगर्जनादिशून्यः॥ २७॥ धैर्यं विषयेरप्रकंप्यतां स्थैर्यं भयस्थानेरप्रकंप्यतां॥ २८॥ २९॥ ३०॥ चवक्रोरसर्वाकारं परमार्थतो निराकारं ३१॥

३२। विषयसंगाद्विषमानुरंजनाच्चविनिष्क्रांतः। ३३ शीतोष्णसुखदुःखादयो द्वंद्वदोषाः। ३४। पुनरावृत्तिशून्यंपदं साम्राज्यं मनसेत्यादेरुक्तस्यारन्वयः ३५ सर्वैर्जनैरुपादेयतया अभिवांछितः। आरंभश्चारित्र्यं यस्य। आनंदश्चारित्र्यफलं। ३६ अन्तस्वरूपतिरोधानं नैतिनोदेति उदयंपुनः स्वरूपाविर्भावं चनैति सकृद्विभातत्वादित्यर्थः ३७ ३८ रमे

हसत्यलमतीतास्ताः पेलवादिवमाक्लीः यास्मरशरश्रेणीचपलं चित्रमास्थितं॥ ३२॥ संगरंगविनिष्क्रांतः शांतमानमनोज्वरः
अध्यात्मरतिरासीनः पूर्णः पावनमानसः ३३ निर्दिष्टकामपंकांकाच्छिन्नबंधनिजन्मभः। द्वंद्वदोषभयोन्मुक्तस्तीर्णसंसारसा
गरः॥ ३४ प्राप्तानुत्तमविश्रांतिर्लब्धालभ्यपदास्पदः अनिवृत्तिपदंप्राप्तोमनसाकर्मणागिरा। ३५ सर्वाभिवांछितारंभोनकिंचि
दपिवांछति॥ सर्वानुमोदितानंदोनकिंचिदनुमोदते ३६ नददातिनचादत्तेननमतिनचनिंदति नास्तमेतिनचोदेतिनतुष्यतिनशो
चति। ३७॥ सर्वारंभपरित्यज्यचैत्योपाधिविवर्जितः॥ सर्वाशासंपरित्यागीजीवन्मुक्तइतिस्मृतः। ३८ सर्वैषणाःपरित्यज्यचेतसामौ
नवानन्। धारानिरवशेषेणयथात्यक्तापयोधरः॥३९॥ नतथासुखयत्यंगसंलग्नावरवर्णिनी॥ यथासुखयतिस्वांतमिंदुशी
तानिराशता॥ ४०॥ नतथैंदुःसुखयतिकंठलग्नोपिराघव नैराश्यसुखमत्यंतंयथासकलशीतलं॥ ४१॥ पुष्पपूर्णनवलतो
नतथाराजतेमधुः यथोदारमतिर्मौनीनैराश्यसमनामानसः ४२॥ नहिमाद्रेर्नमुक्ताभ्योनरंभाभ्योनचेन्दुतः। नचचेदृमसःशै
त्यंनैराश्यादिवाप्यते ४३ अपिराज्यादपिस्वर्गादपींदोरपिमाधवात। अपिकांतासमासंगान्नैराश्यंपरमंसुखं। ४४॥ तृणव
न्नोपकुर्वंतियत्रत्रिभुवनश्रियः सापरानिर्वृतिःसाधोनैराश्यादुपलभ्यते। ४५॥ आपत्कंटजपरशुंपरायानिर्वृतेः पदं पुष्प
गुच्छं शमतरोरान्नंवस्वनिराशतां। ४६

प्रतितत्त्वलक्षणानिशिक्षयतिसर्वैषणाइत्यादिना। निरवशेषेणनिःशेषतयाधाराःजलानित्यक्तापयो
धरोयथाभवतितथेत्यर्थः॥ ३९॥ ईषणात्यागमेवप्रशंसतिनतथेत्यादिना ४० सकलंजगच्छीतलंयस्मात्तत्सकलशीतलं। ४१। ४२। ४३ ४४ ४५. ४६



स्थाणुश्छिन्नावशिष्टतरुः। आशादिशः समुद्गिकाः क्षुद्रसंपुटिकाः। ४७। दानंलौकिकंशास्त्रीयंच आदानं धनादेःस्वीकारः समाहारः संग्रहेणकोशसमुच्चयः विहारो धनव्यये
नपुत्रक्रीडनंविभवा॥ वस्त्रालंकारान्नपानादिसंभारसंपत्तयस्तदादिकाः। हस्तंतेवह्नावासतुच्छफलानर्थबीजस्यमत्दैरन्यथाभिमतत्वेनहासमोप्युत्ताहितिभावः
४८॥ कलनाआशा। ४९ ॥ आत्मनोमनसईशत्वाधीनचित्तं। आत्मास्वयमेवेशःसर्वेश्वरस्तेवा. ५०. पर्यंतंपारी [illegible] हेतुहेतुः पर
मंसौभाग्यंसार्थक्यं॥ ५१॥ नआशाऽवलंब्यतो आशानांस्तेनत्वंविवेकविज्ञानापहारेणात्मसुखविभ्रंशकत्वमेव, जागतंहिसुखंसदैराशासहस्रैराणास्यते जगत्तु मिथ्या
भ्रमंवहति। रथेस्थितस्यपुरुषस्योर्ध्वाधोरिक्तचक्रयोःपरावर्तोयद्वन्नेम्यवलंविपिपीलिकादेःपतनपेषणाद्यनर्थहेतुस्तद्वत्स्वावलंविनोजननमरणाद्यनर्थार्थमे

गोष्पदंपृथिवीमेरुः स्थाणुराशासमुद्गिकाः॥ तृणंत्रिभुवनंराम नैराश्यालंकृतात्कृते॥ ४७॥ दानादानसमाहारविहारविभवादिकाः
क्रियाजगतिहस्यंतेनिराशैःपुरुषोत्तमैः॥ ४८॥ पदेयस्यनवध्नातिकदाचित्कलनाहरि॥ तृणीकृतत्रिभुवनेःकेनोसावुपमीयते
४९॥ इदमेवास्त्विदंमास्तुममेतिहृदिरंजना॥ नयस्यास्तितमात्मेशंतोलयंतिकथंजनाः॥ ५०॥ सर्वसंकटपर्यंतमसंकटमलंसु
खंसौभाग्यंपरमंबुद्धेर्नैराश्यमवलंब्यतां॥ ५१॥ नाशास्तेनत्समाशानांविद्धिमिथ्याभ्रमंजगत्॥ वहद्रथस्यारिक्तकपावर्तैव
दुत्थितं॥ ५२॥

वोत्थितंस्थिदीत्यर्थः॥ अथवाननुउत्कृष्टसुखाशयानिकृष्टसुखाशाप्रमोषदर्शनात्सर्वसर्वाशाप्रमोषार्थमाशांतरोपादानेआशानिवृद्धि
रेवस्यान्ननैराश्यमितिशंकामाऽस्याहनेति॥ उत्कृष्टाशानांनिकृष्टाशास्तेनत्वंअभिप्रेत्यनैराश्यंमयोक्तमितिनविद्धियतोजगन्मिथ्यावस्तुप्रेवआशापरंपराजननेनभ्र
मयतितथाभिवं। उत्कर्षनिरूपकापकर्षस्यैवाप्रसिद्धेः॥ यतोवहद्रथस्यास्यरिक्तकेपुपर्यायेणपरावर्तोभ्रमणंवहद्रथवेगेनरिक्तमोहोवातद्वदुत्थितंतदित्यर्थः। अथ
वानआशास्तेनत्वंआशानांस्तितहिइतिच्छेदःवित। आत्मरेताकिंचिदविनाशास्तेनवांछति। दियस्मात्मिथ्याभ्रमंनाशास्यंपुरुषार्थरूपंजगत्यास्तिअतःत्वंआशानांसंबंधी
नभवेत्यर्थः। शेषंप्राग्वत्॥ ५२॥

आत्यंतिकनैराश्योपायमन्विष्यतदर्शनात् मुह्यमानमिवराममुपलक्ष्य देहादावहंममतात्यागएवप्रागुक्तस्तदुपायइत्याशयेनस्मारयन्नाह किंमुह्यसीति इदंदेहसंबंधिममतात्देहंसए
वोत्तरकालप्रसिद्धः। अयंवर्त्तमानकालेप्रत्यक्षः अहमेवेति किंमुह्यसीत्यर्थः। ५३। अस्त्वेवंतथापिकथमाशाखेदनिवृत्तिस्तत्राह आत्मैवेति ५४ यथाभूतानांयथार्थात्म
भूतानांपदार्थोघानांदर्शनात्। ५५ कीदृशं तर्हि सर्वपदार्थानां यथार्थरूपं तदाह भावेति॥ विसंवादोविकल्पः। ५६ सर्वविकल्पपरित्यागलक्षणमहावैराग्येणवीरंमनोय

किंमुह्यसिमहाबाहोसर्वबद्धोधितोपिसन्। ममेदंतदयंसोहमित्युद्भ्रांतेनचेतसा। ५३। आत्मैवेदंजगत्सर्वंनानातेहनविद्य
ते॥ एकरूपंजगज्ज्ञात्वाधीरैर्नोमनखिद्यते। ५४। यथाभूतपदार्थौघदर्शनादेवराघव॥ परमाश्वासनंबुद्धेर्नैराश्यमधिगच्छति
५५॥ भावाभावविसंवादमुक्तमाद्यंतयोःस्थितं। यद्रूपंतत्समालंब्यपदार्थानांस्थितिंकुरु॥५६॥ वैराग्यवीरमनसोमायेयम
तिमोहिनी॥ पलाय्ययातिसांसारीमृगीकेसरिणोयथा॥५७॥ कांतामुद्दाममदनांलोलांवनलतामिव॥ जर्जरोपलपांचाली
समांपश्यतिधीरधीः॥५८॥ भोगानानंदयत्यंतःखेदयंतिनचापदः॥ हरंत्यंगनतमद्रिमिवानिलाः॥५९॥ रक्तबा
लांगनस्यापिज्ञस्योदारधियोमुनेः। कणशःपांसुतांयांतिमनसःस्मरसायकाः॥ ६०॥ रागद्वेषैःस्वरूपज्ञोनावशःपरिकृ
ष्यते। स्वरस्वास्थ्येनैताभ्यांकिमुताक्रमणंभवेत्। ६१। समदृष्टलतालोलवनितोद्रिशिलाकृतिः। रमतेनैवभोगेषुपांथोमरुमहीष्विव ६२
अयत्नोपनतंसर्वंलीलयासक्तमानसः। भुंक्तेभोगभरंप्राज्ञस्त्वालोकमिवलोचनं। ६३।

स्यात्तस्मात् ५७ सर्वेकामादिदोषाअपिपलायंतइत्याशयेनाह कांतामिति जर्जराःशाणउपलपांचालीपाषाणप्रतिमातत्समां। ५८ हरंतिधैर्यात्प्रच्यावयंति अंगेतिसंबो
धने। ५९ रक्ताअनुरक्तावालांगनायस्मिंस्तथाविधस्यापि ६० स्वरूपंआत्मतत्त्वंतद्ज्ञः ६१ समंतुल्यरूपंयथास्यात्तथादृष्टेलताचलोलवनिताश्चयेनअतएवाविकारत्वादद्रि
शिलाकृतिः ६२ तर्हिकिमाहाराद्यपित्यजतितत्राह अयत्नेति सर्वमनिषिद्धान्नपानादिलीलयादेहधारणमात्रानुकूलचेष्टया। असक्तमानसत्वेलोचनदृष्टांतः ६३



स्यहस्यतत्त्वविदःसललनादिभोगसारेपिनकश्चिद्रागविदतिशयप्रमोस्तीत्याह काकेति॥६४। सम्यक्दृष्टःपरिचितःपंथाःप्रत्यग्दृष्टिमार्गोयेनतं अकस्मूरव्धः १थामि
ति अप्रत्ययेभस्यटेलोपःशैलेंद्रमंदरः। ६५। हेलयाअवहेलनया। असत्यतावुध्येत्यर्थः। अर्थलोक यन्स्वंआत्मपदमेवावलंब्यतिष्ठतीतिशेषः। ६६। व्यग्रेणतत्रकालोवि
तव्याप्तेनापिदेहेंद्रियादिनासमन्वितःज्ञस्तत्त्ववित्गतव्यग्रोनिर्विक्षेपएवतिष्ठति। ब्रह्माहिरण्यगर्भइव। ६७। भूभृतपर्वतःऋतुषुवसंतादिषु। ६८। कर्मेंद्रियाणांवा

काकतालीयवत्प्राप्ताभोगालीललनादिकासादितापंगधीरस्यनदुःखायनतुष्टये। ६४। सम्यक्दृष्टपथंप्राज्ञंसुखदुःखमती
मनाक्। द्वेषीच्याविवशैलेंद्रंक्षोभंनेतुंनशक्नुतः॥ ६५॥ हेलयालोकयन्भोगान्सदुर्दांतोगतज्वरः। स्वमेवपदमालंब्यसर्वभूतांत
रस्थितं॥६६॥ ज्ञःतिष्ठतिगतव्यग्रोव्यग्रेणापिसमंततः॥ जगंतिजनयन्नेवब्रह्मेवात्मपरायणः॥६७॥ आपतत्सुयथाकालंयथादे
शंयथाक्रमं। सुखदुःखेषुनक्षोभमेतिभूभृदृतुष्विव॥६८॥ मज्जतोपिबहुह्यस्यरामकर्मेंद्रियभ्रमैः। असक्तमनसोनित्यंनकिंचिद
पिमज्जति॥६९॥ कलंकंयतःकलंकेनप्रोच्यतेहेमनान्यथा॥ भावासक्त्यास्मासक्तांतक्लोजंतुर्हिनान्यथा॥ ७०॥ शरीरव्यतिरि
क्तंज्ञंपश्यतःप्रविवेकिनः। विकर्तितांगकस्यापिनकिंचित्सविकर्तितं॥७१॥ सत्क्सभातंविमलंयज्ज्ञातंज्ञातमेवतत्। नहिबंधुःप
रिज्ञातःपुनरज्ञाततांव्रजेत्॥७२॥ सर्पभ्रांतौनिवृत्तायांनरज्जांसर्पभावना। पुनरेतियथाप्राट्टद्रीगिरितटीच्युता॥७३ नहे
मतापशुद्धांगस्वभावमलमागतं॥ कर्दमेमग्नमपिसत्तस्मादेतेमलंपुनः। ७४। गादीनांभ्रमैर्व्यापारैर्विषयेषुमज्जतोपि। ६९। अंतर्दोषसंगम्य
बहूपकत्वंनहिःसंगम्येत्यत्रदृष्टांतमाह कलंकीति। हेम अंतःकलंकेनैवकलंकित्युच्यतेअन्यथाबहिःपंकादिलेपेनतथोच्यतेतद्वदित्यर्थः। ७०। अंतःसंगात्यागेदेहदुःखादेरवि
नप्रसक्तिरित्याह शरीरेति। ७१। देहातिरिक्तात्मविस्मरणेतर्हिपुनर्दुःखंस्यात्तत्राह सत्क्सेति विस्मरणप्रसक्तिरित्यर्थः। ७२ विस्मरणाप्रसक्तौसदृष्टांतोपपत्तिंकार
णमाह सर्पेत्यादिना। ७३। अत्नमत्स्वंतस्वभावेहमात्रतोआगतंप्राप्तं। ७४।

णि



वृक्षस्य वृंतात्तच्युतं फलं पुनर्वृंते केन समर्थेनापि महतापि प्रयत्नेन दृढं बद्धुं न केनचिदित्यर्थः ॥७५॥ यथा पाषाणांतर्गतं मणिं पाषाणच्छेदनेन मणितत्त्वविचारेण च अमितः ॥ अमन्यं शखंडनतः गतं प्राप्तं पुनः पूर्ववत् पाषाणं मणिं च संधातुं कस्याप्यसामर्थ्यं शक्तता नास्तीत्यर्थः ॥७६॥ यांत्रां उत्तमसमाजगमनं ॥७७॥ क्षीरधी दुग्धभ्रांतिः ॥ धी विचाराद्धीस्यात्मदर्शनात् ॥७८॥ मधुमद्यं अंबुशंकया जलभ्रांत्या ॥७९॥ चित्रलिखिता कांता स्त्री प्रतिमेव ॥८०॥ यथा चित्रे स्त्रियाः मषीकुंकुमादिरंगमेदाः पंचमस्तमात्रं तथा जीवत्याः केशोष्ठाद्यपीति तत्तस्तः साम्यमित्यर्थः ॥ ग्रहणुपादेयते तियावत् ॥८१॥ ननु स्त्र्यादिविषयो यथा अनुभूयमाना

क्षीणेस्य हृदयग्रंथौ न बंधोस्ति पुनर्गुणैः ॥ यत्नेनापि पुनर्बद्धुं केन वृंते च्युतं फलं ॥७५॥ अवच्छेदविचाराभ्याममितः खंडशो गतं ॥ पाषाणं च मणिं चैव संधातुं कस्य शक्तता ॥७६॥ विज्ञातायामविद्यायां कः पुनः परिमज्जति ॥ परिज्ञाय श्वपाकानां यात्रां कः प्रेक्षते द्विजः ॥७७॥ दुग्धभ्रमिर्यथा क्षीरधीर्विचारान्निवर्तते ॥ संसारवासनातद्वद्धीविचारान्निवर्तते ॥७८॥ मद्यं बुशंकया तावद्धि प्रयत्नैः प्रपीयते ॥ यावन्न तत्परिज्ञातं परिज्ञातं प्रहीयते ॥७९॥ रूपलावण्ययुक्तापि चित्रकांतेव कामिनी ॥ द्रव्यमात्रसमारंभात्तत्त्वविद्भिर्विलोक्यते ॥८०॥ यथा मषीकुंकुमादि स्त्रियाश्चित्रे तथैव हि ॥ जीवत्या अपि केशोष्ठं कस्तां परिकिलग्रहः ॥८१॥ अनुभूतगुडस्वादुरपि दाहविकर्तनैः ॥ न शक्यतेन्यथा कर्तुं तत्त्वालोकस्तथात्मनः ॥८२॥

इपात्तत्तोन्यथैव वर्ततेत्तथा स्वात्मानुभवोपि परमप्रेमास्पदत्वेन प्रसिद्धा दानंदरूपादन्यथैव किं न स्यादिति चेत्तत्राह ॥ अनुभूतेति ॥ यथा गुडस्य स्वादुः मधुररसोऽनुभूतस्य गुडस्य अनुभवकरणस्य जिह्वादेरनुभवितुर्देहस्य वा देवा दाहविकर्तनादिभिस्तत्परितैरपि नासौ माधुर्यानुभवः किंतु तिक्ताद्यनुभवः इत्यन्यथा कर्तुं शक्यस्तथा तदेकव्यसनितया नंदानुभवोपि तथैवेत्यर्थः ॥८२॥



णि

यथा सकृदप्यनुभूतो नान्यथा कर्तुं शक्यस्तदा तदैकव्यसनितया सदैवानुभूयमानस्तु सुतरामित्याशयेनाह परव्यसनिनीत्यादिना ॥८३॥८४॥८५॥ जागत्सदेन जागताः सर्वविषयानंदभेदा लक्ष्यंते ॥ तेन सर्वेन नानापुष्परसास्वादप्रायत्वेन समरसास्वादेति तादृशस्तात्मानंदरविदालोकस्य अवलंबनं निरंतरास्वादधारा प्राप्ता तत्त्वज्ञस्य बुद्धिः केन विस्मारयितुं शक्यत इत्यर्थः ॥ तथोक्तं शिवधर्मोत्तरे ॥ ज्ञानामृतरसो येन सकृदास्वादितो भवेत् ॥ विहाय सर्वकार्याणि मनस्तत्रैव धावतीति ॥८६॥ व्यवहारं गृहकर्म अखंडितं सदा कुर्वन् भर्त्रा श्वशुराभ्यां च खेदितः पीडितोपि परव्यसनवान्वध्ह्लोक इति परेणान्वयः ॥८७॥८८॥८९॥ तत्रापि सम्यगभूमिकामारूढस्य

परव्यसनिनी नारी व्यग्रापि गृहकर्मणि ॥ तदेवास्वादयत्यंतः परसंगरसायनं ॥८३॥ एवं तत्त्वे परे शुद्धे धीरो विश्रांतिमागतः ॥ न शक्यते चालयितुं देवैरपि सवासवैः ॥८४॥ परव्यसनिनी नारी केन भर्त्रा बलीयसा ॥ विस्मारिता स संकल्प्यकांतसंगमहोत्सवं ॥८५॥ जगत्समरसानंदचिदालोकावलंबने ॥ केन विस्मार्यते बुद्धिस्तत्त्वज्ञस्य महात्मनः ॥८६॥ समप्रसुखदुःखाढ्यं व्यवहारमखंडितं ॥ कुर्वन्कुलजनायत्तो भर्त्रा श्वशुरखेदितः ॥८७॥ यथा संकल्प्यकांतेन भवत्यानंदमंथरः ॥ वध्हलोको व्यसनवान्दुःखं दृष्ट्वैर्न बाध्यते ॥८८॥ तथा विगलिताविद्यो व्यवहारपरोप्यलं ॥ सम्यग्दृष्टिः सदाचारो मुदमेत्यंतरात्मना ॥८९॥ छिद्यते न निकृत्तांगो गलदश्रुर्न रोदिति ॥ दह्यते न प्रदग्धोपि न विनष्टोपि नश्यति ॥९०॥ व्यपगतसुखदुःखसन्निपातो विधिविधुरेष्वपि संकटेष्वखिन्नः ॥ विलसत्तु सदने पुरोन्तमेवाविततगिरौ विपिने तपोवने वा ॥९१॥ मोक्षोपायेषूपशमप्रकरणे वैराग्योपदेशः सर्गः ॥७४॥

स्थैर्यातिशयमाह छिद्यत इति ॥ नष्टः विनष्टे देहेपि ॥९०॥ अखिन्नः मनोनाशपर्यंतं भूमिकाप्रतिष्ठितः पुरुषधौरेयः विधिना प्राक्तनप्रारब्धफलेन कर्मणा विधुरेषु भोगप्रत्यनीकेषु दारिद्र्यादिषु मांद्यव्यवच्छलाधिरोहणादिसंकटेषु वा पुरोत्तमे सदने वा विततगिरौ विपिने तपोवने वा निवसतु तथापि सदा व्यपगतसुखदुःखसन्निपातत्वात्तेन मनागपि सांसारिकैर्हर्षशोकैः स्पृश्यत इत्यर्थः ॥९१॥ इति श्रीवा०ता०प्र०उ०चतुःसप्ततितमः सर्गः ॥७४॥

महत्त्वप्यधिकारेषु हर्षशोकाद्यसंगिनः॥ इहोक्तावदवो मुक्ताः देवासुरनारादयः॥ जनको वैदेहः॥१ २। निरंजनतया रागादिकालुष्यरहितया बुद्ध्या प्रबुद्धो मनुः। ३ विचित्राणि बलानि सैन्यानि बाहुबलानि च येषु तथाविधेषु युद्धेषु॥४। सतत यथार्थमिव संस्थितिं व्यवहारं सः दिवसानां पाताललनिवासाय हरिणा निर्मितानां स्थितिं पालनमिति वा॥ ५। देवैः सहद्वंद्वयुद्धे मर्यादायुक्रमे वा परा सतत रः नानाविधानां देवासुरावरणानां विचारेषु विमर्शेषु॥ ६। संगरयुद्धं॥ ७। निराक्रोशं वाचामगोचरं

श्रीवसिष्ठ उवाच॥ जनकः संस्थितो राज्ये व्यवहारपरोऽपि सन्। विगतज्वर एवांतरनाकुलमतिः सदा॥ १॥ पितामहो दिलीपस्ते सर्वारंभपरोऽप्यलं वीतरागतयैवांतर्बुभुजे मेदिनीं चिरं॥ २। निरंजनतया बुद्ध्या जनतां पालयं श्चिरं। जीवन्मुक्ताकृतिर्नित्यं मनुराज्यमपालयत्॥ ३। विचित्रबल युद्धेषु व्यवहारेषु भूरिषु। मांधाता सुचिरं तिष्ठन्प्राप्तवान्वै परं पदं॥ ४। बलिः पातालपीठस्थः कुर्वन्नादिवसं स्थितिं। सदात्यागी सदासक्तो जीवन्मुक्त इति स्थितः॥ ५॥ नमुचिर्दानवाधीशो देवद्वंद्वपरः सदा। नानाचारविचारेषु कचिन्नांतर लिप्यत॥ ६॥ वासवाजौ तनुत्यागी वृत्रो वितत मानसः॥ अंतः शांतमना मानी चकार सुरसंगरं॥ ७। कुर्वन्दानवकार्याणि पातालं पालकः॥ अनपायिनिराक्रोशं प्रह्लादो ह्लादमागतः ८। शंबरैकपरोऽप्यंतः शंबरैकतयोदितः। संसारशंबरं राम शंबरस्त्यक्तवानिदं॥ ९॥ असक्तबुद्धिर्हरिणा कुर्वन्दानवसंगरम्। परमं विरमासाद्य कुशलस्त्यक्तवानिदं। १०। सर्वामरमुखो वह्निः क्रियाजालपरोऽपि। यज्ञलक्ष्मीश्चिरं भुंक्ते मुक्त एवेह तिष्ठति॥ ११। पीयमानः सुरैः सर्वैः सोमः स्वमरसायनः। क्वचिद्देति नमः संगमाक्रांतोंऽबरं यथा॥ १२॥ बृहस्पतिर्देवगुरुर्दारार्थं चंद्रयोध्यपि॥ आचरन्वि विचित्रेहां मुक्त एव व्यवस्थितः। १३ शुक्रोंबरतलद्योती बुधः सर्वार्थपालकः। निर्विकारमतिः कालं नयत्यसुरदैशिकः १४

ह्लादं सुखं। ८ शंबरं मायातदेकपरोऽपि अंतः शंबरं हार्दं चिदाकाशस्तदेकतया उदितः आविर्भूतः। ९ कुशलः स एव अन्यो वा कुशलनामा दानवः॥ १० ११ समं अस्तैव रसायनं पुनरुज्जीवनामृतमंतर्यस्य संगमसुखदुःखादिसंसर्ग आक्रांतोऽपि ग्रामाक्रमेणोऽंबरमाकाशं १२ दारार्थं चित्रां इहां देवपौरहित्याधिकारचेष्टां। १३ बुधो विद्वान् नीतिशास्त्रप्रण

नल



॥१

जगंति ऊर्ध्वभुवनानि भूतगणा एतानां प्राणिनिकायानामंगणानि च। २५ लोकानां प्राणिनां आजवं जवीभावाः ऊर्ध्वाधोमध्यगतिभिः परिवर्तास्तत्र मुक्ताः मोहेगाश्च तद्वृत्तोऽपि आततं द्विपरार्द्धकालविस्तीर्णं। २६ मुक्तो नित्यमुक्तोऽपि। २७ इवकारेण नसकामुकः नापि सा कामिनी किंतु ब्रह्म ब्रह्मविदेव तेइति ध्वनितं १८। २९ गहनधी र्वि विद्दुःखं गाहबुद्धिः॥ २० भृंगी शोक भृंगिरिटिः शिवगणविशेषः॥ सहि देवीमनादृत्य शिवस्यैवाराधनपरः कुपितया देव्या मांसभागतमांसास्थिमयदेहस्सन् स्वीयं मांसभागंप

जगद्भूतगणायानि चिरं संचारमन्वपि। सर्वदा सर्वसंचारी मुक्त एव समीरणः। २५ लोकाजवंजवीभावप्रोद्वेगज्ञोऽप्यखिन्नधीः। ब्रह्मा समस्तमनार मक्षिप्यत्यास्मरागततं॥ २६ जरामरणयुद्धादि द्वंद्वसंगरलीलया॥ चरतीह चिरं कालं मुक्तोऽपि भगवान्हरिः॥ २७ मुक्तेनापि त्रिणेत्रेण सौंदर्यत रुमंजरी। देहार्द्धे धार्यते गौरी कामुकेनेव कामिनी॥ १८ मुक्तयापि गले बद्धो गौर्या गौरस्त्रिलोचनः। संशुद्धरवमुक्तानां हारः शशिकलामलः॥ १९ गुहोगहनधीर्वीरस्तारकादिरणक्रियां॥ मुक्तोऽपि कृतवान्सर्वज्ञानरत्नैकसागरः॥ २०। भृंगीशोरक्तमांसं संत्यक्त्वा स्वमात्रे प्रवितीर्ण वान्मुक्त एव धिया राम धीरया ध्यानधौतया २१ मुनिर्मुक्तस्वभावोऽपि जगज्जंगलखंडकं। नारदो विजहारेमं शीतया ध्यानशीलया २२ जीवन्मुक्तमना मान्यो विश्वामित्रोऽप्ययं प्रभुः वेदोक्तामरनिर्माणक्रियां समधितिष्ठति॥ २३ धारयत्यवनीशेषः करोत्यर्को दिनावलीं यमो यमत्वं कुरुते जीवन्मुक्ततयैव हि। २४ अन्येऽप्यस्मिंस्त्रिभुवने यक्षासुरनराः सुराः शतशो मुक्ततां याताः संगासत्तिष्ठंतिसंसृतौ २५ संस्थिता व्यवहारेषु विचित्राचारधारिषु॥ अंतराशीतलाः केचित्केचिन्मूढाः शिलासमाः॥ २६ परमं बोधमासाद्य केचित्काननमागताः यथा भृगुभरद्वाजविश्वामित्रशुकादयः। २७

राहुस्त्वयाचितः स्वमात्रे स्वेच्छया सं रक्तमांसं उत्कृत्य ददौ इति पुराणेषु प्रसिद्धं। २१ कार्मकलहकौतुकप्रवर्तनं तच्छीलया २२ २३ यमत्वं दंडनं। २४ २५ विचित्रशोकमोहाद्यनर्थप्रमंजकेषु पुत्रदारधनभृत्यादिसंग्रहपूर्वकयुद्धवधबंधाद्याचारधारिषु विराज्यादिव्यवहारेषु संस्थिताः अंतः आशीतलाः केचिन्मूढाः २६ केचित् विक्षेपनिवृत्त्यर्थं काननमाश्रिताः तानुदाहरति यथेत्यादिना। २७।

२८ ग्रहनक्षत्रादीनां धिष्ण्यामाधारस्तं तं ज्योतिश्चक्रं तदंतरे स्थिताः मुनीश्वराः सप्तर्षयः २९ ३० ३१ तिर्यग्योनिषु गरुडहनुमज्जाम्बवदादयः ३२ ननु सात्त्विकतमला स्वभावतोऽभिव्यक्तज्ञानैश्वर्येषु देवयोनिषु कथं सर्वाः संभवंतीति चेत्सर्वशक्तेरीश्वरस्य सर्वभावेन सर्वत्र सर्वप्रकारेण सर्वदा स्थितत्वात्सर्वात्मना तत्प्रादुर्भावसंभावितत्वात् हस्तस्यापि दर्शनान्नासंभावना कापि कस्य चित्किंचित्कार्यं स्यादिति सर्वमिति ३३ उक्तार्थं स्पष्टमाह विधेरिति। ३४। कोसौ विधिस्तमाह विधिरिति। आद्यो विधिपदं विरि

मि॰छं॰ति केचिद्राज्येषु तिष्ठंति छत्रचामरपालिताः यथा जनकशर्यातिमांधातृसगरादयः २८ केचिद्व्योमनि तिष्ठंति धिष्ण्यचक्रांतरस्थिताः यथा बृहस्पत्युशनश्चंद्रसूर्यमुनीश्वराः २९ केचित्सुरपदं याता विमानावलिमास्थिताः यथाग्निवायुवरुणयमतुंबुरुनारदाः केचित्पातालकुहरे जीवन्मुक्ता व्यवस्थिताः यथा बलिसुहोत्रांधप्रह्लादाहादरश्वकाः ३१ तिर्यग्योनिष्वपि सदा विद्यंते कृतबुद्धयः देवयोनिष्वपि प्राज्ञा विद्यंते सर्वबुद्धयः ३२ सर्वं सर्वेण सर्वत्र सर्वथा सर्वदैव हि संभवत्येव सर्वात्मन्यास्मन्याततरूपिणि ३३ विधेर्विचित्रा नियतिरनंतारंभमंथरा सन्निवेशांशवैचित्र्यात्सर्वं सर्वत्र दृश्यते ३४ विधिर्दैवं विधिर्धाता सर्वेशः शिव ईश्वरः इति नामभिरात्मातः प्रत्यक्चेतन उच्यते ३५ असत्यवस्तुनि वस्त्वंतः कांचनं सिकतास्विव अस्तिवस्त्वन्यवस्त्वंतर्मलं हेमकणोष्विव ३६ अयुक्ते युक्तता युक्त्या प्रेक्ष्यमाणा प्रदृश्यते पापस्य हि भयाद्वीरो कोरामधर्मे प्रवर्तते ३७ असत्ये सत्यता साधो

५ शाश्वती परिलक्ष्यते शून्येन ध्यानयोगेन शाश्वतं पदमाप्यते ३८

ची द्वारा द्वितीयं विसृष्टारा परमात्मनो नामेति न पौनरुक्त्यं॥नः अस्माकं सर्वेषामात्मा अंतर इति पाठे तु कोशपंचकांतस्थः चिच्छक्तिशबलत्वाच्चेतनः ३५ यत्रात्यंतमसंभावित अपि वस्त्ववस्तुनी परस्परांतः संभाविते तत्र किमन्यदसंभावितं स्यादित्याशयेनाह। असतीत्यादिना ३६ अत्यंतायुक्ते पापेपि फलतो भीषणतया धर्मे पुरुषप्रवर्त्तकता लक्षणो महान्गुणो युक्त्या विमर्शे दृश्यत इत्यर्थः॥३७ फलतः सत्यता सर्वशून्यता ध्याने ध्यानसाक्षिणः प्रकाशात्मनो दुरपह्नवत्वात् थादेवयथार्थतन्मात्रपरि शेषसिद्धेरिति भावः ३८ 

MEMORIAL

---

शंबरस्थितौ सेंद्रजालिकसर्गे। ३९। वज्रसाराः येषां कदाप्यसंभावितः स्वयस्तेपीत्यर्थः ४० प्रासंगिकस्य। असंभाविसंभवोपपादनस्यापि प्रकृतमेव फलं दर्शयन्नुपसंहरतिइतीति। ४१। ४२। नन्वेवं सति विदेहमुक्तावपि पुनः संसारप्राप्तिः संभाविता स्यात्तत्राह मुक्ताविति हि यस्मात्तत्र कोटयः। विवेकस्य असंभाव्यत्वमविवेकस्य तत्त्वज्ञानस्य प्रवृत्तौ अज्ञानदशायामेवात्यंतासंभावितानर्थकोटिसंभावनं तत्क्षणोन्मग्नाः न मुक्तौ। तन्मज्ज्जननिमित्तज्ञानस्य नष्टत्वादिति भावः। ४३। नित्यप्राप्तात्मरूपत्वादपि मुक्तेनीपा

यन्नास्तीति तदुदेत्यासु देशकालविलासतः शशकाः शृंगवंतो हि दृश्यंते शंबरस्थितौ ३९ ये वज्रसाराः सुदृढा दृश्यंते ते क्षयं गताः कल्पस्यांते यथेंद्रार्कधराब्धिविबुधादयः। ४० इति पश्यन्महाबाहो भावाभावमयक्रमं हर्षामर्षविषादेहाः संत्यज्य समतां व्रज ४१ असत एव भातीह सदसच्चापि दृश्यते आस्थानास्थे परित्यज्यातो नाशु समतां व्रज ४२ मुक्तौ राघव लोकेस्मिन्न प्राप्तिः संभवत्यलं अप्रवृत्तौ विवेकस्य मग्ना हि जनकोटयः। ४३ मुक्तौ राघव लोकेस्मिन्प्राप्तिरस्ति सदैव हि प्रवृत्त्या हि विवेकस्य विमुक्ताः शतकोटयः। ४४। प्रविवेकाविवेकाभ्यां मुलभालभ्यतां गता मुक्तिर्मनः स्वयप्राप्या विवेकं तेन दीपय ॥ ४५ आत्मावलोकनेयत्नः कर्त्तव्यो भूतिमिच्छता सर्वदुःखशिरश्छेद आत्मालोकेन जायते ४६ नीरागा निरुपासंगा जीवन्मुक्ता महाधियः संभवंतीह बहुशः सुहोत्रजनकादिव ४७ तस्मात्त्वमपि वैराग्यविवेकोदितधीरधीः जीवन्मुक्तो विहरभो समलोष्टाश्मकांचनः। ४८ द्विविधा मुक्तता लोके विद्यते देहधारिणां सदेहैका विदेहान्या विभागो यं तयोः शृणु। ४९

यशंकास्ति विस्रस्तकंठः चामीकरवद्विवेकमात्रेण तद्वाभादित्याह मुक्ताविति ४४ प्रविवेकात्सुलभापि अविवेकादलभ्यतां गता मुक्तिः ४५ भूतिं मुक्तिमिच्छता ४६ सर्वकालिकानां जीवन्मुक्तिसंभवे पि नेदानींतनानां तासंभाविते त्याशंकां वारयति नीरागा इति निरुपासंगा निरभिनिवेशाः इहास्मिन्नपि काले ४७ ४८ इदानीं जीवन्मुक्तिविदेहमुक्त्योर्भेदं निमित्तं वक्तुमुपक्रमते द्विविधेत्यादिना ४९

वा॰टी॰उप॰ २१६ तरो

तत्रादौ उभयसाधारणमुक्तिशब्दार्थं दर्शयति असंगादिति ॥ ५० ॥ तत्रोपपत्तिमाह स्नेहेति । स्नेह आत्मात्मभ्रमात् प्रीतिस्तत्संक्षयं ॥ ५१ ॥ ५२ ॥ साधनचतुष्टयमध्ये यत्नेन सर्वसिद्धौ तत्र रजयेपि यत्नः कर्तव्यः प्रमाणानां स्वयं प्रमेयतत्त्वावधारणानुकूलानां तर्कं ॥ ५३ ॥ युक्त्यान्वितो यत्न आत्मतत्त्वाध्यवसायपर्यंतं कार्यो न सहसा येन निर्वेदादंतराले यत्नोपरमेण तु नरात्मा अनर्थवशे कार्य इत्याह इत्याह नत्विति ॥ अनवध्यवसायस्य अनवध्यवसाये सति येनाफलपर्यंतं प्रयत्नानुपरमेन दृढनिश्चयवता चिरसिद्धय इति मति प्रति बंधे बहुभिर्जन्मभिर्वा सिद्धिमुद्दिश्येत्यर्थः ॥ ५५ ॥ यत्स्वयं ज्योतिरात्ममात्रपरिशेषाख्यं पदं सुगतो बुद्धः शोभनविवेकगतः कपिलश्च बहुविचार्याध्यवसातुमसामर्थ्याद्यस्मादपगतः सन् आत्मनः । अर्हवतां क्षणिकविज्ञानसंतानात्मतां गुणत्रयसाम्यावस्थालक्षणं प्रधानं पदं च

असंसंगात्पदार्थानां मनःशांतिर्विमुक्तता ॥ सत्यसत्यपि देहे सा संभवत्यनघाकृते ॥ ५० ॥ स्नेहसंक्षयमेवांग विदुः कैवल्यमुत्तमं ॥ तत्संभवति देहस्य भावे चाभाव एव च ॥ ५१ ॥ यो जीवति गतस्नेहः स जीवन्मुक्त उच्यते ॥ सस्नेहजीवितो बद्धो मुक्त एव तत्तीयकः ॥ ५२ ॥ यत्नो यत्नेन कर्तव्यो मोक्षार्थं युक्तिपूर्वकं ॥ यत्नयुक्तिविहीनस्य गोष्पदं दुस्तरं भवेत् ॥ ५३ ॥ न त्वनध्यवसायस्य दुःखाय विपुलात्मने आत्मा परवशः कार्यो मोहमाश्रित्य केवलं ॥ ५४ ॥ सुमहद्धैर्यमालंब्य मनसाध्यवसायिना ॥ विचारयात्मनात्मानमात्मनश्चिरसिद्धये ॥ ५५ वितताध्यवसायस्य जगद्भवति गोष्पदं ॥ यदपगातः सुगतः परो ॥ प्रधानेत्यदुपगतोऽर्हवतान्तपश्च कश्चित् ॥ यदुपगताः परमुत्तमं महांतः प्रयतनकल्पतरोर्महाफलं तत् ॥ ५६ ॥ मोक्षोपाये स्थि॰ प्र॰ मुक्तामुक्तविचारः सर्गः ॥ ७५ ॥

स्त उपगतः सर्वं कश्चित् वेदनिरकत्वाद्ग्राह्यनामा कश्चिदर्हतास्यो न्तपः क्षत्रियोपि यदपगतः सन् आत्मानं चित्स्वभावमभ्युपगम्यापि देहपरिमाणमत्वाभ्युपगमाद्हस्ति मशकशरीरानुप्रवेशे अवयवोपचयापचयापत्त्या अर्हवतां उपगत इत्यनुक्रमेणैव मिथ्यापदे तेनिमग्नाः महांतो वेदरहस्यनिष्णातास्तु उत्तमं सत्यादिलक्षणं यत्पदमुपगताः यथार्थतः प्राप्तवंतस्तत्महद्भिर्मत्वा तत्पदं वेदोक्तमार्गेण प्रयतनलक्षणस्य कल्पतरोर्महाफलमिति तत्रैवान्योपि प्रयतेतेत्यर्थः ॥ ५७ ॥ इतिश्रीवा॰ता॰प्र॰ उ॰ पंचसप्ततितमः सर्गः ॥ ७५ ॥ राम॰ २१६

इह संसारजलधिः स्त्रीवीचिरूपवर्ण्यते ॥ ततस्तत्तरणोपायश्रीरौद्री डायथा सुखं ॥ अविज्ञाततत्त्वप्रस्लानाः समुपायांत्याविर्भवंति ॥ अविवेकेन स्थैर्यं यांति ॥ अनेनार्थातन्त्र स्थित्योर्निमित्तेरविंशतं तन्निवृत्युपायमाह शाम्यंतीति ॥ २ ॥ भांतं जालसर्गमरीचिनां संबंधिनस्त्रसरेणव इव संख्यातुं न शक्यंते ॥ ३ ॥ हे कांते तिरा मसं बोधनं ॥ ४ ॥ परं अत्यंतं दुर्गमपारं यस्य ॥ ४ ॥ तमेव संसारसागरं वर्णयति यस्येत्यादिना ॥ अयं वक्ष्यमाणविविधविशेषणविशिष्टः संसारलक्षणः सागरः ॥ यस्य मोहांबुभरेण सृष्टौ स्नेनैव तन्निमग्ने नउत्तीर्यते चेदिति सम्भवेनान्वयः ॥ अगाधैर्मरणलक्षणैरावर्तैः कल्लोलैः कूटतरंगैश्च आकुलकोटरः ॥ ५ ॥ पुण्यान्येव डिंडीराः फेनाः अस्य वाडवो वडवानलः ॥ जलो

श्रीवसिष्ठ उवाच ॥ प्रस्लानाः समुपायांति जगंतीमानि राघव ॥ स्थैर्यं यांत्यविवेकेन शाम्यंत्येव विवेकतः ॥ १ ॥ तरज्ज्वालजलावर्तस्ववयोब्रह्मवारिधौ संख्यातुं केन शक्यंते भांसांस्त्रसरेणवः ॥ २ ॥ असम्यक्प्रेक्षणं विद्धि कारणं जगतः स्थितौ ॥ संसारशांतये कांत कारणं सम्यगीक्षणं ॥ ३ ॥ अयं हि परदुःपारो घोरः संसारसागरः ॥ विना युक्तिप्रयत्नाभ्यामस्माद्भ्रमन तीर्यते ॥ ४ ॥ यस्यायं सागरः स्रष्टो मोहांबुभरपूरितः ॥ अगाधमरणावर्तकल्लोलाकुलकोटरः ॥ ५ ॥ प्रभ्रमत्पुण्यडिंडीरो ज्वलन्तरकवाडवः ॥ तृष्णाविलोललहरिर्मनोजलमतंगजः ॥ ६ ॥ आलीनजीवितसरिद्भोगरत्नसमुत्करः ॥ क्षुब्धरोगोरगाकीर्ण इंद्रियग्राहघर्घरः ॥ ७ ॥ पश्यास्मिन्प्रस्तारामवीचयश्चारुचंचलाः ॥ इमाम्मुग्धांगनानाम्न्यः शिखराकर्षणक्षमाः ॥ ८ ॥ घट्टश्रीपद्मरागाढ्या नेत्रनीलोत्पलाकुलाः ॥ दंतपुष्पफलाकीर्णाः स्मितफेनोपशोभिताः ॥ ९ ॥ केशेंद्रनीलवलयाभ्रूविलासतरंगिताः ॥ नितंबपुलिनस्फीताः कंठकंबुविभूषिताः ॥ १० ॥ ललाटमणिपट्टाढ्या विलासग्राहसंकुलाः ॥ कटाक्षलोलगहनावर्णकांचनवालुकाः ॥ ११ ॥

द्रवीभूतं गजमदशोभया रोमेरा ॥ ६ ॥ आसमंताद्लीना उपक्षीणा जीवितसरितो यत्र इंद्रियग्राहैर्घर्घरः हतविक्षोभध्वनिः ॥ ७ ॥ तत्र स्त्रियो वीचितेन वर्णयति पश्येत्यादिना ॥ शिखरवद्वीराणामप्याकर्षणक्षमाः ॥ ८ ॥ घद्यरदनग्रहास्तश्रीमिश्रपद्मरागाढ्याः पुष्पफलैर्मुकुलैराकीर्णाः ॥ ९ ॥ कंठलसैः कंबुभिः शंखैर्विभूषिताः ॥ १० ॥ ललाटे लक्ष्मीर्मणिपट्टैः रत्नफलकैराढ्याः कटाक्षे लोलत्वाद्गहनागाढुरवगाहाः वर्णा देहकांतय एव कांचनवालुका यासां ॥ ११ ॥

१२।१३॥ आक्रम्यतत्स्वदर्शनेनबाधित्वा॥ अतएवतत्प्रमेयब्रह्ममात्रतांकृत्वागाहतेप्रविशतिप्रपंचमपितद्भावंनयतीतिभावः। १४। तरस्तुतत्त्वबोधानंतरंएतस्मिन्त्रस्त मापन्नेजगति॥१५॥ भवान्भव्योधन्यःयतस्त्वयातेनभाव्यतेनअधुनाअस्मिन्वयस्येव॥१६॥ गाहतेप्रविशतिब्रह्मेतिशेषः लोकोऽधिकारिजनः॥१७ सर्वंभोगान्उ पेक्ष्याइतिशेषः। यथागरुडेनामृताहरणात्सर्वंपन्नगाउपेक्षिताःपश्चान्मातृशापमोचनानंतरंनिःशंकंमुज्यंतेतद्वत्। १८। लोकेप्यथंराजकीयविभ्रंस्युपभो

सर्वं विलोलललहरीभीमात्संसारसागरात्॥ उत्तीर्यतेचेन्मार्गेननतत्परंपौरुषंभवेत्॥१२॥ सत्यांप्रज्ञामहानाविविवेकेमतिनाविके॥ संसारसागरादस्मा द्योनतीर्णोधिगम्यतं॥ १३॥ अपारावारमाक्रम्यप्रमेयीकृत्यसर्वतः॥ संसाराब्धिंगाहतेयःसएवपुरुषःस्मृतः॥१४॥ विचार्यार्थैःमहालो क्योधियासंसारसागरं॥ एतस्मिंस्तरनुक्रीडाशोभतेरामनान्यथा॥१५॥ इहभव्योभवान्साधोविचारपरयाधिया॥ त्वयाधुनैवतेनायंसंसारःप्र विचार्यते॥१६॥ भवानिवविचार्यादौसंसारमतिकांतया॥ सत्यायोगाहतेलोकोनेहासौपरिमज्जति॥१७॥ सर्वंधियाविचार्यैतेभोगाभोगिभय प्रदाः॥ भोक्तव्याश्चरमंरामगरुडेनेवपन्नगाः॥१८॥ विचार्यतत्त्वमालोक्यसेव्यंतेयाविभूतयः॥ ताउदर्कोदयाजंतोःशेषादुःखायकेव लं॥१९॥ बलंबुद्धिश्चतेजश्चदृष्टतत्त्वस्यवर्द्धते॥ सवसंतस्यवृक्षस्यसौंदर्याद्यागुणाइव॥२०॥ ज्ञानरसायनहृर्णसुशीतयाविमलयास मयासततंश्रिया॥ शिशिररश्मिरिवातिविराजसेविदितवेद्यमुखंरघुनंदन॥२१॥ सो॰श्लो॰ ७० संसारसागरसाम्यप्रतिपादनंसर्गः॥१६॥ श्रीरामउवाच॥ समासेनमुनेभूयोदृष्टतत्त्वचमत्कृतो॥ कथयोदारवृत्तांतंकलेवचसितष्यति॥१॥

गेन्यायःप्रसिद्धइत्याहविचार्येतितत्त्वंराज्यप्रसादानुग्रहादिरहस्यं॥१९ तत्त्वबोधोत्तरमेवभोगजरणोपपादकविशेषणसंपत्तिर्नस्वंभिति दर्शयति॥२०॥ रामस्यभोगजर णासामर्थ्याशंकावारणायतत्त्वबोधसंपत्तिंदर्शयतिघनेति। हेरघुनंदनत्वंविदितवेद्यतयाहेतुनाइत्थंभीघनेनरसायनेनआनंदामृतेनपूर्णयासुशीतयानिरस्तत्रिवि धतापयाश्रिया। शिशिररश्मिःपूर्णचंद्रइव॥ अतिविराजसे। चंद्रपक्षेसमयाअमितःपूर्णमंडलत्वादवक्रया॥२१॥ इतिश्रीवासिष्ठतात्पर्यप्रकाशे॰ षट्सप्ततितमःसर्गः॥७६॥
बलमिति



धार्यामंदभमालेवविबुधैःशिरसोरसा॥ जीवन्मुक्तगुणोर्मोलावसिष्ठेनाचरुंपद्यतेसमासेनात॥ तत्रतत्रोक्तानामेकत्रसंग्रहेण। उदारंदृत्तांतंचरित्रं लक्षणभूतान्गुणानितियाव त्॥१॥ इदंसंग्रहरूपं॥२॥ व्यवहारदशायांसुषुप्तवत्तमोमात्रं परमार्थदशानुबाधितानुवृत्तिमात्रत्वात्स्वप्नवदुपमिव॥३॥॥४॥ आरंतंप्रथमंवस्तुनाशिनाउपात्तंपश्चात्पालिनापरही तमपिधनवस्त्रालंकारादिपिपासानोपास्तेआदिकर्मणिनिष्ठाअतएवतादेशानिहित॥५॥ (जनतायाःक्रमंव्यवहारः॥) असंगोदासीनात्मसन्निधिमात्रप्रवृत्तत्वात्का

श्रीवसिष्ठउवाच॥ जीवन्मुक्तस्यबहुधाकथितंलक्षणंमया॥ भूयोपित्वंमहाबाहोकथ्यमानमिदंशृणु॥२॥ सुषुप्त वदिदंनित्यंपश्यत्यपगतैषणः॥ असद्रूपमिवासक्तंसर्वत्राखिलमात्मवान्॥३॥ कैवल्यमिवसंप्राप्तःपरिसुप्तमना इवघूर्णमानइवानंदीतिष्ठत्यधिगतात्मदृक्॥४॥ नादत्तमप्युपादत्तेगृहीतमपिपालिना॥ अंतर्मुखतयोदात्तरूप मास्तमयाधिया॥५॥ यंत्रपुत्रकसंचारःशांतमेजनताक्रमं॥ अंतःसंलीनयादृष्ट्यापश्यन्हसतिशांतधीः॥६॥ नापेक्षतेभविष्यंचवर्तमानेनतिष्ठति॥ नसंस्मरत्यतीतंचसर्वमेवकरोतिच॥७॥ सुप्तःप्रबुद्धोभवतिप्रबुद्धो पिचसुप्तवान्॥ सर्वकर्मकरोत्यंतर्नकरोतिनकिंचन॥८॥ अंतःसर्वपरित्यागीनित्यमेतरनैषिणः॥ कुर्व न्नपिबहिःकार्यंसममेवावतिष्ठते॥९॥ बहिःप्रकृतसर्वेहोयथाप्राप्तक्रियोन्मुखः॥ स्वकर्मकर्मसंप्राप्तबंधुका र्यानुवृत्तिमान्॥१०॥

छादिप्रतिमासंचारसदृशइतिपश्यन् ६ नतिष्ठतिनआस्थांकरोति ७। व्यवहारविषयेसुप्तप्रयोपिस्वात्मनिप्रबुद्धोभवतियानिशासर्वभूतानांतस्यांजागर्तिसंयमी तिभगवद्वचनं व्यवहारेप्रबुद्धःकुशलतमोपिसुषुप्तवानेवानेनतत्कौशलफलेनरत्यतइत्यर्थः ८ अतएवतस्यसदैवसमास्थितिरित्याहअंतरिति॥९॥ स्वकर्मततद्देहवर्णा श्रमोचितंकर्मपितृपितामहादिक्रमसंप्राप्तराज्यादिबंधुकार्याणिदानमानादीनिचतन्मात्रानुवृत्तिमान् १०

समस्ताः सुखभोगाः । आत्मैव यस्य समस्तानां सुखभोगानां स्वयमात्मेति वा । अत एवाज्ञदशाभोगकाले सर्वविषयाशासु संस्थित आस्थावानिव भाति नाज्ञवद्भोक्तृत्वाभिमानेने
त्यर्थः ॥ ११ ॥ कर्मसु प्राप्तमिष्टानिष्टफलमिति शेषः ॥ १२ ॥ अनुबंध आनुकूल्यं प्रातिकूल्याचरणं तत्परे ॥ १३ ॥ १४ ॥ पूर्वोक्तबालादिसमवृत्तेर्योऽविशेषस्तमाह प्रवृत्ते
ति प्रवृत्ता वाग्यस्य तथाविधः सन् पुण्याः कथाः कथयति न बालादिवद्वृथा प्रलापीत्यर्थः । एवमन्यदप्यूह्यं । पुण्यानि कीर्तनानि चरित्रवर्णनानि लोके यस्य ॥ १५ 

समग्रसुखभोगात्मा सर्वाशास्विव संस्थितः । करोत्यखिलकर्माणि त्यक्तकर्तृत्वविभ्रमः ॥ ११ ॥ उदासीनवदासीनः प्रकृतकर्मकर्मसु नाभि
वांछति न द्वेष्टि न शोचति न हृष्यति ॥ १२ ॥ अनुबंधपरे जंतावसंसक्तेन चेतसा । भक्ते भक्तिसमाचारः शठे शठ इव स्थितः ॥ १३ ॥ बालो बाले
षु वृद्धेषु वृद्धो धीरेषु धैर्यवान् । युवा यौवनवृत्तेषु दुःखितेष्वनुदुःखितः ॥ १४ ॥ प्रवृत्तवाक्पुण्यकथो दैन्यापहृदपगताशयः । धीरधीरुदि
तानंदः पेशलः पुण्यकीर्तनः ॥ १५ ॥ प्राज्ञः प्रसन्नमधुरः पूर्णः स्वप्रतिमोदये । निरस्तखेददौर्गत्यः सर्वस्मिन्स्निग्धबांधवः ॥ १६
उदारचरिताकारः समः सौम्यसुखोदधिः । सुस्निग्धः शीतलस्पर्शः पूर्णचंद्र इवोदितः ॥ १७ ॥ न तस्य सुकृतेनार्थो न भोगैर्न च कर्मभिः
न दुष्कृतैर्न भोगानां संत्यागेन न बंधुभिः ॥ १८ ॥ न कार्यकारणारंभैर्न निःकृततया तथा । न बंधेन न मोक्षेण न पातालेन नो दि
वा ॥ १९ ॥ यथावस्तु यथादृष्टं जगदेकमयात्मकम् । तदा बंधविमोक्षाणां न क्वचित्कल्पनं मनः ॥ २० ॥ सम्यग्ज्ञानाग्निना यस्य द
ग्धाः संदेहजालिकाः । निःशंकमलमुड्डीनं तस्य चित्तविहंगमः ॥ २१ ॥

सर्वस्मिन्जने ॥ १६ ॥ शीतलः सर्वतापापहारी स्पर्शः संगतं यस्य न दुष्कृतैरिति निषिद्धाचरणपरिहारार्थं । अत एव भोगानामनिषिद्धानां ॥ १८ ॥ अवश्यकार्याणामैहिका 
मुष्मिकफलकारणानां कर्मणामारंभैः निःकृततया भावेक्त्या । निःक्रियतयेति वा पाठः दिवा स्वर्गेण ॥ १९ ॥ बंधानां सांसारिकसुखानां विमोक्षाणां सर्वदुःखतत्कारणनि
वृत्तीनां च मध्ये न क्वचित्कल्पनं कार्पण्ययुक्तं मनो भवतीत्यर्थः ॥ २० ॥ संदेहलक्षणाः जालिकाः पंजरा तथा च मतिमनसि कार्पण्यसंभावना स्यात्तदेव तस्य नास्तीत्यर्थः ॥ २१

---

समरसंभ्रमी सत्तं ॥ २२ ॥ मनसो भावे कथं कायचेष्टाद्युपपत्तिस्तत्राह मंजूषायामिति । दोलासुखशय्यायामित्यर्थः । तस्य हि स्वानंदाविर्भावोद्भासादेवांगचलनं तत्र यथा महाराजो वा
महात्मा श्लेषो वा महाकुमारो वा अतिप्रीमानंदरसं गत्वा शयीते तितिक्षा स्यादि प्रसिद्धमीश्वरस्य तद्वत् ॥ २३ ॥ अनुपादेयबुध्या नियमेन कृताकृतं स्मारि कायाः क्रियाफलोपादेय ता बुद्धे
रभावादित्यर्थः ॥ २४ ॥ सर्वमित्यादि वालपक्षे योज्यं ॥ २५ ॥ कार्यसंप्रयुक्ताभ्यां ॥ २६ ॥ अर्थे बाह्यार्थे सत्तां सत्यताबुध्या आस्थां । अत एव न फलान्यनुधावति ॥ २७ ॥ उपसमी

यस्य भ्रांतिविनिर्मुक्तं मनः समरसंस्थितं । नास्तमेति न चोदेति व्योमवत्सर्वदृष्टिषु ॥ २२ ॥ मंजूषायां निषण्णस्य यथा बालस्य चेष्टितं ॥ अंगा
वल्यनुसंधानवर्जितं देहस्यैव तथा ॥ २३ ॥ पूर्णेक्षीव द्वावनेदीमंदीमत पुनर्भवः ॥ अनुपादेयबुध्या तु न स्मरत्यकृतं कृतं ॥ २४ ॥ सर्वं सर्वप्रकारे
णाग्रहातिच जहातिच ॥ अनुपादेयसर्वार्थो बालवच्च विचेष्टते ॥ २५ ॥ सति चान्नपि कार्येषु देशकालक्रियाक्रमैः ॥ न कार्यसुखदुःखाभ्यां
मनागपि हि गृह्यते ॥ २६ ॥ बहिः प्रकृतसर्वार्थोऽप्यंतः पुनरनीहया ॥ न सत्तां योजयत्यर्थे न फलान्यनुधावति ॥ २७ ॥ नोपेक्षते दुः
खदर्शी न सुखाशामपेक्षते ॥ कार्येऽदये नैति मुदं कार्यनाशे न खिद्यते ॥ २८ ॥ अपि शीतरुचावर्के सुतप्ते पीडुमंडले ॥ अप्यधः प्रस
रत्यग्नौ विस्मयोऽस्य न जायते ॥ २९ ॥ चिदात्मन इमा इत्थं प्रस्फुरंतीह शक्तयः ॥ इत्यस्याश्चर्यजालेषु नाभ्युदेति कुतूहलं ॥ ३० ॥ न दया
दैन्यमादत्ते न क्रौर्यमनुधावति ॥ न लज्जामनुसंधत्ते नालज्जत्वं च गच्छति ॥ ३१ ॥ न कदाचन दीनात्मा नोद्धतात्मा कदाचन ॥ न प्रमत्तो न
खिन्नात्मा नोद्विग्नो न च हर्षवान् ॥ ३२ ॥ नास्य चेतसि स्फुर्जत्यारे शरदंबरनिर्मले ॥ कोपारयः प्रजायंते नभसीव वनांकुराः ॥ ३३ ॥ अनारतपतज्ज्ञा

अग्निशिखासु पिदुःखदर्शी नेक्षते ॥ २८ ॥ अर्के शीतरुचौ जातेऽपि इंदुमंडले तु | तमस्तायां जगतः स्थितौ ॥ क्व कथं किल का सोऽस्याः तु खिताऽसुखिता भवा ॥ १४
तप्तेऽसंपन्नेऽपि अग्नौ अधः अधोमुखे प्रतपति सत्यपि अस्य विस्मयः आश्चर्यबुद्धिर्न जायते ॥ २९ ॥ न नु कुतो न जायते तत्राह चिदात्मन इति शक्तयो मायाः ॥ ३० ॥ लज्जा अपमानभेदस्य
चर्यादौ अकार्ये लज्जात्वं न गच्छति ॥ ३१ ॥ ३२ ॥ ३३ ॥ अनारतमविरतं पतंति म्रियंते जातान्युत्पन्नानि च मृतानि प्राणिनो यस्यां अथ चैव नित्यजातं नित्यं वा मन्यसे मृतमिति भगवद्दर्शित

वा·टी·उप· २१९ उक्तं दृष्टान्तेन समर्थयति। फेनानीति तरंगप्रयुक्ते। आवर्जवजवीभावे भ्रमणे इदं सुखदुःखादिकं कुतो वा॥ अतः सुखदुःखयोः कः प्रसंगः॥ ३५॥ न विशीर्यंतीति न नश्यंति न खिद्यंति विनोद्यंति न जायंते न हृष्यंतीत्यर्थः प्रातिभासिकस्य जगतो दृढस्थिरेव स्थितत्वं पश्यमानाः अहमेवात्मनि जागन्मायां सृजामीति पश्यंतो जीवन्मुक्ताः॥ ३६॥ किंच। प्रतिक्षणपरिणामिनो हि सर्वे भावा इति न्यायात्प्रतिक्षणं भिद्यमानेषु जगद्धर्मेषु अनुवर्तमानः स्थायी सदात्मा स एव स्वात्मन्येव दृश्यान् षड्भावविकारान्प्रतिक्षणं कल्पयन्पश्यतीत्येवं तेषां निश्चये कुतो हर्षादिप्रसक्तिरित्याशयेनाह निमेषमित्यादिना। वीप्साद्योती प्रतिशब्दः। कर्मप्रवचनीयः। द्विर्वचनाव्ययीभावयोरन्यतरस्यावश्यंप्राप्तेस्तत्करणं छांदसं॥ ३७

फेनार्जवं जवीभावे जलेऽभ्रतत्क्रमे तथा। क्व किलेदं कुतः कोऽतः प्रसंगः सुखदुःखयोः॥ ३५॥ भावाभावैरपर्यंतैरजस्रं जंतुसंभवैः। न विशीर्यंति नोद्यंति दृढस्थिरस्थितिक्षमा नराः॥ ३६॥ निमेषं प्रति यामिन्यां यथान्याः स्वप्नदृष्टयः। क्षणोत्पत्तिविनाशिन्यस्तथैता लोकदृष्टयः॥ ३७॥ अनारतसमुत्पन्नस्वनारतविनाशिनि। कः क्रमोदग्धसंसारे कारुण्यानंदयोरिह॥ ३८॥ शुभाभावात्सुखाभावे स्थितिं याते विलक्षणाः। कीदृश्याः कथमायाताः क्व वा ता दुःखसंविदः॥ ३९॥ सुखसंवेदनांतोत्था स्वबीजं वितनोति या। शांता दुःखदशा सेयं कथमंतर्हिते सुखे॥ ४०॥ क्षीणाभ्यां सुखदुःखाभ्यां हेयोपादेययोः क्षये। ईप्सितानीप्सिते क्वास्तो गलिते च शुभाशुभे॥ ४१॥ रम्यारम्यदृशो नाशाद्याते भोगाभिवांछने। नैराश्ये संततप्रौढे हिमवद्विगलेन्मनः॥ ४२॥ आमलान्मनसि क्षीणे संकल्पस्य कथा च का। तिले स्थिता तिरग्धेषु तैलस्य कलना कुतः॥ ४३॥

क्रमशोक्रमः प्रसंगः॥ ३८॥ किंच शुभफलेषु प्रसिद्धेषु सत्सु तद्विरोधिनः पुत्रवियोगदुःखादयः परं लभेरन् जीवन्मुक्तानां शुभस्यैवाभावादुभयाप्रसक्तिरित्याह शुभाभावादिति विलक्षणाः शुभफलेभ्यो विलक्षणाः। किं चान्यानि पूर्ववत्॥ ३९॥ या दुःखदशा सुखसंवेदनस्य सुखानुभवस्य अंते उत्थाय लब्धसत्ताका सती स्वबीजं सत्कार्यं शोकमोहादि वितनोति विस्तारयति सेयं दुःखदशा शुभकर्माभावाच्छांते सुखे स्वयमपि शांतैवेति निर्हेतुका कथं संभवेदिति पूर्वश्लोकार्थस्यैव स्फुटीकरणं॥ ४०॥ किंच तत्तत्राह रम्येति॥ याते अपगते सति नैराश्ये प्रौढे सति॥ ४२॥ अस्तु मनोनाशस्तत्रापि किं तत्राह आमलादिति॥ ४३॥ राम· २१९

भावेषु

अभावघनभावनयात्मव्यतिरिक्तं नास्त्येवेति दृढनिश्चयेन सर्वेषु दृश्यपदार्थेषु निर्मुक्तसंकलनं निःसंकल्पविकल्पं यथा स्यात्तथाऽम्बरवत्स्वात्मस्वभावेन स्थितेषु सत्सु परिच्छेदहेत्वभावाद्वितते करूपी महात्मा ज्ञः नित्यतृप्तः सन् तेनैव निरतिशयानंदात्मना मुदित आनंदी हन् जाग्रत्स्वप्नयोर्यथाप्राप्तार्थालोचनमात्ररूपं चित्तं प्रति तिष्ठति तत्र च भावेषु सुषुप्तौ स्वपितीत्यवस्थात्रयेऽप्येवं जीवतीत्यर्थः॥ ४५॥ इति श्री· उपशमप्रकरणे सप्तसप्ततितमः सर्गः॥ ७७॥ चित्तस्पंदात्मना भ्रांतिश्चित्तस्पंदस्य यादृशः योगश्च तन्निरोधार्थः सम्यगत्र निगद्यते॥ अलातस्य ज्वालदुल्मुकस्य परिस्पंदात् भ्रमणात्॥ रात्रौ अग्निमयं चक्रमात्मा यथा दृश्यते इत्यर्थः॥ १॥ वर्तुलः नानाम्नाकारः आवर्तः

भावेष्वभावघनभावनया महात्मा निर्मुक्तसंकलनमंबरवत्स्थितेषु॥ चित्तं प्रति स्वमुदितो विततैकरूपी जाग्रति तिष्ठति स्वपिति जीवति नित्यतृप्तः॥ ४४॥ मोक्षोपाये उपशमप्रकरणे जीवन्मुक्तस्वरूपवर्णनं सर्गः॥ ७७॥ श्रीवसिष्ठ उवाच॥ यथालातपरिस्पंदादग्निचक्रं प्रदृश्यते॥ असदेव सदाभासं चित्तस्पंदात्तथा भवेत्॥ १॥ यथा जलपरिस्पंदाद्व्यतिरिक्त इवांभसः। दृश्यते वर्तुलावर्तश्चित्तस्पंदात्तथा जगत्॥ २॥ यथा व्योम्नि क्षणस्पंदात्पिच्छमौक्तिकमंडलं॥ दृश्यते सदिवासत्यं चित्तस्पंदात्तथा जगत्॥ ३॥ श्रीराम उवाच॥ येन न स्पंदते चित्तं येन न स्पंदते तथा॥ तदुपायक्रमं ब्रूहि मे येन चिकित्स्येयं तरेव हि॥ ४॥ श्रीवसिष्ठ उवाच। यथा शौक्ल्यहिमे राम तिलतैललवौ यथा॥ ५॥ तथा राघव संश्लिष्टौ चित्तस्पंदौ तथैव हि॥ अभिन्नौ केवलं भिन्नाभेदः कल्पितएतयोः॥ ६॥ चित्तचित्तपरिस्पंदपक्षयोरेकसंक्षये। स्वयं गुणगुणी स्थित्वा नश्यतो द्वौ न संशयः॥ ७॥

२॥ ईक्षणयोर्नेत्रयोः भ्रमतपसंमुख्येन स्पंदात् पिच्छाकारं अन्यतः स्पंदात् मौक्तिकमंडलमेव दृश्यते॥ ३॥ येन स्वभावेन न स्पंदते येनोपायेन न स्पंदते॥ ४॥ स्पंदस्याभावचित्तात्पृथक्कृत्य वक्तुमशक्य इति दृष्टान्तैरेव तं दर्शयति। यथेत्यादिना तिलश्च तैललवश्च तौ तथा शब्दः समुच्चये॥ ५॥ अत्राप्याद्यस्तथाशब्दः समुच्चये द्वितीयो दार्ष्टांतिकोपवर्णार्थः॥ सर्वत्र गुणगुण्यादौ अविचाराद्भेदसहिष्णुरभेद एव संश्लेषः॥ तत्र विचारे भेदांशो मिथ्या अभेदांशो वास्तव इति दर्शयति अभिन्नाविति॥ ६॥ अभेदांशस्य वास्तविकत्वे स्थितः किं न स्यादित्याशंकां परिहरन्येन न स्पंदते तत्तथेति प्रश्नस्योत्तरमाह चित्तेति पक्षः स्वपक्षकरणात्मा गुणः गुणी चेति विकल्पितः स्वात्मना स्थितस्तथैव द्वावपि गुणविकल्पौ नश्यतो न निरन्वयौ नेत्यर्थः तथा चैकारणात्मना स्थितत्वे गुणगुणिभे

यथा कुसुमसौगंध्ये तथौष्ण्यदहनौ यथा ४२ पु॥ चे१

क्रमौ ज्ञान स्थैर्य

वा॰टी॰उप॰ ॥२२०॥ दनाशदर्शनाद्देहांशस्यैव कल्पितो नामभेदः इत्येतत्तन्मनःस्पंदयोरेकतरनाशाधीनात्यंतिकोभयनिस्तृष्णेने स्थैर्यं चिंतनं स्पंदते न तु। जीवति मनसि तत्स्यात् तत्स्पंदो वा रायितुं शक्य इत्येतच्च सिद्धमिति भावः॥७॥ अत एव स्पंदनिरोधेनोभयनाशार्थं योगक्रमश्च शास्त्रे दर्शित इत्याह द्वौ क्रमाविति॥८॥ तत्राद्यं क्रमं प्रथमं जिज्ञासमानो रामः पृच्छति कदेति॥ प्राणापानयोर्निबंधनं प्राणापाननिबंधा॥ भावेपुरोश्च हलइत्यप्रत्ययः॥ प्राणापाननिरोधलक्षणयेत्यर्थः॥९॥ आसर्गसमाप्तेरस्यैव श्लोकत्रयं वर्णयिष्यन् चित्तस्पंदस्य प्राणस्पंदाधीनतां वक्तुं प्रथमं प्राणस्वरूपमाह देहेस्मिन्नित्यादिना॥ देहनाडीषु द्वासप्ततिः प्रतिशाखं नाडीसहस्राणि भवंत्यासु व्यानश्चरतीति श्रुतेरि प्र२ द्विसप्ततिः

द्वौ क्रमौ चित्तनाशस्य योगो ज्ञानं च राघव॥ योगस्तद्वृत्तिरोधो हि ज्ञानं सम्यगवेक्षणं॥८॥ श्रीराम उवाच॥ कदा कीदृक्क्या युक्त्या प्राणापाननिबंधया॥ योगनाम्ना मनःशांतिमेत्यनंतसुखप्रदां॥९॥ श्रीवसिष्ठ उवाच॥ देहेस्मिन्देहनाडीषु वातः स्फुरति योऽभितः॥ स्पंदेषु वसुधावारि सप्राण इति कीर्तितः॥१०॥ तस्य स्पंदवशादंतः क्रियावैचित्र्यमीयुषः। अपानादीनि नामानि कल्पितानि कृतात्मभिः॥११॥ आमोदस्य यथा पुष्पं शौक्ल्यस्य तु हिमं यथा॥ तथैषाम आधारश्चित्तस्याभिन्नतां गतः॥१२॥

त्यर्थः॥ यथा भुवः स्पंदेषु स्पंदनमार्गभूतेषु विवरेषु वारि जलं सर्वतो व्याप्य स्फुरति तद्वत्॥१०॥ ननु प्राणो बहिरेव व्यतिरेकेऽपानादयोऽन्ये वा वायवः संचरंति तत्राह तस्येति॥ ते प्राणस्यैव वृत्तिभेदाः नान्ये इत्यर्थः॥११॥ वारिदृष्टांतोपपन्नमेरस इति विशेषणं आपोमयः प्राण इति॥ एतमेवांगिरसं मन्यंते प्राणो वा अंगानां रस इति च श्रुतेरिति भावः चित्तस्य कोशवत्सर्वतः संश्लेषेणाभिन्नतामिव गत आधारः प्राणबंधनं हि सौम्य मनः॥ तस्य पुरुषविधतामन्वयं पुरुषविध इत्यादिश्रुतेरिति भावः॥१२॥ राम॰ ॥२२०॥

DR BHAU DAJI MEMORIAL

अत एव तत्स्पंदस्य चित्तस्पंदहेतुतेत्याह अंतरिति॥ संकल्पग्रहणं वृत्तिमात्रोपलक्षणं॥१३॥ चितः स्पंदश्चिदाभासव्याप्तवृत्तिभेदः संविदः॥ तत्तद्विषयाकारप्रथाः॥१४॥ प्राणपरिस्पंदं प्राणाधीनपरिस्पंदं आगमभूषणाः॥ प्राणबंधनं हि सौम्य मनः॥ प्राणहासमवहूतेति प्राणो ह्यमेति॥ प्राणं चक्षुः प्राणश्रोमित्यादिश्रुतिरहस्यज्ञाः॥१५॥ अस्त्वेवं ततः किं तत्राह मन इति॥१६॥ देहलक्षणे स्वगेहे हृदयादिस्थानेषु द्वासप्ततिसहस्रनाडीभेदेषु च अनिशं चरतां गगने षुमुखनासिकादिच्छिद्रेषु बाह्याकाशे च गमनशीलानां॥ प्राणस्पंद

अंतःप्राणपरिस्पंदात्संकल्पकलनोन्मुखी॥ संवित्संजायते येषां तच्चित्तं विद्धि राघव॥१३॥ प्राणस्पंदाच्चितः स्पंदस्तत्स्पंदादेव संविदः चक्रावर्तविधायिन्यो जलस्पंदादिवोर्मयः॥१४॥ चित्तं प्राणपरिस्पंदमाहुरागमभूषणाः॥ तस्मिन्संरोधिते नूनमुपशांतं भवेन्मनः॥१५॥ मनःस्पंदोपशांत्यायं संसारः प्रविलीयते॥ सूर्यालोकपरिस्पंदशांतौ व्यवहृतिर्यथा॥१६॥ श्रीराम उवाच अनिशं चरतां देहगेहे गगनगामिनां॥ प्राणादीनां परिस्पंदो वायूनां रोध्यते कथं॥१७॥ श्रीवसिष्ठ उवाच॥ शास्त्रसज्जनसंपर्कवैराग्याभ्यासयोगतः॥ अनास्थायां कृतास्थायां पूर्वं संसारवृत्तिषु॥१८॥ यथाभिवांछितध्यानाच्चिरमेकतयोदितात्॥ एकतत्त्वघनाभ्यासात्प्राणस्पंदो निरुध्यते॥१९॥ पूरकादिनिजायामाद्दृढाभ्यासादखेदजात्॥ एकांतध्यानसंयोगात्प्राणस्पंदो निरुध्यते॥२०॥

निरोधेन निरालंबनादिराजयोगोपायान्वक्तुमुपक्रमते शास्त्रेति॥ पूर्वाभ्यस्तासु संसारवृत्तिषु सांसारिकव्यवहारेषु आत्यंतिकपरित्यागक्रमनियमदमादिविरोध्याभ्यासाच्चात्यंतमनास्थायां दृढीकृतप्रतिष्ठायां सत्यां॥१८॥ प्रथमं स्वलक्षिते शिखरे चंद्रबिंबमणिदेवतामूर्त्यादौ यत्रैव मनोऽस्य रमते तत्रैव निरोधोऽभ्यसनीय इत्याह यथाभिवांछितेति॥१९॥ पूरककुंभकरेचकक्रमेण प्राणनिरोधसहिताद् दूरं तच्चित्तस्पंदनिरोधः कार्य इत्याह पूरकेति॥ पूरकादिना निजस्य स्वस्य प्राणस्यायामात्॥२०॥

वा०टी०३५० ॥२२१॥ दीर्घोच्चारितप्रणववत्तुर्यमात्रावलंबनयोगाद्वा संविदो बाह्यार्थसंवेदनस्य सुषुप्ते आत्यंतिकोपरमे जाते सति ॥२१॥ इदानीं रेचकपूरकयोरेकैकस्यापि श्वासप्रश्वासशिथिलीकरणे कालदैर्घ्याभिवर्द्धनसहितध्यानाभ्यासादपि तन्निरोध इत्याह रेचके इति द्वाभ्यां ॥ स्फारे विपुलीभूते प्राणे छिन्नाभ्रवत्क्रमात् ॥ खं शून्याभावं बाह्याकाशं वा आगते अंगारं प्राणिनां सर्वविवराणि न स्पृशति सति ॥२२॥ अंतः पूरात्पूरणाद्धि रौघनामेघाइव यावत्पूर्तिं मंदमुपचीयमाने स्थिते निश्चले सति ॥२३॥ पूर[illegible] र्यनंतरं कुंभके पूर्णकुंभवत् ॥ अनंतं कालं स्तंभिते प्राणे परितिष्ठति सति ॥ उक्तत्रिविधप्राणायामक्रमश्च पातंजले शास्त्रे प्रपंचितः तस्मिन्सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः तस्मिन्प्रागुक्ते आसनजये सति बाह्यस्य वायोराचमनं श्वासः कौष्ठ्यस्य वायोर्निःसारणं प्रश्वासः तयोर्गतिविच्छेदः ॥ उभयाभावलक्षणः प्राणायामः कार्य इत्यर्थः ॥ स तु बाह्याभ्यंतरस्तंभवृत्तिर्देशकालसंख्याभिः परिदृष्टो दीर्घसूक्ष्मः ॥ यत्र प्रश्वासपूर्वको गतिनिरोधः स बाह्यः यत्र श्वासपूर्वको गत्यभावः स आभ्यंतरः तृतीयस्तंभवृत्तिः यत्रोभयाभावः ॥ सकृत्प्रयत्नो

ओंकारोच्चारणप्रांतशब्दतत्त्वानुभावनात् ॥ सुषुप्ते संविदो जाते प्राणस्पंदो निरुध्यते ॥२१॥ रेचकेनैनमभ्यस्ते प्राणे स्फारे खमागते ॥ न स्पृशत्यंगारं प्राणि प्राणस्पंदो निरुध्यते ॥२२॥ पूरकेनैनमभ्यस्ते पूराद्गिरिघनस्थिते ॥ प्राणे प्रशांतसंचारे प्राणस्पंदो निरुध्यते ॥२३॥
कुंभके कुंभवत्कालमनंतं परितिष्ठति ॥ अभ्यासात्स्तंभिते प्राणे प्राणस्पंदो निरुध्यते ॥ २४॥

इति ॥ यथा तप्तैन्यस्तमुपले जलं सर्वतः संकोचमापद्यते तथा द्वयोर्युगपद्गत्यभाव इति ॥ त्रयोप्येते देशपरिदृष्टाः बहिस्तल्लव[illegible] स्पंदादिनाऽन्तर्नाभ्यादिस्पंदादिना च इयानस्य विषयो देश इति कालेन परिदृष्टाः क्षणानां इयत्तावधारणेन संख्याभिः परिदृष्टाः एतावद्भिः श्वासप्रश्वासकालैः प्रथमोद्घातः एतावद्भिर्द्वितीयः एतावद्भिस्तृतीय उद्घात इति एवं[illegible]मध्यस्वंतीव्र इति च एवं त्वेवमभ्यस्तः प्राणायामः प्रविकस्वरतप्तपिंडवन्मंदाग्न्युद्दीपितं[illegible]दैर्घ्यसौक्ष्म्यापन्नैः प्रश्वैः दीर्घः सूक्ष्मश्च भवतीत्यर्थः ॥ अभ्यासात्स्तंभिते प्राणे इत्यनेन च रम० ॥२२१॥ तत्परिपाकलभ्यश्चतुर्थोपि प्रकारः सूचितः सोपि पातंजलिना दर्शितः बाह्याभ्यंतरविषयाक्षेपी चतुर्थ इति सर्वोक्तो भयजमात्रदाक्षेपपूर्वकः प्राणगत्यभावः स्थिरश्चतुर्थः प्राणायाम इत्यर्थः प्राणायामप्रतिष्ठाफलमपि पातंजलिनोक्तं ततः क्षीयते प्रकाशावरणं ॥ धारणासु योग्यता मनस इति तपो न परं प्राणायामात् ततो विशुद्धिर्मलानां दीप्तिश्च ज्ञानस्येति भाष्यं ॥२४॥

---

घंटिकां व्याप्तास्यस्य जिह्वामूले स्तनवल्लंबमानतया दृश्यमानामिंद्रयोनिं अंतरेण तालुके य एष स्तन इवावलंबते सेंद्रयोनिरिति श्रुतेः ॥ तां परिहृत्य यावद्दूरं अभ्यासात् प्रयत्नात् ततः प्राणसंचारमार्गे मूर्द्धरंध्रे प्रवेश्यमानमाजिह्वया आक्रम्य निष्पीड्याधःकृत्य प्राणे ऊर्ध्वरंध्रं ब्रह्मरंध्रं प्रगते प्रवेश्य धारिते सतीत्यर्थः ॥ अनेन लंबिकायोगः समुचितानमोधारणा दर्शिता ॥ तत्प्रकारश्च भगवता स्कंदेनोक्तः ॥ रसनां तालुविवरे निधायोर्ध्वमुखो भवेत् ॥ [illegible] छेदाय रामासान्न संशयः ॥ ऊर्ध्वजिह्वः स्थिरो भूत्वा सोमपानं करोति यः ॥ मासार्द्धेन न संदेहो मृत्युं जयति योगवित् ॥ आकाशं चमरी विवारि सदृशं ब्रह्मरंध्रं प्रस्थितं यत्प्राधेन सदाशिवेन सहितं

तालुमूलगतां यत्नाज्जिह्वयाक्रम्य घंटिकां ॥ ऊर्ध्वरंध्रं प्रगते प्राणे प्राणस्पंदो निरुध्यते ॥२५॥ समस्तकलनोन्मुक्तेन किंचिन्मात्रसूक्ष्मखे ॥ ध्यानात्संविदि लीनायां प्राणस्पंदो निरुध्यते ॥२६॥ द्वादशांगुलपर्यंतनासाग्रे विमलांबरे ॥ संविदृशोः प्रशाम्यंत्योः प्राणस्पंदो निरुध्यते ॥२७॥ अभ्यासादूर्ध्वरंध्रेण तालुमूर्ध्नि द्वादशांतगे ॥ प्राणे गलितसंहते प्राणस्पंदो निरुध्यते ॥२८॥

शांते हकाराक्षरं ॥ प्राणं तत्र विलीय पंचघटिकं चिन्ताविर्मुक्तं धारयेदेषा मोक्षकपाटपाटनपटुः व्योमधारणेति ॥२५॥ समस्ताः कलनाः विकारास्तदुन्मुक्ते अत एव च न किंचिन्मात्रे निःसूक्ष्मे हार्दाकाशे संविदि अंतर्बाह्यसंवेदनवृत्तिमात्रे निर्विकल्पसमाधिना लीनायां सत्यां ॥२६॥ नासाग्रोपलक्षितद्वादशांगुलपरिमिते बाह्याकाशे चक्षुर्मनसोर्निरोधात् [illegible] तन्निरोध इत्याह द्वादशेति ॥२७॥ लंबिकायोगाऽसमुचितोऽद्युपायांतराभ्यासात् गुरुक्रमो धारणात्तन्निरोधसिद्धिरित्याह अभ्यासादिति द्वादशांतं ब्रह्मरंध्रं प्रस्थानं तत्र प्राणे गलितप्राये संहते सति ॥२८॥

वा॰टी॰उ॰ ।२२२॥ एवं खेचरीमुद्रापि प्राणस्पंदनिरोधहेतुरित्याह ऊर्ध्वमध्ये इति । तारकयोः अक्ष्णः कनीनिकयोः आलोकस्य तेजसः चक्षुरिंद्रियस्येति यावत् चिरनिरोधाभ्यासांते उपरमे सति तथा जिह्वाग्रे प्राणे च प्रत्युत्क्रान्त्या कपालकुहरप्रवेशाद् द्वादशांतमुपागते सति केतने ऊर्ध्वमध्ये अविमुक्तस्य स्थाने य एषोऽक्षरेऽनंत इति जाबालश्रुत्यादिप्रसिद्धे चेतने चिन्मात्रभावे परमेश्वरे आत्मतया बुद्धे सतीत्यर्थः । खेचरीमुद्रापि स्कंदेनोक्ता कपालकुहरे जिह्वा प्रविष्टा विपरीतगा । भ्रुवोरंतर्गता दृष्टिर्मुद्रा भवति खेचरी । न पीड्यते स रोगेण न च लिप्येत कर्मणा । बाध्यते न स कालेन यो मुद्रां वेत्ति खेचरीमिति । २९ । गुरोरीश्वरस्य वा अनुग्रहात् अकस्मात् झटित्येव वा उद्भूतेन ज्ञा

ऊर्ध्वमध्ये तारकालोकशांतावंतमुपागते । चेतने केतने बुद्धे प्राणस्पंदो निरुध्यते । २९ । झटित्येव यदुद्भूतं ज्ञानं तस्मिन्दृढाश्रिते । असंश्लिष्टविकल्पांशे प्राणस्पंदो निरुध्यते ॥ ३० ॥ चिरं कालं हृदेकांतव्योमसंवेदनान्मुने । अवासनान्मनोध्यानात्प्राणस्पंदो निरुध्यते । ३१ । श्रीराम उवाच ॥ भगवन् जगतामेतेषां हृदयं तत्किमुच्यते । इदं सर्वं महादर्शे यस्मिंस्तत्प्रतिबिंबति । ३२ । श्रीवसिष्ठ उवाच । साधो जगतामेतानां हृदयं [illegible] । हृदयं सर्वं महादर्शे द्विविधं स्मृतं । उपादेयं च हेयं च विभागोऽयं तयोः शृणु ॥ ३३ ॥ इयत्तया परिच्छिन्ने देहे यद्वक्षसोंऽतरं ॥ हेयं तद्धृदयं विद्धि तनावेकतटे स्थितं ॥ ३४ ॥ संविन्मात्रं तु हृदयमुपादेयं स्थितं स्मृतं । तदंतरे च बाह्ये च न च बाह्ये न चांतरे । ३५ ।

नेत्याह झटित्येवेति ॥ ३० ॥ अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुंडरीकं वेश्म दहरोऽस्मिन्नंतर आकाश इत्यादिश्रुतिप्रसिद्धे देहराकाशे वा चिरं चित्तनिवेशात्तत्साक्षात्कारे तत्सिद्धिरित्याह चिरमिति । तथा चोक्तं पातंजले चित्तसंवित् । स्वार्थसंयमात्पुरुषज्ञानमिति च । ३१ । हृदयशब्दस्य पुंडरीकाकारं मांसविशेषे मनसि परमात्मनि च प्रयोगदर्शनात्संदिहानस्य प्रश्नः प्रतिबिंबति आदर्शे प्रतिबिंबवत् स्फुरति । ३२ । तत्र मांसमनसोः परिच्छिन्नत्वादेकरूपमेव प्रकल्प्य द्वेधा विभागो बोध्यः । ३३ । ३४ । ननु आत्मनि हृदयशब्दो हृदयमात्रस्थितिकत्वाद्गौणः किं न स्यादित्याशंक्याह तदंतर इति । ३५ । राम॰ ।२२२।

---

अस्मिन्द्यावापृथिवी अंतरेव समाहिते इति श्रुतेरिति भावः ॥ ३६ ॥ ३७ ॥ ३८ । ३९ । सहसा हठयोगप्रवृत्तिं वारयितुमाह ॥ अभ्यासेनेति । हठान्निरोधे तु रोगाद्याबाधा स्यादेवेति भावः ॥ ४० ॥ यथावासनं यदा यथा या वासना उद्भवंति तदा तत्तन्निरोधायेत्यर्थः । अथवा मुमुक्षावासनायां मोक्षफलेन सफलः भोगवासनायां तु तत्तद्भोगसिद्धिवैचित्र्यफलेन सफल इत्यर्थः ॥ ४१ ॥ अत एव तत्तत्सिद्धिफललाभे द्वार्थं पातंजलशास्त्रोक्तं ऊर्ध्वमध्यादिस्थानभेदेन धारणाभेदा दर्शिता इत्याशयेनाह रसनामिति तालुसंस्थानं । कंठाग्राद् आरभ्य द्वादशांगुलिमितप्रदेशः कोटिः सीमा द्वादशांतेः ॥ पुरुषमेरौ भुवनं यथाह पतंजलिः । नाभिचक्रे कायव्यूहज्ञानं । कंठकूपे क्षुत्पिपासानिवृत्तिः । कूर्मनाड्यां स्थैर्यं

तनुप्रधानं हृदयं तत्रेदं समवस्थितं । तदादर्शः पदार्थानां तत्कोशः सर्वसंपदां ॥ ३६ ॥ सर्वेषामेव जंतूनां संविद्धृदयमुच्यते ॥ न देहावयवैकांशो जडजीर्णोपलोपमः ॥ ३७ ॥ तस्मात्संविन्मये शुद्धे हृदये हृतवासने ॥ बलान्नियोजिते चित्ते प्राणस्पंदो निरुध्यते । ३८ एभिः क्रमैस्तथान्यैश्च नानासंकल्पकल्पितैः ॥ नानादेशिकवक्त्रस्थैः प्राणस्पंदो निरुध्यते ॥ ३९ ॥ अभ्यासेन निराबाधे ध्येयास्ता योगयुक्तयः । उपायतामुपायांति भव्यस्य भवभेदने ॥ ४० ॥ अभ्यासाद्दृढतां यातो वैराग्यपरिलोलितः । यथावासनमायामः प्राणानां सफलः स्मृतः ॥ ४१ ॥ रसनां तालुसंस्थां तु द्वादशांगुलिकोटिषु ॥ अभ्यासाद्याम्यति प्राणो हरे गिरिनदी यथा ॥ ४२ ॥ ऊर्ध्वयष्टिराभ्यासाज्जिह्वा प्राप्ते तु तालुनि ॥ घंटिकास्पर्शते प्राणो येनोच्चैर्निवहत्यलं । ॥ ४३ । विकल्पबहुलास्त्वेते स्वाभ्यासेन समाधयः ॥ परमोपशमायाशु संप्रयांत्यविकल्पतां ॥ ४४ ॥

कंठकूपादयः । कूर्मश्च वक्ष्यमाणतयाभेदे शेषकूर्मनाडी प्रसिद्धा । मूर्धज्योतिषि सिद्धदर्शनमित्यादि । शिरःकपालच्छिद्रे भास्वरं ज्योतिर्मूर्धज्योतिः । गिरिनदी निर्झरः सा यथा हरेर्गतात् तत्रैव नीयते तद्वत् । ४२ । जिह्वाक्रम्य घंटिकामिति । यत्तु गुरुं तत्त्वोपमामास्मरति । स्पृश्यते आक्रम्यते । ४३ । एतेषां समाधीनां तत्तत्सिद्धिफलेषु विकल्पबहुलत्वेपि निष्कामस्य परमोपशमफले अविकल्पत्वे सर्वेषामित्याह विकल्पेति ॥ ४३ ॥ ४४ ॥

४५। ४६॥ वासनावलितंमनः। जन्मशरीरंतत्रप्राणं चाभिमानेनगृह्णाति॥ निर्वासनंतुमोक्षं। ४७ सर्वउक्ताभ्यासप्रकारेणदीयते स्वंज्ञातेचिकित्स्यतेइतियावत्। ४८ ४९ इदंदृश्यंयत्रनेत्याधेयत्वायतोनेत्युपादानात्यान्नेतिताद्रात्म्येनचसच्चिदात्मसंबंधनिषेधान्नकेनाप्यंशेनजगत्तुल्यसदृशमित्यर्थः। ५०। अतएवविनाशित्वादिधर्मकेजगतिनकश्चिदपिब्रह्मणोदृष्टांतोस्तीत्याहविनाशित्वादिति। ५१। यदिनकश्चिद्दृष्टांतस्तर्हि कथंतत्परिचयस्तत्राहस्वादिनीति। रसरूपादिगोचरवाह्यदृष्टित्रिपुटीनांकामाद्यांतरदृष्टित्रिपुटीनांचभासकतयातत्परिचेयमित्यर्थः। ५२। फलमतउपपत्तेरितिन्यायाद्विचित्रकर्मफलोदयस्यनिमित्ततयावातत्परिचेयमित्याहयस्मादिति। ५३। तत्परिच

आत्मारामोवीतशोकोभवस्यंतःसुखःपुमान्। अभ्यासादेवनान्यस्मात्तस्मादभ्यासवान्भव॥ ४५। अभ्यासेनपरिस्पंदेप्राणानांक्षयमागते

म मनःप्रशममायातिनिर्वाणमवशिष्यते॥ ४६। वासनावलितंजन्ममोक्षंनिर्वासनंमनः। प्राणंचरामगृह्णातियथेच्छसितथाकुरु। ४७। प्राणस्पंदोमनोरूपंतस्मात्संस्मरतिविभ्रमः। तस्मिन्नेवंशमंयातेदीयतेसंसृतिज्वरः॥ ४८। विकल्पांशास्ययान्त्यंतोःपदंतदवशिष्यते। यतोवाचोनिवर्तंतेसमस्तकलनान्विताः॥ ४९। यत्रसर्वंयतःसर्वंयत्सर्वंसर्वतश्चयत्। यत्रनेदंयतोनेदंयन्नेदंनेदृशंजगत्। ५०। विनाशित्वाद्विकल्पत्वाद्गुणित्वा... निर्गुणात्मनः। यस्यनोसदृशोदृष्टेदृष्टांतःकश्चिदेवहि॥ ५१। स्वादनीसर्वशालीनांदीपिकासर्वतेजसां कलनासर्वकामानांमतश्चिच्चंद्रिकोदिता। ५२॥ यस्मात्कल्पतरोर्बल्यःसंसारफलपंक्तयः। अनारतंबहुशोजायंतेचपतंतिच। ५३ तत्पदंसर्वसीमांतमवलंब्यमहामतिः। यःस्थितःस्थिरधीस्तद्धःसजीवन्मुक्तउच्यते। ५४। विगतसर्वसमीहितकौतुकःसमुपशांतहिताहितकल्पनः। सकलसंव्यवहारसमाशयोभवतिमुक्तमनाःपुरुषोत्तमः। ५५। मोक्षोपायेउपशमप्रकरणेयोगवर्णनंनामसर्गः ७८

यावदंबनेपुरुषार्थसिद्धिंदर्शयन्नुपसंहरतितदितिद्वाभ्यां ५४। विगतानिसर्वाणिसमीहितकौतुकानिकामभोगोत्कंठायस्य। अतएवतदनुकूलप्रतिकूलेषुसमुपशांताहिताहितवासनायस्य। अतएवसकलेषुसंव्यवहारेषुसमःहर्षविषादशून्यःआशयोयस्य ईदृशोमुक्तमनाःपुरुषश्रेष्ठोभवति भगवान्विष्णुरपिभवतीत्यर्थः। ५५ इतिश्रीवासिष्ठता॰उप॰अष्टसप्ततितमःसर्गः ७८ 

उद्दिष्टोचित्तनाशायोगज्ञानक्रमोहियो। तयोराद्येपरिज्ञातेद्वितीयोत्रनिरूप्यते॥ द्वौक्रमौचित्तनाशस्ययोगोज्ञानंचराघवेतिउद्दिष्टक्रमयोर्मध्येआद्यश्चित्तस्यशमःनाशप्रकारोनिरूपितस्तयेत्यर्थः। १। लक्षणस्वरूपसाधनादिभिःसम्यग्ज्ञानंप्रपंचयिष्यन्प्रथमंआत्मपरिचयेनजगद्बाधात्मतालक्षणंतल्लक्षणमाहआनाद्यंतेति॥ एकःअबाधितःस्फारःअपरिच्छिन्नाकारः। २। एवंजगद्बाधेनात्मपरिचयात्मतावातल्लक्षणमित्याहइमाइति। ३। सम्यग्ज्ञानस्यमोक्षसमर्थतांदर्शयतिअसम्यगिति। सम्यगीक्षणात्सोसर्पःसर्पभावमो

॥श्रीरामउवाच॥ योगयुक्तस्यचित्तस्यशमएवनिरूपितः। सम्यग्ज्ञानमिदानीमेकथयानुग्रहात्प्रभो। १ श्रीवसिष्ठउवाच। अनाद्यंतावभासात्मापरमात्मेहविद्यते॥ इत्येकोनिश्चयःस्फारःसम्यग्ज्ञानंविदुर्बुधाः। २। इमाघटपटाकाराःपदार्थशतपंक्तयः। आत्मैवनान्यदस्तीतिनिश्चयःसम्यगीक्षणं॥ ३। असम्यग्वेदनाज्जन्ममोक्षःसम्यग्विक्षणात् असम्यग्वेदना... रज्जुसर्पोनोसम्यगीक्षणात् ग

४। संकल्पांशविनिर्मुक्तासंवित्संवेद्यवर्जिता। संवित्स्यामिसमाख्याताभुक्तास्ती[illegible]नेतरत्॥ ५। साशुद्धरूपाविज्ञातापरमात्मेतिकथ्यते ह

शुद्धात्मशुद्धरूपांतरविद्येत्युच्यतेबुधैः ६। संवित्तिरेवसंवेद्यंनानयोर्द्वित्वकल्पना। चिनोत्यात्मानमात्मैवरामैवंनान्यदस्तिहि। ७ यथाभूतात्मदर्शित्वमेतावद्भुवनत्रये। यदात्मैवजगत्सर्वमितिनिश्चित्यपूर्णता। ८। सर्वमात्मैवकोदृष्टोभावाभावौक्वचस्थितौ। क्वबंधमोक्षकलनेकिमन्यद्रामशोच्यते ९॥ नचेत्यमन्यन्नोचित्तंब्रह्मैवेदंविजृंभते

सर्वमेकंपरंव्योमकोमोक्षःकस्यबंधता॥ १०। ब्रह्मेदंबृंहिताकारंबृहद्बृहदवस्थितं। ज्ञानाद्यस्तमितद्वैतंभावात्मैवत्वमात्मना

स्फइतियावत्। ४। मुक्तौतर्हि किंपरिशिष्यतेतत्राहसंकल्पेति संवित्स्यास्वप्रकाशस्वभावेनैवअभितःसम्यक्आख्याताप्रथमानाइह्मुक्तौ। ५। अपर्यर्थेतुशब्दः ६। तथाचाविज्ञानकृतएवसंवित्तिसंवेद्ययोर्भेदोनवास्तवइत्याहसंवित्तिरेवेति चिनोतिअज्ञानात्संचिनोतिज्ञानात्तुपरिचिनोतीत्यर्थः ७ निष्कृष्टंसम्यग्ज्ञानस्वरूपमाहयथाभूतेति ८ दृष्टोनिर्दिष्टोनिष्कृष्योनिरूपितावित्यर्थः किमन्यदस्तियदर्थंशोच्यतेमदैरितिशेषः ९ १० बृहतोपिबृहद्बृहत्स्मात्तन्वेवमयायानत्वंबृंहिताकारंइदंदृश्यंत्वमेवस्थितं ११

सम्यक्ङ्अधिष्ठानसन्मात्ररूपेणालोकिते सति कासिन्नपि लोकरूपे हेयोपादेयसंकल्पनं विकल्पनं वा संभवतीत्यर्थः ॥ १२ ॥ अविनाशियत्स्वरूपं तदेव वस्तुनामेति प्रसिद्धं ॥ आत्मनश्च स्वरूपं
नं विविधं अतस्तन्मयोभवेत्यर्थः ॥ १३ ॥ परं निरतिशयानंदरूपं ब्रह्म ॥ १४ ॥ स्फुरति अज्ञस्येति शेषः ॥ १५ ॥ तितत्वं ह्ं केभोगाः ॥ १६ ॥ मनोभोगः कामस्तदाश्रयः षड्रयः ॥ १७ ॥ अजलं जल
लान्निर्गतं अल्पजलस्थं वा ॥ १८ ॥ १९ ॥ जलादिआदिपदात्तरंगफेनबुद्बुदादि जलात्तन्नान्यत्तथेति शेषः ॥ इति विविच्य समवलोकितसम्यगर्थस्तदेकनिश्चयप्रधानः पुरुषः

सम्यगालोकिते रूपे काष्ठपाषाणवाससां ॥ मनागपि न भेदोस्ति कासि संकल्पनोन्मुखः ॥ १२ ॥ आदावंते च संशांतं स्वरूपमविनाशियत् ॥ वस्तुनामा
त्मनश्चैव तन्मयो भव राघव ॥ १३ ॥ परं व्योमेदमखिलं जग[redacted]रं जंगमं ॥ सुखदुःखक्रमः कुत्र विज्वरो भव राघव ॥ १४ ॥ द्वैताद्वैतसमुद्भूतैर्जराम
रणविभ्रमैः ॥ स्फुरत्यात्मनि रात्मैव चित्रैरंब्धिर्ववीचिभिः ॥ १५ ॥ शुद्धमात्मानमालिंग्य नित्यमंतस्थया धिया ॥ यः स्थितस्तं क आत्मेद्धं भोगा —दाय्यं
बंधयितुं क्षमाः ॥ १६ ॥ कृतस्फारविचारस्य मनोभोगा दयो रयं ॥ मनागपि न भिंदंति शैलं मंदानिला इव ॥ १७ ॥ अविचारिणमज्ञानं मरुद्रुमाशा
परायणं ॥ निगिरंतीह दुःखानि बका मत्स्यमिवाजलं ॥ १८ ॥ जगदात्मैव सकलमविद्या नास्ति कुत्रचित् ॥ इति दृष्टिमवष्टभ्य सद्रूपः स्थि
रो भव ॥ १९ ॥ नानात्वमस्ति कलनासु न वस्तुतोंतर्नानाविधासु सरसीषु जलादिनान्यत् ॥ इत्येकनिश्चयमयः पुरुषो विमुक्त इत्युच्यते म
[illegible] समवलोकितसम्यगर्थः ॥ २० ॥ मोक्षोपाये उपशमप्रकरणे सम्यक्ज्ञानलक्षणनि
रूपणं सर्गः ॥ ७० ॥ श्रीवसिष्ठ उवाच इदमेतः कलयतो भोगान्प्रति विवेकिनः पुरःस्थितानपि सदा स्पृहैवांग न जायते ॥ १ ॥ 

आत्यंतिकचिंतनाशात् विमुक्त इत्युच्यत इत्यर्थः ॥ २० ॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे सप्ततितमः सर्गः ॥ ७० ॥ यस्मिन्विमर्शे सुदृढे दिव्यभोगेष्वपि स्पृहा नोदे
त्यपि पुरःस्थेषु स विमर्शो वर्ण्यते ॥ इदं वक्ष्यमाणं विमर्शोपदर्शनं पुरःस्थितानपि भोगान्प्रति स्पृहा न जायत एवेत्यन्वयः ॥ १ ॥

---

तन्नादौ चक्षुषा इष्टानिष्टरूपे आलोचिते चक्षुरहंताभिनिवेशान्जीवस्य सुखदुःखे दृश्यते तन्न चक्षुः प्रति स्वामिने वा स्व बलहंते नि विमर्शेन दुःखादि संप्रसक्तिरिति दर्शयति चक्षुरिति ॥ बलीवर्द
२ स्य भारं हे न दुःखायन तस्य भार इव्यस्य च नायकः न यस्येव बलीवर्द इत्यर्थः ॥ २ ॥ स्वामित्वमपि तस्य न चक्षुर्मात्रे किं तु कार्यकारणसंघातकामकर्मवासनातत्फलभेदे षु तत्र अहंकारबुद्धिम
नः प्राणपरंपरया कथं चित्तत्वको विभिविष्टस्यैकस्य चक्षुषः कदाचिदनिष्टरूपहंमयोगे का वा गणना कुतो वास्य दुःखप्रसक्तिरित्याशयेनाह नयन इति गर्दभे सेनांतर्गतरेनकगर्दभे
श्वा स्वामित्वादेव ततन्निवारयितुमपि शक्यमित्याशयेनाह रूपेति ॥ एततस्मीपुत्रादिसौंदर्यलक्षणं हिं सतिनाशयति दर्शनस्तो विकरणव्यत्ययः हे अधममरुद्गतम ॥ ४ ॥ प्राज्ञस्तर्हि
कीदृशः कनिबध्यते तत्राह ॥ यन्नेति ॥ क्रूरोनिशितमतिः प्राज्ञस्तयेनांतर्गतेन चिरात्मनैव सम्यक्ख्यानं संख्या वा प्राप्यांतरार्थप्रा स्याक्रियते येनैव असात्मनात्मभरताकोश
परंपरा आत्मतादात्म्यारोपेणानुगम्यते तरीयैः औदासीन्येन यथाप्राप्तार्थप्रकाशनलक्षणैः कर्मभिश्चरित्रैर्न निबध्यते अभ्यासेन संबध्यते नमरु द्र्रूपक इं मास्वादनक

चक्षुरालोकनायेव जीवस्तु सुखदुःखयोः ॥ भारायेव बलीवर्दो भोक्ता द्रव्यस्य नायकः ॥ २ ॥ नयने रूपनिर्मग्ने सोभः कद्वरे हि नः ॥ गर्दभे पत्तले
मग्ने कैव सेनापतेः क्षतिः ॥ ३ ॥ रूपकर्दममेतन्मा नय मास्वादयाधम ॥ नश्यत्येतन्निमेषेण भवंतमपि हिंसति ॥ ४ ॥ येनैव सेव्या क्रियते येनैवासा
• नुगम्यते ॥ जरीयैः कर्मभिः सिध्रैः प्राज्ञः क्रूरो निबध्यते ॥ ५ ॥ उत्पन्नध्वंसि चापातमात्रहृद्यमसन्मयं ॥ रूपमाश्रयमानेत्र विनाशाय्यविना
शिने ॥ ६ ॥ साक्षिवत्त्वे स्थितं नेत्ररूपमात्मनि तिष्ठति ॥ आलोके कालवशतस्त्वमेकं किं प्रतप्यसे ॥ ७ ॥ सलिलस्पंदवद् दृष्टिः पिच्छके तोव
न रोत्थिता ॥ सुजातिर्विधास्फुरतिर्वैचित्रकि मागतं ॥ ८ ॥ संमिलतथाबतमप्युदासीनं सत्तरूपं प्रकाशयन्तु तत्रास्वादयेत्यर्थः ॥ ५ ॥ उत्पन्नध्वंसि आपातमात्रहृद्यं बोति वि
शेषणे ॥ अत्र अन्यमित्यस्योपपत्तये अविनाशिने अनिवार्याय विनाशाय मरस्तु सुखप्रवेशाय ॥ ६ ॥ किं च रूपविषये सदाप्रवर्थप्रकाशने निरपेक्षसमर्थे परमात्मनि उदासीने स्थि १
ते सति हे नेत्र कालवशतः कदाचिदेवरी पाद्यालोकं प्राप्य प्रकाशयतस्त्वमेवैकं किं किमर्थं प्रतप्यसे अतस्त्वमपि साक्षिवत्स्थितं ततरूपं पश्येत्यर्थः ॥ ७ ॥ इदानीं चक्षुषाभ्रांत्यारूपे आलो
किते पि चित्तस्य तदभिनिवेशो हेतुर्नाती त्याह सलिलेति ॥ हे चित्त इयं विचित्ररूपदृष्टिः स्पंदादि सलिले नानाविधा नियतस्पंदवैचित्र्यवदनिमता अंबरे स्तंभालोकाभिमुखं सा श्रूनेत्रनिरि भि
न्नामरूरपिच्छकेव मिथ्याभूताचगौर समाभ्यां पिंडीय मित्येवं नानाविधसुजाति दुर्जातिविकल्पानुबंधा चक्षुषः स्फुरति तत्र तव किमागतं येन त्वं रज्यसे तप्यसे वेत्यर्थः ॥ ८ ॥

वा॰टी॰उप॰ २२५

अलंवा चित्ते चक्षुर्देशार्थाकारवृत्तिस्तथाप्यभिनिवेशहेतोरहंकारस्य निमित्तं नास्तीत्याह कल्येति स्वयं रूपाद्याकारेण स्फुरतु नाम अयमहंकारस्त्वं कुतः प्रोत्थितः ॥९॥ किं च त्वत्पिंडादिलक्ष
णां रूपं सर्वाद्यालोकमात्रं स्वयं स्फुरति सूर्यालोकश्च पिंडाश्रितः स्वतोऽन्योन्यसंयोगे सौंदर्यभ्रांत्या कामादिना चित्तस्य व्याकुलता प्रसिद्धा सा च तयोश्चित्तेनासंबंधाद्व्यर्थेत्यर्थः ॥१०॥ अ
संबंधमेव दृष्टांतेन स्फुटयति रूपेति ॥ चक्षुषा बहिः रूपालोकनं मनसा चांतः संकल्पात्मको मनस्कार इति भिन्नदेशत्वादेवेति भावः संपन्नाः संलग्ना इव ॥११॥ तत्संलग्नताभ्रांतौ योऽज्ञाने
न जंतुना भिवधास्त आत्मैव निमित्तमित्याह अज्ञानेति ॥ पृथक् विश्लिष्टाः सत्त्व असन्मायाबाधिताः संतः अधिष्ठानमात्रपरिशेषेण तिष्ठंति ॥१२॥ दारुणी काष्ठे जतुना लाक्षया ॥१३॥

कल्यां भमीव शफरी चित्ते स्फुरणधर्मिणि ॥ स्वयं स्फुरत्यहंकारस्त्वमयं प्रोत्थितः कुतः ॥९॥ आलोकरूपयोर्नित्यं जडयोः स्फुरतोर्मिथः ॥ आधारा
धेययोश्चित्त व्यर्थमाकुलता तव ॥१०॥ रूपालोकमनस्काराः परस्परमसंगिनः ॥ संपन्ना इव लक्ष्यंते वदनादर्शबिंबवत् ॥११॥ अज्ञानजंतुना
प्रोतेश्लिष्टा जातनिरंतराः ॥ अज्ञाने ज्ञानगलिते पृथक्तिष्ठंत्यसन्मयाः ॥१२॥ मनः कल्पनया प्रोते सुसंबद्धाः परस्परं ॥ रूपालोकमनस्कारा दा
रुणी जतुना यथा ॥१३॥ स्वमनो मननं तंतुर्मनोभ्यासेन यत्नतः ॥ विचारच्छेदमायाति छिन्नैवाज्ञानभावना ॥१४॥ अज्ञानसंक्षयात्क्षीणो मनसी
मे पुनर्मिथः ॥ रूपालोकमनस्काराः संघट्टंते न केचन ॥१५॥ सर्वेषां चित्तमेवांतरिंद्रियाणां प्रबोधकं ॥ तदेव तस्मादुच्छेद्यं पिशाच इव मंदिरात् ॥१६॥
चित्त वल्गसि मिथ्यैव दृष्टो तो भवतो मया ॥ आद्यंते शुमृतुच्छं त्वं वर्तमाने विनश्यसि ॥१७॥

स्वमनो मननमेव तंतुः कोशकारतंतुवत्स्वबंधनं स्वमंदमध्यमाधिकारिणो वैराग्यशमदमनिरोधादिमनोभ्यासेन यत्नतो विचारच्छेदमायाति मुख्याधिकारिणस्तु सहसोत्पन्नज्ञानेन तस्मि
श्छिन्ने सति स्वभावतएव विषयांतरापरिशेषात्स ज्ञानभावनैव प्रवर्तत इत्यर्थः ॥१४॥ तत्र हि तीमस्या नायात इत्याह अज्ञानेति ॥१५॥ प्रथमेन तु यत्नेन चित्तमुच्छेद्यमित्याह सर्वेषामि
ति ॥१६॥ इदानीं चित्तमेव संबोधयति चित्तेत्यादिना अंतःबोधोपायः यत आद्यंतयोः मृतुच्छं अतो वर्तमानकालेऽपि विनश्यसि अमरस्मि न हि पूर्वोत्तरकालयोस्तुच्छो वंध्यापुत्रो वर्तमान
कालेऽसन्भवतीत्यर्थः ॥१७॥

राम॰ २२५

DR. BHAU DAJI

पंचभिरिंद्रियोपनीतैः शब्दाकारैः ॥ यस्त्वदभिमानी प्रमाता त्वां स्वमदीयमिति जानाति तस्यैव त्वं उपकरणतया परिवल्गसि न त्वसंगोदासीनविवेकरसस्य ममेत्यर्थः ॥१८॥ तुषि
प्रहरणे विपारस्याप्युपलक्षणं ॥ सेंद्रजालिकमायाप्रयुक्तेमनसः नानाविषयदर्शनाकारस्यं दरद्व ॥१९॥ प्रकृत्या त्वीयमिथ्यास्वभावेनैव स्मृतं निरात्मकमपि विचारात्तु तथा
स्मृतं सत् सुमृतं अत्यंतमसदित्यर्थः ॥२०॥२१॥ एतावत्कालं वयं त्वां मृतं भवता ॥ नैरात्म्येन वर्तमानं अज्ञातवंतः ॥ अद्य आत्मतत्त्वदर्शनकाले ॥२२॥ साधवः शमदमाद्य

दमा

सुधा पंचभिराकारैः किमंतः परिवल्गसि ॥ यस्त्वां स्वमिति जानाति तस्यैव परिवल्गसि ॥१८॥ त्वदत्तानंमे कुमनो नमनागपि तु स्वये
मायामनःसंदरद्व व्यर्थं वृत्तिषु दश्यसे ॥१९॥ तिष्ठ वा गच्छ वा चित्त नासि मे न च जीवसि ॥ प्रकृत्यासि मृते नित्यं विचारात्सुमृतं स्मृतं ॥२०॥
नित्यत्वं जडं भ्रांत शठ नित्यमृताहृते ॥ मृढ एवत्वया ज्ञेन बाध्यो न प्रविचारवान् ॥२१॥ वयमज्ञातवंतस्त्वां मोर्येण सुमृतं भवेत्
मृतमस्माकमद्यासि दीपानां तिमिरं यथा ॥२२॥ शठेन भवता दीर्घकालं देहगृहं मम ॥ उपरुद्धमभूत्सर्वं साधुसंसर्गवर्जितं ॥२३॥ जडे
प्रेतसमाकारे गते त्वयि मनः शठे सर्वसज्जनसंसेव्यमिदं देहगृहं मम ॥२४॥ एवमेव स्थितिनासीस्त्वं मे प्रत्येव शठ जागृत ॥ न भविष्यसि चेदानीं
वेताल किं न लज्जसे ॥२५॥ सहस्रैरपि पिशाचीभिः सहकोपारि मुच्यकैः ॥ निर्गच्छ चित्तवेताल शरीरसदनान्मम ॥२६॥ दिष्ट्या विवेकमात्रेण
निर्गतो देहमंदिरात् ॥ भ्रमतश्चित्तवेतालः कुक्कुरः कंदरादिव ॥२७॥ अहो नु चित्रं सुमहज्जडेनक्षणभंगिना ॥ मनः शठेन सर्वोयं नीतो विव
शतां जनः ॥२८॥ क त्ते पराक्रमः किं ते बलं कस्ते समाश्रयः ॥ यदि वल्गसि सामेकं जनानां बाधसे मृतं ॥२९॥

प्रसज्जनाः ममआसीदिति शेषः ॥२४॥ हे जागद्रूप चित्तवेताल शठ त्वं एवमेव नासीः ॥ संप्रति च नास्येव ॥ अग्रे च न भविष्यसि ॥ एवं मया कालत्रयेऽपि निषिध्यमानोऽपि इदानीमत्र स्यात्तु किं
न लज्जसे अहो तव निर्लज्जतेत्यर्थः ॥२५॥ यदि सत्त्वतो सि तर्हि निर्गच्छेत्याह सहेति ॥२६॥२७॥ चित्रं विचित्रजनाननुशोचति अहोइति ॥२८॥ जनानां मध्ये मृतं मरणधर्मकं देहात्मदर्श
नात्स्वतो मृतं बाधसे अयं कस्ते पराक्रमः स्वकं अद्वितीयात्ममृतेर्माप्रतियदि वल्गसि आगंतुः शक्योपितदा तेभाक्रमइतिशेषः ॥२९॥

हेदीनअशरीरेनचित्तकमयाअस्त्रनमार्यसेयतः एवमेवसर्वथैवकेवलंमृतमितिअवबुद्धं अयमेववधइत्यर्थः ॥ ३० जीवदास्थितिर्जीवतइवआस्थितिः स्वरूपसत्तायस्यतथाविधं ज्ञात्वाश्लिष्टस्त्वयासहतादात्म्येनसंगतः ॥ ३१ ॥ ३२ बोधोत्तरंजीवन्मुक्तानांनिश्चितमेवायुःशेषंनयनमुचितमित्याहनशठेनेति ॥ ३३ शठानांकामक्रोधालोभादीनांमहत्तस्त्वमृतंमनःदेहसदनादुत्सार्य ॥ ३४ ॥ चित्तवेतालेनलब्धेनआत्मनातदा त्वमृत तेनमयाइदानींस्वयंपरमार्थात्मभूतोहंतान्विकारानस्मरत्वाहसामीत्यर्थः ३५ निपाति

सर्वथैवासिनमयारीनचित्तकमार्यसे ॥ मृतमित्यवबुद्धंत्वमघकेवलमज्ञहे ॥ ३० एतावंतमहंकालंत्वांज्ञात्वाजीवदास्थिति श्लिष्टप्रसृतसंगास्तुचिरंसंसृतिरात्रिषु ॥ ३१ ॥ चित्तंमृतंहिनास्तीदमित्यद्याधिगतंमया ॥ तेनत्वराशांत्यज्यतिष्ठाम्यात्मनिकेवले ३२ दिष्ट्याचित्तंमृतमितिज्ञातमद्यमयास्वयं नशठेनसमंनेयंसमयंजीवितंनिजं ॥ ३३ ॥ उत्सार्यदेहसदनान्मनःशठमहंक्षणात् ॥ अहंस्वस्थःस्थितोस्म्यंतर्वेतालपरिवर्जितः ॥ ३४ ॥ चित्तवेतालललब्धेनचिरंकालंमयात्मना ॥ कृताविकारविविधाःस्वयंस्मरत्वाहसाम्यहं ॥ ३५ ॥ चिरान्निपातितोदिष्ट्याविचारासिपरार्दितः ॥ हृदेहाच्चित्तवेतालस्तालोत्तलसमुन्नतिः ॥ ३६ ॥ प्रशांतेचित्तवेतालेपवित्रांपदवींगते ॥ दिष्ट्याशरीरनगरेसुखंतिष्ठामिकेवलं ॥ ३७ मृतंमनोमृताचिंतामृतोहंकारराक्षसः विचारमंत्रेणममःस्वस्थस्तिष्ठामिकेवले ॥ ३८ ॥ किंमनोमेममाशाकाकोमेहंकारकोभवेत् ॥ दिष्ट्याव्यर्थकलत्रंमेनसमेतरशेषतः ३९ एकस्मैकृतहत्यायनित्यायविमलात्मने निर्विकल्पचिदाख्यायमह्यमेवनमोनमः ॥ ४० नशोकोस्तिनमोहोस्तिनचैवाहमहंस्वयं नचनाहंनचान्योहंमह्यमेवनमोनमः ॥ ४१ ॥ 

तःनिपात्येवमारितः ३६ ॥ कामादिमलाभावात्पवित्रांपदवींइंद्रियद्वारमार्गंगतेप्राप्ते ॥ ३७ ॥ ममःनिरस्तदोषमघ्नःसन् ॥ ३८ कलत्रंपोष्यवर्गः ३९ इदानींपरिशिष्टंनिरतिशयानंदंनमस्यतिएकस्मैइत्यादिना ॥ ४० ॥ अहंअहंअहमभिमानप्रधानजडांशःनैव ॥ नचनाहंअहंकारप्रत्यक्चिदात्मानेतिचन ॥ ४१ ॥

देहसमाप्ता

---

४२ ॥ आत्माआत्मशब्दप्रत्ययविषयोन ॥ तथाच बृहदारण्यकभाष्येतद्वार्तिकेच ॥ आत्मेत्येवोपासीतेत्यत्रइतिशब्दआत्मशब्दप्रत्ययविषयत्वनिवारणार्थंइत्युक्तं नवाअन्यःअनात्माहंकोन्यत्त्वदर्शनसंभाव्यतेयदहंस्यां एवमहंशब्दप्रत्ययविषयत्वरहितश्चनाहं ॥ एवंचस्वेनप्रसिद्धेत्वमेवसर्वमितिसर्वमेवाहमित्यर्थः ॥ ४३ आदिर्भुवनानांकारणं धाताधारयिता ॥ व्यवच्छेदस्त्रिविधपरिच्छेदः ॥ ४४ सर्वकालाय सनातनाय ॥ ४५ ॥ ४६ ॥ ४७ ॥ अद्वयश्चअव्ययश्चतुवीचनप्रश्चतेः सहितासाप्रसिद्धाइयंवर्तमानादृश्यश्रीर्नाहं ॥ एवमतीतानागतपदार्थाढ्यंजगत्सर्वमपिनाहमहमेवचेतियोज्यं ॥ ४८ ॥ व्यपगतानिमननानिमनोविकल्पायस्मात्तत एवसमासिरामप्रकटितविश्वमनेनंतं अच्युतंकुतः

नममाशानकर्माणिनसंसारोनकर्तृता ॥ नभोक्तृतानदेहोमेमह्यमेवनमोनमः ॥ ४२ नाहमात्मानवाकोन्योनाहमस्मिनचेतरः सर्वमेवाहमेतस्मैमह्यमेवनमोनमः ॥ ४३ ॥ अहमादिरहंधाताविरहंभुवनान्यहं ॥ ममनास्तिव्यवच्छेदोमह्यमेवनमोनमः ॥ ४४ ॥ निर्विकारायनित्यायनिरंशायमहात्मने ॥ सर्वस्मैसर्वकालायमह्यमेवनमोनमः ॥ ४५ ॥ नीरूपायनिराख्यायप्रकाशायमहात्मने ॥ स्वयमात्मैकसंस्थायमह्यमेवनमोनमः ॥ ४६ ॥ समंसर्वगतंसूक्ष्मंजगदेकप्रकाशिनं ॥ सत्तामुपगतोस्म्यंतर्मह्यमेवनमोनमः ॥ ४७ ॥ साद्वयाव्ययुवीनदीसेयंनाहमेवाहमेवचजगत्सर्वंपदार्थाढ्यंमह्यमेवनमोनमः ॥ ४८ व्यपगतमननंसमासिरामप्रकटितविश्वमरूपमप्यनंतं ॥ स्वयमजमजरंगुणातीतंवपुरहमच्युतमीश्वरंनमामि ४९ मोक्षोपायेउपशमप्रकरणेदृश्यदर्शनसंबंधःसर्गः ८० श्रीवसिष्ठउवाच एवंविचार्यबुद्ध्यातःपुनरित्थंविचार्यते ॥ तत्त्वविद्भिर्महाबाहोज्ञेयआत्मामहात्मभिः ॥ १ ॥

उत्थितमस्मत्पादमच्युतंइहअविद्यातत्कार्यनिरासेसमर्थोभवतीतिश्वरंवपुःस्वरूपंनमामिसर्वोत्कर्षेणाप्रपन्नोस्मीत्यर्थः ४९ इतिश्रीवासिष्ठतात्पर्यप्रकाशेउपशमप्रकरणेअशीतितमःसर्गः ८० यत्नेःप्राक्चित्तवेतालोदेहगेहाद्विवासितःइदानुमयुक्तिर्यावित्तसतोपपाद्यते आत्माज्ञेयःअवश्यंज्ञातव्यइतिविचारतत्त्वविद्भिःपुनरित्थंवक्ष्यमाणप्रकारेणविचार्यतेचिंतमितिशेषः ॥ १ ॥

येनचित्तेनआत्मैवेदमितिबोधेनजगन्मार्जितंतच्चित्तंकुतउत्थितंस्यात्प्रत्जगदंतःपातेनस्वयमप्यवस्तु अहोइत्याश्चर्ये॥२॥ अवस्तुत्वमेवसाधयतिअविद्यत्वादिति। जडत्वाच्चित्तांतर
शून्यत्वान्मायाकार्यत्वाच्च एवंनिश्चयेन चित्तं नास्त्येवेत्यसदेवअथवाखवृक्षवद्धमादेवान्यदृक्तात्तत्शुद्धंत्वमिवात्मैवतदित्यर्थः॥३॥ यथाज्ञैकागतस्यशिशोर्बालस्यस्थाणुप
रिस्पंदो भ्रांतिमात्रसिद्धस्तद्वदबुद्धस्यचित्तंसिद्धमपिबुद्धस्यात्मविदोनसिद्धं किंत्वसन्मयमेवेत्यर्थः॥४॥ नौलेख्यादियंत्रचक्रारोहणप्रयुक्तभ्रमस्यांतेतदवरोहणोत्तरमित्यर्थः
५॥ यतोवास्याम्यंतरपदार्थभावनाः॥ असतश्चित्तादस्मृतात्तेनहेतुनाअसत्याइतिमयाउज्झिताः॥६॥ यथायेनपारमार्थिकसद्भावेनतिष्ठामितथैवेदानींस्वानुभ

आत्मैवेदंजगदितिसत्यंचित्तेनमार्जितं।उत्थितंस्यात्कुतश्चित्तमहोचित्रमवस्तुयत्॥२॥अविद्यत्वादचित्तत्वान्मायात्वाच्चासदेवहि ध्रु
वंनास्त्येववाचित्तंभ्रमादन्यत्खवृक्षवत्॥३॥सिद्धःस्थाणुपरिस्पंदोनौगतस्ययथाशिशोः॥अबुद्धस्यनबुद्धस्यतथाचित्तमसन्मये॥४
मोरव्यमोहभ्रमेशांतेचित्तंनोपैतिभामहे।चक्रारोहभ्रमस्यांतेपर्वतस्पंदनंयथा॥५॥एवंहिचित्तनास्त्येवब्रह्मैवास्तितथात्मकं।पदा
र्थभावनाश्चित्तात्तेनासत्यामयोज्झिताः॥६॥ जातोस्मिशांतसंदेहःस्थितोस्मिविगतज्वरः॥यथातिष्ठामितथैवविगतैषणः॥७॥चि
त्ताभावेपरिक्षीणावास्यतस्सादयोगुणाः॥आलोकोपरमेचित्रावर्णारव्याइवसंविदः॥८॥एतंचित्तंगतात्सत्याप्रक्षीणोमोहपंजरः
निरहंकारताजाताजाग्रत्यस्मिन्प्रबुद्धवान्॥९॥एकमेवजगच्छांतंनानात्वंनसदित्यपि किमन्यद्धिमरशाम्यंतःकथयैवात्मनेत
या॥१०॥ निराभासमनाद्यंतंपदंपावनमागतः॥सौम्यःसर्वगतःसूक्ष्मःस्थितआत्मास्मिशाश्वतः॥१२॥

॥वेनापितिष्ठामिनान्यथाभ्रतइत्यर्थः॥७॥बाल्यंबालस्यकर्मचापलंवर्णाश्चित्रादिस्कृतिदर्शास्वरूपभेदानारव्यांतिप्रथयंतितथाविधाश्चास्फुपसंविदइव॥८॥अस्मिन्नहमात्मनि राम॰
जाग्रतिअपगताज्ञाननिद्रेसति॥अहंप्रबुद्धवान्स्वाभाविकंस्वरूपमित्यर्थः॥९॥ जगतशांतंसततमेकंब्रह्मैव॥एतयाअसद्विषयिण्याकथयैवालंप्रयोजनंनास्तीत्यर्थः॥११नि २२७
र्गतआभासश्चिराभासलक्षणाजीवतायत्र॥११॥

नू

यच्चोकेव्यवहारदशाविज्ञादिस्कृतिदशावआत्मब्रह्मचैतन्यादिचअस्तीतिप्रसिद्धंमद्वरज्जुसर्पादिवंध्यापुत्रादिचनास्तिप्रसिद्धं॥वस्त्ववस्तुचतत्सर्वस्वाकाशादप्यच्छतरं
निर्मलतरंअग्राह्यस्वप्रकाशंब्रह्मैवाततंतस्मिन्नेवसदसद्रूपविकल्पारोपादित्यर्थः॥१२॥१३॥ अहमेतावत्कालंमौर्ख्यातविचारस्यअकारकःअकर्तासन्मितास्थितिः
परिच्छिन्नदेहादिस्वभावश्चआसंसंप्रतिविचारेणअमिताकारःसन्विचारकअहंकनामगतइतिननिरूपयितुंशक्यइत्यर्थः॥१४॥मननिसतिविचारकोस्तिनवेतिविक

यदस्तियच्चनास्तीहविज्ञाद्यात्मावस्तुच।ततवारच्छतरंशांतमनंताख्यमाततं॥१३॥ चित्तंभवतुमावांतस्थियतांस्थितिमेतुवा।कोविचारेणमौर्ख्योमेचिरं
स्थाम्योदितात्मनः॥१३॥विचाराकारकोमौर्ख्यादहमासंमितस्थितिः॥विचारेणामिताकारःकनामाहंविचारकः॥१४॥एतेपिमननीयंमेविकल्पश्री
निरर्थिका॥मनोवेतालहत्यर्थंकिमर्थमुपजायते॥१५॥तामिमांप्रजहाम्यंतःसंकल्पकलनामिति॥निर्णायोमितिशांतात्मातिष्ठामनत्म
निमौनवत्॥१६॥अप्यंगाच्छन्स्वपंस्तिष्ठन्नितिराघवचेतसा॥एवंत्रप्रज्ञयातज्ञःप्रत्यहंप्रविचारयेत्॥१७॥प्रविचार्यस्वसंस्थेनस्वस्थेनस्वेनचे
तसा॥तिष्ठंतिविगतोद्वेगाःसंतःप्रकृतकर्मसु॥१८॥विगतमानमदासुदिताशयाःशरदुपोढशशांकसमत्विषः॥प्रकृतसंव्यवहारविहारिणस्त्विहसुखं
विहरंतिमहाधियः॥१९॥मोक्षोपायेउपशमप्रकरणेचित्तासत्ताप्रतिपादनंसर्गः॥८१॥

त्यश्रीरपिनिरर्थिकामनोवेतालस्यहत्यर्थंपुनर्जीवनार्थंकिमुपजायते॥अतस्तामिमांप्रजहामीतिपरेणसंबंधः॥१५॥ओमितिॐकारलक्ष्येतुरीयेआत्मनि मौनधरि
तिस्थितिक्रियाद्दर्शनः॥१६॥कृतंविचारमुपसंहरंस्तस्यसदैवकर्तव्यतामाहअप्यंगेति यथाकुःगच्छतास्मितोवापिजाग्रतःस्वपतोपिवाप्रविचारपरंचेतोअभ्यासो
मतत्तज्ञस्यतदिति॥१७॥ प्रकृतकर्मसुस्ववर्णाश्रमोचिताचारेषु॥१८॥ शरदाउपोढेनशशांकेनसमासदृशत्विषःप्रसन्नमुखकांतियेषां॥१९॥ इतिश्रीवासिष्ठतात्पर्यप्रकाशेएका
शीतितमःसर्गः॥८१॥

इहेंद्रियाणि च मनो व्यर्थचेष्टादिहेतु भिन्न। वीतहव्येन बोध्यंते आत्मैकाग्र्यप्रसिद्धये। कृतस्य विचारस्य सांप्रदायिकत्वं दर्शयति विचार इति संवर्त्तेन बृहस्पतिभ्रात्रा १ तारतम्येन उत्तरोत्तर चित्तविश्रांतिप्रकर्षपरिपाके प्रयुक्तभूमिकारोहणक्रमेण। २। अपरामिंद्रियमनःप्रबोधनरूपां यथा रघ्याद्वीतहव्येन मुनिना अशंकितं निःशंकं पदमास्थितमधिरूढमित्यर्थः॥ यथेति पाठे येन प्रकारेण॥ ३। विंध्यशैलदरीः समाध्यनुकूलाः अन्वेषमाणो बिभ्राम॥ ४। कुतस्तस्य समा

श्रीवसिष्ठ उवाच॥ विचारस्त्वं विदुषा संवर्त्तेन कृतः पुरा। कथितो मम विंध्याद्रौ तेनैव विदितात्मना॥ १। एतां दृष्टिमवष्टभ्य विचारपरया धिया। संसारसागरादस्मात्तारतम्येन संतर॥ २। अथेमामपरां राम शृणु दृष्टिं परां शुभां। मुनिना वीतहव्येन यथाऽस्थितमशंकितं॥ ३। वीतहव्यो महातेजा विबभ्राम वने पुरा। विंध्यशैलदरीदीर्घा रविर्मेरुदरीरिव॥ ४। अस्मात्क्रियाक्रमाद्घोरात्संसारभ्रमदायिनः। आधिव्याधिमयात्कालेनोद्वेगमाययौ॥ ५। निर्विकल्पसमाध्यंशलब्धोदारपरेच्छया। स जहार जगज्जीर्णां स्वव्यापारपरंपरां॥ ६। विवेश रंभारचितं निर्जनांतरं। कृतगौरं सुसौगंध्यमलिनीलमिवोत्पलं॥ ७। तत्रासने समे शुद्धे स्वास्तीर्णहरिणाजिने। विश्रामाचलेशांते वीतवर्णइवांबुदः॥ ८। बद्धपद्मासनस्तस्थौ पार्ष्णोरधिकरांगुलिः। स्पंदग्रस्थांतचलनमतिसुस्पष्टकंधरं॥ ९। स जहारालमालोकाद्दृग्विकीर्णमनः शनैः विशन्मेरुदरीमाया भास्वद्वोत्करं॥ १०।

भानु

धीच्छा भस्तत्राह अस्मादिति। ५। जहार उपसंजहार सन्यस्तवानिति यावत्॥ ६। रंभारचितं कदलीदलनिर्मितं कृतगौराः श्वेताः पीताश्च कटेराः परागाश्च येन अतएव सुसौगंध्यं॥ ७। शांतो निस्तापे अचले शम्य हिमवतीं ते प्रांतेवा॥ ८। पार्ष्ण्योः पादतलमूलयोरधिकपरिकरांगुलयो यस्य तथाविधः सन् असमर्थसमासः स्पंदग्रस्तः स्पष्टकंधरं कधीकृतग्रीवं यथा स्यात्तथा॥ ९। विस्फुरदिंद्रियालोकान्विनिताद्विकीर्णमनसः तन्निग्रहोपायेन जहार हृदुपसंजहार शनैर्वक्ष्यमाणप्रबोधनक्रमादित्यर्थः॥ १०।



जयणो

वाह्यानैंद्रियकानाभ्यंतरत्मानसांश्च विषयस्पर्शान्परिजहात् त्यजन्सन्। मा भूल्लाघु तुरिति तु ल्विवेधः। इदं वक्ष्यमाणमाकलयामास विचारयामास॥ ११। तरंगैः प्रौढेन प्रवाहितेन पर्णेन तुल्यं तरंगप्रौढपर्णवत्॥ १२॥ चक्षुरादिभिरहितसंभ्रमैर्नानाविषयरूपैर्निमित्तैरुत्पततिन्न सतिवीटाकंदुकवत्। १३। एकैकं वृत्तिस्थान् जदेवतदनुसारिणीः उत्तरोत्तरवृत्तीर्गत्वा त्यजति। १४॥ १५॥ एवं चित्तदोषानालोच्य तन्निर्गमद्वाराण्यालोचितवान् इत्याह पंचेति। दग्धशब्दो निंदार्थः॥ छांदसत्वात् कुत्सितानि कृत्स्नैरिति। समासोनाश्रितः॥ १६॥ इदानीमिंद्रियाण्येव निर्भर्त्स्य बोधयति हे हे इति। हेवं चलाः हतेंद्रियगणाः मे मम बोधाय समापिनाचिरं आत्मदर्शनाय वः वेलाअवसरो

वाह्यानाभ्यंतरांश्चैव स्पर्शान्परिजहत्क्रमात्। इदमाकलयामास मनसा विगतैनसा॥ ११। अहो नु चंचलमिदं प्रत्याहृतमपि क्षणात्। न मनः स्थैर्यमायाति तरंगप्रौढपर्णवत्॥ १२। चक्षुरादिभिरुद्दामैरूपैराहितसंभ्रमैः। अजस्रमुत्पतत्येव वीटेव तलताडिता॥ १३। त्यजदेवानुगत्त्याति वृत्तीरिंद्रियवर्द्धिताः। यस्मान्निवार्यते तस्मिन्प्रोन्मत्त इव धावति॥ १४। घटात्पटमुपायाति पटाच्छकटमुत्कटं। चित्तमर्थेषु चरति पादपेष्विव मर्कटः॥ १५। पंचद्वाराणि मनसश्चक्षुरादीन्यमून्यलं। दग्धेंद्रियाभिधानानि तावदालोकयाम्यहं॥ १६। हे हे हतेंद्रियगणाः किम्मे बोधायने हवः। वेलाविलुलितां स्नामर्त्थिनामिव चंचलाः॥ १७। मा कुरुध्वमनर्थाय चापलं चपलाशयाः। स्मरतातीतदृत्तीनि दुःखजालानि भूरिशः॥ १८। रूपाणि मनसो यद्यं जडा एव किलाधमाः। जडेतरत्वेक्षितान्यर्थम्रगतृष्णेव वल्गति॥ १९। असारात्मस्वरूपाणामनालोकवतां सदा। अंधानामुद्गतिर्व्यर्थं सादृश्यायैव जायते॥ २०।

न्वल्गितिं। १७। १८। एवं मनसः स्वव्यापारभेदेन कल्पितानि स्वरूपाणि जडेतरद्वयोरभेदान्न लेशतस्त्विक्षितानितरंगो त्सेकवत्केवलं व्यर्थं वल्गति। १९। असारात्म अनंतं स्वरूपं येषां तथाविधानां भवतां अनालोकवतां आत्मज्ञानशून्यानां या समुद्गतिर्दुर्विनयादमार्गप्रवृत्तिः सेयं अंधानां मादृशस्याय उपमार्थमेव जायते अमार्गधावतामंधानां कूपे पातस्योप

मा जायत इत्यर्थः २०

यदिदं जडाः कर्तारिः दर्शनादिना सर्वव्यवहारं करोति तत्राह चिरादिति ॥ २१ ॥ नीरूपाः सत्यस्वरूपशून्याः ॥ २२ ॥ येन साक्षिणा बहुज्ञेन सर्वावभासकेन नयनादयः परिज्ञातास्तेन सह स्पर्शमनागपि संबाधो नास्ति धूपातालयोर्लता द्रुम्योर्दिशो वा पातालतलादिभिः दूरदिवरर्थः ॥ २३ ॥ चिन्मात्रं चिरैकरसः प्रत्यगात्मा पराग्भ्य इन्द्रियेभ्यो दूरं तिष्ठति । सर्वचिरतानि व्यत्ययेन स्वयंमरिति श्रुतेरिति भावः ॥ २४ ॥ तर्हि कथमिन्द्रियव्यापारे आत्मनो निमित्तता प्रसिद्धिस्तत्राह चित्सत्तेति । दिनकार्याणि आह्रहण्यादीनि तद्वत् ॥ २५ ॥ इदानीं चित्तं संबोध्य बोधयति चि

चिरात्त्वामहमागत्य सर्वं साक्षित्वेन करोम्यहं । हतेन्द्रियगणाय त्वं किं निरर्थकमाकुलः ॥ २१ ॥ मिथ्यैवमे विवल्गन्ति नीरूपा नयनादयः अलातचक्रप्रतिमाः सर्परज्जुभ्रमोपमाः ॥ २२ ॥ ते नात्मना बहुज्ञेन निर्ज्ञाता श्चक्षुरादयः । मनागपि न संबंधो धूपातालतलादिवत् ॥ २३ ॥ भीतः पान्थ इवाहिभ्यः पुल्कसेभ्य इव द्विजः । दूरे तिष्ठति चिन्मात्रमिन्द्रियेभ्यस्त्वनामयं ॥ २४ ॥ चित्सत्तामात्रकेणालं संक्षोभो भवतामिथः । तिष्ठति स्वैरमादित्ये दिनकार्यवतामिव ॥ २५ ॥ चित्तचारणचार्वाक चतुर्दिक्कुक्षिभिक्षुक । एवं व्यर्थमनर्थाय मे वं विहर हे जगत् ॥ २६ ॥ अहं चिद्वदिति व्यर्थमसत्यात्तव वासना । अत्यन्तभिन्नयोरैक्यं नास्ति चिन्मनसोः शठ ॥ २७ ॥ जीवाम्येवाहमित्येषा तवाहंकारदुर्मतिः । मिथ्यैव जाता दुर्भावाय न सत्यासत्यवर्जिता ॥ २८ ॥ अहंकारोदये मोऽस्मीत्येतां संरब्धतां त्यज त्वं । न किंचिदपि सर्वत्वं किं व्यर्थं तरलायसे ॥ २९ ॥ संविच्चित्त्वमना दान्तं संविदोऽन्यन्न विद्यते । देहेऽस्मिंस्तन्महामर्खं किंलं स्याश्चित्तनामकं ॥ ३० ॥ विषपर्यवसाने यं रसायनवदुत्थिता ॥ भोक्तृताकर्तृताशंका बत चित्तमुधैव हि ॥ ३१ ॥

लेत्यादिना । इन्द्रियाणां बहिर्मुखता प्रचारहेतुत्वाच्चारणदेहात्माभिमानित्वाच्चार्वाक । चतस्रपु दिक्षु कुक्षिभरणाय भिक्षुका ॥ २६ ॥ चिद्रूपत्वे चेतनमिति वासना भ्रान्तिः ॥ २७ ॥ न सत्येति न त्वहंकाराधीनं जीवनं सत्यं असत्यमपि तस्मिन्सुषुप्तौ जीवनदर्शनात् इतोऽपि मिथ्यैव सा यतः सत्येन परमात्मना वर्जिता । न प्राणेन नापानेन मर्त्यो जीवति कश्चन इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रिताविति श्रुतेरित्यर्थः ॥ २८ ॥ अहंकारस्य अभिमानाख्यपरिणामस्य तदर्थे जाते सकार्यकरणसंरब्धतां अभिमानं ॥ २९ ॥ न चैव सत्स्वरूपं दुर्लभं त्वया अ

---

इन्द्रियगणानामाश्रमणमाश्रयं हन्त्वेति शेषः ॥ अन्येन साक्षिणा ॥ ३२ ॥ भोगानुभवशक्तिशून्यस्य जडस्य मिथ्याभ्रतस्य च तव भोगाशा व्यर्थेत्याह कस्त्वमिति ॥ ३३ ॥ आत्मैव तेनास्ति त्वेत दुपपादयति यदिति । तत्परसत्ता वशादिद्यमानत्वमाभास्मा न मेव स्फुरिकलोहित्यमिव स्वतः ॥ अमृतया चित्तं ज्ञत्वं च कर्तृत्वं च भोक्तृत्वं च मन्यते दर्पपरमनुसंधत्त इति मन्यस्त्वं च तेषां चैतन्यमन्तरेण संभवात् ॥ ३४ ॥ तर्ह्यहं प्रत्यक्चेतनरूपमेव किं नस्यामिति चेत्तर्हि तव सरागनिर्विकल्पैव स्थितिर्मुक्तानतु दुःखदाकर्तृत्वभोक्तृतामावाभावावि

मोपहासपरं गच्छ स्वेन्द्रियगणाश्रयं ॥ न कर्तात्वं न भोक्तात्वं जडोऽस्यन्येन बोध्यसे ॥ ३२ ॥ कस्त्वं भवसि भोगानां के वा भोगा भवन्ति ते ॥ जडस्यात्मैव ते नास्ति बन्धुमित्रादितः कुतः ॥ ३३ ॥ यज्ज्ञत्वं तद्धि वास्त्येव स्वरे वा सत्तया चितं ॥ ज्ञत्वकर्तृत्वभोक्तृत्वमन्यत्वानाम संभवात् ॥ ३४ ॥ प्रत्यक्चेतनरूपश्चेत्त्वं तदात्मैव तेवपुः ॥ भावाभावमयी चित्तसत्ता ते केव दुःखदा ॥ ३५ ॥ यथा कर्तृत्वभोक्तृते मिथ्यैवाधिगते त्वया ॥ मया ते हि प्रमाण्येते शृणु युक्त्या कथं शनैः ॥ ३६ ॥ स्वयं तावद्भवानेव जडो नास्त्यत्र संशयः ॥ जडस्य कीदृक्कर्तृत्वं नत्वं तीह कथं शिलाः ॥ ३७ ॥ नृपजीवविरं तस्माद्युद्धं तद्राग मेश्वरं ॥ जीवसीच्छसि हं सि त्वं वृथा पापमिवि वल्गसि ॥ ३८ ॥ क्रियते यत्तु यच्छत्त्या सत्तेनैव कृतं भवेत् । लुनाति दात्रं पुंशक्त्या लावकः प्रोच्यते पुमान् ॥ ३९ ॥ हन्यते असकृत्पश्यत्त्या सत्तेनैव हतो भवेत् ॥ निहन्ति खड्गः पुंशक्त्या हन्तैव प्रोच्यते पुमान् ॥ ४० ॥ पीयते असकृत्पश्यत्त्यापीतं तेनैव तद्भवेत् । पात्रेण पीयते पानं पाता यस्तच्च तेन च ॥ ४१ ॥

कल्पमयी त्वाह । प्रत्यगिति । न च सर्वविकल्पत्यागे चित्ता तात्त्विकी निभावः ॥ ३५ ॥ अचेतनत्वे तु अयत्नेनैव कर्तृत्वादिकं प्रमाणितुं शक्यमित्याह यथेति ॥ ३६ ॥ शिलाः शिलापुत्रिकाः ॥ ३७ ॥ यदि राजवेकाष्ठप्रतिमा चेतनव्यापारस्यजीव्यत्यंती तर्हि त्वमपि तेरेखरे चित्तसमोगउपजीवतथा च प्रतिमान्तस्य फलभो [illegible] कायथा चेतर्स्वक्रियानस्यवनप्रतिमा तथा त्वत्कृता जीवनादिफलभोक्ताचिदात्मैवेति त्वं हथाजीवनादर्धधा स्मीत्यर्थः ॥ ३८ ॥ च दस्त्रं शी कुलः ॥ ३९ ॥ पुमानेव हन्ता प्रोच्यत इत्यन्वयः ॥ ४० ॥ सत्तानरः सत्त्वपाता उच्यते न पात्रं ॥ ४१ ॥ न॰२

वा॰टी॰उप॰ चिनोति भोक्तृभोग्यकरणोपकरणादिभावेन स्व एव सर्वं चिनोति । भवच्छब्दस्य सर्वनाम्नो नपुंसके भवदिति रूपं । ५२ बोधयति चिदाभासव्याप्त्या स्फोरयति युक्तं चैतदित्याह बोधनीया
२३० इति । ५३ अतएव बोधसत्ताधीनसत्त्वनामरूपाभ्यामात्मलाभ इत्याह आत्मेति । ५४ तथा चात्मैव स्वाज्ञानात्त्वमिव संपन्नः स्वज्ञानात्त्वज्ञावान्मुच्यत इत्याह एवमिति विग
लितं भावेक्तः । ५५ तदात्मैवाहमिति तादात्म्याध्यासो मास्तु अस्तु वा प्रजनादि दुःखाय । ५६ आलं अंगस्व रूपं । ५७ शक्तिश्चिच्छक्तिसंवलिता माया अतएव वेले

प्रकृत्यैवासि मुक्तः समस्ताज्ञेन बोध्यसे । तेनात्मैवात्मनात्मानं चिनोतीदं हि नो भवत् ॥ ५२ ॥ अनारतं बोधयति त्वामात्मा
परमेश्वरः । बोधनीया बुधैर्मर्त्याः किलाष्टतिशतैरपि ॥ ५३ ॥ आत्मसत्तैव बोधैकरूपिणी स्फुरतीह हि । तयैव चित्तशब्दा
र्थं वंगीकृत्य त्वयास्थितं ॥ ५४ ॥ सर्वं चित्तत्वमज्ञानादात्मशक्ते रूपागतं । ज्ञानेन त्वया विगलितं तं ब्रह्मिममिहातपे ॥ ५५ ॥
तस्मान्न ते तं भ्रष्टं त्वं नासि त्वं परमार्थतः । तदेवाहमिति व्यर्थमतो मास्तु सुखायते । ५६ । अमत्याचित्तकलना इन्द्रजाल
लताइव । विज्ञानमात्रमेवेह ब्राह्मं मंगं विजृम्भितं ॥ ५७ ॥ न रामरजगद्रूपे व्रीलीशक्तिरुदेत्वलं । सास्तु इकराणक ज्वोलजालैर्वे
लेव वल्गति ॥ ५८ ॥ चिन्मयश्चेद्भवेर्भ्रष्ट तत्तस्मात्परमात्सदात् । नित्यमव्यतिरिक्तं त्वं किमन्यत्परिशोचसि ॥ ५९ ॥ सर्वगं सर्वभा
वस्थं सर्वरूपं हितं पदं । जेत्वा प्रोसर्वमेवाद्यप्राप्तं भवति सर्वदा ॥ ६० ॥ न त्वमस्ति न देहोऽस्ति ब्रह्मात्मीहमहत्स्फुरत ॥ अहं त्वमिति निस्पं
देस्फुरत्यार्तिर्हि कस्य का ॥ ६१ ॥

२ । ५८ हे भ्रष्ट त्वं आत्मतत्त्वबोधाच्चिन्मयश्चेद्भवेः तर्हि चित्तोभेदकारणाभावात्परमात्मसदा नित्यमव्यतिरिक्त एव । ५९
तदा अभासविषयाभावात्तु शोको निर्विषयो न संभाव्य इत्याशयेनाह सर्वगमिति सर्वेषु ती तानागतभावेष्वपि स्थितं काल कृत परिच्छेदशून्यमिति यावत् ६० तथा त्वं रथ ज्ञ
प्तिर्घ्यांदम पुरुषव्यत्ययः ॥ अहं त्वमित्याभासो निस्पंदे आत्मनि स्फुरति अतः कस्य का वा आर्तिः ६१

२३०

उक्तकल्पद्वयं पुनः स्पष्टमाह आत्मेति । ५२ । तत्तस्मात् घटित्वं किंचिदात्मान्यघटिभवति तदा किंचन तत्त्वं परमार्थरूपं नेत्यर्थः ॥ ५३ । अहं तु इदं बाल शरीरं अहं तत्तद्देहशरीरं
तत्तद्बालशरीरसंबंधि क्रीडोपकरणादि इह शरीरसंबंधि पुत्रपौत्रादि च मम इति व्यर्थं किं ईहसे न ह्यात्मनस्तस्य संशरीरता बालत्वयुवत्वादि पुः किं स्फुरतीत्यर्थः । ५४ तर्हि
चिरचिरविद्युतिरिक्तं तृतीयं रूपमहं किं न स्यां तत्राह तृतीयेति यथा जगति छायातपान्यतरोनुरंजना सर्वत्र वस्तुष्वस्ये वरतीयाविधा नास्ति तदृ इत्यर्थः । ५५ तर्हि हंत
त्वतः किं स्वरूपमिति चेत्त्वरमसाक्षात्कारः स्त्या अविद्यया महत्तरीय जाड्यस्य त्वरं तर्गतचिदाभासस्य चरमसाक्षात्कारवत्या विमर्शं तं स्वप्रकाशरूपं तत्स्वरूपेत
देवत्वमित्याह सत्येति ज्ञाते तस्मात्सत्यावलोकना हाविमर्शतं ॥ ५६ ॥ ५७ । यद्यहमात्मैव तर्हि मनसे वेरमासद्यं नेह नानास्ति किंचनेत्यादि श्रुतिषु मम आत्मोपकरणत्वेक

आत्मा चेत्त्वं तदात्मैव सर्वगोऽस्तीह नेतरः ॥ आत्मनोऽन्यज्जडत्वं च तत्त्वं नास्त्यस्ति तद्वपुः ॥ ५२ ॥ आत्मैव सर्वं त्रिजगन्नदन्यत्तु न किंचन । तत्त्वं किंचि
त्समात्मान्यघटितत्वं न किंचन । ५३ ॥ अहं त्विदमहं तन्न इति व्यर्थं किमीहसे । असद्वपुः किं स्फुरति शशशृंगेण को हतः ॥ ५४ ॥ तृतीया कलना नास्ति
चिज्जडांशेतरांशतः छायातपनयोर्मध्ये तृतीये वानुरंजना ॥ ५५ ॥ सत्यावलोकनाज्ज्ञाते चित्तजाड्यदृशोः क्षये । संपद्यते यत्तु तज्ज्ञस्त्वं
वेदनमात्रकं ॥ ५६ ॥ तेन भ्रष्ट न कर्तृत्वं न भोक्तृत्वं तवापि च । तदेवासि परं ब्रह्म त्यज मोहं यथात्मवान् । ५७ केवलं ज्ञत्वविषयमुपपत्तिसिद्धये
तया करणभूतेन करोत्यात्मेति कथ्यते ॥ ५८ ॥ असत्त्वरूपं करणं जडं निरवलंबनं । निस्पंदनेन स्पंदेत कर्तृसंबोधनं विना ॥ ५९ ॥ अकर्तुः
करणस्यास्य शक्तिः काचिन्न विद्यते । शत्रस्य लावकाभावे कर्तृ किमिव शक्नुता ६० खड्गप्रहारश्छेदक्रियायां पुंसि शक्तिता । भवद्वेभुज

२ मुक्तं तत्राह केवलमिति ~~...~~ देवित्तमर्वांगेव विशक्तिता ६१

~~...~~ शास्त्राचार्य हतानां तत्त्वमसीत्यादि उपदेशानां प्रयोजनसिद्धये करणे तेन कल्पितेन त्वया केवलं शुद्धसत्त्वं स्वसंबन्धसंसाक्षात्काभ्रान्तिविषयं करोति यथा स्वप्नावतत्वं शरीरि
स्वर्दंगोपाध्यमिति भ्रष्ट न स्वपुरवेनेव करणेनापुरुषं पश्यतीति तद्वदिति भावः ५८ करित्वं करणस्य भावमेव संमन्यते तर्हि तद्वदनेन ज्ञितः सामर्थ्यं नास्तीति कर्तृत्वाभिमानतत्त्वश्रेदेन्येन तद्दृपार

देशार्थ

वा०टी०उ०प० २३१ प्राकृतेषु पामरतुल्येषु प्रकृतिकार्येषु आत्मनस्तु शोभत एव। ६२। नन्वीश्वरस्य मोहान्जीवतां प्राप्तः अशनायादिना पीड्यमानाः। कथं मयोपेक्षणीय इति तद्दुःखं सर्वप्रद
लेर्थट मा[illegible] नमहं तमनुशोचामीति चेत्तत्राह ईश्वर इति
यस्त्वया सदृशः स एव त्वया शोच्यः ईश्वरस्तु न तादृश इत्यर्थः। ६३। गर्वात्कार्यकरणसंघाताभिमानात् एनमात्मानमुपकरोमीति मत्वा त्वया अल्पापरिच्छिन्ना धीर्बुद्धिः
क्लिश्यते पीड्यते संघाते तु वसतां पंचप्राणमनोबुद्धिदशेंद्रियाणां सर्वेषामचेतनत्वाद्भोगेनार्थ इति न किंचिदुपयुज्यत इत्यर्थः। ६४। अतः परिशेषादीश्वरस्यार्थे त्वत्प्रवृत्ति

तस्मान्नास्ति सखे कर्तुं मा व्यर्थं दुःखभाग्भव। परार्थं क्लेशिता सर्वे प्राकृतेषु न शोभते। ६२। ईश्वरो नेदृशः शोच्यो यस्त्वया सदृशो
भवेत् ॥ न च तस्यकृते नार्थो नाकृतो नेह कश्चन॥ ६३। गर्वादुपकरोम्येनमिति केवलमल्पधीः। क्लिश्यते वसतां त्वर्थो न किंचिदुप
युज्यते॥ ६४। कर्तुर्भोगेश्वरस्यैव मर्थं चेदनुवर्तसे। तदस्य का चिन्नेच्छेह तत्त्वतात्मवदेव हि। ६५। अहं त्विमावभासेन सर्वगेन चिदा
त्मना। एकेनैवेदमाशर्णं कल्प्यनेवास्ति नेतरा॥ ६६। एकानेकावभासेन समस्तेन तदात्मना। आत्मन्येवांतरात्मांतः क्रियते किं किमि
ष्यते॥ ६७। तादृशस्य तु दृश्येव वक्ष्यता जायते सुधा। आलोक्य राजमहिषीयत्नो भस्मयी यथा। ६८। आत्मना सह संबंधं चे
तः कर्तासि सुंदर किं तु नास्यास्ति संबंधि कुसुमस्य यथा फलं। ६९॥

र्वाच्या तत्र तत्कमेवोत्तरमित्याह कर्तुरिति। ६५। कुतस्तस्यनेच्छेति चेत्पूर्णत्वादद्वयत्वाच्चेत्याह अहं त्विमेति॥ ६६। सर्वस्य जगतः स्वात्मनि तेनैव कल्पितत्वेनास्य सत्ताभावादपित
त्रतस्य नेच्छेत्याह। एकेति आत्मना आत्मन्येवाविद्यकेन एकानेकावभासेन तज्जगद्रूपेण क्रियते तत्र किं किमलभ्यं यदिष्यते॥ ६७। यदि सर्वमीश्वरस्य तर्हि तत्र कथं ममेच्छा त
त्राह तादृशस्येति। सर्वस्येत्यर्थः। ६८। तर्हि तेनेश्वरेणैव संबध्यतद्नुग्रहात भोगानलप्स्यामि तत्राह आत्मनेति। आत्मसंबंधेच्छा मा भूदित्याह सुंदरेति। अस्यात्मनः संबंधि संबं राम २३१
धयोग्यं नास्ति। यथा कुसुमादुत्पन्नमपि फलं कुसुमबहिर्मुखत्वात्तद्भोगं ध्याद्युपभोगसंबंधयोग्यं न भवति तद्भिन्नदेशे कुसुमस्यैवतिरोभावात्तद्वत्वमपीत्यर्थः॥ ६९॥

संबंधायोग्यतामुपपादयितुं मुख्यसंबंधलक्षणमाह द्वितीयेनेति। एकस्य द्वितीयेन समं एकतरक्रियया उभयक्रियया च मिलनात्तस्य एवं स्यात् बद्धत्वं अपरं तदभावस्तेन एक
ता सा संबंधगतिः संबंधस्य फलतो लक्षणमित्यर्थः॥ तदेवं स्पष्टमाह प्राग्इति॥ ७०। तादृशे मुख्ये संबंधे भवान् अहेतुः यतस्त्वमेकत्वतो नेकविधा कार्यतश्च नानाप्रका
रेस्वनानानारूपविहितनिषिद्धक्रियोन्मुखी सुखदुःखदशा आसमंतात्तस्य ताप्रसिद्धेत्यर्थः॥ ७१। समयोः क्षीरयोः अर्धसमयोः क्षीरनीरयोः विलक्षणयोर्वारि
वाग्न्योरिवात्यंतविरुद्धयोः यत्तत्क्वचिद्विरुद्धसन्निपाते सति अन्यः एकतरस्य नाश एव दृष्टो न संबंधावस्थानमित्यर्थः॥ ७२। ननु शब्दस्पर्शरूपादिविरुद्धगुणवतामपि
सूक्ष्मभूतानां पंचीकरणेन संबंधवन्मम आत्मसंबंधः किं न स्यात्तत्राह द्रव्यांतरगुणा अपि परमेलनेन पंचीकृतद्रव्याण्याश्रयंति तथा वायुः शब्देकगुणमाकाशं शब्दस्पर्श

द्वितीयेन समं येषां तत्ता बद्धत्वमेकता। सा संबंधगतिः प्रोक्ता प्राग्दुग्धदध्नुनेकता। ७०। नानाप्रकारैर्नानारूपक्रियोन्मुखी सुखदुःख
दशा हेतुर्भवान्नेकविधास्तता। ७१। संबंधः समयोर्दृष्टस्तथार्धसमयोरपि। न विलक्षणयोश्चान्यस्तस्मिन्नास्ति जगत्त्रये। ७२। द्रव्यांतर
गुणा द्रव्याण्याश्रयंति बहून्यलं। संविरिश्चाव्ययं दुःखं विद्रोमाच्युतो भव। ७३। एतावतैकध्यानेन नित्याध्यानोथवा त्वदृक्। अभावे
दुःखदस्यांतर्दशा दृश्यस्य वस्तुनः। ७४।

गुणो मरुता शब्दस्पर्शरूपगुणोग्निस्त्रिगुणं तेजउच्यते शब्दस्पर्शरूपरसगुणोपश्चतुर्गुणाः शब्दस्पर्शरूपरसगंधैः पंचगुणा महीति। इह तु संविज्जडयोर्विरोधाज्ज
डात्मनः संविदः च्यवनं चेत्ताधकाभावाज्जडांशेन सिद्धान्येवेति तदसिद्धिप्रसंगदुःखं संविदः स्वकाशात्तव च्यवनं चेत्तयास्वनाशार्थमेवात्मसंबंधोपेक्षितः स्यात् अत आत्म
संबंधमपेक्षमाण उभयथापि त्वं संविदः स्वकाशान्माच्युतो भवेत्यर्थः॥ ७३। अथवा अंतर्दशासंविदा दुःखस्य दृश्यस्य त्वन्नादेर्वस्तुनः अभावेनाशे सति निर्दुःखनि
रतिशयानंदस्वभावपरिशेषः एतावता चेत्त्वं तुष्यसि तदा एकाग्रेण ध्यानेन नित्यध्यानस्थिरमविच्छिन्नसमाधिः सन् आत्मदृक् आत्मदर्शी भवेत्यर्थः। ७५

ममा था वेवत वस्तुत्वेन तु संकल्पोन्मुखत्वे ॥ अतः संकल्पैर्निर्झरोदकं शिलासु च्युतमिव देहादिषु च्युता संविदिंद्रियद्वारैर्बहुधा विभज्यमाना विशीर्यत इवेति तदेव दुःख मित्याह संकल्पेति नन्नु नाहं संकल्पयामि किं त्वात्मैव कर्तृतास्वभावात्संकल्पयतीति चेन्नेत्याह कीदृशीत्यादिना ॥ ७६ ॥ तत्काल्पितया नानानानातया आत्मा केवलं स्फुरत्येव न कल्पयतीत्यर्थः ७७ ७८ यथा अंबुधौ तरंगाकारो नास्ति तद्वत् एवमात्मदेवे कलनारहितेऽस्ति देहे मनसि च जडे सति विवेकदृशा इदमन्यदिदमशुभमित्यादि सत्कल्पनाकल्पकाभावादेव नास्तीति संविदेव सारं नेतरदिति सिद्धमिति परेणान्वयः ७९ ॥ ८० ॥ नदेवस्य इष्टमाह संवेद्येति ॥ ८१ ॥ ८२ ॥ ऋग्वेदग्रहणे लेख्यमात्रो

संकल्पोन्मुखतां विद्धि दुःखदां संविदश्च्युतिं ॥ जडेऽप्यलम्भ तेषु मनोदेहेंद्रियादिषु ॥ ७५ ॥ कीदृशी कर्तृता चित्रपुष्पं व्योम्नि कथं भवेत् निरस्तकलनापंके मनन ध्वंसरूपिणि ॥ ७६ ॥ नचैवात्मनि कर्तृत्वं संभवत्यंबरागवत् ॥ अतोऽकेवलमात्मैव नानानानातयात्मनि ॥ ७७ ॥ स्फुरत्यब्धिरिवांभोभिः फेनबुद्बुदवीचिभिः ॥ आभासमात्रे सर्वस्मिन्स्फुरत्यस्मिंश्चिदात्मनि ॥ ७८ ॥ द्वितीया नास्ति कलना तरंगाकार इवांबुधौ कलनारहिते देवे देहे मनसि वा जडे ॥ ७९ ॥ संवित्सु वेद्यनिर्मुक्ता सारं सुंदरनेतरत् इदमन्यदिदं चान्यच्छुभं वाशुभमेव च ॥ ८० ॥ इत्यसत्कल्पना नास्ति यथा नभसि काननं संवेद्यरहितं संविन्मात्रमेवेदमाततं ॥ ८१ ॥ तत्रायमहमन्यो यमित्यसत्कलनाकथं अनादिमति नीरूपे सर्वगे विततात्मनि ॥ ८२ ॥ आरोपयेत्कः कलनामृग्वेदं व्योम्नि को लिखेत् । नित्योदिते सकलवस्तुपदार्थसारे संवित्स्थिते भरितनिर्भरसंरिदिर्के ॥ आत्मन्यसत्यमिव साधुगतेऽमलत्वात्क्षीणो सुखासुखलवो मम वैसमोहः ॥ ८३ ॥ मोक्षोपायेऽप्युपशमप्रकरणे इंद्रियानुशासनयोगोपदेशः सर्गः ॥ ८२ ॥

पलक्षणं ॥ ८३ ॥ हे चित्त त्वया अमलत्वात्स्वनैर्मल्यात्सकलेषु वस्तुत्वेन प्रसिद्धेषु परेषु अर्थेषु च सारभूते संविन्मात्रस्वभावस्थिते आत्मनि भरितनिर्भरसंरिदिर्के यथास्यात्तथा साधु असंदिग्धापरोक्षतया गते अवगते सति मम सुखासुखलवो असत्यमिव मृगतृष्णोरगरज्जुसर्पशुक्तिरजतादिकमिव क्षीणो यतः वै इति निश्चयेन सप्राक्तन सुखदुःखभ्रमप्रत्ययः मोहोभ्रांतिरेव न यथार्थमित्यर्थः ॥ ८३ ॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे द्व्यशीतितमः सर्गः ॥ ८२ ॥ राम॰ २३२

---

समस्तदोषानर्थाश्रितेंद्रियगणेभ्यस्तीर्णसमस्तगुणैरस्य्यामिल्लदमस्तेऽक्रीड्यते ॥ धवलाः शुद्धा मेधा धारणा यस्यास्तत्संबोधने हे धवलमेधश्रुते। स्थ ॥ १ ॥ इंद्रियगणस्यार्थेऽनर्थे तन्नेन कृतं रहसि प्रबोधनं ते स्फुटं वक्ष्यामि ॥ २ ॥ हे इंद्रियादिगणाः भवतां एषा अविचारदशाप्रसिद्धा आत्मसत्ता सीया विद्यमाना जीवनकाले बहुतारानर्थदुःखाय एव तद्धृदि च अंतदायिनी पुनः पुनर्मर्त्यसुनरकादिदायिनी ॥ तत्रस्मारितिप्रागदर्शितविचारेण तां आत्मनः असत्यां सतां त्यजंतु ॥ ३ ॥ मदीयेन प्राक्तनेनात्मतत्त्वोपदेशेन हि यतो यूयं अज्ञानसंभवाः उपदेशे

श्रीवसिष्ठ उवाच ॥ भूयो मुनिवरो धीरो धियाधवलमेधसा ॥ स्वमिंद्रियगणं गुप्तो बोधयामास साध्विदं ॥ १ ॥ तत्त्वेंद्रियगणस्यार्थे शृणु वक्ष्यामि ते स्फुटं ॥ श्रुत्वा तद्भावनामेत्य परां निर्दुःखतां व्रज ॥ २ ॥ भवतामात्मसत्तैषा दुःखायैवांतदायिनी ॥ असत्यामात्मनः सत्तां तद्वत्तां त्यजंत्विति ॥ ३ ॥ मदीयेनोपदेशेन सत्तैषाम भवतां क्षयं ॥ गतैवेति स्फुटं मन्ये यूयं ह्यज्ञानसंभवाः ॥ ४ ॥ सुमत्तास्फुटतां याति दुःखायतव चित्त फ ॥ तप्तकांचनरुद्वासो दाहायैवस्य पार्श्वयोः ॥ ५ ॥ पश्यत्वयि सति भ्रांतजडकल्लोलसंकुलाः विशंति काल जलधिं संसारसरितां गणाः ॥ ६ ॥ पतंत्यहमहमिकाविहितान्योन्यचिंतिताः ॥ कुतोऽपि दुःखावलयो धारा आसारगा इव ॥ ७ ॥ परिस्फुरत्यपर्यंता हृदयोन्मूलने घना ॥ आक्रंदकारिणी क्रूरा भावाभावविसूचिका ॥ ८ ॥ काशश्वासरणद्भृंगाकलेवरजरद्रुमे विकसत्यमलो घाता जरामरणमंजरी ॥ ९ ॥

नाज्ञानेन स्वेनसतां लप्स्यथेऽस्वर्थः ॥ ४ ॥ इदानीं चित्तं प्रत्युपदिशति येवाहस्वसत्तेति । तप्तं कांचनमिव ज्वलन् रोतीति तप्तकांचन स्तत् अग्निस्तस्मिन् लासः क्रीडा बालानां पक्षिणां वा पार्श्वयोः दाहायैव ॥ ५ ॥ चित्तेंद्रियगणसत्ता प्रयुक्ता मनर्थपरंपरां दर्शयति पश्येत्यादिना तद्योरभेदात् जडानां मूर्खाणां रागद्वेषादिकल्लोलैः संकुलाः ६ अहमहमिकाः परस्परोहंकाराः ॥ विहिताः अन्योन्यवधपराजयपीडनादि चिंतनानि यासु ताः ॥ ७ भावाभावौ संपद्विपदौ ॥ ८ ॥ ९ ॥

कल्लोलैर्मनोरथभंगैर्व्यालैर्वेल्लिते शरीरश्वभ्रकोटरे हृदये ॥ घननीहाराणि निबिडजाड्यानि रवानीं द्रियवृंदद्वाराणि यस्य चिंतालक्षणा चपला जालरचनव्यग्रा मर्कटी क्रीडां नाभिकीर्टिकाम्ब्रमतीति शेषः ॥१०॥ लोभलक्षणः ॥ नाघैः सविलासैरारटन् कूजन् पक्षी तीक्ष्णया तुरवडुः खादिदं हृल्लक्षणया तुंडया चंचा गुणवंडं शांतिधर्मादि फलपुष्पलक्षणं गुणसमूहं निर्कृंतति ॥११॥ कामलक्षणः कुक्कुटः रागादिवासनाकीर्णं हृदयं मनस्तद्रक्षणां अवकरं उत्कर्षं कुरुते पुनः पादाभ्यां वि किरतीत्यर्थः

कल्लोलव्यालवलिते शरीरश्वभ्रकोटरे ॥ घननीहारखेसांतश्चिंताचपलमर्कटी ॥१०॥ लोभनाघारटत्पक्षी तीक्ष्णयाहं हृतुंडया कायजीर्णद्रुमादस्माद्गुणखंडं निकृंतति ॥११॥ हृदयावकरं कीर्णमितश्चकर्कशः ॥ अपवित्रो दुराचारः कुरुते कामकुक्कुटः ॥१२॥ महत्यां मोहयामिन्यामुल्बणोऽज्ञानकौशिकः ॥ श्मशान इव वेतालः परिवल्गति हृद्द्रुमे ॥१३॥ एताश्चान्याश्च बह्व्योपि त्वय्यींद्रियगणे सति ॥ पिशाच्य इव शर्वर्यां प्रबलांत्यशुभश्रियः ॥१४॥ त्वयि त्वे सति हे साधो सर्वाण्यशुभश्रियः ॥ प्रभात इव पद्मिन्यः सालोकं विलसंत्यलं ॥१५॥ प्रशांतमोहमिहिकं राजते हृदयांबरं ॥ निर्मलाशोकवलितं नीरजस्कतरांतरं ॥१६॥ अशंकितनभःकोशपतिताकुलप्ररवत् ॥ नापतंति विकल्पौघाश्चिरं वैकल्यकारिणः ॥१७॥ सर्वस्याह्लादनी शीता मैत्री परमपावनी ॥ आभ्युदेति हृद्दोहद्यामृततरोरिव मंजरी ॥१८॥

१२। अज्ञानं भ्रांतिज्ञानं तल्लक्षणः कौशिकः उलूकः ॥ १३ ॥ १४ ॥ इदानीं चित्तेंद्रियगणशमत्वे सर्वगुणसंपत्तिं दर्शयति त्वयीत्यादिना । अमत्वे साधुरेवेति तथा संबोधनं शुभश्रियो वक्ष्यमाणगुणश्रियः सालोकं विवेकालोकसहितं यथा स्यात्तथा प्रभातपक्षेपि यथायोग्यं योज्यमेवमग्रेपि । १५ । हृदयांबरं हार्दब्रह्म नीरजस्कतरं अत्यंतापगतरजोगुणं । आंतरं मनो यस्मिन् । १६ । आशंकितं निःशंकमेव नभःकोशे पतिता निर्गता वा घ्रादिना आकुला अश्रये आसारप्ररास्तद्वत् वैकल्यकारिणो विक्षेपहेतवो विकल्पौघाः नापतंति । १७ १८ । 

अंतस्थितं अपूर्णता ॥ जाड्ययुक्ते पुरुषे शेषेव अप्रयुक्ताउपभोजिताः विद्याकौशलादिगुणाः यथा पद्मिनी पक्षे स्पष्टं ॥ १९ ॥ अंतः आंतरतत्वं आलोकेन सत्ये यज्ञानप्रकाशेन स्फुटतां प्रकटतां ॥ २० ॥ अपराहतं वैषम्यहेतुभिरपि अनभिभूतं हृदयं मनः ॥ २१ ॥ २२ । संविदः आत्माकारवृत्तयः स्फुटतां दर्शनापादकविकासं यांति । तेन च सचराचरं समग्रं जगत् वाधितं शेषं विदंशैः करविश्रांतं भवतीति शेषः । २३ । वपुः आत्मस्वरूपं भरिताकारं पूर्णं भाव्यते अनुभूयते । न तु आशापाश विधायिनां असुसंगानां देहादीनां पक्षे भवतीत्यर्थः अथवा वपुः शरीरं आनंदाविर्भावं मंथरं सत् अमृतप्राशनेनेव भरिताकारं भाव्यते न तु अन्नपानाद्या शापाशविधायिनां असुसंगानां प्राणसंगपावनां पक्षे भवतीत्यर्थः 

अंतश्छिद्रवती जाड्ययुक्तायुक्तगुणास्वयं ॥ चिंता शोषमुपायाति हिमदग्धेव पद्मिनी ॥१९॥ आलोकः स्फुटतामंतराय्यात्यज्ञानसंक्षये प्रशाम्यत्येव देह्योग्निशरदीवार्कमंडलं ॥२०॥ प्रसन्नस्फारगंभीरमक्षुब्धमपराहतं । हृदयं समतामेति शांतवात इवार्णवः ॥२१॥ अमृतापूरपूर्णेन नित्यानंदमयेन च ॥ स्थीयते पुरुषेणांतःशीतेन शशिना यथा ॥२२॥ संविदः स्फुटतामंतरायांत्यज्ञानसंक्षये ॥ संविदंशैः करविश्रांतं समग्रं सचराचरं ॥२३॥ भाव्यते भरिताकारं वपुरानंदमंथरं । न भवत्यसुसंगानामाशापाशविधायिनां ॥२४॥ दग्धानामिव पर्णानां रसानां पुनरागतिः । पुंसां क्षपितसंसारजराजन्ममहाध्वनां ॥२५॥ अपुनर्जन्मरण्यायात्म द्रुमे विश्रम्यते चिरं । एवं प्रायास्तथान्याश्च भवंति गुणसंपदः ॥२६॥ असति त्वयि सर्वाशिन् सर्वाशाक्षयसंक्षये । पक्षयोरेतयोश्चिन्तमन्त्रासेतास्वरूपयोः ॥२७॥ येनैव परयासि श्रेयस्तमेवांगीकुरु क्षणात् आत्मभावस्तव प्रभुरेवं मन्येमानवतांवर ॥२८॥

२४ यथा तप्तैर्दग्धानां पर्णानां पुनर्वर्षासु पद्मत्रयोस्येन आगमो भवति तद्वत् ज्ञानाग्निक्षपितसंसारजन्मोपलक्षितसंसारमहाध्वानामपि पुंसां संसारनामारोग्यतुष्टिपुष्टिकांत्यादिगुणानां पुनरागमो भवतीत्यर्थः २५ । निरतिशयात्मनि पुनरावृत्तिरहिता विश्रांतिरेव सर्वगुणसीमा तदानुषंगिका अन्ये गुणास्त्वनंता न वर्णयितुं शक्याः इत्याशयेनोपसंहरति अपुनरिति । २६ एतयोरेवं स्यात् त्वभावेन स्थितिर्दृश्यं ति कनेरात्म्यसीकारो वेत्येतयोः पक्षयोर्मध्ये २७ यत्प्रथमपक्षो करीयानित्याहस्वात्मेति । २८ । रामराम राम राम राम

वा॰रा॰उप॰
२३४

आभावभावांतरशून्यं॥ ननु किमर्थमंतर्भावितचेतनेन पूर्वसिद्धमनोरूपेणैव जीवनं मम नेच्छसि किमर्थममात्यंतमभावमिवेच्छसीत्याह यदीत्यादिना॥ हे चित्त तवांतर्भावितचेतनं यत्प्रसिद्धं रूपमस्ति तद्यदि सत्यं भवेत्तर्हि तेन रूपेण जीवतस्तवाभावं क इच्छति किंतु त्वं तेन रूपेण नास्त्यसि असदसि अहं सत्येनेत्यादि शास्त्रानुभवादिना विचार्य वृद्धामिना पातदर्शनेनेत्यर्थः॥ २९॥ ३१॥ तदत्यंतात्मभावेनावस्थानं तवापिहितमित्याह तेनेति एवं प्राथमकल्पिकमेवाभियावदेतयतः॥ ३१॥ सेवमोत्येति॥ ३२॥ समरूपं सन्मात्ररूपं समं विक्षेपवैषम्यशून्यं स्थितं॥ अनालोकात्प्रकाशाभावात्॥ ३३॥ अनेन अल्पविवेकत्वेन हेतुना नान्वसतः पीनत्वं कथं भवेन्नाहमो हेति॥ ३४॥ पीन

तमेवमाब्याभावं सुखत्यागो हि मूढता। यदि त्वत्तिभवेत्सत्यमंतर्भावितचेतनं॥ २९॥ जीवतस्तत्तवात्यंतमभावं क इवेच्छति॥ किंतु नास्यसि सत्येन वदामि तव सुंदर॥ ३०॥ तेन मिथ्यैव जीवामीत्याशया मा सुखी भव॥ पूर्वमेव सि नास्त्येव यावद्भ्रांत्या लदस्तिता॥ ३१॥ सेवेदानीं विचारेण भ्रंशं समुपागता॥ एतावदेव ते रूपं मा शोचयद विचारणं॥ ३२॥ विचारे विहिते सम्यक्............ समरूपं समं स्थितं अविचारात्प्रजातं त्वमनालोकात्तमो यथा॥ ३३॥ विचारेणोपशांतं त्वमालोकेन तमो यथा॥ एतावंतं सदा कालं बभ्रवाल्पविवेकिता ३४॥ न वानेनाभिपीनत्वमभ्रद्दुःखैककारणं॥ मोहसंकल्पमात्रेण बालवेतालवद्भवेत॥ ३५॥ द्वंद्वाद्यं तसंकल्पक्षीणं क्षयि भवस्थितं॥ इदानीमुदितं नित्यं स्वप्राग्रपेक्षयं गते॥ ३६॥ विवेकस्य प्रसादेन विवेकाय नमो नमः॥ बहुधापि प्रबुद्धं त्वं चित्त काप्यनुबोधितं॥ ३७॥ चित्ततायां प्रनष्टायां स्थितस्त्वं परमेश्वरः॥ प्राक्स्वरूपविलासस्ते श्रेयसे स्थितिमागतः॥ ३८॥

त्वं तत्प्रयुक्तं सुखदुःखादिद्वंद्वं च अभ्रदितिपूर्वेणान्वयः यतः स्वष्टुराद्यंतसंकल्पेन संकल्पकालस्ववशीर्णं अतः क्षयी तिद्वंद्वविशेषणं॥ यस्य विवेकस्य प्रसादेन इदानीं ज्ञानोदयकाले आविद्यके स्वप्राग्रपेक्षयं गते सति नित्यं अनाद्यंतं आत्मरूपं उदितं तस्मै विवेकाय नमो नम इति परेणान्वयः॥ ३६॥ हे चित्त कत्वं स्वतोपि बहुधा प्रतिबुद्धः शास्त्रेणाप्यनुबोधितः॥ ३७॥ प्रागपि त्वं परमेश्वरः स्थितः संप्रत्यपि प्रबोधतस्ते स्वरूपविलासः स्थितिमागत इति महेश्वरस्यैवेति परेणान्वयः॥ ३८॥ राम॰ २३४

४०॥ ४१॥ चित्तेति पाठे इंद्रियेश्वर सिद्धांतयुक्तिभिः॥ इति विलासरूपं त्वत्स्या अंतः संसारपारमागतो भवतेत्यर्थः स्वस्ति अस्मन्मनसः कालत्रयेपि स्वभाहन्त्यमिति॥ ४२॥ चित्तासत्त्वैव परमपुरुषार्थसिद्धिं दर्शयति निर्वामीत्यादिना॥ ४३॥ ४४॥ ४५॥ शुद्धविवेकरसे अयमात्मेति कलनापि यत्र दुर्लभा तत्र अहरे अन्यकलनेत्याशयेनाह अयमिति॥ ४६॥ अतएव तद्वाचामविषय इत्याह अहमिति अनुदाहरन् अनभिलपन्॥ ४७॥ अहं अंतःस्वहृदि संवेद्येन जडांशेन वर्जितं तत्कारणीविद्याया अपि बाधात्संशांतवासनं चिदाभासस्यापि

समस्तवासनोन्मुक्तः संपन्नोस्मि महेश्वरः। यस्माद्विवेकादुत्पत्तिः सविवेकाद्विनश्यति॥ ३९॥ प्रकाशेन प्रयात्यंतमनालोकोद्भवं तमः॥ अनिष्टतोपि ते साधो विचारे स्थितिमागते॥ ४०॥ सर्वतोप्यनुपायातो विनाशः सुखसिद्धये॥ तस्मान्नास्मि सिनिर्णीतमिति सिद्धांतयुक्तिभिः॥ ४१॥ चित्तेंद्रियेश्वरस्वास्ति भवते त्वं तमागतः॥ नित्यं सर्वमभ्रताय नास्ति रूपाय संप्रति॥ ४२॥ भविष्यते च नोरकं स्वमनः स्वस्ति ते स्विति परिनिर्वामि शांतोस्मि दिष्ट्यास्मि विगतज्वरः॥ ४३॥ स्वात्मन्येवावतिष्ठेहं तुर्यरूपपदे स्थितः॥ अतो नास्त्येव नास्त्येव संसारे चित्तमस्तिति॥ ४४॥ आत्मावस्त्येवास्त्येव यस्मादन्यन्न विद्यते॥ अयमात्माहमेवासौ नास्त्यन्यन्महतेक्वचित॥ ४५॥ स्फुरच्चिदेवबोधात्मा सर्वत्राहं स्थितः सदा॥ अयमात्मेति कलनामन्येनो निर्मलांतरे॥ ४६॥ प्रतियोगिव्यवच्छेदकलने कस्य वै कुतः॥ अहं तेनायमात्मेति कलनामनुदाहरन्॥ ४७॥ मौनी स्वात्मनि तिष्ठामि तरंग इव वारिणि॥ संशांतवासनमनाश्रितचेतनांशमप्राणसंचरणमस्तमितांशदोषं॥ संवेद्यवर्जितमुपेत्य सुखं विरंशं शाम्यामि मौनमहमेव निरीहमंतः॥ ४८॥ मोक्षोपाये उपशमप्रकरणे चित्तसत्ताविचारयोगोपदेशः सर्गः ८३

थगनवस्था नाश्रनाश्रितचेतनांशं तदधीनक्रियाशक्तेरप्युपरमात् प्राणसंचरणं भेदकाभावादेव अस्तमितांशभेदं स्वप्रमेकरसमप्यापि एवमसनवस्था नाश्रनाश्रितचेतनांशं तदधीनक्रियाशक्तेरप्युपरमात् प्राणसंचरणं भेदकाभावादेव अस्तमितांशभेदं समं एकरसं विरंशं चिन्मात्रलक्षणं जगद्बाधपरिशिष्टांशं उपेत्य निरीहं निर्मनस्कं मौनं निर्वाणव्यापारं च शाम्यामि निःस्रोतोस्मीत्यर्थः॥ ४८॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे त्र्यशीतितमः सर्गः॥ ८३

वा॰टी॰उ॰ २३५

समाधिर्वीतहव्यस्य धराविवरसंस्थितिः। हृदि विद्याधरेंद्रत्वगणत्वाद्युपवर्ण्यते॥ इति उक्तप्रकारेण निर्णीय निश्चित्य। १। अपरिस्पंदितो यः अशेषः पूर्णः स्वप्रकाशः संविद्रूप आनंदस्तद्रूपः सन् सुंदरः। २। ३। तस्या दृष्टेरुन्मीलिते अक्षिणि वर्णयति ४। अनंतरिति द्वाभ्यां नासांतमंतर्निस्रुतां निमीलनं याते शेषे उन्मीलितांशां तिरस्कांशे। ४। प्राणप्रांतो नासाग्रं तत्र गतः अस्तः अल्पादल्पः समतमः यात्कस्त्य आलोकः प्रकाश इव लक्ष्माणो ईक्षणे चक्षुषी। ५। ६। कच्छस्य निर्झरसन्निहितदेशस्य। ७। ८। आसारम

श्रीवसिष्ठ उवाच॥ इति निर्णीय स मुनिर्वीतहव्यो विवासनः। आसीत्समाधावचलो विंध्यकंदरकोटरे॥ १॥ अपरिस्पंदिताशेषसंविदानंदसुंदरः॥ बभावस्तंगतमनाः स्तिमितांभोधिशीमनः॥ २॥ अंतरे वशशामास्य क्रमेण प्राणसंततिः। ज्वालाजालपरिस्पंदो दग्धेंधन इवानले ३॥ अनंतर्निस्रुतां याते बाह्यार्थे चाप्यसंस्थिते। शेषेंऽतर्लब्धसंस्थाने तस्यास्फुरितपक्ष्मणी॥ ४॥ प्राणप्रांतगताल्पाल्पसमालोके इवेक्षणे अर्द्धकुड्मलिते तस्य ध्येयः स्थिरमाश्रमतुः समं ५॥ समकायशिरोग्रीवस्थानकः समहामतिः। आसीच्छैलादिवोत्कीर्णश्चित्रार्पित इवाथवा ६ तथास्थितिस्थतस्तस्य संवत्सरशतत्रयं। कोटरे विंध्यकच्छस्य ययावर्द्धमुहूर्त्तवत्॥ ७॥ एतावंतममुं कालं नाबुध्यत किलात्मवान्। जीवन्मुक्ततया ध्यानी न च तत्याज तां तनुं॥ ८॥ तावत्कालं स भगवान्न प्रबुद्धो तु योगवित्। उदारैरंबुदारावैरासारभरघर्घरैः॥ ९॥ पर्यंतमंडलाधीशम्रगयानतबृंहितैः। पक्षिवानरनिर्ह्रादैर्मातंगास्फोटनिस्वनैः॥ १०॥ सिंहसंरंभरवितैर्निर्झरारावसीत्कृतैः। विषमाशनिसंपातैर्जनकोलाहलैर्घनैः॥ ११॥ प्रमत्तशरभास्फोटैर्मर्कंपतटघट्टनैः। वनदाहधमध्मानैर्जलौघोत्थितवल्गनैः॥ १२॥

घनानां वर्षे निर्झरधारासंपातानां घर्घरैः स्वनैरपि। ९। पर्यंतवासिनां मंडलाधीशानां सामंतानां म्रगयासु आनतानां आगतानां बृंहितैर्गर्जितैः सर्वत्रापि शब्दयोज्यः। १०। सिंहानां संरंभरवितैः सक्रोधगर्जनैः। ११। मर्कंपेन विशीर्णानां तटानां गिरिखप्रार्णघट्टनैरास्फालनैः वनदाहेषु धमैः अग्निसंयोगैस्तत्प्रयुक्तध्मानैश्च जलस्य ओघैराहतयः आस्फालनानीव वल्गनानि वहनानि च तैरपि॥ १२॥ राम॰ २३५

धरणीतलात् अस्ते तैर्भृत्यं किल जलैः। अनलवत् कर्कशैस्तापैः ग्रीष्मादितापैरपि न प्रबुध्यते इति सर्वत्र योज्यं। १३। गलितकारणं निष्प्रयोजनं काले वहति सति आसो प्राट्डो ग्राविनुन्नेन पंकेन उपर्युपरि मर्द्यमानेन अल्पेनैव कालेन धरणीविवरे स्तगर्भे कृतः प्रवेशितः इति द्वयोरन्वयः। १४। १५। संपीडितः संश्लिष्टः स्कंधो अस्येत्यर्थः। नहि तस्य समाधिसुखनिमग्नस्य पीडास्ति। १६। १७। सर्वसंकटस्य अस्य कथं जीवनमस्तु तत्राह संविदेवेति। जीवनादृष्टलिंगदेहमतिविंबिता संविदेवास्य तं देहं जग्राह उपाराय पालितवती। प्राणमयः प्राणवृत्तिरू

महोपलतटाघातैर्धरणीतलमज्जलैः। जलौघांदोलनापातैस्तापैरनलकर्कशैः॥ १३॥ केवलं वहति स्वैरं काले गलितकारणं। परियांतीषु वर्षासु लहरीष्विव वारिणि॥ १४॥ स्वल्पेनैव हि कालेन तस्मिन्पर्वतकंदरे। प्राट्डोघविनुन्नेन पंकेनोर्वीतले कृतः॥ १५॥ तत्रासाववसद्भूमौ कोटरे संकटोदरे॥ पंकसंपीडितस्कंधः पर्वतेषु शिला यथा॥ १६॥ शतत्रये स वर्षाणामथ याते स्वयं प्रभुः। व्यबुध्यतात्मरूपात्माधराकोटरपीडितः॥ १७॥ संविदेवास्य तं देहं जग्राहोर्वीनिपीडितं॥ ननु प्राणमयः स्पंदः प्राणसंसरणं विना॥ १८॥ उत्पत्तिप्रौढिमासास्य कलना हृदयांतरे। स्वमनोरूपिणी तस्य हृद्येवानुबभूव सा॥ १९॥ कैलासकाननेकांते कदंबस्य तरोस्तले। मुनित्वं शतमब्दानां जीवन्मुक्तात्मनिर्मलं॥ २०॥ विद्याधरत्वं वर्षाणां शतमाधिविवर्जितं॥ युगपंचकमिंद्रत्वं मणतं सुरचारणैः॥ २१॥ श्रीराम उवाच॥ शक्रत्वादिषु तेषस्य प्रतिभासेषु भो मुने। नियमो नियमश्चैव दिक्कालनियतेः कथं॥ २२॥

पः स्पंदस्तेन तथा च प्राणसंसरणाभावादित्यर्थः। १८। वर्षशतत्रयानंतरं तस्य यद्वर्मं तदा हृदुत्पत्तिरिति। अथ तस्य कलना जीवसंवित् प्रारब्धशेषभोगाय हृद्येव स्वप्नस्यानुक्रमेण क्रमेण प्रौढिं स्योत्स्य मामासु स्वमनोरूपिणी भूत्वा अस्य मानां संकल्पनया अनुबभूव अनुभूतवतीत्यर्थः। १९। यदनुबभूव तदेवाह कैलासेत्यादिना २०। इंद्रत्वं देवराजत्वं २१। कैलासकाननेत्यादिर्दिग्नियमः युगपंचकमित्यादिकालनियमः। अल्पकाले अस्मिन्नेव हृदये देशस्य बतद्रनुभवात् निजमप्रश्नकथमुपपद्यते दिक्कालनियतेः अन्यथा कर्तुमशक्यत्वादिति प्रश्नार्थः। २२

वा॰टी॰उप॰
२३६

अप्रार्तत्येन ज्ञातायां चिति अन्त्ययोरपि देशकालयोर्विस्तृतदेशकालांतरकल्पनासामर्थ्यं भवत्येवं नियतिविरोधः। ननु सर्वात्मिकायां सर्वशक्तिसंपन्नायां परिज्ञातायामित्याशयेन परिहरति सर्वात्मिकेति। तादृशात्मैकस्वभावत्वादनुभवितृचितइत्यर्थः॥ २३॥ स्वबुद्ध्या अनुभूयमानयोरेव देशकालयोः संकोचवैपुल्यनियमानियमौ विरुद्धौ नानुभूयमानेन सह अनुभूयमानस्य तौ अल्पतरनाडीकुहरेष्वल्पकाले विस्तृतदेशकालस्वप्नानुदर्शनादित्याशयेनाह यथेति। यत्र यदा बुद्धौ यथा अनुभवस्तदा तथा नियमः स्थितइत्यर्थः॥ तन्मयता बुद्धिमयात्मन्यध्यस्ततायतइत्यर्थः॥ तन्मयात्मनामिति पाठे हेतुगर्भं विशेषणं॥ २४॥ तेनोक्तहेतुद्

श्रीवसिष्ठउवाच॥ सर्वात्मिकैषा चिच्छक्तिर्यत्रोदेति यथा यथा॥ तथा तत्रानुभवति तथात्मैकस्वभावतः॥ २३॥ यथा यत्र यदा बुद्धौ नियमः स तदा स्थितः॥ देशकालादिनियमक्रमाणां तन्मयात्मता॥ २४॥ तेन नानाविधान्येष जगंति परिदृष्टवान्। हृदि संवेदनाकाशे वीतहव्यो विवासनः॥ २५॥ सम्यग्बोधवतामेषा वासनैवावासना॥ ज्ञानाग्निदग्धादग्धस्य केवबीजस्य बीजता॥ २६॥ कल्पमेकं गणत्वं स चंद्रमौलेश्चकार ह॥ समस्तविद्यानिपुणं त्रिकालेमलदर्शनं॥ २७॥ धीया दृग्दृढसंस्कारः सतं पश्यति तादृशं॥ जीवन्मुक्ततयैवेत्थं वीतहव्योनुभूतवान्॥ २८॥ यथास्थितमिदं विश्वं शांतमाकाशनिर्मलं॥ ब्रह्मैव जीवन्मुक्तानां बंधमोक्षदशः कुतः॥ ३०॥
एतत्संविन्नभो भाति यत्र यत्र यथा यथा॥ तत्र तत्र तथा तावत्तद्धि द्रवते ततं॥ ३१॥

सर्ग १४

येन॥ २५॥ बीजशक्तिनाशाद्दग्धस्य उपलभ्यमानत्वाद्दग्धस्य भर्जितस्येतियावत्॥ २६॥ शंकां समाधाय प्रकृतमेव वर्णयति कल्पमित्यादिना गणत्वं गाणपत्यं॥ २७॥ जीवन्मुक्तस्यापि तस्य भोजकप्रारब्धकर्मोद्बोधितदृढसंस्कारस्य वदेहभोगादिवैचित्र्यप्रतिभासे हेतुरित्याह यइति॥ २८॥ रामशंकास्पष्टा॥ २९॥ दग्धपटन्यायेनासतः प्रारब्धशेषेण प्रतिभासो बाधितानुवृत्तिमात्रं न बंध इत्याशयेन परिहरति यथास्थितमित्यादिना॥ ३०॥ विद्रवते लभते इव॥ ३१॥ राम॰ २३६

२ श्रीरामउवाच॥ एवं स्थिते मुनिश्रेष्ठ जीवन्मुक्तमतेरपि बंधमोक्षदशाः संति वीतहव्यात्मनो यथा॥ श्रीवसिष्ठउवाच॥ २९॥ २

ईश्वरस्यास्मदीयजगत्प्रतिभासवद्धातस्य विनैव बंधं तत्प्रतिभासइत्याशयेनाह तेनेति॥ ३२॥ वीतहव्यदेहोपलक्षितचैतन्यस्यैवास्मदादिसर्वात्मतात्सर्वजंतूनां जगदनुभवो वितस्येवेत्यपि सुवचमित्याशयेनाह धरेत्यादिना नीरूपेषु निरूपेषु प्रतिभासतो महात्मसु विशालतमेषु जगत्सु भुवनेषु यः शक्रः अनुभूतः सः अध्यरीनेषु देशविशेषु दीनानां निर्वासो जनपदइत्यर्थे जातस्य तद्धितस्य जनपदे लुबिति लुपियुक्तवद्व्यक्तिवचने इति बहुवचनं॥ ३३॥ ३४ पैतामहे पाद्मे कल्पे वीतहव्यस्य गाणपत्यकाले कैलासवनकुंजके तस्मीडाहं सोयोभवत्स एव दशानीदाशेंद्रः निषादराजो भूत्वा स्थितोस्तीत्यन्वयः एवमग्रेपि॥ ३५॥ गुरूक्तेः सर्वात्मतामिप्रायमप्रतिपद्यमा

तेनानुभूतानि वहून्यनुभूयंत एव च॥ जगंति सर्वात्मतया ब्रह्मरूपेण राघव॥ ३२॥ धराकोटरनिर्मग्नवीतहव्यचिदात्मसु॥ जगत्सु तेष्वसंख्येषु नीरूपेषु महात्मसु॥ ३३॥ यः शक्रो नवबुद्धात्मा सोध्वदीनेषु पार्थिवः॥ कर्तुं प्रवृत्तो मृगयां क्षणे क्षिन्नपिकानने॥ ३४॥ योहं सोनवबुद्धात्मा पाद्मे पैतामहे भवत्॥ स्थितः स एव दाशेंद्रः कैलासवनकुंजके॥ ३५॥ यो राजा नवबुद्धात्मा भूमेः सौराष्ट्रमंडले॥ स एषो घस्थितो धाराग्रामे बहुलपादपे॥ ३६॥ श्रीरामउवाच॥ मानसः किल सर्गोसौ वीतहव्यस्य तत्र यो॥ देहिनो भ्रांतिमात्रं चेत देहाकारिणः कथं॥ ३७॥ श्रीवसिष्ठउवाच॥ यदि भ्रांत्यैकमात्रात्म वीतहव्यस्य तज्जगत्॥ तदिदं नाम ते राम किं भूयः परिभासते॥ ३८॥ इदमप्यंग चिन्मात्रं मनोमात्रं भ्रमोपमं॥ तदपि व्योम चिन्मात्रं मनोमात्रं भ्रमोपमं॥ ३९॥ वस्तुतस्तु न तत्राम जगन्नैवेंन्नैवेतरत्॥ तथापि तज्जगत्सत्ता भ्रमे स्वे भाति केवले॥ ४०॥

नात्र जनाप्रतत्वंको ह्युदनेन गुरुमुखेन बोधमिथ्यन्नामः एव तियदीति नदेहाकारिणः शक्रहंसादि देहाकारिणः सचेतनाः कथमित्यर्थः॥ ३७॥ सर्वस्यापि जगतो मनः कार्यत्वसम्यक्प्रांतिमात्रत्वस्य च वकुंशउक्तत्वात् तुल्यत्वात् तुल्यपोतियदिदं नाम तो भ्रमिहुं जगत्तत्किं कथं सचेतनैर्जनैर्युक्तं प्रतिभासतइत्यर्थः॥ ३८॥ द्वयोः साम्यमेव दर्शयितिइदमिति॥ ३९॥ एवं सति ज्जगत्सदृशं द्वारदेतद्धि लक्ष्यं यं चन सालक्षण्य वैलक्षण्ययोः प्रतियोगिसिद्धिमंतरेणायोगादितिभावः॥ ४०॥
प

संविन्मात्रत्वेनावशिष्टं यन्मनस्तदेव तन्मयं ॥४१॥ ४२॥ मत्युद्यास उत्पत्तिर्विलासो विपरिणामस्ताभ्यां ॥४३॥ उक्तमर्थं संक्षिप्याह यथा स्थितेनेति ॥ अविकृतेनैव चिदा काशत्वभावेन मायया किंचि चेतयरिवात्मानं कल्पयच्चित्तं स्मन्मस्येव पुनः पुनर्मननान्मनोमिधानं एतितेन च स्फारं जगत्त्वं पन्नमिति एवं दृश्यं जगत् तत्परमार्थत स्तु किंचिदपि नैव ततमित्यर्थः ॥४४॥ इति श्री वा॰ ता॰ उ॰ चतुरशीतितमः सर्गः ॥ ८४ ॥ मुनेः पिंगलमाविश्य समुद्धारस्तनोरिह । जीवन्मुक्तस्थितिश्चात्यं स

माविस्मृतं भविष्यं च तथेदं च तथेतरत् ॥ जगत्सर्वमिदं दृश्यं संविन्मात्रमनोमयं ॥ ४१ ॥ एवं रूपमिदं यावन्न परिज्ञातमीदृशं ॥ वज्रसारं दृ ढं तावदज्ञातं सत्परमीश्वरं ॥ ४२ ॥ अज्ञानात्मन एवेदमित्थं संप्रविजृंभते ॥ मत्युद्यासविलासाभ्यां जलमंबुनिधाविव ॥ ४३ ॥ यथास्थि तेनैव चिदंबरेण स्वचित्तमेवेति मनोमिधानं ॥ स्फारं कृतं तेन जगच्च दृश्यमेवं ततं नैव ततं च किंचित् ॥ ४४ ॥ मोक्षोपाये उपशमप्रकरणे वीतहव्यमनोजगद्वर्णनं सर्गः ॥ ८४ ॥ श्रीराम उवाच ॥ अथ किं वीतहव्यः स संस्थितस्तस्मिन्धरोदरे ॥ कथमुद्धृतवान्देहं समं पन्नस्त्र्य किं कथं ॥ १ ॥ श्रीवसिष्ठ उवाच ॥ अनंतरमनंतात्म वीतहव्याभिधं मनः ॥ स्वमेवात्मचमत्कारमात्रेतमवबुद्धवान् ॥ २ ॥ शार्वस्या स्य गतस्यास्मरत्प्राग्ज्योतिःस्मरणोत्सवं ॥ इच्छाकदाचित्कलं प्राग्जन्मालोकनोन्मुखी ॥ ३ ॥ अशेषान्सददर्शाथ नष्टानष्टांस्तदे हकान् ॥ अनष्टानां ततो मध्यात्तत्कोटरसंस्थितं ॥ ४ ॥ यद्वद्ध्येव प्रौढं सुदेहं तस्यामवन्मतिः ॥ अपश्यत्तत्तथात्र पंके कीटमि वस्थितं ॥ ५ ॥ न

माधिश्चोपचार्यते ॥ समुद्धारस्य तत्स्कारस्य तदुत्तरचर्यायाः विदेहमुक्तपरिशिष्टतद्रूपस्य चतुर्भिः किं वृत्तैः क्रमात्प्रश्नः ॥ १ ॥
अनंतात्म अपरिच्छिन्नब्रह्माकारं स्वमवबुद्धवान्समाधाविस्यर्थः ॥ २ ॥ प्राक्तनं ज्योतिश्चिरकालात् तस्य स्मरणोध्यानकाले ॥ ३ ॥ नष्टानष्टान्कांश्चिन्नष्टान्कांश्चिदनष्टानत स्तदनष्टदेहे हृदयकोटरे जीवरोपाख्यानवक्ष्यमाणन्यायेन स्वकल्पनमेवं संस्थितं वीतहव्यदेहमित्यर्थः ॥ ५ ॥ रा॰ २३७

प्राट्पः ओघेन सरेण उपनीतं किंचिद्दूरं प्रावाहितं ॥ छष्ट स्थेत्युक्त्या अधोमुखतया पातितमित्यपिगम्यते ॥ ६ ॥ तृणानां काशादीनां जालैः अवकीर्णः निबद्धाः त्वग्देहरश्च न्दो यस्य देहपरेनतद्वय बालक्ष्यंते ॥ ७ ॥ प्राणवायुभिस्त्वत्संचारैरिति यावत् ॥ ८ ॥ आकर्तुमीषदपि कर्तुं क्रियमना क्लान्त अक्षिम नाक्लमिति नपोनरूच्यं तत्तस्मा त्तदुद्धारार्थं उपायं ज्ञात्वा एवं परकायप्रवेशयोगप्रकारेण ॥ ९ ॥ जठरीयस्तत्सेवकः पिंगलाख्यो गणस्तदाज्ञया अद्य रक्षिष्यतितस्य चिंतातरमाह अथवेति एतेन देहेन शाम्यामि विदेहमुक्तोस्यर्थः ॥ १० ॥ ११ ॥ त्यागः संश्रयो वा नोपादेयः नापेक्षणीयः विशेषाभावात् ॥ १२ ॥ नदेवाहयादृशइति ॥ अणुतां धूली भावम् १३ पिंग

शरीरं वीतहव्याख्यं धराकोटरपीडितं ॥ प्रावृड्घोपनीतं तरष्ठस्थं पंकमंडलं ॥ ६ ॥ तृणजालावकीर्णत्वग्देहरश्मश्रुदं तथा ॥ एतद्दृष्ट्वा महातेजा धराविवरयंत्रितं ॥ ७ ॥ भूयोपि चिंतयामास धिया परमबोधया ॥ सर्वसंपीडितांगत्वात्क्लामेप्राणेवायुभिः ॥ ८ ॥ मुक्तश्चे लितुमाकर्तुं शक्नोतिन मनागपि ॥ तद्धात्वा प्रविशाम्याशु देहमेवं विवस्वतः ॥ ९ ॥ जठरीयः पिंगलो देहमुद्धरिष्यति मे गतः ॥ अथवा किं ममैतेन शाम्याम्यहमविघ्नतः ॥ १० ॥ निर्वामिस्वः परं यामि को थो मे देहलीलया ॥ इति संचिंत्य मनसा वीतहव्यो महामते ॥ ११ ॥ स्थ दो स्थित्वा शरणं मुख्यश्चिंतयामास भूतले ॥ उपादेयो हि देहस्य न मे त्यागो न संश्रयः ॥ १२ ॥ यादृशो देहसंत्यागस्तादृशो देहसंश्रयः तद्यावदस्ति देहोयं न यावदणुतां गतः ॥ १३ ॥ तावदेनमुपारुह्य किंचित्त्र विहराम्यहं ॥ पिंगलेन शरीरं स्वमुद्धृतं तापनं वपुः ॥ १४ ॥ दे प्रविशामि नभः संस्थं मुकुरं प्रतिबिंबवत् ॥ इत्यसौ मुनिराशित्यं विवेशानिलरूपधृक् ॥ १५ ॥ पुर्यष्टकवपुर्भूत्वा भस्त्रा खमिव स्वानिलः ॥ भगवान्मुनिरप्येनेह कृतं मुनिनायकं ॥ १६ ॥

लेन पिंगलद्वारा उद्धर्तुं तापनं सौरं वपुः प्रविशामि ॥ १४ ॥ अनि लरूपधृक् सूक्ष्मीभूत इति यावत् ॥ १५ ॥ पुर्यष्टकं प्राग्व्याख्यातं लिंगशरीरं तद्वपुः भस्त्रां खं चर्मपेश्याकार्थं मुनिर्मनन शीलो भगवान्सूर्यो हृतं हृदि प्रवि ष्टं तं मुनिनायकं दृष्ट्वा तत्स्य कार्यं तत्सौर्वापर्यं च दृष्ट्वा विंध्यकोशगतं गत्वा संविदेहं तत्प्राय मुनिकलेवरं ददर्शेति व्यवहितेनान्वयः ॥ १६ ॥

वा॰टी॰उप॰
२३८

१७। ततो रविः किंचकार तदाह क्रकचेरिति। १८। मुनिं मुनिशरीरं गतं पिंगलाख्यं सूर्य हृत्वा विंध्यमुनेः संवित् किंचकार तदाह वीतहव्येति १९ स मुनिर्भानुना दृष्टो वचा हुमानरवं कमभ्यनुज्ञातः मनस्कार्यार्थं। प्रस्थितं पिंगलस्य आकारं शरीरं आविवेश। २०। कुंजे लतागृहे कुंजरे च सुंदरं। २१। प्राट् षिमतान्यथापि यस्मिंस्तथाविधमंबरमिव तत्पक्षे कुंजे कुंजरे रिक्थ सुंदरमिति योज्यं।। नखैर्निष्कृष्टं खातं भूतलं येन तथाविधः पिंगलः मुनेः संबंधि मौनं पुर्यष्टकं पिंगल दे

दृष्ट्वा सोऽचिंतयत्कार्यं पौर्वापर्यमुदारधीः।। विंध्यभूधरभूकोशमंतर्मुनिकलेवरं। १७। तृणोपलपरिच्छिन्नं ददर्श गतसंविदं। क्रकचेश्चि
कीर्षितं ज्ञात्वा भानुर्गगनमध्यगः।। १८। धरातो मुनिमुद्धर्तुमादिदेशाग्रगं गणं।। वीतहव्यमुनेः संवित्सा पुर्यष्टकरूपिणी। १९। रविं वातमयीर
ज्यं प्रणनामाशु चेतसा।। भानुनाप्यभ्यनुज्ञातो मानरवं कमग्रगं।। २०। विवेश पिंगलाकारं विंध्यकंदरगामिनं। पिंगलोऽसौ नभस्यकात्कुं
जकुंजरसुंदरं। २१। प्राप विंध्यवनं प्रावृड्रामत्वान्यांबरभासुरं।। उद्दधार धराकोशान्नखैर्निष्कृष्टभूतलः। २२। कलेवरं मुनेः पंका
न्मृणालमिव सारसः।। मौनं पुर्यष्टकमथ स्वं विवेश कलेवरं। २३। नभस्तलपरिभ्रांतो विहंगम इवालयं। प्रणेमतुर्मिथो भूर्त
वीतहव्यनभश्चरौ। २४। बभूवतुः स्वकार्यैकतत्परौ तेजसां निधी।। जगाम पिंगलं व्योम मुनिश्च विमलं सरः। २५। तारकाका
रकुमुदं सूर्यांशुकवराकृति। वीतहव्यो ममज्जाशु सरस्युद्भिन्नपंकजं। २६। पंकपल्वललीलां ते वने कलभको यथा। तत्र स्नात्वा
जपं कृत्वा पूजयित्वा दिवाकरं। २७। मनोभूषितया तन्वा पूर्ववत्पुनराबभौ। मैत्र्या तया समतया परमाच शांत्या सत्त्वज्ञया मुदितया करुण
याश्रिया च युक्तो मुनिः सकलसंगविमुक्तचेता विंध्ये सरित्तटगतो दिनमेव रेमे। २८। मोक्षोपाये उपशमप्रकरणे वीतहव्यसमाधियोगोपदेशः

हात्स्व कलेवरं विवेश। २३। आलयं स्वनीडं भूर्तौ भासमूर्ती वीतहव्यः नभश्चरः पिंगलश्च मिथः अन्योन्यं प्रणेमतुः २४ सरः स्नानार्थं २५। सूर्येण अंशुकवतीपि राम॰
तारकाकारालंकृतेव आकृतिर्यस्य बालातपरागरंजितोदकमिति यावत्। २६ पंकयुक्तेषु पल्वलेषु लीलायाः अंते अवसाने २७। मनोभूषितया मनना दिव्यव्यवहारवत्या २३८
दिनमात्रमेव रेमे न चिरं समाधिप्रच्युतस्तत्स्थाविति अर्थः २८ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे पंचाशीतितमः सर्गः ८५।

---

न

पुनः समाधिपद्मानं जीवन्मुक्तस्थितिं च चिरं। रागादिभ्यो जलिर्मुक्तैः समाधिः सास्य वर्ण्यते।। विज्ञातां प्राक्परिचितां।। १। दृष्टलोके परः सारः अवरः असारश्च येन। २। सकल
भासमततदाह सर्वमित्यादिना।। ३। अस्तिनास्तीति द्विविधौ रक्षकलनौ शेषमवशिष्टं तत् भयसाक्षि चिन्मात्रं मलं श्रेति शेषः वहसंस्थानः समकायशिरोग्रीवो दृढासनश्च ४
उदितो जीवन्त्येप्यस्तंगतो मृतवद्वाह्यदर्शनत्वादृशा तु ताद्विपरीतः समरसाभासः एकरसचिन्मात्ररूपः।। ५।। प्रबुद्धो जाग्रदपि सुषुप्तस्थः द्वैतजालमपश्यन् एवं सुषु

श्रीवसिष्ठ उवाच।। दिनेनैकेन समाधातुं पुनरेव मनो मुनिः।। विवेश कांचिद्विहितां विज्ञातां विंध्यकंदरीं।। १। तत्रैकांतात्तु संधानभूत्यजन्म
मर्मिंद्रियैः।। चेतसा कलयामास दृष्टलोकपरावरः।। २। सर्वमेवेंद्रियगणो मम्यापरिहृतः स्फुटं। इदानीं चिंतयामार्थः पुनर्थितनमामम. ३
अस्तिनास्तीतिकलनां मुक्त्वा सर्वहं तताप्रिवाशेषं तु वह संस्थानस्तिष्ठाम्यचलश्रृंगवत्।। ४। उदितोऽस्तंगत इवास्तंगत इवोदितः।।
समः समरसाभासस्तिष्ठामि स्वच्छतां गतः।। ५।। प्रबुद्धोपि सुषुप्तस्थः सुषुप्तस्थः प्रबुद्धवत्। तुर्यमालंब्य कायांतस्तिष्ठामि स्तंभितस्थि
तः।। ६। स्थितः स्थाणुरिवैकांते स्वांते तेसर्वतः स्थिते। सत्तासामान्यसाम्येहि तिष्ठाम्यपगतामयः।। ७। इति संचिंत्य स ध्याने पुनर्मा
स्यौ दिनानि षट्। ततः प्रबोधमापन्नः क्षणसुप्त इवाध्वगः। ८। ततः सिद्धः स भगवान् वीतहव्यो महातपाः। विजहार चिरं कालं
जीवन्मुक्ततयातया। ९। वस्तु नाभिननंदासौ निनिंद न कदाचन।। न जगाम तथोद्वेगं न च हर्षमवाप सः।। १०। गच्छंस्तिष्ठन
श्चैव तान्येव मम बहूनि विनोदाय वचितस्य कथास्वमनसा सह। ११

प्रोपि स्वच्छरूपः स्फुरन्ननुभवान्प्रबुद्धवत्। तुर्यं स्थूलसूक्ष्मकारणनिर्मुक्तं पदं।। ६। स्वांतस्थ्यां ते पारम्भ ते निर्मनने सर्वतः स्थिते सत्तासामान्यलक्षणे परमसाम्ये ७ ८
सिद्धः व्युत्थानेपि समाहितस्थितिः ९। नाभिननंद गुणोद्दर्शनैर्निंददोषदर्शा। १०। कथा वस्थ मानविचारलक्षणा बाधिता नुवृत्तस्वमनसा सह। ११

न

अप्ययस्य विषयोपभोगप्रयुक्तसामर्थ्यव्ययरहितस्येंद्रियवर्गस्य स्वामिन्। हे मनः आनंदयस्या दृश्यतिसर्वं जगदित्यानंदं तथाविधं सुखं निरतिशयानंदरूपं सुखं भनं खं आकाशमितिवा। १२। त्वया अद्येपि एषैव नीरागैव दशा अवलंब्या॥ द्वावेवकारावेवधारणार्थौय। १३। हितताशाः इति आशानां पृथक्संबोधनं। अयं मया नुभूयमानआत्मा युष्माकं नास्ति॥ १४॥ एवं सदात्मसंबंधाभावात् वः स्वरूपे अवशिष्टं विनाशं असत्वपक्षं व्रजतां समाक्रांतौ ममेति शेषः। १५। प्राक्तर्ह्यस्माकं त्वत्समाक्रांतौ कुतः सामर्थ्यमभूदित्येत्तत्राह आत्माद्यध्यासबलादित्याह वयमिति॥ १६। १७। एवं विवेकदर्शने कस्यापि भवत् प्रयुक्तदोषसंबंधो

अप्ययेंद्रियवर्गे शमनः शमवतात्वया। परमानंदसुखं कीदृग्विधमासादितं ततं॥ १२। एषैवाविरतं तस्मान्नीरागैव दशात्वया। अवलंब्या परित्याज्यं चापलं चलतांवर॥ १३। भोभोइंद्रियचौरा हे हताशा हतनामकाः। युष्माकं नायमात्मास्ति न भवंतस्तथात्मनः। १४। व्रजंतां वोविनाशं शमाशावोविफलीकृताः। न समर्थाः समाक्रांतौ भवंतो भंगुराश्रयः॥ १५। वयमात्मेति यैषा वो बभूव किलवासना। तत्वविस्मृति जाता हि हृष्टरज्जु भुजंगवत्। १६। अनात्मन्यात्मता सेयमेषा वक्तन्यवक्तता। अविचारेण वा जाता विचारेण क्षयं गता। १७ भवंतोन्ये वयं चान्ये श्रेयान्यत्कर्ता परा। अन्योभोक्तान्यआरंते कोदोषः कस्य कीदृशः। १८। वने भ्यो दारुसंजातं रज्जवो वेणुचर्मणाः। वाशी चायः फलान्येव तक्षाग्रामार्थमुद्यतः। १९। इत्थं यथेह साम ग्र्यास्त शक्तिस्य परार्थया। संपन्ना काकतालीया दृढावरग्रहाकृतिः। २०

पिनास्तीत्याह भवंतइति। भवंतः करणाभूताः वयमभिमंतारः। ब्रह्मअहंकर्ता प्राणप्रयुक्तक्रियानिमित्तता भोक्ताचिदाभासः आरंते मनः॥ १८। एवं चेत्कथं व्यवहारकार्यनिष्पत्तिरिचेत्काकतालीयन्यायादितिग्रहदृष्टांतेनाह वनेइत्यादिना वेणुत्वचा काष्ठभारबंधनं वाशी प्रसिद्धा चकारात्कुठारटंकिकादयः अयसः फलानि प्रयोजनानि लोहकुद्दुररमरणप्रयुक्तानीतियावत्। एवं तक्षा स्वग्रामार्थमुद्यतो नगरहसिद्धये। १९। एवं च भिन्नप्रयोजनैः क्रियाकारकैरर्थान्निष्पद्यमाना गृहाकृतिः काकतालीयन्यायादेवेत्यर्थः। २०। 

तथा इहापि कार्यकरणसंघाते दर्शनश्रवणवचनादिफलकस्वशक्तिभिर्नियतानि ज्ञानेंद्रियाणि यास्तथाविधाः व्यवहारकार्यकलिकाः काकतालीयादेव वलं यथास्यात्तथार्थसंपन्नाः तत्र कस्य को वखंडनाक्षतिरस्ति न काचित्कस्यचिदित्यर्थः। २१। विस्मृतिरविद्यास्मृतिरात्मविद्या तत्फलमाह समरिजा २२। २३। अंतं नाशमागता। तत्रतस्मिन्नूर्णानंदस्वप्रकाशपदे। २४। यथास्थितेवस्तुनिकृशाविद्यास्यादिविचित्रपदार्थोपदर्शनादुत्थं प्रसक्तं अनर्थकं व्यर्थमेवानाश्वासं बोधयितुं पुनः पुनर्ध्यानाश्वासनमालंब्येत्यर्थः। २५ तस्य 

संपन्नाः काकतालीयास्स्वशक्तिनियतेंद्रियाः। तथैव कलिकास्त्रोलं केवकस्यात्र खंडना। २१। विस्मृतिर्विस्मृता हृष्टं स्मृतिः स्फुटमनुस्मृता सच्च सत्यमसच्चासत्तं शीर्णं स्थितं स्थितं। २२। एवं विधेन भगवान्निचारेण महातपाः। सोति छन्नुनिशाहं लोवहूनुचर्षगणानिह। २३। अपुनर्भवनायैव यत्र चिंतां तमागता। भ्रष्टतां च सुदूरस्था तत्रासावसत्सदा। २४। यथाभूतपदार्थौघदर्शनोत्थमनर्थकं ध्यानाश्वासनमालंब्य सोवसत्सुखगः सदा। २५। हेयादेयसमासंगत्यागादानदृशोः क्षये। वीतहव्यमुनेरासीदिघ्यानि घातिर्गमनः। २६ विदेहकेवलीभावे सीमांते जन्मकर्मणां। संसारसंगसंत्यागरसासवनवेक्ष्या। २७। विवेशमततयेवातेमद्यादौ हेमकर्दरं। अपुनः संगमायाभुजगज्जालमवेक्ष्य सः॥ २८ बद्धपद्मासनः स्थितातत्रोवाचात्मनात्मनि रागनीरागतां गच्छ द्वेषनिर्द्वेषतां व्रज। २९। भवद्भ्यां सुचिरं कालं इह भ्रक्रीडितं मया। भोगान्मोक्तयुष्मभ्यं जन्मकोटिशतान्यहं। ३० भवद्भिर्लालितो लोके लालके रिवबालकः। इमामपि परां पुण्यां निर्वाणपदवीमहं॥ ३१॥

भारब्धशेषस्यैकी दर्शमनआसीत्तदाहहेमेति। हानयोग्यानांआदानयोग्यानांचविषयाणांसमासंगेमासावपिहानादानदृशोः क्षये २६ प्रतिभासमात्रेणापि स्थितस्य देहादिसंसारसंगस्य संत्यागे परिशिष्यमाणो ब्रह्मरसमकर्दने नवेक्ष्याऽऽत्कंठया विवेशेति रसेणान्वयः संत्यागेवांछ्या मायातिशायिनीमितिपाठेस्पष्टं। २७। तयावांछया। २८ सहजशत्रुसुरागद्वेषादिष्वपि निर्द्वेषतां मैत्रीं च भावयन्नेतु कामइवहितमुपदिशनप्रणमयतान्निमंत्रयते रागेत्यादिना। २९ ३० ३१।

सुखाय विषयसुखलवाय त्वया उत्तमेन संतापितेन मया॥ ३२। तस्मात् हुरुणैव त्वया उपदिष्टोयं विवेकमार्गः॥ ३३। हे दुःखस्य तत्वसुखदर्शन। इदानीं ज्ञानजननोपकारिणं देहमार्थ्यामंत्रयति कल्याणमित्यादिना। ३४। हे देह इयं आवयोर्वियुक्तिः। स्थितिरनादिनियतित्वभाव। संयोगा विप्रयोगांता इत्यायारिति भावः। जंतूनां प्राणिनां संबंधिनी प्रयोजनानां स्वार्थानां इयं गतिः रीतिर्विषमा यत् स्वया अत्यंतमित्रस्वजनानपि विहाय पुरुषाः धावंती ति भावः। ३५। तदेव स्वस्याप्युपस्थितमित्याह देहेह नापीति। ३६।

येन विस्मारितस्तस्मै सुखायास्तु नमो नमः। त्वदुक्तेनैव हे दुःख मयात्मान्विष्ट आदरात्॥ ३२। तस्मात्त्वदुपदिष्टोयं मार्गो मम नमोऽस्तु ते। त्वत्प्रसादेन लब्धोयं शीतला पदवी मया॥ ३३। दुःखनाम्ने दुःखतत्वसुखदात्मन्नमोऽस्तु ते। कल्याणमस्तु ते मित्र मम सारासार जीवित। ३४। देह स्थितिरियं यामो वयमात्मीयमास्पदं। प्रयोजनानां जंतूनामहो नु विषमा गतिः। ३५। देहेनापि वियुज्येहं मृत्वा जन्मशतान्यपि। मित्र कायमया यत्त्वं त्यज्यसे चिरबांधवः। ३६। त्वयैवात्मन्युपानीतासात्मज्ञानवशात्स्मृतिः। अधिगम्यात्मविज्ञानमात्मनाशः कृतस्त्वया। ३७। देह नान्येन भग्नोसि त्वयैवैवमुपासितं। एकाकिन्यापि शुश्रूषं त्या प्रशांतेः मयि दीनया। ३८। त्वया दुःखं न कर्तव्यं मातस्तस्मै व्रजाम्यहं। क्षंतव्याः काम मम गर्वन् विपरीतापराधजाः। ३९। दोषानुपशमैकांतं व्रजाम्यादिशमंगलं। चिरात्त्विराय वेदानीं मैवत्स ते किलावयो॥ ४०। वियोगो योगदोषेण प्रणामोऽयं सपश्चिमः। नमः सुकृतदेवाय भवते मत्स्त्वया पुरा। ४१। नरकेभ्यः समुत्तार्य स्वर्गेहमभियोजितः। कुकार्मश्रेत्ररूढायनरकस्कंधवाहिने॥ ४२

नायं मम अपराधस्त्वया स्वनाशार्थमेव मदुपकारः कृत इत्याशुशोचन्निवाह त्वयैवेति॥ ३७। एतत् त्वयैव उपासितमनुष्ठितं इदानीं तस्मा प्रार्थयते एकाकिन्येति। देच, त्वज्जया र्थं त्वद्विपरीतवैराग्यसेवनाद्यपराधजा मदोषाः॥ ३९ उपशमैकांतं आत्यंतिकोपशमं। आदिश आशास्व पुनरावृत्त्या तस्या मुखदर्शनप्रसक्तिं वारयन्नाह चिरादिति। चिरादपि चिरा यशश्वत इतियावत्। इदानीं आरभ्येति शेषः॥ ४०। सुकृतं पुण्यं तद्रूपाय देवाय॥ ४१। कुकार्यं निषिद्धाचरणं तद्रूपेण क्षेत्रे भूमौ रूढायनरकलक्षणानां स्कंधानां वृक्षस्कंधानां वहनशीलाय॥ ४२।



शासनाः यातनास्त एव पुष्पभारो यस्य॥ ४३। प्रधनद्रि वैशैः कीचकैः मधुरक्वचरो शीर्णपत्राण्येव वासांसि यस्या स्तथाविधायै गुहालक्षणायै तपस्विन्यै। ४४। आश्वासकारणमित्य जहद्विंगं गुहाविशेषणं॥ ४४। सुस्निग्धा अत्यंत स्नेहवती वयस्या आसीः॥ अम्बरः हर्षातिविश्रांति दानेन सर्वलोभापहारिणी दोषेभ्यः समाधिविघ्नेभ्यः॥ ४६। इदानीं दंडकारण्यगुणान्वर्णयति त्वमस्यति संकटेति संकटेषु सर्पादिभयेषु विषमप्रदेशेषु तथा अवटेषु गर्तेषु कुंजेषु च हस्तस्य आलंबनं दायिने॥ ४७। इदानीं देहभागी ——
—— तीअस्थीति॥ ४८॥ एतावन्मात्रमेव सारं तत्वं यस्य तत् आविर्भूतं कंसं असाधरणाभागं गृहीत्वा गच्छतः प्रकृतीः। हे देहक पयसो जलस्य लहरी यमल दोर्गंध्य स्वेदादिना

शासना पुष्पभाराय नमोऽदुष्कृतशाखिने। येनस्माई चिरं बह्वो भुक्ताः प्राकृतयोनयः॥ ४३। प्रसन्नप्रसन्न स्वदृश्याय तस्मै मोहात्मने नमः। प्रधनद्रुः शम धुरवच स्मै पत्रवाससे॥ ४४। नमो गुहा तपस्विन्यै वयस्यायै समाधिषु। संसाराधनिखिन्नस्य त्वं समाश्वासकारणं॥ ४५। आसीर्वयस्या सुस्निग्धा सर्वलोभापहारिणी। सर्वसंकटखिन्नेन दोषेभ्योद्रवता मया॥ ४६। त्वमेकाशोकनाशार्थमाश्रितापरमा सखी। संकटावटकुंजेषु हस्तालंबनदायिने॥ ४७। वार्द्धके कांत सुहृदे दंडकाष्ठाय ते नमः। अस्थिपंजरमात्मीयं तथा रक्तांत्रतंतुकं॥ ४८॥ एतावन्मात्र सारैकं गृहीत्वा गच्छ देहक। पयःश्रोमप्रकारेभ्यः स्नानेभ्योपि नमोऽस्तु ते। ४९।। नमोऽस्त्वव्यवहारेभ्यः संसृतिभ्यो नमोऽस्तु ते॥ एते भवंतः सहजाः प्रोक्ताः सुहृदो मया॥ ५०। क्रमेणाद्योत्क्रांताः प्राणाः स्वस्ति वोऽस्तु व्रजाम्यहं। भवद्भिः सह विश्रांत मया बहुषु योनिषु॥ ५१॥ विश्रांतं गिरिकुंजेषु श्रांतं लोकांतरेषु च। क्रीडितं पुरपीठान्तःस्थितं पर्वतेषु च॥ ५२। स्थितं कामविलासेषु प्रस्थितं विविधाध्वसु॥ न तदस्ति जगत्कोशे भवद्भिः सह मन्मया। ५३।

दूषणात्स्ये स्तोभा अपराधास्त दीय प्रकारभेदरूपेभ्यस्तेनानेभ्यः शुचित्वसंपादनोपायेभ्योपि नमोऽस्तु। जथा भोजनशयनाभ्यंजनालंकरणादिव्यवहारेभ्यस्तत्सामग्रीसंपादनायेतस्ततो धावनलक्षणाभ्यः संसृतिभ्यश्च नमोऽस्तु हे प्राणाः सहजाः सुहृदः मया अद्य सुदृढं नमस्कारक्रमेण सर्वे भवंतोपि उत्क्रांताः उत्कृष्टाः कृताः नमस्कृता इतियावत्॥ ५०। प्राक्तनस्नुहृत्वमेव वर्णयति भवद्भिरिति॥ ५० पुरांणां पीठानां सिद्धक्षेत्राणां चांतः॥ ५२॥ ५३॥

न कृतं न हृतं न दत्तं च हस्ताभ्यां । न यातं पद्भ्यां नावलंबितं मनसा च भवंतः स्वां दिशं प्रकृतिं यांतु अहं प्रयामि हे प्रियाः । ५४, किमर्थमस्मान्प्रकृतिषु विलापयसि कार्यकरणसंघातात्मनैव स्थित्वा भोग्यनिचयानेव सर्वं वस्तु तेन प्राप्स्याम इत्याह सर्वैरिति हे सर्वे प्राणास्थाः ५५ । इदानीं प्रत्येकमिंद्रियादीनां प्राप्तव्याः प्रकृतीर्विभज्य दर्शयति अयमित्यादिना । सौगंध्यानंदसंविसरेण तत्करणं घ्राणेंद्रियं लब्ध्वा तेन वनपुष्पपदेन च गंधमात्रसारा पृथिवी । ५६ । एवमिंदुमंडलपदेन पोषकत्वादिति क्रमेण गताः कलाः पंचदश प्रतिष्ठामिति श्रुति प्रदर्शितदिशा सर्वे स्वां स्वां प्रकृतिं यांत्वित्यर्थः । ५७ । एवं युष्मासु उपाधिभूतेषु गतेषु भवत्स्वपि विविक्तचिदाभासात्मा जीवभूतोहमपि स्वबिंबभूतं प्रणवार्द्ध

न कृतं न हृतं यातं न दत्तं नावलंबितं । इदानीं स्वां दिशं यांतु भवंतो याम्यहं प्रियाः ॥ ५४ ॥ सर्वे क्षयांता निचयाः पतनांताः समुच्छ्रयाः । संयोगा विप्रयोगांताः सर्वे संसारवर्त्मनि ॥ ५५ ॥ अयं चाक्षुष आलोको विशत्वादित्यमंडलं । विशं तु वनपुष्पाणि सौगंध्यानंदसंविदः । ५६ ॥ प्राणानिलस्तथा स्पंदं विशत्वस्य प्रभंजनं । विशंत्वाकाशकुहरं शब्दश्रवणशक्तयः ॥ ५७ ॥ इंदुमंडलमायांतु रसना रसशक्तयः ॥ निर्मंदर इवांभोधिर्गतार्क इव वासरः ॥ ५८ ॥ शरदीव घनः स्वैरं प्राप्तः कल्पांतसर्गवत् ॥ ॐकारांते स्वमननं प्रशाम्याम्यात्मनात्मनि ॥ ५९ ॥ दग्धेंधन इवार्चिष्मान्निःस्नेह इव दीपकः ॥ व्यपगताखिलकार्यपरंपरः सकलदृश्यदृशातिगतस्थितिः ॥ प्रणवशांत्यनुसंसृतिशांतधीर्विगतमोहमलोस्म्यहं स्थितः ॥ ६० ॥
मोक्षोपाये उपशमप्रकरणे इंद्रियवर्गनिराकरणोपदेशः सर्गः ॥ ८६ ॥ श्रीवसिष्ठ उवाच ॥ एवं कलितवानंतः प्रशांतमननैषणः ॥ शनैरुच्चारयंस्तारं प्रणवं प्राप्तभूमिकः ॥ १ ॥

मात्रलक्ष्येव स्वात्मनि प्रशाम्यामीत्याह निर्मंदर इत्यादिना । ५८ । स्वैरं स्वति जनयति स्वैरं सोपादानं विलयेन प्राप्तो घन इव । कल्पांते प्रलयकाले सर्गवत्प्रपंच इव च स्वमननं सूक्ष्ममननं आत्यंतिकमनःशांतिर्यथा स्यात्तथा । ५९ । दीर्घोच्चारितस्य प्रणवस्य प्लुतस्वरं प्रशांतिं अनुसृत्य शांता प्रसाकारता मात्रप्रा स्या उपरता धीर्यस्य तत एव विगतः प्रारब्धप्रतिबद्धशिष्टाविद्यालेशमलः । ६० । इति श्रीवा॰ ता॰ प्र॰ उ॰ षडशीतितमः सर्गः ॥ ८६ ॥ नमः कोदंडहस्ताय संधीकृतशराय च । दारिताखिलदैत्याय रामायापन्निवारिणे ॥ १ ॥ येन क्रमेण संप्राप्तो वीतहव्यो विदेहतां प्रणवार्थं समालंब्य स क्रमोऽत्र निरूप्यते एवं वक्ष्यमाणक्रमेण तारमत्युच्चैः स्वरं प्रणवं शनैः दैर्घ्यापादनेनोच्चारयन्मननमननैषणप्रशांतिक्रमेण प्राप्तषष्ठसप्तमभूमिकोभूत्वा अंतः स्वहृदि प्रसकलितवान्प्राप्तवान् । १



DR BHAU DAJI MEMORIAL

यतिः सन्न्यासी वीतहव्यः । ॐमित्येतदक्षरमिदं सर्वं तस्योपाख्यानं भूतं भवद्भविष्यदिति सर्वमोंकार एव यच्चान्यत्त्रिकालातीतं तदप्योंकार एवेति मांडूक्यश्रुतिप्रदर्शितक्रमेण अकारोकारमकाराख्यमात्राभिरर्द्धमात्रया च काल्पितेन स्थूलसूक्ष्माव्याकृततुरीयलक्षणपादभेदेन प्रणवं संस्मरन् पंचीकरणोक्तेन विराड्हिरण्यगर्भाव्याकृतलक्षणानां तुर्ये प्रथमजागरितस्थानो बहिःप्रज्ञ इत्यादिश्रुत्युक्तदिशा अध्यारोपेण । नांतःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञं न प्रज्ञानघनमित्याद्यपवादेन स्थूलसूक्ष्मकारणरूपानपि बा

मात्रादिपादभेदेन प्रणवं संस्मरन्यतिः ॥ अध्यारोपापवादेन स्वरूपं शुद्धमव्ययं ॥ २ ॥ स बाह्याभ्यंतरान्भावान्स्थूलान्सूक्ष्मतरानपि त्रैलोक्यसंभवांस्त्यक्त्वा संकल्पाकल्पकाल्पितान् ॥ ३ ॥ तिष्ठन्नलक्ष्यमिताकारश्चिंतामणिरिवात्मनि संपूर्णेंदुवशीतांशुर्विश्रांत इव मंदरः ॥ ४ कुंभकारगृहे चक्रं संरोधितमिव भ्रमात् ॥ अंभोधिरिव संपूर्णस्तिमिताकारनिर्मलः । ६ शांततेजस्तमःपुंजे विगतार्केंदुतारके । अभ्रमात्ररजःस्वच्छमनंतं शरदीव खं ॥ ७ ॥ सह प्रणवपर्यंतदीर्घनिःस्वनतंतुना । जहाविंद्रियतन्मात्रजालं गंधमिवानलः ॥ ततो जहौ तमोमात्रं प्रतिभातमिवांबरे । उत्तिष्ठत्स्फुरद्रूपं प्राज्ञः कोपलवं यथा ॥ ८ ॥

बाह्याभ्यंतरान्भावांस्त्यक्त्वा शुद्धमव्ययं स्वरूपं दृष्ट्वा प्रपंचोपशमं शिवं शांतमद्वैतं चतुर्थं मन्यंते स आत्मा स विज्ञेय इति श्रुत्युक्ते तुर्ये तत्रात्मनि तिष्ठन् सन् प्रणवपर्यंतदीर्घनिःस्वनतंतुना सह इंद्रियतन्मात्रजालं जहाविति षष्ठेन संबंधः ॥ २ । ३ ॥ ४ । भ्रमाद्भ्रमणात्संरोधिते सति कुंभकारगृहे चक्रमिव लक्ष्यमिताकारं ५ तेजस्तमसोर्युगपद्ध्वांत्यप्रतिष्ठेरभ्रलोपमेयं ६ । प्रणवस्य पर्यंतो ग्रमागमात्रलक्षणो नदीर्घनिस्वनतंतुना सह जहाविन्द्रियादिः सर्वः स्थूलसूक्ष्मेतरा गविस्यक्तेः स्वस्यैव प्रपंचः ७ ततः उत्तिष्ठत्तासिणान्स्फुरद्रूपं तमोमात्रं ॥ ८ ॥

९॥ तां तमःप्रकाशशून्यामवस्थां आसाद्य तत्कल्पनाहेतुं मनस्तत्त्वं अशान्तयत छिन्नवान् ॥१०॥ अंगेति संबोधने। प्रतिभासं निर्वातदीपवत्स्फुटप्रकाशतां आलंब्य तामपि कलनां तत्संबोहात्यागे च निमेषार्द्धार्द्धभागेन कालेन जहौ मरुवचित्तश्चेत्यदशात्यागइत्यर्थः ॥११॥१२॥ अनयारीत्या सामान्यमात्रपरिशेषलक्षणं पश्यंतीं परमासाद्य तदेव चिदाविद्याद्यपरिशिष्टसत्तामात्रात्मकं कारणतत्त्वमिति तद्भावस्थितिलक्षणं सुषुप्तपदं आलंब्येत्यर्थः ॥१३॥ एतेषप्तसमाधिके मरेहावस्थे ततः साक्षिकैसदैकरस्ये निरतिशयानंदाविर्भावात्सारव्यशेषेण महात्यंतिकप्रतिभासनाशे विदेहकैवल्याख्यां तिरं शयति तुर्यमिति ॥१४॥ ततः किमा

प्रतिभातं ततस्तेजो निमेषार्द्धविचारितः ॥ जहौ बभूव चेतत्तानन्तमोनप्रकाशकं ॥९॥ तामवस्थामथासाद्य मनसा तन्मनस्त्वरं। मनागपि प्रस्फुरितं निमेषार्द्धादशान्तयत् ॥१०॥ ततो गमं विदेहस्य स्त्यां प्रतिभासमुपागतां ॥ सद्यो जातशिशुज्ञानसमानकलनामलं ॥११॥ निमेषार्द्धार्द्धभागेन कालेन कलनां प्रभुः ॥ जहौ चित्तश्चेत्यदशां स्पंदशक्तिमिवानिलः ॥१२॥ पश्यंतीपरमासाद्य सत्तामात्रात्मकं ततः। सुषुप्तपदमालंब्य तस्थौ गिरिरिवाचलः ॥१३॥ ततः सुषुप्तसंस्थानं स्थित्वा स्थित्वा विभुर्मनाक्। सुषुप्तस्थैर्यमासाद्य तुर्यरूपमुपययौ ॥१४॥ निरानंदोपि सानंदः सच्चासच्चापि तत्र सः। आसीत्किंचित्किंचिच्च तत्प्रकाशतिमिरं यथा ॥१५॥ अचिन्मयं चिन्मयं च नेति नेतीति यदुच्यते। तत्तत्त्वं बभूवासौ यद्गिरामप्यगोचरः ॥१६॥ तदसौ सुसमस्फारं पदं परमपावनं। सर्वभावांतरगतमभूत्सर्वविवर्जितं ॥१७॥ यच्छून्यवादिनां शून्यं ब्रह्म ब्रह्मविदां वरं। विज्ञानमात्रं विज्ञानविदां यदमलं पदं ॥१८॥

सीदिति यत्तुर्यप्रश्नस्योत्तरमाह निरानंद इत्यादिना विषयानंदशून्योपि स्वरूपेणैव सानंदः स्वातिरिक्तसत्ताशून्योपि सद्रूप इत्येवं सर्वयोज्यं। यथा नक्तं दर्शतां तिमिरमेव प्रकाशस्तद्वत् ॥१५॥ चित्त्याभावाद चिन्मयं स्वस्तत्त्वेरेव चिन्मयं ॥१६॥१७॥ सर्ववादिभिर्नानाविकल्पैः स्वस्वसिद्धांततया विकल्पितमपि देवेत्याह यदित्यादिना ॥१८॥ राम॰ २४२

तं १

शशिकलंकानां शिवमतस्थानामिति पाठे पि स एवार्थः ॥१९॥ तत्र आत्मनो विदुषामात्मानं लोकेषु निषेधविषयेषषष्ठी धर्मदर्शी। नैरात्म्यं क्षणिकविज्ञानसंतानः सहिस्थायित्वेन समानो नास्त्येवेति नैरात्म्यं। तादृशात्मनां सौत्रांतिकवैभाषिकाणां माध्यमिकानां चिरं चिन्मध्यमशून्यमात्रं तद्वादिनां। सुसमचेतसां जीवन्मुक्तानां निरवशेषपूर्णं। शून्यवादिभिरुपक्रम्य सर्ववादिभिरुपसंहारस्तयोः परिच्छेदवादेषु मावधितादृतरेषां तु आंतरालिकमतानामुपक्रममिश्रणात्तारतम्यवैचित्र्येण स्थानमिति बोधनार्थमिति बोध्यं २०॥ सर्वस्य तत्त्वं सार्वं ईदृशं मतत्सत् असौ तत्सत् तद्भूत्वा स्थित इत्यर्थः ॥२१॥ यत् अनुत्तमनिःस्पंदं स्वतनिः क्रियं व्योमन्यपि जन्मादिक्रियासत्ता ततोपि कूटस्थमि

पुरुषः सांख्यदृष्टीनामीश्वरो योगवादिनां॥ शिवः शिवमतस्थानां कालः कालैकवादिनां ॥१९॥ आत्मात्मनस्तद्विदुषां नैरात्म्यं तादृशात्मनां स्वं१
मध्यं माध्यमिकानां यत्सर्वं सुसमचेतसां ॥२०॥ यत्सर्वशास्त्रसिद्धांतो यत्सर्वहृदयानुगं। यत्सर्वं सर्वगं सार्वं यत्तत्तत्त्वं सदसौ स्थितः ॥२१॥ यदनुत्तमनिःस्पंदं दीपतेजसामपि। स्वानुभूत्यैकमात्रं यत्तत्तत्त्वं सदसौ स्थितः ॥२२॥ यदेकं चाप्यनेकं च साञ्जनं च निरञ्जनं। यत्सर्वं चाप्यसर्वं च यत्तत्तत्त्वं सदसौ स्थितः ॥२३॥ अजमजरमनाद्यनेकमेकं परममलं सकलं च निःकलं च॥ स्थित इति स तदा नभःस्वरूपादपि विमलस्थितिरीश्वरः क्षणेन ॥२४॥ मोक्षोपाये उपशमप्रकरणे वीतहव्यनिर्वाणो नाम सर्गः ॥५१॥ श्रीवसिष्ठ उवाच। प्राप्य संसृतिसीमांतं दुःखाब्धेः परमागतः॥ वीतहव्यः शशामैवमपुनर्मननेमुनिः ॥१॥ तस्मिंस्तथोपशांते हि परां निर्वृतिमागते। पद्मः कणइवांभोधौ स्वेपदे परिणामिनि ॥२॥

इत्यर्थः। तेजसामपि भासकतयेति शेषः। यत्स्वानुभूत्यैकमात्रं यत्तत्त्वसिद्धं सत्ता। तद्भाविति प्राग्वत् ॥२२॥२३॥ स वीतहव्यः इति उक्तक्रमेण मुक्तदशा नभःस्वरूपादपि निर्मलस्थितिः सन् अजमजरमनाद्येकं अमलं निष्कलं परं भूत्वा स्थितः। बद्धदशानुक्षणेन ईश्वरः सन् स्वकार्यभेदैरनेकं सकलं च भूत्वा स्थित इत्यर्थः २४ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे एकपञ्चाशः सर्गः ॥५१॥ वीतहव्ये विमुक्ते तत्प्राणानां हृदि संलयः। बाह्ये तद्देहसंशोषः कलानां कारणे लयः ॥ एवमुक्तौ च यो अपुनर्मनने आत्यंतिकमनोनाशेति १ परिणामिनि परिनिष्ठिते सति अपरिणामिनी तिबोधे हः। २

मार्गशीर्षस्यांतेहेमंतेपद्मवत्॥३॥ सर्वदेहव्यापिनां प्राणानां हृद्युपसंहारमाह तस्येति तस्य असवः प्राणाः देहद्रुमस्थं तत्स्थं तन्नाडीस्थानं त्यक्त्वा हृदयत्रसरेणीनीडं प्रति आययुः। देहद्रुमं तत्स्थं हृन्नीडं त्यक्त्वा बहिराययुरिति तु न व्याख्येयं न तस्य प्राणा उत्क्रामंत्यत्रैव समवलीयंते अत्रैव सन् ब्रह्माप्नोतीत्यादिश्रुतिविरोधापत्तेः सर्वकर्मवासनानाशेनोत्क्रमणे बीजप्रयोजनयोरभावाच्चेति॥ विहगायंतो विहगवदाचरंतः लोहितादित्वात्क्यष्। यंत्रेभ्यउन्मुक्ताः शिला इव॥४॥ इति तु पंचम्यामाहुतावापः पुरुषवचसो भवंति तद्यथापेशस्कारिवेशसो मात्रामपादायेत्यादिश्रुत्यात्तरं तरप्रतिपत्तौ रंहति परिष्वक्तः प्रश्ननिरूपणाभ्यामिति बादरायणोक्तन्यायाच्च ४

वा॰टी॰उ॰ २४३

तथैव तिष्ठन्निःस्पंदः स कायो म्लानिमाययौ। अंतर्विरसतां प्राप्य मार्गशीर्षांतपद्मवत्॥३॥ तस्य देहद्रुमं तस्थं त्यक्त्वा हृन्नीडमाययुः। प्रोड्डीय विहगायंतो यंत्रोन्मुक्ता इवासवः॥४॥ भूतेष्वेव प्रतिष्ठानि भूतानि सकलान्यलं। मांसास्थियंत्रदेहस्थं क्ष्मावनितलेवसत्॥५॥ चिदर्णवप्रविष्टाश्चिद्धातवो धातुषु स्थिताः॥ स्वे स्वरूपे स्थिते तस्मिन् सर्वे मुनावुपशमं गते॥६॥ एषा ते कथिता राम विचारशतशालिनी। विश्रांतिर्वीतहव्यस्य प्रज्ञ ठेनां विवेचय॥७॥ एवं प्रकारया चार्य्या स्वविचारेण येद्धया। तत्समालोक्य तत्सारं मा तिष्ठोन्निद्र राघव॥८॥

वैजन्मानुष्ठिताग्निहोत्रादिकर्मसमवायि पंचशब्दवाच्यसोमाज्यपयः प्रभृति भूतमात्रासहितस्यैव लिंगस्य चंद्रमंडलारूढस्य भोगांते आकाशादिक्रमेण पृथिव्यां व्रीहियवपुरुषयोषित्सु प्रवेशेन पुरुषाकारतां प्राप्स्यवणमात्तामं भूतमात्राणां कारणानुप्रवेशमाह भूतेष्वेवेति सकलानि प्राणादीनां मांतपोऽणुकलासहितानि यस्तु पितृमातृमलजाः स्थूलतरांशाः स तत्रैवस्थित इत्याह मांसेति॥५॥ चितलिंगे बिंबिताजीवचित्स्वबिंबभूते चिदर्णवे प्रविष्टे वधातवस्त्वगसृङ्मांसमेदोस्थिमज्जाशुक्राणि धातुषु स्वोपादानेषु॥६॥ उपसंहरति एषेति॥७॥ चार्य्या रमणीयया भावतो गुणवचनादितिङीष्॥८॥ राम॰ २४३

इदानीं भगवान्वसिष्ठः कृपातिशयेनोक्तोऽभ्यमानवक्ष्यमाणग्रंथस्य चिरायुर्भिः सर्वदर्शिभिरस्मदादिभिः सर्वप्रकारैरसकृत्कृतानां विचाराणां लोकशास्त्रश्रुतिभिरन्वयव्यतिरेकाभ्यां च परीक्ष्य भूयो दर्शनस्य चरेकात्यरदृष्टिमवलंब्य ज्ञानप्रतिष्ठाप्राप्तिरेव फलं नातः परं पुरुषैः संपाद्यमस्तीति निर्णीतमिति विश्वासस्थैर्य्यायाह यदेतदित्यादिना॥९॥१०॥११॥१२॥ शांतितः रं शांतिः अशेषः संस्कारशेषेणाप्यनवशेषितजास्त्विताद्विर्यन तथाविधो भूदिति शेषः॥१३॥ ननु वीतहव्येन स्वहृदि संकल्प्य मध्ये जगन्मत्रगणात्वानुभूतमित्युक्तं तज्जगदंतर्गतं स्वर्थं प्रविश्य तत्र स्वपिंगलद्वारा स्तज्जगद्दृ प्रतिष्ठस्य देहोद्वारः कथं कृतः महिस्ता प्रकुन्द्वालेजः प्रान्तिपिरवानन्दृष्टमिति

यदेतदखिलं राम भवते वर्णितं मया। भदिदं वर्णयाम्यद्य वर्णयिष्यामि यच्च वा॥९॥ त्रिकालदर्शिना नित्यं चिरं च किल जीवता। विचारितं च दृष्टं च मया तदखिलं स्वयं॥१०॥ तदेताममलां दृष्टिमवलंब्य महामते। ज्ञानमासादय परं ज्ञानान्मुक्तिर्हि लभ्यते॥११॥ ज्ञानान्निर्दुःखतामेति ज्ञानादज्ञानसंक्षयः। ज्ञानादेव परा सिद्धिर्नान्यस्माद्राम वस्तुतः॥१२॥ ज्ञानेन सकलामाशां विनिकृत्य समं ततः। शांतिनाशेषचिन्नाड्वीं वीतहव्यो मुनीश्वरः॥१३॥ वीतहव्यात्मिकासंवित्संकल्पजगती गता। अनुभूतवती दृश्यमिदमेव च तज्जगत्॥१४॥ वीतहव्यो मनोमात्रं मनोहंत्वमिवैंद्रियं नः। मनो जगदिदं कृत्स्नमन्यत्तु के॥१५ नानत्व
अधिगतपरमार्थः क्षीणरागादिदोषः सकलमलविकारोपाधिसंगाद्यपेतः। चिरमनुसृतमंतः स्वस्वभावं विवेकी पदममलमनंतं प्राप्तवान् शांतशोकः॥१६॥

रामारांकांक्षिभौराः तस्याहवीतहव्येति। सा वीतहव्यात्मिका संवित्स्वहृदयोपलक्षिते ब्रह्मणि इदमस्मदादिसाधारणमेव दृश्यं स्वसंकल्पजगतीगतमनुभूतवती नापूर्वमित्यर्थः॥१४॥ उत्तमं त्वमेव तज्जगदित्याह वीतहव्य इति सेंद्रियः अस्मदादिस्वस्फुरदिदृश्यो वीतहव्यः अस्मदीयमनोमात्रं यतो मन्मनस एवाहमिव त्वमिव भासते मनस्त्वेदं कृत्स्नं जगत्। न त्वान्यता अन्यते केन दृष्ट्या भेदेन तत्तु त्वामिष्टूंते वेत्यर्थः॥१५॥ एवं राम समाधाय प्रकृतमर्थमाह अधिगतेति। सकलेभ्योऽविद्याकामकर्मादिमलेभ्यस्तत्प्रयुक्तेंद्रियविकारेभ्यो देहत्रयोपाधिभ्यस्तत्प्रयुक्तप्रियसंगादिभ्यश्चापेतः। विवेकी सवीतहव्यः चिरं विततभुद्युपायानुष्ठानैः श्रवणमनननिदिध्यासनसाक्षात्कारसमाधिकाभ्यासैरंतः स्वहृदि अनुसरणेनाभिमुखीकृतं स्वभावभूतममलं अनंतं मोक्षपदं प्राप्तवानित्यर्थः॥१६॥

ते नमिद्धो

इतिश्रीवा॰ता॰प्र॰उ॰अष्टाशीतितमः सर्गः ॥ ८८ ॥ अनिच्छाशांतमोहानां नभोगत्वादिसिद्धिषु स्वतः प्रवृत्त्यभावात्तन्नेच्छाऽऽत्रकीर्त्यते आत्मानं स्वं नीवचोहरते श्रेतिका
स्वायन स्वनादिकर्मता ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ अंगेति संबोधनं ... ५ ॥ उदारः अंतः सर्वत्यागशीलः ॥ ६ ॥ ७ ॥ शिखिनां मयूराणां ८ शरीराणामित्यु

मोक्षोपायेषूपशमप्रकरणे वीतहव्यविश्रांतिः सर्गः ॥ ८८ ॥ श्रीवसिष्ठ उवाच । वीतहव्यवदात्मानं नीत्वा विदितवेद्यतां । वीतरागभयोद्वेग
स्तिष्ठ राघव सर्वदा ॥ १ ॥ त्रिंशद्वर्षसहस्राणि विजहार यथासुखं । वीतहव्यो वीतशोकस्तथा विहर राघव ॥ २ ॥ अन्ये च राजन्मुन
यो ज्ञातज्ञेया महाधियः । यथा वसन्त्वेराष्ट्रे त्वं तथैवास्व महामते ॥ ३ ॥ सुखदुःखक्रमैरात्मा न कदाचन गृह्यते ॥ सर्वगोपि महाबा
हो किं मुधा परिशोचसि ॥ ४ ॥ बहवो विदितात्मानो विहरंतीह भूतले । न केचन वशं यांति दुःखस्यांग भवानिव ॥ ५ ॥ स्वस्थोभ
व भवोदारः समो भव सुखी भव ॥ सर्वगस्त्वं त्वमात्मैव तव नास्ति पुनर्भवः ॥ ६ ॥ हर्षामर्षविकाराणां जीवन्मुक्ता महादृशः
न केचन वशं यांति मृगेंद्राः शिखिनामिव ॥ ७ ॥ श्रीराम उवाच । अनेनैव प्रसंगेन संशयोयं ममोदितः । शरत्कालइवांभोभं
तन्मे त्वं तनुतां नय ॥ ८ ॥ जीवन्मुक्तशरीराणां कथमात्मविदां वर । शक्तयो नेह दृश्यंते आकाशगमनादिकाः ॥ ९ ॥ श्रीवसि
ष्ठ उवाच ॥ आकाशगमनादीनि यान्येतानि रघूद्वह । प्रमाणिताः पदार्थानां सहजाः खलु शक्तयः ॥ १० ॥ यद्विचित्रं क्रियाजा
लं दृश्यते गम्यते पुनः ॥ रामवस्तुस्वभावोसौ न तदात्मविदां मतं ॥ ११ ॥

क्तेः सति प्रारब्धे वीतहव्यस्य विद्याधरादिभोगइव मानस्यः सिद्धयः संभवंत्येवेत्याशयः प्रमाणिताः प्रमाणैरुपलब्धाः ताः अग्नेरूर्ध्वज्वलनमिव देवयोनीनां स्वभावसिद्धाः
१० ॥ नभोगमनादिक्रियाजालं वस्तुस्वभावस्तत्त्वे निरोहस्वभावः मशकादीनामपि नभोगतिशक्तिदर्शनादिति भावः । मतं वांछितं ॥ ११ ॥



तर्हि मनुष्याणां योगसिद्धानभोगमनादिप्राप्तिः कथं तत्राह अनात्मविदिति । मण्योषधादिद्रव्यशक्त्या मंत्रशक्त्या योगाभ्यासादिक्रियाशक्त्या तत्परिपाककालशक्त्या
चकराचिदेव प्राप्नोति । दृष्टांतार्थं वा कालग्रहणं यथा पिपीलिका ग्रीष्मांतकालशक्त्या पक्षोद्गमात् नभोगतिं प्राप्नोति तद्वत् १२ स एव नभोगत्यादिर्न विषयः अभिला
षयोग्यस्तुच्छत्वात् ॥ आत्मवान् लब्धात्मा । अविद्यां अविद्याकं तुच्छफलं ॥ १३ ॥ १४ युक्तयो योगाभ्यासादिश्रमसहस्रेण । तथा क्रमास्तथाविधाः ॥ १५ ॥ तर्हि किं तत्त्व

अनात्मविद्मुक्तोपि नभोविहरणादिकं ॥ द्रव्यकर्मक्रियाकालशक्त्या प्राप्नोति राघव ॥ १२ नात्मज्ञस्यैष विषय आत्मज्ञो ह्या
त्मवान्स्वयं ॥ आत्मनात्मनि संतृप्तो नाविद्यामनुधावति ॥ १३ ये केचन जगद्भावास्तानविद्यामयान्विदुः ॥ कथं तेषु किलात्मज्ञ
स्त्यक्ताविद्यो निमज्जति ॥ १४ ॥ अविद्यामपि ये युक्त्या साधयंति सुखात्मिकां । ते त्वविद्यामया एव न त्वात्मज्ञास्तथाविधाः १५
तत्त्वज्ञो वाप्यतत्त्वज्ञोथः कालद्रव्यकर्मभिः । यथाक्रमं प्रयततेतस्यार्धं तादिसिद्ध्यति ॥ १६ ॥ आत्मवानिह सर्वस्मादतीतो विगतैषणः
आत्मन्येव हि संतुष्टो न करोति न चेहते ॥ १७ ॥ न तस्यार्थो नभोगत्या न सिद्ध्या न च भोगकैः ॥ न प्रभावेन नो मानैर्नाशामरणजीविते ॥ १८
नित्यतृप्तः प्रशांतात्मा वीतरागो विवासनः ॥ आकाशसदृशाकारस्तत्त्वज्ञ आत्मनि तिष्ठति ॥ १९ ॥ अशंकितोपयातेन दुःखेन च
सुखेन च तृप्यत्यपगतासंगो जीवेन मरणेन च ॥ २० ॥ समुद्रस्सरितेवांतः क्रमसंप्राप्तवस्तुना । समेन विषमेनापि तिष्ठत्यात्मा
नमर्चयन् २१

ज्ञानां तत्संपादनशक्तिर्नास्त्येव नेत्याह तत्त्वज्ञ इति कालेन चिरकालप्रयत्नेन द्रव्यकर्मभिर्यथाशास्त्रोक्तक्रमं प्रयतते तस्य ऊर्ध्वं नभोगतित्वादिसिद्ध्यति १६ १७ प्र
भावेन सर्वाभिपत्त्यनिग्रहानुग्रहसामर्थ्येन मानैः स्वोत्कर्षख्यापनार्थैः १८ १९ तृप्यति स्वाभाविकी तृप्तिं न जहाति जीवनेन २० समेनस्वानुकूलेन विषमेन प्रतिकूलेनापि प्रा
रब्धक्रमसंप्राप्तभोग्यवस्तुना समुद्रपक्षे ओघतृणकाष्ठादिवस्तुना अर्चयन् अखंडाकार इति पुष्पैः पूजयन् २१

अर्थव्यपाश्रयः प्रयोजनोपजीवनं ॥ २२ ॥ अभावितात्मा आत्मज्ञानलेशशून्योपि ॥ २३ ॥ मणिमंत्रादियुक्त्या इव आकाशगमनादिरूपेत्थं सिद्ध्यतीति तत्तच्छास्त्रप्रसिद्धो नियतेः क्रमः तन्नान्नियतिकर्तृभिरूर्ध्वपक्षादिभिरपि व्यर्थीकर्तुं न शक्यते ॥ २४ ॥ यातुदेवादीनां स्वतः खेचरत्वादिसिद्धिः एष वस्तुस्वभावः अत एव सा उत्पत्तिमारभ्य यावज्जीवस्थायिनीत्याह नन्त्वहास्येवेति ॥ २५ ॥ २६ ॥ २७ ॥ विषघ्नौषधादिद्रव्यशक्तिवदेव मणिमंत्रादिशक्तिरपि स्वस्वकार्यसमर्थेत्याह यथेति । विषघ्नद्रव्यमणिमंत्रादिशक्तयो विषाणि घ्नंति मदं नियथा मदयंति ॥ यथा शुक्तानि मास्तिकमधूनि मदनफलानि चास्वादितानि वमयंति उद्गिरणं कारयंति ॥ २८ ॥ प्रयुज्यते इति प्रयोगं सिद्धिजातं नियतम

नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन । न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥ २२ ॥ यस्त्वभावितात्मापि सिद्धिजालानि वांछति ॥ स सिद्धिसाधकैर्द्रव्यैस्तानि साधयति क्रमात् ॥ २३ ॥ सिद्ध्यतीत्थमिदं युक्त्यैवेत्ययं नियतेः क्रमः ॥ न्यक्षादिभिः सुरवरैर्व्यर्थीकर्तुं न शक्यते ॥ २४ ॥ स्वभाव एष वस्तूनां स्वतः सिद्धिर्हि नान्यतः ॥ नियतिं न जहात्येव शंशाक इव शीततां ॥ २५ ॥ सर्वज्ञोपि बहुज्ञोपि माधवोपि हरोपि च ॥ अन्यथा नियतिं कर्तुं नेशक्तः कश्चिदेव हि ॥ २६ ॥ द्रव्यकालक्रियामंत्रप्रयोगाणां स्वभावजाः ॥ एतास्ताः शक्तयो राम यद्व्योमगमनादिकम् ॥ २७ ॥ यथा विषाणि घ्नंति मदयंति मधूनि च ॥ वमयंति च शुक्तानि मदनानि फलानि च ॥ २८ ॥ तथा स्वभाववशतो द्रव्यकालक्रियाक्रमः ॥ नियतं साधयंत्याशु प्रयोगं युक्तयोजिताः ॥ २९ ॥ एतस्मात्समतीतस्य त्यक्ताविद्यस्य राघव ॥ आत्मज्ञानस्य नास्त्यत्र कर्तृता कर्तृतानघ ॥ ३० ॥ द्रव्यदेशक्रियाकालयुक्तयः साधुसंविदः ॥ परमात्मपदप्राप्तौ नोपकुर्वंति काश्चन ॥ ३१ ॥ यस्येच्छा विद्यते काचित्स सिद्धिं साधयत्यलं ॥ आत्मज्ञस्यातुपूर्णस्य नेच्छा संभवति क्वचित् ॥ ३२ ॥ सर्वेच्छाजालसंशांतावात्मलाभोदयो हि यः ॥ तद्विरुद्धा कथं कस्मादिच्छा संजायतेऽनघ ॥ ३३ ॥ यथोदेति च यस्येच्छा स तया यतते तथा ॥ यथाकालं तदाप्नोति ज्ञो वाप्यज्ञतरोपि वा ॥ ३४ ॥

वश्यं साधयंति युक्तैर्योगादिकुशलैः पुरुषैर्योजिताः प्रयुक्ताः ॥ २९ ॥ एतस्माद्द्रव्यकालक्रियाक्रमलक्षणादविद्याविषयात्समतीतस्य त्यक्ताविद्यस्य बाधिताज्ञानस्य अत्र नभोगमनादिसिद्धिजाले कर्तृता कारणता अकर्तृता विरोधिता वा नास्तीत्यर्थः ॥ ३० ॥ यथा आत्मज्ञानस्य क्रियाफले द्रव्यदेशक्रियादेरनुपयोगस्तथा द्रव्येति साधुसंविदस्तत्त्वज्ञानस्य ॥ ३१ ॥ २ ॥ कुतो न संभवति तत्राह सर्वेति ॥ ३३ ॥ निरिच्छोपि तत्त्वविन्नौतु
अनुमेयागतप्रायानुतान प्रलेप ॥

[right margin, written vertically:] काद्यातेवेनात्मसमुत्पंनेच्छावशिष्टस्य इत्यास्वेच्छे कोप्ययं नाइत्यवेति



---

वीतहव्यस्य तर्हि सिद्धयः कुतो न जातास्तत्राह वीतहव्येनेति ॥ सिद्धीच्छया नो यतितं ॥ तत्कुतस्तत्राह ज्ञानेच्छेनेति । ज्ञानेच्छया इतरेच्छाप्रतिबंधादित्यर्थः । ज्ञानेच्छयातु तेन यतितमेव यथा असौ वने ज्ञानाभ्यासाय प्रोत्थित उपयुक्त इति प्राग्वर्णितमेवेत्यर्थः ॥ ३५ ॥ ३६ ॥ सिद्धिविषये ज्ञानविषये वा अनुपरतस्य प्रयत्नस्यावश्यफलवत्त्वमुक्त्वा व्यवहारप्रकरणे विस्तरेण प्रपंचितेत्याह याः फलेति ॥ मन्त्रौषधीवाप्तितो द्रव्यः संप्राप्ताः दृश्यंत इति शेषः ॥ ३७ ॥ ईहितं सर्वाभिलषितं परमप्रेमास्पदमात्मसुखमिति यावत् ॥ ३८ ॥ क्लिन्नापंकादिक्लेदान्नेविशीर्णेत्यर्थः ॥ ३९ ॥ जदाम्प्रवेशकाले एव इति एतत्प्रश्नद्वयोत्तरं यथावद्वद ॥ ४० ॥ तत्र प्रथमप्रश्नस्योत्तरं वक्तुं स्मि

वीतहव्येन यतितं नो ज्ञानेच्छेन किंचन ॥ ज्ञानेच्छया तु यतितं प्रोत्थितोसौ यथा वने ॥ ३५ ॥ एवं कालक्रियाकर्मद्रव्ययुक्तिस्वभावजाः ॥ यथेच्छमेव सिद्ध्यंति सिद्धयः स्वाः क्रमार्जिताः ॥ ३६ ॥ याः फलावलयो येन संप्राप्ताः सिद्धिनामिकाः ॥ तास्तेनाधिगता राम निजात्प्रयत्नद्रुमात् ॥ ३७ ॥ महतां निस्पृहत्मानां तज्ज्ञानां भावितात्मनां ॥ ईहितं संप्रयातानां नोपकुर्वंति सिद्धयः ॥ ३८ ॥ श्रीराम उवाच ॥ अयं मे संशयो ब्रह्मन्वीतहव्यस्य सा तनुः ॥ कस्यादेर्न कथं मुक्ता कथं क्लिन्ना न भूतले ॥ ३९ ॥ तदैव वीतहव्योसौ कथं च न गतः प्रभो ॥ विदेहमुक्ततां शीघ्रं यथा वदितिमेव द ॥ ४० ॥ श्रीवसिष्ठ उवाच ॥ या संविद्गलिताशा धीवासनामलतं तनुः ॥ सुखदुःखदशादाहभागिनी भवतीह सा ॥ ४१ ॥ निर्मुक्तवासना शुद्धसंविन्मात्रमयी तु सा ॥ तनुस्तिष्ठति तच्छेदे शक्ता नेह हि केचन ॥ ४२ ॥ शृणु युक्त्या कयायोगी तनुच्छेदादिविभ्रमैः ॥ नाक्रम्यते महाबाहो बहुवर्षशतैरपि ॥ ४३ ॥ चेतः परार्थे पततिय स्मिन्यस्मिन्पदार्थदा ॥ तन्मयं तद्भवत्याशु तस्मिंस्तस्मिंस्तदा तदा ॥ ४४ ॥

कीदृश्यतीत्येति । या अज्ञसंविदितदेहाहंभाववासनारूपेणागारिमा लहविते न तनुः ना बलिता दहं वेष्टितामवति सैवदेहच्छेदभेदादिप्रयुक्तसुखदुःखदशाल भाग्दाहभागिनीत्यर्थः ॥ ४१ ॥ सा जीवन्मुक्ततनुः अपि ज्ञानशुद्धसंविन्मात्रमयीति तिष्ठति तत्स्वसंविन्मात्रस्य छेदे केपि क्रव्यादादयो न शक्ताः अच्छेद्योयमदाह्योयमक्लेद्योशोष्य एव चेति भगवद्वचनादिति भावः ॥ ४२ ॥ उपपत्त्यंतरं वक्तुं प्रतिजानीते शृण्विति ॥ ४३ ॥ ४४ ॥

या॰टी॰उ॰प॰ २४६ तथा हीति संबंधः दृष्टः अरिर्द्वेष्टा येन तथाविधं मनः। अरिद्वेषप्रतिबिंबमिव द्वेषादिविकारं उपगच्छति दृष्टमित्रं तु मनस्तदीयहृदयप्रीतिप्रतिबिंबमिव सुहृद्भावमुपगच्छतीत्ययमर्थः सर्वैः स्वयं प्रत्यक्षमनुभूयत इत्यर्थः॥४५॥ अत एव एकस्य रागद्वेषशून्यत्वे अन्यस्यापि न द्वेषस्तत इत्याह रागेति। पथिके उदासीने पुरुषे पादपे गिरौ च विषये मनः अरागद्वेषं भवतीत्यर्थः॥४६॥ एवमचेतनेषु भोज्यादिषु विप्रात्यप्रीत्योदासीन्यानि तद्गुणदोषवत्तद्भयाभावप्रतिबिंबतादेव मननात् प्रसिद्धानीत्याशयेनाह मिष्टे इति। दुर्भोज्ये नीरसे निस्पृहं स्पृहाभावं अर्थाभावे व्ययीभावे इत्यवः वैरस्याभावस्यानुपलक्षणमेतत्॥४७॥ अस्त्वेवं प्रकृते किं तत्राह समेति समो रागद्वेषवैषम्यशून्यो यः संविद्विलासस्तेन आढ्यं संपन्नं तमेव यतिं देहके योगिशरीरे यत् हिंस्राणां क्रव्यादानां चेतः येन पतति ततस्तराम् आशु तत्काल

तथा दृष्टारिहि मनो विकारमुपगच्छति॥ दृष्टमित्रं सुहृद्भावं स्वयमित्यनुभूयते॥४५॥ रागद्वेषविहीने तु पथिके पादपे गिरौ॥ भवत्यराग
द्वेषं च स्वयमित्यनुभूयते॥४६॥ मृष्टे लौल्यमुपादत्ते दुर्भोज्ये याति निस्पृहं॥ वैरस्यं याति कटु निस्स्वयमित्यनुभूयते॥४७
समसंविद्विलासाढ्यं यद्यदायति देहके॥ हिंस्रचेतः पतत्याशु समतामेति तत्तरा॥४८॥ समसंगविमुक्तत्वाच्छेदादौ न प्रवर्तते॥ पांथो
व्यर्थं पथि ग्रामे यथा ग्रामीणकर्मणि॥४९॥ योगिदेहसमीपात्तु गत्वाप्नोति हिंस्रतां॥ यद्यद्भवति तत्राशु तथा रूपं न संशयः॥५०

मेव योगिसंवित्समस्ता प्रतिबिंबनादिव समतामेति अतो न तत्कृतहिंसाप्रसक्तिरित्यर्थः। तथा च हिंसाप्रतिष्ठां प्रसक्तस्य पतंजलिनोक्तं तत्सन्निधौ वैरत्याग इति ४८। हिंस्रोपि समस्य समदर्शिनो यतेः संगेन द्वेषादिभ्यो विमुक्तत्वात् कस्यापि छेदनादौ न प्रवर्तते यथा ग्रामीणकर्मणि ग्रामसन्निहितवनलताच्छेदादौ पांथो न प्रवर्तते तद्वत्॥४९॥ योगिदेहसमीपादन्यत्र गत्वा तत्तद्दोषादियुक्तं यद्यज्जंतुजातं भवति तत्तदनुरूपां हिंस्रतां प्राप्नोति॥५०॥ राम॰ २४६

---

इति एतस्मात्कारणाद्भयात् ५१। कथं क्लिन्नानभस्तले इति प्रश्नस्योत्तरमाह सर्वत्रेत्यादिना ५२ तर्हि पुर्यष्टके एवं कथं तदुपलंभस्तत्राह पोऽस्यमानेति दृष्टावमानेतरलापरिणामसहस्रविषमात् तन्वी परिच्छिन्ना च सा परिदृश्यते। असमाहितचित्तैरिति शेषः ५३ तेन वीतहव्यस्य पुर्यष्टके न तत्त्वबोधसमाधिभ्यां समरूपया अविषमस्वभावं नीतया भूजलादिसंवित्त्या तनुर्निर्विकारं सर्वविकारशून्यं ब्रह्मभावं नीता न विकारं गतेत्यर्थः ५४ अन्यद्युक्तं चेतरमपि शृणु तदेवाह स्प

इति हिंस्रैर्मृगव्याघ्रसिंहकीटसरीसृपैः॥ न छिन्ना वीतहव्यस्य तनुर्भूतलशालिनी ५१ सर्वत्र विद्यते संवित्काष्ठलोष्टोपलादिके सत्ता
सामान्यरूपेण संस्थिता मरुकवालवत् ५२ पोऽस्यमानान्तरला केवलं परिदृश्यते तन्वी पुर्यष्टके चैव प्रतिबिंबं जलेष्विव ५३
तेन भूजलवाय्वग्निसंवित्त्या समरूपया। निर्विकारं तनुर्नीता वीतहव्यस्य राघव। ५४ अन्यच्च शृणु मे राम स्पंदो नाशस्य कारणं
विकारः सच चित्तोत्थो वातजो वा जगत्स्थितौ। ५५ प्राणानां प्राणानं स्पंदस्तच्छांतौ ते दृषत्समाः यतः स्थिता धारणया तेनान दृष्टास्य सा
तनुः॥५६। स बाह्याभ्यंतरस्पंदश्चित्तजो वातजोऽथवा नयस्य विद्यते तस्य हरस्यो प्रकृतिक्षयौ ५७ स बाह्याभ्यंतरे शांतस्पंदो भवति दीर्घ
वर धातवः संस्थितिं देहे नयंति कदाचन ५८ संशान्ते देहमस्पंदे चित्तवातमये तथा धातवो मेरुवत्स्थैर्यं यांति संस्तंभितात्मकाः
५९ तथा च दृश्यते लोके स्पंदशांतौ दृढस्थितिः दारूणामिव धीराणां शवानां नामचोपता ६० इति वर्षसहस्राणि देहाजग्गिर्यो
गिनो न क्लिद्यंते न भिद्यंते मग्नवज्जलदाइव ६१

इत्यादिना जगत्स्थितौ लोकव्यवहारे प्रसिद्ध इत्यर्थः ५५ ते प्राणाः देहदृषत्समाः दृढीभूताः यतो हेतोः स्थितास्तेन देहे तनुः ५६ बाह्यो हस्तपादादिराभ्यंतरः प्राणादिस्तत्सहिते देहे प्रकृतिर्वृद्ध्यादिः क्षयः अपक्षयादिश्च ५७ धातवस्त्वगादयः संस्थितिं दृढावस्थां ५८ मेरुवं मेरुसदृवधि मेरुतुल्यमिति यावत् ५९ स्पंदयतीति स्पंदः प्राणस्तच्छांतौ शवानां इव अचोपता अकंपता उपमर्दाय गतौ भावे घञ् ६० इति अनयायुक्त्या जलदा इव न क्लिद्यंते भस्मान शिलावत् न भिद्यंते इति व्युत्क्रमेणान्वयः ६१

चरमप्रश्नमनन्तरोत्तरमाह तदेवेत्यादिना ज्ञातं ज्ञेयं अस्येति ज्ञातज्ञेयस्तत्परिज्ञानात्मवतां वा ॥ ६२ ॥ नस्वातंत्र्यमेवोपपादयति दैवमिति ॥ प्राक्तनकर्मफलप्रदानोन्मुखईश्वरो दैवं कर्मप्राधान्यवादे कर्माणि च तेषां प्रारब्धशेषभोगाग्रहत्वं चेतो नानियमयंति नान्यथा प्रवर्तयितुमीशते ॥ ६४ ॥ काकतालीयवदाकस्मिकप्रारब्धोनीतं यद्दज्जीवनं मरणं वा ॥ ६५ ॥ ६६ ॥ यदा तु प्रारब्धसमाप्तौ प्रतिभासंवित् गता भाविता वती ॥ ६७ ॥ उक्तमेवर्थं संक्षिप्योपसंहरति विगतेति ॥ विपाशतामुपगतं अत एव वासनावात्मस्वभावे नोदितं मनस्तदुपाधि जीवस्य वहिः यस्मात्सकलशक्तिमयः शिव एव स्वयं ज्ञानइत्यर्थः ॥ तथा चाहुः ॥ तुषेण बद्धो व्रीहिः स्यात्तुषाभावे तु तंदुलः पाशबद्धः सदा जी

तत्रैवं वीतहव्योसौ शृणु किं नोपशांतवान् ॥ देहमुत्सृज्य तत्त्वज्ञो ज्ञातज्ञेयवतां वर ॥ ६२ ॥ ये हि विज्ञातविज्ञेया वीतरागा महाधियः ॥ विच्छिन्नग्रंथयः सर्वे ते स्वतंत्रा स्वतनौ स्थिताः ॥ ६३ ॥ दैवं वापि च कर्माणि प्राक्तनान्यैहिकानि च ॥ वासना वा न तेषां तच्चेतो नियमयंत्यलं ॥ ६४ ॥ तेनात्तविदां तात काकतालीयवन्मनः ॥ यद्यद्भावयति क्षिप्रं तत्तदाशु करोत्यलं ॥ ६५ ॥ काकतालीययोगेन वीतहव्यस्य संविदा ॥ सांप्रतं जीवितं बद्धं तदेवाशु स्थिरीकृतं ॥ ६६ ॥ यदा तु तस्य प्रतिभा विदेहोन्मुक्ततां गता ॥ तदा विदेहमुक्तोऽसौ स्वातंत्र्ये संस्थितिः ॥ ६७ ॥ विगतवासनमाशु विपाशतामुपगतं ॥ मन आत्मतयोदितं यदभिवांछति तद्भवति क्षणात्सकलशक्तिमयो हि महेश्वरः ॥ ६८ ॥ मोक्षोपाये उपशमप्रकरणे सद्धिलासविचारयोगोपदेशः सर्गः ॥ ८९ ॥ श्रीवसिष्ठ उवाच ॥ यदा ह्यसंगतप्रायं जातं चित्तं विचारतः ॥ तदा हि वीतहव्यस्य जाता मैत्र्यादयो गुणाः ॥ १ ॥ श्रीराम उवाच ॥ विचाराभ्युदयाच्चित्तस्वरूपे तर्हि ते मुने ॥ मैत्र्यादयो गुणा जाता इत्युक्तं किं त्वयाप्रभो ॥ २ ॥ ब्रह्मण्यसंगते चित्ते कस्मै मैत्र्यादयो गुणाः ॥ क्व वा परिस्फुरंतीति वद मे वदतां वर ॥ ३ ॥

वः पाशमुक्तः सदाशिव इति ॥ ६८ ॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे एकोननवतितमः सर्गः ॥ ८९ ॥ मैत्र्यादिगुणसंपन्नस्तथा निष्ठस्त्वसंगतः द्विविधश्चित्तनाशोऽत्र विस्तरेणोपवर्ण्यते ॥ असंगतप्रायं भर्जितबीजवदंकुरशक्त्या असंगतं प्रतिभासतस्तु संगतमित्यर्थः ॥ १ ॥ इति त्वया किं किमभिप्रायं उक्तं ॥ २ ॥ असंगते वोधिते सति ॥ कस्य किं बाधितस्य उत अधिष्ठानस्य कस्य वा किं चिदाभासे उत बिंबचितिस्फुरंति न हि बाधितानामसंगतस्यानद्यामहन्मेरौ शैत्यमाधुर्यपीवनत्वादयो गुणाः



स॰ ९

सरूपः स्फटिकभित्तिगतप्रतिबिंबवद्रूपांतरभ्रमाभासवत्प्रतिभासमानतद्रूपसहितो द्रूपरहितश्च ॥ ४ ॥ ५ चित्तसत्तातर्हि कीदृशी ता महत्ता मसै सैरिति तामसैः अबाधितात्ज्ञानप्रभवैः ॥ ६ ॥ प्राक्तनमनोऽभ्यासंसिद्धदेहेंद्रियविषयादेर्गुणसंभारं धर्मजातं आत्मसंसर्गाध्यासान्ममेत्यभिमन्यते ॥ ७ ॥ ८ ॥ अस्मिन्नज्ञजंतावेव वासनाप्ररोहजालैरवष्टब्धं दृढप्रतिष्ठितं विद्यमानं मनः दुःखतरोर्मूलं विद्धि ॥ दुःखवृक्षवनस्य अंकुरः प्ररोहायस्य तथाविधं ॥ ९ ॥ नाशस्य अभावे तां गतस्य सत्ता विद्यमानता व्यवहारक्षमता कीदृशी किं

न

श्रीवसिष्ठ उवाच ॥ द्विविधश्चित्तनाशोऽस्ति सरूपोऽरूप एव च ॥ जीवन्मुक्तः सरूपः स्यादरूपो देहमुक्तजः ॥ ४ ॥ चित्तसत्ते ह दुःखाय चित्तनाशः सुखाय तु ॥ चित्तसत्तां क्षयं नीत्वा चित्तनाशमुपानयेत् ॥ ५ ॥ तामसैर्वासनाजालैर्व्याप्तं यज्जन्मकारणं ॥ विद्यमानं मनो विद्धि तद्दुःखायैव केवलं ॥ ६ ॥ प्राक्तनं गुणसंभारं ममेति बहु मन्यते ॥ यत्तु चित्तमतत्त्वज्ञं दुःखितं जीव उच्यते ॥ ७ ॥ विद्यमानं मनो यावत्तावद्दुःखक्षयः कुतः ॥ मनस्यस्तं गते जंतोः संसारोंतमुपागतः ॥ ८ ॥ दुःखस्य मूलं वृष्ट्यं अस्मिन्नेव विनिश्चलं ॥ विद्यमानं मनो विद्धि दुःखवृक्षवनांकुरं ॥ ९ ॥ श्रीराम उवाच ॥ नष्टं कस्य मनो ब्रह्मन्नष्टं वा कीदृशं भवेत् ॥ कीदृशश्चास्य नाशः स्यात्सत्तानाशस्य कीदृशी ॥ १० ॥ श्रीवसिष्ठ उवाच ॥ चेतसः कथिता सत्ता मया रघुकुलोद्वह ॥ अस्य नाशमिदानीं त्वं शृणु प्रश्नविदां वर ॥ ११ ॥ सुखदुःखदशा धीरं साम्यान्न प्रोद्धरंति यं ॥ निश्वासा इव शैलेंद्रं चित्तं तस्य मृतं विदुः ॥ १२ ॥ अयं सोहमयं नाहमिति चिंतानरोऽक्षमं ॥ खवीकरोति यन्नांतर्नष्टं तस्य मनो विदुः ॥ १३ ॥ आपत्कार्पण्यमुत्साहो मदो मांद्यं महोत्सवः ॥ यं न यंति न वैरूप्यं तस्य नष्टं विदुर्मनः ॥ १४ ॥

श्रीरामनाशार्थ

लक्षणा ॥ १० ॥ कथिता तामसैर्वासनाजालैरित्यादिग्रंथेन ॥ ११ ॥ यं धीरं बाह्या आभ्यंतरा वा सुखदुःखदशाः साम्यात्समस्वभावस्वरूपानंदैकरसस्वात्मप्रतिष्ठायाः सकाशात्न प्रोद्धरंति ॥ न चालयंति तस्य चित्तं मृतं नष्टं विदुः ॥ १२ ॥ अयं सम्प्रति तज्ज्ञिमितो देहः स प्रसिद्धोऽहं अयं तदितिरिक्तः सर्वो नाहं इति चिंताभावनायं न खवीकरोति न परिच्छिनत्तीति यावत् ॥ १३ ॥ वैरूप्यं मुखवैवर्ण्यं ॥ १४ ॥

लक्षणोक्तिमुपसंहरति स्पष्टइति ॥१५॥ मनस्तां परमार्थतामप्राप्यादृश्यमननयोग्यतां ॥ सत्वं शुद्धसत्वभावत्वं ॥१६॥ कैश्चित्तद्व्यवहाराभासदर्शिभिः ॥१७॥ तदेव सत्वं जीवन्मुक्तानां मनः मैत्र्यादिभिर्गुणैर्युक्तं भवति ॥१८॥ वासनया ब्रह्माकारवासनया ॥ सत्वनाम्नाख्यवह्रियते ॥१९॥ संप्रति व्युत्थानकाले प्रतिभासतोऽनुभूतत्वात्तत्स्वरूपः साकारइव सत्स्य सन्मात्रस्वभावस्य स्याच्च तत्वसंस्थितो देहादिपरिच्छेदमस्पृशन् मननीयाभावान्मनोनाशश्चाभासाविसर्थः ॥ अनेन सत्तानाशस्य कीदृशीति प्रश्नांशः समाहितः २०

एषसाधो मनोनाशो नष्टं चैतन्मनो भवेत् ॥ चित्तनाशदशा चैषा जीवन्मुक्तस्य विद्यते ॥१५॥ मनस्तां मूढतां विद्धि यदा नश्यति तान घ। चित्तनाशाभिधानं हि तदा सत्वमुदेत्यलं ॥१६॥ तस्य सत्वविलासस्य चित्तनाशस्य राघव। जीवन्मुक्तस्वभावस्य कैश्चिच्चिन्ताभिधाकृता ॥१७॥ मैत्र्यादिभिर्गुणैर्युक्तं भवत्युत्तमवासनं ॥ भूयोजन्मविनिर्मुक्तं जीवन्मुक्तमनोनघ। १८। व्याप्तं वासनयाप्यत्याद्वियोजननमुक्तया ॥ जीवन्मुक्तमनः सत्वारामतत्सत्वमुच्यते ॥१९॥ संप्रत्येवानुभूतत्वात्सत्ता स्यात्तत्त्वसंस्थितः ॥ सरूपो सौ मनोनाशो जीवन्मुक्तस्य विद्यते ।२०। मैत्र्यादयोथ मुदिताः शं शांकइ वदीस्ययः ॥ जीवन्मुक्तमनोनाशे सर्वदा सर्वथास्थिताः ॥२१॥ जीवन्मुक्तमनोनाशे सत्वनाम्नि हिमालये ॥ वसंतइव मंजर्यः स्फुरंति गुणसंपदः ।२२॥ अरूपस्तु मनोनाशो यो मयोक्तो रघूद्वह ॥ विदेहमुक्त एवासौ विद्यते निष्कलात्मकः ।२३। समग्राग्र्यगुणाधारमपि सत्वं प्रलीयते। विदेहमुक्ते विमले पदे परमपावने ॥२४॥ विदेहमुक्ता विषये तस्मिन्सत्वक्षयात्मके। चित्तनाशे विरूपाख्ये न किंचिदपि विद्यते। २५॥ न गुणा नागुणास्तत्र न श्रीर्नाश्रीर्न लोलता ॥ न चोदयो नास्तमयो न हर्षामर्षसंविदः ।२६। न तेजो न तमः किंचिन्न संध्यादिनात्रयः न दिशो न च नाकाशो नाधो नानर्थरूपता ॥२७॥ न वासना न रचना नेहानीहे न रंजना ॥ न सत्ता नापि वासत्ता न च साध्यं हि तत्पदं। २८।

अत एव मैत्र्यादिगुणा अपि प्रतिभासत स्तत्रोपपन्नाइत्याह मैत्र्यादयइति मुदिताः प्रसन्नाः २१ हिमस्य संतोषशैत्यस्य आलये। २२। द्वितीयं मनोनाशं दर्शयति अरूपास्त्विति ॥२३॥ सत्वं प्रातिभासिकं मनः ।२४। न किंचिदपि दृश्यं यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमेति श्रुतेरित्यर्थः ॥२५॥ उक्तमेव प्रपंचयति न गुणाइत्यादिना ।२६।२७॥ सत्ताभावः असत्ता अभावः २८ 

---

तेजोभिस्त्विषा सूर्यज्योतिषा च रहितेन। २९। आस्पदं प्रतिष्ठा। ३०। अजडात्मकमेव ततसुप्तमिवोन्मेषादिक्रियारहितं अतनवो विदेहमुक्ताः तस्मिन्पदे गलितः प्रातिभासिकचित्तलवो येषां तथाविधाः संतस्तस्मिन्पदे वसंति अपुनरावृत्त्यास्थिरीभवंतीत्यर्थः ३१ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे नवतितमः सर्गः ९० संसृतिप्रततेर्बीजं शरीरं तस्य मानसं। प्राणस्पंदो वासना च तद्बीजइति वर्ण्यते ॥ ब्रह्मण्येव स्थितेचतुर्दशभुवनाकारे जगति प्रसृताया जीवसंसरणलताया बीजपरंपरा विभिंस्लोच्छेदोपायजिज्ञासया प्र का॰श॰ ष्टुकामो रामः प्रथमं जगद्वनत्वेन वर्णयति परमेत्यादिना। परमाकाशस्य निर्विशेषब्रह्मणो द्विरदवाराधतारुद्रौ अव्याकृतनेरूढानि लोकांतरालि विचित्रभुवन ब्रह्मांडभेदास्ते द्रुमाः द्रु

अतमस्तेजसा व्योम्ना वितारेंदुर्कवायुना। तत्समं शरदच्छेन निःसंध्येनास्तत्त्विषा ॥ २९॥ येहि पारंगता बुद्धेः संसाराडंबरस्य च। तेषां तदास्पदं स्फारं वनानामिवांबरं ॥३०॥ संशांतदुःखमजडात्मकमेवसुप्तमानंदमंथरमपेतरजस्तमोयत् ॥ आकाशकोशतनवोतनवो महांतस्तस्मिन्पदे गलितचित्तलवा वसंति ॥३१॥ मोक्षोपायेषु उपशमप्रकरणे चित्तोपदेशविचारयोगो नामोपदेशः सर्गः ॥९०॥ श्रीरामउवाच ॥ परमाकाशकोशाद्रिरूढलोकांतरद्रुमं। तारकापुष्पशबलं देवासुरविहंगमं ॥१॥ विद्युन्मंजरिपांतनीलनीरदपल्लवं ॥ सर्वर्तुरम्यं चंद्रार्कगणरम्यकदंतुरं ॥२॥ सप्ताब्धिवापीवलितं सरिच्छन्नमनोहरं ॥ चतुर्दशविधानं तेभूतजातोपजीवितं ॥३॥ तो जगत्काननमाक्रम्य स्थिताया: कृतजालकं। अनुसंसृतिमद्वीकालतायाः विकसाकृते ॥४॥ जरामरणपर्वायाः सुखदुःखफलावले: ॥ प्ररूढमूलमालाया मोहसेकजलांजलेः ॥५॥

वर्णा

स्यायस्मिन्स्वंतारकापुष्पशबलमित्यादिविशेषणान्यविवनरूपकोपपादकानि। १। विद्युद्विमंजरितेषु संजातमंजरीकेषु दिक्शाखाग्रेषु नीलानि नीरदाभेघाएव पल्लवा यस्मान्महरितादिवर्णानि यस्मिन् चंद्रार्कग्रहगणलक्षणैः रम्य केविंकासरमणीयैः पुष्पैर्दंतुरं उन्नततरं तं प्रहसदिवस्थितं। २। लोकभेदाच्चतुर्दशविधैः प्रत्येकमनंतैर्भूतजातैरुपजीवितं। ३। ईदृशं जगत्काननं आक्रम्य वासनाप्रतानैः सर्वतः सेवेष्टु कृतजालकं यथा स्यात्तथा स्थिताया: संसृतिःजीवसंसरणं तल्लक्षणायाः मद्वीकाद्राक्षाबीजतत्त्वता सा। ४। जरामरणान्येव पर्वाणि कांडग्रंथयो यस्याः। पर्वशब्दः अकारांतोपि क्वचिदस्ति ॥ मोहाएव सेकाजलांजलयो यस्याः ॥५॥

बीजं परं परा चतुर्थप्रश्नः ६ ७ अंतर्लिंगदेहे लीनानि प्रच्छन्नानि घनारंभाणि विचित्रानंतकार्यारंभकाणि शुभाशुभकर्माण्येव महांतः अंकुराः यस्मिन् ८ इयं संसृ
तिव्रततिस्तेन तादृशशरीरेण स्फीता अभिवृद्धा भवति। वसुंधरा मस्य संपदेति शेषः ९ तस्यापि किं बीजमुच्यत इति द्वितीयप्रश्नस्योत्तरमाह भावेति भावो विद्यमानपदार्थः
अभावस्तदपक्षयः आशायाः वशं शत्रु अनुगम्य स्मरते १० सत् वर्तमानं असत् अतीतानागतं च अंगजालकं शरीरजातं चित्तोच्छरीरोद्भवे स्वप्नमिवं प्रमा
णयति यथा चेतदिति। ११ यथा गंधर्वाणां पुरमिवोत्सात तत्प्रदर्शनसंकल्पाच्चेतसः सकाशादेव पुरं जायते तद्वद् वपुः शरीरमित्यर्थः १२ किंच नात्रासंभावनात्मु

। किं बीजमथ बीजस्य तस्य किं बीजमुच्यते। अथ तस्यापि किं बीजं तस्यापि किं भवेत्। ६ सर्वमेतत्समासेन पुनर्बोधविवृद्धये। सिद्धये ज्ञानसा
रस्य वद मे वदतां वर ७ श्रीवसिष्ठ उवाच। अंतर्लीनघनारंभशुभाशुभमहांकुरं। संसृतिव्रततेर्बीजं शरीरं विद्धि राघव ८ शाखाशता
नगहना फलपत्त्रवशालिनी। तेनेयं भवति स्फीता शरदीव वसुंधरा ९ भावाभावदशाकोशं दुःखरत्नसमुद्गकं। बीजमस्य शरीरस्य चित्तमा
शावशानुगं १० चित्ताद्रिदुदेत्युच्चैः सदसद्वागजालकं। यथा चेतत्स्वयं स्वप्नसंभ्रममेवानुभूयते। ११ यथा गंधर्वसंकल्पात्पुरमेव हि चेतसः
समायातमनाकारमासुरं जायते वपुः १२ यदिदं किंचिदाभोगि जागतं दृश्यतां गतं। रूपं तच्चेतसः स्फारं घटादित्वं मृदो यथा १३ द्वे बी
जे चित्तवृक्षस्य वृत्तिव्रततिधारिणः। एकं प्राणपरिस्पंदो द्वितीयं दृढभावना १४ यदा प्रस्पंदते प्राणो नाडीसंस्पर्शनोद्यतः तदा संवे
दनमयं चित्तमाशु प्रजायते। १५ यदा न स्पंदते प्राणः शिरासरणिकोटरे। असंवित्तिवशात्तेन चित्तमंतर्न जायते १६

क्तः सर्वस्य जगतो हैरण्यगर्भमनोविकारमात्रत्वस्य सर्वश्रुतिपुराणप्रसिद्धत्वादित्याह यदिदमिति। १३ अथ तस्यापि किं बीजमिति तृतीयप्रश्नस्योत्तरमाह द्वे इति दृढभा
वना वासना। १४ आद्यमुपपादयति यदेति संवेदनमयं चिद्विकारप्रायं। १५ शिरासरण्यो द्वासप्ततिसहस्रनाडीमार्गास्तेषां कोटरे छिद्रे। असंवित्तिर्बाह्यसंवेदनसंस्का राम॰ २४९
२ रानुबोधस्तद्वशात्। १६

---

हैरण्यगर्भचित्तो जगदाकारभावोपि समष्टिप्राणस्पंदनप्रयुक्त एवेति स्वचित्तस्पंददृष्टांतेन लक्ष्यत इत्याह प्राणेति। दृश्यते लक्ष्यते १७ एवं समष्टिप्राणस्पंदनविषये सुप्राणपरता
तस्याश्चितः शांतिः। निष्क्रियतैवशांतिः जगत्प्रलयो मोक्षो वा उच्यत इत्यर्थः। चीत्कारं दुकः चोदिताकरामिहता। १८ १९ २० संविदः संरोधनं अविषिष्टता श्रेयो मोक्षः सो
भकारणस्य प्राणस्पंदस्य आक्रमणं प्राणायामाभ्यासेन। २१ किमर्थं संरोधः संविद्विचित्ताकारेण समुदयेको दोषस्तत्राह संविदिति संवेद्यं बाह्यविषयं प्रति आरटाद्गागच्छ
ति ततश्च तदुपभोगसंवेदनादनंतानि दुःखानीत्यर्थः। २२ यदा तु बाह्यविषये संसुप्तप्रायां सती आंतरस्य आत्मनो बोधाय संतिष्ठते उन्मुक्ता भवति तदेत्यर्थः। २३ प्राणपरि

प्राणस्पंदनमेवेदं चित्तद्वारेण दृश्यते। जगन्नामाणगं व्योम्नि नीलत्वादिवदीदृशं १७ प्राणस्पंदनसुप्तावतः शांतिः शांतिरुच्यते। प्राणसंस्पंदनात्संवि
द्याति वीटेव चोदिता। १८ संवित्सरति देहेषु प्राणस्पंदप्रबोधिता। चक्रावर्तैर्गलेषु वीटेव करताडिता। १९ मूर्तिः सर्वगता संवित्प्राणस्पंदेन बोध्यते
सूक्ष्मात्सूक्ष्मतराकारा गंधलेखेव वायुना। २० संवित्संरोधनं श्रेयः परमं विद्धि राघव। कारणाक्रमणं चात्र क्षोभस्तत्र न विद्यते। २१ संवि
त्समुदितैवाशु याति संवेद्यमारटात्। संवेदनादनंतानि ततो दुःखानि चेतसः। २२ संसुप्ता तद्बोधाय संवित्संतिष्ठते यदा। लब्धं भवति ल
ब्धव्यं तदा तदमलं पदं। २३ तस्मात्प्राणपरिस्पंदैर्वासनाचोदनैस्तथा। नोचेत्त्वं संविदमुच्छूनां करोषि तदजो भवान्। २४ संविदुच्छून
तां चित्तं विद्धि तेनेदमाततं। अनर्थजालमास्तत्र विशीर्णजनजीवकं २५ योगिनश्चित्तशांत्यर्थं कुर्वंति प्राणरोधनं। प्राणायामैस्तथा
ध्यानैः प्रयोगैर्युक्तिकल्पितैः २६ चित्तोपशांतिफलदं परमं साम्यकारणं। सुभगं संविदः स्वास्थ्यं प्राणसंरोधनं विदुः। २७

स्पंदैर्वासनानां चोदनैराग्रातिशयेनोद्भावनैश्च संविदमुच्छूनां स्फीतां यथा कुर्वंति तथा न करोषि चेत्। अथवा परिस्पंदैः स्पंदवर्जनैर्वासनानां चोदने
रपनोदनैश्च संविदं नोच्छूनां उच्छूनता प्रयुक्तमनस्त्वापत्तिशून्यां करोषि चेत्तर्हि भवान् अजः जन्मादिसर्वविक्रियाशून्यो मुक्त एवासीत्यर्थः २४ आस्तृतातांडिताः
विशीर्णाः सर्जरिताश्च जनजीवकायेन। २५ योगशास्त्रोक्तैः सद्गुरुसंप्रदायादिसिद्धयुक्तिकल्पितैस्तैरुपायाभ्यासप्रयोगैः २६ प्राणसंरोधनफलमेव प्रशंसति चि
त्तेति २७

चित्तस्य बीजांतरं वर्णयितुं प्रतिजानीते ज्ञानवद्भिरिति॥ प्रकटितां सम्यगुपदिष्टां स्वयं चानुभूतां॥ वासनाभिराजीवितां उज्जीवितां॥ २८ तत्रादौ वासनास्वरूपमाह दृढेति। आकन्यादृढभावे देहादिपदार्थानामहंममेत्यादिरूपसंस्कारात्मना यत् आदानं तच्चेत्यक्तपूर्वापरविचारणं भवति तदासा वासयति देहादिभावेनात्मानं भावयतीति व्युत्पत्त्या वासना प्रकीर्तितेत्यर्थः तथा च पूर्वापरविचारैर्जीवन्मुक्तानां देहादिसंस्कारेण वासनाविरोधिविचारसंस्कारादितत्वेन तेषां देहादिभावेन वासयितुमशक्यत्वादिति भावः॥ २९॥ अज्ञानात्मनस्तु विरोधाभा

ज्ञानवद्भिः प्रकटितामनुभूतां च राघव॥ चित्तस्योत्पत्तिमपरां वासनाजीवितां शृणु॥ २८॥ दृढभावनया त्यक्तपूर्वापरविचारणं॥ यदादानं पदार्थस्य वासना सा प्रकीर्तिता॥ २९॥ भावितं तीव्रसंवेगादात्मना यत्तदेव सः॥ भवत्याशु महाबाहो विगतेतरसंस्मृतिः॥ ३०॥ तादृग्रूपो हि पुरुषो वासना

[illegible] विवशीकृतः॥ यत्पश्यति तदेतत्सदस्ति

ति विमुह्यति॥ ३१॥ वासनावेगवैवश्यात्स्वरूपं प्रजहाति तत्॥ भ्रांतं पश्यति दुर्दृष्टिः सर्वं मदवशादिव॥ ३२॥ असम्यग्ज्ञानवानेवमवस्थाभिपरिप्लुतः॥ अंतस्थया वासनया विघ्नेणैवशीकृतः॥ ३३॥ असम्यग्दर्शनं यस्मादनात्मन्यात्मभावनं॥ यद्वस्तु निवस्तुत्वं तां चित्तं विद्धि राघव॥ ३४ दृढाभ्यासपदार्थैकवासनादतिचंचलं॥ चित्तं संजायते जन्मजरामरणकारणं॥ ३५॥ यदा न वास्यते किंचिद्धेयोपादेयरूपि यत्॥ स्थीयते सकलं त्यक्त्वा तदा चित्तं न जायते॥ ३६॥ अवासनत्वात्सततं यदा न मनुते मनः॥ अमनस्ता तदोदेति परमोपशमप्रदा॥ ३७॥ यदा किंचिन्न संवित्तौ स्फुरत्यात्मनि बीबरे॥ तदा पद्ममिवाकाशे चित्तमंतर्न जायते॥ ३८॥ यदा न भाव्यते भावः क्वचिज्जगति वस्तुनि॥ तदा हृदंबरे शून्ये कथं चित्तं प्रजायते॥ ३९॥

वा तीव्रसंवेगभावनादार्ढ्येन देहादिभावैर्वासयितुं शक्तोत्येवेत्याशयेनाह भावितमिति॥ ३०॥ स्वादेहादावात्मतामिव बाह्यार्थे सत्तामपि दर्शयतीत्याह तादृगिति। वसतीति वस्तु तदात्मसत्तया वासयतीति वासनेति व्युत्पत्तेस्तत्रापि संभवादिति भावः॥ ३१॥ तत्तवासनोपस्थापितं जगद्रूपं सर्वं॥ ३२॥ त्यक्तपूर्वापरविचारणमित्यस्य व्यावर्त्यमाह असम्यगित्यादिना॥ ३३॥ सैव चित्तस्थितभावेन वासनाप्रयुक्ता उत्पत्तिरित्याशयेनाह॥ ३४॥ ३५॥ अतस्तद्वेवासनानाशाच्चित्तः स्वास्थ्यलक्षणा मुक्तिरित्याह यदेति॥ न वास्यते न सत्तां प्राप्यते॥ ३६॥ ३७॥ आकाशे पद्ममिव अंतः चिति चित्तं न जायते॥ ३८॥ ३९॥ 

रसेन रागेण॥ ५०॥ कल्पनाया युक्तिभिः समर्थनायाः अयोग्यं॥ ५१॥ इदानीमचित्ततां लक्षयति यदिति॥ अभावनं बाह्यार्थास्मरणं निरोधयोगमास्थाय सर्वदृश्यप्रमार्जनलक्षणस्य अभावस्य यत्तत्संपादकं परमार्थात्मदर्शनाविर्भूतं तत्स्वरूपं तदित्यर्थः॥ ५२॥ तर्हि जीवन्मुक्तानां सहजनिर्विकल्पे चित्ते सति कथमचित्तत्वं तत्राह सर्वमिति॥ न हि रज्जुपटाभासेन सत्यपटत्वं वक्तुं शक्यमिति भावः॥ ५३॥ विषयरसानामाध्यानप्रयुक्तो रागो रंजना यत्र भस्मेव परिशिष्टं अधिष्ठानं सत्त्वं तदुच्यत इत्यर्थः॥ ५४॥ तर्हि जीवन्मुक्तः कथं व्यवहारमा

एतावन्मात्रकं मन्ये रूपं चित्तस्य राघव॥ यद्भावनं वस्तुनोंतर्वस्तुत्वेन रसेन च॥ ५०॥ न किंचित्कल्पनायोग्यं दृश्यं भावयतस्ततः॥ आकाशकोशस्वच्छस्य कुतश्चित्तोदयो भवेत्॥ ५१॥ यदभावनमास्थाय पदभावस्य भावनं॥ यद्यथावस्तुदर्शित्वं तदचित्तत्वमुच्यते॥ ५२॥ सर्वं मंतः परित्यज्य शीतलाशयवर्तितयत्॥ वृत्तिस्थमपि तच्चित्तमसद्रूपमुदाहृतं॥ ५३॥ वासनायास्माध्यानाद्रागो यस्य न विद्यते॥ तस्य चित्तमचित्तत्वं गतं सत्त्वं तदुच्यते॥ ५४ घनानवासनायस्य पुनर्जन्मनकारिणी॥ जीवन्मुक्तः स तत्त्वस्थश्चक्रभ्रमवदास्थितः॥ ५५॥ भ्रष्टबीजोपमा येषां पुनर्जननवर्जिता॥ वासनारसनिहीना जीवन्मुक्ता हि ते स्थिताः॥ ५६॥ सत्वरूपपरिप्राप्तचित्तास्ते ज्ञानपारगाः॥ अचित्ता इति कथ्यंते देहांते व्योमरूपिणः॥ ५७॥ द्वे बीजे राम चित्तस्य प्राणस्पंदनवासने॥ एकस्मिंश्च तयोः क्षीणे क्षिप्रं द्वे अपि नश्यतः॥ ५८॥ मिथः कारणमेते हि बीजे जन्मनि चेतसः जलांगीकरणे राम जलाशयघटाविव॥ ५९॥

स्थित इति चेत्तत्कार्यं कुलालचक्रभ्रमवदित्याह घनेति॥ ५५॥ ५६॥ देहांते प्रारब्धक्षये तस्यतावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य इति श्रुतेरिति भावः॥ ५७ ननु वासनाबीजांतराच्चित्तोदयः किं न स्यात्तत्राह द्वे इति॥ ५८॥ चेतसः जन्मनि एते मिथः मिलिते कारणं नैकैकमित्यर्थः यथा घटाकाशेन जलांगीकरणे जलाशयो घटश्च मिलितौ कारणं नैकैकं तद्वत्॥ ५९॥

वा॰टी॰उ॰प॰ २५१

घनावासनासकैवआमस्यव लोत्कृत्य पुनर्जीवनकारिणीनेत्यर्थः। बीजंतस्यापि किंमवेदिति चतुर्थे प्रश्नस्याप्युत्तरमानवस्थापरिहरन्नाह बीजांकुरवदिति। एते प्राणस्पंदनावासनेतिलेषु तैलवत्परस्परांतःस्थे तथा बीजांकुरन्यायेन कालीकांक्षिक्रमे परस्परे कारणेइतिपरेणान्वयः॥५०॥ एवं चित्तस्यापि तदुभयं प्रतिइंद्रियसुखदुःखादिकंच प्रतिकारणतास्तीत्याह सर्वमिति॥५१॥ यथाक्रमं प्राणांतनइंद्रियाणि तत्तत्प्रयुक्तमानंदमित्यर्थः॥ एवं सर्वोपभुक्तस्यविषयानंदस्यतात्कालिकजीवनलक्षणस्य पवनस्पंदस्यच वासनात्मना विचित्रोत्पादकत्वमस्तीत्याह आनंदपवनाविति॥ यदाआनंदपवनउभौवासनेसंपन्नेतदा साहं मि[illegible]लित्वा चित्तस्योत्पादिके

घनानवासनायस्यपुनर्जननकारिणी। बीजांकुरवदेतेहि संस्थितेतिलतैलवत्॥५०॥ अविनाभाविनीनित्यंकालीकांक्षिक्रमे तथा
सर्वमुत्पादयत्येतच्चित्तकः संविदात्मकः॥५१॥ यथा प्राणेंद्रियानंदमानंदपवनावुभौ। चित्तस्योत्पादिके साहं यदैते वासनेतदा॥५२॥
आमोदपुष्पवत्तैलतिलवच्चव्यवस्थिते॥ वासनावशतः प्राणस्पंदस्तेनचवासना॥५३॥ जायते चित्तबीजस्य तेन बीजांकुरक्रमः
वासनोत्सवमानत्वात्संवित्प्रक्षोभकर्मणा॥५४॥ प्राणस्पंदं बोधयतितेनचित्तं प्रजायते॥ प्राणस्पंदनधर्मित्वात्स्पंदतेस्पष्टहृद्गुणः
५५॥ संविदं बोधयंस्तेन चित्तबालः प्रजायते॥ एवं हि वासनाप्राणस्पंदौ द्वौ तस्य कारणं॥५६॥ तयोरेकक्षयेनाशो द्वयोश्चित्तस्य राघव
सुखदुःखमनःस्पंदशारीरकमहत्फलं॥५७॥ कार्यपत्त्रविताकारं वृत्तिव्रततिवेष्टितं॥ तस्मात्क्षसाहिवलितं रागरोगबलालयं॥५८॥
अज्ञानमूलं सुदृढं लीनेंद्रियविहंगमं॥ वासनाक्षयमानीतात्तचित्तवृक्षं क्षणेन हि॥५९॥

त्यन्वयः॥५२॥ अतः परस्पराश्रयत्वं परस्परहेतुत्वं चानयोरुपपन्नमितिनानवस्थादोषप्रसक्तिरित्याशयेनोक्तमेवपुनराह आमोदेत्यादि॥५३॥ बीजांकुरक्रमः जायते उपपन्नइतियावत् उभयोश्चित्तोत्पादकत्वप्रकारं दर्शयति वासनेति॥५४॥ स्पष्टाः उन्नाः हृद्गुणाः रागादिवासनायेन॥५५॥५६॥ अतएवएककस्मिंश्चतयोः क्षीणेइतित्रागुक्तमुपपन्नमित्याह तयोरिति। द्वयोस्तत्कार्यचित्तस्यचनाशइत्यर्थः॥ चित्तमेववृक्षत्वेनावर्णयंस्तस्यवासनाक्षयादुन्मूलनमाह सुखेत्यादिना॥ सुखदुःखाकुलं मननं तदेव स्पंदोयस्य शरीरमेवशारीरकं॥५७॥५८॥ क्षयमानीतावासनाईदृशं चित्तवृक्षं क्षणेन प्रपातयतीतिपरेणान्वयः॥५९॥ राम॰ २५१

तदेवचित्तं वात्यारजः पुंजत्वेनरूपयन्तस्यपवननिरोधादिवप्राणस्पंदनिरोधात्सविलयंदर्शयति पांडुरीकृतेत्यादिना पांडुरीकृतेत्यादिविशेषणानिश्लेषादिनाउभयत्रयोज्यानि आशादिशउपधारारत्स्मावंतश्चस्याणि नमाच्छादितमखिलदर्शनंपूर्णाच्छिद्र्पं सर्वजननेत्रंचयेन॥६०॥ अक्करउत्कारव स्तंभप्रायशरीरकं प्रसिद्धंवात्यासंस्थानं चयस्य
६१॥ स्फुरद्भिस्तनुतनुभिरल्पाल्पैर्वृत्तिभेदैर्वात्यापोतैश्चक्षुब्धंसर्वदिक्कडत्सवनं प्रतिसुखं अनायासदक्षं॥ अंतःस्थितंमहालोकंब्रह्मसोरालोकंच अपश्यत् इ

प्रयातयतिवातोघः कालपक्वफलंयथा। पांडुरीकृतसर्वांशस्थगिताखिलदर्शनं॥६०॥ विलोलजलदाकारमज्ञानावकरोत्थितं
तत्सात्तरलवव्याप्तंस्तंभाकृतिशरीरकं॥६१॥ स्फुरत्तनुतनुक्षुब्धं सुखमुत्सारवनं प्रति॥ अंतःस्थितमहालोकमपश्य
त्वविलीयते॥६२॥ पवनस्पंदरोधात्तु रामचित्तरजःक्षणात्। वासनाप्राणपवनस्पंदयोरनयोर्द्वयोः॥६३॥ संवेद्यं बी
जमित्युक्तं स्फुरतस्तौयतस्ततः॥ हृदिसंवेद्यमाच्चैवप्राणस्पंदोथवासना॥६४॥ उदेतितस्मात्तंवेद्यं कथितं बीजमे
तयोः॥ संवेद्यसंपरित्यागात्प्राणस्पंदनवासने॥६५॥ समूलंनश्यतःसिप्रंमूलच्छेदादिवद्रुमः॥ संविदंविद्धिसंवेद्यं
बीजंधीरतयाविना॥६६॥ नसंभवतिसंवेद्यंतैलहीनस्तिलोयथा॥ नबहिर्नांतरेकिंचित्संवेद्यंतेपृथक्॥६७॥ संविद
स्फुरंतिसंकल्पात्संवेद्यं पश्यतिस्वतः॥ स्वप्नेयथात्ममरणं तथादेशांतरस्थितिः॥६८॥ चित्

एवमसमंईदृशंचित्तवात्यारजःपवनसंरोधात्सर्वत्स्वविलीयतइत्यन्वयः॥६२॥ बीजांतरमप्याहवासनेति॥६३॥ संवेद्यं प्रियाप्रियंशब्दादिआप्यस्फुटत्वा॥६४॥६५
संविदमेव भावनमेवसंवेद्यपरित्यागइत्याह संविदमिति। तदेवोपपादयति। बीजमित्यादिना संविदेवसीयाधीरतोपरित्यज्यमेवेद्यमिवसंपन्नेसतात्विन बीजं॥६६॥ बहि न
संविदंविनासंवेद्यं संभवतिप्रसिद्ध्यतीत्यर्थः॥६७॥ चार्थेतथाशब्दः यथास्वप्नेआत्मनोमरणंदेशांतरस्थितिश्चस्वचमत्कारयोगेनैवजायते वेद्यमपिसंविदस्तथेत्युत्तरेणान्वयः
६८

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी स्मारक पुस्तकालय

वा॰टी॰उ॰प॰ २५२

यच्च यस्यां विवेकदशायां स्वतत्त्ववेदनं वर्त्तते तत्स्वसंवेदनमपि स्वसंकल्पादिजन्यं तथा स्वप्नवदेव नद्यद्धयेत्स्ववेदनं विवेकविचारदयो वा परमार्थतः संभवंतीति ॥६९॥ स्वसंकल्पो
द्भवाद्भ्रमात् ॥७०॥ चंद्रार्करश्मीनां वातायनप्रविष्टानां दंडाकारतातदंतरे भ्रमच्च सरेणवाकारता च भवेत्तथा ॥७१॥ दुर्ज्ञानं भ्रांतिज्ञानं विलीयते ॥७२॥ सीक्षिता निर्दोषदर्शनादिव

संविस्फुरं सांकल्पात्संवेद्यं पश्यति स्वतः ॥ स्वप्ने यथात्मनः संतथा देशांतरस्थितिः ॥६८॥ स्वचमत्कारयोगेन संविदस्तथा वेद्यसं
स्ववेदनं स्वसंकल्पात्संविदो यत्र वर्त्तते ॥६९॥ जगज्जालमतो भाति तदिदं रघुनंदन ॥ यथा बालस्य वेतालः स्वसंकल्पोद्भवा
द्भवेत् ॥७०॥ पुरुषत्वं यथा स्थाणोः संवेद्यं संविदस्तथा ॥ यथा चंद्रार्करश्मीनां दंडता रेणुता तथा ॥७१॥ यथा नौस्था
चलस्पंदः संवेद्यं संविदस्तथा ॥ एतन्मिथ्या हि दुर्ज्ञानं सम्यग्ज्ञानाद्धि लीयते ॥७२॥ रज्ज्वामिव भुजंगत्वं द्वीदुत्वं सीक्षितादि
व ॥ शुद्धैवं संविन्निजगत्त्वं वेद्यं नान्यदस्त्यलं ॥७३॥ इत्यंतनिश्चयो रूढः सम्यग्ज्ञानं विदुर्बुधाः ॥ सर्वं दृष्टमदृष्टं ना
यदस्याः प्रतिभासते ॥७४॥ संविदस्तस्य यत्नेन मार्जनीयं विजानता ॥ तन्मार्जनमात्रं हि महासंसारतां गतं ॥७५॥
तत्समार्जनमात्रं तु मोक्षइत्यनुभूयते ॥ संवेदनमनंताय दुःखाय जननात्मने ॥७६॥ असंवित्तिरजाड्यस्या सुखाया
जननात्मने ॥ अजडो गलितानंदस्त्यक्तसंवेदनो भव ॥७७॥ असंवेद्यप्रबुद्धात्मा यस्तु सत्तरं घुद्वह ॥ श्रीराम
उवाच ॥ अजडश्चाप्यसंवित्तिः कीदृशो भवति प्रभो ॥७८॥

म्यग्ज्ञानं तर्हि कीदृशं तत्राह शुद्धैवेति ॥७३॥ तेन सम्मार्जनीयं दर्शयति सर्वमिति ॥७४॥ महता संसारेण संगतं संबंध आत्मनः ॥७५॥ संवेदनं वेद्यदर्शनं ज राम॰
ननात्मने जन्मादिरूपाय दुःखाय ॥७६॥ असंवित्तिर्वेद्यादर्शनं सा अजाड्यविवेकरसे स्वभावे प्रतिष्ठिता अजननात्मने नित्यात्मस्वरूपाय यतो भवति अ २५२
तस्त्वमपि त्यक्तसंवेदनः अजडः गलितः स्फरसीभूतपूर्णानंदो भवेत्यर्थः ॥७७॥

यः असंवेद्यो विस्पतः प्रबुद्ध आत्मा स एव त्वं भवसि नान्यः ॥ जाड्यत्यागे संवेदनपरिशेषः संवेदनत्यागे जाड्यपरिशेषो वा अवश्यंभावी तत्स जडः असंवित्तिश्चेति विरुद्धस्वभाव
एकः कथं भवतीति प्रश्नः ॥ विशेषमेवस्फुटीकृत्य दर्शयति असंवित्ताविति ॥७८॥ सत्यतया बाह्यार्थवेदनं संविदिति व्युत्पत्तेः ॥ बाधितार्थाभासे व्यवहारं भासं दर्श
यन्नपि जीवन्मुक्तजीवः सर्वत्र वर्त्तमानविषये अनवस्थितास्थः कुत्रचित् अतीतानागतविषये च वासनाक्षयात् विश्रांतास्थः इति न किंचिद्धेद्यं विंदतइति तं दर्शे

असंवित्तौ च जाड्यं तत्कथं वा निवर्त्तते ॥ श्रीवसिष्ठ उवाच ॥ यः सर्वत्रानवस्थास्थो विश्रांतास्थो न कुत्रचित् ॥ जीवो न विंदते किं
चिदसंविदजडो हि सः ॥७९॥ संविद्धस्तदशालेशः सयस्येह न विद्यते ॥ सोसंविदजडः प्रोक्तः कुर्वन्कार्यशतान्यपि ॥८०
संवेद्येन हृदाकाशे मनागपि न लिप्यते ॥ यस्यासावजडो हि संविज्जीवन्मुक्तः स कथ्यते ॥८१॥ यदा न भाव्यते किंचिन्नि
र्वासनतया त्मनि ॥ बालमूकादिविज्ञानमिव चस्थीयते स्थिरं ॥८२॥ तदा जाड्यविनिर्मुक्तमस्वच्छवेदनमाततं आ
श्रितं भवति प्राज्ञ यस्माद्भूयो न लिप्यते ॥८३॥ समस्तवासनात्यागी निर्विकल्पसमाधिताः ॥ नीलत्वमिव खेत्स्फा
र आनंदः संप्रवर्त्तते ॥८४॥

कापलोषवत्संविदिन्स्पृश्यते स्वतस्त्वप्रकाशविवेकरसपूर्णत्वाज्जडश्चेत्यर्थः ॥७९॥ सविच्छदस्यपक्तां व्युत्पत्तिं दर्शयन्नुक्तमेव समर्थयति संविदिति ॥ वस्तु
दशा मन्यत्व बुद्ध्या चित्ते बाह्यार्थालंबनमेव संविदुच्यते इत्यर्थः एतेन सर्वत्रानवस्थास्थ इति पदस्य तात्पर्यमुद्घाटितं ॥८०॥ अविश्रांतास्थो न कुत्रचिदित्यस्यापि
अतीतविषये तात्पर्यमुद्घाटयन्तदेवाह संवेद्येनेति हृदाकाशे बुद्धिः ॥८१॥ अनागतविषयेपि तस्य तदुद्घाटयति ८२ ८३ शंकां समाधाय प्रकृतं समर्थयन्ना

नन्वन्याकारसंवेदनाभावेपि ब्रह्माकारवृत्तिरूपसंवेदनं समाधावपि दुर्वारमिति कथमसंवित्त्वमित्याह तन्मयत्वादिति। अनाद्यंतं अपरिच्छिन्नं ब्रह्माकारं तत्संवेदनमपि स्वेद्धेन ब्रह्मज्योतिषा बाध्यमानमेतत्तरेव विलीयत इत्यर्थः। ८५। ८६। कष्टया प्राणायामादिश्रमसाध्यया। ८७। चिदात्मा स्वात्मनः स्वयमेव मिथ्याभूतं वेदं मोक्षं कल्पयतीत्याह यथेत्यादिना। ८८। कदा कथमुत्थितं तदाह यदेति। संकल्प्य संकल्प्य पुनः पुनः संकल्पं कृत्वा स्वमां कल्पिकं वपुः स्वरूपं यदा विं

योगिनस्तत्र तिष्ठंति संवेदनमसंविदः। तन्मयत्वादनाद्यंतं तत्तदर्थं तद्विलीयते। ८५। गच्छंस्तिष्ठन्स्पृशञ्जिघ्रन्नपि तेन स उच्यते। अजडो गलितानंदः स्वयक्तसंवेदनः सुखी। ८६। एतां दृष्टिमवष्टभ्य कष्टया यत्नचेष्टया। तरदुःखांबुधेः पारमपारगुणसागर। ८७। यथा


बीजादंकुरवृक्षौघो प्रोतिकालतः। तथैवेदं स्वसंकल्पात्संवेद्यमसदुत्थितं। ८८। यदा संकल्प्य संकल्प्य संवित्त्वं विंदते वपुः तदास्य जन्मजालस्य सैव गच्छति बीजतां। ८९। जनयित्वात्मनात्मानं मोहयित्वा पुनः पुनः स्वयं मोक्षं नयत्यंतः संवित्त्वं विद्धि राघव। ९०। यदेवभावयत्येषा तदेव भवति क्षणात्। नभवद्भूमिकाऽमुक्ता समायाति चिराद्वपुः। ९१। देवो नासौ सुरो रक्षो यक्षः किं किंनरो जनः। आत्मैवाऽऽद्यविलासिन्या जगन्मायां प्रनर्त्यति। ९२। बाध्यात्मानं हृदिलाचकोशकारकृमिर्यथा। चिरात्केवलतामेति स्वयं संवित्स्वभावतः। ९३।

इतेतदा। ८९। अंतः हृदिस्थं आत्मतत्त्वं वेत्तीति विलक्षणत्वात्तस्य धर्मो मोक्षं नयतिरीति विद्वद्भवत्वमवसिद्धे। ९०। तर्हि इदानीमेव सर्वेषां संवित्त्वात्मभावनया स्वस्वरूपं स्वैरं कुतो नायातीति तत्राह नेति। भवंतीति भवंती रागादयस्त इभूमिकाभ्यः अमुक्ता सती चिरादपि स्वं वपुः नायाति। ९१। अतएवास्य देवगंधर्वादयः कल्पिता वेषा न वास्तवा इत्याह देव इति। आद्यया आदिसिद्धया विलासिन्या स्वमायया। ९२। यथा मायाविनटः आत्मानं बध्नन्निव दर्शयति तद्वदित्याह बध्वेति। ९३। 

अलेपयोर्मिगता संविदेव जगज्जलधिजालानां जलं। अप सर्वं दिक्चक्रं दिङ्मंडलमंबरेपेव अप्रा दितं पर्वता दिभावं। एषैव गता। ९४। ९५। नान्यता मनन्यतामहंयता मित्यर्थः। ९६। कदास्याः सम्यग्ज्ञानं भवतीतत्राह यदेति। किंचिच्चलनं स्पंदः सम्यक्कंपनं वेपनमिति भेदः। ९७। एवं परिशोध्य परिशेषितां संविदं तः कारणप्रतिबिंबसंवित बिंबभूतात्संविन्मात्ररूपात् ब्रह्मणः सकाशादुदेति यथा सूर्यादितेजसः सकाशात्प्रकाश इव प्रकाश्यं प्रभाउदेति तद्वत्। ९८। सन्मात्रमित्युक्ते अर्थक्रिया

जगज्जलधिजालानां संविज्जलमलं गता। एषैवा सर्वा दिक्चक्रं स्फुरत्सघ्राविता गता। ९४। द्यौः क्षमा वायुराकाशं पर्वताः सरितो दिशः इत्यस्यावीचयः प्रोक्ताः संवित्सलिलसंततेः। ९५। संविन्मात्रं जगत्सर्वं द्वितीया नास्ति कल्पना। इत्येवसम्यग्ज्ञाने न संविद्ध्रच्छति नान्यतां। ९६। यदा न विंदते किंचित्स्पंदते न न वेपते। स्वात्मन्येवस्थितिं याति संविन्नोलिप्यते तदा। ९७। अथास्याः संविदो राम सन्मात्रं बीजमुच्यते संविन्मात्रादुदेत्येषा प्रकाश्य मिव तेजसः। ९८। द्विरूपे तत्र सत्तायाः एकं नानाकृतिस्थितं। द्वितीयमेकरूपं तु विभागोयं तयोः शृणु। ९९। घटतापटताचैवत्वत्ता मत्तेति कथ्यते। सत्तारूपविभागेन सत्तन्नानाकृतिस्थितं। १००। विभागं तु परित्यज्य सत्तैकात्मतया ततम्। सामान्येनैवसत्ताया रूपमेकमुदाहृतं। १०१। विशेषं संपरित्यज्य सन्मात्रं यदलेपकं। एकरूपं महारूपं सत्तायास्तत्पदं विदुः। १०२। रूपं नानाकृतित्वेन सत्ताया न कदाचन। असंवेद्यं संभवति तस्मादेतद्वैवस्तुकं। १०३। एकं रूपं तु यद्रूपं सत्ताया विमलात्मकं न कदाचनतद्याति नापि चाविस्मरतिम्। १०४।


मात्मसमर्थं लक्षणं घटपटादिभिर्व्यावहारिकसत्त्वमेव तद्बीजं दर्शितमिति भ्रांतिर्मा भूदिति तद्विलक्षणं दर्शयितुं सत्ताद्वैविध्यमाह द्विरूपे इत्यादिना। ९९। घटत्वपटत्वादयस्त्वत्ता मत्ता प्रपा धयश्चार्थक्रियाभेदे पुष्करूपयोग्यता लक्षणाः। व्यावहारिकसत्ताविशेषा एवेत्याशयः। १००। सामान्येन सर्वजगदधिष्ठानतालक्षणेन साधारणस्वभावेन वा। १०१। पदं तत्त्वं। १०२। व्यावहारिकसत्त्वं तु नश्वरत्वमिथ्यारूपमिति। अत एव दृष्टत्वादिरूपं कपालघटादिधर्मान्याद्व्यक्तधर्मसंवेद्यं नानुवर्तमानतयादृश्यते अतः सन्मात्रं संभवतीत्यर्थः। १०३। सर्वावस्थानुगतं तु सद्रूपं न तथेत्याह एकरूपमिति नापि चविस्म

विदंवति श्रोतृणां भ्रांतिवारयन्नग्निविस्फुलिंगन्यायेन तदीयभ्रांतां सन्मात्ररूपां ब्रह्मसंविदं दर्शयति। अथेति। एवं प्रतिबिंब १

अतीतानागतेष्वतीतित्यवहारादर्शनाद्वर्तमानकाल एवसर्वे वस्तूनां सत्तेति केचित् अवयवानामेव पुंजीभावावस्थाकारेण स्फुरणात् कलाः अवयवास्त एव परमाणुरूपाः जगत्सत्ते त्यपरे॥ अवयवविशेष्यनुगता सत्ता जातिरन्या लीत्यपरे एवमन्ये प्यन्यथान्यथा स्वस्वबुध्यनुसारेण कल्पयंति तत्कल्पितां विभागकलनामित्यर्थः ॥९५॥ यद्यपि सर्वं जगदिव कालादिसत्तापि अध्यस्त भेदकलनात्यागे सन्मात्रपरिशेषादुत्तमसत्तैव तथापि भिक्करूपेण बाधार्हत्वान्न वास्तवीत्यर्थः ॥९६॥९७॥ आसमंताद्

कालसत्ता कलासत्ता वस्तुसत्तेयमित्यपि। विभागकलनां त्यक्त्वा सन्मात्रैकपरो भव ॥९५॥ कालसत्तर्तसत्ता च प्रोन्मुक्तकलना सती ॥ यद्यप्युत्तमसद्रूपा तथाप्येषा न वास्तवी ॥९६॥ विभागकलना यत्र विभिन्नपददायिनी॥ नानाताकारणं दृष्टा तत्कथं पावनं भवेत् ॥९७॥ सत्तासामान्यमेवैकं भावयन्सकलं वपुः॥ परिपूर्णपरानंदी तिष्ठाऽऽभरितदिग्भरः॥९८॥ सत्तासामान्यमात्रस्य याकोटिः को विदेश्वरः सैवास्य बीजतां याता ततस्तेष प्रवर्तते ॥९९॥ सत्तासामान्यपर्यंते यत्तत्कलनयोज्झितं ॥ परमाद्यमनाद्यंतं तस्य बीजं न विद्यते ॥१००॥ सत्ता लयं यातियत्र निर्विकारं च तिष्ठति ॥ भूयो नावर्तते दुःखं तत्त्वं परः पुमान् ॥१०१॥ तद्धेतुः सर्वहेतूनां तस्य हेतुर्न विद्यते ॥ संसारः सर्वसाराणां तस्मात्सारं न विद्यते ॥१०२॥ तस्मिंश्चिद्दर्पणे स्फारे समस्ता वस्तुदृष्टयः॥ इमास्ताः प्रतिबिंबंति सरसीव तटद्रुमाः ॥१०३॥

रिताः पूरिता दिग्भराः दिशः सदा धेयसर्वपदार्था यथेन सत्तासामान्यरूपेण तथाविधः सन् ॥९८॥ सामान्यमात्रस्य कोटिः परमावधिर्भूतासैव अस्य जगतः प्रतिबिंब चितश्च बीजतां याता ॥९९॥ सत्तासामान्यस्य सर्वसत्तानां पर्यंते पराव धौ ॥१००॥ सत्तासद्धर्मतापि यत्र धर्मधर्मि विभागविलयाद्धयं याति तत्त्वं त्व्यपरो यो भवति स एव पुरुषार्थसाधनसमर्थत्वात्पुमान् ॥ अन्यस्तु स्त्री प्राय इति भावः ॥१०१॥ तदेव परमपुरुषार्थतां दर्शयितुं प्रशंसति तदित्यादिना ॥१०२॥ १३॥



तत्र तस्मिन्नात्मस्वरूपे अध्यस्तत्वात्स्वदंते इंद्रियप्रीतिं जनयंति ॥ स्वादुवारिधे रानंदसमुद्रात्तस्मादेव प्रकटत्वं सत्तां स्फूर्तिं च ॥१०४॥ यस्मात्स्वादुभूतादपि विषयास्तद्योगात्स्वदंते तस्मात्कारणात्तच्चिदाकाशस्वरूपं सर्वेषां स्वादुजातीनामानंदानां प्रियाणां च मध्ये अलं अत्यंतं आस्वादनमानंदरूपं प्रियतमं चेत्यर्थः ॥१०५॥ तस्मिन्नेव आनंदाब्धौ वस्तु विमानि भूतानि जायंते आनंदेन जातानि जीवंति आनंदं प्रयंत्यभिसंविशंतीति श्रुत्युक्त जगज्जन्मादिकारणत्वलक्षणाहमन्वयं दर्शयति जायत इति। वर्तते अस्ति स्थिरं

सर्वे भावा इमे तत्र स्वदंते स्वादुवारिधेः॥ षड्रसा इव जिह्वायाः प्रकटत्वं प्रयांति च ॥१०४॥ तस्माद्वृत्तरस्यापि चिदाकाशस्य वै परं॥ सर्वेषां स्वादुजातीनामलमास्वादनं च तत् ॥१०५॥ जायते वर्तते चैव वर्द्धते स्पृश्यते तथा॥ तिष्ठति च गलंतीह तत्रौघ जागतां गणाः ॥१०६॥ ततः स्फारिष्ठानां तत्रस्थे च लघीयसां॥ ततः स्थूलं स्थविष्ठानां अणीयस्तदणीयसां ॥१०७॥ दवीयसां दविष्ठं तदंतिकानां तदंतिकं॥ कनीयसां कनीयस्तज्ज्येष्ठं ज्यायसामपि ॥१०८॥ तेजसामपि तत्तेजस्तमसामपि तत्तमः॥ वस्तूनामपि तद्वस्तु दिशामप्यंग दिक्परा ॥१०९॥ तन्नाकिंचिच्चिकिंचित् चित्तत्तदस्ति वचनास्ति च। तत्तदृश्यमदृश्यं च तत्तदस्मि न चास्मि च ॥११०॥ राम सर्वप्रयत्नेन तस्मिन्परमपावने पदे स्थितिमुपायासि यथा कुरु तथानघ ॥१११॥

ते विपरिणामेन तिष्ठंत्यपक्षयोन्मुखाः क्रमौ जन्मादिश्रयग्रहणं षड्भावविकारणत्वलक्षणमित्याशयः ॥१०६॥ गुरुत्वधारिवैचित्र्यस्यापि तदेव निर्वाहकमित्याशयेनाह स्थविष्ठादिति द्वितीयात्तत्स्थल्वः प्रसिद्धपरा ॥१०७॥ दवीयसां दूरतराणां दविष्ठं दूरतमं दूरशब्दादिष्ठेयसुनोः स्थूलदूरेत्यादिना यणादिपरलोपः पूर्वस्य गुणश्च एवं युवाल्पयोः कन प्रशस्यवृद्धयोर्ज्यादेशाः ॥१०८॥१०९॥ नर्किंचित्तोकप्रसिद्धं किंचित्स्यात्तत्मपि प्रसिद्धं तदेव अतीवभावात्मकं नास्त्यभावात्मकं अस्मि प्रत्यक्तया न चास्मि अहंतया द्वितीयश्चकारो ममनममेति चानुक्तसमुच्चयार्थः ॥११०॥ यथा उपायासि वर्तमानसामीप्ये भविष्यति लट् तथा कुरु ॥१११॥

वा॰टी॰उप॰ २५५ आत्मनस्तत्त्वं पारमार्थिकरूपं तदेव। तस्य अवगतौ साक्षादनुभवे सति च तत उपशांतिं बाधमेति। अतस्त्वं यदा अवगतवितते कतत्त्वरूपो भव सितः त्तदैव चिराय अपुनरावृत्तये भवभय मुक्तपरमपदस्वरूप एवासीत्यर्थः। १२२। इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे एकनवतितमः सर्गः। ९१। इहोक्तास्थितिभेदेषु यत्नगौरवलाघवं वासनादिक्षयज्ञानसहाभ्यास उदीर्यते॥ एतानि तानि इहोक्तानि संसृतिव्रततेर्देहादीनि बीजानि त्वयोक्तानि तेषां कतमस्य उपायस्य प्रयोगेण निहत्यापरमं पदं प्राप्यत इत्यर्थः॥ अथवा एतानि संनिहितानि अथास्याः संवेदो राम सन्मात्रं बीजमुच्यत इत्यादिना यानि स्वस्मिकामे दरूपाणि मोक्षबीजानि त्वयोक्तानि तेषु कतमस्य प्रयोगेण आश्र

तदमलमजरं तदात्मतत्त्वं तदवगतावुपशांतिमेति चेतः॥ अवगतविततैकतत्त्वरूपो भव भयमुक्तपदोसि तच्चिराय। १२२। मोक्षोपाये उपशमप्रकरणे संसृतिबीजविचारयोगोपदेशः सर्गः॥ ९१। श्रीरामउवाच। एतानि तानि प्रोक्तानि त्वया बीजानि मानद। कतमस्य प्रयोगेण शीघ्रं तत्प्राप्यते पदं॥ १॥ श्रीवसिष्ठउवाच॥ एतेषां दुःखबीजानां प्रोक्तं यद्यन्मयोत्तरं। तस्य तस्य प्रयोगेण शीघ्रमासाद्यते पदं॥ २॥ सत्तासामान्यकोटिस्थे द्रागित्येव पदे यदि। पौरुषेण प्रयत्नेन बलात्संत्यज्य वासनां॥ ३॥ स्थितिं बध्नासि तत्तज्ज्ञ स्थाम प्यक्षयात्मिकां क्षणेस्मिन्नेव तत्साधु पदमासादयत्यलं॥ ४॥ सत्तासामान्यरूपे वा करोषि स्थितिमंग चेत्। तत्किंचिदधिकेनेह यत्नेनाप्नोषि तत्पदं॥ ५॥ संवित्तत्वे कृतध्यानो यदि तिष्ठसि चानघ। तदल्पेनाधिकेनोच्चैः समासादयसि तत्पदं॥ ६

गो॰ यत्नं। १ तत्र प्रथमकोट्यनुसारेणोत्तरमाह एतेषामिति॥ २। द्वितीयानुसारेणाप्याह सत्तेत्यादिना सत्तासामान्यं शोधित त्वंपदार्थस्तस्य कोटिः। पराकाष्ठा तत्स्थे चिद्रूपशोधित तत्पदार्थैक्येनाखंडैकरसे पदे स्थितिं निश्चलतां चिन्मयबध्नासि चेदिति परेणान्वयः॥ ३। किंभावनयैवनेत्याह तत्तज्ज्ञेति। तत्त्वतः साक्षात्कृत्येति यावत्। ४। तत्राशक्ता वप्याह सत्तेति शोधिते जगत्कारणतत्त्वे इत्यर्थः। किंचिदिति अखंडैक्यबोधे यत्नापेक्षणादिति भावः। संवित्तत्वे शोधितत्वंपदार्थे समानं स्वेनेण। ६ उप॰ २५५

---

वद्वासनाक्षयः न क्षीणा वासना यावच्चित्तं तावन्न शाम्यति ११ यावन्न तत्त्वविज्ञानं तावच्चित्तशमः कुतः यावन्न चित्तोपशमो न तावत्तत्त्ववेदनं १२

ननु शोधनेन संविदंशस्य हाने संवेद्यांशस्यैव ध्यानमप्युपायः किं न स्यादिति चेदशक्यत्वादित्याह संवेद्य इति। संवेद्यमेव पुरः स्फुरंत्याः संविदः पिधातुमशक्यत्वात्तत्पिधाने संवेद्य स्फूर्तेरेवाभावेन तद्ध्यानायोगाच्चेति भावः॥ ७ चिंतनं चिंतनीयादीनां संविदधीनसिद्धिकत्वं दर्शयति यदिति। यच्चिंतनं तत्संविदेव या चिंता सापि संविदेव सं ति तत्त्वकत्वात्सर्वस्येत्यर्थः ८। उपायांतरमाह वासनेति। चकारान्मनोनाशे च। तत्तर्हि। ९ किमसौ एवैकेभ्यः सुगमः नेत्याह एवैतेभ्य इति। १०। अतुकरत्वमुपपादयितुं परस्पराधीनतामाह द्वाभ्यां यदि

संवेद्ये केवले ध्यानं न संभवति राघव। सर्वत्र संभवात्स्याः संवित्तेरेव सर्वदा। ७। यच्चिंतयसि मनिष्ठसि करोषि च तत्र तत्र स्थितां संवित्संविदेव तदेकसा॥ ८॥ वासनासंपरित्यागे यदि यत्नं करोषि च तत्ते शिथिलतां यांति सर्वाधिव्याधयः क्षणात्। ९ एवैर्भ्यप्रयत्नेभ्यो विषमोयं हि संमतः ९ दुःसाध्यो वासनात्यागः सुमेरून्मूलनादपि। १० यावद्विलीनं न मनो न तावद्वासनाक्षयः न क्षीणा वासना यावच्चित्तं तावन्न शाम्यति ११ यावन्न तत्त्वविज्ञानं तावच्चित्तशमः कुतः यावन्न चित्तोपशमो न तावत्तत्त्ववेदनं। १२। यावन्न वासनानाशस्तावत्तत्त्वागमः कुतः यावन्न तत्त्वसंप्राप्तिर्न तावद्वासनाक्षयः १३ तत्त्वज्ञानं मनोनाशो वासनाक्षय एव च। मिथः कारणतां गत्वा दुःसाध्यानि स्थितान्यतः १४। तस्माद्राघव यत्नेन पौरुषेण विवेकिना भोगेच्छां दूरतस्त्यक्त्वा त्रयमेतत्समाश्रयेत् १५ सर्वमेते समं यावन्न स्वभ्यस्ता मुहुर्मुहुः तावन्न पदसंप्राप्तिर्भवत्यपि समाशतैः १६ वासनाक्षयविज्ञानमनोनाशा महामते। समकालं चिराभ्यस्ता भवंति फलदा मुने। १७ एकैकशो निषेव्यंते यद्येते चिरमप्यलं तन्न सिद्धिं प्रयच्छंति मंत्राः संकीलिता इव १८ चिरकालोपरचिता अप्येते सुधियापि च एकशः परमभ्येतुं न शक्ताः सैनिका इव। १९। समम्युद्योगमानीताः सततं एते हि धीमता। संसारग्रंथिं निर्दहंति तिजलान्यद्वितटानिव। २०। यथापि

ति ११ सर्वाण्यज्ञानेनापि सहपरस्पराश्रयता अन्योन्याश्रयतामाह यावदिति। १२। १३। १४ कस्तर्हि तन्निवृत्त्युपाय इति चेद्वैराग्यपूर्वकं सहैव त्रयाणां शास्त्रोक्तरीत्यैः प्रतिक्षणमभ्यास इत्याह तस्मादिति १५ समं युगपत् समाशतैर्वर्षशतैः १६ १७ संकीलिताः मरणोच्चाटनादिमंत्रशतास्तु १८ उपचिताः सेवादिना वशीकृत्यस्वकार्ये उद्योजिताः परं शत्रुं परमात्मानं च अभिमुख तया एतुं गंतुं सैनिकाः सेनाभावा इव। १९ तानि वासनाक्षयादीनि त्रीणि तानि २० तन्मा वासनाक्षयः॥ न क्षीणा वासना यावच्चित्तं तावन्न शाम्यति॥ ११॥ यावन्न तत्त्ववितत्त्वं तावच्चित्तशमः

वासिष्ठ॰ ॥ १७

नलिप्यसेअलेपकेस्वभावेस्थास्यसि ॥२१॥ हृदयग्रंथयः अंतःकरणतद्धर्मतादात्म्यसंसर्गाध्यासाः॥ त्रुट्यंति छिद्यंते गुणास्तंतवइव ।२२। ननु प्राणानामपि चिराभ्यासः किमर्थं तत्राह जन्मांतरेति। शतशब्द आनंत्ये संसारसंततिर्दृढैतवासना ।२३। त्रिभिः सह चतुर्थप्राणायामोप्यभ्यसनीय इत्याह वासनेति। समाहरेदभ्यसेत् ।२५। २६। योगाभ्यासकुशलगुरूपदिष्टयु

वासनासंक्षयविज्ञानमनोनाशाः प्रयत्नतः॥ समंसेव्यास्त्वचिरं तेन त्वं तत्र न लिप्यसे ॥२१॥ त्रिभिरेतैश्चिराभ्यस्तैर्हृदयग्रंथयो दृढाः
नि॥ शेषमेव त्रुट्यंति बिसच्छेदाद्गुणाइव॥२२॥ जन्मांतरशताभ्यस्ता राम संसारसंस्थितिः। सा चिराभ्यासयोगेन विना न क्षीयते क्व
चित्॥२३॥ गच्छन्स्तिष्ठन्स्पृशञ्जिघ्रंश्च पश्यञ्जाग्रत्स्वपंस्तथा॥ श्रेयसे परमायास्य त्रयस्याभ्यासवान्भव ॥२४॥ वासना
संपरित्यागसमं प्राणनिरोधनं॥ विदुस्तत्त्वविदस्तस्मात्तदप्येवं समाहरेत् ॥२५॥ वासनासंपरित्यागाच्चित्तं गच्छत्यचित्त
तां प्राणस्पंदनिरोधाच्च यथेच्छसि तथा कुरु॥२६॥ प्राणायामचिराभ्यासैर्युक्त्या च गुरुदत्तया॥ आसनाशनयोगे
न प्राणस्पंदो निरुध्यते ॥२७॥ यथाभूतार्थदर्शित्वाद्वासनान प्रवर्तते ॥ आदावंते च वस्तूनामविसंवादि यत्स्थितं॥२८
रूपं तद्दर्शनं ज्ञानं क्षीयते तेन वासना॥ निःसंगव्यवहारित्वाद्भवभावनवर्जनात्॥२९॥ शरीरनाशदर्शित्वाद्वासनान
प्रवर्तते॥ वासनाविभवे नष्टे न चित्तं संप्रवर्तते॥३०॥

न्या स्वस्तिकाद्यासनजयेन हितमितमेध्याशनैर्यमनियमादियोगेनेत्यर्थः ।२७। सर्ववस्तूनामादावंते च कारणमध्ये चाविसंवादि अविप्रलंभियत्सन्मात्ररूपं स्थि तं सएव यथाभूतार्थस्तद्दर्शित्वादित्यर्थः॥२८ निःसंगं बहिर्मुखजनसंगरहितं॥ निःसंकल्पं च यथाप्राप्तव्यवहारशीलत्वात् भवभावना निःसांसारिकमनोरथास्तेषां वर्जना त्॥२९॥ वासनाल्क्षणो विभवे धनसंपद्यये नष्टे सति लज्जयेव न प्रवर्तते ॥३०



पांसोरिव चित्तस्यापि पवनाधीनस्पंदत्वादिति भावः। ।३१। अवकाराम्त्संमुराशेरिव।३२। हठयोगाभ्यासाशक्तौ राजयोगोभ्यसनीय इत्याह अथवेति ३३ बहुनेति दुर्दांतस्य चि त्तस्याल्पकालाभ्यासेन वशीकर्तुमशक्यत्वादिति भावः युक्तिं अध्यात्मविद्यासाधुसंगसहितं दर्शितं द्विविधं योगं विना ।३४। तदेवाह अध्यात्मेति। ३५ ३६ यद्यपि प्राणसंरोधनं दु र्दांतदमनोपायत्वाद्धठएव तथापि सत् शास्त्रगुरूपदिष्टमार्गरहितो अन्ये चोपवेशेन शयनकायशोषमंत्रतंत्रश्मशानसाधनादिसाहसरूपा हठा अत्र निवार्यंत इति बोध्यं ३७

संशांते पवनस्पंदे यथा पांसुर्न भूतले॥ प्यः प्राणपवनस्पंदश्चित्तस्पंदः स एव हि ॥३१॥ तस्माज्जगंति जायंते पांसवो वकरादि
व ॥ प्राणस्पंदजये यत्नः कर्तव्यो धीमतोच्चकैः ।३२॥ उपविश्योपविश्यैकचित्तकेन मुहुर्मुहुः॥ अथवैनं क्रमं त्यक्त्वा
चित्ताक्रमणमेव चेत् ॥३३॥ रोचते ते तदा मोषिकालेन बहुनापरं न शक्यते मनो जेतुं विना युक्तिमनिंदितां ॥३४॥ अंकुशे
न विना मत्तं यथा दुष्टं मतंगजं॥ अध्यात्मविद्याधिगमः साधुसंगम एव च॥३५॥ वासनासंपरित्यागः प्राणस्पंदनिरोधनं
एतास्ता युक्तयः पुष्टाः संति चित्तजये किल ॥३६॥ याभिस्तज्जीयते क्षिप्रं धाराभिरिव भूरिजं। सतीषु युक्तिष्वेतासु ह
ठान्नियमयंति ये॥३७॥ चेतस्ते दीपमुत्सृज्य विनिघ्नंति तमो जनैः॥ विमूढाः कर्तुमुद्युक्ता ये हठाच्चेतसो जयं। ३८ ते नि
बध्नंति नागेंद्रमुन्मत्तं बिसतंतुभिः। चित्तं चित्तस्य वाहरं संस्थितं स्वशरीरकं। ३९ साधयंति समुत्सृज्य युक्तिं ये तान्हठान्वि
दुः। भया द्यमुपायांति स्के शात्स्केशं श्रजंतीति।४०। निर्वृतिं नाधिगच्छंति दुर्भगाइव जंतवः भ्रमंति गिरिकूटेषु फलपद्रव भोजनाः ४१

३८ उक्तलक्षणां चतुर्विधां युक्तिं समुत्सृज्य उपायांतरेण चित्तसंनिहितं शरीरं ये साधयंति स्थिरीकर्तुं यतंते तान्पुरुषान् हठान् हठाश्रमान्विदुः सांशयिकाइत्यर्थः ३९ किं चैते पांसघास्त्र मार्गविन्नं शादनर्थपरंपरे व कलतिन विन्नादि जयइत्याह भेयादिति ।४०। निर्वृतिं सम्यग्धैर्यविश्रांतिं दुर्भगाः पापिनो जंतवइव ४१

४२॥ आहिते भवस्थाने अहिते इति वा छेदः॥४३॥ प्रोह्यंते रागादिना बलान्नीयते दूरं प्रपतत॥ विषयानुपातित्वभावं निश्चितमोक्षफलकधर्ममेघारव्यसमाध्यभ्यासं वि
हाय बहुक्लेशाल्पफलकं संदिग्धमोक्षफलकयज्ञदानाद्यनुष्ठानमपि क्लेशमात्रमिति प्रकृतप्रशंसार्थमाह कालमित्यादिना॥ कालं चिरं क्षिपंतीति संबंधः॥ ४४
४५॥ यतः दुःखानां रागादिदोषाणां च शतैरादग्धाः॥ अतो न विदंति वा॥ अनित्याः स्वकर्मास्थिराः॥ नरकस्वर्गमानुषेभोगभदेर्निमित्ते॥ पातोत्पातकराः आकारादेह

मुग्धमुग्धधियो भीतावराका हरिणा इव॥ मतिरात्मनशीर्णांगी तदीयापेलवांगिका॥ ४२॥ नक्वचिद्याति विश्रांतिं मृगी ग्रामगताय
था॥ कल्लोलकलितं चेतस्तेषां जलइवाहिते॥ ४३॥ प्रोह्यंते प्रपत दूरं तर्णा गिरिनदीष्विव॥ कालं यज्ञतपोदानतीर्थदेवार्चनभ्रमैः
४४॥ चिरमाधिशतोपेताः क्षिपयंति मृगा इव॥ आत्मतत्त्वं विधिवशात्कदाचित्केचिदेव ते॥ ४५॥ दुःखदोषशतादग्धा विदंति न विदंति वा
आगमापायिनोनित्या नरकस्वर्गमानुषेः॥४६॥ पातोत्पातकाकाराः क्षीयंते कंदुका इव॥ इतो गच्छंति नरकं ततः स्वर्गमिहैव च॥४७॥
आवृत्तिभिर्निवर्त्तंते सरसीव तरंगकाः॥ तस्मात्त्वं तां परित्यज्य दृष्टां त्वं रघुनंदन॥४८॥ शुद्धां संविदमाश्रित्य वीतरागः स्थिरो भव
ज्ञानवानेव सुखभाग्ज्ञानवानेव जीवति॥४९॥ ज्ञानवानेव बलवांस्तस्माज्ज्ञानमयो भव संवेद्यवर्ज्जितमनुत्तममाद्यमेकं सं
वित्परं विकलनेकलयन्महात्मन्॥ हृद्येव तिष्ठ कलनारहितः क्रियां तु कुर्वन्नकर्तृपदमेत्य शमोदितश्रीः॥५०॥ मोक्षोपायेषू
पशमप्रकरणे संसृतिनिराकरणाक्रमयोगोपदेशः सर्गः॥ ९२॥

भेदाये षांतथाविधाभूता क्षीयंते मरणादिना पीड्यंते॥ ४६॥ इहैव दंशमशकादिजन्मावृत्तिभिर्निवर्त्तंते परिवर्त्तंते॥ ४७॥ एतां वर्णितदृष्टादिलक्षणां॥ ४८॥ आश्रित्य ज्ञात्वा॥ ४९॥ वि
कलनं निर्विकल्पं निर्विकारं च कलना चेतसो बाह्योत्थस्वतात द्रहित स्तन्निरोधशीलः सन् हृदि हार्दे ब्रह्मण्येव तिष्ठ व्युत्थानकाले तु यथोचितां क्रियां कुर्वन्नपि आ संग शमेन उदिता 
श्रीः प्रागुक्तजीवन्मुक्तगुणसंपद्यस्य तथाविधः सन् अकर्तृपदमेत्य तिष्ठेत्यर्थः॥ ५०॥ इतिश्रीवा॰ता॰प्र॰उ॰ द्विनवतितमः सर्गः॥ ९२॥

---

विचारप्रौढिवैराग्यद्वगुणोऽद्भवसंस्थितौ। विषयैरप्यस्खलद्दर्गं तेन समास्थितिः॥ तत्रादावल्पतरस्यापि विचारस्य चित्तनिग्रहस्वरूपसुखोत्पादनप्रवर्त्तनद्वारा क्रमान्मोक्षपर्यवसानं
भवतीत्याह मनागिति जन्मनः फलमित्यनेन विचारशून्यस्य जन्मैव निष्फलमिति ध्वनितं॥ १॥ तस्य जन्मसाफल्योपयोगितामुपादयति विचारेत्यादिना। विचारकल्पवृक्षस्य क
णिका अंकुरः॥ २॥ गुणाः प्रागुक्तशमदमादयः अंडजाः पक्षिणो मत्स्याश्च॥ ३॥ यथाभूतं यथार्थमात्मतत्त्वमवलोकयितुं शीलमस्य॥ स्फाराः प्रचयप्रकर्षाभ्यां रव्याता
अपि हैरण्यगर्भपदांतास्ते अविद्याकार्यभूताः विभवा नाशादयंति न प्रलोभयंति॥ ४॥ किं कुर्वंति कं विकारं जनयंति निर्विकारात्मभूतत्वात्तस्येति भावः॥ ५॥ तत्प्रलो

श्रीवसिष्ठ उवाच॥ मनागपि विचारेण चेतसः स्वस्य निग्रहः मनागपिकृतो येन तेनाप्तं जन्मनः फलं॥ १॥ विचारकणिकायेषां हृदि स्फुरति पेल
वा॥ एषैवाभ्यासयोगेन प्रयाति शतशाखतां॥ २॥ किं चित्प्रौढविचारं तु नरं वैराग्यपूर्वकं॥ संश्रयंति गुणाः शुद्धाः सरः पूर्णमिवांडजाः॥ ३॥
सम्यग्विचारिणां प्राज्ञं यथाभूतावलोकिनं॥ आसादयंत्यपि स्फारा नाविद्या विभवा भृशं॥ ४॥ किं कुर्वंतीह विषया मानस्योह्रत्नयत्नथा
आधयो व्याधयो वापि सम्यग्दर्शनसन्मतेः॥ ५॥ क्वोन्नमत्पवनाघ्रातदलित्तटलपाटलाः॥ पुष्करावर्त्तजलदा गृहीता बालमुष्टिभिः॥ ६॥
क्व नभोमध्यसंस्थेंदुर्मुग्धैर्मणिसमुद्गकैः॥ मुग्धयांगनया बद्धो मुग्धेंदीवरशंकया॥ ७॥ क्व कटप्रोच्चलद्भृंगमंडलोल्लसूरेखराः॥
मुग्धस्त्रीश्वासमधुरैर्मशकैर्मथिता गजाः॥ ८॥

मनासामर्थ्यमेवान्योक्तिभिर्द्रढयति क्वेत्यादिना॥ पुष्करावर्त्तारव्याः प्रलयजलदा बालमुष्टिभिः क्व गृहीताः॥ ६॥ मुग्धैर्विकासरम्यैरिंदीवरैः स्वनेत्रशोभापरा भवश
क्यमानद्विकासहेतुर्नभोमध्यसंस्थें दुर्मणिमयैः समुद्गकैः संपुटकैः क्व बद्धः॥ ७॥ कटेभ्यो गंडस्थलेभ्यः प्रोच्चलंति भृंगमंडलान्येवोल्लसन्ति दृश्या दुसलानि शेखरे युये
षां तथाविधा गजाः मुग्धस्त्रीश्वासैरपि पराणुद्यमानत्वात्प्रप्यमधुरैर्मशकैर्मथितानिहताः मुग्धस्त्रीभिः श्वासेन गजवधाय प्रेरणाद्धाम
धुरैरुत्साहरम्यैः॥ ८॥

[library stamps]

इभानां स्वविदारितगजानां मुक्ताफलसंबंधिभिरुद्गतैः कांतिमिलत्संतो नखपंजरा येषां ॥९॥ विषस्योद्गारस्तत्पच यस्तत्पत्युक्तैर्निर्यास प्रायैर्यैर्विषबिंदु भिर्दग्धा
२५८ उन्नतावनद्रुमा यैः अथवा स्वक्विदेशात्स्वदेहे मुहुः प्रसिताई शुष्क विषोद्गारास्तएव निर्यासाये षांतथाविधाः श्यामलाद्रुत्थितत्वाद्दग्धशरीरत्वर्जरद्रुमप्रायाः दे स्वा
शविशेषे द्रुमवदुत्थिताः मनुष्यवत्स्थूलतः श्यामा अजगरविशेषाः हृद्भ्रांत्या समीपगतान्मनुष्यादीन्परिहृतेन च्यात्तेन मुखेन झटिति ग्रसंतीति प्रसिद्धं बाल
दर्दुरैः क्षुद्रमेकैः ॥१०॥ प्राप्तचतुर्थपंचमादिभूमिकः किंतत उत्तरभूमिका जये उद्युक्तः ॥ ११ ॥ तत्पूर्वभूमिकास्वेवापक्वचित्तानां विघ्नप्रसक्तिर्नोत्तरत्रेत्याह वि

क्वेभमुक्ताफलोद्गारमलमत्सन्नखपंजराः ॥ सिंहाः समरसंरब्धाहरिणैः प्रविमर्दिताः ॥ ९ ॥ क्वविषोद्गारसनिर्यासदग्धोन्नतवन
द्रुमाः ॥ क्षुधिताजगराः क्षुब्धैर्निगीर्णा बालदर्दुरैः ॥ १० ॥ क्वप्राप्तभूमिको धीरोज्ञातज्ञेयो विवेकवान् ॥ आक्रांतः किलविक्रां
तो विषयेंद्रियदस्युभिः ॥ ११ ॥ विचारधियमप्रौढां हरंति विषयारयः ॥ प्रचंडपवनाप्रौढां कृत्तवृंतांलतामिव ॥ १२ ॥ नविवेकफल
वंप्रौढं भंक्तुंशक्ता दुराशयाः कल्पक्षोभमहाधीरं शैलं मंदानिलाइव ॥ १३ ॥ अगृहीतमहापीठं विचारकुसुमद्रुमं ॥ चिंतावात्या
विधुन्वंति नस्थिरस्थितिसुस्थितं ॥ १४ ॥ गच्छतस्तिष्ठतो वापि जाग्रतः स्वपतोपिवा ॥ नविचारमयं चेतो यस्यासौ मृतउच्यते ॥ १५
ध्या किमिदं स्याज्जगत्किं स्यादेहमित्यनिशं शनैः ॥ विचारयात्मदृशा स्वयं वा सज्जनैः सह ॥ १६ ॥ अंधाकारहरेणाशु विचारेणपरंप
दं ॥ दृश्यते विमलेवस्तु प्रदीपेनेव भास्वता ॥ १७

विचारेति । कृत्तवृंतां छिन्नप्रतानबंधनीं ॥ १२ ॥ दुष्टआशयः रागादिर्हृत
यः भंक्तुं विनाशयितुं नशक्ताः यथा अवांतरकल्पक्षोभेषु महाधीरं मेर्वादिशैलं भंक्तुं मंदानिलाः नशक्तास्तद्वत् ॥ १३ ॥ अगृहीतं महत् पीठं मूलबंधनं येनतं वि
चारः कोशविरक्तः आर्तवकुसुमप्रायाएव न तु फलितास्तथो विधद्रुमप्रायं ॥ १४ ॥ अतएव विचारविच्छित्तिकाले प्रमादाद्रोगादिभ्रत्युना सोग्रस्यतइत्याश राम. २५८
येनाहगच्छतइति । यस्ययदा तदा असोमृतइति योज्यं । तथा चोक्तं लैंगे सा हानिस्तन्महच्छिद्रं सांधता साचमूढता । यत्क्षणं वा मुहूर्तं वा शिवमेकं नचिंतयेदिति ॥ १५
स्वयमेकस्कांते वा सज्जनैर्गुरुसतीर्थ्यादिभिः सहवा ॥ १६ ॥ विचारस्य फलावश्यंभावमाह । अंधकारेति प्रमादांधकारहरेण ॥ १७ ॥

---

ज्ञानफले द्वे आह ज्ञानेनेति द्वाभ्यां ॥ १८ ॥ १९ ॥ ज्ञानलक्षणमाह येनेति । ज्ञेयब्रह्माकारत्वाद्भेदबाधरूपत्वाच्चाभिन्नमिव संस्थितं दृढं प्रतिष्ठितं २० २१ सदाज्ञे
यमयः अनुभूयमान ब्रह्मानंदप्रचुरः ॥ २२ ॥ संप्रसीदति निरस्ताविद्यातत्कार्य पंको भवति ॥ २३ ॥ सम्राट् राजाधिराज सत्तदात्मैव पूर्णमनोरथः ॥ २४ ॥ तस्य रागिजनस्पृ
हणीयेषु भोगघनासंगं प्रपंचयति ज्ञानवानित्यादिना ॥ सर्वेषां रमणीयतानां रतिं नयाती तिव्य वहितेनान्वयः ॥ २५ ॥ प्रावृट् प्रसरप्रयुक्त पुष्पेषु २६ २७

ज्ञानेन सर्वदुःखानां विनाशउपजायते ॥ कृतालोकविलासेन तमसामिव भानुना ॥ १८ ॥ ज्ञाने प्रकटतां याते ज्ञेयं स्वयमुदेत्यलं
रवावभ्युदितेभूमावालोक इव निर्मलः ॥ १९ ॥ येन शास्त्रविचारेण ब्रह्मतत्वं प्रबुध्यते । तज्ज्ञानमुच्यते ज्ञेयादभिन्नमिव संस्थितं
२० ॥ विचारोत्थात्मविज्ञानं ज्ञानमार्गविदुर्बुधाः ॥ ज्ञेयं तस्यांतरेवास्ति माधुर्यं पयसो यथा ॥ २१ ॥ सम्यग्ज्ञानसमालोकः पुमान्ज्ञेय
मयः स्वयं ॥ भवत्यापीतमैरेयः सदामदमयो यथा ॥ २२ ॥ समं स्वरूपममलं ज्ञेयं ब्रह्मपरं विदुः ॥ ज्ञानाभिगममात्रेण तत्स्वयं संप्र
सीदति ॥ २३ ॥ ज्ञानवान्तुरितानंदो न क्वचित्परिमज्जति ॥ जीवन्मुक्तो गतासंगः सम्राडात्मैव तिष्ठति ॥ २४ ॥ ज्ञानवान्हृद्यशब्देषु
वीणावंशरवादिषु ॥ कामिन्याः कांतगीतेषु संभोगमलिनेषु च ॥ २५ ॥ वसंतमदमत्तानां षट्पदानां स्वनेषु च । प्रावृड्भरः सुपु
ष्पेषु जलरस्तनितेषु च ॥ २६ ॥ उत्तांडवशिखंडेषु केकाकलरवेषु च । रणितां भोदखंडेषु सारसक्वणितेषु च २७ कर्तर्यादि
करांतेषु गंभीरमुरजेषु च ॥ ततावनद्धसुषिरचित्रवाद्यस्वनेषु च ॥ २८ ॥ केषुचिन्नविबध्नातिरूसेषु मधुरेषु च रणितेषुरतिं राम
पयोधिवनिशाकरः ॥ २९ ॥ ज्ञानवान्बालकदलीस्तंभपल्लवराजिषु ॥ सुरगंधर्वकन्यांगलतानंदनकेलिषु ॥ ३० ॥
कर्तरी सूचीशलाका स्वगकंटककरांतपोपायवादनीयेषु वाद्यभेदेषु तंत्रीमित्ततंत्रीवीणादि चर्मणा अवनद्धं मुरजादि सुषिरं वंशादि चित्रं परिशेषात् घनं कां
स्यतालादि च यद्वाद्यं तत्स्वनेषु च ॥ २८ ॥ २९ ॥ बालकदलीस्तंभानां पल्लवपंक्तयो यत्र सुरगंधर्वकन्यानामिवांगानि अवयवायासां तथाविधलताशालिनंदने केलिषु की

सुरगंधर्वकन्यांगलतानंदनकेलिषु ३०

वा॰टी॰उ॰प॰ २५९

स्पर्शरतिं भोगेच्छां ।। ३१ पिंडखर्जूरादयः फलजातिभेदाः ।। ३२. मदिरादयो मद्यजातिभेदाः ।। तक्रं पयसि दधिसेकात् पिंडीभूतं द्रव्यमामिक्षा ३३ आमिषे
षु मांसेषु ३४ स्वशरीरत्वचेषु स्वमांसखंडेष्विव ।। ३५ ।। दिक्पालपंक्तिपाठात् दुर्दर्शानः ।। ३६ कौशेयानी वस्त्रदुकूलानि स्निग्धानि दलजालानि पत्रवत्सम्राहाये
ष्विति प्राकृतनसानुविशेषणी देहशोभया दिव्यशरीरसंपत्त्याविलसनशीलेषु ।। ३७ ।। कुड्यपदेन तद्वयविनोदगृहालक्ष्यंते ।। ३८ अचलः द्वेषाग्रमकं

केषु कचिन्नवभातिस्वायत्तेष्वप्यसक्तधीः ।। रामस्पर्शरतिं धीरोहं सोमरुमहीष्विव ।। ३१ ज्ञानवान् पिंडखर्जूरकदंबपनसादिषु ।। मृद्वीको
वोरुकाक्षोटबिंबजंबीरजातिषु ।। ३२ ।। मदिरामधुमैरेयमाध्वीकासवभूमिषु ।। दधिक्षीरघृतामिक्षानवनीतोदस्वादिषु ।। ३३ षड्रसे
षु विचित्रेषु लेह्यपेयविलासिषु ।। फलेष्वन्येषु भूतलेषु शाकेष्वप्यामिषेषु च. ३४ ।। केषु चिन्नानुबध्नातितत्प्रभृति रसक्तधीः
लवे४ आस्वादनरतिं विप्रः स्वशरीरेष्विव ।। ३५ ।। ज्ञानवान्य मचंद्रेंद्रार्कानिलसद्मसु ।। मेरुमंदरकैलाससह्यदर्दुरसानुषु ।। ३६ ।। कौशेय ३६
दलजालेषु चंद्रबिंबकलादिषु कल्पपादपकुंजेषु देहशोभाविलासिषु ।। ३७ ।। रत्नकांचनकुड्येषु मुक्तामणिमयेषु ।। तिलोत्त
मोर्वशीरंभामनेकांगलतासु च ।। ३८ केषु चिद्दर्शनं श्रीमान्नाभिवांछत्यसक्तधीः ।। परिपूर्णमना मानी मौनी शत्रुषु चाचलः ।। ३९
ज्ञानवान्कुंदमंदारकल्हारकमलादिषु ।। कुमुदोत्पलपुन्नागकेतक्यगरुजातिषु ।। ४० ।। कदंबचूतजंबाम्रकिंशुकाशोकशा
खिषु ।। जयातिमुक्तसौवीरबिंबपाटलदामसु ।। ४१ ।। चंदनागुरुकर्पूरलाक्षाम्रगमदेषु च ।। काश्मीरजलवंगैलाकंकोलतग
रादिषु ।। ४२ ।। केषु चिन्नानिवध्नाति सौगंध्यरतिमेकधीः ।। समबुद्धिरविक्षोभो मद्यामोदेष्विव द्विजः ।। ४३

षः ।। ३९ ।। कुंदादिषु पुष्पजातीषु ।। ४० ।। कदंबादिवृक्षजातिषु ।। जयादिगुल्मवल्लीजातिषु ।। ४१ चंदनादिषु गंधरागभेदेषु लाक्षा अलक्तकरसः ४२. द्विजः मद्यामो राम॰ २५९
देष्विव रतिं न निबध्नाति प्रियाप्रिययोः समबुद्धिः अप्रियेष्वविक्षोभश्च ४३

एवं भयहेतुध्वनिष्वप्यतस्य भयं न जायत इत्याह अध्याविस्मारिना ।। प्रतिश्रुत्प्रतिध्वनिस्तद्रूपे त्वस्वने आकाशजशब्दे ।। ४४. पटहः आडंबरो गर्योवाद्यविशेषः ।। ४५ मत्तवा
रणानां हं हास्तुगर्जितेषु दृष्टहेर्गुरोश्च हलहरत्य भस्ययः ।। वेतालानां कलकलहादिध्वनिषु विशाचरक्षसां क्ष्वेडासु सिंहनादेषु ।। ४६ ऐरावणैरावतस्तस्य निनादेन ।। ४७ ।।
वहृत अचलतः क्रकचस्य काषेन घर्षणेन स्वरूपतः स्वरूपस्थितिलक्षणात् स्वभावेनकंपतेन चलतीत्यर्थः ।। ४८ ।। ४९ ।। इतैर्भस्यापसरणेनोज्वलितैरंगारैः समानि

रक्षे २

अब्धोरुद्गुडारावे प्रतिश्रुत्स्वस्वने गिरौ ।। निनादेष्वमरेंद्राणां न क्षुभ्यति मनागपि ।। ४४ ।। द्विपदुंदुभीनिनादेन पटहारवितेन च ।। कदृक्कोदंडघो
षेण न बिभेति मनागपि ।। ४५ ।। मत्तवारणहंहासु वेतालकलनासु च ।। विशाचैः क्ष्वेडासु न कंपते ।। ४६ ।। अशनिस्वनघोषेण नगस्फोटरवेण च मनागपि २
ऐरावणनिनादेन समग्रध्यानी न कंपते ।। ४७ ।। वहृत्क्रकचकाषेण सितासिदलनेन च ।। शराशनिनिपातेन कंपतेन स्वरूपतः ।। ४८ ।। नानंदमेत्सु
पवनेन स्वेदमुपगच्छति ।। न खेदमेति मरुषु नानंदमुपगच्छति ।। ४९ ।। इतांगारसमाकल्प्यसेकतेष्वपि धन्वसु ।। पुष्पप्रकरसंछन्नमृदुशा
शय्यासु ड्वलभूमिषु ।। ५० ।। क्षुरधारासु तीक्ष्णासु चंदनवोत्पलेः ।। उन्नताचलशेषु कूपकोशतलेषु च ।। ५१ ।। शिलास्वकांशुरूक्षासु मृद्वीषु ललना
नासु च संपत्स्वापत्सु चोग्रासु मरणे भूत्स्ववेषु च ।। ५२ ।। विहरन्नपि नोद्वेगी नानंदमुपगच्छति ।। अंतर्मुक्तमना नित्यं कर्मकर्त्तेव तिष्ठति
५३ ।। अयः संकुचिताग्रासु नरकारण्यभूमिषु ।। पत्रसारेरितानंतकुंत...तोमरहेतिषु ५४ न बिभेति निवादत्तैवैवस्यं न चदीनतां ।। समः स्वस्थ
मना मौनी धीरस्तिष्ठति शैलवत् ।। ५५ ।।

अकल्प्यान्य सम्यानिसेकतानि येषु तथाविधेषु धन्वसु मरुदेशेषु ।। ५० ।। कूपकोशस्य कूपोदरस्य तले अधोभूमिषु ५१ ।। अर्कांशुभिरूक्षासु प्रासासु कठिनासु च भरलेषु
क्रीडनेषु. ५२. भारवहनादिकर्मकर्त्ता श्रांतः पुरुषः भारोत्तारणाद्यथा अंतर्मुखमना विश्रांतिसुखमनुभवन्नुदासीनस्तिष्ठतीत्यर्थः ५३ अयो यंत्रैः संकुचितागासु यांडव्य
स्येवासार श्वशोषोपनीतासु नरकारण्यभूमिषु. ५४ वैवश्यं व्याकुलतां ५५

मलादिगोमयादिक्लिन्नंआर्द्रीभूतंनष्टंगतरसमपिमृष्टंपरिष्कृतमन्नंतद्वत् ५६ सद्योबुद्धिहरत्वेनप्रसिद्धस्यबिंबफलस्यप्रतिविषाणांविषप्रायाणांआकक्कानांसर्वतःकषायाणां क्षीरस्येक्षोः सलिलस्यअंधसः ओदनस्यच आस्वादनेविषयेसमसक्तत्वाचित्तोभवतीत्यर्थः ५७ रक्षःपिशाचादिष्वपिजीवन्मुक्तानां संभवात्तत्साधारण्येनाहमैरेयेति ५८ तस्यशत्रुमित्रयोरपिसमदृष्टिमाहजीवितस्येति जीवितस्यदातारमित्यपिसंबंधः ५९ स्थिरेषुस्थिरस्थायिषुदेवा

अपविचमपथ्यंचविषमिक्तंमलाद्यपि मुक्ताजरयतिक्षिप्रंक्लिन्नंनष्टंचमृष्टवत् ५६ बिंबप्रतिविषाकक्कक्षीरेक्षुसलिलांधसः असक्तबुद्धिस्तत्त्वज्ञोभवत्यास्वादनेसमः ५७ मैरेयमदिराक्षीररक्तमेदोरसासवैः रूक्षास्थितृणकेशांतैर्नहृष्यतिनकुप्यति ५८ जीवितस्यापिहर्तारंदातारंचैकरूपया दृशाप्रसादमाधुर्यशालिन्यापरिपश्यति ५९ स्थिरास्थिरशरीरेषुरम्यारम्येषुवस्तुषु नहृष्यतिग्लायतिवासदासमनैकया ६० मुक्तास्यत्वादनास्थेयरूपत्वाज्जगतःस्थितौ नन्वंविदितवेद्यत्वान्नीरागत्वाच्चचेतसः ६१ नकस्यचिन्नोकदाचिदक्षस्यविषयस्थितौ ददातिप्रसरंसाधुराधिप्रोज्झितयाधिया ६२ अतत्त्वज्ञमविश्रांतमलब्धात्मनमस्थितिं निगिरंतीन्द्रियारण्याश्रुहरिणाइवपल्लवं ६३ ऊह्यमानंभवांभोधौवासनावीचिवेल्लितं निगिरंतीन्द्रियग्राहामहार्कंदपरायणं ६४ विचारिणांभव्यपदंविश्रांतधियमात्मनि नहरंतिविकल्पोघाजलौघाइवपर्वतं ६५ सर्वसंकल्पसीमांतेविश्रांतायेपरेपदे तेषांलब्धस्वरूपाणांमेरुरेवतृणायते ६६ जगज्जरत्तृणलवोविषंवामृतमेवच क्षणःकल्पसहस्रंचसममाततचेतसां ६७

दिशरीरेषुस्थिरेषुमर्त्यादिशरीरेषुचरम्येषुतद्योग्यवस्तुषुचसमतयाइद्यादीक्षया ६० चेतसःनीरागत्वाद्विदितवेद्यत्वाच्चहेतोर्जगतःस्थितौमुक्तास्यत्वाद्विषयाणांचमिथ्यात्वेनआस्थायाअयोग्यरूपत्वाच्च अक्षस्यविषयस्थितौप्रसरंसदाविचाररससेवनात्कदाचिदपिनददातिकस्यचिदपिनददातीतिद्वयोरन्वयः ६१ कंतर्हिइंद्रियाणिनिगिरंतितमाहअतत्त्वज्ञमितिद्वाभ्यां ६३ ६४ लोभादिविकल्पाअप्यात्मज्ञंनचालयंतीत्याहविचारिणामित्यादिना ६५ ६६ आततचेतसांपूर्णात्मका



सर्वस्यजगतःआंतरप्रत्यक्चेतन्यमात्रत्वदर्शनादंतस्यजगत्काः ६८ ९ ईहतेइच्छतिउपादत्तेइतियावत् ७० अतीतेस्पृहायाअदर्शनादज्ञहरिणस्पृहणीयंवर्तमानंभमेःसकाशाद्यत्पदत्रयांकुरप्रायंविषयजातंजायतेयत्रभविष्यन्नत्स्यर्वतत्त्वज्ञदृशायथासंविदेवप्रथतेतथाविषयादितत्त्वांकुरमिवस्थितंशब्दस्पर्शादिविषयांतरमपीत्यर्थः ७१ उक्तार्थसिद्धौयुक्तिमाह आदाविति चकारस्त्वर्थे तस्यवर्तमानेमध्येकंचित्कालंलवंदृष्टासत्तासंविदोभ्रमएवेत्यर्थः ७२ इतिउक्तमर्थंमत्वामननेदृढीकृत्यभावाभावविकल्पानुपातिनीधियंत्यक्त्वा ७३ केवलैरासंगदोषशून्यैः कुर्वन्व्युत्थानकालेअकुर्वन्समाधिकाले ७४ मनोरथदृशा

संविन्मात्रंजगदितिमत्वामुदितबुद्धयः संविन्मात्रत्वादंतस्यजगत्काविहरंत्यमी ६८ संविन्मात्रेपरिस्पंदेजागतेवस्तुपंजरे किंहेयंकिमुपादेयमिहतत्त्वविदांमतं ६९ संविदेवेदमखिलंभ्रांतिमन्यांत्यजानघ संविन्मयवपुःस्फारंकिंजहातिकिमीहते ७० यदेतज्जायतेभूमेर्भविष्यत्पदत्रयांकुरं तत्संविदेवप्रथतेतथातत्त्वांकुरस्थितं ७१ आदावंतेचयन्नास्तिवर्तमानेपितस्यच कंचित्कालंलवंदृष्टासत्तासंविदोभ्रमः ७२ इतिमत्वाधियंत्यक्त्वाभावाभावानुपातिनीं निःसंगसंविद्रूपोभवभावांतमागतः ७३ कायेनमनसाबुद्ध्याकेवलैरिंद्रियैरपि कर्मकुर्वन्नकुर्वन्वानिःसंगस्तन्नलिप्यते ७४ गतसंगेनमनसाकुर्वन्नपिनलिप्यते सुखदुःखैर्महाबाहोमनोरथदशास्विव ७५ गतसंगमतिंकुर्वन्कुर्वन्नप्यंगयष्टिभिः नलिप्यतेसुखैर्दुःखैर्मनोरथदशास्विव ७६ गतसंगमनादृष्ट्वापश्यन्नपिनपश्यति सतरन्यस्यचित्तत्वाद्बालेनाप्यनुभूयते ७७ गतसंगमनाजंतुःपश्यन्नेवनपश्यति नशृणोत्यपिशृण्वंश्चनस्पृशत्यपिचस्पृशन् ७८

समनोराज्यविभवेषुनष्टेष्वनष्टेषुवायथासुखदुःखैर्नलिप्यतेतद्वत् ७५ अकर्त्रभोक्त्रात्मदर्शनेनमतिंगतसंगांकुर्वन् अंगयष्टिभिःशरीराद्युपकरणैः कुर्वन्व्यवहरन्नपि ७६ अन्यस्यचित्तत्वादिति अन्यव्यासक्तचित्तत्वात्पश्यन्नपिनपश्यतीत्येतद्बालेनापिशब्दाद्दरन्येश्चसर्वैरनुभूयतइत्यर्थः अन्यत्रमनाअभूवंनादर्शमन्यत्रमनाअभूवंनाश्रौषमितिश्रुतिरप्यत्रसंवादिनीतिभावः ७८

उन्मिषन्नेवेउन्मीलन्नपिनिमिषन्ननुन्मीलयन्नेव एवंकर्मेंद्रियगणेचपदार्थेस्वस्वविषयेसंस्कारबलात्पतत्स्वपिपतति अयंनपतति ७९ एतत्सर्श्यतोपदर्शनादिदेशां
तरस्थचेतोभिरन्यज्ञातमानसैरात्मनःस्वस्वदेहेस्थितैमरैवैःपामरैरप्रौढमतिभिर्बालपश्वादिभिश्चसामुसम्यगनुभूयतइतिनात्रविवादइत्यर्थः ८० तथाचसं
सक्तिपूर्वकंपदार्थदर्शनमेवबंधहेतुर्नासंसक्तचित्तस्येत्याशयेनाहसंगइति ८१ मोक्षंवर्तमानदेहादिसंबंधनिवृत्तिं अजन्मताभाविदेहादिबंधनिवारणमि

नजिघ्रत्यपिसंजिघ्रन्नुन्मिषन्निमिषन्नपि पदार्थेचपतत्येवंबलात्पततिनाप्ययं ७९ देशांतरस्थचेतोभिरेतदात्मगृहस्थितैः अप्रौ
ढमतिभिःसाधुमूढैरप्यनुभूयते ८० संगःकारणमर्थानांसंगःसंसारकारणं संगःकारणमाशानांसंगःकारणमापदां ८१ संगत्यागंवि
दुर्मोक्षंसंगत्यागादजन्मता संगंत्यजत्वंभावानांजीवन्मुक्तोभवानघ ८२ श्रीरामउवाच सर्वसंशयनीहारशमनमारुतहेमुने सं
गःकिमुच्यतेब्रूहिसमासेनममप्रभो ८३ श्रीवसिष्ठउवाच भावाभावेपदार्थानांहर्षामर्षविकारदा मलिनावासनायेषासासंगइ
तिकथ्यते ८४ जीवन्मुक्तशरीराणामपुनर्जन्मकारिणी मुक्ताहर्षविषादाभ्यांशुद्धाभवतिवासना ८५ तामसंगामितिधीया वि
द्धियावद्देहंचभाविनीं तयायत्क्रियतेकर्मनतद्बंधायवैपुनः ८६ अजीवन्मुक्तरूपाणांदीनानांमूढचेतसां युक्ताहर्षविषा
दाभ्यांबंधनीवासनाभवेत् ८७ सैवोक्तासंगशब्देनपुनर्जननकारिणी तयायत्क्रियतेकर्मतद्बंधायैवकेवलं ८८ एवंरूपंपरित्य
ज्यसंगंस्वात्मविकारदं यदितिष्ठसिनिर्व्यग्रःकुर्वन्नपिनलिप्यसे ८९ हर्षामर्षविषादाभ्यांयदिगच्छसिनान्यतां वीतरागभयक्रो
धस्तदसंगोसिराघव ९० दुःखेनग्लानिमायासियदिहृष्यसिनोसुखैः आशावैवश्यमुत्सृज्यतदसंगोसिराघव ९१ राम॰

तिभेदः ८२ किमितिसामान्येनपुंसर्कप्रश्नःस्पष्टः ८३ इष्टानिष्टपदार्थानांभावाभावेसंयोगेवियोगेचहर्षामर्षविकारदारागादिवासनैवसंगइतिकथ्यतइत्यर्थः २६१
८४ ८५ यावद्देहंप्रारब्धशेषक्षयपर्यंतं ८६ ८७ ८८ निर्व्यग्रःस्वस्थः ८९ समाहारद्वंद्वगर्भेतरेतरयोगद्वंद्व विचक्षणाद्धर्षामर्षविषादाभ्यामितिद्विवचनं अन्य
तांवैरूप्यं ९० आशयावैवश्यंपारवश्यं ९१

---

सत्सांम्यंब्रूसेकरस्यंनविमुंचसियदीत्यनुषंगः ९२ आत्माविच्छिन्नस्वभावः ९३ ९४ निगृहीताःइंद्रियलक्षणाःग्रहणतीतिग्रहाःपाशायेन ९५
भोगविक्षेपादिहेतौवस्तुजालेसदासमग्रेप्रचुरतरेसत्यपिसमाशयः अंतर्बहिरपिअदीनंस्पृहाद्यभावादिदैन्यवर्जितंसत्वंयस्यसत्ववर्णाश्रमोचितसहे

विहरन्व्यवहारेषुसुखदुःखदशासुच नविमुंचसिसत्साम्यंतदसंगोसिराघव ९२ संपद्यापदिचैवात्माय
दितेलक्ष्यतेसमः यथाप्राप्तानुवर्तीवतदसंगोसिराघव ९३ असंगतामनायासाज्जीवन्मुक्तिस्थितिं
स्थिरांअवलंब्यसमःस्वस्थोवीतरागोभवानघ ९४ जीवन्मुक्तमतिर्मौनीनिगृहीतेंद्रियग्रहः अमान
मदमात्सर्यआर्यस्तिष्ठतिविज्वरः ९५ सदासमग्रेपिहिवस्तुजालेसमाशयोप्यंतरदीनसत्वः व्यापारमात्रा
तसहजात्क्रमस्थान्नकिंचिदप्यन्यदसौकरोति ९६ यदेवकिंचित्प्रकृतंक्रमस्थंकर्तव्यमा
त्मीयमासौतदेव संसर्गसंबंधविहीनएवकुर्वन्नखेदंरमतेधियांतः ९७

जक्रमस्थाद्व्यापारमात्रादन्यत्किंचिदप्यसौनकरोति ९६ संसर्गःक्रियाभिनिवेशःसंबंधःफलाभिलाषस्तद्विहीनयैवधिया अंतःस्वात्मनिरमते
९७

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

वा॰टी॰उप॰ ॥२६२॥ संत्वायं प्रकृतं सर्वसिद्धं शांतिप्रसादसाम्यदर्शनादिस्वभावं नो जहाति ॥ यथा मंदरेण वेष्टितो मथितोपि क्षीरमयोंबुराशिः सहजं शौक्ल्यं न जहातीति तद्वत् ॥ ९८ ॥ आ
पदं दारिद्र्यादि सरीसृपत्वं इंदुमारादियोनिं ॥ अखेदोदयं अस्तहर्षं चेति स्थितिक्रियाविशेषणे ॥ क्षयोदयेषु फलेनानुपचयापचयकालेषु उदयास्तमय

अथापदं प्राप्य सुसंपदं वा महामतिः स्वप्रकृतं स्वभावं ॥ जहाति नो मंदरवेष्टितोपि शौक्ल्यं यथा क्षीरमयोंबुराशिः ॥ ९८ ॥
संप्राप्य साम्राज्यमथापदं वा सरीसृपत्वं सुरनाथतां वा ॥ तिष्ठत्यखेदोदयमस्तहर्षं क्षयोदयेष्विंदुरिवैकरूपः ॥ ९९ ॥ नि
भ रस्तसंरंभमपास्तभेदं प्रशांतनानाफलवल्गुवेषं ॥ विचारयात्मानमदीनसत्वो यथा भवस्युत्तमकार्यनिष्ठः ॥ १०० ॥

कालेषु वा ॥ ९९ ॥ दर्शितलक्षणजीवन्मुक्तिसुखप्राप्तो रागद्वेषभेदवासनाक्षयाभ्यासमहितः ॥ आत्मविचार एवोपाय इति तमेव रामायोपदिशन्नुपसंहरति निरस्ते
ति संरंभः क्रोधः ॥ एण्यपि क्रियाविशेषणानि यथा येन विचारेण उत्तमकार्यमवश्यसंपाद्यं चरमपुरुषार्थस्तन्निष्ठो भवसि तथा विचारयेत्यर्थः ॥ १०० ॥ राम॰ ॥२६२॥

---

वा॰टी॰उप॰ ॥२६३॥ तया विचारणया उदितप्रसरस्य समाधेर्विलासेन सर्ववासनाक्षयात्मशुद्धया समधिगतमात्मरूपं दृश्यमवश्यं दृश्यं वस्तु यया तथाविधया अत एव अविद्यातत्कार्यरा
हित्यमतया इद्धया दीप्त्या विगतज्वरं ॥ निर्दुःखनिरतिशयानंदरूपं परमपदं अवलंबय आश्रय ॥ तदवलंबने पुनर्जन्मनिःशंकावारणाय इह पुनरिहेति तस्मा
त्तत्साक्षात्कारेणैवाविद्यातत्कार्यसर्वानर्थोपशमनान्नित्यनिरतिशयानंदस्वरूपे प्रतितिष्ठेति सिद्धं ॥ १०१ ॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमः प्रकरणे

तयोदितप्रसरविलासशुद्धया गतज्वरं परमवलंबयामलं धियेद्धया पुनरिह जन्मबंधनैर्न ब
ध्यसे समधिगतात्मदृश्यया ॥ १०१ ॥ इति श्रीमहारामायणे शतसहस्रसंहितायां बालकांडे
वासिष्ठमोक्षोपाये उपशमप्रकरणे समदर्शनं नाम त्रिनवतितमः सर्गः ॥ ९३ ॥ उपशम
प्रकरणं संपूर्णं ॥

त्रिनवतितमः सर्गः ॥ ९३ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्सर्वज्ञसरस्वतीपूज्यपादशिष्यश्रीरामचंद्रसरस्वतीपूज्यपादशिष्यस्य श्रीगंगाधरेंद्र
सरस्वत्याख्यभिक्षोः शिष्येण श्रीमदानंदबोधेंद्रसरस्वत्याख्यभिक्षुणा विरचिते श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणं संपूर्णं ॥ सटीकग्रंथसं
ख्या ॥ १०५५० ॥ लिखितं लक्ष्मणरामवैष्णवेन ॥ शुभं भूयात् ॥ राम॰ ॥२६३॥